लेखक परिचय



नाम : डॉ. योगेश्वरदासजी स्वामी (सरधार - गुजरात)

गुरु : प.पू. श्रीनित्यस्वरूपदासजी स्वामी

जन्मदिनाङ्क : ०४-०७-१९७९

शिक्षा : नव्यव्याकरणाचार्य, वेदान्ताचार्य, नव्यन्यायाचार्य, पीएच.डी. (व्याकरणशाखा), डी.लिट.(Running)

कृतियाँ : १. श्रीस्वामिनारायणमहामंत्रमहिमा - गुर्जरभाषा, २. श्रीस्वामिनारायणमहामंत्रमहिमा - संस्कृत, ३. ब्रह्मदत्तजिज्ञासुना रचितस्य अष्टाध्यायीभाष्यप्रथमावृत्तिप्रथमपादस्य महाभाष्यदृष्ट्या समीक्षात्मकमध्ययनम्

लेखें : संस्कृतभारतीमासिकपत्रिका (राजस्थान) में १. शास्त्रभेदेन शब्दभेदः २. शास्त्रनिर्णीतनिपातविधानम् ३. परिभाषास्वरूपम् ४. अथ शब्दानुशासनम् ५. अथ शब्दानुशासनम् इति वाक्यं पाणिनेः पतञ्जलेर्वा

विशेषता : १. वेदान्ताचार्य में दो सुवर्णपदक की प्राप्ति, २. व्याकरणशाखा में पीएच.डी. में श्रीगोपालकृष्णट्रस्ट-जूनागढ के द्वारा विशेष सम्मानित, ३. सौराष्ट्रविश्वविद्यालय के संस्कृतपरिषद द्वारा आयोजित अन्ताराष्ट्रियसंस्कृतसम्मेलनम् में सम्मानित (२०१३)

दूरभाष : yswami108@gmail.com, Mo. +91 76000 23716

अस्मिन् प्रबन्धे न केवलं ब्रह्मदत्तजिज्ञासुना रचितस्य अष्टाध्यायीभाष्यप्रथमावृत्तिप्रथमपादस्य महाभाष्यदृष्ट्या समीक्षात्मकमध्ययनम्, अपि तु पाणिनिशिब्दशास्त्रपरम्परामधिकृत्य विविधविषयाः चिकित्सिताः । किं बहुना – मुनित्रयम्, काशिकावृत्तिकारौ वामनजयादित्यौ, वैयाकरणसिद्धान्तकौमुदीम्, व्याकरणसिद्धान्तसुधानिधिम्, शब्दरत्नम्, प्रदीपोद्योते, काशिकासिद्धान्तकौमुद्योष्टीकाकारान् जिनेन्द्रबुद्धिहरदत्तमिश्रनागेशभट्टज्ञानेन्द्रसरस्वतीवासुदेवदीक्षितप्रभृतीन्, तथैव अष्टाध्यायीभाष्यप्रथमावृत्तिस्थं महाभाष्यस्थञ्च यद् विषयजातं तदधिकृत्य यद् वक्तव्यं समालोच्यं वारितं तत्समीक्षाऽस्मिन् प्रबन्धे आधुनिकीं चिकित्सापद्धतिमाश्रित्य कृता । सर्वैरपि पूर्वाचार्यैः स्वस्वमतानुकूलतया सूत्रवार्तिकभाष्याणि व्याख्यायन्ते इति तेषामाधारग्रन्थत्वेन तदभिप्रायः प्रायशः मतभेदत्वेन न प्रदर्शितः । भाष्यादनन्तरं काशिकावृत्तेः प्रभृति लक्ष्मीनामकसिद्धान्तकौमुदीव्याख्यानग्रन्थपर्यन्तं ये ग्रन्था आविर्भूताः तत्र प्रधानतया ये मतभेदा दृष्टाः ते एव अत्र प्रदर्शिताः । तत्तन्मतनिरूपणानन्तरं कदाचित् समीक्षणे मदीयाभिप्रायः प्रकटितः । कदाचित् तेषामभिप्रायभेदनिरूपणमात्रं कृतम् । तत्र सर्वेषां ग्रन्थानामभिप्रायाः नामतो निर्देष्टुं न शक्यन्ते इति, यत्र प्रधानतया अभिप्रायभेदः जातः तत्रैव तत्तन्नामनिर्देशपुरस्सरमभिप्रायभेदः निर्दिष्टः ।

परिमल पब्लिकेशन्स
२७/२८ व २२/३, शक्ति नगर, दिल्ली - ११०००७ (भारत)
दूरभाष : २३८४५४५६, ४७०१५१६८

ISBN 81-7110-632-3
9788171106325
मूल्य : ₹ 795.00

अष्टाध्यायीभाष्यप्रथमावृत्तिप्रथमपादस्य महाभाष्यदृष्ट्या समीक्षात्मकमध्ययनम्

साधु योगेश्वरदासजी

PP

॥ श्रीहरिः ॥

ब्रह्मदत्तजिज्ञासुना रचितस्य

अष्टाध्यायीभाष्यप्रथमावृत्तिप्रथमपादस्य महाभाष्यदृष्ट्या समीक्षात्मकमध्ययनम्

:: लेखक ::

साधु योगेश्वरदासजी

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य

विद्यावारिधि (पीएच. डी) इत्युपाधये प्रस्तुतः शोधप्रबन्धः ।

THESIS SUBMITTED FOR THE DEGREE OF VIDYAVARIDHI (PH. D.)

OF SHREE SOMNATH SANSKRIT UNIVERSITY

विषयः

" ब्रह्मदत्तजिज्ञासुना रचितस्य अष्टाध्यायीभाष्यप्रथमावृत्तिप्रथमपादस्य महाभाष्यदृष्ट्या समीक्षात्मकमध्ययनम् "

मार्गदर्शकः

डॉ. वाचस्पतिमिश्रः

प्रधानाचार्यः

श्रीस्वामिनारायण - संस्कृतमहाविद्यालयः - जेतलपुरम् ।

प्रस्तोता

साधु योगेश्वरदासजी

श्रीस्वामिनारायण - मन्दिरम्,

सरधारः (गुजरातम्)

पञ्चीकरणसंख्या - 102 ***पञ्चीकरणदिनाङ्कः - 26 / 03 / 2013***

श्रीसोमनाथसंस्कृतविश्वविद्यालयः - वेरावलम्

राजेन्द्रभुवनमार्गः, जनपदः - जीर्णदुर्गः (गुजरातम्) - 362 265

घोषणापत्रम्

अनेन प्रतिज्ञापूर्वकमुद्घोष्यते यत् प्रस्तुतोऽयम् “ ***ब्रह्मदत्तजिज्ञासुना रचितस्य अष्टाध्यायीभाष्यप्रथमावृत्तिप्रथमपादस्य महाभाष्यदृष्ट्या समीक्षात्मकमध्ययनम्*** ” इत्याख्यो महाशोधनिबन्धः मया समुल्लिखितसन्दर्भग्रन्थानुसारं संशोधितः । भाष्यादनन्तरं काशिकावृत्तेः प्रभृति लक्ष्मीनामकसिद्धान्तकौमुदीव्याख्यानग्रन्थपर्यन्तं ये ग्रन्था आविर्भूताः तत्र प्रधानतया ये मतभेदा दृष्टाः ते एव अत्र यथाविभागमेकत्र प्रदर्शिताः इत्यस्यैव प्रबन्धस्य विशेषः । तत्तन्मतनिरूपणानन्तरं कदाचित् समीक्षणे मदीयाभिप्रायः प्रकटितः । कदाचित् तेषामभिप्रायभेदनिरूपणमात्रं कृतम् । महाशोधनिबन्धेऽस्मिन् निरूपितानि तथ्यानि निष्कर्षाश्च नितान्तं मौलिकाः सन्ति । महाशोधप्रबन्धस्यास्य मौलिकतां समुद्घोष्यन् तद् विषये सम्पूर्णमुत्तरदायित्वमावहामि ।

प्रस्तोता

. . . .

साधु योगेश्वरदासजी

श्रीस्वामिनारायण - मन्दिरम्, सरधारः (गुजरातम्)

शोधनिर्देशकस्य प्रमाणपत्रम्

अनेन प्रमाणीक्रियते यत् *साधु योगेश्वरदासजी* इति शोधच्छात्रेण प्रस्तुतोऽयम् ***" ब्रह्मदत्तजिज्ञासुना रचितस्य अष्टाध्यायीभाष्यप्रथमावृत्ति-प्रथमपादस्य महाभाष्यदृष्ट्या समीक्षात्मकमध्ययनम् "*** इति विषयमधिकृत्य विद्यावारिधिः (PH.D) इत्युपाधये शोधप्रबन्धः परिश्रमेण निष्ठया च रचितः । महाप्रबन्धोऽयमभिनवः शैल्या अस्माकं निर्देशानुमौलिकरूपेण सम्पन्नः कृतः । यावदहं जानामि यदस्मिन् विषयेऽयं शोधप्रबन्धोऽभिनव एवास्ति ।

मार्गदर्शकस्य हस्ताक्षरम्

. . . .

डॉ. वाचस्पतिमिश्रः
प्रधानाचार्यः
श्रीस्वामिनारायण - संस्कृतमहाविद्यालयः - जेतलपुरम् ।

॥ द्वे वचसी ॥

श्रीयोगेश्वरदासमहोदयेन पीएच.डी. उपाधि-प्राप्त्यर्थं वेरावलस्थे श्रीसोमनाथ-संस्कृत-विश्वविद्यालये प्रस्तुतः ब्रह्मदत्तजिज्ञासुना रचितस्य " अष्टाध्यायीभाष्यप्रथमावृत्तिप्रथमपादस्य महाभाष्यदृष्ट्या समीक्षात्मकमध्ययनम् " इति शीर्षकवान् संस्कृतभाषानिबद्धः शोधमहाप्रबन्धः मया स्वदृग्गोचरीकृतः। अस्मिन्नवसरे मया यदनुभूतम् तदत्र विदुषां परितोषाय संशोधकमहोदयस्य च प्रोत्साहनाय सादरं सविनयं च प्रस्तूयते।

क्वैषा वैयाकरणैः जिज्ञासुमहोदयैः विरचिता अष्टाध्यायीप्रथमावृत्तिः क्व च महावैयाकरणैः पतञ्जलिमुनिभिः विरचितम् महाभाष्यम्। या एषा प्रथमावृत्तिः सा तु आकारतः लघ्वी परमाणुवत् प्रतीयते। तच्च महाभाष्यं तु आकारतः महत् पर्वतवत् प्रतीयते। एवं सति उभयोः समीक्षा परमाणुपर्वतयोः समीक्षावत् भवेदिति संशयः। अथ च परमाणुः आकारेण प्रकारेण भारेण च लघुतमो भवति, पर्वतश्च तद्विपरीतं आकारेण प्रकारेण भारेण च गुरुतमः भवतीति प्रसिद्धम्। अतः किं संभाव्यतेऽत्र तादृशी तुलना, यादृशी तुलना तादृशं समीक्षाकर्म साधयितुं समर्था सक्षमा च भवेत् , यादृशं समीक्षाकर्म शोधमहाप्रबन्धे विद्वद्भिः अपेक्षते ? इत्येवं प्रकारकः प्रश्नः विचारशीलानां सज्जनानां मनसि समुदेति।

प्रश्नस्यास्य किमुत्तरमिति जिज्ञासायाम् एतत् अस्मदीयं समाधानम्।

यद्यपि भवतु नाम प्रथमावृत्तिमहाभाष्ययोः[1] आकारादितः भेदः, तथापि उभयोः पारस्परिकः सम्बन्धविशेषः अत्र प्रवर्तते एव। इति प्रथमः कल्पः।

ततः कदाचित् पर्वतात् परमाणोः उत्पत्तिर्भवति, कदाचित् च परमाणुभ्यः पर्वतस्य समुत्पत्तिः भवति। उभयत्रापि उभयोः पारस्परिकः सम्बन्धविशेषः। स च सम्बन्धः गुणविषयकः कर्मविषयकश्च भवति। अर्थात् यादृशः गुणः कर्म वा परमाणोः भवति तादृशः गुणः कर्म वा पर्वतस्यापि भवति। एवं महाभाष्यं नाम पर्वतः प्रथमावृत्तिः नाम परमाणुः। उभयोः गुणतः कर्मतः च कश्चित् सविशेषः सम्बन्धः अस्ति।

अस्य पारस्परिकस्य सम्बन्धविशेषस्य उद्घाटनाय अस्मिन् शोधप्रबन्धे शोधकमहोदयेन प्रयत्नः कृतः अस्ति। वस्तुतः जिज्ञासुमहोदयाः अष्टाध्यायीमहाभाष्ययोः समुपासकाः आसन्। ते महानुभावाः उभयोः अष्टाध्यायीमहाभाष्ययोः पठनपाठनपरम्परायाः पुनरुद्धाराय कृतसंकल्पाः आसन् इति विदितचरमेव विदुषाम्। अस्मिन् संकल्पे ते महाभाष्यविचारान् एव प्रथमावृत्तौ संक्षेपतः अवतारितवन्तः। अस्मिन् क्रमे तैः प्रत्येकम् अष्टाध्यायीसूत्रस्य पदच्छेदः, पदपरिचयः, सामासिकपदानां विग्रहः, अनुवृत्तिप्रदर्शनम् सूत्रार्थः उदाहरणम् चेति षट्कर्म आचरितवन्तः। अस्मिन् कर्मणि ते महाभाष्यतः दिशाग्रहणं कृतवन्तः।

अत एव अस्माभिः कथयितुं शक्यते यत् महाभाष्यरूपपर्वतात् प्रथमावृत्तिरूपः परमाणुः समुत्पन्नः। एतस्मात् कारणादेव उभयोः गुणकर्मरूपविचारदिशा एकैवास्तीति प्रतिपदं प्रतीयते। अनेन संशोधकेन एषा प्रतीतिः सविस्तरतः स्वशब्दैः समङ्किता इति मे मतम्।

तद्यथा – अत्र प्रतिसूत्रं महाभाष्ये तदनुकूलेषु च बहुषु ग्रन्थेषु विस्तरतः या विचारणा आकारीकृता वर्तते, सा स्वीयैः शब्दैः संक्षेपतः आकारीकृतात्र शोधार्थिना। वस्तुतः एतादृशः संक्षिप्तो विचार एवाष्टाध्यायीप्रथमावृत्तिपरिकल्पने जिज्ञासूनां मनसि मूलत्वेन रराजते स्म इति शोधार्थिनः। उदाहरणमुखेन केवलमेकमेव स्थलमत्र विचार्यतेऽस्माभिः।

अचः परस्मिन् पूर्वविधौ। पा.सू. 1.1.56 इत्यस्य सूत्रस्योपरि विचारतन्तून् तन्वन् शोधार्थी प्रायः दशपृष्ठात्मकः लेखः आकारितवानस्ति। अस्यैव विचारस्य प्रस्तुतिं कुर्वद्भिः तत्रभवद्भिः श्रीब्रह्मदत्तजिज्ञासुभिः प्रथमावृत्तिः आकारिता। यत्र खल्वेकतस्सूत्रस्य पदच्छेदः, पदपरिचयः, सामासिकपदानां विग्रहः, अनुवृत्तिप्रदर्शनं सूत्रार्थः उदाहरणञ्चेति षट्कर्म आचरितमस्ति,[2] अपरतः ग्रन्थान्ते रूपसिद्धिप्रक्रिया चाकारितास्ति।[3]

---

[1]. ग्रन्थकारेण एषः क्रमः स्वीकृतः इति विचार्य अस्माभिः स एवोरीकृतः। अस्मन्मते तु महाभाष्यप्रथमावृत्तिः – एषः क्रमः संगतोऽस्तीति। अत्र कारणं कालक्रमः अभ्यर्हितत्वं च।

[2]. द्रष्टव्यम् , प्रथमावृत्तिः प्रथमो भागः, पृ. 28 (अष्टमं संस्करणम् , सन् 2003)

[3]. द्रष्टव्यम् , प्रथमावृत्तिः प्रथमो भागः, पृ. 620 – 622 (तदेव)

यद्यपि एतत् सर्वं शोधप्रबन्धे प्रकटतया पठितुं न शक्यते, तथापि एतत् प्रदर्शयितुं यतमानः अयं शोधार्थी इति विचक्षणा दृष्टिः पश्यति यस्य कस्यापि । प्रथमावृत्तौ सूत्रव्याख्यानरूपा या सूत्ररूपसिद्धिप्रक्रिया प्रदर्शिता अस्ति, तस्यां यानि सूत्राणि प्रवर्तन्ते, तानि सर्वाणि सूत्राणि महाभाष्यगतविचारतः अवगन्तुं शक्यते, इत्यपि विदितचरमेव वैयाकरणानाम् ।

अथ च स्वं रूपं शब्दस्याशब्दसंज्ञा । पा.सू. 1.1.67 अस्य सूत्रस्य विचारश्रीगणेशं कुर्वन् शोधार्थी प्रथममेव कथयति – अस्य सूत्रस्य प्रथमावृत्तौ तावदेतादृशोऽर्थः दृश्यते .... । इत्यादि । अस्य वचनस्यायं भावः यत् वैयाकरणसिद्धान्तकौमुद्यां महाभाष्यगतविचारदिशातः विपरीतं विचार्य यादृशी सूत्रार्थविचारणा प्रवर्तते तादृशी विचारणा प्रथमावृत्तौ नास्ति । अपितु पतञ्जलिमुनिविचारानुरूपः सूत्रार्थोऽत्र प्रदर्शितः इति ।

एवं महाभाष्यरूपपर्वतात् प्रथमावृत्तिरूपपरमाणुः विरचितः श्रीजिज्ञासुवर्यैः इति अस्य शोधमहाप्रबन्धस्य सूत्ररूपः सारः । इति दिक् ॥

डो. कमलेशकुमार छ. चोकसी
प्रोफेसर तथा अध्यक्ष, संस्कृत विभाग,
भाषा-साहित्य-भवन, गुजरात युनिवर्सिटी,
नवरंगपुरा, अमदावाद (गुज.)
9825478876 (ईमेल – kamleshc24@yahoo.co.in)

॥ विषयानुक्रमणिका ॥

॥ पूर्वभूमिका ॥

वेदान्ता यन्महिम्नामवधिमनवगम्यैकदेशं स्तुवन्तो
विश्राम्यन्त्यप्यनन्ता विविधमपि जगद्यत्प्रतिष्ठं यतश्च ।
दिव्यानन्दस्वरूपः प्रणिहितमनसां योगिनामप्यगम्यः
सोऽयं भक्त्यैकगम्यः स्फुरति हृदि सदा स्वामिनारायणो नः ॥

श्रुतिस्मृतिसिद्धेन परमदयालुना परमात्मना श्रीहरिणा सर्वजनोद्धाराय अङ्गोपाङ्गादिविविध-शास्त्राणि तत्तन्महर्षिद्वारा प्रकाशितानीति निर्मत्सरविदुषां स्वानुभवरसिकानां च विदितमेव ।

सर्वे मतावलम्बिनः प्राच्याः पाश्चात्या विद्वांस एकमत्या स्वीकुर्वन्ति यत् – वेदा अखिलविद्यानामाकरभूता शेखरायन्ते । अतो वेदानामपौरुषेयत्वं सुप्रसिद्धम् । ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति श्रुत्यैतत् समादिश्यते यद् ब्राह्मणेन एकनिष्ठया वेदाध्ययनं सम्पाद्यम् । एतद् ब्राह्मणस्य परं तपः । सर्वज्ञानमयो हि स इति वदता मनुना वेदानां सर्वविधज्ञानविज्ञानत्वमङ्गीकृतम् । यदि विचारदृष्ट्या समीक्ष्यते तर्हि वेदेषु बीजरूपेण दार्शनिकसिद्धान्ताः, राजनीतिः, समाजशास्त्रम्, अन्याश्च विविधाः कलास्तत्र वर्ण्यन्ते । परन्तु तत्र व्याकरणशास्त्रस्य महत्त्वमतीव विस्तृततया वर्णनं दृश्यते ।

वैयाकरणे प्रकृतिप्रत्ययस्य विचारः, उदात्तादिस्वरविचारः, उदात्तादिस्वरसंचारनियमाः, सन्धिनियमाः, शब्दरूपधातुरूपादिनिर्माणनियमाः, प्रकृतेः प्रत्ययस्य च स्वरूपावधारणम्, तदर्थ-निर्धारणञ्चेति विविधा विषया विविच्यन्ते । व्याकरणेन न केवलं लौकिकशब्दानामेवानुशासनं क्रियते, अपि तु लौकिकवैदिकशब्दानामप्यनुशासनं तत्र कृतम् । अतो महाभाष्यकारेण पस्पशाह्निके उक्तं केषां शब्दानाम् ? । लौकिकानां वैदिकानां च । वेदकालतोऽद्यपर्यन्तं यावन्ति व्याकरणानि निर्मितानि तानि त्रिषु भागेषु विभाज्यन्ते । एकं छान्दसं व्याकरणम् । द्वितीयं तु लौकिकव्याकरणम्, तृतीयञ्च वैदिकलौकिकोभयविधं व्याकरणम् । तत्र वैदिकव्याकरणं प्रतिशाख्यादि । लौकिकव्याकरणं कातन्त्रादि । उभयविधव्याकरणं तु पाणिन्यादिव्याकरणम् । तत्र शतकोटिपाणिनिप्रभृतिनिगदितव्याकरणेषु

पाणिनिगदितव्याकरणं सर्वज्ञसकलशास्त्रयथार्थमर्मज्ञमहर्षिप्रकाशितं वर्तते । विश्वेऽस्मिन् सर्वासां प्राचीनानामर्वाचीनानां वा भाषाणां यावन्ति व्याकरणानि सन्ति, तानि सर्वाणि पाणिनीय-व्याकरणमतिशेते । इदं व्याकरणं नितान्तं सुन्दरं सूक्ष्मचिन्तनोद्भासितमद्भूतप्रतिभानिदर्शनं सूक्ष्मपदार्थ-प्रतिभासकं साङ्गोपाङ्गं भगवान् भास्वानिव भासते । तत्तत्पोषकत्वेन च कात्यायनप्रणीतं वार्तिकं महर्षिपतञ्जलियोगाचार्यप्रणीतं महाभाष्यं च वेदार्थपरिज्ञानप्रयोजनमज्ञानकर्दमकलुषित-जनवाणी-परिशोधने मूर्धन्यायते । अत एव यावन्ति संस्कृतव्याकरणानि दृष्टान्यनुमितानि पूर्णान्यपूर्णानि वा तेषु सर्वतो विश्रुतं लौकिकवैदिकशब्दसाधुत्वप्रदर्शकं पाणिनीयव्याकरणं मूर्धन्यषिक्तं राराज्यते । तदुक्तवान् भगवाञ्च्छ्रीपतञ्जलिः – ‘ सर्ववेदपारिषदं हीदं शास्त्रम् ’[1] इति ।

अत एव समग्रस्य पाणिनीयव्याकरणस्योपादेयत्वं मुक्तकण्ठेन पुराणेषु प्रतिपादितम् –

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ।। इति ।

अधुनापि वेदवेदाङ्गपोषितसंस्कृतवाङ्मयमहिमान्वितजगतीतले शब्दशास्त्रस्य प्राधान्यविषये कस्य वा विपश्चिच्चेतसो विप्रतिपत्तिः ? । महाकविर्दण्ड्यपि सम्पूर्णं वाङ्मयमेव शब्दज्योतिषां दीप्तिं प्राप्नुवन्महिमानं भावयत इति मुक्तकण्ठेन ब्रवीति । यथोक्तं काव्यादर्शे –

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।। इति ।

अत एव प्रधानं च षट्सु अङ्गेषु व्याकरणम्, मुखं व्याकरणं स्मृतम् इत्याद्युक्तयः स्वरसतः सङ्गच्छन्ते । शरीरिणोऽङ्गेषु यथा मुखं प्रधानं तथैव शब्दराशिरूपवेदस्याङ्गिनः षट्, तेषु अङ्गेषु व्याकरणं मुखम् । मुखमिव प्रधानत्वात् मुख्यं व्याकरणं वेदानुमोदितशास्त्राकराणां वेदानाञ्चार्थ-प्रकाशनाय सर्वैकमत्येन अङ्गीक्रियते । अतो भगवाञ्च्छ्रीपतञ्जलिः प्रास्तौच्चागमम् – ‘ ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ’ इति ।

अत एव मनुस्मृतावुक्तम् –

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।

स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ।।[2] इति ।

---

[1] महाभाष्यम् – (2-1-58)

[2] मनुस्मृतिः – (2-168)

वेदे हि रक्षिते सर्वं रक्षितं भवति। यदा हि लङ्कायां रावणेन सह भगवतो मर्यादापुरुषोत्तमस्य रामचन्द्रस्य युद्धारम्भो जातः, तदा भगवता रामचन्द्रेण श्रीमतो ज्ञानिनामग्रगण्यस्य हनुमतो विषये पृष्टं यत् स क्व वर्तते, कुशली चास्तीति ? तदा सर्वेषामिदं मनसि जातं यदन्येषां विषये भगवता न पृच्छयते यत् कः कुत्र कोणे स्थले वा विद्यमानो युद्धं कुरुते, कुशली न वेति कथं केवलं हनुमद्विषये एव रामचन्द्रस्य भगवतोऽभिन्नदृष्टेर्दृष्टभेद इति, तदा भगवता प्रोक्तम् –

तस्मिञ्जीवति दुर्धर्षे हतमप्यहतं बलम्।

हनुमति गतप्राणे जीवन्तोऽपि हता वयम्॥ इति।

तथा च यथा केवले हनुमति रक्षिते विद्यमाने सति सर्वरक्षेति तत्र स्थितिस्तेन न्यायेन वेदे हि रक्षिते सर्वं रक्षितं भवति। अत एव भगवता महाभाष्यकृता पतञ्जलिना व्याकरणमहाभाष्ये व्याकरणाध्ययनस्य प्रयोजननिरुक्तौ प्राथम्येन वेदरक्षैव प्रयोजनमुक्तम्। तथाहि – ‘ रक्षोहागमलघ्व-सन्देहाः प्रयोजनम् ’ इति।

तत्र रक्षापदेन कस्यचिदनिर्देशादन्यरक्षैव केवलं मा प्रसञ्जीतेति धिया स्वयमेव वेदरक्षापरक-तात्पर्यवत्त्वेन रक्षापदार्थस्य व्याख्यानमपि विहितम् – ‘ रक्षार्थं वेदानामध्येयं व्याकरणम् ’ इति।

इदं च व्याकरणं श्रीशङ्करप्रसादसमुपलब्धवर्णसमाम्नायमभ्युपगच्छता भगवता वेदाचार्येण ब्रह्मनिष्ठेन पाणिनिना “ वृद्धिरादैच् ”[3] इति सूत्रारम्भ्य “ अ अ ”[4] इति सूत्रपर्यन्तमष्टाध्याय्यात्मकं निरमायि। अष्टसु अध्यायेषु पुनः चतुर्षु पादेषु विभक्तेयमष्टाध्यायी। तद्विषयमाधारीकृत्य विद्वद्भिः त्रिधा विभक्ता दृश्यते। तद्यथा –

1. वाक्येभ्यः पदानां सङ्कलनम् – 1, 2 अध्याययोः।

2. पदानां प्रकृतिप्रत्ययविभागः – 3, 4, 5 अध्यायेषु।

3. प्रकृतिप्रत्ययैः सह आगमादेशानां संयोजनेन परिनिष्ठितपदानां निर्माणञ्च – 6, 7, 8 अध्यायेषु।

इदानीं प्रामाणिकस्य कस्यचित्संस्करणस्यानुपलब्धौ सूत्रसंख्याविषये च विदुषां मतभेदोऽस्ति। भगवता महाभाष्यकारेण परमप्रमाणभूतेन महाभाष्ये 1689 सूत्राण्येव व्याख्यातानि। तदतिरिक्तेषु

[3] अष्टाध्यायी – (1-1-1)

[4] अष्टाध्यायी – (8-4-68)

काशिका-सिद्धान्तकौमुदी-भाषावृत्ति-व्याकरणदीपिकादिग्रन्थेषु सूत्राणां संख्याविषये परस्परं मतवैषम्यं वर्तते। स्वरसिद्धान्तचन्द्रिकाया एकस्मिन् श्लोके 3995 संख्याकसूत्राणां निर्देशोऽस्ति।

तद्यथा –

चतुःसहस्री सूत्राणां पञ्चसूत्रविवर्जिता।
अष्टाध्यायी पाणिनीया सूत्रैः माहेश्वरैः सह ॥[5]

एवमेवैकस्मिन्नन्यस्मिन् श्लोके षण्णवत्युत्तरनवशताधिक-सहस्रत्रयसूत्रात्मिका 3996 संख्यापि स्वीकृता। तथा च श्लोकः –

त्रीणि सूत्रसहस्राणि तथा नवशतानि च।
षण्णवतिं च सूत्राणां पाणिनिः कृतवान् स्वयम् ॥[6]

अनयोर्द्विधा गणितयोः संख्ययोः चतुर्दशमाहेश्वरसूत्राण्यपि गणितानीति, अतस्तानि परित्यज्य ते क्रमशः 3981 इति 3982 चेति निश्चीयेते।

काशिकावृत्तौ प्रत्याहारसूत्राणि विहाय व्याख्यातसूत्राणां संख्या त्र्यशीत्युत्तर-नवशताधिकसहस्रत्रितयात्मिका (3983) संख्या निर्दिष्टा।

क्वचिच्च " एति संज्ञायामगात् "[7], " नक्षत्राद्वा "[8] इति सूत्रद्वयं गणत्वेन मत्वा अष्टाध्याय्याः सम्पूर्णसूत्रसंख्या 3981 एव निर्णीता। वस्तुतस्तु 3983 सूत्राणि सन्तीति विदुषां सिद्धान्तः।

व्याकरणशास्त्राद्वर्णमूलं शब्दज्ञानं भवति। शब्दज्ञानोत्तरं पदज्ञानम्। ततश्च पदज्ञानाद्वाक्यज्ञानम्। वाक्यज्ञानोत्तरम्, प्रतिपदवाक्यार्थबोधोत्तरं च सर्ववाङ्मयबोधो भवति। ततश्च वाङ्मयबोधाद् ब्रह्मदर्शनद्वारा मोक्षसिद्धिरिति शब्दब्रह्मानुसारिणां महाभाष्यकारादीनां सिद्धान्तः । अत एवैकस्यापि शब्दस्य सम्यक्प्रयुक्तस्य सम्यग्ज्ञातस्यापि च स्वर्गप्राप्तिः फलं भाष्यकाराणां संमतम् । यदाहुर्भाष्यकाराः श्रीमहाभाष्ये –

एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः।
स्वर्गे लोके कामधुग्भवति ॥ इति।

शब्दानां सम्यग्ज्ञानं सम्यक्प्रयोगो वा नहि शब्दशास्त्राध्ययनमन्तरेण संभवति, तस्मादध्येयं व्याकरणमिति तावत्सिद्धम् । तदेतद्व्याकरणशास्त्रं निखिलाशुद्धनिरासैककर्तव्यं सर्वशब्दशुद्धिप्रदं

---

[5] स्वरसिद्धान्तचन्द्रिकायाम् – (श्लोकः – 15)

[6] तत्रैव

[7] अष्टाध्यायी – (8-3-99)

[8] अष्टाध्यायी – (8-3-100)

सर्वैरपि शश्वत्समादर्तव्यं मनुजैः । यदि केषाञ्चिद् व्याकरणशास्त्रे प्रवेशो नास्ति तेऽकिञ्चित्करा उपहासास्पदं भवन्ति भव्यानाम् । एतदुक्तं केनचित्कविना निजपुत्रोपदेशसमये –

शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे ।
बद्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना ।।

किञ्च –

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो माभूत्सकलं शकलं सकृच्छकृत् ।।

एतेन चाशुद्धभाषणाशुद्धलेखनादिप्रमादविध्वंसनाय शुद्धशब्दप्रतिबोधाय च संप्रदायशुद्धि-पुरःसरं शब्दशास्त्रज्ञानमावश्यकं वाणीयुतानां सर्वमनुष्याणामिति हि सर्वजनमन्तव्यमूर्द्धन्यम् ।

व्याकरणबोधमन्तरेण शास्त्रावबोधोऽशक्यप्रायः, अत एव विभिन्नग्रन्थेष्वनेके प्राज्ञा व्याकरण-माहात्म्यं विशिष्टाभिरुपमाभिर्वर्णयन्ति । तद्यथा –

व्याकरणरहितश्चान्धो बधिरः कोशवर्जितः ।
काव्येन रहितः पङ्गुर्मूकस्तर्कविवर्जितः ।।

अत एव व्याकरणं ज्योतिरूपम्, यथा विना ज्योतिस्त्रिभुवनमन्धकारमयं भवति, तथा व्याकरण-ज्योतिर्विना भुवनमण्डलमिदमज्ञानतिमिरव्याप्तं भवेत् । अतः प्रोक्तम् –

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ।।

अत एव ज्ञानार्णवे नौकायते व्याकरणमेकमेव ।

यदि पत्रायते व्योम मेलानन्दायतेऽर्णवः ।
ब्रह्मायते लिपिकरस्तथाप्यन्तः कुतो गिराम् ? ।।

गगनं पत्रं स्यात्, समुद्रो मषीभाजनं स्यात्, चिरायुर्ब्रह्मा लेखकः स्यात्, तथापि गिरामन्तो न स्यात् । भगवान् पतञ्जलिरपि महाभाष्ये प्रथमे पस्पशाह्निके प्राह –

‘ एवं हि श्रूयते – बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम, बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम, किं पुनरद्यत्वे ? यः सर्वथा चिरं जीवति वर्षशतं जीवति ’ इति ।

एतदेवानुभूतिस्वरूपाचार्याः प्रोचुः –

इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः।

प्रक्रियान्तस्य कृत्स्नस्य श्रमो वक्तुं नरः कथम् ?॥ इति।

क्षीणबलाः, क्षीणायुष्काः, क्षीणप्रज्ञाः, क्षीणसत्त्वा वयं ज्ञानार्णवस्य बिन्दुमपि ज्ञातुं न शक्नुयामः। कानि कानि दर्शनानि, के के आगमाः, कति कति न्यायशास्त्राणि, विविधानि काव्यानि, भूरि ज्योतिर्ग्रन्थाः, कीदृशं विज्ञानम्, अपरा वैदिकश्रुतिस्मृतिग्रन्थाः, आयुर्वेद-भूगोल-खगोलादिविषयकं साहित्यवैपुल्यं च कथमेतेषां सर्वेषां क्षितितले विद्यमानानां ग्रन्थानामवबोधः पारयितुं शक्यः ?।

तस्मादेव ज्ञानार्णवे नौकायते व्याकरणमेकमेव। एवञ्चापरे खलु ज्ञानार्णवे स्वैरविहारं कर्तुं व्याकरणरूपनौकैव समर्था।

।। अथ प्रथमोऽध्यायः ।।

परात्परं परब्रह्म पूर्णब्रह्मसनातनम् ।
सर्वावतारिणं स्वेष्टं स्वाश्रितजनतारकम् ।।
भक्तिधर्मात्मजं नित्यं स्वामिनारायणं प्रभुम् ।
वन्देऽहं श्रीसहजानंदं वेदवेदाङ्गवन्दितम् ।।

यन्मूलं शास्त्रमाहुर्भवति तदितरन्नैव यस्मिन् प्रमाणम्
सिद्धेऽप्यन्वेति यस्मिन्ननवधिकमहानन्दरूपे फलत्वम् ।
कर्मज्ञानादयो यत्प्रसदनविधयो येन सर्वार्थसिद्धिः
यत्सेवा मुक्तिसीमा स दिशतु कुशलं स्वामिनारायणो नः ।।

सुदुर्ज्ञेयं नित्यं विविधनियमाचारनिरतैरपि ब्रह्मेशानप्रमुखसुरसङ्घैः स्वमहसा ।
मनस्तत्तूर्णं यः प्रसभमपि कुर्वञ्छ्रितवशे नरो भात्यज्ञानां दिशतु स मतिं मे हरिरसौ ।।

(क) पाणिनिव्याकरणस्य प्रधानवेदाङ्गत्वम्

वेदास्याङ्गं प्रधानं मुखमिव निखिलज्ञानराशेर्निदानम् ।
वाचां व्युत्पादकं व्याकरणमतिशयं क्षेमदं पण्डितानाम् ।।
शास्त्रारण्येऽप्यगम्ये कथमपि चलितुं तद्विहीनस्य पुंसः ।
सामर्थ्यं नैव कस्यापि भवति नितरां पाठ्यमेतत्सदैव ।।[1]

सुविदितमेतत् समेषां विदुषां यद्व्याकरणं नाम वेदाङ्गस्य प्रधानभूतं मुखाख्यमङ्गमिति लोकेऽपि प्रधानमङ्गं समेषां मुखमेवेति सर्वैरपि सुविदितम् ।

[1] सिद्धान्तचन्द्रिकायाः भूमिकायाम्

धर्माधर्मविवेकश्च साङ्गोपाङ्गवेदाध्ययनं विना नैव भवितुमर्हति । अत एव तु प्रतिपादितं भगवता पतञ्जलिना महाभाष्ये ‘ ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्ययो ज्ञेयश्च ’[2] इति । वेदास्तु भारतीयसंस्कृतेः मूलभूता मानवमात्रस्य लक्ष्यसिद्धये महानिधयः । नित्यशुद्धबुद्धसच्चिदानन्दघन-ब्रह्मणोपदिष्टत्वान्नित्या अपौरुषेयाश्च वेदाः । तदुक्तं यजुर्वेदे

तस्माद्यज्ञात् सर्व्वहुत ऋचः सामानि जज्ञिरे ।

छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥[3]

वेदानां नित्यत्वञ्च एतेनैव सिद्धयति । यतो हि शब्दानां नित्यत्वाद् वेदानाञ्च शब्दमयत्वात् तेषां नित्यत्वं निर्विवादमेव । तदुक्तं पतञ्जलिना ‘ नित्याः शब्दाः । नित्येषु शब्देषु कूटस्थैरविचालिभिः वर्णैः भवितव्यमनपायोपजनविकारिभिः ’ । अपि च ‘ श्रोत्रोपलब्धिबुद्धिनिर्ग्राह्यः प्रयोगेणाभिचालित आकाशदेशः शब्द इति ’[4] ।

अर्थात् लौकिका वैदिकाः सर्वेऽपि शब्दा नित्याः । यतो हि शब्दानां मध्ये कूटस्थाः, विनाशरहिताः, अचलाः, अनपायाः, अनुपजनाः, अविकारिणश्च वर्णाः सन्ति । तस्मात् शब्दानित्याः, शब्दानां नित्यत्वाद् वेदानामपि नित्यत्वम् । अत एव भगवता महाभाष्यकृता पतञ्जलिना व्याकरण-महाभाष्ये व्याकरणाध्ययनस्य प्रयोजननिरुक्तौ प्राथम्येन वेदरक्षैव प्रयोजनमुक्तम् । तथाहि – ‘ रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ’[5] इति ।

तत्र रक्षापदेन कस्यचिदनिर्देशादन्यरक्षैव केवलं मा प्रसञ्जितेति धिया स्वयमेव वेदरक्षापरकतात्पर्यवत्त्वेन रक्षापदार्थस्य व्याख्यानमपि विहितम् – ‘ रक्षार्थं वेदानामध्येयं व्याकरणम् ’ [6] इति ।

वेदो हि विश्वस्य सनातनं सर्वश्रेष्ठञ्च साहित्यम् । तत्र ऋग्वेदे ‘ यज्ञेन यज्ञमयजन्त देवाः ’[7] इत्यत्र यज्ञशब्दस्य कीदृशी साधीयसी यजधातुघटिता व्युत्पत्तिः प्रदर्शिताऽस्ति । एवमेव ‘ धान्यमसि धिनुहि देवान् ’ इत्यत्र यजुर्वेदे, [8] ‘ येन देवाः पवित्रेणात्मानं पुनते सदा ’ इत्यत्र सामवेदे,[9] ‘ तीर्थैस्तरन्ति ’

---

[2] महाभाष्यम् – पस्पशा.

[3] पुरुषसूक्तम् – ॥ 7 ॥

[4] महाभाष्यम् – पस्पशा.

[5] महाभाष्यम् – पस्पशा.

[6] महाभाष्यम् – पस्पशा.

[7] ऋग्. - (1-164-50)

[8] यजुर्वेद – (1-20-5)

[9] साम. उ. – (5-2-8)

इत्यादावथर्ववेदे[10] च धान्यादिशब्देषु प्रकृतिप्रत्ययविश्लेषणेन व्याकरणशास्त्रस्य मूलभूतः सङ्केतः सुष्ठूपलभ्यते।

एतज्जातीयमन्यदपि वैदिकं निदर्शनम्,[11] ‘ चत्वारि वाक् ’ इति मन्त्रस्य महर्षियास्ककृतं व्याख्यानम्,[12] ‘ चत्वारि श्रृङ्गा ’ इत्यादीनां पञ्चमन्त्राणां महर्षिपतञ्जलिकृतं व्याख्यानम्[13] चास्य शास्त्रस्य वेदमूलकत्वं सुष्ठु अवगमयन्ति । एवमेव गोपथब्राह्मणे,[14] मुण्डकोपनिषदि,[15] वाल्मीकीय-रामायणे,[16] महाभारतादिषु च बहुत्र वेदे तदनुगुणग्रन्थेषु चास्य सङ्केतः स्फुटमुपलभ्यते।

स च वेद एकोऽपि सन्नुपाधिभेदाच्चतुर्विधः, ऋग्यजुःसामाथर्वभेदात्। यद्यपि त्रय एव वेदाः, अत एव वेदत्रयीति प्रोच्यते। तथापि याज्ञिककर्मभेदेन मन्त्राणां भेदमाश्रित्य चतुष्टयमिति बोध्यम्। तथा च ब्राह्मणम् – ‘ ऋग्वेदमेव होतारं वृणीष्व, यजुर्वेदमध्वर्युम्, सामवेदमुद्गातारम्, अथर्वाङ्गिरं ब्राह्मणम् ’ इति । एवञ्च होतृकर्मोपयोगिमन्त्रसमूह ऋक् । अध्यर्युकर्मोपयोगिमन्त्रसमूहो यजुरिति । उद्गातृकर्मोपयोगिमन्त्रसमूहः सामेति । ब्रह्मकर्मोपयोगिमन्त्रसमूहोऽथर्वेति च व्यवहारः । अथर्वाख्येन ब्रह्मणा दृष्टत्वात् तन्नाम्नाऽयं वेदो व्यपदिश्यत इति स्थितिः ।

स चोपाधिवशाच्चतुर्विधभेदवान् वेदः षडङ्गः। मानवशरीरस्याङ्गानीव वेदानामपि षडङ्गानि प्रधानानि सन्ति। यथा – शरीरस्य रक्षार्थमङ्गानां महती आवश्यकताऽस्ति, तथैव वेदानां स्वरूपं तदर्थं चावगन्तुमेषामङ्गानां महत् प्रयोजनमस्ति । तथा हि शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषञ्चेति । तेष्वपि षट्सु अङ्गेषु मुखमिव प्रधानभूतत्वाद् मुख्यमङ्गं व्याकरणमेव । ‘ मुखं व्याकरणं स्मृतम् ’ इत्यवधारणीयमिदं प्रतिभाति यद् यथा मुखं विना भोजनाद्यकरणे शरीरस्य संरक्षणं सर्वथाऽकल्पनीयमस्ति तथैव व्याकरणं विना वेदपुरुषस्य शरीरसंधारणं संरक्षणञ्च नोपपत्स्यते । वर्णितञ्चास्य वेदपुरुषस्य मुखस्थानीयत्वं शिक्षायामपि भगवता पाणिनिना –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

---

[10] अथर्ववेदः – (18-4-7)
[11] ऋग्वेदः – (1-164-45)
[12] निरुक्तम् – (13-2)
[13] महाभाष्यम् – पस्पशा.
[14] गो.ब्रा. पू. – (1-24)
[15] मुण्डकोपनिषद् – (1-1)
[16] वाल्मीकीयरामायणः – (3-29)

शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् ।

तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।[17] इति ।।

शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसां च यः ।

ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु ।।

तेषामङ्गत्वञ्च वेदार्थप्रमित्यात्मकज्ञानजननोपयोगित्वेन । अत एव तेष्वङ्गत्वमङ्गित्वञ्च वेदे प्रकल्प्य व्यवहारः । तत्र षण्णामपि वेदाङ्गानां समासेन लक्षणानि प्रोच्यन्ते, येन स्वरूपमुपयोगश्च स्पष्टीभविष्यते । अन्यथा सामान्यतो ज्ञानेन नोपयोगसिद्धिः ।

1. शिक्षा – नाम तत्तद्वर्णानां स्थानप्रयत्नोच्चारणादिक्रमप्रदर्शको ग्रन्थविशेषो वर्णानां शास्त्रानुसारेणवर्णानुच्चारणे यदनिष्टं भवति तद् दर्शितं शास्त्रे

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।

स वाग्व्रजो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।[18]

सविध्युच्चारणे तु –

एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुष्ठु प्रयुक्तः ।

स्वर्गे लोके च कामधुग् भवति ।।[19] इति फलमुक्तम् ।

2. कल्पः – केषां मन्त्राणां कुत्र प्रयोग इति प्रयोगक्रमकल्पक आपस्तम्बादिमुनिप्रणीतो ग्रन्थविशेषः । तेऽपि बहवः, यथायथमुपयोगाय अपेक्ष्यन्ते । बहुत्वेऽपि सर्वेषामेव प्रामाण्यम् ।

3. व्याकरणम् – पुण्यजनकतावच्छेदकशब्दसाधुत्वबोधकः सूत्रात्मको लक्ष्यलक्षणात्मको वा ग्रन्थविशेषः । तदुक्तं महाभाष्ये लक्ष्यलक्षणे व्याकरणम् । लक्ष्यञ्च लक्षणञ्चैतत्समुदितं व्याकरणं भवति । किं पुनर्लक्ष्यं लक्षणञ्च ? शब्दो लक्ष्यः, सूत्रं लक्षणमिति । अथवा पुनरस्तु सूत्रम् इति च । तच्च शब्दसाधुत्वप्रयोजकं व्याकरणशास्त्रमपि बहुविधम् । तथा चोक्तम् –

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।

सारस्वतञ्चापिशलं शाकलं पाणिनीयकम् ।।

---

17 पाणिनिशिक्षा

18 महाभाष्यम् – पस्पशा.

19 महाभाष्यम् – पस्पशा.

यद्यप्यद्यत्वे विविधानि व्याकरणान्युपलभ्यन्ते तथापि नैतेषां वेदाङ्गत्वम् । निखिल-लौकिकालौकिकशब्दानां व्युत्पादकतया पाणिनीयव्याकरणमेव सर्वेषां मूर्धन्यं धन्यं च सद् वेदाङ्गतामाधत्ते।

4. निरुक्तम् – शब्दानामर्थनिर्वचनात्मको यास्कमुनिप्रणीतो ग्रन्थविशेषः। तच्च व्याकरणस्य एव परिशिष्टप्रायम्। बाहुलकादिसाध्यानां लोपागमविकारादीनां प्रायशस्तत्र संग्रहात्।

5. छन्दः – लौकिकान् वैदिकांश्च वाक्यविशेषान् पदविरामादिव्यवस्थापनेन नियमविशेष-व्यवस्थापरकः पिङ्गलादिमहर्षिप्रणीतो ग्रन्थविशेषः।

6. ज्यौतिषम् – सूर्यचन्द्रादिज्योतिर्द्वारा तत्तद्वेदशास्त्रादिकर्मानुष्ठानकालनिर्णयेष्टानिष्टफल-प्रदर्शको ग्रन्थविशेषः।

इत्थं वर्णितानामेषां वेदाङ्गानां सर्वेषामेव वेदार्थनिश्चायकत्वेन प्रामाण्यं समानमेव। तथापि व्याकरणशास्त्रं प्रधानं वेदाङ्गम्। यतो हि वेदास्तदङ्गानि च सर्वाणि शब्दस्वरूपाण्येव। तथा च पदपदार्थावगमस्यव्याकरणाधीनत्वाद् व्याकरणं प्रधानमङ्गम्, निराबाधं सर्वत्र तस्य गतेः। यथा हि "खरवसानयोर्विसर्जनीयः"[20] इति सूत्रमन्यप्रयोगेषु विसर्गं कुर्वत् स्वघटकपदेष्वपि विसर्गंप्रतिपादयति। तथा चोक्तं महाभाष्ये – 'प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति' इति।

विवृतञ्च प्रदीपे श्रीमता कैयटेन – 'पदपदार्थावगमस्य व्याकरणनिमित्तत्वात् तन्मूलकत्वाद् वाक्यवाक्यार्थावसायस्येति भावः' इति।

उपपादितञ्च नागेशभट्टेनोद्द्योते – ननु गुणानां परस्परसम्बन्धाभावात् 'षडङ्गेषु प्रधानम्' इत्यनुपपन्नम्, अत आह – पदेति। एवञ्च वेदार्थज्ञाने व्याकरणं प्रधानं कारणमिति भाव इति।

तत्र तावत् स्वाध्यायोऽध्येतव्य इति वेदाध्ययनं वेदबोधितम्। ते च वेदाः साङ्गा अध्येतव्या इति – 'तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते' इत्यादिशिक्षादिपर्यालोचनेन स्पष्टं प्रतीयते। वेदाङ्गेषु मुखमिव प्रधानमिदं व्याकरणं पाणिनीयम्।

अयम्भावः शरीरावयवेषु प्रधानाङ्गमुखमिव वेदाङ्गेषु व्याकरणं प्रधानमङ्गम्, अर्थात् व्याकरणं वेदस्य मुखं वर्तते। वाक्यपदीयस्य ब्रह्मकाण्डे भर्तृहरिणापि सूचितम्। यथा –

आसन्नब्रह्मणस्तस्य तपसामुत्तमं तपः।

[20] अष्टाध्यायी – (8-3-15)

प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणम्बुधाः ।। इति ।[21]

ब्रह्मणो वेदस्य शब्दमयस्य साधुस्वरूपबोधकत्वेन शब्दशास्त्रं व्याकरणं शिक्षाद्यपेक्षया साक्षादुपकारकत्वादन्तरङ्गम्, शिक्षादीनि तु तस्य स्वाध्यायानुष्ठानादिप्रकारबोधकत्वेन परस्परोपकारकाणि बहिरङ्गाणि । किं च केवलादृष्टफलकेभ्यः स्वाध्यायाधःशयनब्रह्मचर्यादिभ्यः चान्द्रायणव्रतोपवासादिभ्यश्च तपोभ्यो – विविक्तसाधुशब्दप्रयोगस्वरूपतदर्थयथार्थज्ञानरूपदृष्टफलकं पुण्यादृष्टफलकं च व्याकरणमुभयफलकत्वेनाधिकफलं श्रेष्ठतमं तपो दुरितापहम् । ज्ञानपूर्वकसाधुशब्द-प्रयोगस्येहामुत्र फलवत्त्वोक्तेः । अथ च छन्दसां वेदानां प्रथमं मुख्यं प्रधानं वाङ्गं व्याकरणमिति बुधाः ऋतम्भराभरणभूषिता ऋषयः प्राहुः कथयन्तीत्यर्थः । चतुर्दशसूत्रीव्याकरणस्याक्षरसमाम्नायस्य वेदरूपत्वात् । अपरञ्च –

‘ ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च । प्रधानं हि षट्स्वङ्गेषु व्याकरणम् । प्रधाने हि कृतो यत्नः फलवान् भवति ’[22] इति महाभाष्यवाक्येन व्याकरणस्य वेदाङ्गत्वम् । तदपि व्याकरणं प्रधानमङ्गम् । प्राधान्यञ्चोपादितं कैयटेन व्याकरणशास्त्रस्य प्रदीपे । तथाहि – प्रधानञ्चेति पदपदार्थावगमस्यव्याकरणनिमित्तत्वात् तन्मूलत्वाद् वाक्यवाक्यार्थावसायस्येति भावः[23]। प्रकृति-प्रत्ययतत्तदर्थविभागज्ञानपूर्वकं वेदशब्दतत्तदर्थज्ञानजनकत्वेनोपकार्योपकारकभावसम्बन्धेन वेदाङ्गत्वं व्याकरणस्य – इत्यादिवचनानुरोधेन व्याकरणस्य वेदाङ्गता सिद्धा भवति ।

(ख) व्याकरणाध्ययनस्य प्रयोजनम्

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्युत्पत्त्या करणार्थकल्युट्प्रत्ययान्तोऽयं व्याकरणशब्दः । शब्दानुशासनमिति व्याकरणस्यान्वर्थं नाम । शब्दानामनुशासनं शब्दानुशासनम् । येन विविक्ताः साधवः शब्दाः प्रकृतिप्रत्ययादिविभागत अनुशिष्यन्तेऽसाधुशब्देभ्यो विविच्य बोध्यन्ते तच्छास्त्रमत्र शब्दानुशासनमिति विज्ञेयम् । शब्दानामनुशासनमिति व्युत्पत्त्या करणार्थल्युट्प्रत्ययान्तोऽयमपि शब्दः ।

शब्दानुशासनं व्याकरणं खलु साधुशब्दान् शास्ति, असाधुशब्दान् अपाकरोति । व्याकरणं खलु लक्ष्यलक्षणरूपं भवति । अत्र लक्ष्यं तु प्रकृतिप्रत्ययात्मकं पदं वाक्यञ्चेति समुदीरितम् । भगवता

---

[21] वाक्यपदीय – ब्रह्मकाण्डः (श्लोक – 11)

[22] महाभाष्यम् – पस्पशा.

[23] प्रदीपः – तत्रैव

पतञ्जलिना महाभाष्ये पस्पशाह्निके प्रोक्तं चैतत् – ' लक्ष्यलक्षणे व्याकरणम् ' । लक्ष्यञ्च लक्षणञ्चैतत् समुदितं व्याकरणं भवति ।

व्याकरणस्य निर्वचनानि –

1. पूर्वपूर्वव्याकरणतः शब्दगुणदोषविद्धिरभियुक्तैः प्रकृतिप्रत्ययादिपरिकल्पनया कृतं शब्द-साधुत्वाख्यायकं शास्त्रं व्याकरणम् ।

2. शाब्दिकास्तु निःश्रेयसमुख्यफलकं शब्दानुशासनम् ।
यथा पाणिनिशाकटायनादिप्रणीतं व्याकरणमित्याहुः ॥

3. आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधाः ॥

4. व्याक्रियन्ते-व्युत्पाद्यन्ते प्रकृति-प्रत्यय-विभाग-द्वारा निष्पाद्यन्ते शब्दा अनेनेति व्याकरणम् ।

5. व्याक्रियन्ते-पृथक्क्रियन्तेसाधुशब्दाः, असाधुशब्देभ्यः प्रकृतिप्रत्ययादिज्ञानमहिम्नाऽनेनेति व्याकरणम् ।

6. व्याक्रियन्ते-व्युत्पाद्यन्ते शब्दा येनेति व्याकरणम् ।

7. व्याक्रियन्ते-परिज्ञायन्ते शब्दा अनेनेति व्याकरणम् ।

8. शब्दानुशासनं व्याकरणम् ।

9. लक्ष्य लक्षणं व्याकरणम् ।

10. प्रकृतिप्रत्ययविभागपूर्वकशब्दव्युत्पत्त्याधायकं शास्त्रं व्याकरणम् ।

11. भाषाया व्यावहारिकविश्लेषणमेव व्याकरणम् ।

12. व्याकरणं नाम शब्दसाधुत्वव्यवस्थापकं शास्त्रम् ।

13. प्रथमो हि विद्वांसो वैयाकरणाः ।

14. शब्दज्ञानजनकं व्याकरणम् ।

15. अनुशिष्यन्तेऽपशब्देभ्यः पृथक्कृत्य कथ्यन्ते साधुशब्दानुशासनम्।

16. नामरूपे व्याकरवाणि । (श्रुतिः)

17. व्याकरणन्तु वेदानां वेदः ।

18. व्याकरणज्ञाने सर्ववेदपारायणजं पुण्यमिति ।

19. शब्दसाधुत्वबोधकः सूत्रात्मको लक्ष्यलक्षणात्मको वा ग्रन्थविशेषो व्याकरणम् ।

20. प्रयोगशरणं व्याकरणम् । नावैयाकरणाय निर्ब्रूयात् ।

21. शब्दब्रह्मणि निष्णातः पर ब्रह्माधिगच्छति।

22. Grammar is a set of rules and regulations which controls and teaches us the correct use of the language.

23. आङ्ग्लभाषायां Grammar इतिपदं Grammatike techne इति ग्रीक्भाषापदाद् निष्पन्नम्। अस्यार्थो भवति – the art of letters.[24]

व्याकरणाध्ययनस्य किं प्रयोजनं किञ्च महत्त्वं का च तस्योपयोग्यता वर्त्तते इति विमृशन् महाभाष्ये पस्पशाह्निके महर्षिणा पतञ्जलिना व्याकरणाध्ययनप्रयोजनकथनावसरे मुख्यानि गौणभूतानि च प्रयोजनानि समुद्दिष्टानि सन्ति। भगवता भाष्यकृता ‘ अथ शब्दानुशासनम् ’ इति व्याकरणस्य साक्षात् प्रयोजनमभिहितम्। सन्ध्योपासनादिनित्यकर्मवत् व्याकरणशास्त्राध्ययनस्य प्रयोजनानि सन्ति किमिति जिज्ञासायामाह भगवान् भाष्यकारः – कानि पुनः शब्दानुशासनस्य प्रयोजनानि ? ‘ रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ’[25] इति। अस्य व्याकरणस्य को विषयः, किं प्रयोजनम्, कश्चाधिकारी, कः सम्बन्ध इति चेदत्रोच्यते – लौकिका वैदिकाश्च शब्दा विषयः, तज्ज्ञानं प्रयोजनम्, तज्जिज्ञासुरधीतकाव्यकोषादिरधिकारी, प्रतिपाद्यप्रतिपादकभावःसम्बन्धः। तत्रतच्च प्रयोजनमष्टादशविधं तथा हि वेदरक्षा, ऊहः, आगमः, लाघवम्, असन्देहः, अम्लेच्छतासम्पत्तिः, स्वरवर्णदोषराहित्यम्, सार्थकवेदज्ञानम्, साधुशब्दापशब्दयोर्धर्मार्थबोधः, प्रत्यभिवादे नाम्नि प्लुतिज्ञानम्, विध्यादिवाक्यघटकविभक्तिपदार्थादिज्ञानम्, पदाक्षरादिविभागज्ञानम्, चतुर्विधपदजातकालव्यङ्ग्यव्यञ्जकविभक्तिस्थानभेदज्ञानम्, (यद्वा सकलपदजातज्ञानम्) वाग्विस्तारसम्पत्तिः, असाधुशब्देभ्यो विविच्य सुशब्दज्ञानम्, अपशब्दप्रयोजन्यप्रत्यवायपरिहारकप्रायश्चित्ताभावः, नामकरणेषु विहितनामस्वरूपज्ञानम्, सर्व-विभक्त्यन्तानां सम्यगुच्चारणम्।

तदाह भाष्यकृत् – रक्षार्थं वेदानाम् अध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति। अयम्भावः – लोके लोपाद्यदृष्टं वेदे दृष्ट्वाऽवैयाकरणो भ्राम्येद्वैयाकरणस्तु न भ्रमति वेदार्थञ्चाध्यवस्यति।

ऊहः खल्वपि प्रयोजनम्। न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः, यथाऽऽग्नेययागेऽग्नेर्मन्त्रोऽस्ति – ‘ अग्नये त्वा जुष्टं निर्वपामि ’ इति तत्र सौर्ये चरु निर्वर्षेद् ब्रह्मवर्चकाम इति विधेः सूर्य्योद्देश्यताकत्वविवक्षायां सौर्य्ये चरौ

---

[24] संस्कृतशास्त्रमञ्जुषा – (पृ. – 60)

[25] महाभाष्यम् – पस्पशा.

मन्त्र ऊह्यते ‘ सूर्याय त्वा जुष्टं निर्वपामि ’ इति तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् ।

आगमोऽपि प्रयोजनम् । अत्रागमः प्रवर्त्तकोनित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति – ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । प्रधानञ्च षडङ्गेषु व्याकरणं च कृतो यत्नः फलवान् भवतीति ब्राह्मणस्याध्यापनं धर्मस्तच्चाध्यापनं वैदुष्यायत्तं तच्च शब्दार्थादिषु साध्वसाधुत्वप्रतियोगिक-भेदज्ञानाधीनम्, तच्च शब्दादीनां प्रतिपदपाठादिना दुश्शकं शब्दादीनामानन्त्यात्तस्माद् उत्सर्गापवादाद्यनुगमकलक्षणेन साध्यमतो लघ्वर्थं लाघवेन शब्दज्ञानमप्यस्य प्रयोजनम् ।

तदाह लघ्वर्थं चाध्येयं व्याकरणम् । ब्राह्मणेनावश्यं शब्दा ज्ञेया इति । न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुमिति । लाघवेन लोकव्यवहारस्य सम्यग्सम्पादनार्थं शब्दानां प्रयोगः शिष्टजनैः क्रियते । साधुशब्दानां व्यवहारेणाभीष्टमवाप्यते । अतो हि शिष्टा जनाः साधुशब्दानां ज्ञानलाभायातितरां यतन्ते । व्याकरणं विना लाघवेन साधुशब्दानां यथार्थज्ञानं न कदाचन जायते । प्रकृतिप्रत्ययविभागरूपस्य व्याकरणस्य ऋजुसरलपद्धत्या साधुशब्दानां ज्ञानं लाघवेन यथा सम्पद्यते नान्येन शास्त्रान्तरेण तथा सञ्जायते । लाघवेन शब्दज्ञानाय व्याकरणशास्त्रे यावन्त उपायाः समाश्रिता अणादिप्रत्याहारगुणवृद्धिसञ्ज्ञादिप्रयोगः तेष्वन्यतमो दृश्यते । ब्राह्मणेनावश्यं शब्दा ज्ञेया इति ।

असन्देहार्थं चाध्येयं व्याकरणम् । याज्ञिकाः पठन्ति – स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत इति । तस्यां सन्देहः – स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति । तां नावैयाकरणः स्वरतोऽध्यवस्यति । पूर्वपदप्रकृतिस्वराद् बहुव्रीह्यर्थावसायः[26] । समासान्तोदात्तस्वरात् तत्पुरुषार्थावसाय[27] इतीति भावः । स्वरविज्ञानं विना न कोऽपिप्रकृतिस्वरत्वं वाऽन्तोदात्तत्वं ज्ञातुं शक्तः । स्वरविज्ञानञ्च व्याकरणादेव भवति । तस्मादध्येयं व्याकरणम् ।

अयम्भावः – यदि तत्पुरुषसमासस्तदा “ समासस्य ” इति सामान्यसूत्रेणान्तोदात्तो भवति स्वरः । बहुव्रीहिसमासाश्रयणे तु “ बहुव्रीहौ प्रकृत्या पूर्वपदम् ” इति सूत्रेण पूर्वपदं प्रकृतिस्वरेण भवेत्, तत्र किंकर्तव्यमिति नावैयाकरणो निश्चेतुं शक्नोति वैयाकरणस्तु ह्यर्थविशेषाश्रयबहुव्रीहिनिबन्धनपूर्वपद-प्रकृतिस्वरमेव मनुते ।

तेऽसुरा हेलयो हेलयो इति कुर्वन्तः पराबभूवुः । तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै । म्लेच्छो ह वा एष यदपशब्दः । म्लेच्छा मा भूमेत्यध्येयं व्याकरणम् । तेऽसुराः देवान्प्रति तथा वक्तव्ये

---

[26] बहुव्रीहौ प्रकृत्या पूर्वपदम् – (6-2-1)

[27] समासस्य – (6-1-220)

तथाऽपशब्दं कुर्वन्तः पराभवमापुः । शास्त्रबोधितं यदुच्चारणं तद्विपरीतं यदुच्चारणं तद्विषयत्वादपशब्दः पापसाधकः तस्माद् ब्राह्मणेनापशब्दभाषणं सर्वथा वर्ज्यमित्यर्थः ।

दुष्टः शब्दः स्वरतो वर्णतो वामिथ्याप्रयुक्तो न तमर्थमाह।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति ।।

दुष्टाञ्शब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम् । अर्थात् यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तरं स्वरवर्णदोषात् प्रतिपादयन् नाभिमतमर्थमाह इत्यर्थः । स वागेव सन् वज्रो भूत्वा यजमानं मारयेद् हिंसकत्वात् । यथेन्द्रशत्रुशब्दः स्वरदोषाद् यजमानं हिंसितवानित्यर्थः । विश्वरूपनामके त्वष्टुः पुत्रे इन्द्रेणाहते सति रुष्टस्त्वष्टा इन्द्रस्य हन्तारं पुत्रान्तरम् उत्पादयिषुः आभिचारिकं यागं कृतवान् ।तत्रानुष्ठियमाने यज्ञे ' स्वाहेन्द्रशत्रुर्वर्धस्व ' इति मन्त्र ऊहितः । अस्मिन् मन्त्रे, ' हे अग्ने, त्वं विवर्धस्व, इन्द्रस्य विनाशो भव ' इत्यर्थोऽभीष्ट आसीत् । अस्यार्थस्य लाभाय अधिगमाय वा ' इन्द्रस्य शत्रुः इन्द्रशत्रुः ' इति षष्ठीतत्पुरुषसमासस्तत्प्रयुक्तः समासान्तोदात्तश्च स्वरः प्रयोक्तव्य आसीत्, किन्तु ऋत्विजाऽऽद्युदात्तः प्रयुक्तस्तेन बहुव्रीहिः समासोऽन्यपदार्थप्रधानो जातः । एतादृशेन विपरीतस्वर-प्रयोगेन विपरीतं फलमपि जातम् । अध्वर्युकृताद्धोमाद्यजमाने धर्मोत्पत्तिः, एवं तत्कृतापशब्द-प्रयोगात्तस्मिन् प्रत्यवाय इत्याशयः[28]।

यदि तत्पुरुषसमासस्तदा " समासस्य "[29] इति सामान्यसूत्रेणान्तोदात्तो भवति स्वरः । बहुव्रीहिसमासाश्रयणे तु " बहुव्रीहौ प्रकृत्या पूर्वपदम् "[30] इति सूत्रेण पूर्वपदं प्रकृतिस्वरेण भवेत् । तत्र किं कर्तव्यमिति नावैयाकरणो निश्चेतुं शक्नोति वैयाकरणस्तु – अर्थविशेषाश्रयबहुव्रीहिनिबन्धनपूर्वपद-प्रकृतिस्वरमेव मनुते । अतोऽवश्यमध्येयं व्याकरणमिति ।

यदधीतमविज्ञातं निगदेनैव शब्द्यते ।

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ।।

तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम् । यद् विज्ञातम् – अविदितं सुबादिसंस्कार-ज्ञानहीनत्वात्, अर्थज्ञानरहितत्वाद्वा, निगदेनैव – पाठमात्रेणैव, शब्द्यते – उच्चार्यते, तत् कर्हिचित् – कदाचिदपि, न ज्वलति न दीप्यते न प्रकाशतेन सफलम्भवति । यथा – अनग्नौ – अग्निरहिते भस्मनि, शुष्कैधः – शुष्केन्धनं न ज्वलति निरर्थकम्भवति तद्वदित्यर्थः । अर्थश्च व्याकरणमन्तरा न ज्ञातुं शक्यते ।

---

[28] तत्र उद्द्योतः

[29] समासस्य – (6-1-220)

[30] बहुव्रीहौ प्रकृत्या पूर्वपदम् – (6-2-1)

तस्मादर्थज्ञानं भवेदनर्थकं माऽधिगीष्महीत्यध्येयं व्याकरणम् । अनेन निन्दार्थवादेन निष्प्रयोजनाध्ययनानौचित्येन निष्प्रयोजनं नाध्येयमिति निषेधकल्पनादिति भावः । अतो निषिद्धमध्ययनं मा भूदिति व्याकरणमध्येयमिति तात्पर्यम्[31]

यस्तु प्रयुक्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले ।

सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ।।

यथार्थशब्दज्ञाने कुशलो – अधीतव्याकरणो मनुष्यः व्यवहारकाले यथास्थानप्रयत्नं ग्रस्तनिरस्तादि दोषरहितं शब्दान् प्रयुङ्क्ते,लक्षणस्मरणपूर्वकं यः प्रयुङ्क्तेस वाग्योगवित् परत्र परलोकेऽनन्तं जयं प्राप्नोति लभते । अवाग्योगविद् अपशब्दैः – अशुद्धशब्दोच्चारणैः दुष्यति पापीयान्भवति । शुद्धान्शब्दान् प्रयुक्ष्महीत्यध्येयं व्याकरणम् ।

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।

कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ।।

प्रत्यभिवादे – अभिवादनान्तरप्रयोज्ये वचने, हि गुरुणा प्लुतः कार्यः । यस्तु प्लुतं कर्तुन्न जानाति स स्त्रीवद्वक्तव्यः[32] – अयं अहम् – इति, न तु ‘ अभिवादये देवदत्तोऽहम् ’ इत्यादिना सङ्केतेन वाक्येन । अर्थात् स्त्रीषु नामगोत्रोच्चारणपूर्वकमभिवादनं न क्रियते किन्तु ‘ अयमहं नमामि ’ इत्युक्त्वाऽभिनयमात्रं क्रियते, तथाऽविद्वत्सु व्यवहर्तव्यमित्यर्थः।

व्याकरणाध्ययनं विना नाम्नः प्लुतादिविज्ञानं भवितुन्नार्हति । तदभावे च जनः अविद्वान् भूत्वा स्त्रीवत् सम्पद्यते । तस्मात्स्त्रीवन्माभूम इत्यध्येयं व्याकरणम् ।

विभक्तिं कुर्वन्ति – याज्ञिकाः पठन्ति – ‘ प्रयाजा सविभक्तिकाः कार्याः ’ इति । न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् । यथा ह्युक्तं ब्राह्मणे ‘ प्रयाजानुयाजेष्वेव विभक्तीः कुर्यात् ’ तत्प्रकरणस्य ब्राह्मणवाक्यमपि साधारणम् । तच्च सर्वं पुनराधेयमाग्नेयं न कार्यम्, किन्तु प्रयाजानुयाजेष्वेवाग्निविषया विभक्तिः कार्या । उदाहरणं यथा – ये यजामहे भूर्भुवः सुवः तनूपादग्न आज्यस्य व्येतु वौषट्, ये यजामहे भूर्भुवः सुवरिडोऽग्निनाग्ने आज्यस्य व्येतु वौषट्, ये यजामहे भूर्भुवः सुवर्बर्हिरग्निमग्ने व्येतु वैषट्[33] इति ।

[31] तत्र प्रदीपः

[32] तत्र प्रदीपः

[33] महाभाष्यनवाह्निकालोचनम् – (पृ. – 21)

प्रकृतौ तु – ‘ समिधोऽग्ने आज्यस्य व्येतुतनूनपादग्ने आज्यस्य व्येतु   इडोऽग्ने आज्यस्य व्येतु बर्हिरग्नि आज्यस्य व्येतु ’ । इति श्रुतौ सम्बुध्यन्ताग्निघटितमात्रपाठः । तथा चादितश्चतुर्षु प्रयाजमन्त्रेषु चतस्रो विभक्तयः सम्बुद्धिसप्तम्येकवचनतृतीयैकवचनद्वितीयैकवचनरूपा अग्निशब्दप्रकृतिविशिष्टाः ततः पूर्वं प्रयोज्या इति ।

तच्च व्याकरणं विना विभक्तिज्ञानं कथमपि न सम्भवम् । विभक्तिज्ञानं विना प्रयाज्यानां सविभक्तिककरणं कुतः स्यात् । तस्मात् सविभक्तिकप्रयाजकरणदक्षाः भवेम इत्यध्येयं व्याकरणम् ।

‘ यो वा इमां पदशः स्वरशोऽक्षरशो वाचं विदधाति स आर्त्विजीनो भवति ’ । आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम् । अर्थात् यो वै निश्चयेन इमां सन्निहितामपरोक्षां वाचं वेदरूपां वाणीं पदम्-पदं स्वरम्-स्वरं अक्षरम्-अक्षरं विदधाति संस्करोति स आर्त्विजीनो भवति यजमानः ऋत्विक्कर्मार्हः भवतीति विज्ञेयम् । पदस्वराक्षरविज्ञानञ्च व्याकरणादेव भवितुमर्हति । तस्मादार्त्विजीनाः स्याम इत्यध्येयं व्याकरणम् ।

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धा वृषभो रोरवीति महो देवो मर्त्यामाविवेश ॥

चत्वारि शृङ्गाणि – पदजातानि, नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाः त्रयः कालाः – भूतभविष्यद्वर्तमानाः । द्वे शीर्षे – द्वौ शब्दात्मनौ नित्यः कार्यश्च । सप्तहस्तासो अस्य – सप्त विभक्तयः । त्रिधा बद्धः – त्रिषु स्थानेषु बद्धः – उरसि कण्ठे शिरसीति । वृषभो वर्षणात् । रोरवीति – शब्दं करोति । कुत एतत् ? । रौतिः शब्दकर्मा । महोदेवो मर्त्याम् आविवेशेति । महान् देवः – शब्दः, मर्त्याः – मरणधर्माणो मनुष्याः, तानाविवेश । महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम् ।

तदुक्तं भर्तृहरिणा वाक्यपदीये –

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तं वृषभं येन सायुज्यमिष्यते ॥[34]
उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशति सुवासाः ॥

अपि खल्वेकः पश्यन्न पश्यति, अपि खल्वेकः शृण्वन्न शृणोत्येनामिति – अविद्वांसमाहार्धम् । उतो त्वस्मै तन्वं विसस्रे – तनुं विवृणुते । जायेव पत्य उशति सुवासाः । तद्यथा – जायेव पत्ये कामयमाना

[34] वाक्यपदीये – (1-131)

सुवासाः स्वमात्मानं विवृणुते, एवं वाक् वाग्विदे स्वात्मानं विवृणुते। वाङ् नो विवृणुयादात्मानमित्यध्येयं व्याकरणम्।

शास्त्रेषु ज्ञानस्य प्रशंसा, अज्ञानस्य निन्दा च श्रूयते। अस्मिन्नपि मन्त्रे पूर्वार्द्धे अज्ञानस्य निन्दा तथा उत्तरार्द्धे ज्ञानस्य प्रशंसा परिलक्ष्यते, एकः पश्यन् अपि वाचं मनसा न पश्यति, अर्थानभिज्ञत्वात्। स हि तां सम्यक् पश्यति यः तस्याः अर्थं विजानाति। अर्थपरिज्ञानफला हि वागित्यभिप्रायः। एवमेकः शृण्वन् अपि एनां वाचं न शृणोति। एवमर्धर्चेन अविद्वांसम् आह। उत्तरेण अर्धर्चेन अर्थज्ञं प्रशंसन् आह, अप्येकस्मै कस्मैचिदर्थज्ञाय, तन्वं तनुं शरीरं वा, विसस्रे विवृणोतीत्यर्थः। अर्थो हि वाचः शरीरं प्रकाशनमर्थस्याह अनया वाचा। कथं हि विवृणुते तन्वम्, जाया पत्य उशती सुवासाः। यथा हि ऋतुकालेषु षोडशरात्रिषु सुवासाः कल्याणवासाः, यदानीं रजस्का भवति तदा जाया पत्नी विवृतसर्वाङ्गावयवा भूत्वा, उशती कामयमाना पत्ये इष्टाय भर्त्रे प्रेम्णा दर्शयेदात्मानम्। तदा स पुरुषो यथा तां स्त्रियं पश्यति, एवं स एव एतां वाचं यथावत् शृणोतीति अर्थज्ञप्रशंसा।

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि॥

सक्तुः सचतेर्दुर्धावो भवति, कसतेर्वा विपरीताद्विकसितो भवति। तितउ–परिपवनं भवति, ततवद्वा, तुन्नवद्वा। धीराः – ध्यानवन्तः, मनसा – प्रज्ञानेन, वाचमक्रत – अकृषत ‘ अत्रा सखाय सख्यानि जानते ’ अत्र सखायः सन्तः सख्यानि जानते – सायुज्यानि जानते। अत्र पदेन न ज्ञायते कुत्रेति ? य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः। के पुनस्ते ये जानते ? वैयाकरणाः कुत एतत् ? भद्रैषां लक्ष्मीर्निहिता भवति। लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति।

अयं भावः – ये शास्त्रतः प्रकृतिप्रत्ययविभागेन साधून् शब्दान् ज्ञात्वा शास्त्रार्थाध्ययनवन्तो मानसज्ञानेन वाचमसाधुभ्यः पृथक् कृतवन्तस्ते तज्ज्ञानपूर्वकैः साधुशब्दप्रयोगैर्लब्धान्तःकरणशुद्धयोऽत्र य एष दुर्गो मार्गो ब्रह्मरूपस्तत्रात्मना सह समानख्यातयः – त्यक्तभेदभावनाः सख्यानि – सायुज्यानि प्राप्नुवते। यत एषां वाचि – वेदाख्ये ब्रह्मणि सर्वभासकब्रह्मरूपा सा अधि – अधिकं निहिता भवति।

सारस्वतीम् – याज्ञिकाः पठन्ति – ‘ आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत् ’ इति। प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्। यज्ञकर्मण्यपशब्दप्रयोक्तारो मा भूमेत्यध्येयं व्याकरणमिति फलितोऽर्थः।

याज्ञिकाः पठन्ति – दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् । तद्धि प्रतिष्ठिततमं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम् ।

नचान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम् । तस्मादध्येयं व्याकरणम् ।

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।

अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥

सुदेवो असि वरुण – सत्यदेवोऽसि, यस्य ते सप्त सिन्धवः । सप्त विभक्तयः, अनुक्षरन्ति काकुदम् – काकुदम् – तालु । काकुः – जिह्वा, साऽस्मिन्नुद्यत इति काकुदम् । सूर्म्यं सुषिरामिव । तद्यथा – शोभनाभूमिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः – सप्त विभक्तयस्ताल्वनुक्षरन्ति । सप्त विभक्तयः ताल्वनुप्राप्य प्रकाशन्त इत्यर्थः । तेनासि सत्यदेवः । सत्यदेवाः स्यामेत्यध्येयं व्याकरणम् ।

व्याकरणशास्त्राद्वर्णमूलं शब्दज्ञानं भवति । शब्दज्ञानोत्तरं पदज्ञानम् । ततश्च पदज्ञानाद्वाक्यज्ञानम् । वाक्यज्ञानोत्तरम्, प्रतिपदवाक्यार्थबोधोत्तरं च सर्ववाङ्मयबोधो भवति । ततश्च वाङ्मयबोधाद्ब्रह्मदर्शनद्वारा मोक्षसिद्धिरिति शब्दब्रह्मानुसारिणां महाभाष्यकारादीनां सिद्धान्तः । अत एवैकस्यापि शब्दस्य सम्यक्प्रयुक्तस्य सम्यग्ज्ञातस्यापि च स्वर्गप्राप्तिः फलं भाष्यकाराणां संमतम् । यदाहुर्भाष्यकाराः श्रीमहाभाष्ये –

एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः ।

स्वर्गे लोके कामधुग्भवति ॥ इति ।

शब्दानां सम्यग्ज्ञानं सम्यक्प्रयोगो वा नहि शब्दशास्त्राध्ययनमन्तरेण संभवति, तस्मादध्येयं व्याकरणमिति तावत्सिद्धम् । तदेतद्व्याकरणशास्त्रं निखिलाशुद्धनिरासैककर्तव्यं सर्वशब्दशुद्धिप्रदं सर्वैरपि शश्वत्समादर्तव्यं मनुजैः । यदि केषाञ्चिद् व्याकरणशास्त्रे प्रवेशो नास्ति तेऽकिञ्चित्करा उपहासास्पदं भवन्ति भव्यानाम् । एतदुक्तं केनचित्कविना निजपुत्रोपदेशसमये –

शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे ।

बद्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना ॥

किञ्च –

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।

स्वजनः श्वजनो माभूत्सकलं शकलं सकृच्छकृत् ॥

एतेन चाशुद्धभाषणाशुद्धलेखनादिप्रमादविध्वंसनाय शुद्धशब्दप्रतिबोधाय च संप्रदायशुद्धि-पुरःसरं शब्दशास्त्रज्ञानमावश्यकं वाणीयुतानां सर्वमनुष्याणामिति हि सर्वजनमन्तव्यमूर्द्धन्यम् ।

व्याकरणबोधमन्तरेण शास्त्रावबोधोऽशक्यप्रायः, अत एव विभिन्नग्रन्थेष्वनेके प्राज्ञा व्याकरण-माहात्म्यं विशिष्टाभिरुपमाभिर्वर्णयन्ति । तद्यथा –

व्याकरणरहितश्चान्धो बधिरः कोशवर्जितः ।
काव्येन रहितः पङ्गुर्मूकस्तर्कविवर्जितः ।।
इदमन्धः तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।।

अत एव व्याकरणं ज्योतिरूपम्, यथा विना ज्योतिस्त्रिभुवनमन्धकारमयं भवति, तथा व्याकरण-ज्योतिर्विना भुवनमण्डलमिदमज्ञानतिमिरव्याप्तं भवेत् । अत प्रोक्तम् –

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ।।

अद्यावधि ज्ञानार्णवे नौकायते व्याकरणमेकमेव ।

यदि पत्रायते व्योम मेलानन्दायतेऽर्णवः ।
ब्रह्मायते लिपिकरस्तथाप्यन्तः कुतो गिराम् ? ।।

गगनं पत्रं स्यात्, समुद्रो मषीभाजनं स्यात्, चिरायुर्ब्रह्मा लेखकः स्यात्, तथापि गिरामन्तो न स्यात् । भगवान् पतञ्जलिरपि महाभाष्ये प्रथमे पस्पशाह्निके प्राह –

‘ एवं हि श्रूयते – बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम, बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम, किं पुनरद्यत्वे ? यः सर्वथा चिरं जीवति वर्षशतं जीवति ’ इति ।

एतदेवानुभूतिस्वरूपाचार्याः प्रोचुः –

इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः ।
प्रक्रियान्तस्य कृत्स्नस्य श्रमो वक्तुं नरः कथम् ? ।। इति ।

क्षीणबलाः, क्षीणायुष्काः, क्षीणप्रज्ञाः, क्षीणसत्त्वा वयं ज्ञानार्णवस्य बिन्दुमपि ज्ञातुं न शक्नुयामः । कानि कानि दर्शनानि, के के आगमाः, कति कति न्यायशास्त्राणि, विविधानि काव्यानि, भूरि ज्योतिर्ग्रन्थाः, कीदृशं विज्ञानम्, अपराः वैदिकश्रुतिस्मृतिग्रन्थाः, आयुर्वेद-भूगोल-खगोलादिविषयकं साहित्यवैपुल्यं च कथमेतेषां सर्वेषां क्षितितले विद्यमानानां ग्रन्थानामवबोधः पारयितुं शक्यः ? ।

तस्मादेव ज्ञानार्णवे नौकायते व्याकरणमेकमेव । एवञ्चापरे खलु ज्ञानार्णवे स्वैरविहारं कर्तुं व्याकरणरूपनौकैव समर्था ।

(ग) अष्टाध्यायीग्रन्थस्य परिचयः

अष्टाध्याय्याः स्वरूपं नाम्नैव स्पष्टीभवति । अष्टानामध्यायानां समाहारः, अष्टाध्यायीसूत्रात्मिका च । अष्टभिरध्यायैर्गुम्फितैषा । यद्यपि आपिशलिव्याकरणस्यापि अष्टाध्यायात्मकत्वमस्ति, तथापि सर्वलोकविदितत्वादष्टाध्यायीशब्देन योगरूढ्या पाणिनीयाष्टध्यायी एव गृह्यते । अयं प्रसिद्धो ग्रन्थः प्रत्यध्यायं चतुर्धा विभक्तः द्वात्रिंशत्पादात्मकः । प्रतिपादं वैज्ञानिकक्रमेण न्यस्तानि लघूनि वाक्यानि सूत्रशब्देन व्याक्रियन्ते । सूत्रलक्षणं वायुपुराणे इत्थमुक्तम् –

अल्पाक्षरमसंदिग्धं सारवद्विश्वतो मुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ।।

विश्वतोमुखमिति सामान्यलक्षणं वक्तुं शक्यते । अपरञ्च –

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च ।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ।।[35]

भाष्यकृदनुसारं कोऽप्येको वर्णो निरर्थको न प्रयुक्तः – ‘ तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण ’[36] इति । नहि केवलं वर्णस्यैव, अर्धमात्राय अपि आनर्थक्यं दुःसहम् । एतत्सर्वम् एओङ्-ऐऔच् इति सूत्रभाष्यानुसन्धानेन ज्ञातुं शक्यते । अष्टाध्याय्या इयं संक्षिप्तता तर्कपूर्णा वैज्ञानिकी च ।

महर्षेः पाणिनेः व्याकरणं न तु केवलं श्रेष्ठं संस्कृतभाषाया व्याकरणमस्ति, अपितु वैदिकभाषाया अपि व्याकरणमस्ति । अतो हि तस्य व्याकरणमैतिहासिकं विवरणात्मकं द्वैकालिकञ्चेति विद्यते । वैदिकभाषाया व्याकरणं हि प्रातिशाख्यमुच्यते । वैदिकशब्दानां व्युत्पत्तिव्याकृतिनिर्वचन-स्वरोच्चारणादीनां विवेचनपरं शास्त्रं प्रातिशाख्यमिति मन्यते विद्वद्वर्यैः । वेदानां प्रत्येकशाखामधिकृत्य प्रवृत्तत्वात् हि इदं शास्त्रं प्रातिशाख्यपदेन सञ्ज्ञायते । शाखां शाखां प्रति प्रतिशाखम्, प्रतिशाखमधिकृत्य

[35] ब्रह्मसूत्रे भामती – (1-1-1)

[36] महाभाष्यम् – (1-1-1)

प्रवृत्तं शास्त्रं प्रतिशाख्यमित्युच्यते । “ अयस्मयादीनि छन्दसि ”[37], “ छन्दसि घस् ”[38],“ छन्दसि च ”[39],“ छन्दसि ठञ् ”[40],“ छन्दसि निष्टर्क्य……”[41],“ छन्दसि लिट् ”[42], “ छन्दसि लुङ्लङ्लिटः ”[43] इत्यादिसूत्रैः महर्षिणा पाणिनिना वैदिकभाषायाः प्रयोगपुरस्सरं विवेचनमपि महता प्रयत्नेन कृतम् । तत्रभवतः सूत्रकारस्य पाणिनेः बृहद्ग्रन्थकर्तृत्वं बृहद्द्रष्टृत्वं बहुश्रुतत्वं लोकोत्तरप्रज्ञाप्रकर्षत्वं चावलोक्य इदं प्रतिभाति यत् सूत्रकारस्य वैशारद्यं सर्वतो विशिष्टमेवासीत् ।

- **अष्टाध्याय्या नामान्तराणि**

भाष्यादिग्रन्थेषु पाणिनीयाष्टाध्याय्याः पञ्च नामानि अन्यान्यपि उपलभ्यन्ते । तानि हि –1. अष्टकम्, 2. अष्टिका, 3. शब्दानुशासनम्, 4. वृत्तिसूत्रम्, 5. मूलशास्त्रञ्चेति ।

1. अष्टकम् – पाणिनीयाष्टाध्याय्या इदमपरं नाम काशिकायां मिलति । तथाहि – अष्टौ अध्यायाः परिमाणमस्य सूत्रस्य इत्यष्टकम् । ‘ संख्याया संज्ञासंघसूत्राध्ययनेषु ’[44] इति सूत्रेण सूत्रेऽर्थे कन् प्रत्ययः तदनुसारमध्यायपादसूत्रात्मग्रन्थानां नामकरणं प्राक्काले अध्यायसंख्यामाधारीकृत्यैव भवति स्मेति प्रतीयते । तद्यथा – दशकं वैयाघ्रपदीयम्, त्रिकं काशकृत्स्नमित्यादि ।

2. अष्टिका – इदं नाम बालमनोरमाटीकायां समागतमस्ति ‘ अष्टिका पाणिनीयाष्टाध्यायी ’ इति ।

3. शब्दानुशासनम् – अष्टाध्याय्या इदं नाम महाभाष्यादिमे वाक्ये दृश्यते – ‘ अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ’ । तत्रैव कैयटः – ‘ व्याकरणस्य चेदमन्वर्थं नाम शब्दानुशासनम् ’ इति ।

4. वृत्तिसूत्रम् – सूत्रात्मकस्यास्य पाणिनीयव्याकरणस्य वृत्तिसूत्रमिदं नाम स्थानद्वये लभ्यते । तथा च भाष्यम् – ‘ न ब्रूमो वृत्तिसूत्रवचनप्रामाण्यादिति । किन्तर्हि ? वार्त्तिकप्रामाण्यादिति ’ पाणिनिसूत्रार्थे वृत्तिसूत्रशब्दस्य । वृत्तिशब्दो वस्तुतः सूत्रार्थप्रधानग्रन्थे योगरूढः ।

---

[37] अष्टाध्यायी – (1-4-20)
[38] अष्टाध्यायी – (5-1-106)
[39] अष्टाध्यायी – (5-1-67)
[40] अष्टाध्यायी – (4-3-19)
[41] अष्टाध्यायी – (3-1-123)
[42] अष्टाध्यायी – (3-2-105)
[43] अष्टाध्यायी – (3-4-6)
[44] काशिका – (5-1-48)

5. मूलशास्त्रम् – तैत्तिरीयप्रातिशाख्यटीकायां पाणिनीयाष्टाध्याय्या मूलशास्त्रपदेन सङ्केतः कृतः। तद्यथा – ' मूलशास्त्रे त्ववर्णपूर्वस्यापि कस्यचिद् " रो रि "[45] इति लोपः स्मर्यते '[46]

- **अष्टाध्यायीसूत्रसंख्या**

अष्टाध्यायीसूत्रसंख्याविषये अवश्यं निर्णयः कर्तव्यः । इदानीं प्रामाणिकस्य कस्यचित् संस्करणस्यानुपलब्धौ सूत्रसंख्याविषये च विदुषां मतभेदोऽस्ति। भगवता महाभाष्यकारेण परमप्रमाण-भूतेन महाभाष्ये 1689 सूत्राण्येव व्याख्यातानि । तदतिरिक्तेषु काशिका-सिद्धान्तकौमुदी-भाषावृत्ति-व्याकरणदीपिकादिग्रन्थेषु सूत्राणां संख्याविषये परस्परं मतवैषम्यं वर्तते । स्वरसिद्धान्तचन्द्रिकाया एकस्मिन् श्लोके 3995 संख्याकसूत्राणां निर्देशोऽस्ति।

तद्यथा –

चतुःसहस्री सूत्राणां पञ्चसूत्रविवर्जिता।
अष्टाध्यायी पाणिनीया सूत्रैः माहेश्वरैः सह ।।[47]

एवमेवैकस्मिन्नन्यस्मिन् श्लोके षण्णवत्युत्तरनवशताधिक-सहस्रत्रयसूत्रात्मिका 3996 संख्यापि स्वीकृता। तथा च श्लोकः –

त्रीणि सूत्रसहस्राणि तथा नवशतानि च।
षण्णवतिं च सूत्राणां पाणिनिः कृतवान् स्वयम् ।।[48]

अनयोर्द्विधा गणितयोः संख्ययोः चतुर्दशमाहेश्वरसूत्राण्यपि गणितानीति, अतस्तानि परित्यज्य ते क्रमशः 3981 इति 3982 चेति निश्चीयेते।

काशिकावृत्तौ प्रत्याहारसूत्राणि विहाय व्याख्यातसूत्राणां संख्या त्र्यशीत्युत्तर-नवशताधिकसहस्रत्रितयात्मिका (3983) संख्या निर्दिष्टा।

क्वचिच्च " एति संज्ञायामगात् "[49], " नक्षत्राद्वा "[50] इति सूत्रद्वयं गणत्वेन मत्वा अष्टाध्याय्याः सम्पूर्णसूत्रसंख्या 3981 एव निर्णीता। वस्तुतस्तु 3983 सूत्राणि सन्तीति विदुषां सिद्धान्तः।

---

[45] अष्टाध्यायी – (8-3-14)
[46] तैत्तिरीयप्रातिशाख्ये – (8-6)
[47] स्वरसिद्धान्तचन्द्रिकायाम् – (श्लोक – 15)
[48] तत्रैव
[49] अष्टाध्यायी – (8-3-99)
[50] अष्टाध्यायी – (8-3-100)

- **अष्टाध्यायीसूत्राणां प्रमुखविषयाः सामान्यज्ञानायात्र प्रसूयन्ते**

अष्टाध्याय्यां द्वात्रिंशत् पादाः 3983 सूत्राणि सन्ति।

प्रथमाध्यायस्य प्रथमपादः – " वृद्धिरादैच् " इत्यारभ्य " एङ् प्राचां देशे " पर्यन्तम् 75 सूत्राणि। अस्मिन्पादे वृद्धिगुणघुसर्वनामाव्ययसर्वनामस्थानलोपवृद्धादिसञ्ज्ञाप्रकरणानि तथा स्थानिवद्भाव-ग्रहणकशास्त्रप्रकरणञ्च विद्यते।

द्वितीयपादः – " गाङ्कुटादिभ्योऽञ्णिन्ङित् " इत्यारभ्य " ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री " इत्यन्तः 73 सूत्राणि। अस्मिन्पादे कित्प्रकरणम्, प्रातिपदिकप्रकरणम्, संख्यातिदेशप्रकरणम्, एकशेष-प्रकरणम् विद्यते।

तृतीयपादः – " भूवादयो धातवः " इत्यारभ्य " लुटि च क्लृपः " पर्यन्तम् 93 सूत्राणि।अस्मिन् पादे इत्संज्ञाप्रकरणम्, आत्मनेपदप्रकरणम्, कर्त्रभिप्रायप्रकरणम्, परस्मैपदप्रकरणम् अस्ति।

चतुर्थपादः – " आकडारादेका सञ्ज्ञा " इत्यारभ्य " विरामोऽवसानम् " पर्यन्तम् 110 सूत्राणि। अस्मिन्पादे नदीसञ्ज्ञाप्रकरणम्, घिसञ्ज्ञादिप्रकरणम्, पदसञ्ज्ञाप्रकरणम्, भसञ्ज्ञाप्रकरणम्, वचन-सञ्ज्ञाप्रकरणम्, कारकप्रकरणम्, निपातप्रकरणम्, गतिसञ्ज्ञाप्रकरणम्, कर्मप्रवचनीयप्रकरणम्, लादेश-प्रकरणं विद्यते।

द्वितीयाध्यायस्य प्रथमपादः – " समर्थः पदविधि " इत्यत आरभ्य " मयूरव्यंसकादयश्च " पर्यन्तम् 72 सूत्राणि। अस्मिन् पादे सामान्यसमासप्रकरणम्, अव्ययीभावप्रकरणम्, तत्पुरुषप्रकरणम्।

द्वितीयपादः – " पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे " इत्यत आरभ्य " कडाराः कर्मधारये " पर्यन्तम् 38 सूत्राणि। अस्मिन्पादे तत्पुरुषप्रकरणम्, बहुव्रीहिप्रकरणम्, द्वन्द्वप्रकरणम्, पूर्वनिपातप्रकरणं च अस्ति।

तृतीयपादः – " अनभिहिते " इत्यारभ्य " चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः " पर्यन्तम् 73 सूत्राणि। अस्मिन्पादे कारकप्रकरणम्।

चतुर्थपादः – " द्विगुरेकवचनम् " इत्यारभ्य " लुटः प्रथमस्य डारौरसः " पर्यन्तम् 85 सूत्राणि। पादेऽस्मिन् एकवद्भावप्रकरणम्, लिङ्गप्रकरणम्, आदेशप्रकरणम्, लुक्प्रकरणम्।

तृतीयाध्यायस्य प्रथमपादः – " प्रत्ययः " इत्यारभ्य " आशिषि च " पर्यन्तम् 150 सूत्राणि। पादेऽस्मिन् प्रत्ययप्रकरणम्, विकरणप्रकरणम्, कृत्यप्रकरणम्, कृत्प्रकरणम्।

द्वितीयपादः – " कर्मण्यण् " इत्यतः " मतिबुद्धिपूजार्थेभ्यश्च " पर्यन्तम् 188 सूत्राणि। अस्मिन् पादे कृत्प्रकरणम्, भूते कृत्प्रत्ययप्रकरणम्, वर्तमाने कृत्प्रत्ययप्रकरणम्।

तृतीयपादः – “ उणादयो बहुलम् ” इत्यतः “ स्मोत्तरे लङ् च ” पर्यन्तम् 176 सूत्राणि। अस्मिन् पादे भविष्यति कृत्प्रत्ययप्रकरणम्, घञ्प्रत्ययप्रकरणम्, अच्प्रत्ययप्रकरणम्, अप्प्रत्ययप्रकरणम्, क्त्यादिप्रत्ययप्रकरणम्, लकारार्थप्रत्ययप्रकरणम्।

चतुर्थपादः – “ धातुसम्बन्धे प्रत्ययाः ” इत्यारभ्य “ छन्दस्युभयथा ” पर्यन्तम् 117 सूत्राणि। लकारार्थप्रकरणम्, क्त्वाप्रत्ययप्रकरणम्, णमुल्प्रत्ययप्रकरणम्, तिङ्प्रकरणम्।

चतुर्थाध्यायस्यप्रथमपादः – “ ङ्याप्प्रातिपदिकाद् ” इत्यतः “ न प्राच्यभर्गादियौधेयादिभ्यः ” पर्यन्तम् 176सूत्राणि। स्त्र्यधिकारप्रकरणम्, तद्धितप्रकरणम्।

द्वितीयपादः – “ तेन रक्तं रागाद् ” इत्यतः “ कृकणपर्णाद्भारद्वाजे ” पर्यन्तम् 145 सूत्राणि। तद्धितप्रकरणम्।

तृतीयपादः – “ युष्मदस्मदोरन्यतरस्यां खञ्च ” इत्यतः “ कंसीयपरशव्ययोर्यञञौ लुक्च ” पर्यन्तम् 168 सूत्राणि। तद्धितप्रकरणम्।

चतुर्थपादः – “ प्राग्वहतेष्ठक् ” इत्यतः “ भावे च ” पर्यन्तम् 144 सूत्राणि। तद्धितप्रकरणम्।

पञ्चमाध्यायस्य प्रथमपादः – “ प्राक्क्रीताच्छः ” इत्यतः “ ब्रह्मणस्त्वः ” पर्यन्तम् 136 सूत्राणि। तद्धितप्रकरणम्।

द्वितीयपादः – “ धान्यानां भवने क्षेत्रे खञ् ” इत्यत आरभ्य “ अहंशुभमोर्युस् ” पर्यन्तम् 140 सूत्राणि। तद्धितप्रकरणम्।

तृतीयपादः – “ प्राग्दिशो विभक्तिः ” इत्यत आरभ्य “ ञ्यादयस्तद्राजाः ” पर्यन्तम् 119 सूत्राणि। तद्धितप्रकरणम्।

चतुर्थपादः – “ पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च ” इत्यत आरभ्य “ निष्प्रवाणिश्च ” पर्यन्तम् 160 सूत्राणि। तद्धिताधिकारप्रकरणम्, समासान्तविधिः।

षष्ठाध्यायस्य प्रथमपादः – “ एकाचो द्वे प्रथमस्य ” इत्यत आरभ्य “ समासस्य ” पर्यन्तम् 220 सूत्राणि। द्विर्वचनप्रकरणम्, सम्प्रसारणप्रकरणम्, आत्वप्रकरणम्, लोपप्रकरणम्, सन्धिप्रकरणम्, एकादेशप्रकरणम्, प्रकृतिभावप्रकरणम्, सुट्प्रकरणम्, स्वरप्रकरणम्।

द्वितीयपादः – “ बहुव्रीहौ प्रकृत्या पूर्वपदम् ” इत्यत आरभ्य “ परादिश्छन्दसि बहुलम् ” पर्यन्तम् 199 सूत्राणि। स्वरप्रकरणम्।

तृतीयपादः – " अलुगुत्तरपदे " इत्यत आरभ्य " सम्प्रसारणस्य " पर्यन्तम् 139 सूत्राणि । अलुक्समासप्रकरणम्, पुंवद्भावप्रकरणम्, उदादेशप्रकरणम्, ह्रस्वप्रकरणम्, मुमागमप्रकरणम्, सभाव-प्रकरणम्, क्याद्यादेशप्रकरणम्, दीर्घप्रकरणम् ।

चतुर्थपादः – " अङ्गस्य " इत्यत आरभ्य " ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छन्दसि " पर्यन्तम् 175 सूत्राणि । अङ्गाधिकारप्रकरणम्, दीर्धप्रकरणम्, आर्धधातुकोद्देश्यकविधयः, सार्वधातुकोद्देश्यकविधयः, एत्वादिविधयः, प्रकृतिभावविधिः ।

सप्तमाध्यायस्य प्रथमपादः – " युवोरनाकौ " इत्यत आरभ्य " बहुलं छन्दसि " पर्यन्तम् 103 सूत्राणि । अङ्गाधिकारप्रकरणम् ।

द्वितीयपादः – " सिचि वृद्धिः परस्मैपदेषु " इत्यत आरभ्य " किति च " पर्यन्तम् 118 सूत्राणि । वृद्धिप्रकरणम्, इड्निषेधप्रकरणम्, इडागमप्रकरणम्, विभक्तावादेशप्रकरणम् ।

तृतीयपादः – " देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् " इत्यतः आरभ्य " आङो नाऽस्त्रियाम् " पर्यन्तम् 120 सूत्राणि । उत्तरपदवृद्धिप्रकरणम्, पुगाद्यागमप्रकरणम्, विविधादेशप्रकरणम्, गुणप्रकरणम्, सार्वधातुकोद्देश्यकविधयः ।

चतुर्थपादः – " णौ चङ्युपधाया ह्रस्वः " इत्यत आरभ्य " ई च गणः " पर्यन्तम् 97 सूत्राणि । ह्रस्वविधयः, अभ्यासोद्देश्यकविधयः।

अष्टमाध्यायस्य प्रथमपादः – " सर्वस्य द्वे " इत्यत आरभ्य " विभाषितं विशेषवचने " पर्यन्तम् 74 सूत्राणि । द्विरुक्तिप्रकरणम् ।

द्वितीयपादः – " पूर्वत्रासिद्धम् " इत्यत आरभ्य " तयोर्य्वावचि संहितायाम् " पर्यन्तम् 108 सूत्राणि । असिद्धत्वप्रकरणम्, स्वरिताद्यादेशविधयः, लोपविधयः, निष्ठादेशप्रकरणम्, प्लुतविधयः ।

तृतीयपादः – " मतुवसो रु सम्बुद्धौ छन्दसि " इत्यत आरभ्य " निव्यभिभ्योऽड्व्यवाये वा छन्दसि " पर्यन्तम् 119 सूत्राणि । रुप्रकरणम्, अपदाधिकारः, मूर्धन्यविधयः, समासे मूर्धन्यविधिः ।

चतुर्थपादः – " रषाभ्यां नो णः समानपदे " इत्यत आरभ्य " अ अ " पर्यन्तम् 68 सूत्राणि । णत्वप्रकरणम्, श्चुत्वादिविधयः, द्वित्वप्रकरणम्, जश्त्वादिविधयः ।

- **अष्टाध्यायीसूत्राणां परस्परसम्बन्धिसामर्थ्यम्**

पाणिनीये व्याकरणे सूत्राणां परस्परसम्बन्धिसामर्थ्यम् अवलोक्य न किमपि अनर्थकं दृग्गोचरतां याति इति पतञ्जलिः आह – ' सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात् ' । "

उदक् च विपाशः "[51] इति सूत्रवृत्तिप्रसंगे पतञ्जलिः साश्चर्यं निर्दिश्यते यत् – ' महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य ' इति । अष्टाध्याय्यां सूत्राणां क्रमिको विन्यासोऽध्यायेषु पादेषु प्रकरणेषु अधिकारेषु च वर्गीकृतः। प्रकरणम् – एकार्थावच्छिन्नसूत्रसमुदायः । एकस्मिन्प्रकरणे समागतानि सर्वाणि सूत्राणि परस्परमनुगतानि मिथः क्रमापेक्षाणि च । तानि प्रकरणानि विज्ञानसंस्कारेणैव निबद्धानि । तेन तत्तत्प्रकरणस्य ज्ञानमनायासेनैव भवति । तद्यथा – सर्वनाम-इत्संज्ञा-आत्मनेपद-परस्मैपद-कारक-विभक्ति-समास-द्विवचन-संहिता-सेट्-अनिट्प्रकरणानां सूत्राणि परस्परं सुसम्बद्धानि वर्तन्ते । अतः तेषामर्थावबोधने काठिन्यं न जायते । एकस्मिन्प्रकरणे कानिचिदन्तः प्रकरणान्यपि भवन्ति । अन्तःप्रकरणेषु च प्रत्यन्तःप्रकरणानि च । प्रत्येकप्रकरणस्यान्तः प्रकरणस्य प्रत्यन्तःप्रकरणस्य चाद्यं सूत्रमधिकारसूत्रं भवति । अधिकारसूत्राणि अधिकृतसूत्रैः सह सम्मिल्य तानि सार्थयन्ति स्वयञ्च सार्थीभवन्ति । उत्तरोत्तरं सम्बन्धोऽधिकारः । क्रमवैशिष्ट्यविषये उदाहरणरूपेणैकमुच्यते ।

प्रथमाध्याये चतुर्थपादे " आकडारादेका संज्ञा "[52] इति आद्यं सूत्रम् । इदमधिकारसूत्रम् इत आरभ्य द्वितीयाध्यायस्य द्वितीयपादान्तं यावदेकसंज्ञाधिकारः प्रवर्तते । तेन आ एतस्मादवधेर्यदित ऊर्ध्वमनुक्रंस्यते, तत्र एका संज्ञा भविष्यति या पराऽनवकाशा च । एतत्सूत्रस्यायमर्थो " विप्रतिषेधे परं कार्यम् "[53] इति सूत्रसाहाय्येन लभ्यते । विप्रतिषेधः तुल्यबलविरोधः । अन्यत्रान्यत्र लब्धावकाशयोः शास्त्रयोः युगपदेकत्र समावेशः तुल्यबलविरोधः । तस्मिन् विप्रतिषेधे सति परं कार्यं भवतीति सूत्रार्थः । अस्मिन्नधिकारे पठितत्वादेव पूर्वपठितां लघुसंज्ञां परपठिता गुरुसंज्ञा बाधते । अपादानमुत्तराणि कारकाणि बाधन्ते । " क्रुधद्रुहोरुपसृष्टयोः कर्म "[54] इति सूत्रेण कर्मसंज्ञा सम्प्रदानसंज्ञां बाधते । गत्युपसर्ग-संज्ञे कर्मप्रवचनीयसंज्ञा बाधते । परस्मैपदसंज्ञामात्मनेपदसंज्ञा बाधते इत्येतस्मिन् आकडारीय-महाप्रकरणे पठितानां संज्ञासूत्राणामन्यत्रपठितसंज्ञासूत्रेभ्यो मौलिको विशेषः । परमेतत्प्रकरणे कानिचिद् अन्तःप्रकरणान्यपि सन्ति, यथा – भसंज्ञाप्रकरणम्, पदसंज्ञाप्रकरणम् कारकप्रकरणमित्येवमादीनि । चतुःसहस्रीमितेयमष्टाध्यायी एको महान् ग्रन्थः । तथापि सम्पूर्णापि अष्टाध्यायीचतुर्ष्वेवाधिकारेषु परिसमापिता तत्रापि अनुगमरूपेण दोषगुणचिन्तनानुप्राणितसिद्धान्तानुगामिनी च । ते अध्यायाः

[51] अष्टाध्यायी – (4-2-74)

[52] अष्टाध्यायी – (1-4-1)

[53] अष्टाध्यायी – (1-4-2)

[54] अष्टाध्यायी – (1-4-38)

संज्ञाधिकारः, प्रत्ययाधिकारः, अङ्गाधिकारः, पदाधिकारश्च । अधिकारेण सह अनुवृत्तिप्रक्रियापि सम्बद्धा। क्वचिच्च स्वरितत्वप्रतिज्ञया अधिकारव्यवस्थाऽस्ति।

- **शिष्टमध्येऽष्टाध्याय्या गणना**

" पृषोदरादीनि यथोपदिष्टम् "[55] इति सूत्रे भाष्ये वैयाकरणलक्षणप्रसङ्गे स्पष्टमुक्तं भगवता भाष्यकारेण – के पुनः शिष्टाः ? वैयाकरणाः । कुत एतत् ? शास्त्रपूर्विका हि शिष्टिः, वैयाकरणाश्च शास्त्रज्ञाः । यदि तर्हि शास्त्रपूर्विका शिष्टिः शिष्टिपूर्वकं च शास्त्रम्, तदितरेतराश्रयं भवति । ' इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते ' । एवं तर्हि निवासतश्चाचारतश्च । स चाचार आर्यावर्ते एव । कः पुनरार्यावर्तः ? प्रागादर्शात् प्रत्यक् कालकवनाद्दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम् । एतस्मिन्नार्यवर्ते आर्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याञ्चिद् विद्यायाः पारं गतास्तत्रभवन्तः शिष्टाः । यदि तर्हि शिष्टाः शब्देषु प्रमाणम्, किमष्टाध्याय्या क्रियते ? शिष्टपरिज्ञानाऽर्थाऽष्टाध्यायी । कथं पुनरष्टाध्याय्या शिष्टाः शक्या विज्ञातुम् ? अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानं ये वाऽस्यां विहिताः शब्दास्तान् प्रयुञ्जानम् । स पश्यति । नूनमस्य दैवानुग्रहः स्वभावो वा, योऽयं न चाष्टाध्यायीमधीते ये चास्यां विहिताः शब्दास्तांश्च प्रयुङ्क्ते अयं नूनमन्यानपि जानाति इति । एवमेषा शिष्टज्ञानार्थाऽष्टाध्यायी इति । अतः पाणिनीयं व्याकरणं सर्ववेदपारिषदं वेदितव्यमिति । पतञ्जलिः स्वयमाह ' सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात् ' इति

- **अष्टाध्यायीपाठस्य काश्चन प्रमुखा वृत्तयः**

अष्टाध्यायीव्याख्यानरूपेण सूत्रक्रमानुसारं विलिखिता नानावृत्तयः सन्ति।

स्वोपज्ञवृत्तिः – पाणिनिः (वि. पू. 2800 व. पू.),[56] अष्टाध्यायीवृत्तिः – कुणिः (वि. पू. 1200 व. पू.), माथुरीवृत्तिः – माथुरः (वि. पू. 1200 व. पू.), अष्टाध्यायीवृत्तिः श्वोभूतिः (वि. पू. 1200 व. पू.), अष्टाध्यायीवृत्तिः वररुचिः (श्रुतिः) (वै. प्रथमशतकम्), शब्दावतारन्यासवृत्तिः – देवनन्दी (वै. षष्ठशतकम्), शब्दावतारवृत्तिः – दुर्विनीतः (वै. षष्ठशतकम्), अष्टाध्यायीवृत्तिः – चुल्लिभट्टिः (वै. सप्तमशतकम्), अष्टाध्यायीवृत्तिः – निर्लुरः (वै. सप्तमशतकम्), अष्टाध्यायीवृत्तिः – चूर्णिः (वै. सप्तमशतकम्), काशिकावृत्तिः – जयादित्यवामनौ (वै. सप्तमशतकम्), भागवृत्तिः – विमलमतिः (

[55] अष्टाध्यायी – (6-3-109)

[56] संस्कृतवाङ्मयम् – पण्डितप्रवरः हरिकृष्णशास्त्रिदातारः

वै. सप्तमाष्टमशतके), अष्टाध्यायीवृत्तिः – भर्त्रीश्वरः (वै. अष्टमशतकम्), अष्टाध्यायीवृत्तिः – जयन्तभट्टः (वै. नवमशतकम्), अष्टाध्यायीवृत्तिः – केशवः (वै. द्वादशशतकम्), इन्दुमतीवृत्तिः – इन्दुमित्रः (वै. द्वादशशतकम्), दुर्घटवृत्तिः – मैत्रेयरक्षितः (वै. द्वादशशतकम्), लघुवृत्तिः (भाषावृत्तिः) – पुरुषोत्तमदेवः (वै. द्वादशशतकम्), दुर्घटवृत्तिः – शरणदेवः (वै. त्रयोदशशतकम्), शब्दकौस्तुभबृहद्वृत्तिः – भट्टोजिदीक्षितः (वै. षोडशशतकम्), सूर्यप्रकाशवृत्तिः – अप्पयदीक्षितः (वै. सप्तदशशतकम्), पाणिनीयदीपिकावृत्तिः – वाजपेयिनीलकण्ठः (वै. सप्तदशशतकम्), पाणिनीयमिताक्षरावृत्तिः – अन्नम्भट्टः (वै. सप्तदशशतकम्), शाब्दिकचिन्तामणिवृत्तिः – गोपालकृष्णशास्त्री (वै. सप्तदशशतकम्), व्याकरणदीपिका – ओरम्भट्टः (वै. एकोनविंशशतकम्), अष्टाध्यायीवृत्तिः (भाष्यम्) – दयानन्दः (वै. विंशशतकम्), अन्येऽपि विश्वेश्वरसूरिरचिता – वैयाकरणसिद्धान्तसुधानिधिः, अप्पननैनार्यकृता – प्रक्रियादीपिका, नारायणसुधीनिर्मिता – शब्दभूषणापरनाम्नी अष्टाध्यायीवृत्तिः, रुद्रधरकृता वृत्तिः, उदयनकृतो – मितवृत्त्यर्थसंग्रहः, रामचन्द्रकृता वृत्तिः, सदानन्दकृता तत्त्वदीपिका। इतीतोऽतिरिक्ता अपि नाना वृत्तय अज्ञातनामभिः कृता अष्टाध्यायी-विवेचनपरा वर्तन्ते।

- **अष्टाध्यायी-भाष्य-प्रथमावृत्तेर्वैशिष्ट्यानि**

अस्मिन् ग्रन्थे प्रतिसूत्रमनुवृत्तिः, वृत्तिः, सूत्रार्थः, सूत्रनिर्देशः, सूत्रप्रकारः, सन्धिविच्छेदः, विभक्तिनिर्देशः, अधिकारः, विवेचनम्, सिद्धिः, उदाहरणानि, प्रत्युदाहरणानि, समासाः, विग्रहवाक्यानि, वार्त्तिकम्, भाषार्थश्च शङ्कासमाधाननिर्देशपुरस्सरमुपलभ्यन्ते । यदध्ययनेऽध्येता इतरत्रानपेक्षः सोत्सुकः सन् सारल्येन व्याकरणनियमान् यथावद् ज्ञास्यति। सूत्राणां व्याख्या प्राचीनवृत्तीनामाधारेण महाभाष्यसहकारेण वा क्रियते स्म । मध्ये आवश्यकवार्तिकान्यपि कार्यनिर्देशपूर्वकमुद्धृतानि । ग्रन्थकारो बहूनामुदाहरणानां साहाय्येन क्लिष्टमपि विषयं सुगमं करोति । अत्र संक्षेपेण सूत्रार्थः अतिव्याप्त्यव्याप्तिदोषपरिहारपूर्वकं सोदाहरणञ्च विवृत्तः तेन कौमुद्युक्तः काशिकोक्तश्च गतार्थो भवति, ग्रहणे च सारल्यं भवति। अत्र यदेव छात्रबोधार्थमावश्यकम्, तद्वैशद्येन संक्षेपेण च प्रतिपाद्यते। उदाहरण-द्वारैतत्प्रदर्श्यते –

1. " वृद्धिरादैच् "[57] इति सूत्रे पदच्छेदः, विभक्तिः – वृद्धिः 1-1॥ आदैच् 1-1॥ समासः – आत् च = आच्च, ऐत् च = ऐच्च आदैच्, समाहारद्वन्द्वसमासः ॥ संज्ञासूत्रमिदम्॥

---

[57] अष्टाध्यायी – (1-1-1)

अर्थः – आ ऐ औ इत्येतेषां वर्णानां वृद्धिसंज्ञा भवति ॥

उदाहरणानि – भागः, यागः, त्यागः ॥ नायकः, चायकः, पावकः, स्तावकः, कारकः, हारकः, पाठकः, पाचकः ॥ शालायां भवः = शालीयः, मालीयः ॥ उपगोरपत्यम् = औपगवः, औपमन्यवः ॥ ऐतिकायनः, आश्वलायनः, आरण्यः ॥ अचैषीत्, अनैषीत्, अलावीत्, अपावीत्, अकार्षीत्, अहार्षीत्, अपाठीत् ॥ इतः ‘ वृद्धिः ’ इति शब्दस्यानुवृत्तिः 1-1-3 इति सूत्रपर्यन्तं गच्छति ।

2. “ तस्यादित उदात्तमर्धह्रस्वम् ”[58] इति सूत्रे पदच्छेदः, विभक्तिः – तस्य 6-1॥ आदितः अ. ॥ उदात्तम् 1-1॥ अर्धह्रस्वम् 1-1॥ समासः – अर्धं ह्रस्वस्य अर्धह्रस्वम्, “ अर्धं नपुंसकम् ”[59] इत्यनेन तत्पुरुषसमासः ॥ तस्येति सापेक्षकं पदं स्वरित इत्येतमनुकर्षति । ‘ आदितः ’ इत्यत्र ‘ तसिप्रकरणे आद्यादिभ्य उपसङ्ख्यानम् ’[60] इत्यनेन वार्त्तिकेन तसिः प्रत्ययः, “ तद्धितश्चासर्वविभक्तिः ”[61] इत्यनेनाव्ययत्वम् । अर्धह्रस्वमात्रम् अर्धह्रस्वम्, मात्रचोऽत्र ‘ प्रमाणे लो वक्तव्यः’ [62] इत्यनेन वार्त्तिकेन लोपो द्रष्टव्यः ॥ अर्थः – तस्य स्वरितस्यादौ अर्धह्रस्वम् उदात्तं भवति, परिशिष्टमनुदात्तम् ॥ उदा. – क्व, कन्या ॥

3. “ उच्चैस्तरां वा वषट्कारः ”[63] इति सूत्रे पदच्छेदः, विभक्तिः – उच्चैस्तराम् अ. ॥ वा अ. ॥ वषट्कारः 1-1॥ उच्चैः इत्यनेन उदात्तो गृह्यते, अयमुदात्तोऽयमुदात्तोऽयमनयोरतितरामुदात्तः = उच्चैस्तराम्, “ द्विवचनविभज्योपपदे तरबीयसुनौ ”[64] इत्यनेन तरप्प्रत्ययः, ततः “ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ”[65] इति आम् ॥ अनु. – यज्ञकर्मणि, एकश्रुति ॥ अर्थः – यज्ञकर्मणि वषट्कार उच्चैस्तराम् = उदात्ततरो विकल्पेन भवति, पक्षे एकश्रुतिर्भवति ॥ वषट्कारशब्देनात्र वौषट् शब्दो गृह्यते । यद्येवं वौषड्ग्रहणमेव कस्मान्न कृतम् ? वैचित्र्यार्थम् । विचित्रा हि सूत्रस्य कृतिः पाणिनेः ॥ उदा. – सोमस्याग्ने वीही वौषट् । पक्षे एकश्रुतिः – सोमस्याग्ने वीही वौषट् ॥

---

[58] अष्टाध्यायी – (1-2-32)
[59] अष्टाध्यायी – (2-2-2)
[60] वार्त्तिकम् – (5-4-44)
[61] अष्टाध्यायी – (1-1-38)
[62] वार्त्तिकम् – (5-2-37)
[63] अष्टाध्यायी – (1-2-35)
[64] अष्टाध्यायी – (5-3-57)
[65] अष्टाध्यायी – (5-4-11)

4. " तदशिष्यं संज्ञाप्रमाणत्वात् "[66] इति सूत्रे पदच्छेदः, विभक्तिः – तत् 1-1॥ अशिष्यम् 1-1॥ संज्ञाप्रमाणत्वात् 5-1॥ समासः – शासितुं शक्यं शिष्यम्, न शिष्यमशिष्यम्, नञ्तत्पुरुषः । संज्ञायाः प्रमाणं संज्ञाप्रमाणम्, षष्ठीतत्पुरुषः । संज्ञाप्रमाणस्य भावः संज्ञाप्रमाणत्वम्, तस्मात् संज्ञाप्रमाणत्वात् । " तस्य भावस्त्वतलौ "[67] इत्यनेन त्वप्रत्ययः ॥ संज्ञानं संज्ञा = लौकिकव्यवहारः । तदित्यनेन युक्तवद्भावः परिगृह्यते । अशिष्यमित्यनेन शासितुमशक्यमिति वेदितव्यम्, न तु शासितुमयोग्यम् । कुतः ? ' शासु अनुशिष्टौ ' इत्येतस्माद् धातोः " एतिस्तुशास्वृदृजुषः क्यप् "[68] इत्यनेन क्यप् प्रत्ययः, स च शक्यार्थे वेदितव्यः । तेनाशिष्यमित्यस्य पूर्णतया शासितुमशक्यमित्यर्थः ॥ अर्थः – तद् = युक्तवद्भावकथनम्, अशिष्यम् = शासितुमशक्यम् । कुतः ? संज्ञाप्रमाणत्वात् = लौकिकव्यवहाराधीनत्वात् ॥ उदा. – पञ्चालाः, वरणाः जनपदादीनां संज्ञा एताः, तत्र लिङ्गं वचनञ्च स्वभावसिद्धमेव ॥

समीक्षायां यो विशेषोऽष्टाध्यायी-भाष्य-प्रथमावृत्तिस्वाध्यायेन उपलप्स्यते, पाठकैरेव ज्ञास्यते, इह प्रदर्शनन्तु उदाहरणमात्रम् ।

(घ) पाणिनेः परिचयः

अथ कोऽयं पाणिनिः[69], यस्य व्याकरणं शेखरायते इति जिज्ञासायां तस्य परिचयोऽत्र दीयते ।

व्याकरणशास्त्रकर्तृषु मौलिमाणिक्यायमानस्य महानुभावस्य पाणिनेः अवतारो विद्वद्भिः 600 ई.पू. स्वीक्रियते, यद्यपि तथ्यमिदं विवादास्पदमस्ति । यद्यपि पाणिनिनाचार्येण स्वकीय-परिचयादि-विषये क्वापि किमपि न लिखितम्, तथापि परवर्तिभिः आचार्यैः परश्शतैः प्रयत्नैः एतस्य परिचयादिकं स्थिरीकृतमस्ति । आचार्यः पुरुषोत्तमदेवः स्वकीये ' त्रिकाण्डशेषकोषे ' पाणिनिपर्यायेषु नामषट्कं लिलेख – ' पाणिनिस्त्वाहिको दाक्षीपुत्रः शालङ्किपाणिनौ । शालातुरीयः .... ॥ ' अर्थात् पाणिनिः, आहिकः, दाक्षीपुत्रः, शालङ्किः, पाणिनः, शालातुरीयश्च षड्नामानि महर्षेः पाणिनेः । महामहोपाध्यायः पण्डितवरः शिवदत्तशर्मा पाणिनेः पितुः नाम ' शलङ्क ' इति व्याजहार ।

---

[66] अष्टाध्यायी – (1-2-53)

[67] अष्टाध्यायी – (5-1-119)

[68] अष्टाध्यायी – (3-1-109)

[69] पण-व्यवहारे स्तुतौ चेति धातोः घञर्थे कप्रत्यये पण इति, तस्मात् " अत इनिठनौ " (5-2-115) इति सूत्रेण मत्वर्थीये इन्प्रत्यये पणी इति । तस्मात् " तस्यापत्यम् " (4-1-92)इत्यणप्रत्यये परे " नस्तद्धिते " (6-4-144) इति सूत्रेण नान्तस्य भस्य टेर्लोपे प्राप्ते " गाथिविदथिकेशिगणिपणिनश्च " (6-4-165) इति सूत्रेण प्रकृतिभावत्वात् पाणिन इति । ततः " अत इञ् " (4-1-95) इति गोत्रापत्ये इञ्प्रत्यये पाणिनिरिति । तथा च पणनं पणः स्तुतिः, सोऽस्यास्तीति पणी देवतास्तुतिरूपक्रियावान् । तन्नामा कश्चन्मुनिः पणिनोऽनन्तरापत्यं पाणिनः । पाणिनस्य गोत्रापत्यं पाणिनिरिति नामव्युत्पत्तिः ।

महाभाष्यकारः पतञ्जलिः स्वकीये महाभाष्ये पाणिनेः माता ‘ दाक्षी ’[70] दक्षकुलसम्भवा इति स्वीकरोति । संग्रहकारस्य व्याडेर्नाम बहुधा महाभाष्यकारेणोक्तम् – ‘ दाक्षायण ’ इति तदनुसारेण दाक्षायणो व्याडिः पाणिनेर्मातुलपुत्र इति प्रतीयते । परन्तु काशिकायाम् – (6-2-69) ‘ कुमारीदाक्षाः’ इत्युदाहरणे दाक्षायण एव ‘ दाक्षि ’ नाम्ना स्मृतः । अतः प्राचीनपद्धत्या दाक्षिर्दाक्षायणेत्युभयमपि नाम संग्रहकारस्य व्याडेराचार्यस्यैवाऽस्ति । अतो दाक्षि-दाक्षायणेत्युभयनामभ्यां प्रसिद्धो व्याडिर्दाक्षिपुत्रस्य पाणिनेर्मातुल एवाऽऽसीदिति ज्ञायते । एतेन व्याडेर्भगिन्या दाक्ष्या नाम ‘ व्याड्या ’ इत्यप्यासीदिति ज्ञायते । वेदार्थदीपिकायां छन्दःशास्त्रप्रवक्तुः पिङ्गलस्य पाणिनिभ्रातृत्वेनोल्लेखो वर्त्तते । तत्र तावत् शिक्षायां ‘ दाक्षिपुत्रस्य पाणिनेः ’ इति वचनेव गम्यते यदेषो मुनिः कस्याश्चिद् दाक्षीनाम्न्या देव्या गर्भशुक्तिमुक्तामणिः । जनकश्चास्य कश्चित् पाणिनो नामा मुनिसत्तमः । तथा च स्वयमाचार्यः, पणिन्शब्दादणि, भसंज्ञायां प्राप्ते टिलोपे “ गाथिविदथिकेशिगणिपणिनश्च ” इति सूत्रेण निषेधात् पाणिनं शब्दं व्याकुरुते । तस्यापत्यं पाणिनिः । तदेतावतागम्यते यत्कस्माच्चित्पाणिननाम्नो मुनिवराद् दाक्षीनाम्न्यां देव्यां गृहितजन्मपरिग्रहोऽयं पुण्यात्मा महर्षिः पाणिनिरिति निश्चितप्रायम् । पाणिनेः सर्वप्रथमः शिष्यः कात्यायनो वररुचिरासीत् । ‘ उपसेदिवान् कौत्सः पाणिनिम् ’ इति अनेन महाभाष्यवचनेन सिद्ध्यति यत् कौत्सनामकः कोऽपि पाणिनेः शिष्यः आसीत् , ‘ अनूषिवान् कौत्सः पाणिनिम् ’, ‘ उपशुश्रुवान् कौत्सः पाणिनिम् ’ इति काशिकोक्तोदाहरणाज्ज्ञायते यत् पाणिनेः कश्चन कौत्सनामाऽपरः शिष्योऽप्यासीत् । परन्तु मन्ये पाणिनिशिष्यः कौत्सः कालिदासप्रोक्तात् कोऽपि अपरोऽस्ति कालविपर्ययत्वात् ।

महर्षेः पाणिनेः निवासभूः ‘ शालातुरो ’ नाम ग्राम आसीत् । अस्य ग्रामस्य चर्चा वर्धमानकृते गणरत्नमहोदधौ समुपलभ्यते , यथा – ‘ शालातुरो नाम ग्रामः,सोऽभिजनोऽस्यास्तीति शालातुरीयः, तत्रभवान् पाणिनिः ’ इति तद्विवरणात् शालातुरो ग्रामोऽस्य भगवतः पाणिनेर्जन्मस्थानमित्युररीक्रियते काशिकाव्याख्यायां न्यासग्रन्थेऽपि च । “ प्राक् क्रीताच्छः ”[71] इति सूत्रव्याख्यायाम् ‘ अतः शालातुरीयेण प्राक्ठञ्च इति नोक्तम् ’ इत्युक्तम् । तेनापि शालातुरीयत्वं तत्रभवता भगवतः पाणिनेः समायाति । गुप्तशिलालेखेषु वलभ्यां प्राप्ते एकस्मिन् शिलालेखे (310 संवत्सरे लिखिते) पाणिनीयशास्त्रकृते ‘ शालातुरीयतन्त्रम् ’ इति प्राप्यते इत्यपि श्रीवासुदेवशरणमहोदयेनोक्तम् । पतञ्जलिमते – ‘ अभिजनो नाम यत्र पूर्वैरुषितम्, निवासो नाम यत्र सम्प्रतुष्यते । ’ यथोक्तं पाणिनिना -

[70] दाक्षीपुत्रस्य पाणिनेः – महाभाष्यम् (1-1-20)

[71] अष्टाध्यायी – (5-1-1)

“ अभिजनश्च ”[72] । अनेन सिद्ध्यति यत् पाणिनेः पूर्वजानां निवासभूमिः शालातुर-ग्रामोऽस्ति । केचन विद्वांसः पाणिनेर्वासभूमिं वाहीकदेश – परिसर – वर्तिनीं स्वीकुर्वन्ति ।

महर्षिः पाणिनिः स्वकीयशब्दानुशासनस्य सम्पूर्तये यान् ग्रन्थान् निर्ममे तेषां नामानि क्रमेण प्रस्तूयन्ते – धातुपाठः, गणपाठः, लिङ्गानुशासनम्, शिक्षाग्रन्थञ्च । इत्थं निखिलेऽस्मिन् व्याकरण-वाङ्मये महर्षेः पाणिनेः ‘ शब्दानुशासनम् ’ एव पञ्चाङ्गपूर्णं सुसमृद्धं वा समुपलभ्यते । यस्य प्रशंसा दैशिका वैदेशिकाश्च विदुषः सोल्लासं कुर्वन्त्येव । पाणिनिकृद् ‘ अष्टाध्यायी ’ इति ग्रन्थस्य वैज्ञानिकं निरुपणम् अद्यापि जगन्मोहयत्येव । अनेन महर्षिणा स्वप्राग्वर्तिनां समेषामपि विदुषां ग्रन्थान् परिशील्य समग्रेषु देशेषु परिभ्रम्य तत्तद्देशविशेषेषु प्रचलितशब्दानां साधुत्वप्रकारं निर्दिश्य एव स्वीय रचना कृता । पाणिनेः अनन्तरं यत्किमपि व्याकरणविषये लिखितं विचारितञ्च तेषां सर्वेषाम् उपजीव्यः पाणिनिरेव । पाणिनिविषये तत्रभवता पतञ्जलिना सुमहती श्रद्धा प्रकटिता । तद्यथा ‘ माङ्गलिक आचार्यो मङ्गलर्थं वृद्धिशब्दं प्रयुक्ते ’[73],‘ भगवतः पाणिनेराचार्यस्य सिद्धम् ’[74],‘ प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्गमुख उपविश्य महता यत्नेन सूत्रं प्रणयति स्म ’[75],‘ अनल्पमतिराचार्यः ’, ‘ आकुमारं यशः पाणिनेः ’[76], ‘ एषाऽस्य यशसो मर्यादा ’, ‘ पाणिनीयं महत् सुविहितम् ’[77], ‘ शोभना खलु पाणिनेः सूत्रस्य कृतिः ’[78], ‘ णिनेः सूत्रकारस्य ’[79] ।

- **पाणिनेर्जन्मविषये विभिन्नानि मतानि**

एतस्याद्यावधि कियान् कालोऽतीत इति विषयमधिकृत्य मतानि बेभिद्यते । पाश्चात्त्यो विद्वान् (Cunningham) कनिङ्गहममहोदयः ख्रिस्ताब्दप्रवृतेः सार्द्धत्रिंशतवर्षपूर्वमेव पाणिनिसमयं सम्भावयति। अन्ये तु प्रायः सहस्रवर्षपूर्वमनुमन्यन्ते, अपरे च ख्रिस्ताब्दतः सार्द्धद्विसहस्रतोऽप्यधिकपूर्वं पाणिनिकालमाकलयन्ति ।

---

[72] अष्टाध्यायी – (4-3-90)
[73] महाभाष्यम् – (1-1-1)
[74] महाभाष्यम् – (8-4-68)
[75] महाभाष्यम् – (1-1-39)
[76] महाभाष्यम् – (1-4-89)
[77] महाभाष्यम् – (4-3-66)
[78] महाभाष्यम् – (2-3-66)
[79] महाभाष्यम् – (2-2-11)

तत्रैव भाषावृत्तेः समीक्षात्मकमध्ययने स्वग्रन्थे मतमतान्तरपुरःसरं युक्तिविमर्शमूलकतया समीचीनं मतं ‘ सूत्रकृतः पाणिनेरैतिह्यम् ’ इति शीर्षकेण पण्डितवर्यः प्राचार्यः श्रीभोला झाप्रख्यापयति स्म – यथा आधुनिको महावैयाकरणः श्रीशिवदत्तो दाधिमथो नवाह्निके सप्रदीपोद्द्योते महाभाष्ये श्रीमहामाहेश्वरजयद्रथविरचितहरचरितचिन्तामणिं गुणाढ्यरचितबृहत्कथाऽनुवादसोमदेवरचित-कथासरित्सागरं क्षेमेन्द्ररचितबृहत्कथामञ्जरीं च आधृत्य पाणिनीयशास्त्रकर्तृ-मुनित्रयस्यान्येषां च व्याख्यातृवराणामध्ययनदेशकालादिविवरणं सङ्क्षिप्य बोधयामास । तत्र मुनित्रयविषयकमिदमैतिह्यं दर्शितम् – “ तत्र मूलभूतसूत्रोपज्ञाता नन्दमहाराजराजधानीपाटलिपुत्रवास्तव्य – शङ्करस्वामितनय – पूर्वोत्तरमीमांसावृत्तिकार – भगवदुपवर्षसहोदर – वर्षोपाध्यायाधीतशास्त्रः सलातुरग्रामाभिजनः शलङ्कुतनयो दाक्षीपुत्रो भगवान् पाणिनिगोत्र ‘ आहिक ’ – नामा मुनिर्गोत्राश्रयनाम्नैव प्रसिद्धो विदित एव सर्वेषाम् । ततश्च तस्यैव वर्षोपोध्यायस्य प्रधानान्तेवासी कौशाम्बीवास्तव्य – सोमदत्तद्विजन्मात्म-जन्मा वसुदत्तागर्भजपुष्पदन्तगणावतारो भगवान् कात्य – कात्यायन – गोत्रनामा श्रुतधरापराभिधेय-वररुचिनामा मुनिः पाणिन्युपज्ञातसूत्रन्यूनतापूरणमिव वार्त्तिकरूपेण कृतवान् ।.........ततश्च कुण्यादिभिराचार्यै रचितासु वृत्तिषु क्वचिन्न्यूनतामवलोक्य गोनर्ददेशे भगवान् पतञ्जलिगोत्रजन्मा श्रीशेषावतारत्वेन विख्यातः कश्चिन् महाप्रतिभाप्रभावो मुनिप्रवरो महाभाष्यं निरमात् । ”[80] इति ।

परमस्मिन् विषये म.म. श्रीगिरिधरशर्मा चतुर्वेदः स्वभाष्यभूमिकायां सुविशदं विचारयन् पाश्चात्यदृष्ट्याऽऽधुनिकैतिहासिकविचारदक्षाणामर्वाचीनत्ववादिनां प्राचीनत्ववादिनां च मतानि प्रत्यालोच्य खण्डयित्वा च तानि तानि युक्ति – तर्कप्रमाणाभासैः स्थापितानि मतानि प्रबलतरतर्कैः दृढतराभिश्च युक्तिभिः स्वमतं सिद्धान्तरूपेण स्थापयामास । तत्र प्रथमं कथासरित्सागराधारेण शिवदत्तदाधिमथ इव वर्णयामास - “ तत्र गुणाढ्यरचितबृहत्कथामाधारीकृत्य विरचिते कथासरित्सागरे पाणिनेः पाटलिपुत्रेऽध्ययनम् , मन्दबुद्धितयाऽध्ययने साफल्यमनासाद्यतपोऽर्थं गमनम्, महेश्वरादभिनव-व्याकरणावाप्तिः[81], ततः कात्यायनेन सह शास्त्रार्थः, महेश्वरहुङ्कारेणैन्द्रव्याकरणस्य नाशः[82], ततः पाणिनीयस्यैव प्रतिष्ठा, ऐन्द्रव्याकरणनाशेन मूर्खीभूतस्य कात्यायनस्यापि तपसा महेश्वरप्रसादनम्,

---

[80] शिवदत्तो दाधिमथः – नवाह्निकमहाभाष्ये ‘ पाणिनीयम् ’ इति शीर्षके उपोद्घाते – पृ. 6-11

[81] आराध्य तपसा तत्र विद्याकामः स शंकरम् ।
प्राप व्याकरणं दिव्यं स च विद्यामुखं शुभम् ॥
हरचरितचिन्तामणौ शब्दशास्त्रावतारनामा सप्तविंशः प्रकाशः – (श्लोक सं. – 74)

[82] ऐन्द्रं व्याकरणं नष्टं समग्रं चाभवद् भुवि ।
ततो वररुचिर्दुःखं विद्याविरहितो दधे ॥ तत्रैव – (श्लोक सं. – 79)

तत्प्रसादात् पाणिनीयव्याकरणपूर्तिशक्तिलाभः – इत्यादि वर्णितमस्ति , यत्सर्वत्रैव प्रसिद्धम् । नन्दराजेन च पाणिनेः प्रतिष्ठाकरणमपि तत्र वर्णितम्, तेन नन्दसमकालिकत्वं पाणिनेः सिध्यति । पाणिनि-कात्यायनयोश्च समकालिकत्वं सिध्यति । परं वर्त्तते नन्दराज्यकाले एव महती विप्रतिपत्तिः । आधुनिका ऐतिहासिका यीशुतः पूर्वं चतुर्थ्यां शताब्द्यां नन्दराज्यं वदन्ति । पुराणेषु तु –

आरभ्य भवतो जन्म यावन्नन्दाभिषेचनम् ।

एतद्वर्षसहस्रंतु शतंपञ्चदशोत्तरम् ।।[83]

इति परीक्षितो जन्मानन्तरम् 1115 वर्षेभ्योऽर्वाङ् नन्दराज्यप्रारम्भः, शतं वर्षाणि च नवानां नन्दानां राज्यमिति लभ्यते । तत्रापि च विप्रतिपत्तिः । पुराणानुशीलिनः कलेः प्रारम्भ एव परीक्षितो महाराजस्य जन्म मन्वते । कलेश्चाद्यत्वे 5099 वर्षाणि व्यतीतानीति ततः 1115 वर्षाणां निःसारणे 3984 वर्षेभ्यः पूर्वम् ईसातः पूर्वं विंशतितम्यां शताब्द्यां नन्दराज्यारम्भकालः प्रतीयते, वर्षशतकोत्तरं च (ईसातः पूर्वमूनविंश्यां शताब्द्यां) नन्दराज्यसमाप्तिकालः । अथ राजतरङ्गिण्यान्तु कलेः 653 वर्षेषु अतीतेषु कुरुपाण्डवा अभवन्नित्युक्तम् ।[84] महाभारतयुद्धादनन्तरं च परीक्षितो जन्मेति कलेरष्टम्यां शताब्द्यां परीक्षितो जन्म लभ्यते । तदनन्तरं पूर्वोक्तरीत्या 1115 वर्षानन्तरं नन्दराज्यारम्भ इति कलेरेकोनविंशतितम्यां शताब्द्याम् ईसातः पूर्वं द्वादश्यां शताब्द्यां नन्दराज्यमायाति । केचिच्च पुराणान्तरसंवादात् पूर्वोक्ते श्रीभागवतपद्ये ‘ ज्ञेयं पञ्चशतोत्तरम् ’ इति पाठं मन्वानाः परीक्षिज्जन्मानन्तरं 1500 वर्षेभ्योऽर्वाङ् नन्दराज्यप्रवृत्तिरिति राजतरङ्गिणीरीत्या ईसातः पूर्वं सप्तमी अष्टमी वा शताब्दी नन्दराज्यकालः – इति साधयन्ति । सेयं विप्रतिपत्तिरद्यापि ऐतिहासिकानां मल्ललीलाप्राङ्गणभूतैवेति । एतावदेव तु वक्तव्यमत्रास्माकम् – यत् कथासरित्सागररीत्या नन्दराज्ये पाणिनेः समयः सिध्यति । त्रिमुनिकल्पतरुप्रभृतिष्वपि तदेवानूद्यते । आर्यमञ्जुश्रीकल्पे बौद्धग्रन्थेऽपि पाणिनिना माणवेन सह महापद्मनन्दस्य सौहार्दं बभूवेत्युक्तम् । तेनापि नन्दसमकालिकत्वं पाटलिपुत्रनिवासश्च पाणिनेः सिध्यति । परं कथासरित्सागरमद्यतना ऐतिहासिका न प्रमाणयन्ति, विनोदमात्रार्थाः कथास्तत्र संगृहीता – इत्येव ते मन्यन्ते ।

शालातुरग्रामाभिजनः – तत्र त्रिकाण्डशेषे कोषे पाणिनिनामसु ‘ शालातुरीयः ’ इति पठनात्, गणरत्नमहोदधौ च जैनलेखकेन वर्द्धमानेन ‘ शालातुरो ग्रामः ’‘ सोऽभिजनोऽस्यास्तीति शालातुरीयः

---

[83] श्रीमद्भागवते – 12 स्कन्धे – 2 अध्याये – 26 श्लोकम् ।

[84] शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले ।
कलेर्गतेषुवर्षाणामभवन् कुरुपाण्डवाः ।। राजतरङ्गिणी – (1-50)

तत्रभवान् पाणिनिः ’[85] इति तद्विवरणात् शालातुरो ग्रामोऽस्य भगवतः पाणिनेर्जन्मस्थानम् – इति उररीक्रियते । काशिकाव्याख्यायां न्यासग्रन्थेऽपि च ‘ अतः शालातुरीयेण प्राक्ठञश्च इति नोक्तम् ’[86] इत्युक्तम् । तेनापि शालातुरीयत्वं पाणिनेः सिध्यति । गुप्तशिलालेखेषु वलभ्यां प्राप्ते एकस्मिन् शिलालेखे 310 संवत्सरे लिखिते पाणिनीयशास्त्रस्य कृते ‘ शालातुरीयतन्त्रम् ’ इति प्राप्यते – इत्यपि श्रीवासुदेव-शरणमहोदयेनोक्तम् ।[87] श्युआनचुआननामकश्चीनदेशीयः पर्यटको यीशुख्रिस्तस्य सप्तम्यां शताब्द्यामिहायातः स्वयं शालातुरग्रामं गतः, तेन स्पष्टमेव तत्रत्यानां जनानां किंवदन्तीमाकर्ण्य शालातुरग्रामः पाणिनेर्जन्मस्थानमिति लिखितम् । तदित्थमनेकैः प्रमाणैः पाणिनेर्जन्मस्थानं शालातुरग्राम इत्यैतिहासिका मन्यन्ते ।

अर्वाचीनवादिमतखण्डनम् – अथास्य कालविषये तु अस्त्येव महती विप्रतिपत्तिरिति विस्तरशः सर्वाणि तानि – 2 मतानि सम्यक् परीक्षितानि चतुर्वेदमहाशयैः । तथाहि – आधुनिका ऐतिह्यविद ईसातः प्राक् चतुर्थ्यां पञ्चम्यां वा शताब्द्यां पाणिनेर्जन्मेति मन्यन्ते । तत्र चैता युक्तिरुपन्यस्यन्ति –

1. “ कुमारः श्रमणादिभिः ”[88] इति सूत्रप्रणयनात् पाणिनिर्भगवतो बुद्धादर्वाचीनः सिध्यति । यतः श्रमणशब्दोऽयं बौद्धपरिव्राजकेषु प्रयुज्यते । तत्रापि श्रमणादिगणे श्रमणाशब्दः स्त्रीलिङ्गः पठ्यते । स्त्रीणां संन्यासग्रहणञ्च बौद्धैरेव परिचालितम् । बुद्धश्च ईसातः प्राक् सप्तम्यां शताब्द्यां जात इति तन्मतप्रचारादर्वाचीनोऽयं पञ्चम्यां चतुर्थ्यां वा ईसापूर्वशताब्द्यां भवेत् ।

2. पाणिनिर्भगवान् नन्दनृपतिसमकालिकः, तेन लब्धप्रतिष्ठश्च तद्राजधानीपाटलिपुत्रम् अध्युषित इत्युच्यते । नन्दराजस्य च समय ईसातः प्राक् चतुर्थी पञ्चमी वा शताब्दी एव निर्धारिता इतिहासविद्भिः ।

3. “ इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ”[89] इति सूत्रे यवनशब्दः पठितः । अत्र यवनशब्देन मोहम्मदाः (मुसलमानाः) न ग्रहीतुं शक्यन्ते, यतोहि एतन्मतप्रवर्तकस्य मोहम्मदस्य जातस्य चतुर्दशी एवेयं शताब्दी, पाणिनिस्तु ततोऽपि बहुपूर्वकालीनः । तस्मादत्र यवनशब्देन यूनानदेशीया एव ग्रहीतव्याः । यूनानदेशीयानां परिचयश्च सिकन्दरस्य भारते

---

[85] गणरत्नमहोदधौ वर्द्धमानः ।

[86] काशिकायां न्यासे च – (5-1-1) सूत्रव्या.

[87] पाणिनिकालीन भारतवर्ष – वासुदेव शरण अग्रवाल

[88] अष्टाध्यायी – (2-1-70)

[89] अष्टाध्यायी – (4-1-49)

आक्रमणकालादेवात्रत्यैः प्राप्त इति सिकन्दराक्रमणादर्वागेव ईशातः पूर्वं चतुर्थी शताब्दी एव कालो भवितुमर्हति पाणिनेः, न तु ततः प्रागिति कीथप्रभृतयः पाश्चात्त्या निर्धारयन्ति । परमेता अर्वाचीनत्ववादिनां युक्तीः सप्रमाणं खण्डयन्ति प्राचीनत्ववादिन इत्थम् , निर्धारयन्तिचस्वमतानि–

1. प्रथमं तावत् श्रमणशब्दोऽयं न बौद्धकालादेव प्रचलितः, शतपथब्राह्मणेऽपि अस्य श्रूयमाणत्वात् । तत्र हि सुषुप्त्यवस्थानिरूपणप्रसङ्गे सर्वोपाधिविनिवृत्तिप्रतिपादने श्रूयते – ' अत्र पिता अपिता भवति, माता अमाता, लोका अलोकाः, देवा अदेवाः, श्रमणो अश्रमणः, तापसो अतापसः '[90] इत्यादि । इह परिव्राजकाभिप्रायेणैव श्रमणशब्दः प्रयुक्त इति स्फुटं शाङ्करभाष्यादिषु । संन्यासश्च याज्ञवल्क्यस्य तदुपदेशान्मैत्रेय्याश्चापीहैव काण्डे[91] श्रुत इति श्रमणपदेन श्रमणापदेन वा न बुद्धदेवादर्वाचीनत्वं शक्यं कल्पयितुम् । किञ्च बौद्धमतमपीदं न खलु गौतमबुद्धादेव प्रवृत्तम्, अपितु ततोऽपि बहुप्राचीनम् । ' कथमसतः सज्जायेत '[92] इत्यादिना उपनिषत्स्वेव बौद्धमतमनूद्य निराकरणदर्शनात् । वाल्मीकीयरामायणेऽपि स्वयं भगवता रामेणैव बौद्धमतस्योल्लेखकरणात् । बौद्धग्रन्थेष्वपि शाक्यसिंहोऽयमन्तिमो बुद्धः स्मर्यते, ततः पूर्वमपि प्रादुरभूवन् बहवो बुद्धाः – इति स्पष्टम् । ततश्च बौद्धमतप्रचारादर्वाचीनत्वे पाणिनेः सिद्धेऽपि न शाक्यसिंहादर्वाचीनत्वं कथमपि सिध्यति । वस्तुतस्तु ब्राह्मणशब्दः श्रमणशब्दश्चेति द्वावपि शब्दौ विज्ञानमूलकावतिप्राचीनौ । ब्रह्मशब्दो हि ज्ञानपर्यायः, श्रमशब्दश्च क्रियापर्यायः । तत्र ' ब्रह्मैवेदं सर्वम् ' इति य आतिष्ठन्ते, ते ब्रह्मैकाद्वयवादिनो ब्राह्मणाः, क्रियैव (श्रम एव) सर्वमिदम्, नातोऽन्यद् ब्रह्मास्तीति येऽभ्युपगच्छन्ति, ते श्रमैकाद्वयवादिनः श्रमणाः । ज्ञानैकाद्वयवादः श्रमैकाद्वयवादश्चानादिकालादेव प्रचलित इति ' श्रमण ' शब्दाधारेण कालनिर्णयोऽयं वैदिकपरिभाषानभिज्ञानमेव शोभते, न तु विवेचकानाम् ।

2. नन्दराज्ये पाणिनिग्रन्थपरीक्षा – इति राजशेखरादीनां य उल्लेखः, कथासरित्सागराधारेण वा तस्य पाटलिपुत्रे प्रवासोऽध्ययनं वा नन्दकाले, नन्दनृपेण प्रतिष्ठाप्राप्तिश्च – इत्याधारेण यत्तस्य भगवतो नन्दसमकालिकत्वं स्थाप्यते, तत्र शोभावहम्, राजशेखरोल्लेखस्य किंवदन्तीमात्ररूपत्वात् । नन्दकालस्य चाद्यापि अनिर्धारितत्वाद् महासन्देहास्पदत्वात्, कथासरित्सागरस्यैतिहासिकैः प्रमाणत्वेनास्वीकाराच्च ।

---

[90] शतपथब्राह्मणे – 14 काण्डे 6 अध्याये 1 ब्राह्मणे 22 कण्डिकायाम् ।

[91] बृहदारण्यकोपनिषत् ।

[92] छान्दोग्योपनिषद् – (6-2-2)

3. यवनपरिचय आर्याणां सिकन्दराक्रमणानन्तरमेवेति तु कथादीनां वचो महदुपहासास्पदम् । श्रीकृष्णकालेऽपि कालयवनेन मथुराया उपरि आक्रमणस्य श्रुतत्वात्, महाभारतयुद्धेऽपि यवनादि-सैनिकानामुपस्थितिदर्शनात् । तस्माद् अतिचिरन्तनो यवनपरिचयो भारतीयानाम्[93] – इत्येवंरीत्या अर्वाचीनत्वप्रतिपादिका युक्तयोऽतिशिथिलतया प्रतीयमाना निराकृताः ।

चतुर्वेदमहाशयेन श्रीसत्यव्रतसामश्रमिमतखण्डनम् – स्वस्मिन् लेखे महावैयाकरणः श्रीचतुर्वेदमहाशयोऽर्वाचीनतावादिनां युक्तीः स्वतर्कैः निराकृत्य अतिप्राचीनतावादिनामपि मतानि सविस्तरं समुद्धृत्य निराचकार । तथाहि स आह – ‘ इदानीन्तनेषु विवेचकेषु श्रीसत्यव्रतसामश्रमि-महाभागः श्रीयुधिष्ठिरमीमांसकश्चातिप्राचीनतावादी । एतौ हि “ ऋष्यन्धकवृष्णिकुरुभ्यश्च ”[94], “ वासुदेवार्जुनाभ्यां वुन् ”[95], “ गवियुधिभ्यां स्थिरः ”[96], “ एजेः खश् ”[97]इत्यादिसूत्रेषु महाभारत-निर्दिष्टानां व्यक्तीनां कुलानां च नामोल्लेखात् तत्रोद्धृतव्यक्तिनामसाधनप्रयत्नाच्च महाभारतयुद्ध-परभवत्वन्तु पाणिनेर्मन्येते, परं किञ्चित्परभवत्वमेव साधयतः ।[98] तत्रापि सामश्रमिमहाशयः –

शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले ।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः ।।[99]

इति राजतरङ्गिणीवचनमप्रतिहतं प्रमाणं मन्वानः कलेरष्टम्यां शताब्द्याम् ईसातः प्राक् चतुर्विंश्यां च शताब्द्यां पाणिनेः प्रादुर्भावमभिमन्यते । श्रीयुधिष्ठिरमीमांसकस्तु राजतरङ्गिणीवचनस्य पुराणादौ क्वाप्यननुमोदितत्वान्निर्मूलत्वमेव तस्य मन्वानः कलेः प्रारम्भ एव महाभारत-युद्धमभिमन्यमानः कलेस्तृतीयस्यां शताब्द्यां यीशुख्रिष्टाच्च पूर्वमूनत्रिंश्यां शताब्द्यां पाणिनिप्रादुर्भावं मन्यते । सोऽयमवान्तरोऽनयोर्भेदः । प्राचीनत्वसाधने युक्तयोऽपि चानयोर्विभिन्नप्रायाः ।

तत्र सामश्रमिमहाशयस्यैता युक्तयः – यत्पाणिनिरेव प्रथमो व्याकरणप्रणेता, तेन यत्र यत्रापि व्याकरणानां स्मर्यते तेभ्यः सर्वेभ्यो ग्रन्थेभ्योऽयं प्राचीनः । निरुक्तकृतो यास्काद् अन्येभ्यश्च वेदाङ्गग्रन्थ-निर्मातृभ्यः प्राचीनोऽयम् – इत्यवरजत्वमस्य न सम्भवति । प्रधानभूता चेयं तस्य युक्तिः - यद् व्यास-

---

[93] महाभाष्यभूमिकायां म.म. गिरिधरशर्मा चतुर्वेदः – (पृ. - 25-26)

[94] अष्टाध्यायी – (4-1-114)

[95] अष्टाध्यायी – (4-3-98)

[96] अष्टाध्यायी – (8-3-95)

[97] अष्टाध्यायी – (3-2-28)

[98] क) निरुक्तालोचने – श्रीसत्यव्रतसामश्रमी
ख) व्याकरणशास्त्र का इतिहास – श्रीयुधिष्ठिरमीमांसकः ।

[99] राजतरङ्गिणी – (1-50)

पुत्रस्य शुकस्य नाम वैयासकिरिति श्रीमद्भागवतादौ पठ्यते । न च ‘ वैयासकि ’ – शब्दः पाणिनीयैः सूत्रैस्सिध्यति । वार्त्तिककृता तु “ सुधातुरकङ् च ”[100] इति पाणिनीये सूत्रे ‘ व्यासवरुणनिषादचण्डाल-बिम्बानां चेति वक्तव्यम् ’ इत्युपसंख्याय वैयासकिशब्दः साधितः । तेन स्फुटमिदं प्रतीयते यद् व्यासपुत्रस्य शुकस्य यावन्न प्रसिद्धिरभवत्, वैयासकिपदं च न प्राचरल्लोके, तावदेव समुत्पन्नः पाणिनिः, तत एव तेन वैयासकिशब्दसाधनाय न कृतो यत्नः । वार्त्तिककृत्काले तु प्रचलितः स शब्दः – इति तेन प्रयत्नः कृतः । तदित्थं व्यासात् किञ्चित्परभवत्वमेव पाणिनेः सुप्रसिध्यतीति। ’[101]

एताः सामश्रमिमहाशयस्य युक्तीः खण्डयन्नाह श्रीचतुर्वेदमहाभागः - “ ता एताः सामश्रमि-महाशयस्य युक्तयोऽपि शिथिलप्राया एव । यतो हि पाणिनेः पूर्वमपि बहूनि व्याकरणान्यासन्निति दृढाभिर्युक्तिभिः प्रतिपादितं पुरस्तादस्माभिः । यास्कात्पूर्वभवत्वमपि खण्डितम् । किञ्च पाणिनि-कालेऽप्रचलिता एव शब्दा वार्त्तिककृता अन्वाख्याता – इत्यपि पूर्वमेव दृढतरं निराकृतम् । एवमभ्युपगमे तु महती विश्रृङ्खलता स्यात्, अश्वत्थामन्नश्वत्थामशब्दयोः साधनार्थमपि न दृश्यते पाणिनेः प्रयत्नः । वार्त्तिककृतैव तु ‘ स्थाम्नोऽकारः ’, ‘ भवार्थे तु लुग्वाच्य ’ इति शब्दौ तावन्वाख्यातौ । ततश्च महाभारत-युद्धे सुप्रतिष्ठिताद् वीराद् अश्वत्थामतोऽपि पूर्वभवत्वं पाणिनेरभ्युपगन्तव्यं स्यादिति भवदभ्युपगतं महाभारतयुद्धादर्वाचीनत्वमपि न सिध्येत् । “ गवियुधिभ्यां स्थिरः ”[102] इत्यादिसूत्रनिर्माणं च निरालम्बनं भवेत् । किञ्च बाह्यदैवदैव्यादिशब्दा अपि “ देवाद्यञञौ ”, “ बहिषष्टिलोपो यञ् च ” इत्यादिभिः वार्त्तिकैरेव सिध्यन्ति , अतिप्राचीनाः श्रुतिषु श्रूयमाणा अपि । तस्मात् प्राक् प्रसिद्धा अपि बहवः शब्दा अनवधानेन अल्पप्रसिद्ध्या पृषोदरादित्वाभिमानेन वा पाणिनिना त्यक्ताः, वार्त्तिककृता त्वन्वाख्याता इत्येवानुमानं सम्यग् भवेत् । ततश्च ‘ वैयासकि ’ पदाधारेण क्रियमाणा कल्पनाऽतिशिथिला ’[103] इति ।

श्रीयुधिष्ठिरमीमांसकमतनिराकरणम् – यथा प्रबलाभिः स्वीयाभिर्युक्तिभिः शर्ममहोदयेन सामश्रमिमतं निराकृतम्, तथैवास्मिन् विषये युधिष्ठिरमीमांसकस्यापि मतं तदुक्तयुक्तीः खण्डयित्वा प्रत्याचख्यौ । तथाहि – ‘ अथ युधिष्ठिरमीमांसकमहाशयस्तु यास्क-शौनक-पिङ्गल-व्याडिप्रभृतीनां पाणिनिसमकालिकत्वं महत्यारभट्या प्रतिपादयन्, अस्य प्रातिशाख्यकृतः शौनकस्य नैमिषादौ सूतात्

---

[100] अष्टाध्यायी – (4-1-97)

[101] निरुक्तालोचने श्रीसामश्रमी ।

[102] अष्टाध्यायी – (8-3-95)

[103] भाष्यभूमिकायां म.म. श्रीगिरिधरशर्मा चतुर्वेदः (पृ. – 26)

पुराणानां श्रोतुश्च शोनकस्यैक्यमभ्युपगच्छन्, तस्य जनमेजयकालिकत्वं च प्रसाधयन्, वर्षशतत्रय-परिमितमायुश्च तस्याभिमन्वानः, शौनकसमकालिकत्वादेव पाणिनिमपि एतावत्प्राचीनं साधयति।

ता एता अस्यापि महाशयस्य युक्तयः श्रद्धामात्रसाराः, नैतिहासिकानां प्रमाणपरतन्त्राणां पुरः स्थातुमुत्सहेरन् । यतोहि अनेके शौनकाः शौनकप्रणीतेभ्य एव ग्रन्थेभ्यः सिध्यन्तीति प्रागस्माभिः सुप्रतिपादितम् । किमन्यद्, शौनकप्रणीतायामेव बृहद्देवतायाम् – ‘ काक्षीवतं सर्वमिति भगवानाह शौनकः ’[104] इति शौनकस्य भगवानिति विशेषणं सामश्रमिमहाशयेन निरुक्तालोचने प्रदर्शितम् । नहि स्वस्यैव विशेषणं भगवानिति कश्चिदनुन्मत्तो वदेत् । मन्त्रद्रष्टाऽप्यस्ति शौनकः, मण्डलद्रष्टाऽपि, वेदाङ्गप्रातिशाख्यकृदपि, यास्कादर्वाचीनो बृहद्देवताप्रणेताऽपि । नैषां सर्वेषामैक्यं कश्चिदपि प्रतिष्ठितशेमुषीकः संभावयेत् । तस्माद्यदा बहवः शौनका अभ्युपगन्तव्या एव, ‘ शौनक ’ इति गोत्रनाम अनेकासु अतिविभिन्नकालासु व्यक्तिषु प्रतिष्ठितम्, तदा पुराणानां श्रोतुः प्रातिशाख्यकर्तुश्च शौनकस्यैक्यप्रकल्पनमपि कल्पनामात्रमेव भवेत् । ....यास्कादीनां समानकालिकत्वमपि न प्रमाणैः सिध्यतीति प्रागेव प्रत्यपीपदाम । तथैव वायुपुराणादौ पाणिनिगोत्रस्मरणमपि नास्य व्याकरणाचार्यस्य पाणिनेः कालनिर्णयाय समुपयुक्तं भवेत्, गोत्राणामतिविभिन्नकालेषु अनुवृत्तिदर्शनात् । व्याकरणप्रणेता पाणिनिरिति यदि पुराणेषु क्वाप्युक्तः स्यात्, तर्हि निश्चेतुं शक्यः स्यात् तदीयः कालः । तादृशं तु किमपि मीमांसकमहाशयेन नोद्धृतमिति सन्देहास्पदमेवाद्यापि पाणिनिसमयः ’[105] इति ।

पाणिनिकालविषये श्रीचतुर्वेदमतम् – एवञ्च स्वीयैरकाट्यैस्तर्कासिभिः खण्डयित्वा अर्वाचीनतावादिनां पाश्चात्त्योन्मुखदृष्टीनामाधुनिकैतिहासिकानां परमप्राचीनतावादिनां श्रीसत्यव्रतसाम-श्रमिश्रीयुधिष्ठिरमीमांसकादीनां च मतानि तत्साधनाय प्रयुक्तयुक्तीश्च, दृढतरसत्तर्कैः स चतुर्वेदमहाभागः स्वकीयमतमत्र विषये साधु प्रतिष्ठापयामास । तथा च तावत् तदीयान्येव वचांसि पुरस्क्रियन्ते – ‘ मम त्विदं प्रतिभाति – यत् पाणिनेः कात्यायनस्य च समये चतुष्पञ्चशताब्दीपरिमितेनान्तरालेनावश्यं भाव्यम्, तथैव कात्यायनस्य पतञ्जलेश्चापि समये तावदन्तरालमवश्यमपेक्ष्यते । तत्र सन्ति हेतवः –

1.पाणिनिना “ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ”[106] इति सूत्रे ब्राह्मणानामपि पुराणप्रोक्तत्वं विशेषणं ददता याज्ञवल्क्यदृष्टस्य शतपथब्राह्मणस्य नवीनत्वं व्यञ्जितमिव । अन्यथा विशेषणदानवैयर्थ्य-प्रसङ्गात् । कात्यायनेन तु तत्र ‘ याज्ञवल्क्यादिभ्यः प्रतिषेधः, तुल्यकालत्वात् ’ इति शतपथस्यापि

[104] शौनकप्रणीतबृहद्देवतायाम् – (3-152)

[105] भाष्यभूमिकायां श्रीशर्ममहाभागः – (पृ. – 26)

[106] अष्टाध्यायी – (4-3-105)

समानकालिकत्वमेव ब्रुवता नवीनत्वं नोरीकृतम् । ततश्च स्पष्टमिदं विज्ञायते – यत् पाणिनेः समयो याज्ञवल्क्यान्नात्यन्तमर्वाक्तनः । तस्मिन् काले याज्ञवल्क्यस्य नवीनत्वप्रसिद्धिरासीदिति । कात्यायन-काले तु सा नवीनत्वप्रसिद्धिस्तिरोहिता, याज्ञवल्क्यस्यापि अन्यब्राह्मणप्रवक्तॄणामिव प्राक्तनत्वमेव प्रसिद्धं जातम् । नैतावद् वैषम्यमन्ततः चतुष्पञ्चशताब्दीव्यवधानेन विना सिध्यतीति प्रथमो हेतुः ।

2. पाणिनिःसंस्कृतभाषांभाषापदेनैव व्यवहरति । तेन तस्य काले संस्कृतभाषैव भाष्यमाणा आसीत्, भाषान्तरप्रवृत्तिर्न बभूव, अल्पीयसी वा बभूवेति स्फुटमनुमीयते । कात्यायनस्तु ‘ लोकतोऽर्थ-प्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः ’[107] इति वदन् भाष्यकाररीत्या ‘ समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः क्रियते ’[108] अर्थात् साधुशब्दैरेव व्यवहारे धर्मो भवति, नासाधु-शब्दैर्व्यवहारे इति संस्कृतभाषाया धर्मजनकत्वमात्रेणोत्कर्षं बोधयति । तेन तस्य काले अपभ्रष्टशब्द-घटिताया भाषाया बाहुल्येन प्रवृत्तिरासीदिति स्फुटीभवति । अथ भाष्यकारस्तु ‘ सन्त्येकैकस्य शब्दस्य बहवोऽपभ्रंशाः, यथा - गोशब्दस्य गावी–गोणी–गोता-गोपोतलिका इत्येवमादयः ’[109] इति वदन् धर्मनियमं चापी ‘ याज्ञे कर्मणि स नियमः, अन्यत्रानियमः ’ इति यज्ञकर्ममात्रे व्यवस्थापयन् स्वकाले व्यवहारार्थमपभ्रष्टभाषाणामेव प्रयोगमभिव्यञ्जयति । नैतत्सर्वमल्पेन समयेन सम्भवति । तस्मात् त्रयाणामेषां सुमहता कालव्यवधानेनावश्यं भाव्यम् ’[110]। एवमत्रान्या अपि युक्तीरुक्त्वा विषयम् अमुमुपसंहरन्नाह – ‘ तदित्थं भाष्यकारः पतञ्जलिः यीशुख्रीष्टतः पूर्वं द्वितीयस्यां शताब्द्यां जातः, कात्यायनस्तृतीयस्यां चतुर्थ्यां वा, पाणिनिश्च चतुर्थ्यां पञ्चम्यां वा इत्याधुनिकानामैतिहासिकानां विनिर्णयो न सम्यग् बुद्धावुपारोहति । कस्यचिदपि ग्रन्थस्य एवं विस्तृतव्याख्यानापेक्षा नाल्पीयसा कालेन शताब्दीमात्रेण सम्भवतीति विचार्यं सहृदयैः । तस्मादस्माकं मते भाष्यकारः पतञ्जलिर्यदि यीशुतः प्राक्तन्यां द्वितीयस्यां शताब्द्यां जातः, तर्हि कात्यायनः प्राक्तन्यां सप्तम्यां शताब्दयाम्, पाणिनिः चान्ततः प्राक्तन्यां द्वादश्यां शताब्द्यां जातो भवेदिति सम्भावयामः । यदि नन्दराज्यकालः अस्मत्पुराण-पर्यालोचनरीत्या इतः सहस्राब्दीत्रितयात् प्राक्तनः, तदा नन्दस्य पाणिनेश्च सम्बन्धः प्राक्तनैर्ग्रन्थकारैः उल्लिखितः सत्यतया सिध्यति । यदि तु अर्वाचीनैतिहासिकदृष्ट्या नन्दराज्ययीशुख्रिष्टतः प्राक् चतुर्थ्यामेव शताब्द्यामिति सत्यम्, तदा नन्दस्य पाणिनेश्च सम्बन्धकथा केवलं काल्पनिकी एव, पाणिनेः

---

[107] महाभाष्यम् – प्र.आ. – शास्त्रस्य धर्मजनकताऽधिकरणे वार्त्तिकम् (पृ. – 45)

[108] तत्रैव – भाष्यवचनम् – (पृ. – 48)

[109] महाभाष्यम् - प्र.आ. - ‘ यस्तु प्रयुङ्क्ते ’ इति प्रतीकोक्तभ्राजाख्यश्लोकेन आनुषङ्गिकव्याकरणाध्ययनप्रयोजननिरूपणप्रसङ्गे – (पृ. – 20)

[110] भाष्यभूमिकायां चतुर्वेदमहाशयः – (पृ. – 27)

तथाऽर्वाचीनत्वासम्भवात् । आस्तान्नाम । इदमित्थम्भावेन कालनिर्णयः कस्यापि सुदुष्करः, यैरपि क्रियते, तैरपि साहसमात्रमेवानुष्ठीयते । केवलमेतावदेव वक्तुं शक्यम्, यत् पाणिनिः भगवान् भाष्यकारादन्ततः सहस्राब्दीपूर्वभवोऽवश्यं स्वीकार्य इति '[111] । एवं च प्रबलपुष्टाकाट्यदृढतरयुक्तितर्क-समर्थिततया श्रीचतुर्वेदमहाशयस्यैव मतमत्र प्रमाणत्वेन स्वीकार्यमिति ।

(ङ) वार्त्तिककारस्य संक्षेपपरिचयः

महर्षिः कात्यायनो वार्त्तिककाररूपेण मन्यते । एतेषां जन्मसमयो महर्षिपाणिनेः पश्चात् ई. पूर्व. तृतीयशती निश्चीयते । श्रुतधरो वररुचिश्चेति द्वे अभिधाने अस्य श्रूयेते । अयं प्रयागतः पश्चिमदिशि कलिन्दजाकूले विलसिता कौशाम्बीं नाम नगरीं (यैवेदानीम् ' कोसम ' ग्रामाभिधयाभिधीयते) स्वजन्मनालञ्चकार । सोमदत्तोऽस्य पिता वसुदत्ता च प्रसूरासीदिति प्रसिद्धिः तस्य गुरुः उपवर्षो भवति स्म ।

अष्टाध्याय्या परं भाषासु प्रविष्टनव्यशब्दानामौचित्यं ख्यापयितुं वार्त्तिकरचनाऽभूत् । कात्यायननिर्मितानि वार्तिकानि अष्टाध्यायीपूरकाणि सन्ति । वार्तिककारः पाणिनीयसम्प्रदायस्य द्वितीय आचार्यो गण्यते । क्वचिदनावश्यकतां निषेधति । यथा – " संयोगान्तस्य लोपः "[112] इति सूत्रे विधेयस्य लोपस्य ' यणः प्रतिषेधो वाच्यः ' इति वार्तिकेन निषेधः कृतः । वार्तिककारा अनेके अभूवन् कात्यायनः (वररुचिः) भारद्वाजः सुनागः क्रोष्टा वाडव इत्यादयः । एतेषु सर्वश्रेष्ठः कात्यायनगोत्रो वररुचिरस्ति । एतेषामेव वार्तिकानि विशेषत उपलभ्यन्ते । महाभाष्यादिग्रन्थेषु सौनागस्योल्लेखो[113] वर्तते । भारद्वाजस्यापि सङ्केतोमहाभाष्ये[114] वर्तते । क्रोष्टुरुल्लेखः " इको गुणवृद्धी "[115] सूत्रव्याख्यायां तत्र एवास्ति । वाडवाल्लेखोऽपि[116] तत्रैवागत इतोऽन्येऽपि वार्तिककाराः - स्मर्यन्ते । अनेन कात्यायनेन भ्राजाख्या – श्लोका अपि रचिताः । यदन्तर्गत एव ' यस्तु प्रयुक्ते कुलो विशेषः ' इत्ययं श्लोको व्याकरण-भाष्यकृतोपन्यस्तः । वार्तिकलक्षणञ्च –

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।

---

[111] तत्रैव – (पृ. 27)

[112] अष्टाध्यायी – (8-2-23)

[113] महाभाष्यम् – (2-2-18)

[114] महाभाष्यम् – (1-1-20)

[115] अष्टाध्यायी – (1-1-3)

[116] महाभाष्यम् – (2-1-106)

तं ग्रन्थं वार्तिकमाहुर्वार्तिकज्ञा मनीषिणः ॥

(च) महर्षिपतञ्जलेः परिचयः

तत्रभवता भगवतोमहाभाष्यकारस्य पतञ्जलेर्देशकालविषये विद्यते दृढं मानम् । देशोऽस्य गोनर्दः । स्वयमेव भाष्यकृता स्वमतमभिनिवेशेन तत्र तत्रोपन्यस्ता ' गोनर्दीयस्त्वा ' इत्युक्तम् । गोनर्ददेश एव साम्प्रतं ' गोंडा ' इति शब्देन व्यवह्रियते । तत्र भाष्ये ' पुष्पमित्रं याजयामहे ' इति दत्तोदाहरणात् पतञ्जलिः पुष्पमित्रस्य इत्यपि केचन पुरोहित ब्रुवते ।

पुष्पमित्रस्य यद्यपि प्रधानभूता राजधानि पाटलिपुत्रमासीत्, यथापि अयोध्यायामपि तेनोपराज्यस्थानं स्थापितमित्यपि विवृण्वन्ति ऐतिहासिकाः ततश्च गोंडादेशवासिनो महर्षेः पतञ्जलेः सम्भवत्येवायोध्यायां वसता पुष्पमित्रेण सम्बन्धः । पुष्पमित्रेण चाश्वमेधराज्यसूयाद्यनुष्ठानं कृतमिति प्राप्तेभ्योऽभिलेखेभ्यो हरिवंशादिभ्यश्च प्रतीयते एवंविधेषु महत्सु यज्ञेषु तदानीं सम्पन्नेषु पतञ्जलिसन्निभो महाविद्वान् बभूवेति क एतन्नानुमन्येत[117] । अन्ये तु गोनर्दस्थानमुज्जयिनीप्रान्ते मध्यदेशेऽभ्युपगच्छति, यस्य प्राकृतं नाम गौनद्धमित्यासीत् । व्यापारिणाञ्च तत् केन्द्रस्थानं बभूव । पुष्पमित्रादीनां शुङ्गवंशीयानां च मूलस्थानं विदिशानगरी, या इदानीं ग्वालियरराज्ये ' भिलिसा ' इत्याख्यायते । तदेवमभिजनस्थानसामीप्यात् पुरातन एव पतञ्जलिपुष्पमित्रयोः सम्बन्ध इति तेषामभिप्रायः । काशिकादिषु व्याकरणग्रन्थेषु तु प्राग्देशेष्वेव गोनर्दस्य गणना कृतेति गोंडाप्रान्तमेव गोनर्दपदेन पणिताः सम्भावयन्ति ।

महाराजेन समुद्रगुप्तेन प्रणीतस्य कृष्णचरितस्य प्रस्तावनया ज्ञायते यन्महामुनिना पतञ्जलिना ' महानन्दमयं काव्यम् ' निर्मितमासीत् । तथा हि –

विद्ययोद्रिक्तगुणतया भूमावमरतां गताः ।
पतञ्जलिर्मुनिवरो नमस्यो विदुषां सदा ॥
कृतं येन व्याकरणभाष्यं वचनशोधनम् ।
धर्मावियुक्ताश्चरके योगा रोगमुषः कृताः ॥
महानन्दमयं काव्यं योगदर्शनमद्भुतम् ।
योगव्याख्यानभूतं तद्रचितं चित्तदोषहम् ॥

---

[117] महाभाष्यनिगूढाकूतयः – भूमिकायाम्

यदि महानन्दशब्दः श्लेषाद् महानन्दपद्मस्य वाचको भवेत्तर्हि निश्चयेनैव पतञ्जलिर्महानन्दपद्माद् उत्तरवर्ती भविष्यति।

तत्रानेकैः प्रमाणैः प्रसिद्धैश्च पुष्पमित्रस्य यः कालः स एव महाभाष्यकारस्यापि काल इत्यत्र न विवादः। पुष्पमित्रसमयश्चाधुनिकानामैतिहासिकानां दृष्ट्या यीशुख्रीष्टाब्दतः पूर्वा द्वितीया शताब्दी। पौराणिकदृष्ट्या तुयीशुख्रीष्टतः पूर्वं सहस्राब्दीतोऽपि पुरातनः पुष्पमित्र इति सोऽयं मतभेदः सर्वत्रैव जागर्ति। परन्तु युधिष्ठिरमीमांसकमहोदयेन ‘ संस्कृत व्याकरणशास्त्र का इतिहास ’ इत्यभिधेये स्वग्रन्थे महाभाष्यकारस्य पतञ्जलेः कालो द्विसहस्रवैक्रमाब्दपूर्वमिति निर्धारितम्। प्रमाणान्यधोलिखितानि –

1. महाभाष्ये कुत्रचिदपि पुष्पमित्रस्य ‘ शुङ्ग ’,‘ राजा ’ इति वा विशेषणं वा नोपलभ्यते, न च कुत्रचित् पुष्पमित्रस्याऽश्वमेधयज्ञकरणस्यैव सङ्केतोऽस्ति । अत इदं नामाऽपि देवदत्त-यज्ञदत्त-विष्णुमित्रादिवत् सामान्यपदमेव।

2. यदि ‘ इह पुष्पमित्रं याजयामः ’ इत्यस्मिन् वाक्ये ‘ इह ’ इति पदं पाटिलपुत्रस्य निर्देशकत्वेन स्वीक्रियेत तर्हि तदुत्तरवर्त्तिना इह अधीमहे इत्यनेन वाक्येनेदं स्वीकर्तव्यं भविष्यति यत् पतञ्जलिः पुष्पमित्रस्याऽश्वमेधयज्ञसमये पाटलिपुत्रेऽध्ययनं करोति स्म। एतादृशार्थस्वीकारेऽश्वमेधयाजनं गुरुमुखाद् अध्ययनमिति द्विविधमपि कार्यं सममेव न भवितुमर्हति। अत एतादृशवाक्यानां कस्मिंश्चिदर्थविशेषे सङ्केतरूपेण स्वीकरणमनुपन्नमेव।

3. ‘ चन्द्रगुप्तसभा ’ इत्युदाहरणं महाभाष्यस्यानेकेषु हस्तलेखेषु नोपलभ्यते, यत्रोपलभ्यते तत्रापि ‘ पुष्पमित्रसभा ’ इति वाक्यादनन्तरमेवोपलभ्यते। पाठक्रमोऽयमैतिहासिकदृष्ट्याऽयुक्तमेवाऽस्ति।

4. महाभाष्यस्य पूर्वोद्धृते उद्धरणे वृषलशब्दस्याऽतिप्रसिद्धो ‘ धर्मात्मा ’ इत्यर्थोऽपि भवितुमर्हति। वृषलस्याऽर्थः केवलं चन्द्रगुप्त एव नाऽस्ति।

5. ‘ अरुणद् यवनः साकेतम्, अरुणद् यवनो मध्वमिकाम् ’ इत्यत्र कस्यचिद् विशिष्टस्य यवनस्य राज्ञ उल्लेखो नाऽस्ति। कालयवननामाऽतिप्राचीनो यवनसम्राड् भारतस्यैकस्मिन् बृहद्भागे आक्रमणं चकार, देशेऽस्मिन् तेनाऽत्यन्तमत्याचारा विहिताः। श्रीकृष्णस्तमवधीत्। भारतीया आर्या अतिप्राचीन-कालाद् यवनेभ्यः परिचिता आसन्। रामायणमहाभारतादिषु यवनानां बहुधा उल्लेख उपलभ्यते। अतः केवलमेतावता निर्देशेन कालविशेषस्य सिद्धिर्नैव भवितुमर्हति।

6. मौर्यवंशः प्राचीनः, तस्याऽऽरम्भश्चन्द्रगुप्तादेव जातः। अतः केवलं मौर्यपदस्योल्लेखाद्विशिष्टः परिणामो न साधयितुं शक्यते। महाभाष्यस्य टीकाकारमतेषु मौर्यशब्दः शिल्पिवाचकोऽस्ति।

7. आचार्यस्य भर्तृहरेः, कल्हणस्य च लेखाज्ज्ञायते यत् चन्द्राचार्येण विलुप्तप्रायस्य व्याकरण-महाभाष्यस्य पुनरुद्धारो विहित आसीत् । महता प्रयत्नेन चन्द्राचार्येण दक्षिणप्रदेशान्महाभाष्यस्यैका प्रतिरूपलब्धा । अत एवेदं सम्भाव्यते यद् यथा विलुप्ताया अग्निवेशसंहितायाश्चरकदृढबलाभ्यां परिष्कारो विहितः, यथा च जीवकेन काश्यपसंहितायाः परिष्कारो विहितस्तथैव चन्द्राचार्येण विनष्टस्य महाभाष्यस्य परिष्कारो विहितो भवेत् ।

आर्युवेदीयचरकसंहितायामुक्तम् – यद् अस्मिन् काले अर्थात् कलेरारम्भे मनुष्याणां खल्वायुर्वर्ष-शतपरिणामस्ति । प्रत्येकं शतवर्षानन्तरं मनुष्याणामायुषः काले खल्वेकसंवत्सरस्य ह्रासो जायते । पतञ्जलिनाऽप्युक्तं महाभाष्ये – किं पुनरद्यत्वे । यः सर्वथा चिरं जीवति वर्षशतं जीवति ।

अनेन स्पष्टतया सिद्ध्यति यद् भाष्यकारकाले मनुष्याणां प्रायिकमायुः शतवर्षाणामासीदिति । चरकसंहितायां मनुष्यायुषो यो निर्देशो विहितः, उत्तरोत्तरञ्चायुषो ह्रासस्य यद् वैज्ञानिकं तत्त्वं सङ्केतितम्, तस्योल्लेखोऽभारतीयग्रन्थेष्वप्युपलभ्यते । बाइबिलग्रन्थे लिखितमस्ति – ‘ हमारी आयु के बरस सत्तर तो होते हैं और चाहे बल के कारण अस्सी बरस भी हों, तो भी उन पर का घमण्ड कष्ट और व्यर्थ बात ठहरता हैं ’ ।

अनेन स्पष्टं भवति यद् ईसामसीहमहोदयस्य काले मनुष्याणां प्रायिकमायुः सप्ततिवर्षाणां स्वीक्रियते स्म । भारतीयैतिहासिककालगणनानुसारेण ईसामसीहमहोदयस्य कालः 3100 मितकलि-संवत्सरे स्वीक्रियते । एवं कलिप्रारम्भकालाद् ईसामसीहकालं यावत् 3000 वर्षेषु चरकस्य प्रतिशतवर्षे एकसंवत्सरस्य ह्रासनियमानुसारेण 30 वर्षाणां ह्रास आवश्यक एव । अनेनेदमपि प्रमाणितं भवति यत् चरकसंहिता ईसामसीहकालात् त्रिसहस्रवर्षप्राचीना त्ववश्यमेवाऽस्ति । अर्थाद् भारतीया कालगणनैव समीचीना । पाश्चात्यैर्विद्वद्भिः ईसातः 1400 मितवर्षपूर्वं विहिता भारतयुद्धकालस्थापना च नितान्तम् अशुद्धैव ।

पतञ्जलिना ‘ यः सर्वथा चिरं जीवति ’ इत्यनेन यो भावो व्यक्तः, स एव बाइबिलग्रन्थे ‘ चाहे बल के कारण ’ शब्दैः प्रकटितः । अत एवैतदुभयवर्णनस्य तुलनया स्पष्टं ज्ञायते यत् सामान्यमायुः प्रयत्नद्वाराऽतिरिक्तरूपेण दशवर्षाणि यावद् वर्द्धयितुं शक्यते । एतन्नियमानुसारेण भाष्यकारशब्दैरिदमेव तात्पर्यमवबुद्ध्यते यद् भाष्यकारस्य काले मनुष्याणां सामान्यमायुर्नवतिमितवर्षाणामासीत्, चिरञ्जीविनश्च शतं वर्षाण्यपि जीवन्ति स्म । एवं चरकस्यायुर्विज्ञाननियमानुसारेण महाभाष्यकारस्य पतञ्जलेराचार्यस्य कालो वैक्रमाब्दाद् द्विसहस्रमितवर्षपूर्वमेव स्वीकर्तव्यः[118] ।

---

[118] व्याकरणमहाभाष्यम् – भूमिकायाम् – डॉ. आत्मदेवमिश्रः

तत्र महाभाष्यकाररचितेषु ग्रन्थेषु योगग्रन्थः – योगसूत्रम्, वेदान्तग्रन्थः – परमार्थसारः, वैद्यक-ग्रन्थः – चरकः। व्याकरणग्रन्थः – महाभाष्यम्। अत एव तु महाभाष्यकारविषये श्लोकोऽयं रचितः –

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्येन।

योऽपाकरोत् तं प्रवरं मुनिनां पतञ्जलिरानतोऽस्मि ॥

महर्षिपतञ्जलिः महर्षिपाणिनेः शब्दानुशासनस्य सुमहद् व्याख्यानं कृतवान्। इदं महाभाष्यं खलु व्याकरणशास्त्रस्य प्रामाणिको ग्रन्थः। तद् व्याख्यानं समस्तलौकिकवैदिकपदशङ्कासमाधानमूलं महाभाष्यनाम्ना लोके प्रसिद्धं दरीदृश्यते। नीरसमपि व्याकरणशास्त्रं स्वकीयया – अभिनवव्याख्यया सुतरां सरसाञ्चकार। भविष्यपुराणे प्रतिसर्गपर्वणि चित्रकूटनिवासिनः पतञ्जलेः भाष्यविशारदत्वम् उत्कर्षेण प्रतिपादितमस्ति –

चित्रकूटे गिरौ रम्ये नानाधातुविचित्रिते।

तत्रावसन्महाप्राज्ञ उपाध्यायः पतञ्जलिः ॥

वेदवेदाङ्गतत्त्वज्ञो गीताशास्त्रपरायणः।

विष्णुभक्तः सत्यसन्धो भाष्यशास्त्रविशारदः ॥[119]

विभिन्नेषु प्राचीनेषु ग्रन्थेषु पतञ्जलेराचार्यस्य गोनर्दीयः, गोणिकापुत्रः, पदशेषकारत्वात् तदीयमभिधानं पदकारः, चूर्णिकारः, शेषः, शेषराजः, शेषाहिः, नागनाथः, अहिपतिः, फणिपतिः, वासुकिः, फणिभृत्, भोगीन्द्रो वेति प्रसिद्धमिति। अयं पतञ्जलिः प्राक्तनग्रन्थकर्तृभिः कोशकारैश्च बहुभिर्नामभिः स्मर्यते[120]। तथाहि –

1. गोनर्दीयः, **2.** गोणिकापुत्रः, **3.** नागनाथः, **4.** अहिपतिः, **5.** फणिभृत्, **6.** शेषराजः, **7.** शेषाहिः, **8.** चूर्णिकारः, **9.** पदकारः, **10.** फणी, **11.** फणिराट् इत्यादि।

तत्र कियन्ति नामानि तत्त्वतो पतञ्जलेर्महाभाष्यकर्तुर्बोधकानि, कानि च नामपर्यायाणि, कानि च भ्रममूलकानीति विचारणीयानि सन्ति। तत्र गोणिकापुत्रशब्दो गोनर्दीयशब्दश्च प्रथमं विचार्येते। तथाहि –

कामसूत्रे प्रथमाध्याये शास्त्रसंग्रहे वात्स्यायनेन मुनिना गोनर्दीयगोणिकापुत्रयोः पार्थक्येन उपादानादेतावाचार्यौ भिन्नावेव प्रतीयेते। तथाहि –

---

[119] भविष्यपुराणम् – (35/1-2)

[120] महाभाष्यनवाह्निकालोचनम्

‘ तत्प्रसङ्गाच्चारायणः साधारणमधिकरणम्पृथक् प्रोवाच, सुवर्णनाभः साम्प्रयोगिकम्, घोटकमुखः कन्यासम्प्रयुक्तम्, गोनर्दीयो भार्याधिकरणम्, गोणिकापुत्रः पारदारिकम्, कुचुमार औपनिषदिकम् । इत्येवं बहुभिराचार्यैस्तच्छास्त्रं खण्डशः प्रणीतमुपसन्नकल्पमभूत् । ’,‘ गोणिकापुत्रः पारदारिकम् ’[121]

‘ सम्बन्धिसखिश्रोत्रियराजदारवर्जमिति गोणिकापुत्रः ’[122]

एभिः कामशास्त्रप्रमाणैर्ज्ञायते यद् गोणिकापुत्रगोनर्दीयौ पृथगेवाचार्यौ स्तः । महाभाष्येऽप्येतयोः नाम्नोर्बहुलं प्रयोगो दरीदृश्यते । तथाहि –

‘ गोनर्दीयस्त्वाह – सत्यमेतत् सति त्वन्यस्मिन्निति ’[123]

‘ गोनर्दीयस्त्वाह – **अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ ।**
त्वत्कपितृकमत्कपितृक इत्येव भवितव्यमिति ।।’[124]

‘ न तर्हीदानीमिदम्भवति – इच्छाम्यहं काशकटीकारमिति । इष्टमेवैतद् गोनर्दीयस्य ’[125]

‘ गोनर्दीयस्त्वाह – इष्टमेवैतत् संगृहीतम्भवति – अतिजरमतिजरैरिति भवितव्यम् ’[126]।

उपर्युक्त 1-1-21 महाभाष्यव्याख्याने प्रदीपटीकाकारो गोनर्दीयपदस्य ‘ भाष्यकारस्त्वाह ’ इति व्याख्यानं व्यधात् ।

अस्यैव व्याख्याने उद्योतकारः प्राह - ‘ गोनर्दीयपदं व्याचष्टे भाष्यकारः ’ इति ।

एवमेव काव्यमीमांसाकारः – ‘ यस्तु प्रयुङ्कते.....तत्प्रमाणमेवेति गोनर्दीयः’ इति उदाहरन् व्याचष्टे ।

वैजयन्ती कोशकारः प्राह – ‘ गोनर्दीयः पतञ्जलिः ’ ।। श्लोक 157 ।।

एभिः प्रमाणैः गोनर्दीयः पतञ्जलिरेवास्तीति विज्ञायते ।

“ अकथितञ्च ”[127] इति सूत्रभाष्ये –‘ उभयथा गोणिकापुत्रः ’ ।

---

121 कामसूत्रम् – (1-1-16)
122 कामसूत्रम् – (1-5-31)
123 महाभाष्यम् – (1-1-21)
124 महाभाष्यम् – (1-1-29)
125 महाभाष्यम् – (3-1-92)
126 महाभाष्यम् – (6-2-101)
127 अष्टाध्यायी – (1-4-51)

एतस्य व्याख्यानं कुर्वता उद्द्योतटीकाकारेण नागेशेनोच्यते – ‘ गोणिकापुत्रो भाष्यकार इत्याहुः ’ । तदनुसृत्य पतञ्जलिचरितकाव्ये रामभद्रदीक्षितेन वर्णितम् – ‘ चिदम्बरतीर्थे पुत्रार्थं तपस्यन्त्याः गोणिकायाः गर्भे प्रादुरभूत् पतञ्जलिर्भाष्यकारः ’ ।

एतदतिरिच्य नान्यत्किमपि प्रमाणमुपलभ्यते । तस्माद् गोणिकापुत्रशब्देन पतञ्जलेर्ग्रहणं न समीचीनम्प्रतिभाति ।

महाभाष्ये – “ राष्ट्रावारपाराद् घखौ ”[128] सूत्रे कैयटः प्राह – “ तत्र जातः ”[129] सूत्रेऽस्य लक्षणत्वमाश्रित्यैतेषां सिद्धिर्विधास्यति नागनाथः ।

तदनेन पतञ्जलेर्नागनाथनाम्नः पुष्टिर्भवति ।

‘ अहिपतिः ’ इति नाम्ना पतञ्जलिं सस्मार चरकटीकाप्रारम्भे चक्रपाणिः । तथाहि –

पातञ्जलमहाभाष्य - चरकप्रतिसंस्कृतैः ।

मनोवाक्कायदोषाणां हन्त्रेऽहिपतये नमः ॥

महाराज-भोजराजो योगसूत्रवृत्तौ ‘ फणिभृत् ’ नाम्ना पतञ्जलिं सस्मार । तथाहि –

वाक्चेतोवपुषां मलः फणिभृता भर्त्रेव येनोद्धृतः ।

तदनेनपतञ्जलेर्फणिभृद् नाम्नःपुष्टिर्भवति ॥

हैमबृहद् वृत्तयवचूर्णिनामके व्याख्याने अमरचन्द्रसूरिः महाभाष्यस्यैकं पाठं शेषराजनाम्ना समुदाजहार । तथाहि –

यदाह शेषराजः – ‘ नहि गोधा सर्पन्ती सर्पणादहिर्भवति ’ । तदनेन पतञ्जलेः शेषराजनाम्नः पुष्टिर्भवति ।

बल्लभदेवः शिशुपालवधमहाकाव्यस्य द्वितीयसर्गस्य 112 श्लोकटीकायां शेषाहिनाम्ना पतञ्जलिं सस्मार । तथाहि –

‘ पदं शेषाहिविरचितं भाष्यम् ’।

भर्तृहरिः महाभाष्यदीपिकायां वारत्रयं चूर्णिकारनाम्ना पतञ्जलिं सस्मार । एवमेव स्कन्दस्वामी निरुक्त 3-16 व्याख्याने चूर्णिकारनाम्ना महाभाष्यस्य (1-1-57) पाठमुदाजहार । तथाहि –

‘ क्वचिद्गुणो गुणिविशेषको भवति । कदाचित्तु गुणिना गुणो विशेष्यते, इति चूर्णिकारस्य प्रयोगः ’ ।

[128] अष्टाध्यायी – (4-2-93)

[129] अष्टाध्यायी – (4-3-25)

स्कन्दस्वामी 1-3 निरुक्तटीकायां पदकारनाम्ना पतञ्जलिं सस्मार। तथाहि –

“ वेः शालच्छङ्कटचौ ”[130] पदकार आह – उपसर्गाश्च पुनरेवमात्मकाः.....क्रियामाहुः।

तदनेन पतञ्जलेः पदकारनाम्नः पुष्टिर्भवति।

उव्वटश्च ऋक्प्रातिशाख्ये (13-19) टीकायां पदकारनाम्ना (1-1-9) महाभाष्य-पाठमुदाजहार। तथाहि –

‘ पदकारेणाप्युक्तं प्रथमद्वितीयाः.......महाप्राणा इति ’।

आत्मानन्दोऽपि अस्यवामीयसूक्तव्याख्याने पदकारनाम्ना (1-1-47) महाभाष्यमुदाजहार। तथाहि –

‘ पदकारास्तु पदभक्तं नुममाहुः ’।

सिद्धान्तकौमुदीकारो भट्टोजिदीक्षितः शब्दकौस्तुभे पतञ्जलिं फणिनाम्ना सस्मार। तथाहि –

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।
तत्र निर्णीत एवार्थो संक्षेपेणेह कथ्यते।।

कुमारतातयो विक्रमसप्तदशशताब्द्यां जातः पारिजातनाटकनाम्नि ग्रन्थे फणिराड् नाम्ना पतञ्जलिं सस्मार। तथाहि –

‘ व्याख्याता फणिराट् कणादकपिलश्रीभाष्यकारादिग्रन्थानां पुनरीदृशां च करणे ख्यातः कृतीनामसौ ’।

तदनेनात्र फणिराट्पदेन पतञ्जलेः महाभाष्यकारस्य नाम्नः पुष्टिर्भवति।

एतैर्नामभिः पतञ्जलेर्विषये केचन संकेता लभ्यन्ते। परन्तु न ते तदितिहासान्वेषणे प्रबलाः। एतेषु बहूनि नामानि नामपर्यायाणि बहूनि च तत्तद्विशिष्टगुणप्रख्यापनात्प्रवृत्तानीति विज्ञायते। तस्य ‘ मुख्यं नाम पतञ्जलिरित्येवानुमीयते ’।

तद्धितान्तगोनर्दीय शब्दे न तद्देशविषये कश्चित्संकेतो दृश्यते। परन्तु को नाम गोनर्ददेशः ? इति नाद्यावदैतिह्यविद्भिरन्वेषितः।

‘ अन्तःसाक्ष्याद् अयं पतञ्जलिः भारतवर्षस्य पश्चिमभागस्य निवासी विज्ञायते ’।

“ विभाषा साकाङ्क्षे ”[131] सूत्रव्याख्याने महाभाष्ये प्राह पतञ्जलिः –

‘ अभिजानासि देवदत्त कश्मीरान्गमिष्यामः, तत्र सक्तून् पास्यामः ’।

[130] महाभाष्यम् – (5-2-28)

[131] अष्टाध्यायी – (3-2-114)

अतो ज्ञायते यद् महर्षि पतञ्जलिः, भारतस्य पश्चिमोत्तरभागवास्तव्य आसीत्। स भागः कश्मीर एव भवितुमर्हति । यतो हि प्राचीनकाले भारतस्य महद्विद्याकेन्द्रं कश्मीरदेश एवासीत् । तस्मात्तत्रैव पतञ्जलेर्जन्मभूमिः स्यादिति विज्ञायते । कश्मीरस्यैव अभिमन्यु जयापीडभूपालाभ्यां महाभाष्यस्य पौनःपुन्येनोद्धारकरणात् पतञ्जलेः कश्मीरदेशनिवासित्वमवसीयते। गोनर्दीयपदेन माभूद्विभ्रमः। गोनर्द-नाम्ना कस्यापि भूभागस्य कश्मीरेऽपि सम्भवात् । कश्मीरदेशे महाभाष्यस्योद्धारश्चन्द्राचार्येण कृत इत्यत्रोक्तम्भर्तृहरिणा। तथाहि –

पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः ।

स नीतो बहुशाखात्वं चन्द्राचार्यादिभिः पुरा ॥[132]

अयमेव भावो राजतरङ्गिण्यामपि दृश्यते –

चन्द्राचार्यादिभिर्लब्ध्वा देशं तस्मात्तदागमम् ।

प्रवर्तितं महाभाष्यं स्वञ्च व्याकरणं कृतम् ॥

एतैः प्रमाणैः पतञ्जलेः कश्मीरदेशो जन्मभूमिरासीदित्यनुमीयते।

ततश्च स भारतस्य दक्षिणपूर्वभागे स्वमहाभाष्यप्रचाराय, मथुरायां वाराणस्यां पाटलिपुत्रे, साकेते, कौशाम्ब्यां प्राचरदिति प्राचीनभारतीयैतिह्यानुशीलनेन परिज्ञायते।

महाराज समुद्रगुप्तः कृष्णचरितनामकमेकं महाकाव्यं निर्ममे । तत्रोक्तं महर्षिपतञ्जलिविषये किञ्चित् –

विद्ययोद्रिक्तगुणतया भूमावमरतां गतः ।

पतञ्जलिर्मुनिवरो नमस्यो विदुषां सदा ॥

कृतं येन व्याकरणभाष्यं वचनशोभनम् ।

धर्मावियुक्ताश्चरके यो गा रोगमुषः कृताः ॥

महानन्दमयं काव्यं योगदर्शनमद्भुतम् ।

योगव्याख्यानभूतं तद् रचितं चित्तदोषहम् ॥

महाराज भोजः स्वनिर्मितशब्दानुशासनग्रन्थे पतञ्जलिं सस्मार। तथाहि –

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन ।

योऽपाकरोत्तं प्रबरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥

अनेनायुर्वेदमहाभाष्ययोर्निर्मातृत्वं पतञ्जलेः स्पष्टमेवोपलक्ष्यते।

---

[132] वाक्यपदीयम् – (2-489)

भविष्यपुराणे पतञ्जलेः भारतवर्षस्य पूर्वदक्षिणभागे तपश्चरणं प्रोक्तम् । तथाहि –

चित्रकूटे गिरौ रम्ये नानाधातुविचित्रिते ।

तत्राऽवसन् महाप्राज्ञ उपाध्यायः पतञ्जलिः ॥ 35-3 ॥

काश्यां कात्यायनेनैव तस्य वादो महानभूत् ।

वर्षान्ते च तदा विप्रो महाशक्तेन निर्जितः ॥ 36-3 ॥

लज्जितः स तु धर्मात्मा स तुष्टाव सरस्वतीम् ।

कात्यायनं पराजित्य परां मुदमवाप्तवान् ॥ 36-4 ॥

....................................महाभाष्यमुदैरयत् ॥ 36-12 ॥

महाकविराजशेखरेण काव्यमीमांसायां पतञ्जलेः पाटलिपुत्रनगरेऽवस्थानं व्याहरता प्रोच्यते – श्रूयते च पाटलिपुत्रे शास्त्रकारपरीक्षा –

अत्रोपवर्षवषाविह पाणिनिपिङ्गलाविह व्याडिः ।

वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः ॥ – (काव्यमीमांसा अ. 10.)

पतञ्जलेः कालनिर्णयेऽन्यान्यप्यन्तःसाक्ष्यान्युपलक्ष्यन्ते । तथाहि –

1. ‘ अनुशोणं पाटलिपुत्रम् ’[133]
2. ‘ जेयो वृषलः ’[134]
3. ‘ काण्डीभूतं वृषलकुलम् । कुड्यीभूतं वृषलकुलम् ’[135]
4. ‘ मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः ’[136]
5. ‘ अरुणद्यवनः साकेतम्, अरुणद्यवनो माध्यमिकाम् ’[137]
6. ‘ पुष्यमित्रसभा चन्द्रगुप्तसमा ’[138]
7. ‘ महीपालवचः श्रुत्वा जुघुषुः पुष्पमाणवाः । एष प्रयोग उपपन्नो भवति ’ ।
8. ‘ इह पुष्यमित्रं याजयामः ’[139]

---

[133] महाभाष्यम् – (2-1-15)
[134] महाभाष्यम् – (1-1-50)
[135] महाभाष्यम् – (6-3-61)
[136] महाभाष्यम् – (5-3-99)
[137] महाभाष्यम् – (3-2-111)
[138] महाभाष्यम् – (1-1-68)
[139] महाभाष्यम् – (3-2-123)

9. ‘ पुष्यमित्रो यजते, याजका याजयन्ति ’[140]

10. ‘ यदा भवद्विधः क्षत्रियं याजयेत् । यदि भवद्विधः क्षत्रियं याजयेत् ’[141]

महाभाष्ये उपर्युक्तानां नाम्नामुल्लेखेन तत्तदैतिहासिकपुरुषाणां कालनिश्चयात् पतञ्जलेरपि कालोऽनुमीयते । ततश्च ईशवीयसंवत्सरात् प्राक् 1200 वर्षतः 2000 वर्षपूर्वम्पतञ्जलेः कालो निश्चेतुं शक्यते । तदलमस्तु बुद्धिमद्वर्येषु ।[142]

● महाभाष्यस्य वैशिष्ट्यम्

महाभाष्यं हि पाणिनीयव्याकरणस्याऽत्यन्तं प्रामाणिकं ग्रन्थरत्नमस्ति । महामुनेः पतञ्जलेः आचार्यस्य काले पाणिनीयव्याकरणस्याऽन्येषां प्राचीनानां व्याकरणग्रन्थानाञ्च महती ग्रन्थराशिः विद्यमानाऽऽसीत् । महामुनिना भगवता पतञ्जलिना पाणिनीयव्याकरणव्याख्यानव्याजेन महाभाष्ये तेषां समस्तानां ग्रन्थानां सारं संगृहीतोऽस्ति । महाभाष्येऽनेकेषां प्राचीनवैयाकरणानामुल्लेखोऽस्ति, अनेकेषाञ्च प्राचीनग्रन्थानामनेकानि वचनानि चोद्धृतानि । सर्वाण्यपि ज्ञातव्यानि विषयजातानि स्थाने-स्थाने अत्र सपरिकरं विवेचितानि । लौकिका व्यवहाराः, इतिहासाः, आवश्यका धर्माः, दर्शनानां सिद्धान्ताः, गूढतमानि विज्ञानानि चेति सर्वमेतम्महाभाष्यस्य सूक्ष्मपर्यालोचनया प्रतीयते । अतोऽयं ग्रन्थो न केवलं पाणिनीयव्याकरणशास्त्रस्यैव प्रामाणिको ग्रन्थोऽस्ति, अपि त्वयं समस्तानां विद्यानाम् आकरग्रन्थोऽस्ति । अत एवोक्तं भर्तृहरिणा वाक्यपदीये –

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥

तत्र सर्वेऽपि लौकिकव्यवहाराः, प्राक्तना इतिहासाः, आवश्यकधर्माः, दर्शनानां सिद्धान्ताश्च स्थाने स्थान उपवर्णिताः । विज्ञानस्यापि गूढतमाः सिद्धान्ता अस्मिन् महाम्बुधावुपलभ्यन्ते । यथा – “ स्थानेऽन्तरतमः ”[143] इति सूत्रे –

“ अचेतनेष्वपि । तद्यथा – लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति, नोर्ध्वमारोहति । पृथिवीविकारः पृथिवीमेव गच्छत्यान्र्यतः । तथा – या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो

---

[140] महाभाष्यम् – (3-1-26)

[141] महाभाष्यम् – (3-3-147)

[142] महाभाष्यनवाह्निकालोचनम् – (पृ. – 2)

[143] अष्टाध्यायी – (1-1-50)

धूमः । स धूम आकाशे निवाते नैव तिर्यग्गच्छति, नार्वागवरोहति । अब्विकारोऽप एव गच्छत्यान्तर्यतः । तथा – ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितं नैव तिर्यग्गच्छति, नार्वागवरोहति । ज्योतिषो विकारो ज्योतिरेव गच्छत्यन्तर्यतः ”[144] इति ।

महाभाष्ये यादृशी सरला, गभीरा, सुगमा च भाषा न तादृशी कस्मिन्नप्यन्यस्मिन् ग्रन्थेऽवलोक्यते । यद्यपि महाभाष्यस्य भाषा सुगमा भवति तथापि क्लिष्टानां व्याकरणदर्शनस्य सिद्धान्तानां प्रश्नोपप्रश्नसमाधानादिरूपेण शिष्याणां परिज्ञानाय लघवो लघुतमाः संवादा विरचिताः । एषु संवादेषु शिष्यः, आचार्यदेशीयः, आचार्यश्च प्रश्नोपस्थापनं तन्निराकरणं च विदधति । शिष्यः शङ्काम् उपस्थापयति, आचार्यशिष्यस्तां विशेषयुक्त्या समाधत्ते, आचार्यश्च सिद्धान्तमभिधत्ते । स्थाने स्थाने पौनःपुन्यं शङ्का उपस्थाप्यन्ते, समाधानानि च निराक्रियन्ते । अत्र आचार्यस्यैतादृशी शैली वर्तते यत् स न कुत्रापि कस्यापि प्रश्नस्य समाधानमुत्तरं च पूर्वं करोति । प्रथमं तावत् स सर्वेषां प्रश्नानां च सर्वासां समस्यानाञ्चोपस्थापने शिष्यान् प्रतीक्षते । अन्ते गत्वा स्वकीयं सिद्धान्तं निर्णयत्वेन व्यवस्थापयति । इयमेव पद्धतिर्व्याकरणपरम्परायामनुक्रमेण पूर्वपक्षीयभाष्यम्, एकदेशीयभाष्यम्, सिद्धान्तिभाष्यमिति च त्रिधा विभज्य स्वीकृता । महाभाष्योत्तरवर्त्तिकाले नैकैर्वैयाकरणैर्महाभाष्यस्य प्रामाण्यं स्वीकृत्य इति ‘ भाष्ये स्थितम्, इत्युक्तं भाष्ये, इत्युक्तमाकारे ’ इत्यादिभिरनेकैर्वचनैर्भाष्यस्योपजीव्यत्वं स्वीकृतं मुक्तमनसा धीधनैः ।

- **महाभाष्यनामान्वर्थत्वम्**

भाष्यते शब्दशास्त्रं येन इति भाष्यम् । महच्च तद् भाष्यं महाभाष्यमिति विग्रहे “ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ”[145] इति सूत्रेण समासः । महाभाष्यस्य भाषासौष्ठवं, कठिनतरस्यापि विषयस्य सुलभतया विवेचनम्, सर्वत्र शब्दस्य शब्दार्थस्यापि वा सफलत्वमनवद्यप्रामाण्यादिगुण-समूहमवलोक्य कस्य चेतो न चित्रीयेत । मीमांसान्यायशास्त्रादिटीकाग्रन्थानां केवलभाष्यशब्देनैव व्यवहारः किन्त्वस्य भगवत्पतञ्जलिप्रणीतस्य च महाभाष्यशब्देन व्यवहारो महत्त्वबोधनायादरेण लोके क्रियते । तथा चोक्तं वाक्यपदीयकारिकाव्याख्याने पुण्यराजेन – ‘ तच्च भाष्यं न केवलं व्याकरणस्य

[144] महाभाष्यम् – भागः 1 – (पृ. – 146)
[145] अष्टाध्यायी – (2-1-61)

निबन्धनं यावत्सर्वेषां न्यायबिजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्य महाभाष्यमित्युच्यते लोके ' इति

यत्र सूत्रार्थानुसारिभिः वाक्यैः सूत्रार्थो वर्ण्यते, स्वपदानि च वर्ण्यन्ते, तद्भाष्यमुच्यते । तदुक्तम् अभियुक्तैः –

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।। इति ।

पदच्छेदः, पदार्थः, विग्रहः, वाक्ययोजना, आक्षेपः, समाधानमेतत्समुदितं व्याख्यानमुच्यते । तथाहि पराशरपुराणे –

पदच्छेदः पदार्थश्च विग्रहो वाक्ययोजना ।
आक्षेपश्च समाधानं व्याख्यानं षड्विधं स्मृतम् ।।

तथा च भाषावृत्तिटीकाकृत् सृष्टधरः स्वविवृत्तौ प्राह –

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
पूर्वपक्षः समाधानं व्याख्यानं पञ्चधा स्मृतम् ।।

- **आह्निकपदाभिप्रायः-**

' अह्ना निर्वृत्तम् ' इति विग्रहे " तेन निर्वृत्तम् "[146] इति सूत्रेण ठक्प्रत्यये ' आह्निकः ' इति शब्दो व्युत्पाद्यते । अनया व्यपत्पात्त्या ज्ञायते यत् पतञ्जलिना प्रतिदिनं यद्भाष्यं क्रियते स्म । तस्य आह्निकम् इति सञ्ज्ञा तेन कृता । महाभाष्ये पञ्चाशीतिः आह्निकानि विद्यन्ते ।

- **पस्पशाशब्दाभिप्रायः**

महाभाष्यस्य प्रथमाह्निकं पस्पशाह्निकशब्देनास्ति प्रसिद्धम् । तत् ' स्पश बाधनस्पर्शनयोः ' भौवादिको धातुः । पस्पश्यन्ते – निग्रहं प्राप्नुवन्ति पदार्थविचारेण वादिनो यत्र सा पस्पशा । ' स्पाशनं ग्रन्थनम् ' इति क्षीरस्वामी । पुनः पुनः अतिशयेन वा स्पशतीति विग्रहे पस्पश् धातोः यङ्लुगन्तात् अचि कृते ' सञ्ज्ञापूर्वको विधिरनित्यः ' इति नियमादभ्यासदीर्धाभावात् अकारान्तात् पस्पशशब्दात् स्त्रीत्व-विवक्षायां टापि पस्पशाशब्दः सिद्धो भवति । एवञ्च पुनः पुनः अतिशयेन कस्यापि पदार्थस्य ग्रन्थनं

[146] अष्टाध्यायी – (4-2-68)

पस्पशाशब्दस्यार्थो बोध्यः । ततश्च पस्पशापदार्थ उपोद्घातो भवितुमर्हति । तदित्थमस्मिन्नाह्निके महाभाष्यस्योपोद्घातरूपेण सर्वे विषयाः सूक्ष्मतया सन्निवेशिता इति स्पष्टं भवति ।

(छ) यथोत्तरं मुनीनां प्रामाण्यम् ।

अद्यत्वे पाणिनीयानुसारेणैव साधु-असाधुव्यवस्था – विदितचरमेवैतत् सर्वेषां यत् प्रकृतिप्रत्ययतत्तदर्थविभागज्ञानपूर्वकं सुशब्दान् तत्तदर्थेषु प्रयोक्तुं यः प्रभवति, स एव सर्वत्र प्रशस्यो भवतीति, प्रकृतिप्रत्ययतत्तदर्थविभागज्ञानञ्च व्याकरणशास्त्राधीनमेव इति च । अत्र काचन शङ्का जायते – सत्स्वपि अनेकेषु ऋषिप्रोक्तेषु अनृषिप्रोक्तेषु व्याकरणेषु, अद्यत्वे पाणिनीयमेव कुतः परमप्रमाणतया स्वीक्रियते विद्वद्भिः ? इति ।

अत्र समाधानमेवमाभाति – सम्प्रदायानुयायिनः ऋषिप्रोक्तानृषिप्रोक्तयोः मध्ये ऋषिप्रोक्तस्यैव प्रामाण्यं ददति, न अनृषिप्रोक्तस्य इति । अत्र भर्तृहरिप्रभृतीनां वचनमेव प्रमाणम् । तथा हि –

भर्तृहरिणा वाक्यपदीये ब्रह्मकाण्डारम्भे –

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतानागतं ज्ञानं प्रत्यक्षान्नविशिष्यते ।। 37 ।।
अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान्, वचनं तेषां नानुमानेन बाध्यते ।। 38 ।।

इत्यादिकारिकाभिः अनृषिदर्शनापेक्षया ऋषिदर्शनस्य अनन्यसामान्यमान्याता प्रदर्शिता । अनृषिदर्शनानां तु ऋषिदर्शनमूलकत्वादेव प्रामाण्यम्, तद्विरोधे तु अप्रामाण्यमेव इत्यपि सूचितम् । अत अनृषिप्रोक्तचान्द्रकातन्त्रादिव्याकरणापेक्षया ऋषिप्रोक्तत्वात् पाणिनीयमेव आदर्तव्यमिति सम्प्रदायः आगतः इति ।

भवत्वेव – अत्र अपरा शङ्का जायते – ऋषिप्रोक्तेष्वपि आपिशलकाशकृत्स्नादिषु बहुषु व्याकरणेषु सत्सु किमिति पाणिनीयमेव अद्यत्वे आद्रियते ? इति अत्रापि कैयटादिभिः समाधानमुक्तमेव । तथाहि – " शताच्च ठन्यतावशते "[147] इति सूत्रे शतप्रतिषेधे अन्यशतत्वेऽप्रतिषेधः इति वार्तिकस्य व्याख्याने – ' शतं गावः परिमाणमस्य शतकः गोसङ्घः ' इत्यत्र पाणिनीयानुसारेण ठन्यत्प्रतिषेधः प्राप्नोति । शताच्च ठन्यतौ अग्रन्थे इति वदतोः आपिशलकाशकृत्स्नयोः मते तु ठन्यत्प्रतिषेधाभावात्

[147] अष्टाध्यायी – (5-1-21)

‘ शतिकः शत्यो वा गोसङ्घः ’ इति प्राप्नोति इति पाणिनायतन्त्रस्य आपिशलकाशकृत्स्नतन्त्रस्य च विरोधमुद्भाव्य ‘ नियतकालाश्च स्मृतयो व्यवस्थाहेतवः ’ इति मुनित्रयमतेन अद्यत्वे साधु-असाधुविभागः इत्युक्तं कैयटेन।

एतद्व्याख्याने उद्द्योते – मन्वादिभिः स्मृतानां स्मृतीनां बह्वीनां सत्त्वेऽपि, क्वचित् तत्र परस्परविरोधे सत्यपि कलौ पाराशरी स्मृतिः इत्याद्यभियुक्तोक्तिमनुसृत्य तासां युगभेदेन धर्मव्यवस्थापकता यथा आश्रीयते, तथैव आपिशलकाशकृत्स्नपाणिन्यादिप्रणीतानां शब्दानुशासनानां बहूनां सत्त्वेऽपि तत्र तत्र परस्परवैरुध्ये सत्यपि, कालभेदेन तेषां साधु-असाधुशब्दव्यवस्थापकता इत्याशयः नागेशेन प्रकटितः। अत इदानीं पाणिनीयमेव प्रमाणमिति सिद्धम्।

यद्यपि पाणिनीयव्याकरणे मुनित्रयस्यैव प्रामाण्यम्, न तु मुनित्रयातिरिक्तेनोक्तस्य, तत्रापि भाष्यकारस्य सर्वोत्कृष्टं प्रामाण्यमित्याश्रयणं विचित्रमिव दृश्यते। तथापि अनवस्थाप्रसङ्गवारणाय कैयटहरदत्तभट्टोजिदीक्षितादिभिः तथा आश्रितम्। तथाकरणादन्या गतिः नास्ति। तथा हि – यदि मुनित्रयानुक्तस्य काशिकाकारसरस्वतीकण्ठभरणकारादिभिः उक्तस्यापि यदि प्रामाण्यमाश्रीयते, तदा तदन्येन येन केनचिदुक्तस्यापि प्रामाण्यमाश्रयणीयं स्यात्। यदि शिष्टप्रयोगमूलकत्वात् काशिकाकाराद्युक्तस्यैव प्रामाण्यमितियुच्यते, तदन्येन उक्तस्य विषयेऽपि यः कोऽपि शिष्टप्रयोगः प्रदर्श्येत ? किञ्च, कः शिष्टप्रयोगः ? इति निर्णयोऽप्यत्यन्तं क्लिष्टः। अपि च, लक्षणैकचक्षुष्काणामस्मादृशानां प्रयोगमाधारीकृत्य निर्णयकरणमत्यन्तं क्लिष्टम्। अतो मुनित्रयातिरिक्तस्य प्रामाण्ये अङ्गीकर्तव्ये कस्य प्रामाण्यमङ्गीकार्यम् ? कस्य न ? इति प्रश्नः असमाधेय एव। सर्वेषां प्रामाण्याङ्गीकारे अन्ततः सर्वेऽपि साधव एव स्युः, साध्वसाधुव्यवस्थैव नष्टा स्यात्। अतो मुनित्रयमात्रस्यैव प्रामाण्यं स्वीकृतम्। तत्रापि पूर्वमुन्यपेक्षया उत्तरमुन्युक्तस्यैव प्रामाण्यम्, तस्य मुनित्वाविशेषाद् उत्तरकालवर्तित्वेन बहुलक्ष्यदर्शित्वाच्च।

पाणिनीयं नाम पाणिनिमहर्षिप्रोक्तानि अष्टाध्यायीसूत्रप्रभृतीन्येव खलु। कथमिदं पाणिनीयं त्रिमुनिव्याकरणमिति प्रसिद्धिं प्राप्तम् ?।

त्रिमुनिव्याकरणम् - शब्दसंस्काराय पाणिनिकात्यायनपतञ्जलिनामकैः त्रिभिः मुनिभिः यद्यत् कृतम्, तत्तत् सर्वमद्यत्वे पाणिनीयव्याकरणपदेन व्यवह्रियत्। तत्र भगवता पाणिनिना अष्टाध्यायी-निबद्धानि सूत्राणि, तच्छेषतया गणपाठ-धातुपाठ-शिक्षाप्रभृतीनि च प्रणीतानि। तत्र अष्टाध्यायीस्थसूत्रेषु उक्त-अनुक्त-दुरुक्त-चिन्तां कुर्वता भगवता कात्यायनेन वार्तिकानि प्रणीतानि। ततः पाणिनि-कात्यायनोक्तयोः विषये उक्त-अनुक्त-दुरुक्त-चिन्तां कुर्वता भगवता पतञ्जलिना महाभाष्यं प्रणीतम्।

वार्तिके इव भाष्येऽपि यद्यपि उक्तानुक्तदुरुक्तचिन्तैव अस्ति, तथापि पूर्वपक्षि-पूर्वपक्ष्येदेशि-सिद्धान्ति-सिद्धान्त्येकदेशि-तटस्थरूपाणां पुरुषाणां भाषणरूपत्वात् भाष्यमिति व्यवहार एव आगतः इत्यभियुक्ताः वदन्ति । एतत् सूत्रवार्तिकभाष्यरूपं समुदितं त्रिमुनिव्याकरणमिति व्यवह्रियते । तत्र वार्तिककार-भाष्यकारयोः उक्तानुक्तदुरुक्तचिन्ता किञ्चिदिव उदाहरणमुखेन प्रदर्श्यते ।

तत्र वार्तिककारकृता उक्तचिन्ता - पाणिनिना यत् सूत्रमुक्तं तत्र या कापि न्यूनता अन्यैः प्रदर्शिता चेत्, विचारपूर्वकं तत्परिहृत्य पाणिन्युक्तस्य समर्थनम् । यथा – " तस्यापत्यम् "[148] इति सूत्रे अपत्यार्थस्यापि इदन्त्वेन विवक्षायां " तस्येदम् "[149] इति सूत्रेणैव अणः सिद्धत्वात् " तस्यापत्यम् " इति सूत्रं व्यर्थमिति आक्षेपे जाते तत्र वार्तिककारेण विचारपूर्वकं व्यवस्था एवं कृता – पूर्वोक्तरीत्या क्वचित् तथा सिद्धावपि सर्वत्र " तस्येदम् " इत्यनेन न सिध्यति, यतोहि ' शालीयः ' इत्यादाविव ' भानोः अपत्यम् भानवः ' इत्यादौ " तस्येदम् " इति सूत्रं बाधित्वा " वृद्धाच्छः "[150] इति छप्रत्ययः प्राप्नोति । तद्बाधनार्थं " तस्यापत्यम् " इति पृथक्सूत्रकरणं सार्थकमिति । अयमंशः –

तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत् ।
उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम् ।।

इति वार्तिकेन प्रकाशितः । एवमादायः वार्तिककारस्य उक्तचिन्तायाः उदाहरणानि भवितुमर्हन्ति ।

तत्र भाष्यकारकृता उक्तचिन्ता – क्वचित् भाष्यकारः सूत्रोक्तं वा वार्तिकोक्तं वा विषयं सविचारं व्याख्याय तत् तथैव व्यवस्थापयति, न तु प्रत्याचष्टे । एतादृशी उक्तचिन्ताशब्देन व्यवहर्तुं शक्यते ।

सा यथा – पूर्वोक्ते तस्यापत्यम् इत्यादौ । तत्र सूत्रोक्तः वार्तिकोक्तश्च विषयः स्वव्याख्यापुरस्सरं यथायथमङ्गीकृतः । " शताच्च ठन्यतावशते " इति सूत्रे दुरुक्तचिन्तां कृत्वा ' शतप्रतिषेधे अन्यशतत्वे अप्रतिषेधः ' इति वार्तिकं कृत्वा स्ववार्तिकेन सूत्रे दोषः परिहृतः । अत्र वार्तिककारोक्तः अंशो भाष्यकारेण यथायथमङ्गीकृतः

वार्तिकाकारकृता दुरुक्तचिन्ता – दुरुक्तचिन्ता नाम पाणिन्युक्तसूत्रस्य उपरि आगताः आक्षेपाः सूत्रद्वारा सामाधातुमशक्याश्चेत् सूत्रपरिवर्तन-अपूर्ववचनादिना तद्दोषपरिहारचिन्तनम् । एतादृशदोष-

---

[148] अष्टाध्यायी – (4-1-92)

[149] अष्टाध्यायी – (4-3-120)

[150] अष्टाध्यायी – (4-2-114)

चिन्तां विना उक्तात्वात् पाणिन्युक्तं दुरुक्तं भवति । तत्र दोषपरिहाराय वार्तिककारेण मार्गान्तरं चिन्त्यते । यथा “ स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ”[151] इति सूत्रे प्राक् भवनार्थात् (“ धान्यानां भवने क्षेत्रे खञ् ” इति सूत्रात् प्राक्) इत्युक्तत्वात् “ तेन तुल्यं क्रिया चेद्वतिः ” इत्यादिसूत्रेषु निर्दिष्टे वर्त्यर्थेऽपि नञ्स्नञौ प्राप्नुतः । तच्च नेष्टम् । अतः तत्र ‘ वत्यर्थे नञ्स्नञौ न ’ इति अपूर्वतया निषेधो वक्तव्यः । यदि ‘ स्त्रीपुंसाभ्यां नञ्स्नञौ प्राग्वतेः ’ इति सूत्रं परिवर्त्यते, तदा यद्यपि अयं दोषो न भवति, तथापि “ तस्य भावस्त्वतलौ ”[152] इत्यादिसूत्रनिर्दिष्टे तस्य भावः इति तद्धितार्थे नञ्स्नञौ न स्याताम् । तथा च स्त्रियाः भाव इत्यर्थे इष्टं ‘ स्त्रैणम् ’ इति रूपं न स्यात् । अतः तदर्थं वा अपूर्वं वचनं कर्तव्यमिति चिन्तां कृत्वा लाघवात् वर्त्यथे ‘ नञ्स्नञोः प्रतिषेधो वक्तव्यः ’ इत्याशयो वार्तिककारेण सूचितः । एवं “ शताच्च ठन्यतावशते ” इति सूत्रे दुरुक्तचिन्तां कृत्वा ‘ शतप्रतिषेधे अन्यशतत्वे अप्रतिषेधः ’ इति वार्तिकं कृत्वा स्ववार्तिकेन सूत्रे दोषः परिहृतः । एवमादयः वार्तिककारस्य दुरुक्तचिन्ताया उदाहरणानि भवितुमर्हन्ति ।

भाष्यकारकृता दुरुक्तचिन्ता – ‘ यत्र क्वचित् वार्तिकोक्तं नापेक्षितम्, सूत्रेणैव तत् सिध्यति ’ इति व्यवस्थापयति तत्र वार्तिके दुरुक्तचिन्ता कृता भाष्यकारेण इति वक्तुं शक्यते । यथा – पूर्वोक्ते “ स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ” इति सूत्रे ‘ वत्यर्थे नञ्स्नञोः प्रतिषेधो वक्तव्यः ’ (वा) इति वार्तिककारेण सूचिते तन्नापेक्षितम्, यतो हि “ स्त्रीपुंवच्च ”[153] इति सूत्रे वत्यर्थे स्नञः अकरणेन वत्यर्थे नञ्स्नञौ न भवत इति ज्ञाप्यते पाणिनिना इत्युक्त्वा वार्तिकोक्तं प्रत्याख्यातम् । एवमादिकं भाष्यकारकृतमपि दुरुक्तचिन्ताशब्देन व्यवहर्तुं शक्यते । कदाचित् एतादृशी चिन्ता सूत्रविषयेऽपि भाष्यकारेण क्रियते । अर्थात् अमुकसूत्रं विनापि तत्साध्यं प्रयोजनं प्रकारान्तरेणैव सिध्यति । अतः तदर्थं तत्सूत्रं नापेक्षितमिति विचार्य सूत्रमपि प्रत्याख्यायते ।

वार्तिककारकृता अनुक्तचिन्ता – अनुक्तचिन्ता नाम एतेषां (वार्तिककारबुद्धिस्थानां केषाञ्चन) शब्दानामिष्टमपि साधुत्वं पाणिनिना न बोधितम् इति चिन्तां कृत्वा तेषामपूर्ववचनद्वारा साधुत्वबोधनम् । यथा – “ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ”[154] इति सूत्रे पाणिन्यसंगृहीतशब्द-साधनाय वाङ्गतिपितृमतां छन्दस्युपसङ्ख्यानम् (वा), पृथिव्या ञाञौ (वा), देवाद् यञञौ (वा) इत्यादिवार्तिकानि कृतानि वाक्यकारेण कात्यायनेन ।

---

[151] अष्टाध्यायी – (4-1-87)

[152] अष्टाध्यायी – (5-1-119)

[153] अष्टाध्यायी – (1-2-66)

[154] अष्टाध्यायी – (4-1-85)

भाष्यकारकृता अनुक्तचिन्ता – यत्र ' सूत्रवार्तिककाराभ्यामुक्तं लक्ष्यसाधुत्वनिरूपणाय न पर्याप्तम् ' इति विचार्य तदनुक्तमपि विषयं कञ्चित् अपूर्वं भाष्यकारो वदति सा अनुक्तचिन्ताशब्देन व्यवहर्तुं शक्यते ।

यथा सूत्र-वार्तिकसंगृहीतशब्दसाधनाय भाष्यकारेण – " दिङ्नामान्यन्तराले "[155] इति सूत्रे ' सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यो दक्षिणोत्तरपूर्वाणामित्येवमर्थम् ' (वा) इत्युक्तम् । एवमेव " धातोः कर्मणः समानकर्तृकादिच्छायां वा "[156] इति सूत्रे –

शैषिकाद् मतुबर्थीयात् शैषिको मतुबर्थिकः।

सरूपप्रत्ययो नेष्टः सन्नन्तात् न सनिष्यते ।। इति चोक्तम् ।

एवं " सुधातुरकङ् च "[157] इति सूत्रेण ' सौधातकिः ' इत्येतन्मात्रे साधिते ' वैयासकिः ' इत्यस्यापि साधनाय ' सुधातृव्यासयोः ' (वा) इति वचनं कृतं वार्तिककृता । ' वारुडकिः, नैषादकिः ' इत्यादीनामपि साधनाय भाष्यकृता – ' अत्यल्पमिदमुच्यते (सुधातृव्यासयोरिति), सुधातृव्यासवरुड-निषादचण्डालबिम्बानामिति वक्तव्यम् ' इत्युक्तम् । एवं वार्तिककारेण सूत्रस्योपरि भाष्यकारेण सूत्रवार्तिकयोरुपरि च उक्तानुक्तदुक्तचिन्ता कृता ।

पाणिन्यपेक्षया कात्यायनस्य प्रामाण्यम् – इतरापेक्षया मुन्युक्तमेव प्रमाणमिति स्वीकृतमेव, परन्तु पाणिन्युक्तस्य कात्यायनोक्तस्य च विरोधे तत्र कथं व्यवस्था ? इति । तत्र " णिश्रिद्रुस्रुभ्यः कर्तरि चङ "[158] इति सूत्रभाष्यपरिशीलनेन ज्ञायते कात्यायनोक्तमेव ग्राह्यमिति । यथा हि कमुधातोः लुङि " आयादय आर्धधातुके वा "[159] इति सूत्रेण वा णिङ्प्रत्यये, धातोः परतया च्लिप्रत्यये, तस्य चङादेशे द्वित्वादिषु कृतेषु ' अचीकमत ' इति एकं रूपम्, णिङभावपक्षे ' णिश्रिद्रुस्रुकमेः उपसङ्ख्यानम् ' इति वार्तिकेन च्लेः चङादेशे धातोः द्वित्वादिषु कृतेषु ' अचकमत ' इति द्वितीयं रूपं भवति इति वस्तुस्थितिः ।

परन्तु णिङभावपक्षे पाणिनिना च्लेः चङः अनुक्तत्वात्, सिजादिषु ' अकमिष्ट ' इति रूपं प्राप्नोति पाणिनिमते । वार्तिकाकारेण सिचं प्रबाध्य चङः दर्शनात् ' अचकमत ' इति रूपं प्राप्नोति

[155] अष्टाध्यायी – (2-2-26)

[156] अष्टाध्यायी – (3-1-7)

[157] अष्टाध्यायी – (4-1-97)

[158] अष्टाध्यायी – (3-1-48)

[159] अष्टाध्यायी – (3-1-31)

वार्तिकाकारमते । तत्र किं मतं स्वीकार्यम् ? इति शङ्कायां भाष्यकारेण समाधानपरतया एका कारिका उपन्यस्ता –

नाकमिष्टसुखं यान्ति सुयुक्तैः बडबारथैः ।
अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः ।। इति ।

अत्र प्रथमार्थे अचकमतभाषिण इत्याद्यध्याहार्यम् । तथा च – कमुधातोः लुङि, णिङभावपक्षे वार्तिककारेण चङः स्मरणात् ‘ अचकमत ’ इति रूपं भवति इति ये स्वीकुर्वन्ति, तदेव प्रयुज्यते च, ते सुयुक्तैः बडबारथैः साधनैः इष्टसुखं नाकम् = स्वर्गं यान्ति । पाणिनिस्मृतिमनुसृत्य ये ‘ अचीकमत ’ इत्येव स्वीकुर्वन्ति, तेऽपि नाकं यान्ति, किन्तु पत्काषिणः = पादाभ्यामेव गच्छन्तः, पादपीडामनुभवन्तो यान्ति, विशेषस्मृत्यननुस्मरणात् इति तच्छलोकार्थः । तथा च एतत्परिशीलनेन ज्ञायते कात्यायनस्मृते रूपे अन्यथा वर्तमाने सति, पाणिनिस्मृत्यनुसारेण प्रयोगो न पुण्यातिशयाय, न वा पुण्याय भवतीति पतञ्जलिमहर्षिणा स्वीकृतमिति स्पष्टं ज्ञायते ।

कात्यायनापेक्षया पतञ्जलेः प्रामाण्यम् – वार्तिककारवचनभाष्यकारवचनयोः विरोधे भाष्यकारवचनमेव स्वीकार्यमिति भाष्ये प्रत्यक्षवचनं नास्ति, तथापि पाणिन्यपेक्षया कात्यायनवचन-स्वीकारे या युक्तिः सैव सूत्रवार्तिककारापेक्षया भाष्यकारवचनस्य प्रामाण्यस्वीकारेऽपि युक्तिः भवतीति स्वीकार्यम् । पतञ्जलेरपि ऋषित्वाविशेषाद् उत्तरकालवर्तित्वेन बहुलक्ष्यदर्शित्वाच्च इति सम्प्रदायः । तथा हि –

“ णेरणौ यत्कर्म णौ चेत् स कर्ताऽनाध्याने ”[160] इति सूत्रे गणधातोः स्वार्थण्यन्तात् हेतुमण्णौ, कर्मकर्तरि लटि कृते ‘ गणयति गणः स्वयमेव ’ इति परस्मैपदघटितमेव साधु भवति इत्याशयः प्रकटितः कात्यायनेन । तत्र पतञ्जलिना च ‘ इष्यत एवात्रात्मनेपदम्, किमिष्यत एव आहोस्वित् प्राप्नोत्यपि, इष्यते च प्राप्नोति च ’ – इत्युक्तम् । तत्र भाष्यप्रदीपव्याख्याने उद्द्योते ‘ सूत्रकारस्यापि, इदम् (गणयते गणः स्वयमेव इत्यात्मनेपदघटितमेव) इष्टम् ’ । इत्याशयः प्रकटितः ।

पाणिनिकात्यायनापेक्षया पतञ्जलेः प्रामाण्यम् – पाणिनिकात्यायनवचनपतञ्जलि-वचनयोः विरोधे भाष्यकारवचनमेव स्वीकार्यमिति भाष्ये प्रत्यक्षवचनं नास्ति, तथापि पाणिन्यपेक्षया कात्यायनवचनस्वीकारे या युक्तिः सैव सूत्रवार्तिककारापेक्षया भाष्यकारवचनस्य प्रामाण्यस्वीकारेऽपि युक्तिः भवतीति स्वीकार्यम् । पतञ्जलेरपि ऋषित्वाविशेषाद् उत्तरकालवर्तित्वेन बहुलक्ष्यदर्शित्वाच्च । अत एवोक्तं भर्तृहरिणा द्वितीयकाण्डे –

---

[160] अष्टाध्यायी – (1-3-67)

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥
आर्षे विप्लाविते ग्रन्थे सङ्ग्रहप्रतिकञ्चुके ।
यः पतञ्जलिशिष्येभ्यः भ्रष्टो व्याकरणागमः ॥

इत्यादिना पतञ्जलिविषये बहुमानः प्रदर्शितः । अत एव तदनन्तरवर्तिभिः कैयटप्रभृतिभिः ' यथोत्तरं मुनीनां प्रामाण्यम् ' इति सम्प्रदायः स्थिरीकृतः । अयमाशयः " न बहुव्रीहौ "[161] इति सूत्रभाष्य-व्याख्यानेषु स्फुटो वर्तते ।

तथा हि – पाणिनिना " न बहुव्रीहौ " इति सूत्रेण बहुव्रीह्यवयवानां सर्वनामसञ्ज्ञा निषिद्धा । तेन ' त्वं पिता यस्य सः इत्यत्र त्वकत्पितृकः ', ' अहं पिता यस्य सः इत्यत्र मकत्पितृकः ' इति च न भवति, युष्मद्-अस्मत्शब्दयोः सर्वनामत्वाभावेन अकचः अभावात् । किं तु अज्ञाताद्यर्थेषु कप्रत्यये ' त्वत्पितृकः, मत्कपितृकः ' इत्याद्येव भवति । परं तु तत्र भाष्यकारेण उक्तम् – ' गोनर्दीयस्तु आह ...... त्वकत्पितृकः, मकत्पितृकः इत्येव भवितव्यम् ' इति । तत्र कैयटेनोक्तम् – सूत्रप्रत्याख्यानमेतत्, ' यथोत्तरं मुनीनां प्रामाण्यम् ' इति ।

तत्रैव उद्द्योतकृता उक्तम् – उत्तरोत्तरस्य बहुलक्ष्यदर्शित्वात् । स्पष्टं चेदं " धिन्विकृण्व्योर च "[162] इति सूत्रे भाष्ये इत्युक्तम् । एतेन पाणिन्यपेक्षया पतञ्जलेः प्रामाण्यं दत्तं पाणिनीयव्याख्यातृभिः इति स्पष्टम् ।

यदि यत्र क्वचित् मुनित्रये केनचिदुक्तस्य अन्योक्तेन सह विरोधः दृश्यते, तत्र उत्तरमुन्युक्तमेव ग्राह्यम्, न तु पूर्वमुन्युक्तम्, उत्तरवर्तिनः बहुलक्ष्यदर्शित्वात्, मुनित्व-अन्वाख्यातृत्वाविशेषाच्च । भर्तृहरिवामनजयादित्यकैयटहरदत्तमाधवभट्टोजिनागेशादयः सर्वेऽपि मुनित्रयोक्तविषयव्याख्यातारः । मुनित्रयाविरुद्धतया यदेतैः उक्तम्, तदेव पाणिनीये प्रमाणतया स्वीक्रियते ।

एवं च पाणिनीये पाणिन्युक्तापेक्षया कात्यायनोक्तस्य, तदुभयोक्तापेक्षया पतञ्जल्युक्तस्य च प्रामाण्यं स्वीकृतमिति सिद्धम्[163] ।

केषाञ्चिन्मते पाणिनेः सर्वोत्कृष्टं प्रामाण्यम् – केचित्पाणिनेरेव सर्वोत्कृष्टं प्रामाण्यम् अङ्गीचक्रुः । तेषामाशयः – कात्यायनादिभिः सर्वैरपि पाणिनिसूत्राण्येवाधारीकृत्य स्वस्वव्याख्याः

---

[161] अष्टाध्यायी – (1-1-29)

[162] अष्टाध्यायी – (3-1-80)

[163] पाणिनीयतद्धितभागस्य विशिष्टमध्ययनम् – भूमिकायाम्

प्रवर्तिताः, तत्सूत्राभावे, न वार्तिकानि, नापि भाष्यम्, सति कुड्ये चित्ररचना खलु। तिलेषु तैलमिव, दध्नि नवनीतमिव, सूत्रेष्वेव वार्तिककाराद्युक्तोऽर्थः सर्वोऽपि निलीनो वर्तते । अत एव व्याकरणपदार्थनिरूपणावसरे भाष्ये – उदाहरणम्, प्रत्युदाहरणम्, वाक्याध्याहारादिरूपव्याख्यान-सहितादेव सूत्रात् साधुशब्दज्ञानं भवति, न तु केवलात् सूत्रात्। अतः केवलसूत्रस्य व्याकरणपदार्थत्वे व्याकरणात् साधुशब्दो भवतीत्यभिप्रायः असङ्गतः स्यात् इत्याशयेन आशङ्क्य अविजानत एतदेवं भवति, सूत्रत एव हि शब्दान् प्रतिपद्यन्ते आतश्च सूत्रत एव। यो ह्युत्सूत्रं कथयेत् नादो गृह्येत इत्युक्तं महाभाष्यकारेण। एतन्मूलकमेवोक्तमभियुक्तैः –

सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके।

सूत्रं योनिरिहार्थानां सूत्रे सर्वं प्रतिष्ठितम्।। इति।

अत एव काशिकावृत्तिव्याख्याता जिनेन्द्रबुद्धिः यदा यदा वक्तव्यः, वाच्यः, उपसंख्यानम्, इष्यते इत्यादिपदघटितानि कात्यायनानि भाष्यकारीयाणि वा वाक्यानि व्याख्याति, तदा तदा तत्तद्वाक्यलभ्यार्थं सूत्रादेव सम्पादयन् दृश्यते। तथा हि – " जात्याख्यामेकस्मिन्बहुवचनमन्यतरस्याम् "[164] इति सूत्रे एको व्रीहिस्सम्पन्नः सुभिक्षं करोति इत्यादौ संख्यावाचकप्रयोगे एकवचनस्य बहुवचनवारणाय संख्याप्रयोगे प्रतिषेधो वक्तव्यः इति वार्तिकं कृतम्। तत्र न्यासकारः वार्तिकस्थस्य वक्तव्यशब्दस्य व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम् – अन्यतरस्यामिति (जात्याख्यायामिति सूत्रस्थम्) व्यवस्थितविभाषेयम्। तेन संख्याप्रयोगे एकस्मिन् बहुवचनं न भविष्यति इत्युक्तवान्। " अस्मदो द्वयोश्च "[165] इति सूत्रे पटुरहं ब्रवीमि इत्यादि सविशेषणस्थलेऽपि एकस्मिन् बहुवचने प्राप्ते, तद्वारणाय ' सविशेषणस्य प्रतिषेधो वक्तव्यः ' इति वार्तिकं कृतम्। तत्रापि वक्तव्यः इति व्याख्येय इत्यर्थः। व्याख्यानन्तु जात्याख्यायामित्यादि-पूर्वसूत्रात् अन्यतरस्यां ग्रहणं यदनुवर्तते, तस्य व्यवस्थितविभाषात्वमाश्रित्य कर्तव्यम् इत्युक्तवान्[166]।

(ज) सूत्रभेदाः

अष्टाध्याय्यां पाणिनिना षड्विधानि सूत्राणि प्रोक्तानि। तथा हि –

[164] अष्टाध्यायी – (1-2-58)

[165] अष्टाध्यायी – (1-2-59)

[166] पाणिनीये अतिदेशानुशीलनम् – (पृ. – 9)

संज्ञा[167] च परिभाषा च विधिर्नियम एव च ।

अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ।।[168]

सूत्रं षड्विधं भवति । यथा – संज्ञा, परिभाषा, विधिः, नियमः, अतिदेशः, अधिकारश्च । सम्यग् जानीयुर्यया सा सञ्ज्ञा अर्थात् आधुनिकशक्तिग्राहकत्वं संज्ञासूत्रत्वम् । परितः सर्वतो भाष्यन्ते नियमा याभिस्ताः परिभाषाः अर्थात् शास्त्रतात्पर्यस्य ग्राहकत्वं परिभाषत्वम् । यो विधीयते स विधिर्विधानं वा अर्थात् साक्षात् साधुत्वसम्पादकत्वं विधित्वम् । नियम्यन्ते निश्चीयन्ते प्रयोगा यैस्ते नियमाः, साक्षादितरव्यावर्तकत्वं नियमत्वम् । अतिदिश्यते तुल्यतया विधीयन्ते कार्याणि यैस्तेऽनिदेशाः, साक्षात्सादृश्यग्राहकत्वमतिदेशत्वम् । अधिक्रियन्ते पदार्था यैस्ते अधिकाराः साक्षादेकवाक्यतामात्रेण बोधोपयोगित्वमधिकारत्वम् इत्यादि च बोध्यम् । केषाञ्चिद् विदुषां मते प्रतिषेधोऽपि सूत्रत्वेन व्यवह्रियते ।

एषु षड्विधसूत्रेषु विधिसूत्रस्यैव सर्वोत्तमं प्राधान्यम्, तस्यैव साक्षाल्लक्ष्यसंस्कारकत्वात् । अन्येषां तु विधिसूत्रार्थोपकारकत्वमेव, न तु साक्षाल्लक्ष्यसंस्कारकत्वम् । अत एव विधिसूत्रस्य प्रधानशास्त्रमिति, विध्यतिरिक्तानां सञ्ज्ञादिसूत्राणां तु गुणशास्त्रमिति, अप्रधानशास्त्रमिति च व्यवहारः ।

पाणिनिना सूत्राणि प्रणीतानि । परन्तु संज्ञासूत्रमिदं परिभाषासूत्रमिदमिति किमपि न लिखितम् । अस्मिन् विषये तेन महोदयेन काऽपि चर्चा न कृता । परवर्त्तिवैयाकरणाः सूत्रस्य व्याख्यावसरे संज्ञासूत्रम् इदं परिभाषासूत्रमिदमिति निर्णीतवन्तः । " वृद्धिरादैच् "[169] सूत्रस्य व्याख्यावसरे भाष्ये – ' अथ संज्ञा ' इत्येवं प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः । किं प्रयोजनम् । संज्ञाप्रत्ययार्थः । वृद्ध्यादीनां शब्दानां संज्ञा इत्येष सम्प्रत्ययो यथा स्यात् ।[170]

लोके लाघवाय संज्ञानां प्रयोगस्य कृतत्वाद् व्याकरणशास्त्रेऽपि लाघवेन शास्त्रीयप्रक्रियाया निर्वाहाय क्वचित्, सुखार्थाय च संज्ञाकरणं शाब्दिकैः शब्दशास्त्रे समाद्रियते । संज्ञया च नानार्थाभिधान-

---

167 संज्ञासंज्ञिसम्बन्धबोधकं संज्ञासूत्रम् – यथा " वृद्धिरादैच् " । अव्यवस्थायां व्यवस्थापादकं परिभाषासूत्रम् – यथा " तस्मादित्युत्तरस्य " । आदेशादिविधायकं विधिसूत्रम् – यथा " इको यणचि " । प्राप्तस्य विधेर्नियामकं नियमसूत्रम् – यथा " रात्सस्य " । अतस्मिन् तद्धर्मापादकम् अतिदेशसूत्रम् – यथा " लोटो लङ्वत् " । उत्तरोत्तरस्वार्थसमर्पकं हि अधिकारसूत्रम् – यथा " ङ्याप्प्रातिपदिकात् " ।

168 लघुसिद्धान्तकौमुदी

169 अष्टाध्यायी – (1-1-1)

170 महाभाष्यम् – पस्पशा.

योग्यशब्दस्य शक्तिर्नियम्यते । उक्तञ्च प्रदीपकारेण – " सर्वार्थाभिधानयोग्यशब्दस्य शक्तिनियमनमात्रं संज्ञाकरणमिति शब्दार्थसम्बन्धनित्यत्वस्यापि न विरोधः "[171] इति ।

● संज्ञासूत्रम्

सम् उपसर्गपूर्वकात् ज्ञाधातोः सम्यग्ज्ञानरूपेऽर्थे भावेऽङ्प्रत्ययेन सञ्ज्ञेति शब्दो निष्पद्यते । सञ्ज्ञा इति – सम्प्रत्ययः । अस्याः सञ्ज्ञायाः महर्षिणा पाणिनिना ' तदशिष्यं सञ्ज्ञाप्रमाणत्वात् '[172] सूत्रे समुल्लेखः कृतः । यथा जगत्यां लोके वा व्यवहाराय कस्यापि वस्तुनो नामकरणं क्रियते तथैव व्याकरणशास्त्रेऽपि शास्त्रीयकार्यसम्पादनार्थं सञ्ज्ञाऽवगमनाय सूत्राणि निर्मीयन्ते । व्याकरणशास्त्रे लाघवेन शास्त्रीयप्रक्रियायाः सम्पादनार्थं निर्वाहार्थञ्च सञ्ज्ञाकरणं समाद्रियते च शाब्दिकैः । सञ्ज्ञायाश्च नानार्थाभिधानयोग्यस्य शब्दस्य शक्तिर्नियमनं क्रियते । प्रदीपकारेणोक्तम् – ' सर्वार्थाभिधानयोग्यस्य शक्तिर्नियमनमात्रं सञ्ज्ञाकरणमिति '[173] काचन सञ्ज्ञा अन्वर्था विद्यते, यतो नाम्नोऽनुसारं तस्यार्थः फलं च भवत्येव । यथा – वृद्धिः, प्रकृतिभावः, लोपादयश्च । पाणिनेः सूत्रेषु काचन सञ्ज्ञा रूढा विद्यते । यथा – टि-घु-भप्रभृतयः । अष्टाध्यायाः समारम्भः सञ्ज्ञासूत्रेण भवति । तत्र वृद्धिसञ्ज्ञाविधायकं मङ्गलार्थं प्रथमं सूत्रं " वृद्धिरादैच् "[174] इति । सञ्ज्ञाप्रभावात् कस्यचित् कार्यस्य विधिर्भवति । यथा – " प्रथमानिर्दिष्टं समास उपसर्जनम् "[175] इति सूत्रेणोपसर्जनसञ्ज्ञा विधीयते । तस्योपसर्जनसञ्ज्ञकस्य शब्दस्य पूर्वप्रयोगः " उपसर्जनं पूर्वम् "[176] इति सूत्रेण विधीयते ।

संज्ञासूत्रलक्षणम् – ' संज्ञा च नाम यतो न लघीयः, अथवा शक्तिग्राहकत्वं संज्ञासूत्रत्वम् । शक्तिग्रहणं च कञ्चिद् व्यवहारेवोद्दिश्य सम्भवीति व्यवहारार्थं कृतो यः सङ्केतः स एव संज्ञापदेनोच्यते अथवा संज्ञासंज्ञिप्रत्यायकं सूत्रं संज्ञासूत्रम् '[177] ।

महर्षिपाणिनिना अष्टाध्याय्यां व्यवहृतानामष्टपञ्चाशदुत्तरैकशतमिति संज्ञानां (158) मध्ये एकनवतिरेव वा संज्ञा व्याख्याताः । प्रथमादयः संज्ञाः पूर्वाचार्यप्रयुक्तेष्वर्थेष्वेव व्यवहृता इति न ता

---

171 महाभाष्यम् – प्रदीपः - (1-1-27)

172 अष्टाध्यायी – (1-2-53)

173 महाभाष्यम् – प्रदीपः - (1-1-29)

174 अष्टाध्यायी – (1-1-1)

175 अष्टाध्यायी – (1-2-43)

176 अष्टाध्यायी – (2-2-30)

177 महाभाष्यम् – (1-1-27)

व्याख्याताः। संज्ञासूत्राणि यथा – " वृद्धिरादैच् ", " अदेङ्गुणः ", " हलन्त्यम् ", " भूवादयो धातवः " इत्यादि । संज्ञासूत्राणि संज्ञाशास्त्रं वा व्याकरणशास्त्रे प्रयुज्यमानानि पारिभाषिकपदानि बोधयति । प्रातिपदिक[178], सर्वनाम[179], उपधा[180], सर्वनामस्थान[181], अव्यय[182], टि[183], घु[184], वृद्धि[185], गुण[186], उदात्त[187], अनुदात्त[188], स्वरित[189] प्रभृतयः संज्ञा व्याकरणशास्त्रे कथं विहिता ?तासां संज्ञानां शब्दशास्त्रे कोऽर्थः ?तस्या शास्त्रे का उपयोगिता इत्यादिज्ञानमपि विधिशास्त्रस्याऽर्थबोधस्यैव द्वारम्।

संज्ञाशब्दः पारिभाषिकार्थे[190] अष्टाध्याय्यां चतुर्षु सूत्रेषु व्यवह्रियते यथा – " स्वं रूपं शब्दस्याशब्दसंज्ञा "[191], " आकडारादेका संज्ञा "[192], " वचोऽशब्दसंज्ञायाम् "[193], " अभिनिसः स्तनः शब्दसंज्ञायाम् "[194]। नामवाचार्थे सप्तसप्तिसूत्रेषु संज्ञाशब्दस्य प्रयोगः पाणिनिना कृतः । एवं च नियमितभावेन समभावेन चाधिकरणकारके संज्ञाशब्दस्य प्रयोगो भवति । यथा – " अन्यपदार्थे च

---

[178] अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (अ.सू. -1-2-45) धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वार्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्। कृत्तद्धितसमासाश्च (अ.सू. – 1-2-46)

[179] सर्वादीनि सर्वनामानि (अ.सू. – 1-1-27) सर्वादीनि शब्दस्वरूपानि सर्वनामसंज्ञानि स्युः।

[180] अलोऽन्त्यात्पूर्व उपधा (अ.सू. – 1-1-65) अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्।

[181] शि सर्वनामस्थानम् (अ.सू. – 1-1-42) शि इत्येतत्सर्वनामस्थानसंज्ञं स्यात्। सुडनपुंसकस्य (अ.सू. – 1-1-43)

[182] स्वरादिनिपातमव्ययम् (अ.सू. - 1-1-37) स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः।

[183] अचोऽन्त्यादि टि (अ.सू. – 1-1-64) अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्।

[184] दाधाघ्वदाप् (अ.सू. - 1-1-20) दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना।

[185] वृद्धिरादैच् (अ.सू. – 1-1-1) आदैच्च वृद्धिसंज्ञः स्यात्।

[186] अदेङ्गुणः (अ.सू. - 1-1-2) अदेङ् च गुणसंज्ञः स्यात्।

[187] उच्चैरुदात्तः (अ.सू. – 1-2-29) ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्।

[188] नीचैरनुदात्तः (अ.सू. – 1-2-30) ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात्।

[189] समाहारः स्वरितः (अ.सू. – 1-2-31) उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन्सोऽच्स्वरितसंज्ञः स्यात्।

[190] योगविभागविमर्शः

[191] अष्टाध्यायी – (1-1-68)

[192] अष्टाध्यायी – (1-4-1)

[193] अष्टाध्यायी – (7-3-67)

[194] अष्टाध्यायी – (8-3-86)

संज्ञायाम् ”[195], “ संज्ञायाम् ”[196], “ दिक्संख्ये संज्ञायाम् ”[197], “ संज्ञायां कन्थोशीनरेषु ”[198], “ उपसर्गे च संज्ञायाम् ”[199] इत्यादीनि। परन्तु “ तदशिष्यं संज्ञाप्रमाणत्वात् ”[200] इत्यत्रास्य व्यतिक्रमो भवति ।

अष्टाध्याय्यां चत्वारि संज्ञाशब्दकानि पारिभाषिकाणि सूत्राणि विहाय अन्यत्र संज्ञाशब्दस्य प्रयोगो योगरूढ्यर्थे । रूढ्यर्थे च भवति । इयं संज्ञा भवति अकृत्रिमा ।

पारिभाषिकी संज्ञाऽपि वर्तते । सा संज्ञा वैयाकरणैः उद्भाविता भवति । लघूपायेन शब्दसिद्ध्यर्थम् इयं संज्ञा आवश्यकी भवति । इयं संज्ञा भवति कृत्रिमा ।

पाणिनीयपारिभाषिकी संज्ञा द्विविधा भवति । कृत्रिमा, अकृत्रिमा च । पतञ्जलिना उक्तमस्मिन् विषये[201] –

‘ किं या एताः कृत्रिमाष्टिघुभादि ’ । पुनः स लिखति[202] – ‘ इह हि व्याकरणे ये चैते लोके प्रतीतपदार्थका शब्दाः तैः निर्देशः क्रियते – पशुः, अपत्यं, देवदत्त इति, याः चैताः कृत्रिमाः टिघुभसंज्ञास्ताभिः ’ ।

पुनःपाणिनीयव्याकरणे एकस्य शब्दस्य कृत्रिमा संज्ञा भवति, अकृत्रिमा च । तद्यथा – “ कर्तुरीप्सिततमं कर्म ”[203] । इति कृत्रिमा संज्ञा भवति । “ कर्मणि द्वितीया ”[204] इत्यत्र कृत्रिमस्य ग्रहणं भवति । “ कर्तरि कर्मव्यतिहारे ”[205] इत्यत्र अकृत्रिमस्य ग्रहणं भवति । एवं च “ साधकतमं करणम् ”[206] इत्यत्र कृत्रिमा करणसंज्ञा विधीयते । “ कर्तृकरणयोस्तृतीया ”[207] इति कृत्रिमस्य ग्रहणंभवति । “ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ”[208] इत्यत्र अकृत्रिमस्य ग्रहणं भवति । “ यू स्त्र्याख्यौ नदी ”[209]

---

[195] अष्टाध्यायी – (2-1-21)
[196] अष्टाध्यायी – (8-2-11)
[197] अष्टाध्यायी – (2-1-50)
[198] अष्टाध्यायी – (2-4-20)
[199] अष्टाध्यायी – (3-2-99)
[200] अष्टाध्यायी – (1-2-53)
[201] महाभाष्यम् – (1-2-53), (1-4-23)
[202] महाभाष्यम् – (1-4-23)
[203] अष्टाध्यायी – (1-4-49)
[204] अष्टाध्यायी – (2-3-2)
[205] अष्टाध्यायी – (1-3-14)
[206] अष्टाध्यायी – (1-4-42)
[207] अष्टाध्यायी – (2-3-18)
[208] अष्टाध्यायी – (3-1-17)
[209] अष्टाध्यायी – (1-4-3)

इत्यनेन सूत्रेण कृत्रिमा नदीसंज्ञा विधीयते । परन्तु " नदीभिश्च "[210], " विशिष्टलिङ्गो नदीदेशोऽग्रामाः"[211], " नद्यां मतुप् "[212], " नदीपौर्णमास्याग्रहायणीभ्यः "[213] इत्यत्र अकृत्रिमा संज्ञा भवति ।

पारिभाषिकशब्दानामर्थबोधाय संज्ञासूत्राणि पाणिनिना विरचितानि । संज्ञासूत्रे संज्ञा संज्ञी च वर्तेते । अतः सूत्रे का संज्ञा, कः संज्ञी इति कथं ज्ञायेत । तर्हि " वृद्धिरादैच् " सूत्रे भाष्ये[214] पतञ्जलिना संज्ञासंज्ञिज्ञानाय चत्वारि कारणानि प्रदर्शितानि । तथा हि –

1. यत्र त्वन्यतरल्लघु यल्लघु सा संज्ञा ।

2. अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः ।

3. आवर्त्तिन्यः संज्ञा भवन्ति ।

4. पूर्वोच्चारितः संज्ञि परोच्चारिता संज्ञा ।

एवं वृद्धिसूत्रभाष्योक्तरीत्या सञ्ज्ञासूत्रत्वं निर्णेतुं शक्यते । यत्र द्वयोः सामानाधिकरण्य-विशिष्टमेकविभक्तित्वं वर्तते, तयोर्द्वयोरन्यतरद् अप्रतीतपदार्थकं च भवति, तत्सञ्ज्ञासूत्रमिति निश्चेयम् । यथा – " वृद्धिरादैच् " इत्यत्र वृद्धिः आदैच् इत्यनयोः सामानाधिकरण्यमेकविभक्तित्वं च अस्ति । आदैच्छब्दस्य लोकप्रसिद्धार्थः कश्चिदपि नास्ति, अतः तत्सञ्ज्ञासूत्रम् । एवं यत्र कुत्रापि स्थितस्य सूत्रस्य सञ्ज्ञासूत्रत्वं निर्णेतुं शक्यते । सञ्ज्ञासूत्रत्वनिर्णये तत्र कः सञ्ज्ञी ? का सञ्ज्ञा ? इत्यपि युक्तिबलादेव निर्णेतव्यम् । तत्र यल्लघु सा सञ्ज्ञा – सञ्ज्ञाकरणस्य लघ्वर्थत्वात् । यथा – दाधाघ्वदाप्, अचोऽन्त्यादि टि, यचि भम् इत्यादि । आवर्तिन्यः सञ्ज्ञाः, अनावर्तिन्यः सञ्ज्ञिनः । वृद्धिरेचि इत्यादिविधिसूत्रेषु वृद्ध्यादिशब्दा एव पुनः पुनरावर्तिताः, न तु आदैत्प्रभृतयः । अत एव वृद्धिः इति सञ्ज्ञा आदैच् इति सञ्ज्ञी । ' पूर्वोच्चरितः सञ्ज्ञी, परोच्चरिता सञ्ज्ञा ' इति पतञ्जलिना प्रदत्तस्य नियमस्य कतिपयेषु

---

[210] अष्टाध्यायी – (2-1-20)

[211] अष्टाध्यायी – (2-4-7)

[212] अष्टाध्यायी – (4-2-85)

[213] अष्टाध्यायी – (5-4-110)

[214] ' तत्र त्वेतावान् सन्देहः कः संज्ञी का संज्ञेति । स चापि क्व सन्देहः । यत्रोभे समानाक्षरे। यत्र त्वन्यतरल्लघु यल्लघु सा संज्ञा । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्राप्ययं नावश्यं गुरुलघुतामेवोपलक्षितुमर्हति । किं तर्हि । अनाकृतितामपि। अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः । लोकेऽप्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते । अथवा आवर्त्तिन्यः संज्ञा भवन्ति । वृद्धिशब्दस्यावर्त्तते । नादैच्छब्दः ' । (महाभाष्यम् – 1-1-1)

सूत्रेषु व्यतिक्रमो दृश्यते। यथा – “ आर्धधातुकं शेषः ”[215], “ वृद्धिरादैच् ”[216], “ कृदतिङ् ”[217], “ अपृक्त एकाल् प्रत्ययः ”[218] इत्यादौ। “ वृद्धिरादैच् ” इति सूत्रे ‘ वृद्धिः ’ इति पूर्वोच्चरिता सञ्ज्ञा स्यात् न तु सञ्ज्ञी इति व्यतिक्रमः । एवं सञ्ज्ञासूत्रत्वम्, तत्रापि कः सञ्ज्ञी ? का सञ्ज्ञा ? इत्येतत्सर्वमपि भाष्योक्तयुक्तिबलादवगन्तव्यम्।

मुख्यतः संज्ञानां भागद्वयं कर्तुं शक्यते। एकत्र संज्ञैव विधिकोटिं भजते, यथा – वृद्ध्यादिः। अन्यत्र संज्ञा न विधिकोटिं भजते किं च तदुद्दिश्य कार्यान्तरं विधीयते। यथा – उपधादिः। पुनश्च संज्ञाः तावत् त्रिविधा विभक्तुं शक्यन्ते। यथा –

1. शब्दसंज्ञा[219] – वृद्धि, गुण, संयोग, अनुनासिक, टि, घु, घ, घि, नदी, भ, पद, अङ्ग प्रभृतयः संज्ञाः शब्दसंज्ञाः।

2. अर्थसंज्ञा[220] – विभाषा, लोप, लुक्, श्लु, सम्प्रसारण, कर्तृ, कर्म, करण, सम्प्रदान, अपादान, अधिकरण, संहिता प्रभृतयः संज्ञाः अर्थसंज्ञाः।

3. धर्मसंज्ञा[221] – उदात्त, अनुदात्त, स्वरित प्रभृतयः संज्ञाः धर्मसंज्ञाः।

तथा च काश्चन अन्वर्थसंज्ञाः, काश्चनचानन्वर्थसंज्ञाः । सर्वनामाऽव्यय प्रभृतयः संज्ञाः अन्वर्थसंज्ञाः यतो हि प्रधानसिद्धाः सर्वार्थवाचकाः सर्व,विश्व,उभ,उभय,डतर,डतम प्रभृतयः शब्दा एव प्रातिपदिकानांस्थाने प्रयुक्तत्वात् सर्वनामसंज्ञकान्युच्यन्ते । सर्वनामत्वार्थं सर्वादिगणे पाठेन सह प्रधानंसिद्धस्वीयसर्वार्थवाचकताऽप्यत्यावश्यकी प्रतीयते । अधिकरण,टि,घु,भ प्रभृतयः संज्ञा अनन्वर्थसंज्ञाः सन्ति।

“ वृद्धिरादैच् ”, “ अदेङ्गुणः ” इत्यादीनि सञ्ज्ञासूत्राणि। अष्टाध्याय्यामिमानि सूत्राणि एकत्र न सन्ति । वृद्ध्यादिसञ्ज्ञासूत्राणि प्रथमाध्याये प्रथमपादे सन्ति, सार्वधातुकार्धधातुकसञ्ज्ञासूत्राणि

---

[215] अष्टाध्यायी – (3-4-114)

[216] अष्टाध्यायी – (1-1-1)

[217] अष्टाध्यायी – (3-1-93)

[218] अष्टाध्यायी – (1-2-41)

[219] “ शब्दसंज्ञायां शब्दस्यैव सम्प्रत्ययो भवति नाऽर्थस्य ” – (महाभाष्यम् – 1-1-43)

[220] “ न वेति विभाषायाम् अर्थस्य संज्ञा भवति ”। न वा शब्दस्य योऽर्थः तस्य संज्ञा भवतीति वक्तव्यम्। महाभाष्यम् – (1-1-43)

[221] “ लोकवेदयोः उदात्तादयः शब्दा वर्णानां यो धर्मो गुणः तत्रैव प्रसिद्धाः, न तु तद्वत्यचि। तस्मादिह व्याकरण उदात्तादयो धर्मा यस्याचस्तद्गुणेऽचि संज्ञाप्यन्ते – परिभाष्यन्ते ”। – (काशिका – न्यासः पृ. 269)

तृतीयाध्याये सन्ति, गोत्रयुवतद्रजसञ्ज्ञासूत्राणि चतुर्थाध्याये सन्ति, आम्रेडितसञ्ज्ञासूत्रमष्टमाध्याये अस्ति।

● परिभाषासूत्रम्

शाब्दिकैः शास्त्रीयप्रक्रियायाः सङ्गतिं प्रदर्शयितुं कानिचिन्नियमवचनानि स्वीक्रियते, तानि च परिभाषाशब्देन व्यवह्रियन्ते। यद्यपि व्याकरणग्रन्थेषु परिभाषाशब्दस्तु श्रूयते, किन्तु परिभाषाया निर्दिष्टं लक्षणं क्वाऽपि न लक्ष्यते। परिभाषाया नामापि नोच्चारितमष्टाध्याय्यां तु भगवता पाणिनिना। वार्तिककारेण कात्यायनेन " अणुदित् सवर्णस्य चाप्रत्ययः "[222] सूत्रस्योपरि वर्णपाठ उपदेश इति चेश्वरकालत्वात् परिभाषया अनुदेश इति वार्त्तिकं रचितम्।

अत्र वार्त्तिके परिभाषाशब्दस्य प्रयोगः कृतः कात्यायनेन। एवं च " स्वरितेनाधिकारः "[223] इति सूत्रस्य वार्त्तिकेऽपि[224] परिभाषाशब्दस्य प्रयोगः कृतः। यद्यपि पतञ्जलिना परिभाषायाः साक्षाल्लक्षणं न कृतम्। तथापि तस्य वर्णनात् प्रतीयते यत् परिभाषा एकप्रकारकं प्रकाशकत्वम्। येन प्रकाशेन सूत्रस्यार्थः स्पष्टीभवति[225]।

परिभाषाया बहूनि लक्षणानि ग्रन्थकारैः प्रदत्तानि। तत्र कैश्चिदुच्यते – ' अनियम निवारको न्यायविशेषः ' इति परिभाषा। प्रसिद्धिरप्यस्ति – ' अनियमे नियमकारिणी परिभाषा ' इति। यद्यपि नियमसूत्राणां " धातोस्तन्निमित्तस्यैव "[226] इत्यादीनामपि नियमकारित्वमस्ति, तथापि ' सिद्धे सति प्रमाणान्तरेण विधेयेऽवगते सति पुनरारभ्यमाणो विधिर्नियमाय कल्पते ' इति कृत्वाऽस्ति विशेषः। अत्र तु प्रमाणान्तरेण सिद्धिर्नास्ति, अपि तु अनियमप्रसक्तिरस्ति। यथा – " इको यणचि "[227] इत्यत्र तस्मिन्निति परिभाषाप्रवृत्तिमन्तरा अच्समीपवर्तिनः पूर्वस्य परस्य व्यवहितस्य अव्यवहितस्य चेको यणः प्राप्तौ अनियमः प्रसक्तः, तत्र तस्मिन्निति परिभाषया ' अव्यवहितस्यैव पूर्वस्यैव ' इति नियमः क्रियते। एवमेव " सार्वधातुकार्धधातुकयोः "[228] इति सूत्रेण इगन्तस्यानिगन्तस्य चाऽङ्गस्यगुणे प्राप्तेऽनियमः

---

[222] अष्टाध्यायी – (1-1-69)

[223] अष्टाध्यायी – (1-3-11)

[224] अन्यनिर्देशस्तु निवर्त्तकस्तस्मात् परिभाषा, (1-3-113)

[225] कः पुनरधिकारपरिभाषयोर्विशेषः। अधिकारः प्रतियोगं तस्य निर्देशार्थं इति योगे योगे उपतिष्ठते। परिभाषा पुनरेकदेशस्था सती सर्वं शास्त्रमभिज्वलयति प्रदीपवत्। महाभाष्यम् – (2-1-1)

[226] अष्टाध्यायी – (6-1-79)

[227] अष्टाध्यायी – (6-1-76)

[228] अष्टाध्यायी – (7-3-84)

प्रसक्तः, तत्र " इको गुणवृद्धी "[229] इत्यनेन इक इति षष्ठ्यन्तपदोपस्थापनेन इगन्तस्यैवेति नियमः सम्पाद्यते ।

परिभाषाशब्दस्य व्युत्पत्तिलभ्योऽर्थ उक्तः[230] –

परितो व्यापृतां भाषां परिभाषां प्रचक्षते ।

परितो भाष्यते या सा परिभाषा प्रकीर्तिता ।। इति ।

परितः प्रमिताक्षराऽपि सर्वं विषयं प्राप्नवती गता प्रतिष्ठाम् ।

न खलु प्रतिहन्यते कदाचित् परिभाषेव गरीयसी यदाज्ञा ।। इति च ।

परिभाषायाः परिभाषाऽपि तत्र तत्रोपलभ्यमानाऽनुभूयते –

1. ' आधुनिकसङ्केतः परिभाषा ' इति वैशेषिके, न्यायकोशे, गादाधर्य्याञ्च ।

2. लक्ष्यधर्मिकसाधुत्वप्रकारकाप्रामाण्यज्ञानानास्कन्दितबोधोपयोगिबोधजनकत्वं परिभाषात्वमिति शाब्दिकाः ।

3. सङ्केतग्राहकभिन्नत्वे सति विधिशास्त्रविशिष्टत्वं परिभाषात्वम् ।

4. विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगिसाधुत्वप्रकारकशक्त्यविषयकबोधजनकत्वे सति अधिकारशास्त्रभिन्नत्वं परिभाषात्वम् – इति लघुजूटिकायां श्रीरघुनाथः ।

5. सङ्केतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दित-बोधे सहकारित्वेन मुन्यभिप्रेतत्वे सति पाणिन्युच्चरितभिन्नत्वम्, परिभाषेन्दुशेखरीयव्याख्येय-परिभाषात्वम् - इति परिभाषेन्दुशेखरे भूतिटीकाकाराः ।

6. ' अधिकारशब्देन पारार्थ्यात् परिभाषाऽप्युच्यते ' इति ' यथोद्देशं संज्ञापरिभाषम् ' इति परिभाषाव्याख्यानावसरे परिभाषेन्दुशेखरे श्रीनागेशोक्त्या अधिकारशब्देन परिभाषाया अपि व्यवहारः ।

7. ' परिभाषा पुनरेकदेशस्था सर्वं शास्त्रमभिज्वलयति प्रदीपवत् ' । इत्युक्तं भगवता पतञ्जलिना महाभाष्ये[231]

8. एकदेशस्थिता शास्त्रभवने याति दीपताम् ।

परितो व्यापृतां भाषां परिभाषां प्रचक्षते ।।[232]

---

[229] अष्टाध्यायी – (1-1-3)

[230] लधुशब्देन्दुशेखरः राधिकायाः टीकायाम्

[231] महाभाष्यम् – (2-1-1)

[232] महाभाष्यम् – उद्द्योतटीका – (2-2-1)

9. " अनियमे नियमकारिणी परिभाषा "[233]

10. परिभाषात्वञ्च – सङ्केत ग्राहकाभिन्नत्वे सति विधिशास्त्रविशिष्टत्वम् । विशिष्ट्यञ्च अननुवृत्त्या स्वजन्यप्रमात्मकबोधोपकारत्वस्वप्रवृत्तिनिवृत्त्यन्तरप्रयोजकत्व विशिष्टपाणिनिप्रयत्न-न्यायान्तरसिद्धत्वान्यतरसम्बन्धेन । अननुवृत्त्येतिनिवेशेनाधिकारव्यवच्छेदः । आद्यसम्बन्धेन अष्टाध्यायीस्थपरिभाषाणां संग्रहः । द्वितीयेन न्यायज्ञापकसिद्धानाम् " अनुदात्तं पदमेकवर्जम् "[234] इत्यादेश्च संग्रहः ।[235]

शास्त्रीयाः परिभाषा द्विविधाः – लिङ्गवत्यो विध्यङ्गशेषभूताश्च ।

1. किञ्चिल्लिङ्गं चिह्नं विद्यते यासां ता लिङ्गवत्यः, ताश्चैकत्रैव विद्यमानाः स्वैः स्वैर्लिङ्गैः प्रदीपवत् सर्वं शास्त्रमभिज्वलयन्ति, यथा सुप्रज्वलितः प्रदीप एकत्रैव विद्यमानाः स्वप्रकाश-किरणावलीभिर्भवनस्यापरोक्षभागान् प्रकाशयति । इयं च परिभाषा लिङ्गं दृष्ट्वा प्रवर्तते अतो लिङ्गवतीत्युच्यते । उदाहरणं यथा – " तस्मिन्निति निर्दिष्टे पूर्वस्य "[236] इति । अचीति सप्तमीनिर्देशरूपं लिङ्गं दृष्ट्वा तस्मिन्निति प्रवर्तते ।

2. कस्यचिद् विधेः प्रवर्तनाय या नियमं प्रवर्तयन्ती प्रत्येकं तद्विधिसूत्रैः सह पृथगुपतिष्ठते सा विध्यङ्गशेषभूता, यथा – यावन्तः प्रत्ययाः शास्त्रे विधीयन्ते ते प्रकृते पूर्वं परं वा भवेयुरिति सन्देहस्य निराकरणायोच्यते " प्रत्ययः "[237]," परश्च "[238] इति । अयमाशयः – कश्चिदपि प्रत्ययः प्रकृतेः परमेव स्यान्न तु पूर्वमिति ।

तेनायं नियमः प्रत्येकं " गुप्तिज्किद्भ्यः सन् "[239] इति प्रत्ययविधायकं सूत्रमुपतिष्ठते । उच्यते चापि –

एकाऽपि पुंश्चली पुंसां यथैकैकं प्रयाति हि ।
विध्यङ्गशेषभूता तद्विधिं प्रत्यनुगच्छति ।। इति ।

---

[233] काशिका – (1-1-3)
[234] अष्टाध्यायी – (6-1-155)
[235] सिद्धान्तकौमुदी – लक्ष्मीटीकायाम् – (1-3-11) पृ. – 91
[236] अष्टाध्यायी – (1-1-66)
[237] अष्टाध्यायी – (3-1-1)
[238] अष्टाध्यायी – (3-1-2)
[239] अष्टाध्यायी – (3-1-5)

अष्टाध्याय्यां स्वविरचितानां सूत्राणां नियमनाय पाणिनिना परिभाषासूत्राणि प्रणीतानि । एतादृशानि सूत्राणि प्रायशः पंचाशत्परिमितानि सन्ति । तानि परिभाषासूत्राणि एकस्मिन् प्रकरणे न विद्यन्ते । परन्तु सम्पूर्णायामष्टाध्यायामितस्ततोरूपेण वर्तन्ते । यथा – पाणिनेः संज्ञासूत्राणि एकस्मिन् प्रकरणे न विद्यन्ते, अष्टमाध्यायेऽपि प्राप्यन्ते तथैव परिभाषासूत्राणां गतिः ।

पाणिनेः परिभाषासूत्रं त्रिविधं भवति । यथा –

1. परिभाषासूत्रं विधिसूत्रसमीपं गत्वा विधिसूत्रस्यार्थं करोति । यथा – " इको यणचि "[240] इत्यादौ " षष्ठीस्थाने योगा "[241] इत्यनेन सूत्रेण इक इति षष्ठ्या स्थानमुच्यते ।

2. यत्र द्वयोः विधिसूत्रयोः युगपत्प्रवृत्तिः भवति तत्र समाधानार्थं परिभाषासूत्रं गच्छति ।

यथा – ' मनर् + रथः ' इत्यत्र " हशि च "[242] इत्यनेन सूत्रेण रोरुत्वं भवति । एवं च " रो रि "[243] सूत्रेण रोः लोपो भवति । " पूर्वत्रासिद्धम् "[244] इति परिभाषासूत्रं तत्र गत्वा " हशि च " सूत्रस्य प्रवृत्तिः भवतीति निर्णयति ।

3. " अग्नेर्ढक् "[245] इत्यत्र पर्यायवाचिशब्दानामपि ग्रहणं भवतीति यदा शङ्का उदेति तदा " स्वं रूपं शब्दस्याशब्दसंज्ञा "[246] इति परिभाषासूत्रं तत्र गत्वा तान् निवारयति ।

परिभाषा द्विविधा –

1.पाणिनीयादिशास्त्रेषु सूत्ररूपेण पठिताः ।

2. अन्यसूत्रादितो ज्ञापिता न्यायसिद्धप्रभृतयः । परिभाषापाठशब्देन वैयाकरणनिकाये द्वितीयविधानां नियामकवचनानामेव ग्रहणं विधीयते ।

द्वितीयविधाः परिभाषाः सूत्रपाठाद् बहिर्भूताः सत्योऽपि सूत्रेण ज्ञापितत्वात् सूत्रकारद्वारा तन्नियमानां स्वीकृतत्वाद् न्यायसिद्धाश्च परिभाषा लोकविदितत्वात्ताःसूत्रवत् प्रमाणत्वेन स्वीक्रियन्ते । तत्र च सूत्रवदसिद्धादीनि कार्याणि जायन्ते ।

तादृश्यः परिभाषाश्चतुर्विधाः सन्ति । यथा –

[240] अष्टाध्यायी – (6-1-76)
[241] अष्टाध्यायी – (1-1-49)
[242] अष्टाध्यायी – (6-1-112)
[243] अष्टाध्यायी – (8-3-14)
[244] अष्टाध्यायी – (8-2-1)
[245] अष्टाध्यायी – (4-2-33)
[246] अष्टाध्यायी – (1-1-68)

1. ज्ञापिता – ज्ञापकसिद्धा वा परिभाषाः ता उच्यन्ते याः केनचित् सूत्रेण ज्ञाप्यन्ते ।

यथा – ' व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ' ।

2. न्यायसिद्धाः परिभाषाः ता उच्यन्ते या लौकिकन्यायानुकूलाः स्युः ।

यथा – ' गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ' ।

3. वाचनिक्यः परिभाषाः ता उच्यन्ते या न तु सूत्रज्ञापिताः, न वा न्यायसिद्धाः, अपि तु, आचार्याणां वचनरूपाः । वाचनिक्यः परिभाषा द्विधा विभज्यन्ते । यथा –

1. परिभाषारूपेण स्वीकृतानि वार्तिककारवचनानि ।

2. परिभाषारूपेण स्वीकृतानि भाष्यकारवचनानि ।

4. मिश्रिताः परिभाषाः ता उच्यन्ते यासाम्परिभाषाणामेकदेशः सूत्रकारेण ज्ञाप्यते । एकदेशश्च न्यायसिद्धः अथवा एकदेशः पूर्वाचार्यैर्वचनरूपेण पठितः ।

विधिसंज्ञादि सूत्राणां प्रवृतौ अव्याप्ति-अतिव्याप्ति-असम्भव-दोषनिवारणं परिभाषाणां प्रमुखं लक्ष्यमस्ति । " जराया जरसन्यतरस्याम् "[247] इति सूत्रेण ' निर्जरसौ ' इति प्रयोगस्य सिद्धौ काठिन्यम् आगतम्, असम्भवदोषत्वात् । तत्र " येन विधिस्तदन्तस्य "[248] इति परिभाषा, ' तस्य च तदन्तस्य च ', ' निर्दिश्यमानस्याऽदेशा भवन्ति ', ' एकदेशविकृतमनन्यवत् ' इत्येताः परिभाषा अव्याप्तिदोषं दूरीकृतवन्तः ।

परिभाषाः स्वीकरणे दोषा अपि आपतन्ति । दोषस्थितौ परिभाषाया अस्वीकरणात् परिभाषाणाम् अनित्यत्वं स्वीकुर्वन्ति वैयाकरणाः । यथा – ' ज्ञापकसिद्धं न सर्वत्र ' इति वचनम्।

एवम् सिद्ध्यति यत् परितो व्यापृता भाषैव परिभाषा । तथा च अनियमे नियमकारिणी परिभाषा । यत्र साधुशब्दानामनुशासने साहाय्यमपेक्ष्यते वा, तत्रैव परिभाषाणामाश्रयणं विधीयते । यत्र परिभाषाया आश्रयणे दोषस्तत्र परिभाषाया आश्रयणं न विधीयते । यथा – यत्र लवणप्रयोगेण कार्यं सिद्ध्यति तत्र लवणमेव प्रयुज्यते । यथा – सूपशाकादिषु । किन्तु यत्र शर्करया कार्यं सिद्ध्यति तत्र शर्करैव प्रयुज्यते, न लवणम् । यथा – पायसे, दुग्धे वा न लवणं प्रयुज्यते, अपि तु शर्करैव प्रयुज्यते । अतोऽनित्यत्वादपि परिभाषा व्याकरणशास्त्रे शब्दाननुशंसयितुमतीवोपकारिक्यः सहायिकाश्च भवन्ति, यथास्थानं यथायोग्यं वा व्यवहर्तव्या इति ।

---

[247] अष्टाध्यायी – (7-2-101)

[248] अष्टाध्यायी – (1-1-72)

- **विधिसूत्रम्**

साक्षाल्लक्ष्यसंस्कारकसाधुत्वप्रकारकबोधजनकत्वं विधिसूत्रत्वम्। कर्तव्यत्वेनोपदेशो विधिः। इष्टकार्यस्य विधाने व्याकरणशास्त्रे विधिसूत्रस्य विधानं क्रियते । विधिसूत्रं तु अपूर्वार्थबोधकम् । विधीयत इति विधिः कार्यम्, अप्राप्तौ सत्यां यद् विधीयमानं कार्यं तद् विधिशब्देनोच्यते। उक्तञ्च – विधिरत्यन्तमप्राप्तौ साक्षात् साधुत्वसम्पादकत्वं विधित्वं तच्चात्यन्तमप्राप्तौ निर्दिश्यते। यथा –

' उप+ इन्द्रः ' इत्यत्र अपूर्वो योऽर्थ एकारस्तस्य अकारेकारयोः निवृत्तिपूर्वकं विधानम् " आद्गुणः "[249] इति सूत्रेण क्रियते। वर्णोत्पादनरूपा विधय आदेशागमादिभेदैर्बहवो भवन्ति, अत्र तेषां सर्वेषामादेशागमनिपातविकल्पप्रकृतिभावनिषेधा इत्यादिविधिनां विषये किञ्चिदुच्यते –

अष्टाध्याय्यां प्रायशः 3983 संख्यकेषु सूत्रेषु 3623 संख्यकानि विधिसूत्राणि प्रवृत्तानि लक्ष्यन्ते । तेषां विविध कार्यप्रकाराद् विभाजनप्रकारे विभावा इमे विषयीकृता जायन्ते –

1. उत्सर्गविधिः, **2.** अपवादविधिः, **3.** वैकल्पिकविधिः, **4.** निषेधविधिः, **5.** नित्यविधिः, **6.** पूर्वविधिः, **7.** परविधिः, **8.** अन्तरङ्गविधिः, **9.** असिद्धविधिः, **10.** निपातविधिः।

अपूर्वतया कल्पनमाश्रित्य ये विधयो विदिता जायन्ते ते मुख्यतयाऽनेन विभाजनेन विज्ञायन्ते यथा –

1. स्थानिकल्पनमादाय आदेशविधानम्।
2. प्रकृतिकल्पनं प्रत्ययविधानम्।
3. अपूर्वशब्दोपजननम् (आगमः)।
4. लोप,लुक्,श्लु, लुप् विधिः।
5. उदात्त,अनुदात्त,स्वरितादि स्वरविधानम्।

1. स्थानिकल्पनमादाय आदेशविधानम् – यथा संहिताकार्य्यम्,षड्लिङ्गप्रकरणस्थकार्य्यम्, णत्वषत्वकार्यञ्चेत्यादीनि प्रक्रियात्मकानि कार्य्याणि सम्पादितानि। एतद्विधिषु सूत्रेषु स्थानिकोटिकम्, आदेशकोटिकम्, निमित्तकोटिकञ्चेति त्रिविधमुद्देश्यकोटिकं पदम् । प्रक्रियागौरवात् स्थानिकोटौ आदेशकोटौ चैकाधिकानि पदानि सम्भवेयुः । एवञ्च कोटित्रये यत्र समानता वर्त्तते, तत्र तत्कोटिकं पदमसकृन्नोपादीयते । तेन विधिना इदमेवोपपादनेनाऽलं यत् केवलं स्थानिकोटिकपदमादाय सूत्रम्,केवलं निमित्तकोटिकपदमादाय सूत्रम्,केवलमादेशकोटिकपदमादाय सूत्रम्। यथा स्थान्यादेश-

[249] अष्टाध्यायी – (6-1-86)

निमित्तकोटिकमादाय " इको यणचि "[250] इकः स्थाने यण् स्यादचि संहितायां विषये।अत्र इक् = ' इ,उ,ऋ,लृ ' स्थानी वर्तते । यण् = ' य्,व्,र्,ल् ' इति आदेशः । यस्य स्थाने अन्यद्विधीयते तत् स्थानि । येन विधीयमानेन अन्यत् प्रसक्तं निवर्तते स आदेशः । " शत्रुवदादेशः " आदेशो द्विविधं भवति । यथा – प्रत्यक्षमादेशः, आनुमानिकमादेशश्च। " अस्तेर्भूः "[251] ' अस् = भू ' इति प्रत्यक्षादेशः । आनुमानिकं ' ति ' इत्यत्र " एरुः "[252] इति सूत्रेण इकारान्त स्थान्याः अनुमानं क्रियते तथा च उकार इत्यनेन उकारान्तादेशस्य अनुमानं क्रियते ।

स्थान्यादेशकोटिकमादाय " जसःशी "[253] अदन्तसर्वनाम्नः परस्य जसःशी स्यात् । अनेकाल्त्वात्सर्वादेशः । न च " अर्वणस्त्रसावनञः "[254] इत्यादाविव ' नानुबन्धकृतमनेकाल्त्वम् '[255] इति वाच्यम्, सर्वादेशत्वात्प्रागित्संज्ञाया एवाभावाद् इति । सर्वशब्दाद् जसि पूर्वसवर्णे प्राप्ते – " जसःशी " " अतो भिस एस् " इत्यस्यात इत्यनुवर्तते । " सर्वनाम्नःस्मै "[256] इत्यतः ' सर्वनाम्न ' इत्यनुवर्तते । ' शी ' इति दीर्घोच्चारणं नपुंसकाच्चेत्युत्तरार्थम् । तेन ' वारिणी ' इति सिध्यति । अनेकाल्त्वादिति । न तु शित्वप्रयुक्तं सर्वादेशत्वमत्रेति भावः ।

2. प्रकृतिकल्पनं प्रत्ययविधानम् – यथाव्युत्पन्नप्रातिपदिकनिर्माणे अयमुपायः अष्टाध्याय्यां विभावितो विद्यते । कृत्प्रक्रिया एतद् विधावाविर्भवन्ति । अत्र प्रकृतिकल्पनपुरस्सरं प्रत्ययव्यवस्था इष्यते, विशेषतया कोटिद्वयं पदोपादाने लक्ष्यते । एकं प्रकृतिकोटिकम् अपरं प्रत्ययकोटिकम् । विशिष्टमुद्देश्यं यत्र विहितं वर्तते तत्र अर्थसन्धानं निमित्तकोटिकतयाऽवधीयते । एवं भावेन एतत् प्रकारकं विधिसूत्रं कोटिद्वयात्मकं पदविशिष्टं कोटित्रयात्मकं पदविशिष्टं वा सङ्घटितं विद्यते । कदाचित् केवलं प्रकृतिकोटिकमादाय सूत्रं कदाचित् प्रत्ययकोटिकं पदमादाय सूत्रं पुनश्च अर्थकोटिकं पदमादाय सूत्रम् ।

यथा – प्रकृतिप्रत्ययकोटिकपदमादाय " गुप्तिज्किद्भ्यःसन् "[257] ' गुप गोपन ' इति, गोपनं रक्षणम् । ' तिज् निशान ' इति,निशानं तीक्ष्णीकरणम् । गुप्तिजी इह पाठः, ' कित् निवासे ' इत्यनुपदमेव परस्मैपदेषु पठिष्यते । एभ्यस्त्रिभ्यो धातुभ्यः सन्प्रत्ययःस्यादिति सूत्रार्थः । प्रकृतिकोटिकपदमादाय – "

---

250 अष्टाध्यायी – (6-1-76)
251 अष्टाध्यायी – (2-4-52)
252 अष्टाध्यायी – (3-4-86)
253 अष्टाध्यायी – (7-1-17)
254 अष्टाध्यायी – (6-4-127)
255 नागेशपरिभाषोन्दुशेखरः – (परि. – 611)
256 अष्टाध्यायी – (7-1-14)
257 अष्टाध्यायी – (3-1-5)

गमश्च "[258] सुतङ्गम संज्ञायां खच् विधीयते। सुतं गच्छति इति विग्रहः। केवलप्रत्यय कोटिकपदमादाय " तृन् "[259] प्रकृतिप्रत्ययार्थकोटिकमादाय " अव्ययेऽयथाभिप्रेताख्यानेकृञः क्त्वाणमुलौ "[260] प्रकृतिः – अर्थप्रतिपादनमादाय " आक्रोशेऽवन्योर्ग्रहः "[261] अर्थप्रत्ययकोटिकमादाय " रोगाख्यायांण्वुल् बहुलम् "[262]।

3. अपूर्वशब्दोपजननम् (आगमः) – यथा अपूर्वशब्दोपजननं नाम विधीयमाना आगमव्यवस्था,तत्र ' कित्,टित्,मित् ' इति स्वरूपमादाय एषा व्यवस्था प्रतिपादिता विद्यते। 207 सङ्ख्यकैः सूत्रैः 48 विधा आगमा अष्टाध्याय्यां निर्दिश्यन्ते।

4. लोप,लुक्,श्लु, लुप् विधिः – यथा प्रक्रियानिर्वाहार्थं लोपकार्य्यं लुप्कार्य्यं लुक्कार्य्यञ्चोपदिष्टं विद्यते। तत्र " अदर्शनंलोपः "[263] इति सूत्रविज्ञानात् सङ्घतिपदे यस्य विद्यमानता न भवति किन्तु प्रक्रियाकार्यसाधनाय प्रयोजनीयता विद्यते। तेनैव तात्पर्येण लोप इति कार्य्यमुपदिश्यते स च लोपः अष्टाध्याय्यां द्विविध उपपादितः। यथा –

1. इत्संज्ञामादाय लोपकार्यम् " तस्य लोपः "[264] इति।

2. लोपशब्दमुच्चार्य लोपकार्य्यम् – " लोपःपिबतेरीच्चाभ्यासस्य "[265], " लोपःशाकल्यस्य "[266], " लोपश्चास्यान्यतरस्यां म्वोः "[267], " लोपो यि "[268] इत्यादि।

लुक्कार्य्यम् – लुक् इति शब्दमुच्चार्यम् – " लुक्स्त्रियाम् "[269], " लुग्वा दुहदिह...... "[270] इति।

लुप्कार्य्यम् – लुप् इति शब्दमुच्चार्य्यम् – " लुप्च "[271], " लुपसदचरजपजभ..... "[272] इति च।

---

[258] अष्टाध्यायी – (3-2-47)
[259] अष्टाध्यायी – (3-2-135)
[260] अष्टाध्यायी – (3-4-59)
[261] अष्टाध्यायी – (3-3-45)
[262] अष्टाध्यायी – (3-3-108)
[263] अष्टाध्यायी – (1-1-60)
[264] अष्टाध्यायी – (1-3-9)
[265] अष्टाध्यायी – (7-4-4)
[266] अष्टाध्यायी – (8-3-19)
[267] अष्टाध्यायी – (6-4-107)
[268] अष्टाध्यायी – (6-4-118)
[269] अष्टाध्यायी – (4-1-109)
[270] अष्टाध्यायी – (7-3-73)
[271] अष्टाध्यायी – (4-3-166)
[272] अष्टाध्यायी – (3-1-24)

5. उदात्त,अनुदात्त,स्वरितादिस्वरविधानम् – उदात्तानुदात्तादिस्वर विधानार्थं यदुपपादनं क्रियते तत्र शब्दनिर्देशपुरस्सरं निमित्तादिनिर्देशपुरस्सरं च विधानम् इष्यते । 328 संख्यकानि सूत्राणि प्रायश एतत् कृते ज्ञायन्ते ।

विधिसूत्रं मुख्यतया द्विविधं भवति – उत्सर्गविधिः अपवादविधिश्चभेदात् ।

1. सामान्यतया कस्यचन कार्यस्य प्रत्ययादेः वा विधायकत्वमुत्सर्गविधिरुच्यते । यथा –

" कर्मण्यण् "[273] इति उत्सर्गविधिसूत्रम् ।

2. तादृशं विधायकसूत्रमपवादविधिरित्युच्यते । यद् विशिष्टरूपेणकस्यचन कार्यस्य प्रत्ययस्य वा विधायकं स्यात् । यथा –

" आतोऽनुपसर्गे कः "[274] सूत्रमिदम् अनुपसर्गे कर्मण्युपपदे आदन्ताद् धातोः ' क ' प्रत्ययं विदधाति । अतः सूत्रमिदं " कर्मण्यण् "[275] इति सूत्रस्याऽपवादो मन्यते यतो हि " कर्मण्यण् " कर्मण्युपपदे धातुमात्राद् ' अण् ' प्रत्ययं विदधाति । अनेन प्रतीयते यद् उत्सर्गविधेः क्षेत्रं विस्तृतं भवति,अपवादस्य च क्षेत्रं तदपेक्षया विशिष्टं संकुचितं वा भवति । अतः प्रायेण आदेशादि विधायकानि सर्वाण्यपि सूत्राणि उत्सर्ग – अपवादभेदेन द्विविधानि ।

- **नियमसूत्रम्**

नियमनमिति नियमः । बहुप्राप्तौ सङ्कोचनं नियमः । पाणिनीयाष्टके नियमसूत्राणां सर्वथा अल्पत्वं संलक्ष्यते । ' विधिनां नित्यप्रवृतौ सत्यां क्वचिद् येन नियम्यते स नियमः ' अथवा ' प्राप्तस्य विधेर्नियामकं सूत्रं नियमसूत्रम् ', ' सर्वत्र प्राप्तस्य विधेस्तदितराविषयत्वसंकोचनं वा नियमः '। नियमसूत्रं विधिसूत्रस्य क्षेत्रं संकुच्य समुचितमार्गे प्रवर्तयति । अनेन विधिसूत्रस्यातिप्रसङ्गो दूरीभवति । नियमसूत्रं कस्याऽपि कार्यस्य विधानं न करोति । विधिसूत्रमेव विधानं करोति । अतो व्याकरणे विधीनां नित्यप्रवृत्तौ सत्यां येन नियम्यते स नियमोऽङ्गीकरोति । यथा – " रोः सुपि "[276] नियमार्थकं सूत्रम् । चतुर्शब्दात् प्रातिपदिकसंज्ञायां सुब् विभक्तौ अनुबन्धलोपे, ' चतुर् + सु ' इति जाते " खरवसानयोर्विसर्जनीयः "[277] इति सूत्रेणैव विसर्गादेशः सिद्धः पुनः सूत्रस्यारम्भो नियमार्थकः । ' सिद्धेसत्यारम्भो नियमार्थः ' अर्थात्

[273] अष्टाध्यायी – (3-2-1)

[274] अष्टाध्यायी – (3-2-3)

[275] अष्टाध्यायी – (3-2-1)

[276] अष्टाध्यायी – (8-3-16)

[277] अष्टाध्यायी – (8-3-15)

सप्तमीबहुवचने रोरेव रेफस्य विसर्गो नान्यरेफस्य इति स्पष्टार्थकः । अपवादविधिविषयेऽपि नियमसूत्रं तस्य किञ्चित् क्षेत्रं स्वायत्तीकृत्य स्वयं विधायकं भवति ।

नियमसूत्रस्य नियन्त्रणक्षेत्रं न केवलमुत्सर्गविधिः, अपवादविधिर्वा, अपितु, संज्ञापरिभाषाधिकारसूत्राण्यपि नियमयति नियमसूत्रम् । यथा –

" धातोस्तन्निमित्तस्यैव "[278] इति सूत्रं नियमसूत्रमस्ति । ' लव्यम् ', ' अवश्यलाव्यम् ' इत्यत्र ' लो + यम् ', ' अवश्य लौ + यम् ' इति स्थितौ " वान्तो यि प्रत्यये "[279] इति सूत्रेण वान्तादेशः प्राप्नोति, किन्तु ' ओयते ' इत्यत्रापि वान्तादेशस्यातिप्रसङ्गः । अतस्तं नियमयितुं सूत्रं भवति " धातोस्तन्निमित्तस्यैव " इति सूत्रेणानेन नियमौ विहितो यद् यादौ प्रत्यये परतो धातोः ओकारस्य, औकारस्य वा वान्तादेशः स्याच्चेत् तदेव स्याद् यदि प्रत्ययं निमित्तं मत्वा कृत आदेश ओकारः, औकारो वा स्यात् । नियमेनानेन " वान्तो यि प्रत्यये " इति सूत्रं नियन्त्रितम् । अत एव ' लो + य ' इति स्थितौ तस्य ओकारस्य वान्तादेशः ' अव ' जातः। किन्तु ' ओयते ' इत्यत्र ओकारः यन्निमित्तको नास्ति, अपितु, आङ्पूर्वाद् वेञ् धातोर्लटि कर्मवाच्ये यकि आत्मनेपदे तप्रत्यये कृते सम्प्रसारणे पूर्वरूपे कृते ' आ + उ + य + ते ' इति स्थितौ, " आद्गुणः "[280] इत्यनेन गुणे कृते ओकारो निष्पद्यते तत्र ' य ' निमित्तं नास्ति ।

" नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति "[281] इति सूत्रमपि नियमसूत्रम् । तद् वदति यद् सुब्विधि-स्वरविधिसंज्ञाविधिषु कृति प्रत्यये च परतः तुग्विधौ कर्तव्ये नलोपोऽसिद्धौ भवति । " पूर्वत्रासिद्धम् "[282] इति सूत्रेण नलोपकार्यस्याऽसिद्धत्वेतिप्रसङ्गवारणाय नियमसूत्रं " नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति " इति सूत्रं नियम्यति यत् सुब्विधिप्रभृतिकार्याणां कर्तव्य एव नलोपोऽसिद्धः स्यान्नाऽन्यत्रेति । अत एव राजश्व इत्यत्र " अकः सवर्णे दीर्घः "[283] इत्यनेन सवर्णदीर्घे कर्तव्ये नलोपोऽसिद्धो न जातः । सुब्विधिप्रभृतिष्वेव नलोपोऽसिद्धो जातः । अतः ' राजभिः ' इत्यत्र ' रामै ' इतिवद् " अतो भिस ऐस्

---

[278] अष्टाध्यायी – (6-1-79)

[279] अष्टाध्यायी – (6-1-78)

[280] अष्टाध्यायी – (6-1-86)

[281] अष्टाध्यायी – (8-2-2)

[282] अष्टाध्यायी – (8-2-1)

[283] अष्टाध्यायी – (6-1-99)

”[284] इति सूत्रेण ‘ ऐस् ’ आदेशः, ‘ राजाभ्याम् ’ इत्यत्र च ‘ रामाभ्याम् ’ इतिवत् “ सुपि च ”[285] इति सूत्रेण दीर्घो न जातः ।

नियमसूत्राणां भेदाः – नियमसूत्रं द्विविधम् – विधेयात्मकं, निषेधात्मकञ्चेति । उपर्युक्तेषूदाहरणेषु विधेयात्मकं नियमनं दृश्यते । “ आकडारादेका संज्ञा ”[286] इति विधेयात्मकं नियमसूत्रम् । “ कडाराः कर्मधारये ”[287] इति सूत्रं यावदेकैव संज्ञा स्यादिति कथने विधेयात्मकतैव वर्तते ।

“ पदान्तस्य ”[288] इति निषेधसूत्रम् । इदं पदान्तस्य नस्य णत्वं न इत्युक्त्वा णत्वनिषेधमुखेन अर्थात् “ रषाभ्यां नो णः समानपदे ”[289] इति सूत्रेण, “ अट्कुप्वाङ्नुम्व्यवायेऽपि ”[290] इति सूत्रेण च प्राप्तं णत्वं निषिध्य पदान्तेतरनकारे णत्वविधिं नियमयति । अत इदं भवति निषेधात्मकं नियमसूत्रम् । अतः प्राप्तौ सत्यामारभ्यमाणविषयो नियमाय प्रकल्पते ।

- **अतिदेशसूत्रम्**

अतिदेशसूत्रं च अन्यत्र अन्यधर्मारोपबोधकम् अथवा आरोपवत्त्वमतिदेशत्वम् । अथवा वतिघटितत्वमतिदेशत्वम् । यस्मिन् सूत्रे वत्शब्दस्य वदर्थस्य वाऽनुप्रविष्टो भवति तदतिदेशसूत्रं भवति । अतिदेशसूत्रं विधिसंज्ञाप्रभृतिसूत्राणां विषयं कार्यं क्षेत्रं वा विस्तारयति । यदा विधिसूत्रस्य प्रवृत्तये यस्य साधनस्याऽऽवश्यकता अस्ति तस्याऽभावात् सूत्रस्य प्रवृत्तिर्न स्यात्, तदाऽतिदेशसूत्रं तद्वद्भावं करोति । यथा –

‘ राम + य ’ इत्यवस्थायां “ सुपि च ”[291] इति सूत्रस्य प्रवृत्तये सुप्त्वस्याऽऽवश्यकताऽस्ति । किन्तु सा बाधिता भवति । कुत इति चेत्तर्हि – सूत्रार्थासङ्घटनादिति बोध्यम् । यञादौ सुपि परे सति सूत्रमिदमदन्ताङ्गस्य दीर्घं विधत्ते । अत्र च यञादित्वेऽपि तत्र सुप्त्वाऽभावात्सूत्राप्रवृत्तिः । अतः “ स्थानिवदादेशोऽनल्विधौ ”[292] इति सूत्रमारब्धम् । तेन च सूत्रेण सुप्त्वव्यतिरेकाद् दीर्घाऽप्रवृत्तिर्निराकृता,

---

284 अष्टाध्यायी – (7-1-9)
285 अष्टाध्यायी – (7-3-102)
286 अष्टाध्यायी – (1-4-1)
287 अष्टाध्यायी – (2-2-38)
288 अष्टाध्यायी – (8-4-37)
289 अष्टाध्यायी – (8-4-1)
290 अष्टाध्यायी – (8-4-2)
291 अष्टाध्यायी – (7-3-102)
292 अष्टाध्यायी – (1-1-56)

यतो हि सुप्त्वाऽभाववत्यपि यकारे ङे स्थानिके ङे वृत्तिसुप्त्वरूपो धर्मो यकारे समारोप्यते। तथा च यन्निमित्तवैकल्यप्रयुक्तवैकल्यवती सूत्रप्रवृत्तिस्तन्निमित्तमतिदेशमहिम्ना लब्धमिति।

अथेदानीं अतिदेशस्वरूपविषये विचार्यते। अस्य स्वरूपं सम्यगवबोधयितुमिदं तावत् सर्वप्रथमं ध्यातव्यं भवति। तद्यथा – ' गुरुवद् गुरुपुत्रे वर्तितव्यम् '[293] अथवा गुरुस्थानापन्ने गुरुपुत्रादौ स्थानापत्त्या तद्धर्मलाभो लोकतः सिद्धः। ' कुशादिस्थानापन्नेषु शरादिषु ' च वैदिकन्यायसिद्धः। यस्मिन् सूत्रे वार्त्तिके वाक्ये च वत्शब्दः पठितोऽस्ति अथवा ' वत् ' इत्यस्यार्थोऽनुप्रविष्टो भवति स एवातिदेशः[294]। अथवा यत्र क्वचित् यन्निमित्तमुपादाय अन्यशास्त्रप्रवृत्त्या यत्कार्यजातं भवति स एवातिदेशः[295]। इह तु शास्त्रे एवं रूपं शब्दस्येति वचनात् स्थानिधर्मा आदेशेषु न प्राप्नुयुरिति तत्प्राप्त्यर्थं स्थानिवदादेश इत्यारब्धम्।

दृष्टान्तमाश्रित अतिदेशस्य कल्पना वर्तते। अत्र " तेन तुल्यं क्रिया चेद्वतिः "[296] इति सूत्रेण वति प्रत्ययः। वस्तुतस्तु वद्घटितत्वं अतिदेशत्वम्। यत्र सूत्रे वार्तिके वा वत् शब्दः, वदर्थो वाऽनुप्रविष्टः तद् अतिदेश नाम्नोच्यते। अतिदेशस्तावद्बौद्धिक आरोपः।

स आरोपः शाब्दिक आर्थिकश्च भेदाद् द्विविधः। यथा –

1. " स्थानिवदादेशोऽनल्विधौ "[297] इति सूत्रे अतस्मिन् तद्बुद्धिः इत्यस्यारोपो भवति। स वद्घटितपदेन भवति। अतस्मिन्नारोपे वत्शब्दस्य श्रुतत्वात् शब्दाऽतिदेश इत्युच्यते।

2. " असंयोगाल्लिट् कित् "[298] इति सूत्रे वत्पदं नास्ति। अतः इदमतिदेशसूत्रं भवति अर्थाऽतिदेशः। यतो हि अपित् लिट् तु कित् न भवति। अतस्तस्याऽर्थः किद्वत् स्वीक्रियते। वत् शब्दमन्तरेणापि वत् इत्यर्थस्य प्रतीतेस्तादृशोऽतिदेश अर्थाऽतिदेश उच्यते।तदुक्तं भगवता भाष्यकारेण " बहुगणवतुडति संख्या " इति संख्यासञ्ज्ञासूत्रे – अन्तरेणापि वतिमतिदेशो गम्यते। तद्यथा – ' एष ब्रह्मदत्तः, अब्रह्मदत्तं ब्रह्मदत्त इत्याह, ते मन्यामहे ब्रह्मदत्तवदयं भवति इति। एवमिहापि असंख्यां संख्यामित्याह, संख्यावदिति गम्यते '[299]।

---

[293] गुरुवदस्मिन् गुरुपुत्रे वर्तितव्यमिति गुरौ यत्कार्यं तद् गुरुपुत्रेऽतिदिश्यते। भाष्यम् – (1-1-55)

[294] अन्तरेणापि वतिमतिदेशो गम्यते। वद्घटितत्वमतिदेशत्वम्। भाष्यम् – (1-2-1)

[295] प्रत्ययनिमित्तं कार्यमसत्यपि प्रत्यये कथं तु नाम स्यादिति सूत्रमिदमारभ्यते। प्रत्ययलोपे कृते प्रत्ययलक्षणं प्रत्ययहेतुकं कार्यं भवति। काशिका – (1-1-62)

[296] अष्टाध्यायी – (5-1-115)

[297] अष्टाध्यायी – (1-1-56)

[298] अष्टाध्यायी – (1-2-5)

[299] महाभाष्यम् – प्रकृतसूत्रे

अतिदेशः त्रिविधो भवति । यथा –

1. संज्ञाऽतिदेशः – " सार्वधातुकमपित् "[300] इति सूत्रेण ङिद्वद् अतिदेश इत्यादौ ।

2. स्थान्यतिदेशः – " स्थानिवदादेशोऽनल्विधौ "[301] इति सूत्रेण स्थानिवदादेशः इत्यादौ ।

3. युक्ताऽतिदेशः – " लुपि युक्तवद् व्यक्तिवचने "[302] इत्यादौ ।

कार्यदृष्ट्याऽतिदेशं चतुर्विधो विभक्तुं शक्यते । यथा –

1. शास्त्राऽतिदेशः – " स्थानिवदादेशोऽनल्विधौ "[303] शास्त्राऽतिदेशस्योदाहरणं भवति ।

2. कार्याऽतिदेशः – " प्रत्ययलोपे प्रत्ययलक्षणम् "[304] कार्याऽतिदेशस्योदाहरणं भवति ।

3. व्यपदेशाऽतिदेशः – " आद्यन्तवदेकस्मिन् "[305] व्यपदेशाऽतिदेशस्योदाहरणं भवति ।

4. रूपाऽतिदेशः – पतञ्जलिजयादित्यवामनादीनां मते " द्विर्वचनेऽचि "[306] सूत्रमिदं रूपाऽतिदेशस्योदाहरणं भवति ।

बालमनोरमाकारेण श्रीवासुदेवदीक्षितेन " तृज्वत्क्रोष्टुः "[307] इति सूत्रव्याख्यानप्रसङ्गे सिद्धान्तकौमुद्या बालमनोरमाटीकायाम्, अतिदेशस्य सप्तभेदाः प्रतिपादिताः । उक्तञ्च –

कार्यरूपनिमित्तार्थशास्त्रतादात्म्यशब्दिताः ।

व्यपदेशश्च सप्तैतान्नतिदेशान् प्रचक्षते ।। इति अतिदेशाः सप्त भवन्ति । तद्यथा –

1. कार्यातिदेशः, 2. रूपातिदेशः, 3. निमित्तातिदेशः, 4. अर्थातिदेशश्चेति, 5. शास्त्रातिदेशः, 6. तादात्म्यातिदेशः, 7. व्यपदेशातिदेशः ।

1. कार्यातिदेशः

कार्यस्य अतिदेशः इति कार्यातिदेशः । प्रत्ययेषु लुप्तेष्वपि लुप्तप्रत्ययनिमित्ताङ्कार्यं कार्यातिदेशेन सिद्धं भवति । " प्रत्ययलोपे प्रत्ययलक्षणम् "[308] सूत्रमिदं कार्यातिदेशस्योदाहरणम् । तद्यथा – ' अग्निचित्, सोमसुत् ' इत्यत्र क्विप्प्रत्ययस्य लोपेऽपि क्विप्प्रत्ययाश्रितं यत्कार्यं " ह्रस्वस्य पिति कृति

---

[300] अष्टाध्यायी – (1-2-4)
[301] अष्टाध्यायी – (1-1-56)
[302] अष्टाध्यायी – (1-2-51)
[303] अष्टाध्यायी – (1-1-56)
[304] अष्टाध्यायी – (1-1-62)
[305] अष्टाध्यायी – (1-1-21)
[306] अष्टाध्यायी – (1-1-59)
[307] अष्टाध्यायी – (7-1-95)
[308] अष्टाध्यायी – (1-1-62)

तुक् "[309] इति सूत्रेण तुक् भवत्येव । क्विप्प्रत्ययो यथा पित् कृत् च वर्तते । तमेवाश्रित्य तुक् भवति कार्यातिदेशमाध्यमेन । नो चेत् लुप्ते प्रत्यये कथं कार्यं स्यादिति जिज्ञासायामेव मन्ये वैयाकरणैः कार्यातिदेशस्य युक्तियुक्ता कल्पना स्वीकृता ।

उदाहरणानि च – " गोतो णित् "[310] इति सूत्रेण णिति वृद्धिरूपं यत्कार्यं तदतिदिश्यते । तेनायमर्थः – अणितः सर्वनामस्थानस्य स्थाने णित्सर्वनामस्थानमादेशो भवति । गोशब्दस्य सर्वनामस्थाने णितीति कार्यं भवतीति भावः । तेन ' गौः, गावौ ' इत्यादीनि रूपाणि सिद्ध्यन्ति । यद्वा " कर्मवत् कर्मणा तुल्यक्रियः "[311] इति सूत्रेण कर्मणि लकारे यत् कार्यं तत् कर्मणा तुल्यं कर्तरि अतिदिश्यते । तेन कर्मकर्तरि ' अनुक्रियते, पराक्रियते ' इत्यत्र " अनुपराभ्यां कृञः "[312] इति सूत्रं बाधित्वा परत्वात् " कर्मवत्कर्मणा तुल्यक्रियः " इति सूत्रेण आत्मनेपदमेव भवति । शास्त्रातिदेशे तु " भावकर्मणोः "[313] इति सूत्रं बाधित्वा परत्वाद् " अनुपराभ्यां कृञः " इति सूत्रेण परस्मैपदापत्तिः ।

2. रूपातिदेशः

अस्य तु नाम्नैव स्पष्टमेतत् । यत् रूपस्यात्र अतिदेशो भवति । तद्यथा क्रोष्टुः शब्दो ह्रस्व उकारान्तस्स्यात्तस्य ऋकारान्तत्वमत्र भवति । एतस्योदाहरणम् – " तृज्वत्क्रोष्टुः "[314] इति सूत्रम् । तत्र तृज्वद् भवति इत्युक्ते तृच्छब्दस्य यद्रूपं तदतिदिश्यत इति कस्यचिद् भ्रान्तिः स्यात्, अतः तां निराकर्तुमेव मन्ये काशिकाकारेणोक्तम् – तृजन्तस्य यद्रूपमिति । तृजन्तस्य यद्रूपमिति काशिकाकारस्य कथनेन तृजन्तस्य यद्रूपं तद् क्रोष्टुशब्दस्यातिदिश्यते तदा यत्किञ्चिदेव तृजन्तस्य रूपम् – ' वक्तृ पक्तृ ' इत्येवमाद्यपि प्राप्नोति । न चैवं भवति । महाभाष्यकारेण " तृज्वत् क्रोष्टुः " इति सूत्रे रूपातिदेशं स्वीकृतवता क्रोष्टुशब्दस्य स्थाने आन्तरतम्यात् (अर्थेन रूपेण) च यस्यान्तर्यं तदेव रूपमतिदिश्यते न पुनः ' पक्तृ, वक्तृ ' इति यस्य कस्यचिदपि तृजन्तस्य रूपस्यातिदेशः । अर्थेन रूपेण च सादृश्यं क्रोष्टोर्यदन्तरतमं तदतिदिश्यते । तच्च पुनः क्रुशेर्यस्तृज्विहितस्तदन्तम् । क्रोष्टुशब्दरूपस्य स्थाने ' क्रोष्टृ ' इत्येतद् भवतीति । यतो ह्यत्र रूपस्य प्राधान्यं भवत्येव । कृते च रूपातिदेशे क्रोष्टृशब्दः ऋकारान्तः,

---

[309] अष्टाध्यायी – (6-1-70)
[310] अष्टाध्यायी – (7-1-90)
[311] अष्टाध्यायी – (3-1-87)
[312] अष्टाध्यायी – (1-3-79)
[313] अष्टाध्यायी – (1-3-13)
[314] अष्टाध्यायी – (7-1-95)

तस्माद् “ ऋदुशनस्पुरुदंसोऽनेहसां च ”[315] तान्यपि कासुचित् विभक्तिषु एव न सर्वत्र। ‘ क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टारम् क्रोष्टून् । क्रोष्ट्रा क्रोष्टुना क्रोष्टुभ्याम् क्रोष्टुभिः ’ । ‘ क्रोष्ट्रे क्रोष्टवे, क्रोष्टुः क्रोष्टोः ’ इत्यनङादेशे कृते “ सर्वनामस्थाने चासम्बुद्धौ ”[316] इति दीर्धत्वे च ‘ क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टारम् क्रोष्टारौ क्रोष्टून् ’ इति सिद्ध्यन्ति।

मन्ये पाणिनिना इदमेवाभीष्टं स्यात् यत् क्रोष्टुशब्दस्य तृचि एव रूपाणि यथा भवेयुरिति। यद्येवं न स्यात्तर्हि पाणिनिविरचितानाम् “ तृज्वत् क्रोष्टुः ”, “ स्त्रियां च ”[317], “ विभाषा तृतीयादिष्वचि ”[318] इत्यादीनां सूत्राणां किम्प्रयोजनम्। तस्मात् क्रोष्टुशब्दस्य ‘ क्रोष्टृ ’ इत्येव रूपं स्यात्। तदर्थं रूपातिदेशः अङ्गीकृतः। तद्येवं न स्यात्तर्हि सूत्राणां प्रयोजनमपि नासीत् किमपि।

एवमेव “ द्विर्वचनेऽचि ”[319] अस्य सूत्रस्य काशिकायामुल्लिखितं यद् – ‘ रूपातिदेशश्चायं नियतकालः, तेन कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते ’। कानिचित् उदाहरणानि सन्ति – ‘ पपतुः, पपुः, जग्मतुः, जग्मुः ’। अत्र ‘ पा + अतुस्, पा + उस् ’ “ लिटि धातोरनभ्यासस्य ”[320] इति सूत्रेण द्वित्वमस्यापेक्षया च परत्वाद् “ आतो लोप इटि च ”[321] इत्यनेन पूर्वं द्वित्वात् आकारलोपप्राप्तिः। यदि पूर्वमाकारस्य लोपः स्यात्तर्हि अनच्कत्वात् द्वित्वमपि नैव भवितुं शक्यते।

अस्यां स्थितौ अत्र पक्षद्वयं भवति। लघुसिद्धान्तकौमुद्याम् – ‘ अस्य वृत्तौ उल्लिखितं यद् – द्वित्वनिमित्तेऽचि अच आदेशो न स्याद् द्वित्वे कर्तव्ये ’। इति नियमेन आकारलोपात् पूर्वमेव द्वित्वं भवति। कृते च द्वित्वे, आकारलोपे सति ‘ पपतुः, पपुः ’ इत्येतत् सिद्धम्। अतोऽस्मिन् पक्षे रूपातिदेशस्य नास्त्यावश्यकता।

वस्तुतः सूक्ष्मेक्षिकया यद्यत्र पश्यामः तर्हि ‘ पा + अतुस्, पा + उस् ’ इत्यवस्थायां द्वित्वमपि प्राप्नोति अथ च “ असंयोगाल्लिट् कित् ”[322] इति नियमात् “ आतो लोप इटि च ”[323] इत्यनेन आकारलोपप्राप्तिरपि। किञ्च तुल्यबलविरोधे सति विप्रतिषेधो भवति। सति चात्र “ विप्रतिषेधे

[315] अष्टाध्यायी – (7-1-94)
[316] अष्टाध्यायी – (6-4-8)
[317] अष्टाध्यायी – (7-1-96)
[318] अष्टाध्यायी – (7-1-97)
[319] अष्टाध्यायी – (1-1-59)
[320] अष्टाध्यायी – (6-1-8)
[321] अष्टाध्यायी – (6-4-64)
[322] अष्टाध्यायी – (1-2-5)
[323] अष्टाध्यायी – (6-4-64)

विप्रतिषेधे परं कार्यम् "[324] इति सूत्रेण नियमोऽत्र कथं न स्याद्। अर्थात् स्यादेव। परं कार्यन्तु आकारलोप एव। कृते चाकारलोपे ' प् + अतुस् ' इत्यनच्कत्वात् कथं द्वित्वप्राप्तिः स्याद्। अतः काशिकाकृता योऽर्थः कृता अस्य सूत्रस्य स एवार्थो युक्ततरः पूर्वपक्षात्। एनमर्थमाधारीकृत्य ' पा + अतुस् ' अत्र पूर्वं परत्वात् " आतो लोप इटि च " इति सूत्रेण आकारलोपे कृते ' प् + अतुस् ' इति स्थितौ अच्त्वाभावे द्वित्वाभावप्राप्तिरत " द्विर्वचनेऽचि " इत्यनेन रूपातिदेशः कृतः। अर्थात् स्थानिनः ' पा ' इत्यस्य यथारूपं तथैव स्यादित्यर्थः। मन्येऽत एव रूपातिदेशस्यावश्यकता जाता। येन च इष्टसिद्धिर्यथा भवेत्। महाभाष्यकारेणापि अयमेव पक्षः सिद्धान्तपक्षरूपेणोपस्थापितो यथा – ' पपतुः, पपुः। तस्थतुः, तस्थुः। जग्मतुः, जग्मुः। आटिटत्, आशिशत्। चक्रतुः, चक्रुरिति। आल्लोपोपधालोपणिलोपयणादेशेषु कृत्वेष्वनच्कत्वाद् द्विवचनं न प्राप्नोति। स्थानिवद्भावाद् भवति। तस्मात्स्थानिवदित्येष एव पक्षो ज्यायान् '[325]। पक्षद्वयेऽपि फले नास्ति कश्चनान्तरः केवलं प्रक्रियाभेद एव। परमपि रूपातिदेशाङ्गी-करणेन परत्वादाकारस्य लोपेऽपि नास्ति काऽपि बाधा।

3. निमित्तातिदेशः

अस्मिन् अतिदेशे निमित्तस्य कारणस्य हेतोर्वा महन्महत्त्वं भवति तदर्थमुच्यते निमित्तातिदेशः। अस्यातिदिशस्य प्रयोजनम् " पूर्ववत्सनः "[326] इत्यत्र भवति। सनः पूर्वो यो धातुः आत्मनेपदी तद्वत्सन्नन्तादात्मनेपदं भवति। येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते तेनैव सन्नन्तादपि भवति। इत्थञ्चानेन पूर्ववत्सनः सूत्रेण प्रकृतिगतमेव अनुदात्तेत्वम्, ङित्त्वम्, ञित्त्वं वा सन्नन्तेऽतिदिश्यते, तेन ' एदिधिषते ' इत्यादावात्मने पदं सिद्ध्यति।

यद्ययं कार्यातिदेशः – यथा पूर्वस्माद् आत्मनेपदं विधीयते तथा सन्नन्तादपीति। कार्यातिदेशस्वीकरणपक्षे ' शीयते ' इत्यत्र यथा आत्मनेपदं तद्वत् सन्नन्तादपि स्याद् आत्मनेपदम्। ' शिशत्सते ' इत्यनेन भाव्यम्। यावतात्र शित्वं नास्ति। अत एवात्र निमित्तातिदेशो गृह्यते। तेन च पूर्वस्य यन्निमित्तं ङित्त्वादि, अनुदात्तेत्वं शित्त्वं वा तत्सन्नन्तस्याप्यतिदिश्यते।

निमित्ते चातिदिष्टे तत्प्रयुक्तत्वादेव कार्यं भवति। किञ्चात्र ' शिशत्सति ' इत्यत्र सनः पूर्वः शित्त्वं नास्ति। अतो न भविष्यति आत्मनेपदम्। परस्मैपदमेवात्र बोध्यम्। तस्मादत्र निमित्तातिदेशस्य कल्पनं समुचितमेव। अत एवाह पदमञ्जरीकारः – ' यद्ययं कार्यातिदेशः शास्त्रातिदेशो वा विज्ञायेत, तदा

---

[324] अष्टाध्यायी – (1-4-2)

[325] भाष्यम् – (1-1-59)

[326] अष्टाध्यायी – (1-3-62)

सन्प्रकृतौ प्रयोगान्तरे दृष्टमित्येव निमित्तनिरपेक्षं कार्यं शास्त्रं वातिदिश्यमानमिहाप्यतिदिश्येत – शिशत्सति, मुमूर्षति, शीयते, म्रियते इत्यत्र दृष्टत्वादिति मतेऽनयोः पक्षयोर्दोषं दृष्ट्वा निमित्तातिदेशमाश्रीयते इत्यर्थः '[327] ।

4. अर्थातिदेशः

" जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् "[328] इति सूत्रेण एकत्वविशिष्टेऽर्थे बहुत्व-रूपार्थातिदेशः । तेन ' ब्राह्मणाः पूज्याः ' इत्यत्र विशेषणादपि बहुवचनं सिद्ध्यति, यदि तु एकवचनस्य स्थाने बहुवचनप्रत्ययः स्यात् तदा व्रीहिभ्य आगत इत्यत्र " जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् " इति सूत्रेण ङसेः स्थाने बहुवचने " घेर्ङिति "[329] इति सूत्रेण गुणः प्रसज्यते । एकवचनं बाधित्वा बहुवचनमित्यर्थे तु जातिवाचकादेव बहुवचनं स्यान्न तु तद्विशेषणात् । अर्थातिदेशे तु विशेषणानां विशेष्यार्थगतसंख्याबोधकत्वात्ततोऽपि बहुवचनम्[330] ।

5. शास्त्रातिदेशः

' परिवीः ' व्येञ्धातोः क्विपि तस्य लोपे सम्प्रसारणे च शास्त्रातिदेशेन " ह्रस्वस्य पिति कृति तुक् "[331] इति सूत्रेण कृतं तुकं बाधित्वा " हलः "[332] इति सूत्रेण परत्वाद् दीर्घः ।

6. तादात्म्यातिदेशः (तादात्म्यं तदङ्गता)

' द्रवत्पाणि शुभस्पती ' इत्यत्र " सुबामन्त्रिते पराङ्गवत्स्वरे "[333] इति सूत्रेण शुभ इति षष्ठ्यन्तस्य पतिशब्दतादात्म्यमतिदिश्यते । तेन " आमन्त्रितस्य च "[334] इति सूत्रेण ' शुभस्पती ' इति समुदायस्यामन्त्रितत्वात् शकारोकारस्याद्युदात्तत्वं सिद्ध्यति ।

7. व्यपदेशातिदेशः

अमुख्ये मुख्यव्यवहारो व्यपदेशः । अस्य व्यपदेशस्य स्वीकरणपक्षे अयं लाभो भवति । यथा " अत इञ् "[335] इति सूत्रेण अदन्तात् प्रातिपदिकाद् इञ्प्रत्ययो भवति । इति स्वीकृते सति वासुदेववाचकाद्

---

[327] काशिका – पदमञ्जरीटीका – (1-3-62)

[328] अष्टाध्यायी – (1-2-58)

[329] अष्टाध्यायी - (7-3-111)

[330] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[331] अष्टाध्यायी – (6-1-70)

[332] अष्टाध्यायी – (6-4-2)

[333] अष्टाध्यायी – (2-1-2)

[334] अष्टाध्यायी – (6-1-195)

[335] अष्टाध्यायी – (4-1-95)

अशब्दाद् अस्यापत्यमित्यर्थे इञ् न स्यात् । अतो व्यपदेशातिदेशे स्वीकृते सति ‘ आभ्याम् ’ इत्यत्र अरूपेऽङ्गे “ आद्यन्तवदेकस्मिन् ” इति सूत्रेण अदन्ताङ्गत्वातिदेशः ।

शबरस्वामिनापि शाबरभाष्ये अतिदेशस्य सप्त भेदाः स्वीकृताः । यथा –

1. सामान्याऽतिदेशः – ‘ गुरुवत् गुरुपुत्रे वर्तितव्यम् ’ ।

2. रूपाऽतिदेशः – “ तृज्वत् क्रोष्टुः ”[336] ।

3. निमित्ताऽतिदेशः – “ पूर्ववत्सनः ”[337] ।

4. तादात्म्याऽतिदेशः – “ सुबामन्त्रिते पराङ्गवत्स्वरे ”[338] ।

5. शास्त्राऽतिदेशः – “ कर्मवत्कर्मणा तुल्यक्रियः ”[339] ।

6. कार्याऽतिदेशः – “ स्थानिवदादेशोऽनल्विधौ ”[340] ।

7. व्यपदेशाऽतिदेशः – “ आद्यन्तवदेकस्मिन् ”[341] ।

वस्तुतोऽयं प्रश्नः स्मृतिपटले सहसैवाङ्कितो भवति यदेतेषामतिदेशानां किं तात्पर्यम् । किमर्थञ्च वैयाकरणैः एषामुल्लेखः क्रियते । कानि च एताषां प्रयोजनानि ? इत्येते सन्ति प्रश्ना येषां विषये मयात्रोल्लिख्यते ।

सर्वप्रथममेतत्तु निश्चयप्रचमेव यदेतेषामतिदेशानामुल्लेखः सर्वैरपि वैयाकरणैः कृतोऽस्ति सूत्रस्य प्रकारान् वर्णयद्भिः तेष्वेव एकमतं सूत्रलक्षणं भवति अतिदेशः – अतिदिश्यन्ते तुल्यतया विधीयन्ते कार्याणि यैस्तेऽतिदेशाः । अस्यातिदेशस्य प्रकारा उद्ध्रियन्तेऽत्र ।

“ स्थानिवदादेशोऽनल्विधौ ” इति सूत्रे न्यासकार उक्तवान् – ‘ अतिदेशोऽनेकप्रकारः – निमित्तातिदेशः, व्यपदेशातिदेशः, शास्त्रातिदेशः, रूपातिदेशः, कार्यातिदेशश्च ’[342] इति । पदमञ्जरीकारस्तु षट्प्रकारान् वर्णयति तद्यथा – षोढातिदेशः – निमित्तातिदेशः, व्यपदेशातिदेशः, शास्त्रातिदेशः, रूपातिदेशः, तादात्म्यातिदेशः, कार्यातिदेश इति । एवमेव महाभाष्यकारोऽपि यत्र तत्र सूत्रेषु एषामतिदेशानां विषये स्पष्टमेव प्रतिपादयति । तद्यथा “ गोतो णित् ”[343] इति सूत्रे नास्ति

---

336 अष्टाध्यायी – (7-1-95)

337 अष्टाध्यायी – (1-3-62)

338 अष्टाध्यायी – (2-1-2)

339 अष्टाध्यायी – (3-1-87)

340 अष्टाध्यायी – (1-1-56)

341 अष्टाध्यायी – (1-1-21)

342 काशिका – न्यासटीका – (1-1-55)

343 अष्टाध्यायी – (7-1-90)

वतिनिर्देशः । परं वतिनिर्देशमन्तरापि सूत्रमेतदतिदेशकार्यं विदधाति तद्यथा – ' अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा एष ब्रह्मदत्तः । अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे ब्रह्मदत्तवदयं भवतीति एवमिहाप्यणितं णिदित्याह । णिद्वदिति गम्यते '[344] ।

एवमेव " तृज्वत् क्रोष्टुः "[345] इति सूत्रेऽपि महाभाष्येऽतिदेशविषये चर्चाऽस्ति तद्यथा – ' किं पुनरयं शास्त्रातिदेशः आहोस्विद् रूपातिदेशः '[346] । तत्रभवान् कैयटोऽप्यस्य सूत्रस्य व्याख्यायां स्पष्टीकरोति तद्यथा शास्त्रातिदेशः प्राप्नोति प्राधान्यात्तु रूपातिदेशः प्रसङ्गकार्यातिदेशः । अस्य अयमेवाभिप्रायो यत् सर्वैरपि वैयाकरणैः एषां विभिन्नानामतिदेशानां सत्ताभिमत्ता इत्यत्र नास्ति काचित् विप्रतिपत्तिः ।

अयमपि सन्देहो भवति यदेतेऽतिदेशाः किं सप्तसङ्ख्याङ्का एव भवन्त्याहोस्विदन्येऽपि । मन्ये एतेषां सप्तानामेवोल्लेखः सर्वत्र प्राप्यते । एभिरेवेष्टसिद्धिः मुख्यञ्च प्रयोजनं शब्दसाधुत्वं तद् सिध्यति । वस्तुत एकेनापि अतिदेशेनेष्टसिद्धिः भवति स च धर्मातिदेश एकस्य धर्मस्य आरोपोऽन्यत्रापि यथा स्यात्तदर्थमेवातिदेशस्य कल्पना कृता वैयाकरणैः तथापि प्रक्रियाभेदवर्णनाय एषां सप्तविधत्वं उररीक्रियते । वस्तुतः धर्मातिदेशस्य नास्ति उररीक्रियते क्वापि उल्लेखः । अतिदेशानां विषये एतद्वयं चिन्तयामः ।

वतिप्रत्ययघटितातिदेशसूत्रविचारः – तत्र वतिप्रत्ययस्य सादृश्यार्थकत्वं " तेन तुल्यं क्रिया चेद्वतिः "[347], " तत्र तस्येव "[348] इति सूत्राभ्यां बोधितम् । तत्र प्रथमसूत्रस्यायमर्थः । तृतीयान्तात् तुल्यमित्यर्थे वतिप्रत्ययः स्यात्, यत्तुल्यं सा क्रिया चेदिति ' ब्राह्मणवदधीते क्षत्रियः ', ' राजवद् वर्तते वैश्यः ', ' शूद्रवदाचरति ब्राह्मणः ' इत्यादीन्युदाहरणानि । उदाहरणेषु ब्राह्मणादिपदानि तत्कर्तृकाध्ययनादिक्रियां लक्षणया बोधयन्ति । तथा च ब्राह्मणकर्तृकाध्ययनसदृशी क्षत्रिय-कर्तृकाध्ययनक्रिया इत्यादिरूपेणबोधः । अत्र क्रिययोः सादृश्यम्, तद्द्वारा व्यक्त्योरपि । " तेन तुल्यं क्रिया चेद्वतिः " इति सूत्रे ' तेन ' इत्यत्र तृतीया तुलोपमाशब्दवर्जं तुल्यार्थकशब्दैः योगे तृतीया वा स्यात् इत्यर्थकेन " तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् "[349] इति सूत्रेण विहिता । सा च शेषषष्ठ्यपवाद-

---

[344] भाष्यम् – (7-1-90)

[345] अष्टाध्यायी – (7-1-95)

[346] भाष्यम् – (7-1-95)

[347] अष्टाध्यायी – (5-1-115)

[348] अष्टाध्यायी – (5-1-116)

[349] अष्टाध्यायी – (2-3-72)

भूता इति सर्वविभक्त्यर्थबोधिका । अत एव ‘ राज्ञा सदृशं वर्तते इति राजवद् वर्तते ’, ‘ जडस्य तुल्यं ब्रूते इति जडवद् ब्रूते ’, ‘ सूर्य इव प्रकाशते इति सूर्यवत् प्रकाशते ’, ‘ पिता इव पालयति इति पितृवत् पालयति ’, ‘ राज्ञा इव राजवद् व्यवहृतमनेन ’, ‘ देवमिव देववत् भवन्तं पश्यामि ’, ‘ असिना इव असिवत् दात्रेण भिनत्ति ’, ‘ ब्राह्मणाय इव ब्राह्मणवत् वैश्याय ददाति ’, ‘ पर्वतादिव पर्वतवद् आसनादवरोहति ’ इत्यादौ वतिप्रत्ययान्तस्थले तृतीयाभिन्नविभक्त्यर्थस्यापि स्फूर्तिः । अत एव सनः पूर्वस्माद् धातोः इव सन्नन्तादप्यात्मनेपदं स्यात् इत्यर्थे “ पूर्ववत्सनः ” इति सूत्रं पाणिनिना कृतम् । यत्र “ तेन तुल्यं क्रिया चेद्वतिः ” इति सूत्रेण वतिः, तत्र तृतीयान्तेनैव विग्रहः, सूत्रानुरोधात् । अर्थस्तु उपमेयविभक्त्यनुसारेण ग्राह्यः । अत एव उपमानोपमेययोः समानविभक्तिकत्वनियमस्य भङ्गोऽपि न । अत एव “ पूर्ववत्सनः ” इति सूत्रे कैयटेन उक्तम् – पक्षद्वयेऽपि तेन तुल्यमिति तृतीयान्ताद्वतिः, न तु पञ्चम्यन्तात् । तुल्यार्थैरिति विहिता तृतीया सर्वविभक्त्यर्थानन्तर्भावयतीति पञ्चम्यर्थस्यात्र ग्रहणम् उपपन्नमेव । यथा ‘ ब्राह्मणवद् वैश्यादधीते इति ब्राह्मणादिव वैश्यादधीते ’ इत्यर्थः । वैश्यापादानकस्य अध्ययनस्य ब्राह्मणापादानकमध्ययनमुपमानम् । तत्र ब्राह्मणापादानकाध्ययने ब्राह्मणशब्दो वर्तते । तेन ‘ ब्राह्मणेन तुल्यं वैश्यादधीते ’ इति तृतीयान्ताद्वतिः । एवमिहापि पूर्ववद्द्रष्टव्यमिति । “ स्थानिवदादेशोऽनल्विधौ ” इत्यादिषु “ तेन तुल्यं क्रिया चेद्वतिः ” इति सूत्रेण वतिप्रत्ययः । तथा च अलाश्रयविधिभिन्ने विषये आदेशः स्थानिना तुल्यं भवति इत्येवंरूपेण बोधः । आदेशे स्थानिसादृश्यमर्थात् सिध्यति । आदेशे सादृश्यं च स्थानिकार्यप्राप्त्या, स्थानिगतव्यवदेशप्राप्त्या, स्थानिगतधर्मप्राप्त्या वा भवति ।

“ तत्र तस्येव ” इत्यस्य तु सप्तम्यन्तात् षष्ठ्यन्ताच्च इवार्थे वतिप्रत्ययः स्यादित्यर्थः । पूर्वसूत्रे ‘ तेन ’ इत्यत्र तृतीयया सर्वविभक्त्यर्थबोधनात् षष्ठीसप्तम्यर्थस्यापि ग्रहणं भवति । तथापि तत्र क्रियातौल्ये एव वतिप्रत्ययः ‘ पुत्रेण तुल्यः स्थूलः देवदत्तः ’, ‘ भ्रात्रा तुल्यो धनी देवदत्तः ’ इत्यादौ गुणद्रव्यतौल्ये तु न । अतः गुणद्रव्यतौल्येऽपि वतिप्रत्यये इदं सूत्रम् ।

‘ मथुरावत् स्रुघ्ने प्राकारः ’, ‘ बृहस्पतिवदस्मिन् पाण्डित्यम् ’, ‘ गृहवदरण्ये चरन्ति ’ इत्यादौ मथुरादिशब्देभ्यः लक्षणया मथुराप्राकाराद्यर्थबोधकेभ्यः उपमानवाचकेभ्यः सप्तम्यन्तेभ्यः इवार्थे वतिप्रत्ययः, उपमेयस्रुघ्नादिषु सप्तमीदर्शनात् । मथुरासम्बन्धिप्राकारसदृशः स्रुघ्नसम्बन्धिप्राकारः इत्यादिरीत्या बोधः ।

‘ चैत्रवद् मैत्रस्य गावः ’, ‘ मन्मथवदस्य सौन्दर्यम् ’ इत्यादौ षष्ठ्यन्तेभ्यः चैत्रादिभ्यः इवार्थे वतिः । चैत्रसम्बन्धिगोसदृशाः मैत्रसम्बन्धिगावः इत्यादिरूपेण बोधः । चैत्रस्य गवां मैत्रस्य गवां च बोधितं सादृश्यं समानगोमत्त्वेन चैत्रमैत्रयोः सादृश्यं सूचयति ।

एवं व्याकरणशास्त्रेऽपि “ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ”[350] इति सूत्रे उपमेयवाचके स्यसिच्सीयुट्तासिशब्दे सप्तमीदर्शनात् उपमानवाचकात् चिण्शब्दादपि सप्तम्यन्तादेव वतिः । व्याकरणशास्त्रस्य सामान्यतः यत्किञ्चित्कार्यविधायकत्वात् द्रव्यगुणक्रियाषु अन्यतमेन सादृश्ये विवक्षिते एव वतिविधानाच्च कार्यमित्यध्याह्रियते । एवञ्च स्यसिच्सीयुट्तासिषु चिण्वत्कार्यमिति सम्पूर्णं वाक्यम्, मथुरावत् स्रुघ्ने प्राकारः इतिवत् । यथा चिण् उपदेशे अजन्तानां भूप्रभृतीनां धातूनाम्, हन्, ग्रह्, दृश् धातूनाञ्च वृद्ध्यादिकार्याणि जनयन्ति, तथा स्य, सिच्, सीयुट्, तास् प्रत्यया अपि वृद्ध्यादिकार्याणि जनयन्ति इति प्रबोध्य चिणः स्यसिच्सीयुट्तासीनां च वृद्ध्याकार्यजनकत्वेन सादृश्यं बोधयति इदं सूत्रम् । अतः इदमतिदेशसूत्रम् । एवं “ सन्वल्लघुनि चङ्परेऽनग्लोपे ”[351], “ आद्यन्तवदेकस्मिन् ” इत्यादिष्वपि एषैव रीतिः ।

एवं “ लोटो लङ्वत् ”[352] इत्यादौ लोट इति उपमेये षष्ठीदर्शनाद् उपमानवाचकाद् लङ्शब्दादपि षष्ठ्यन्तादेव वतिप्रत्ययः । अत्रापि कार्यं भवतीत्यध्याहार्यम् । लोट्पदं तत्सम्बन्धिकार्यं लक्षणया बोधयति । तथा च “ लोटो लङ्वत् ” कार्यमिति पूर्णं वाक्यम्, मैत्रस्य चैत्रवद् गावः इतिवत् । लङ् यथा स्वस्थानिकेषु तस्, थस्, थ, मिप् प्रत्ययेषु ताम, तम्, त, अम् इत्यादेशान् लभते, तथा लोडपि इति प्रबोध्य लोटः तामाद्यादेशादिमत्त्वेन लङ्सादृश्यं बोध्यते अनेन सूत्रेण । अतः इदमतिदेशसूत्रम् । अत्र सप्तम्यन्ताद् वतिः न स्वीकर्तुं शक्यते । तथा सति लङ्स्थानिककार्याणामिव लङ्निमित्तक-कार्याणामप्यतिदेशापत्तौ ‘ भवताम्, भवतम्, भवत, भवानि ’ इत्यादौ अडागमोऽपि स्यात् । उपमानोपमेययोः समानविभक्तिकत्वमपि भज्येत । अतः षष्ठ्यन्तादेव वतिः । एवं ‘ इण्वदिक इति वक्तव्यम् ’ इत्यादिष्वपि एषैव रीतिः बोध्या ।

यत्र अतिदेशसूत्रे तृतीयान्ताद्वतिः निर्दिष्टा तत्र प्रायशः तत्स्थानिककार्याणि, तन्निमित्तककार्याणि च अतिदिश्यन्ते । यथा – ‘ किम् + भ्याम् ’ इत्यत्र “ किमः कः ”[353] इति सूत्रेण किम्शब्दस्य ‘ क ’

---

350 अष्टाध्यायी – (6-4-62)

351 अष्टाध्यायी – (7-4-93)

352 अष्टाध्यायी – (3-4-85)

353 अष्टाध्यायी – (7-2-103)

इत्यादेशे ‘ क + भ्याम् ’ इति स्थिते “ सुपि च ”[354] इति सूत्रेण कशब्दस्य दीर्घेण भाव्यम् । दीर्घश्च कशब्दस्य अङ्गत्वे एव सम्भवति । तच्च किम्शब्दात् स्थानिवद्भावेन कशब्दे आनीयते । ततश्च कशब्दस्य स्थाने दीर्घात्मककार्ये कर्तव्ये स्थानिवद्भावेन अङ्गत्वमायाताम् । ‘ राम + ङे ’ इत्यत्र ङेप्रत्ययस्य यादेशे ‘ राम + य ’ इति स्थिते रामशब्दस्य “ सुपि च ” इति सूत्रेण दीर्घेण भाव्यम् । तच्च यादेशस्य प्रत्ययत्वमपेक्षते । तच्च ङेप्रत्ययात् स्थानिनः आनेयम् । एवञ्च स्वनिमित्तके दीर्घात्मके कार्ये कर्तव्येऽपि यादेशस्य स्थानिवद्भावेन प्रत्ययत्वमायातम् । एवं तृतीयान्ताद्वतिर्यत्र तेन स्वस्थानिककार्ये वा स्वनिमित्तककार्ये वा कर्तव्येऽतिदेशो भवति । एवं “ पूर्ववत्सनः ”, “ आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ”[355] इत्यादौ स्वावधिककार्याण्यपि यत्र सप्तम्यन्ताद्वतिः तत्र प्रायशः स्वनिमित्तकमेव कार्यमतिदिश्यते । न तु स्वस्मात् परस्य कार्यम् । यथा – ‘ भू + इ स्य + ते ’ ‘ भाविष्यते ’ इत्यत्र स्यप्रत्ययस्य चिण्वद्भावेन तन्निमित्तकं वृद्ध्यात्मकं पूर्वस्य कार्यमेव, न तु चिणः परस्य तशब्दस्य लोपात्मकं “ चिणो लुक् ”[356] इति सूत्रविहितं कार्यम् । यत्र षष्ठ्यान्ताद्वतिः तत्र स्वस्य यदागमादेशादिरूपं कार्यं तदेवातिदिश्यते, न तु स्वनिमित्तकम् । यथा – “ लोटो लङ्वत् ” इत्यादि ।

• अधिकारसूत्रम्

विधिसूत्रैकवाक्यतया बोधजनकत्वमधिकारत्वम्, एकत्रोपात्तस्य अन्यत्र व्यापारः अधिकारः, यत् सूत्रं निश्चितावधिपर्यन्तमुत्तरसूत्रेषु गच्छति तदधिकारसूत्रनाम्नोच्यते । अधिक्रियते, विनियुज्यते सूत्रकारेण उत्तरसूत्रेषु इति अधिकारः, अधिक्रियते, उपरितनसूत्रजालशेषत्वेन पठ्यते इत्यधिकारः, अधिक्रियते, उत्तरोत्तरं सम्बध्यते इत्यधिकारः इत्येवमभियुक्तैः अधिकारशब्दव्याख्यातः । अधिकारश्च उत्तरत्र अनुवृत्तिरूपव्यापारः, अधिकारश्च उत्तरोत्तरसम्बन्धः इत्यपि व्याख्यातमभियुक्तैः । अधिकारः सम्पूर्णसूत्रस्य, सूत्रांशपदस्य, पदैकदेशस्य वा भवति । पाणिनिना सूत्राणां लघुत्वसम्पादनाय पूर्वसूत्राद् उत्तरसूत्रेषु पदानामनुवृत्तिराश्रिता । आकाङ्क्षावशात् जायमाना सैषा अनुवृत्तिः अधिकारशब्देन व्यवह्रियते । यथा – “ इको यणचि ”[357] इति सूत्रात् ‘ अचि ’ इति पदम् “ एचोऽयवायावः ”[358], “

---

[354] अष्टाध्यायी – (7-3-102)

[355] अष्टाध्यायी – (1-3-63)

[356] अष्टाध्यायी – (6-4-104)

[357] अष्टाध्यायी – (6-1-76)

[358] अष्टाध्यायी – (6-1-77)

आद्गुणः ”[359] इत्यादिसूत्रेषु अनुवर्तते । अत एव ‘ सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तते सर्वत्र ’ इत्युच्यते अभियुक्तैः ।

क्वचित् चशब्दबलादनुवृत्तिर्भवति । यथा – “ अभिनिविशश्च ”[360] इचि सूत्रे चशब्दबलात् “ अधिशीङ्स्थासां कर्म ”[361] इत्यतः कर्म इति पदमनुवर्तते । क्वचित् बहुषु सूत्रेषु निर्देशावश्यकतां वारयितुं तद्द्वारा शास्त्रस्य सूत्राणां च लाघवं सम्पादयितुं स्थानिसमर्पकम्, निमित्तसमर्पकम्, कार्यसमर्पकं वा सूत्रमधिकारसूत्रत्वेन क्रियते । यथा – “ एकः पूर्वपरयोः ”[362], “ अङ्गस्य ”[363], “ पदस्य ”[364] इत्यादीनि स्थानिसमर्पकानि, “ आर्धधातुके ”[365], “ धातोः ”[366] इत्यादीनि निमित्तसमर्पकानि, “ अपदान्तस्य मूर्धन्यः ”[367] इत्यादीनि कार्यसमर्पकानि च अधिकारसूत्राणि ।

अधिकारत्वञ्चानुषङ्गरूपाऽनुवृत्तिसूचकस्वरितत्वनामकदोषविशेषवद्वर्णयुक्तत्वम्। परन्त्वेवं लक्षणे “ इको यणचि ”[368] इत्यादिसूत्रघटकोऽचीत्यादिपदेऽतिव्याप्तिः, तद् वारणाय स्वदेशे शाब्दबोधाऽजनकत्वे सतीति लक्षणे वाच्यम् ।

लघुशब्देन्दुशेखरे नागेश आह – स्वरितेनेत्युपलक्षणे तृतीया स्वरितत्वज्ञाप्योऽधिकारो विनियोग इत्यर्थः। विनियोगश्च प्रायेणोत्तरत्रोपस्थितिः, क्वचित् पूर्वत्राऽपि, क्वचिच्च “ स्त्रीभ्यो ढक् ”[369] इत्यादौ विशेषाऽर्थः, क्वचित्तु ख्यत्यादित्यादौ अक्रमिकान्वय इत्यादिः ।

स्वरितत्वं चाऽनुनासिक्यवत् प्रतिज्ञासमधिगम्यमेव । अतो द्वितीयमिदमधिकारसूत्रलक्षणम् – शाब्दबोधाऽजनकत्वे सत्यष्टाऽध्यायीयोगेषु पाणिनिना परिगणितत्वम् । अत्रेदं बोध्यम् – यस्य पदस्य स्वल्पे एव सूत्रेऽनुवृत्तिरावश्यिका, तत्पदं विध्यादिसूत्रघटकतयैव पठितम् । यथा – यण्सूत्रघटक-

---

[359] अष्टाध्यायी – (6-1-86)
[360] अष्टाध्यायी – (1-4-47)
[361] अष्टाध्यायी – (1-4-46)
[362] अष्टाध्यायी – (6-1-83)
[363] अष्टाध्यायी – (6-4-1)
[364] अष्टाध्यायी – (8-1-16)
[365] अष्टाध्यायी – (2-4-35)
[366] अष्टाध्यायी – (3-1-91)
[367] अष्टाध्यायी – (8-3-55)
[368] अष्टाध्यायी – (6-1-76)
[369] अष्टाध्यायी – (4-1-120)

त्वेनाऽचीति। यस्य पुनः प्रभृतेषु सूत्रेषु अनुवृत्तिरूपयुक्ता, तस्य विधिशास्त्रात् पृथक् स्वतन्त्रतया पाठः, यथा – “ ङ्याप्प्रातिपदिकात् ”[370] इत्यादि।

वस्तुतस्तु स्वप्रदेशे लक्ष्यसंस्कारविषयकबोधकजनकत्वे सति उत्तरसूत्राऽनुवृत्त्या लक्ष्यसंस्कार-विषयकबोधजनकत्वमधिकारसूत्रत्वम्। यथा –

“ कारके ”[371],“ प्रत्ययः ”[372],“ परश्च ”[373],“ अङ्गस्य ”[374],“ भस्य ”[375] इत्यादि।

अधिकारसूत्राणामपि लाघवमेव प्रयोजनं दृश्यन्ते। तत्र कानिचिद् अधिकारसूत्राणि अत्यधिकेषु विधिसूत्रेषु गत्वा स्वेषां विश्वतोमुखत्वं स्पष्टीकुर्वन्ति। यद्यपि पाणिनीयाष्टके प्रकरणानुसारं सूत्राणां विभाजनं न संलक्ष्यते परमेकप्रकरणगतं सूत्राणां सङ्कलनं दृश्यते। तेषु सूत्रेषु तत्प्रकरणस्याभिज्ञानाय अधिकारसूत्रमेकं निर्दिष्टम्। यथा – कारकप्रकरणस्यानेकानि सूत्राणि अष्टाध्याय्याः प्रथमाध्यायस्य चतुर्थपादे निर्दिष्टानि सन्ति। एषु सूत्रेषु कारकपदबोधाय “ कारके ” इत्यधिकारसूत्रं प्रज्ञप्तम्। कारके इति विशेषणमपादानादिसञ्ज्ञाविषयमधिक्रियते। कारके इत्यधिकारो वेदितव्यः। यदित उर्ध्वमनुक्रमिष्यामः कारके इत्येवं वेदितव्यम्। कारकस्याधिकारः “ तत्प्रयोजको हेतुश्च ”[376] यावत् प्रवर्तते।

अधिकारशब्दो भावसाधनः कर्मसाधनो वा। अधिकरणमधिक्रियतेऽनेनेति वाऽधिकारः। अधिकारो नाम विनियोगः। विनियोगो लोकेऽधिकार उच्यते। प्रेरणे तद्विषयीभूतकार्यं वा लौकिकोऽधिकारः।

पूर्वसूत्रस्थपदस्य परसूत्रेषुय उपस्थितिः स एवाऽधिकारशब्देन वक्तुं शक्यते।

पतञ्जलिना अधिकारशब्देन प्रतियोगमुपस्थापनमुच्यते[377]। वार्त्तिककाराणामपि एष एव विचारः[378]। अधिकारसूत्राणां व्यापकतामङ्गीकृत्य महाभाष्यकारोऽधिकारस्य त्रैविध्यम् अङ्गीकुर्वन्नाचष्टे। यथा –

---

[370] अष्टाध्यायी – (4-1-1)

[371] अष्टाध्यायी – (1-4-23)

[372] अष्टाध्यायी – (3-1-1)

[373] अष्टाध्यायी – (3-1-2)

[374] अष्टाध्यायी – (6-4-1)

[375] अष्टाध्यायी – (6-4-129)

[376] अष्टाध्यायी – (1-4-55)

[377] अधिकारः क्रियते प्रतियोगं तस्यानिर्देशार्थ इति। किमिदं प्रतियोगमिति। योगं योगं प्रति प्रतियोगम्। योगे योगे तस्य ग्रहणं मा कार्षमिति। (म. भा. प. आ.)

[378] अधिकारः प्रतियोगं तस्यानिर्देशार्थः। (म. भा. वा. 1-3-11)

1. एकः प्रदीपो गृहमध्ये स्थापितः सन् सर्वं गृहं स्वकीयाऽलोकेनाऽभिज्वलयति तद्वत् किञ्चित् सूत्रं शास्त्रे एकत्र विद्यमानं सत् सर्वं शास्त्रमभिव्याप्नोति । यथा – " षष्ठी स्थाने योगा "[379] इति । अयमधिकारः परिभाषारूपो विज्ञेयः, अनियमे नियमविधानरूपत्वात् ।

2. रज्वादिबद्धं काष्ठमनुकृष्यते नीयते तद्वत् चकारेणाऽनुकृष्यते । यथा – " अभिनिविशश्च "[380] इत्यत्र चकारेण " आधारोऽधिकरणम् "[381] इति सूत्रस्थमाधारपदमाकृष्यते ।

3. प्रतिसूत्रमनिर्दिष्टोऽपि वा चकाराद् विनापि प्रतिसूत्रमुपतिष्ठते[382] । यथा – " पूर्वत्रासिद्धम् "[383], " अङ्गस्य "[384] इत्यादौ ।

" पूर्वत्रासिद्धम् " इति सूत्रमष्टमाऽध्याये द्वितीयपादस्येदमादिमाऽधिकारसूत्रम्। इतः प्राक्तनं कृत्स्नं सूत्रजालं सपादसप्ताध्यायीति व्यवह्रियते । उपरितनं कृत्स्नं सूत्रजालं त्रिपादीति व्यवह्रियत इति स्थितः । तत्र यदीदं सूत्रं स्वतन्त्रविधिः स्यात्, तदा इतः पूर्वस्मिन् शास्त्रे प्रवर्तमाने उपरितनं शास्त्रमसिद्धं स्यादित्यर्थो लभ्येत । ततश्च सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धेति पर्यवस्येत् ।एवं सति त्रिपाद्यामपि पूर्वं शास्त्रं प्रति परं शास्त्रमसिद्धमित्यर्थो न लक्ष्यते । तथा सति किमु+उक्तम्, किम्वुक्तमित्यत्र " मोऽनुस्वारः "[385] इतिशास्त्रं त्रैपादिकं प्रति " मय उञो वो वा "[386] इति वत्वशास्त्रं त्रैपादिकं नाऽसिद्धं स्यादित्यत आह – भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याम्, अधिकारोऽयम् । तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा । त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात् इति ।

इदं सूत्रमुपरितनसूत्रेष्वनुवृत्त्यर्थमेव, न तु स्वतन्त्रविधिरिति । " मय उञो वो वा " इति सूत्रे पूर्वत्राऽसिद्धमित्यनुवर्तते । ततश्च मयः परस्य उञो वो वा स्यात् । इदं शास्त्रं पूर्वत्रासिद्धमिति तदेकवाक्यं सम्पद्यते । तत्र च अनुवृत्तिपूर्वशब्देन इतः प्राक्तनं त्रिपादीस्थं सपादसप्ताध्यायीस्थं च सूत्रजालं विवक्षितमिति " मोऽनुस्वारः " इति त्रैपादिकं शास्त्रं प्रति " मय उञो वो वा " इति शास्त्रस्याऽसिद्धत्वं निर्बाधम् । अतः सूत्रमिदमधिकारसूत्रमिति बालमनोरमाकारस्याऽभिप्रायः ।

---

[379] अष्टाध्यायी – (1-1-49)

[380] अष्टाध्यायी – (1-4-47)

[381] अष्टाध्यायी – (1-4-45)

[382] पाणिनिसूत्रार्थतत्त्वालोकः पृ. (105) डॉ.शिवकान्त झा

[383] अष्टाध्यायी – (8-2-1)

[384] अष्टाध्यायी – (6-4-1)

[385] अष्टाध्यायी – (8-3-23)

[386] अष्टाध्यायी – (8-3-33)

काशिकावृत्तौ – पदमञ्जरीकारेण हरदत्तमिश्रेण संज्ञादिभेदैः षोढा अधिकारः परिभाषितो यथा – अधिकारोऽनेकप्रकारः[387] । ‘ संज्ञा ’, ‘ विशेषणम् ’, ‘ स्थानी ’, ‘ प्रकृतिः ’, ‘ निमित्तम् ’, ‘ आदेश ’ इति । क्रमेणोदाहरणानि इत्थं प्रतिपादितानि –

1. “ प्रत्ययः”[388] इति सूत्रेण प्रत्ययशब्दः संज्ञात्वेनाऽधिक्रियते, तेन तृतीयाऽध्यायमारभ्य पञ्चमाऽध्यायपर्यन्तं विहितानां सन्नादीनां “ प्रत्ययः ”[389] इति संज्ञा सञ्जायते । अत्र ‘ न्यासकारादिभिः अत्र प्रत्ययशब्दस्य संज्ञात्वरूपेणैवाऽङ्गीकारे लाघवं प्रदर्शितम्’ इति ।

2. शेषाऽधिकारे पठिताः ‘ घ, ख ’ आदयः प्रत्ययाश्चतुरर्थपर्यन्तानामपत्यादिप्रत्ययानां शिष्टत्वाद् विशेषणरूपाः, तेन “ शेषे ”[390] इति विशेषणाऽधिकारः ।

3. “ आद्गुणः ”[391] – इत्यादिकं पूर्वपरवर्णयोः स्थाने गुणदीर्घाद्येकवर्णरूपादेशस्य विधानाद् “ एकः पूर्वपरयोः ”[392] इति स्थान्यधिकारः । उक्तञ्च पदमञ्जर्याम् – ‘ अथ पूर्वपरयोरिति किमर्थं स्थानि-निर्देशार्थम् । असति हि तस्मिन् “ आद्गुणः ” इत्यादौ स्थानिनिर्देशाऽभावात् कस्य गुणादिरादेशः स्यात् ’[393] इति ।

4. स्वादिकप्पर्यन्तं प्रत्यया ङ्यन्ताबन्तप्रातिपदिकरूपप्रकृतिभ्यो विधीयन्ते इति “ ङ्याप्प्रातिपदिकात् ”[394] इति प्रकृत्यधिकारः ।

5. धातुरूपनिमित्तमाश्रित्य तव्यदादयः प्रत्यया जायन्ते, तेन “ धातोः ”[395] इति निमित्ताऽधिकारः ।

6. “ अपदान्तस्य मूर्धन्यः ”[396] इत्यधिकारे पठितैः “ सहेः साडः सः ”[397] प्रभृतिभिः सूत्रैः सकारादेः स्थाने मूर्धन्यादेशो जायते, तेन “ अपदान्तस्य मूर्धन्यः ” इत्यादेशाऽधिकारो बोध्यः ।

---

387 काशिका – पदमञ्जरी – (1-4-23)
388 अष्टाध्यायी – (3-1-1)
389 काशिका – न्यासः – (4-1-23)
390 अष्टाध्यायी – (4-2-92)
391 अष्टाध्यायी – (6-1-86)
392 अष्टाध्यायी – (6-1-83)
393 काशिका – पदमञ्जरी – (6-1-87)
394 अष्टाध्यायी – (4-1-1)
395 अष्टाध्यायी – (3-1-91)
396 अष्टाध्यायी – (8-3-55)
397 अष्टाध्यायी – (8-3-56)

- **प्रतिषेधसूत्रम्**

प्रतिषेधसूत्राणामभावरूपाऽपूर्वबोधकत्वेन विधिसूत्रेष्वन्तर्भावः । यथा – " नादिन्याक्रोशे पुत्रस्य "[398] इति । तस्य पुत्रादिनी त्वमसि पापे इत्यत्र पुत्रशब्दे तकारस्य स्थाने प्राप्तस्य " अनचि च "[399] इति द्वित्वस्याभावबोधकत्वम् ।

कानिचित् सूत्राणि वर्तन्ते ये द्विधार्थे प्रयुञ्जन्ते । यथा – " शेषे "[400] इति सूत्रं विधिसूत्रमपि अधिकारसूत्रमपि । एवं च सूत्रमिदं यदि केवलं विधिरूपमेव स्यान्न च स्यादधिकारसूत्रं तर्हि उत्तरसूत्रेषु अनुवृत्त्यभावाच्छेषत्वमेव तेषां न स्यात् । उक्तादन्यः शेष इत्युक्तेरपत्यादि चतुरर्थीपर्यन्तार्थाऽतिरिक्तत्वे सति " तस्य विकारः "[401] इत्यतः प्राग्विहिताः प्रत्ययाः शेषाऽर्थाः । अतः सिद्धान्तकौमुद्याम्[402] " शेषे " इतिसूत्रे लक्षणं चाऽधिकारश्चेत्यत्रस्य लक्षणशब्देन विधिशास्त्रस्य ग्रहणम् । एवं च " शेषे " इतिसूत्रं विधिसूत्रमपि वर्ततेऽधिकारसूत्रमपि वर्तते ।

(झ) अष्टाध्यायीभाष्यकृतो ब्रह्मदत्तजिज्ञासोःसंक्षेपपरिचयः

अस्या अष्टाध्यायीभाष्यप्रथमावृत्तेः रचयिता ब्रह्मदत्तजिज्ञासुः 1882 – ई.वर्षे 14 अक्तूबरदिनाङ्के पंजाबप्रदेशस्थे जालन्धरजनपदस्य मल्लूपोता नाम ग्रामं स्वजन्मनालङ्चकार । अस्य पितरः श्रीमन्तो रामदाससारस्वतपाठका मातरश्च श्रीमत्यः परमेश्वरीदेव्य आसन् । बाल्यावस्थायामेवास्य पितरौ दिवङ्गतावास्ताम् । तत आर्यसज्जनानां सहायतया दशमकक्षापर्यन्तं सोऽधीतवान् । ततो विंशवर्षादेव संसारासारतां विविच्य गृहस्थाश्रमं विहाय साधुजीवनपद्धतिं गृहीतवान् । स्वसारस्वतसाधनोत्सुको विश्वनाथनगर्य्यां विद्याराजधान्यां काश्यां स्वामिपूर्णानन्दगुरुभ्योऽधीत्य वेदाङ्गोपाङ्गाचार्यपर्यन्तां परीक्षां समपादयत् । अनेन संस्कृतभाषायां द्वौ ग्रन्थौ रचितौ एकस्तु यजुर्वेदभाष्यविवरणमपरो द्विभागपर्यन्तमष्टाध्यायीभाष्यप्रथमावृत्तिरिति । तत्राष्टाध्यायीभाष्यप्रथमावृत्तिः अत्रानुसन्धानविषयत्वेन समाश्रिता ।' वेद और निरुक्त ',' देवापि-शन्तनु ',' निरुक्तकार और वेद में इतिहास ' इति एतन्नामका हिन्दीभाषायां त्रयः ग्रन्थाः विरचिताः । संस्कृतविद्यानां समुन्नयने

---

[398] अष्टाध्यायी – (8-4-48)
[399] अष्टाध्यायी – (8-4-47)
[400] अष्टाध्यायी – (4-2-92)
[401] अष्टाध्यायी – (4-3-134)
[402] सिद्धान्तकौमुदी – (पृ. – 385)

श्लाघ्यश्रमोऽयं ब्रह्मदत्तजिज्ञासुः महामहिमभारतराष्ट्रपतिमहोदयैः ससम्मानमभ्यर्चितः। ब्रह्मदत्तजिज्ञासुः 1964 – ई.वर्षे 23 दिसम्बरदिनाङ्के दिवङ्गत आसीत्।

(ञ) पाणिनीयातिरिक्तानां प्रमुखव्याकरणानां परिचयसङ्केतः

अपौरुषेयाऽऽर्षग्रन्थेषु समुपलब्धसन्दर्भानुसारेण संस्कृतव्याकरणस्य तावदादिवक्ता ब्रह्माऽसीत्। ‘ ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः ’[403]। अर्थात् सर्वासां विद्यानाम् आदिमः प्रवक्ता ब्रह्मैव। प्रवचनमिदं तन्त्रशास्त्रशासननामभिः प्रवृत्तं किल पृथिव्याम्।

ब्रह्मणोऽनन्तरं देवगुरोः बृहस्पतेः नाम श्रूयते। अयमेव वाक्पतिः वाचस्पतिश्च बृहस्पतिः सामगानस्य, वेदाङ्गानाम्, इतिहासपुराणानाम्, ज्योतिशास्त्रस्य, अर्थशास्त्रादीनाञ्च प्रवक्ता आसीत्। अयमेव बृहस्पतिरिन्द्राय प्रतिपदोक्तानां शब्दानामुपदेशं चकार। तद्यथा - ‘ बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच ’[404]। इन्द्रश्च तस्य काठिन्यमनुमीय प्रकृतिप्रत्यय-विभागानुसारं सरलीचकार शास्त्रमिदम्। तद्यथा – ‘ वाग्वै पराच्यव्याकृतोऽवदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् ’।[405] तेन स्वयंभुवा हिरण्यगर्भेण समुपदिष्टो बृहस्पतिः प्रवक्ताऽभूत्। तेन च वाचस्पतिना प्रदिक्षितः, प्रशिक्षितश्च कश्यपप्रजापतितनुजेन्द्रः प्रकृतिप्रत्ययादिविभागैर्व्याकरणस्यादिसंस्कर्ता बभूव। तेनैवेन्द्रेण संस्कृतेन व्याकरणेन प्रतिपदं प्रकृतिप्रत्ययविभागकल्पनामूलकशब्दोपदेशप्रक्रियादिकं समभिहितम्। ऋग्तन्त्राऽनुसारं भरद्वाजोऽपि व्याकरणशास्त्रस्य आचार्य आसीत्। अयं हि अङ्गिरसबृहस्पतेस्तनयः। काशिकावृत्तौ तु भरद्वाजसुतानां संख्या एकविंशतिः परिमिता निर्दिष्टा। यथा – “ एकविंशतिः भारद्वाजम् ”। भरद्वाजो व्याकरणशास्त्रस्य आयुर्वेदस्य च ज्ञानमिन्द्रादधिजगे। एवंरीत्या व्याकरणेषु प्रतनतमत्वं निश्चेतुं शक्यते। इतराणि व्याकरणानि तस्मादर्वाक्तनानि निर्णीयन्ते।

- **सकलानि संस्कृतव्याकरणानि त्रिधा विभज्यन्ते**

1. केवलानि छान्दस (वैदिक) व्याकरणानि प्रातिशाख्यादीनि।

2. केवलानि लौकिकसंस्कृतव्याकरणानि कातन्त्रादीनि।

---

[403] ऋक्तन्त्रम् – (1/4)

[404] महाभाष्यम् – (1/1/1)

[405] तैत्तिरीय संहिता – (6/4/7)

3. संस्कृतछान्दसलौकिकोभयविधानि आपिशलीयपाणिनीयादीनि च।

- **तत्र व्याकरणप्रणेतारो द्विविधाः समवगम्यन्ते**

  1. पाणिनिपूर्ववर्तिनः, भरद्वाजाऽपिशलिप्रभृतयः।

  2. पाणिनिपरवर्तिनः, क्षपणकवामनभोजनरेन्द्रादयश्च।

- **पाणिनिप्राक्तना व्याकरणकृतो द्विविधाः परिज्ञायन्ते**

  1. पाणिन्यनुल्लिखिता इन्द्रभरद्वाजरौढिव्याडिप्रभृतयः।

  2. पाणिन्युल्लिखिता आपिशलिगालवसेनकादयश्च।

1. इन्द्रः – अयं विक्रमपूर्वीयेभ्यः 8500 वर्षेभ्यः पूर्वकालिक आसीत्। अनेन प्रणीतं ऐन्द्रव्याकरणं जैनशाकटायनव्याकरणे समुल्लिखितमस्ति।

2. वायुः – अयमपि विक्रमपूर्वीयेभ्यः 8500 अब्देभ्यः पूर्वकालिक आसीत्। एतेन विरचितं वायुव्याकरणं कवीन्द्राचार्यस्य ग्रन्थसूच्यामुल्लिखितं वर्तते।

3. भरद्वाजः – अयं विक्रमपूर्वीयेभ्यः 8300 संवत्सरेभ्यः पूर्वसामयिक आसीत्। भरद्वाज-व्याकरणस्य ऋक्तन्त्रे सन्दर्भः समुपलभ्यते।

4. भागुरिः – अयं विक्रमपूर्वीयेभ्यः 3100 वर्षेभ्यः प्राक्कालिक आसीत्। भागुरिव्याकरणस्य शब्दशक्तिप्रकाशिकायामुल्लेखः समुपलभ्यते।

5. पौष्करसादिः – अयं विक्रमपूर्वीयेभ्यः 3100 अब्देभ्यः प्राक्तन आसीत्। एतत्प्रणीतस्य पौष्करसादिव्याकरणस्य तैत्तिरीये प्रातिशाख्ये, मैत्रायणीये प्रातिशाख्ये च सान्दर्भिकोल्लेखः समुपलभ्यते।

6. चारायणः – अयमपि विक्रमपूर्वीयेभ्यः 3100 वर्षेभ्यः पूर्वसामयिक आसीत्। अस्य चारायणव्याकरणस्य पतञ्जलिविरचिते व्याकरणमहाभाष्ये सन्दर्भस्तावदुपलभ्यते।

7. काशकृत्स्नः – असौ विक्रमपूर्वीयेभ्यः 3100 संवत्सरेभ्यः प्राक्तन आसीत्। अस्य अध्यायत्रयसंवलितस्य काशकृत्स्नव्याकरणस्योक्तव्याकरणमहाभाष्ये सान्दर्भिकोल्लेख उपलभ्यते।

8. वैयाघ्रपद्यः – अयं विक्रमपूर्वीयेभ्यः 3100 वर्षेभ्यः पूर्वकालिक आसीत्। अस्य दशाध्यायैस्संवलितस्य वैयाघ्रपद्यव्याकरणस्य जयादित्यवामनाभ्यां प्रणीतायां पाणिनीयाष्टाध्यायी-पाठस्य काशिकावृत्त्यां समुल्लेख उपलभ्यते।

9. माध्यन्दिनिः – असौ विक्रमपूर्वीयेभ्यः 3000 अब्देभ्यः प्राक्तन आसीत्। अस्य माध्यन्दिनि-व्याकरणस्योल्लेखः प्रागुक्तायां काशिकावृत्त्यां समुपलभ्यते।

10. रौढिः - असावपि विक्रमपूर्वीयेभ्यः 3000 वर्षेभ्यः पूर्वसामयिक आसीत् । रौढि-व्याकरणस्यापि सान्दर्भिकोल्लेखः काशिकावृत्तौ समुपलभ्यते।

11. शौनकिः – अयं च तावद् विक्रमपूर्वीयेभ्यः 3000 वर्षेभ्यः प्राक्तन आसीत्। अस्य शौनकि-व्याकरणस्योल्लेखो जेज्जटप्रणीतायां चरकसंहितायाः टीकायामुपलभ्यते।

12. गौतमः – अयमपि विक्रमपूर्वीयेभ्यः 3000 अब्देभ्यः पूर्वकालिक आसीत् । गौतम-व्याकरणस्योल्लेखो व्याकरणमहाभाष्य उपलभ्यते।

13. व्याडिः - असौ विक्रमपूर्वीयेभ्यः 2850 संवत्सरेभ्यः पूर्वकालिक आसीत्। अस्य व्याकरणं ऋक्प्रातिशाख्ये समुल्लिखितं वरीवर्ति।

एतदतिरिक्ताः पाणिन्यनुल्लिखिताः, अपितु वैदिकप्रातिशाख्येषु समुदाहृता वैयाकरणाः , द्विचत्वारिंशत्संख्याका निम्नोट्टङ्किताः परिज्ञायन्ते।

अग्निवेश्यः, अग्निवेश्यायनः, अन्यतरेय, आगस्त्यः, आत्रेयः, उख्यः, उत्तमोत्तरीयः, औदव्रजिः, औपशविः, काण्डमायनः, कात्यायनः, काण्वः, कौण्डिन्यः, कौहलिपुत्रः, जातूकर्ण्यः, दाल्भ्यः, नैगी, पञ्चालः, प्राच्यपञ्चालः, प्लाक्षायणः, प्लाक्षिः, बाभ्रव्यः, माक्षव्यः, माचाकीयः, माण्डुकेयः, मीमांसकः, यास्कः, वाडवीकरः, वात्सप्रः, वाल्मीकिः, वेदमित्रः, शाकलः, शाकल्यपिता, शाङ्कमित्रिः, शाङ्खायनः, शूरवीरः, शूरवीरसुतः, शैत्यायनः, स्थविरकौण्डिन्यः, स्थविरशाकल्यः, साङ्कृत्यः, हारीतश्च।

पाणिनिनोल्लिखिता व्याकरणप्रणेतारो निम्नोट्टङ्किता आसन्। ते चेमे –

1. आपिशलिः – अयं विक्रमपूर्वीय 2900 वर्षपूर्वकालिक आसीत्। अस्योल्लेखः पाणिनिना स्वीये सूत्रपाठे (वा सुप्यापिशलेः – 6-1-91) कृतोऽस्ति । अनेन प्रणीताः ग्रन्थाः – आपिशलिव्याकरणम्, धातुपाठः, गणपाठः, उणादिसूत्रम्, शिक्षा, कोशः, अक्षरतन्त्रम्, सामप्रातिशाख्यञ्च।

2. काश्यपः – असौ विक्रमपूर्वीय 2900 अब्दपूर्वकालिक आसीत्। अस्योल्लेखः पाणिनिना स्वकीये सूत्रपाठे (तृषिमृषिकृषेः काश्यपस्य -1-2-25) कृतो वर्तते। अस्य ग्रन्थः काश्यपव्याकरणं परिज्ञायते।

3. गार्ग्यः - अयं विक्रमपूर्वीय 3100 वर्षपूर्वसामयिक आसीत् । अस्योल्लेखः पाणिनिना सूत्रपाठे (ओतो गार्ग्यस्य – 8-3-20) कृत उपलभ्यते। एतत्प्रणीतं गार्ग्यव्याकरणं श्रूयते।

4. गालवः - अयं विक्रमपूर्वीय 3100 अब्दपूर्वकालिक आसीत् । अस्योल्लेखः पाणिनिना सूत्रपाठे (इको ह्रस्वोऽङ्यो गालवस्य – 6-3-61) कृतो वर्तते । एतत्प्रणीतं गालवव्याकरणमस्तीति परिश्रूयते।

5. चाक्रवर्मणः - असौ विक्रमपूर्वीय 3100 वर्षपूर्वसामयिक आसीत्। अस्योल्लेखः पाणिनिना स्वीये सूत्रपाठे (ईचाक्रवर्मणस्य – 6-1-128) कृत अवगम्यते। अमुना विरचितं चाक्रवर्मणव्याकरणं वरीवर्ति।

6. भारद्वाजः – एष विक्रमपूर्वीय 2800 वर्षपूर्वकालिक आसीत्। अस्योल्लेखो हि पाणिनिना सूत्रपाठे (कृकणपर्णाद्भारद्वाजे – 4-2-145) कृतो विद्यते। एतेन प्रणीतं भारद्वाजव्याकरणमस्ति।

7. शाकटायनः - असौ विक्रमपूर्वीय 3000 वर्षपूर्वकालिक आसीत् । अस्योल्लेखस्तावत् पाणिनिना सूत्रपाठे (लङः शाकटायनस्यैव – 3-4-111) विहित उपलभ्यते। एतेन विरचिता ग्रन्थाः शाकटायनव्याकरणम्, दैवतग्रन्थः, कोशः, ऋक्तन्त्रं, लघुऋक्तन्त्रं, सामतन्त्रं, पञ्चपादी-उणादिसूत्रं, श्राद्धकल्पश्चेत्यादयः सन्ति।

8. शाकल्यः - अयं विक्रमपूर्वीय 4000 वर्षपूर्वसामयिक आसीत्। अस्योल्लेखः पाणिनिना सूत्रपाठे (सम्बुद्धौ शाकल्यस्येतावनार्षे –1-1-16) कृत अभ्युपगम्यते । अनेन विरचितं शाकल्य-व्याकरणं वरीवर्ति।

9. सेनकः - असौ विक्रमपूर्वीय 2900 अब्देभेयः प्राक्कालिक आसीत् । अस्योल्लेखः पाणिनिना सूत्रपाठे (गिरेश्च सेनकस्य – 5-4-112) कृतः समुपलभ्यते। एतेन प्रणीतं सेनकव्याकरणं श्रूयते।

10. स्फोटयनः - एष विक्रमपूर्वीय 2900 संवत्सरेभ्यः पूर्वसामयिक आसीत्। अस्योल्लेखः पाणिनिना स्वीये सूत्रपाठे (अवङ् स्फोटयनस्य – 6-1-121) विहितः समुपलभ्यते । अनेन प्रणीतं स्फोटायनव्याकरणं श्रूयते। अयमेव स्फोटवादोद्भावक आसीत्।

- **पाणिनीयव्याकरणादर्वाक्तनानि व्याकरणानि** –
  - कातन्त्र (कलाप, कौमार) व्याकरणम्

अस्य समुद्भावकः कातन्त्रो विक्रमपूर्वीय 1500 वर्षपूर्वकालिक आसीत्।

2. चान्द्रव्याकरणम्

अस्योद्भावकः चन्द्रगोमी विक्रमपूर्वीय 1000 वर्षपूर्वकालिक आसीत्।

3. क्षपणकव्याकरणम्

अस्य प्रणेता क्षपणकः (सिद्धसेनदिवाकरः) वैक्रमप्रथमशतक आसीत्।

4. जैनेन्द्रव्याकरणम्

अस्य समुद्भावकः पूज्यपाददेवनन्दी वैक्रमषष्ठशतके बभूव।

5. विश्रान्तविद्याधरव्याकरणम्

अस्य विरचयिता वामनो वैक्रमषष्ठशतके समभूत्।

6. जैनशाकटायनव्याकरणम्

अस्य प्रणेता पाल्यकीर्तिः (शाकटायनः) वैक्रमाष्टमशतके समभूत्।

7. शिवस्वामिव्याकरणम्

अस्योद्भावको बौद्धशिवस्वामी वैक्रमदशमशतक आसीत्।

8. सरस्वतीकण्ठाभरणव्याकरणम्

अस्य प्रणेता भोजदेवः (भोजराजः) वैक्रमैकादशशतक अभूत्।

9. बुद्धिसागरव्याकरणम्

अस्य कर्ता जैनाचार्यो बुद्धिसागरो वैक्रमैकादशशतक आसीत्।

10. दीपकव्याकरणम्

अस्य प्रणेता भद्रेश्वरो जैनाचार्यो वैक्रमद्वादशशतके समभूत्।

11. सिद्धहैमशब्दानुशासनव्याकरणम्

अस्योद्भावको हेमचन्द्रो जैनाचार्यो वैक्रमद्वादशशतक आसीत्।

12. संक्षिप्तसारव्याकरणम्

अस्य प्रणेता क्रमदीश्वरो वैक्रमत्रयोदशशतके समभूत्।

13. सारस्वतव्याकरणम्

अस्योद्भावको नरेन्द्राचार्यो वैक्रमत्रयोदशशतक आसीत्।

14. मुग्धबोधव्याकरणम्

अस्य प्रणेता बोपदेवो वैक्रमचतुर्दशशतके समभूत्।

15. सुपद्मव्याकरणम्

अस्य समुद्भावकः पद्मनाभदत्तो वैक्रमचतुर्दशशतक आसीत्।

- **एतदतिरिक्तानि कतिपयव्याकरणानि** –

अकलङ्कव्याकरणम् – भट्ट अकलङ्कः, द्रुतबोधव्याकरणम् – भरतसेनः, आशुबोधव्याकरणम् – रामकिंकरः, शुद्धाऽशुबोधव्याकरणम् – रामेश्वरः, शीघ्रबोधव्याकरणम् – शिवप्रसादः, ज्ञानामृतव्याकरणम् – काशीश्वरः, हरिनामामृतव्याकरणम् – रूपगोस्वामी, हरिनामामृतव्याकरणम् – जीवगोस्वामी, चैतन्यामृतव्याकरणम् – अज्ञातनामा, प्रबोधप्रकाशव्याकरणम् – बलरामपञ्चाननः, प्रबोधचन्द्रिकाव्याकरणम् – विज्जलभूपतिः, भोजव्याकरणम् – विनयसुन्दरः, प्रक्रियाव्याकरणम् – विनायकः, दीपव्याकरणम् – चिद्रपाश्रमः, रूपावतारव्याकरणम् – बौद्धधर्मकीर्तिः, बालबोधव्याकरणम् – नरहरिः, कारिकाव्याकरणम् – नारायणसुरनन्दः, क्रन्दार्कव्याकरणम् – क्रन्दार्कः, मालवव्याकरणम् – मालवः, गौरीव्याकरणम् – सदाशिवदीक्षितः, कामधेनुव्याकरणम् – अज्ञातनामा, प्रयोगरत्नमालाव्याकरणम् – पुरुषोत्तमवागीश इत्यादीनि।

इत्थमस्मिन्नध्याये

(क) पाणिनीयव्याकरणस्य प्रधानवेदाङ्गत्वम्।

(ख) व्याकरणाध्ययनस्य प्रयोजनम्।

(ग) अष्टाध्यायीग्रन्थस्य परिचयः।

(घ) पाणिनेः परिचयः।

(ङ) वार्त्तिककारस्य संक्षेपपरिचयः।

(च) महर्षिपतञ्जलेः परिचयः।

(छ) यथोत्तरं मुनीनां प्रामाण्यम्।

(ज) सूत्रभेदाः।

(झ) अष्टाध्यायीभाष्यकृतो ब्रह्मदत्तजिज्ञासोः परिचयः।

(ञ) पाणिनीयातिरिक्तानां प्रमुखव्याकरणानां परिचयसङ्केतः।

इत्येवं एकादश विचाराः प्राधान्येन विहिताः।

॥ इति प्रथमोऽध्यायः ॥

॥ अथ द्वितीयोऽध्यायः ॥

(क) अथ शब्दानुशासनम्

' अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ' इति भाष्यम् ।

पाणिनिना ' ब्राह्मणेन निष्कारणः ' इत्यादिश्रुतेः सन्ध्योपासनादाविव उत्तमाऽधिकारिप्रवृत्ति-सम्भवात् प्रयोजनं नोक्तम् । वार्त्तिककृतापि ' शास्त्रपूर्वके प्रयोगे धर्मः ' इत्यनेन मध्यमाऽधिकारिणः परमप्रयोजनं दर्शितम् । पतञ्जलिस्तु विवरणकारत्वाद् मन्दाऽधिकारिणां प्रवृत्त्यर्थं साक्षात्प्रयोजनं शब्दव्युत्पत्तिलक्षणं वदतीत्याह ' अथ ' इत्यादि । तत्र शब्दज्ञानं प्रयोजनं, शब्दो विषयः, तज्जिज्ञासुरधिकारी, प्रतिपाद्यप्रतिपादकभावः सम्बन्ध इति चतुष्टयानुबन्धमर्थादेव लब्धम् ।

तत्र तावद् " वृद्धिरादैच् "[406] इति सूत्रे यथा ' वृद्धिः ' पदेन पाणिनिना, ' सिद्धे शब्दार्थसम्बन्धे ' इति वार्त्तिके ' सिद्धः ' पदेन कात्यायनेन मङ्गलाचरणं विहितम्, तथैव पतञ्जलिना महाभाष्यादौ ' अथ ' इत्यनेन मङ्गलं क्रियते । अथशब्दस्य मङ्गलत्वन्तु –

ऊँकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥ इति ।

स्मृत्या ' मङ्गलाऽनन्तरारम्भप्रश्नकार्त्स्न्येष्वथो ' अथ इति कोशाच्च सिद्ध्यति । न च स्वयं भाष्यकृता ' अथेत्ययंशब्दोऽधिकारार्थः ' इत्युक्तत्वात् सकृदुच्चारितन्यायाद् न तस्य माङ्गलिकत्वम् इत्याशङ्क्यम्, अथशब्दस्य अन्यार्थं नीयमानदध्यादिवत् स्वरूपेणैव मङ्गलफलकत्वात् । तदुक्तं शङ्कराचार्यैः ' अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति ' इति ।

शब्दानुशासनमिति । इदं च व्याकरणशास्त्रस्यान्वर्थं नाम । अनुपूर्वकः शासिर्विविच्य ज्ञापने दृश्यते । तथा च अनुशिष्यन्ते विविच्य असाधुभ्यो विभज्य बोध्यन्ते येनेति करणे ल्युडन्ततया शास्त्रपदेन

[406] अष्टाध्यायी – (1-1-1)

सामानाधिकरण्यम् । ततश्शब्दानामिति कर्मणि षष्ठी, तदन्तेन समासः । न च " कर्मणि च "[407] इति सूत्रेण समासनिषेधः शङ्क्यः, तत्र ' च ' शब्दस्य इतिशब्दार्थकतया कर्मणीतिशब्दवता " उभयप्राप्तौ कर्मणि "[408] इति सूत्रेण या षष्ठी, तदन्तं न समस्यते इत्यर्थात् । इयं षष्ठी तु " कर्तृकर्मणोः कृति "[409] इति विहिता, न तु ' उभयप्राप्तौ ' इति आचार्यस्य कर्त्तुर्वस्तुतः सत्वेऽपि इहाऽनुपादानात् । ' प्रत्यासत्ति ' न्यायेन यस्य कृत्प्रत्ययस्यापेक्षया षष्ठी यदि तदपेक्षयैव तृतीया स्यात्, अत्र तु प्रकाश्यत इत्यस्यापेक्षया तृतीया, अनुशासनेत्यपेक्षया च षष्ठीति न समासनिषेधः । ' चित्रं गवां दोहोऽगोपेन ' इत्यत्र हि आश्चर्यं प्रतिपाद्यम्, तच्च यद्यशिक्षितो दोग्धा दुर्दोहा गावश्च दोग्धव्यस्तदेव निर्वहति, न त्वन्यथा । अतः कर्त्तृकर्मणोः विशिष्योपादानादस्त्युभयप्राप्तिः । इह तु शब्दानामिदमनुशासनं न त्वर्थानामिति अर्थनिवृत्तिपरं वाक्यं न तु कर्त्तृविशेषनिवृत्तिपरमतो नास्त्युभयप्राप्तिः । अस्तु वा यथाकथञ्चिदुभयप्राप्तिः, तथापि न क्षतिः, " उभयप्राप्तौ कर्मणि " इति सूत्रे अविशेषेण विभाषेति पक्षस्यापि सत्त्वाद् नियमाऽप्रवृत्तिपक्षे आचार्यस्य शब्दानुशासनमिति प्रयोगसम्भवात् । शेषलक्षणा षष्ठी वाऽस्तु । इयमाशङ्का भाष्यव्याख्यात्रा कैयटेनेत्थं परिहृता[410]– अत्र चाचार्यस्य कर्तुः प्रयोजनाभावात् उभयप्राप्त्यभावाद् न " उभयप्राप्तौ कर्मणि " इत्यनेन षष्ठी, किन्तु " कर्तृकर्मणोः कृति " इत्यनेनैवेति न समासनिषेधावसरः । काशिकाव्याख्याकारो हरदत्तोऽपि पदमञ्जर्यामाह[411]– अत्र च शब्दानामिदम् अनुशासनं नार्थानामिति अर्थव्यावृत्तिपरायां चोदनायां कर्तृविशेषस्याऽविवक्षितत्वाद् उभयप्राप्त्यभावाद् न " उभयप्राप्तौ कर्मणि " इत्यनेन षष्ठी, किं तर्हि ? " कर्तृकर्मणोः कृति " इत्यनेनेति, " कर्मणि च " इति न निषिद्धः समासः ।

शब्दानुशासनपदघटकं शब्दपदमपि वर्तते । तत्र च प्रतिज्ञातस्य शब्दानुशासनस्य कर्मीभूतः कोऽयं शब्द इति जिज्ञासोदेति । तां तु विस्तरेणात्र शामयते स्म भाष्यकारः । भाष्ये हि प्रथमं पस्पशाह्निके ' अथ गौरित्यत्र कः शब्दः ' इति प्रश्ने द्रव्यस्य क्रियाया गुणस्य आकृतेश्च शब्दत्वमाशङ्क्यप्रत्याख्याय च ' तत्रापि विशेषोऽयं द्रष्टव्यो यद् भाष्यकृता यद्यपि सामान्यतः प्रश्नः कर्तव्यो यत् ' कः शब्दः ' इति । किन्तु तथा नोपस्थाप्य प्रश्नं पृच्छन्ति – ' अथ गौरित्यत्र कः शब्दः ' इति । अत्र किं रहस्यमिति जिज्ञासायामिदमेव ज्ञातव्यं यत् – ' निर्विशेषं न सामान्यम् ' इति न्यायेन सामान्यविषयकोऽपि कोऽपि प्रश्नो विशेषमन्तरा न पर्यवसन्नः स्यादिति प्रकृताकारमेव ' अथ गौरित्यत्र कः शब्दः ' इति प्रश्नः कृतः ।

---

[407] अष्टाध्यायी – (2-2-14)

[408] अष्टाध्यायी – (2-3-66)

[409] अष्टाध्यायी – (2-3-65)

[410] महाभाष्यप्रदीपे पस्पशाया आरम्भे ' अथ शब्दानुशासनम् ' इति वाक्यव्याख्याप्रसङ्गे ।

[411] काशिकायाः पदमञ्जरी व्याख्या, ' अथ शब्दानुशासनम् ' इति भाष्यवाक्यव्याख्यावसरे ।

अयञ्च ज्ञानकारोल्लेखः, अर्थाद् गौरिति ज्ञाने भासमानेषु कः शब्दशब्देन ग्राह्य इति। तदनन्तरमनेकान् कल्पान् प्रदर्शस्य नेत्याह ‘ द्रव्यं नाम तद् गुणो नाम सः ’ इत्यादिना ते सर्वे पक्षा निराकृताः। तदनन्तरं महाभाष्यकृता सिद्धान्तत उत्तरत्वेन प्रतिपाद्यमानयोर्द्वयोर्लक्षणयोर्मध्ये प्रथममिदं लक्षणमाह – ‘ येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति, स शब्दः ’ इति। अर्थात् वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णस्य व्यर्थतापत्तिः । वर्णानामनित्यत्वात् तत्समूहस्याभावात् । पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितान्त्यवर्णस्योद्बोधत्वकल्पने ‘ सरः ’ इत्युक्ते ‘ रसः ’,‘ नदी ’ इत्युक्ते ‘ दीन ’ इत्याद्यापत्तेः। येनानुभूयते तेनैव स्मर्यते इत्यस्यैव नियमात्, यथानुभवं स्मृतिनियमाभावाच्च। अतो वैयाकरणैः शब्दार्थबोधने स्फोटः पृथक् स्वीक्रियते। अथवा ‘ प्रतीतपदार्थको लोके ध्वनिः शब्दः ’ इत्युच्यते[412] अत्र येनोच्चारितेनेत्यस्य प्रकाशितेनेत्यर्थसत्त्वात् प्रथमलक्षणे स्फोटः[413] शब्द इति सूच्यते, अथवेत्यनेन तु ध्वनिः शब्द इति निर्दिश्यते । तत्र कैयटः – ध्वनिः स्फोटश्चेति व्यङ्ग्यो व्यञ्जकश्चेत्यर्थः । एवञ्च शब्दानां द्वैविध्यमाकलय्य लक्षणद्वयं शब्दस्वरूपनिरूपणाय प्रणीतम् इत्यवधेयम्। तथा च –

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः॥[414]

इति तपरसूत्रभाष्येणोभयोरपि शब्दसम्बन्धितया तयोरेवात्रोपन्यासः। तथा च प्रथममान्तरः शब्द उच्यते। अथवेत्यनेन तु बाह्यो ध्वन्यपरपर्यायः।

भाष्यस्याऽयमाशयः – द्विविधः शब्दो वर्तते। बाह्यो वर्णपदाद्यात्मको ध्वनिरूपो व्यञ्जक एकः। अपरश्चान्तरो ध्वनिव्यतिरिक्तः स्वयमक्रमोऽपि व्यञ्जकधर्मोपरागेण क्रमप्रतिभासवान् स्फोटरूपो व्यङ्ग्यः। यथाह भाष्ये – येनोच्चारितेन...... इति अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इति च। अत एव वैयाकरणैः शब्दस्य द्वैविध्यं स्फोटात्मकं ध्वन्यात्मकञ्च स्वीकृतम्। नित्यः स्फोटात्मकः शब्दः। अनेनार्थावबोधो भवति । यथा – रामरूपार्थबोधनार्थं रामशब्द उच्चार्यते । चतुर्वर्णात्मकस्य रामशब्दस्योच्चारणाय एको वर्णो यदोच्चार्यते तस्य एकस्य प्रध्वंसानन्तरमन्यो वर्ण उच्चार्यते । अत उच्चारणप्रध्वंसित्वेन कथं रामशब्दस्य बोधः। यतो मकारस्योच्चारणसमये ‘ र् + आ + म् + अ ’ एते

---

[412] महाभाष्यम् – पस्पशा.

[413] वार्त्तिककारः – ‘ सिद्धे शब्दार्थसम्बन्धे ’ इति वार्त्तिके शब्दस्य सिद्धत्वं नित्यत्वं ब्रुवता श्रीकात्यायनेनापि स्फोटात्मा शब्दः सुष्ठु स्वीकृत एव। अत्र हि कात्यायनवार्त्तिके शब्दार्थसम्बन्धपदघटिते यः शब्दशब्दः स स्फोटरूपेऽर्थ एव, अन्यथा शब्दस्य नित्यत्वरूपं सिद्धत्वं कथं स्यात् ?

[414] महाभाष्यम् – (1-1-70)

वर्णा एकस्मिन् काले नैव तिष्ठन्ति । समूहाभावे रामरूपार्थनिरूपिताशक्तिः कुत्रापि नावतिष्ठेत । अतः शक्तेः निराश्रयत्वात् तदाश्रयतया स्फोटः वैयाकरणैः कल्पितो भवति । प्राकृतविकृतध्वनिभेदेन एषः स्फोटः द्विधा विभज्यते । ततः रकारमकारादिभिः प्राकृतध्वनिभिरभिव्यक्तो स्फोटः अन्तकरणावच्छिन्नः चिद्रूपः ‘ आत्मा ’ इति वक्तुं युज्यते । स एव शक्त्याश्रयेण अर्थप्रकाशकः । जवाकुसुमादिगत-लौहित्यादिव्यञ्जकोपरोगवशाद् लोहितः स्फटिकः इति प्रकाशवद् व्यञ्जकध्वनिगतकत्वगत्वादि-जातयः स्फोटेऽवभासन्ते । वस्तुतः स्फोटे कत्वादयः जातयः न सन्तीत्यभिप्रायः ।

शब्दानुशासनं व्याकरणम् । तच्चानुशासनं स्फोटरूपे शब्दब्रह्मणि न सम्भवति । प्रक्रियादिकार्यं ध्वनिना च सिध्यति । अत एव लोके ध्वन्यात्मकं शब्दमङ्गीकृतं वैयाकरणैः । अनयोर्मध्ये स्फोटात्मकः शब्दः मुख्यः ध्वनिश्च गौणः इति विनिश्चितमस्ति ।

“ अर्थवद्धातुरप्रत्ययः प्रातिपदिकम् ” इति सूत्रादेवमनुमीयते यत् पाणिनिना स्फोटात्मा शब्दः स्वीकृतः । यतो हि अनेनार्थविषयकबोधजनकं शब्दमुद्दिश्य प्रातिपदिकसञ्ज्ञा विधीयते । शब्देऽर्थ-विषयकबोधजनकत्वरूपाशक्तेः अभावात् स्फोटात्मकं शब्दं विना उक्तसञ्ज्ञाविधायकस्य सूत्रस्य व्यर्थत्वं स्यात् । एवमेव “ इको यणचि ” इत्यनेन सूत्रेण इकः स्थाने यणादेशं भवितुं नार्हति । स्फोटात्मकशब्दस्य स्वीकारात् । शास्त्रप्रक्रियानिर्वाहार्थं ध्वन्यात्मकः शब्दोऽपि पाणिनिनाङ्गीकृतः । यद्यपि तेन साक्षात्शब्देन शब्दस्य स्वरूपं नोक्तम्, तथापि उपर्युक्तविवेचनेन ज्ञायते यद् द्विविधः शब्दः तेनावश्यं स्वीकृतोऽस्ति । भर्तृहरिणा ‘ अथ शब्दानुशासनम् ’ इति भाष्यस्थप्रतिज्ञावचनेन कीदृशः शब्दोऽनुशासनीय इत्याकाङ्क्षायां शब्दस्य स्वरूपं प्रोक्तम् –

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।
एको निमित्तं शब्दनामपरोऽर्थे प्रयुज्यते ॥

‘ शब्दानुशासनम् ’ इति प्रतिज्ञातम् । तत्र शब्दार्थयोरन्ययोरन्याध्यासमूलकतादात्म्येन भाष्यरीत्या ‘ गौः ’ इति विज्ञानेऽभेदेन प्रतिभासमानेषु शब्दाकृतिजातिद्रव्यगुणक्रियादिषु शब्दस्वरूपा-विवेकात् ‘ कः शब्दः ? ’ यस्यानुशासनमुपक्रान्तम्, इति प्रश्ने ‘ येनोच्चारितेन.....सम्प्रत्ययो भवति ’ इति ‘ अथवा प्रतीतपदार्थकः ’.... इति च भाष्यमुपक्रम्य व्यञ्जकं व्यङ्ग्यं च द्विविधं शब्दस्वरूपमुक्तम् – ‘ द्वावुपादान ’ इति ।

अत एव सार्थकशब्दस्य हि द्वौ पक्षौ – ध्वनिः स्फोटश्च । तत्र ध्वनिरनित्यः सावयवोऽर्थाऽभिव्यक्त्यक्षमः । स तु केवलं स्फोटाऽभिव्यञ्जक एव । ध्वन्यभिव्यक्तः स्फोटशब्दस्य आत्माऽर्थाऽभिव्यक्तिमूलम् । स्फोटोऽसौ मध्यमाविषयो यदा ध्वनिर्वैखरीविषय एव । अत्रोक्तम् –

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।
वैखर्या हि कृतो नादः परश्रवणगोचरः ।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ।।

परा पश्यन्ती मध्यमा वैखरी इति चत्वारि वाचः पदानि । एकैव नादात्मिका वाङ्मूलाधारादुदिता सती परा इत्युच्यते । सैव हृदयाभिगामिनी पश्यन्ती इत्युच्यते । सैव बुद्धिं गता विवक्षां प्राप्ता मध्यमा इत्युच्यते । अथ यदा सैव वक्रे स्थिता ताल्वोष्ठादिव्यापारेण बहिर्निर्गच्छति तदा वैखरी इत्युच्यते । अत्र श्रुतिः –

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।।[415]

कतमानि तानि चत्वारि पदानि । आर्षदृष्ट्या - ओंकारः (ओम्, भूः, भुवः, स्वः) महाव्याहृतयः चेत्यार्षम् । वैयाकरणदृष्ट्या[416]– नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः । याज्ञिकदृष्ट्या – मंत्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिकाः । नैरुक्तदृष्ट्या – ऋचो यजूंषि सामानि चतुर्थी-व्यावहारिकीति नैरुक्ताः[417] ।

सा वै वाक् सृष्टा चतुर्धा व्यभवत् । एष्वेव लोकेषु त्रीणि पशुषु तुरीयम् । या पृथिव्यां साग्नौ सा रथन्तरे । यान्तरिक्षे सा वायौ सा वामदेव्ये । या दिवि सादित्ये सा बृहति सा स्तनयित्नौ । अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुः । तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणाम्[418] ।

येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति, स शब्दः । स च शब्दो द्विविधो बुद्धिहेतुकोऽबुद्धिहेतुकश्च । तत्र अबुद्धिहेतुको मेघादिशब्दः । बुद्धिहेतुकश्च द्विविधः स्वाभाविकः काल्पनिकश्च । उभयत्रापि ध्वनेरुपकारकत्वाद् ध्वन्यात्मकता । तत्र स्वाभाविको वर्णविशेषानभि-व्यञ्जको हसितरुदितादिरूपः प्राणिमात्रसाधारणः । काल्पनिकोऽपि त्रिविधो वाद्यादिशब्दो गीतिरूपो वर्णात्मकश्च । तत्र भेरिशब्दादिर्वाद्यादिशब्दः । माधवादिरागाभिव्यञ्जकनिषादादिस्वरशब्दो गीतिरूपः

---

[415] ऋग्वेदः – (1-164-45)

[416] जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चतुर्धा । महाभाष्यम् – द्वितीयाह्निके

[417] निरुक्तः – (13-9) अर्थविज्ञान और व्याकरण दर्शन – डॉ. कपिलदेव द्विवेदी

[418] निरुक्तः – (13-9), मैत्रायणी संहिता – (1-11-5), काठक संहिता – (14-5) अर्थविज्ञान और व्याकरण दर्शन – डॉ. कपिलदेव द्विवेदी

। ध्वनिविशेषसहकृतकण्ठताल्वाद्यभिघातजन्यश्च वर्णात्मकः । अन्यत्र चेत्थं विभाग उक्तः । शब्दो द्विविधो ध्वन्यात्मको वर्णात्मकश्च । तत्राद्यो भेरीमृदङ्गादौ प्रसिद्धः । द्वितीयः संस्कृतभाषादिरूपः शब्दः । अत्र भाष्यं स च द्विविधो वर्णलक्षणोऽवर्णलक्षणश्च । तत्र अकारादिर्वर्णलक्षणः । ध्वनिलक्षणः चाऽवर्णलक्षणः । अत्र पाठान्तरं संख्यादिनिमित्तोऽवर्णलक्षण इति ।

वर्णात्मकः पुनर्द्विविधः सार्थको निरर्थकश्च । तत्र सार्थकः शब्दस्त्रिविधः प्रकृतिः प्रत्ययो निपातश्चेति । निरर्थकस्तु कचटतप इत्यादिः । पुनरपि वर्णात्मको द्विविधः प्रमाणशब्दोऽप्रमाणशब्दश्च । प्रमाणशब्द इत्यस्यार्थश्च शाब्दप्रमितिकरणज्ञानविषयः शब्द इति । तत्र प्रमाणशब्द आप्तोपदेशः । तदर्थश्च आप्तो यथा – दृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा । तस्य शब्दः । अथवा प्रयोगहेतु-भूतार्थतत्वज्ञानजन्यः शब्दः । सोऽपि द्विविधो लौकिको वैदिकश्च । तत्राद्यो लौकिको विधिनिषेधार्थवाद-भेदेन त्रिविधः । तत्र विधिर्यथा पाकं कुर्याद् इत्यादिः । निषेधश्च इदमनिष्टं न कुर्याद् इत्यादिः । अर्थवादस्तु अयं ब्राह्मणः स्वमहिम्ना सर्वं जगत् पवित्रं करोति इत्यादिः स्वयमूह्यः । द्वितीयस्तु वैदिकः पञ्चविधः – विधिः मन्त्रो नामधेयं निषेधोर्थवादश्चेति । तत्र लौकिकः शब्द आप्तोक्त एव प्रमाणभूतः । वैदिकस्तु सर्व एव प्रमाणभूतः । परमाप्तेन भगवता प्रणीतत्वात् । प्रकारान्तरेणापि प्रमाणशब्दो द्विविधो दृष्टार्थोऽदृष्टार्थश्च । तत्राद्यो घटोऽस्ति इत्यादिरूपः । द्वितीयः स्वर्गनरकापूर्वादिशब्द इति । अप्रमाणशब्दस्तु वह्निना सिञ्चेद् गौरश्वः पुरुषो हस्तीत्यादिरूप इति[419] ।

सत्यपि स्फोटे वर्णातिरिक्ततत्त्वेऽसौ वर्णात्मकध्वनित एवाऽभिव्यक्तो भवति । यद्यपि स्फोटो नित्यो निरंशोऽविभाज्यश्च तथापि शब्दानां स्वरूपज्ञानोपायतया कृताः सन्ति स्फोटस्याऽष्टविधाः काल्पनिका विभागाः । यथा –

वर्णस्फोटौ द्विविधौ – वर्णजातिस्फोटः, वर्णव्यक्तिस्फोटश्चेति ।

पदस्फोटस्त्रिविधः – पदजातिस्फोटः, सखण्डपदव्यक्तिस्फोटः, अखण्डपदव्यक्तिस्फोटश्चेति ।

वाक्यस्फोटोऽपि त्रिविधः – वाक्यजातिस्फोटः, सखण्डवाक्यव्यक्तिस्फोटः, अखण्डवाक्य-व्यक्तिस्फोटश्चेति । एवञ्च सम्मेलनेनाऽष्टविधः स्फोटः सम्पद्यते ।

वस्तुतस्तु वास्तविकं वाचकत्वं तु प्रकृतिप्रत्ययसमुच्चयरूपत्वेन सम्मते पदे वाक्ये वा भवति व्यवहारे तत एवार्थज्ञानात् । तत्रापि द्विविधा ह्याचार्याणां प्रवृत्तिर्दृश्यते यथा –

पदस्फोटसमर्थिका वाक्यस्फोटसमर्थिका च । तत्राद्यपक्षे हि प्रकृतिप्रत्ययसमुदायरूपस्य पदस्य वास्तविकं वाचकत्वं समर्थ्यते । द्वितीयपक्षे तु पदानामपि काल्पनिकत्वं विभाव्य वाक्यमात्रस्य

[419] न्यायकोशः – भीमाचार्यः

वास्तविकं वाचकत्वमनुमन्यते । अधिकांशविपश्चितस्तु द्वितीयमेव पक्षं श्रद्दधति वाक्यस्यैव व्यवहारेऽर्थबोधकत्वात् ।

वाक्यस्य स्फोटत्वे " कृत्तद्धितसमासाश्च "[420] इति सूत्रं प्रमाणम् । सूत्रमिदं नियमार्थम्, भाष्यप्रामाण्यात् । यद्यपि – ' विधिनियमसम्भवे विधिरेव ज्यायान् ' इति वर्त्तते कश्चन प्रामाणिको नियमः, तथापि भाष्यप्रामाण्यादत्र नियमार्थत्वमेवाङ्गीचक्रुर्वैयाकरणाः, ' यथोत्तरं मुनीनां प्रामाण्यात् ' । एवञ्च समासस्यैव प्रातिपदिकत्वाद् वाक्यस्य प्रातिपदिकत्वं व्यावृत्तं भवति । तत्र केवलस्य समासस्यैव प्रातिपदिकत्वे स्वीकृते रामादिशब्दानां समासानां कथङ्कारं प्रातिपदिकत्वं स्यादिति हेतोर्नियमाकार ईदृशः क्रियते – ' पूर्वोत्तरपदघटितस्य प्रातिपदिकसंज्ञा चेत्, तर्हि समासस्यैव ' इति । तेन नियमानाक्रान्तत्वाद् रामादिशब्दानां प्रातिपदिकत्वं सिद्ध्यति ।

इत्थञ्च वाक्यस्य या प्रातिपदिकसंज्ञा व्यावर्त्त्यते नियमेन तदेव प्रमाणं वाक्यस्य स्फोटत्वे इति प्रतिभाति ।

स्फोटस्य द्विविध व्युत्पत्तिरङ्गीक्रियते । यथा –

1. स्फुटति प्रकाशते, अवगम्यतेऽर्थोऽनेनास्माद्वेति व्युत्पत्त्या – अर्थविषयकोपस्थिति-जनकतावच्छेदकीभूतशक्तिमत्त्वं स्फोटत्वमिति भावः ।

2. स्फुट्यते अभिव्यज्यते वर्णैरिति स्फोट इति व्युत्पत्त्या वैखरीध्वनीनां व्यञ्जकत्वं स्फोटस्य च व्यङ्ग्यतेति सिद्ध्यति ।

चतुर्विधः शब्दः वर्तते । यथा –

1. रूढः – अवयवार्थमनपेक्ष्य समुदायशक्तिमात्रेणार्थबोधकत्वं रूढत्वम् – रथन्तरमित्यादौ ।

2. योगरूढः – अवयवार्थसंवलितसमुदायशक्त्यार्थबोधकत्वं योगरूढत्वम् – पङ्कजमित्यत्र ।

3. यौगिकः – अवयवशक्त्यैवार्थबोधकत्वं यौगिकत्वम् – पाचिका, पाठिकेत्यादौ ।

4. यौगिकरूढः – अवयवशक्त्या समुदायशक्त्या चाऽर्थबोधकत्वं यौगिकरूढत्वम् – मण्डपान-कर्तृपरोऽपि गृहविशेषपरोऽपि मण्डपशब्द उदाहरणमिति विवेकः[421] ।

लोके शास्त्रे वा यो यः शब्द उच्चार्यते स स स्वातिरिक्तं स्वनिष्ठवृत्तिज्ञानाधीनोपस्थितिविशेष्यं कमप्यर्थमुपस्थाप्य क्षीणबलत्वात् स्वयं कार्यान्वयं न लभते, किन्तु स उच्चार्यमाणः शब्दो यमर्थं प्रत्याययति, स एवार्थः कार्यान्वयं लभते ।

---

[420] अष्टाध्यायी – (1-2-46)

[421] परमलघुमञ्जूषा – समासादिवृत्त्यर्थनिरूपणे

स चार्थो द्विविधः – गवादेः शब्दस्य सास्नादिमत्पिण्डादिरर्थः, शब्दस्वरूपं च " स्वं रूपं शब्दस्याशब्दसंज्ञा "[422] इति शास्त्रबलात्, शब्देऽर्थे च खण्डशः शक्तिस्वीकाराद्वा । तत्र लोके ' गामानय ' इत्यादौ प्रयुक्तगोशब्दस्य न क्रियाऽन्वयोऽयोग्यत्वात्, किन्तु तदर्थस्य सास्नादिमत्पिण्डस्यैव । ' गामुच्चारय ' इत्यादौ तु यत्रार्थे क्रियान्वयस्य बाधः, तत्र शब्देऽपि क्रियान्वयः, शब्दस्यापि प्रातिपदिकार्थत्वात् । शास्त्रे तु – " गोपयसोर्यत् "[423], " अग्नेर्ढक् "[424] इत्यादौ सूत्रे य उच्चार्यमाणो गोशब्दादिः स न यत्प्रत्ययादिकार्यं लभते, किन्तु स्वं रूपमिति शास्त्रपरिभाषणात् तेन बोधितो यो लक्ष्यस्थो गोशब्दादिः स एव यदादिप्रत्ययकार्यं लभते ।

शब्दस्य विवक्षावशात् कदाचिद्विशेषणतया कदाचिच्च विशेष्यतयाप्युपस्थितिः । यदा ' गामानय ' इत्यादौ शब्दस्य विशेषणतयोपस्थितिस्तदा क्रियान्वयं न लभते । यदा तु ' शब्दं शृणु '' मन्त्रमुच्चारय ' इत्यादौ शब्दस्य विशेष्यतयोपस्थितिस्तदा शब्दः क्रियान्वयं लभते । लोके तावद् विवक्षावशादुभयथा व्यवस्था । व्याकरणशास्त्रे तु " अग्नेर्ढक् " इत्यादौ सर्वत्र शब्दस्य विशेष्यतया एवोपस्थितिः, अर्थस्य विशेषणतयेति विवेकः[425] ।

शब्दार्थयोस्तादात्म्यस्य[426] वैयाकरणमते सिद्धत्वात् ' रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः ' इत्यादौ शब्दार्थयोरभेदेन व्यवहारात् पुरोवर्त्तिनि गवादौ कोऽयमिति पृष्टे गौरयमित्युत्तरवाक्ये शब्देन सहाऽभेददर्शनात् शब्दद्रव्ययोस्तादात्म्यं सुतरां सिद्धम् । गुणक्रियाजातीनाञ्च द्रव्यवृत्तित्वेन साक्षाच्छब्दाऽभेदाऽसम्भवेऽपि गुणगुणिनोः क्रियाक्रियावतोः जातिव्यक्त्योश्चाऽभेदात् ' तदभिन्नाभिन्नस्य तदभिन्नत्वम् ' इति न्यायाद् जातिगुणक्रियाऽभिन्नेन द्रव्येण सहाऽभेदापन्नस्य शब्दस्य जातिगुणक्रियाभिरपि सह तादात्म्यं सिद्ध्यति । तथा च द्रव्यगुणक्रियाजातीनां तद्वाचकानां चाऽभेदाऽध्यवसायाद् गौरित्युक्ते प्रतिभासमानेषु द्रव्यगुणक्रियाजातिषु कः शब्द इति जिज्ञास्यते – अथेत्यादिना । तदेतस्मिन् प्रघट्टके भाष्यकृद्भिः द्रव्यगुणक्रियाजातिभिः सह शब्दस्याऽभेदो हि आशङ्क्य निराकृतः ।

---

[422] अष्टाध्यायी – (1-1-68)

[423] अष्टाध्यायी – (4-3-160)

[424] अष्टाध्यायी – (4-2-33)

[425] वाक्यपदीय – ब्रह्मकाण्डः – पण्डित वेदान्त झा

[426] यद्यपि वाच्यवाचकभावापरपर्यायं सम्बन्धान्तरमेव नागेशमते तयोः शक्तिः, तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यं सङ्केतापरपर्यायम्, तथापि पदनिष्ठशक्त्युपकारत्वात् तादात्म्यस्यापि शक्तिरिति व्यवहारः । तच्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् । अभेदस्य आरोपितत्वात् न तयोर्विरोधः ॥

अत एव भाष्ये द्रव्यादि निरस्तेषु निर्णीतार्थं पृच्छति – ' कस्तर्हि शब्द ' इति । उत्तरमाह – ' येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति, स शब्दः ' इति । येनेति करणे तृतीया, येन उच्चारितेन = प्रकाशितेन (स्फोटेन) सास्नादिमतां ज्ञानं भवति, स स्फोटः शब्द इत्यर्थः । अथवा – ' प्रतीतपदार्थको लोके ध्वनिः शब्द ' इत्युच्यते इति । लोके व्यवहर्त्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद् वर्णरूपध्वनिसमूह एव शब्द इत्यर्थः ।

ध्वनिपदेनात्र वैखरी, स्फोटपदेनाभिव्यक्तकत्वादिको मध्यमावस्थ आन्तरः शब्द उच्यते ।

व्याकरणाध्ययनप्रयोजनविषये कानि पुनः शब्दानुशासनस्य प्रयोजनानीति परिप्रश्ने आह – ' रक्षोहागमलघ्वसंदेहाः प्रयोजनम् '[427] । अत्र ' अथ शब्दानुशासनम् ' इत्यनेन व्याकरणस्य साक्षात्मुख्यं प्रयोजनं साधुशब्दान्वाख्यानरूपं शब्दत एवोक्तम्, इदानीं शब्दसाधुत्वरूपव्याकरणप्रयोजनस्य किं प्रयोजनमिति प्रयोजन-प्रयोजनमिति पिपृच्छिषया प्रवृत्तं किल ' कानि पुनः शब्दानुशासनस्य प्रयोजनानि ' इति भाष्यम् । अत एव ' प्रयोजनप्रयोजनानि तु रक्षोहादीनि '[428] इत्युक्तं कैयटेन ।

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानीत्युक्त्वा प्रतीकरूपेण आनुषङ्गिकाणां समुपख्यापनं भाष्यकृता कृतम् । ' तेऽसुराः ', ' दुष्टः शब्दः ', ' यदधीतम् ', ' यस्तु प्रयुङ्क्ते ' इत्येवमादीनि प्रतीकानि तत्रैव भाष्ये विलिख्य विशेषतो व्याख्यातानि तत एवाऽवधारणीयानि । वस्तुतस्तु चत्वारि प्रयोजनानि वर्गीकृतानि चोच्यन्ते[429] ।

1. परम-परमप्रयोजनम्, 2. परमप्रयोजनम्, 3. प्रयोजनानि, 4. आनुषङ्गिकप्रयोजनानि ।

1. परमपरमप्रयोजनं मोक्षः

तत्र प्रमाणं वाक्यपदीयम्

---

[427] ननु अत्रेदं विचारणीयं विद्यते यद् यादृशं वचनं व्याकरणाध्ययनस्य प्रयोजनप्रश्नभूतं तादृशमेवोत्तरवाक्यं भवेत् कानि पुनः शब्दानुशासनस्य प्रयोजनानि इति प्रश्नवाक्यम्, उत्तरवाक्यञ्च ' रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ' इति नियमस्तु वर्तते यद्

या विशेष्येषु दृश्यन्ते लिङ्गसंख्याविभक्तयः ।
प्रायस्ता एव कर्तव्याः समानार्थे विशेषणे ।। इति

यथा – ' नीलो घटाः ' इति प्रयोगवारणायासति विशेषानुशासने विशेष्यविशेषणवाचकपदयोः समानवचनकत्वनियमाश्रयणात् ' रक्षोहागमलघ्वसंदेहाः प्रयोजनम् ' इति भाष्यवाक्ये ' प्रयोजनानि ' इति वक्तुमुचितम् न तु ' प्रयोजनम् ' इति । ' वेदाः प्रमाणम् ' इतिवदत्र प्रयोजनत्वेऽन्वयबोधः, रक्षादिप्रत्येकपदार्थे प्रयोजनत्वपर्याप्तेरिति चेत्, न, ' प्रयोजनानि ' इत्यत्र पुन्नपुंसकप्रयोजकप्रयोजनाऽर्थबोधकानां प्रयोजनशब्दानामेकशेषमतिदेशप्राप्तैकवद्भावञ्च बोधयितुं तथा प्रयोगः । एकवद्भावातिदेशे वैकवचनमप्युपपद्यते, बहुत्वरूपोऽर्थश्च न निषिध्यते । अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याऽभाव एवातिदेशस्वभाव इति तात्पर्यम् ।

[428] साक्षात्प्रयोजनं शब्दानुशासनम् एव, रक्षोहादीनि तु प्रयोजनप्रयोजनानीति प्रदीपोद्द्योतौ

[429] अष्टाध्यायी – श्रीललितावृत्तेः भूमिकायाम्

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ।।[430]
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।।

' शब्दपूर्वेण ज्ञानेन लभते ज्ञानमीदृशम् ' इति स्मृतिः । तदेवं व्याकरणं हि मोक्षपदे प्रवेशद्वारम् । वैयाकरणः साधुशब्दराशेर्ज्ञानपूर्वकप्रयोगेण शुद्धान्तःकरणो व्याकरणेन द्वारेण मोक्षपदे सुखं प्रविशति । तदाह गीतास्मृतिः – ' ततोऽसौ तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ' इति ।

व्याकरणस्य मोक्षहेतुत्वे बीजमाह – ' वाङ्मलानां चिकित्सितम् ' इति । यतो हि व्याकरणं वाङ्मलानां प्रक्षालनेन वाचः शुद्धस्वरूपस्य व्युत्पादकम्, अत एव शुद्धस्याऽखण्डस्य शब्दब्रह्मणः साक्षात्कारहेतुतया व्याकरणस्य मोक्षहेतुत्वं निगदव्याख्यातम् । इयं हि शब्दविद्या मुमुक्षूणां कृतेऽविनाभूतोऽकण्टकः सुगमः सरलो राजमार्गः सर्वासु विद्यासु राजमानो मोक्षस्यान्याऽनपेक्षं साक्षात् साधनम् । तदाह – ' शब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ' इति ।

2. परमप्रयोजनं साधुत्वज्ञानम्

व्याकरणाध्ययनस्य परमं प्रयोजनं साधुशब्दज्ञानमेव । शब्दा अनुशिष्यन्ते असाधुशब्देभ्यो विविच्य पृथक्कृत्य बोध्यन्तेऽनेनेति करणे ल्युड्विधानाच्छब्दत एव तथाविधार्थोपलब्धेः । अतस्तत्र शब्दानुशासनपदघटकशब्दपदेन साधुशब्दग्रहणात् साधुशब्दज्ञानस्य व्याकरणाध्ययनस्य परमप्रयोजनत्वमवसीयते । एतच्च ' अथ शब्दानुशासनम् ' इति भाष्यादेव सिद्धम् । शब्दा अनुशिष्यन्ते असाधुशब्देभ्यो विविच्यन्ते इति व्युत्पत्तेः । तथा च उद्द्योतः – वार्त्तिककृताऽपि शास्त्रपूर्वके शब्दप्रयोगे धर्मः, इत्यनेन मध्यमाधिकारिणः परमप्रयोजनं दर्शितम्[431] । प्रदीपकृता व्याकरणस्य चेदमन्वर्थं नाम शब्दानुशासनं नामेत्युक्तम् । व्याकरणस्य च असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिप्रयोजक-नियमविशेषरूपतया च साधुत्वज्ञानं प्रयोजनं सिद्धमेव । साधुज्ञानविषया चैषा व्याकरणस्मृतिरिति वदन् भर्तृहरिरपि साधुत्वज्ञानस्य व्याकरणाध्ययनस्य परमप्रयोजनत्वमुक्तवान् ।

---

[430] वाक्यपदीय – ब्रह्मकाण्डः – श्लोक – (14, 16) आनन्दाटीकायाम्

[431] महाभाष्यम् – नवाह्निकः - उद्द्योते

3. प्रयोजनानि रक्षोहादीनि

रक्षोहादीनि प्रयोजनानि तु भाष्ये रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति वदता भाष्यकारेण कण्ठत एवोक्तानि । यद्यप्येषां मुख्यत्वमुक्तं[432] प्रदीपकारेण तथापि पारम्पर्येण पुरुषार्थसाधनत्वेन अमुख्यत्वेमेवोक्तम् । मुख्यत्वञ्च आनुषङ्गिकफलापेक्षा पदपदार्थज्ञानाधिनत्वेनान्तरङ्गत्वाद्बोध्यम् ।

4. आनुषङ्गिकाणि

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि, इत्यादीनि ' तेऽसुराः ' इत्यादिप्रतीकावगतानि । एषामानुषङ्गिकत्वं प्रदीपकारेण तत्रैवोक्तम् । एवं क्रमेणेदं व्याकरणमैहिकपारलौकिकोभयप्रयोजनवत्तया परमोपयोगीति सिद्धम् ।

रक्षोहागमलघ्वसंदेहाः प्रयोजनमित्यत्र प्रयोजनमिति प्रयुज्यते प्रवर्त्त्यतेऽनेनेति करणल्युडन्तः, प्रयोजयतीति कर्त्तृव्युत्पत्त्या बाहुलकात् कर्त्तृल्युडन्तो वा, उभयथापि प्रवर्त्तकः (प्रयोजकः) विधिपरः पुँल्लिङ्गः प्रयोजनशब्द एकः । फलपरः क्लीबोऽपरः। उभयोः ग्रहणमस्ति । प्रयोजनश्च प्रयोजनानि चेति प्रयोजनम् । " नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् "[433] इति सूत्रेणेतरेतरद्वन्द्वसमासानन्तरमेकशेषेण नपुंसकमात्राभिधायिपदमवशिष्यतेऽन्यानि लुप्यन्ते । अत्र एकवद्भावस्य वैकल्पिकतया प्रश्ने बहुवचनम्, उत्तरे एकवचनं च बोध्यम् । प्रकृते तु स्वाश्रयपदवाच्यत्वसम्बन्धेनान्वयः कर्तव्यः । स्वम् विभक्त्यर्थं एकत्वम्, तदाश्रयः पदं प्रयोजनेति पदं तद्वाच्यत्वं प्रयोजकेऽपि गतमिति समन्वयः कर्तव्यः । तत्र आगमः[434] प्रवर्त्तकः, रक्षोहलघ्वसन्देहास्तु फलानीति विवेकः ।

अत्र च शब्दानुशासनस्य प्रक्रान्तत्वात् तदुपदेशे च शब्दापशब्दोभयोपदेशभेदेन त्रयः प्रकाराः संभवन्ति, तत्रान्यतरोपदेशेनैव कृतं स्यात् । तद् यथा – शमादयो विधेयाः इत्युक्ते क्रोधादिप्रतिषेधो गम्यते, क्रोधादिप्रतिषेधे च शमादिविधिः, एवमिहापि गौः इत्युपदिष्टे गम्यते एतद् गाव्यादयोऽपशब्दाः गाव्याद्यपशब्दोपदेशे च गम्यते एतद् गौरित्येष शब्दः तत्र लाघवादुपादेयोपदेशे साक्षात् प्रतिपत्तेश्च शब्दोपदेशो ज्यायान् । तथाहि – एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा – गोशब्दस्य गावी, गोणी, गोता, गोपोतलिका इत्यादयोऽपभ्रंशाः । तत्र गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति प्रतिपदपाठोऽनभ्युपायः शब्दानां प्रतिपत्तौ, तेषामनन्त्यात् । एवं हि श्रूयते – बृहस्पतिरिन्द्राय दिव्यं

---

[432] महाभाष्यम् – नवाह्निकः – प्रदीपे

[433] अष्टाध्यायी – (1-2-69)

[434] ' ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ' इति । निष्कारणो दृष्टकारणनिरपेक्षो नित्य इति यावत् । कार्यतेऽनुष्ठाप्यतेऽनेनेति कारणं फलम् । तथा च साङ्गवेदाऽध्ययनतदर्थज्ञानरूपोऽयं धर्मो नित्यः सन्ध्योपासनादिवदित्यर्थः । यथा सन्ध्योपासनादेरभावे प्रत्यवायोऽनुष्ठाने च पापक्षय इत्यभ्युपेयते तथा व्याकरणाध्ययनस्याप्यननुष्ठानेऽनुष्ठाने च बोध्यमित्याशयः ।

वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपरायणं प्रोवाच नान्तं जगाम । तदीदृशे च वक्तर्यध्येतरि अध्ययनकाले च नान्तगमनमभूद्, यस्य तस्य कुतोऽद्यत्वे भविष्यत्यल्पायुषि प्रजायाम्, चतुर्भिश्च ग्रहणाभ्यासाध्यापनव्यवहारकालरूपैः प्रकारैर्विद्योपयुक्ता भवति, तत्रास्य ग्रहणकालेनैव कृत्स्नमायुः पर्युपयुक्तं स्यादिति । तस्माच्छब्दोपदेशे अल्पोपायरूपत्वादुत्सर्गापवादन्यायेन सामान्यविशेषवद् लक्षणमेव वक्तव्यम् । यथा – " कर्मण्यण् "[435] इति सूत्रेण सामान्यम् = उत्सर्गः, धातुमात्रात् कर्मणि उपपदे कर्तर्यर्थेऽण्विधानात् । " आतोऽनुपसर्गे कः "[436] इति सूत्रेण च विशेषः = अपवादः, धातुविशेषात् आकारान्ताद् अनुपसर्गविशेषाच्च कविधानात् । तत्र सामान्येन ' कुम्भकारः ' इत्यादिर्महान् शब्दसमूहः प्रतिपद्यते, विशेषेण च ' गोदः ' इत्यादिः । यथा वा – " तव्यत्तव्यानीयरः "[437] इति सामान्यम्, धातुमात्रात् तेषां विधानात् । प्रथमेन ' कर्तव्यम्, करणीयम् ' इत्यादिशब्दजालसिद्धेरपरेण ' चेयम्, जेयम् ' इत्यादिबहुशब्दव्युत्पत्तेः ।

- **' अथ शब्दानुशासनम् ' इति पाणिनेः पतञ्जलेर्वा**

केचन वदन्ति यद् महाभाष्ये सर्वप्रथममिदमेव वाक्यमुपलभ्यते । वाक्यञ्चेदं सूत्रकृतः पाणिनेरेव । तथा चाष्टाध्याया यस्या भाष्यमभाषि भगवता पतञ्जलिना तस्याः सूत्रमिदं प्रथमं पाणिनीयम् । तेषामियमपि युक्तिर्वर्त्तते यद्भाष्यं तु सूत्रमधिकृत्य प्रवर्त्तते । तत्र च योगशास्त्रे पूर्वमीमांसायां वेदान्तशास्त्रे च यानि प्रथमसूत्राण्युपलभ्यन्ते तानि सर्वाण्येव अथशब्दघटितान्येव सन्ति – ' अथ योगानुशासनम् ' , ' अथातो धर्मजिज्ञासा ' , ' अथातो ब्रह्मजिज्ञासा ' इति । तेन न्यायेन महाभाष्ये समुपलब्धमिदं वाक्यम् ' अथ शब्दानुशासनम् ' इति भगवतः पाणिनेरेव सूत्रम्, अथशब्दघटितत्वात् प्राथम्येनोपपलम्भाच्च । तेषां मते " वृद्धिरादैच् " इति सूत्रं द्वितीयसूत्रम् । उद्देशवचनं पूर्वं विधेयं तदनन्तरमिति नियमादादैचोरुच्चारणं पूर्वं कर्तव्यं वृद्धिशब्दस्य च पश्चादिति हेतोर्वृद्धिशब्दस्यादौ प्रयोगो मङ्गलार्थ इति महाभाष्यप्रवृत्तिस्तु मध्यमङ्गलत्वेनापि योजयितुं शक्येति तेषां मतम् । तेन कैयटनागेश-प्रभृतिभिरस्य ' अथ शब्दानुशासनम् ' इति वाक्यस्य महाभाष्यघटकवाक्यत्वमपास्तं भवति।

---

[435] अष्टाध्यायी – (3-2-1)

[436] अष्टाध्यायी – (3-2-3)

[437] अष्टाध्यायी – (3-1-96)

राजलक्ष्मीटिप्पणकारेणोक्तम् – ‘ पदे तु शास्त्रारम्भप्रयोजनसूचकं भगवतः कात्यायनस्य वार्त्तिकमेतत् । भाष्यकारस्यैतद्व्याकरणप्रयोजनप्रदर्शनवाक्यम् इति वदन्तौ कैयटनागेशौ तु भ्रान्तौ एवेत्याहुः। ’ [438]

पदमञ्जरीकार-हरदत्त-प्रदीपकारकैय्यट-उद्योतकारनागेशप्रभृतयः प्राचीनाः ‘ अथ शब्दानुशासनम् ’ इति सूत्रं भाष्यकारस्यैवाहुः।

नवीनः भट्टोजिदीक्षितोऽपि स्वशब्दकौस्तुभे प्राह – ‘ व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत् ‘ अथ शब्दानुशासनम् ’ इति।

तदेतत् सर्वमलीकं प्रमाणाऽभावात् । प्राचीन सूत्रग्रन्थानां रचनाशैल्याः, अनुसारेणेदं सूत्रं पाणिनीयमेव प्रतीयते । महर्षि पतञ्जलिः इदं सूत्रं व्याचक्षाणः प्राह –

‘ अथेति शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ’ ।

अस्मिन्वाक्ये ‘ प्रयुज्यते ’ क्रियायाः कर्ता यदि पाणिनिः मन्येत तदास्योत्तरवाक्येन संगतिर्जायते । अन्यथा ‘ प्रयुज्यते ’ क्रियायाः कर्ता पतञ्जलिर्भविष्यति ‘ अधिकृतम् ’ इत्यस्य कर्ता पाणिनिः । यतो हि शास्त्रस्य रचयिता पाणिनिरेवास्ति । विभिन्नकर्तृ स्वीकारेऽत्रैकवाक्यत्वं न घटते ।

अत्रान्यानि च प्राचीनानि प्रमाणान्यस्य सूत्रस्य पाणिनीयत्वे समुदाह्रियन्ते । तथाहि –

1. मूलपाणिनीयाष्टकस्य बहुषु प्राचीनहस्तलेखेषु प्रारम्भः ‘ अथ शब्दानुशासनम् ’ इति सूत्रेण भवति ।

2. पाणिनीयाष्टकवृत्तिग्रन्थकाशिकायामन्यसूत्रवदस्य व्याख्यानं कृतम् । ‘ अथ शब्दानुशासनम् – केषां शब्दानां ? लौकिकानां वैदिकानाञ्च............ ’

3. पाणिनीयाष्टकस्य वृत्तेः भाषावृत्तेः व्याख्याता सृष्टिधराचार्यः प्रोवाच – ‘ व्याकरण-शास्त्रमारभमाणो भगवान् पाणिनिमुनिः प्रयोजननामनी व्याचिख्यासुः प्रतिजानीते – ‘ अथ शब्दानुशासनमिति । ’

4. मनुस्मृतेः व्याख्याता मेधातिथिः प्रोवाच – ‘ पौरुषेयेष्वपि ग्रन्थेषु नैव सर्वेषु प्रयोजनाऽभिधानमाद्रियते । तथाहि – भगवान् पाणिनिरनुक्त्वैव प्रयोजनम् ‘ अथ शब्दानुशासनम् ’ इति सूत्र सन्दर्भमारभते । ’

---

[438] महाभाष्यनवाह्निकालोचनम् (पृ – 15)

5. काशिकाव्याख्याता न्यासकारः जिनेन्द्रबुद्धिः प्रोवाच – ‘ शब्दानुशासनप्रस्तावादेव हि शब्दस्येति सिद्धे शब्दग्रहणं यत्र शब्दपरो निर्देशस्तत्र स्वं रूपं गृह्यते नार्थपरनिर्देश इति ज्ञापनार्थम् । ’ – न्यास – (3-4-26)

6. महर्षिदयानन्दसरस्वती पाणिन्यष्टकव्याख्याने प्राह – ‘ इदं सूत्रं पाणिनीयमेव प्राचीनलिखित-पुस्तकेषु आदाविदमेवास्ति । दृश्यन्ते च सर्वेष्वार्षेषु ग्रन्थेष्वादौ प्रतिज्ञासूत्राणीदृशानि । ’

एभिः पुष्टैः प्रमाणैः ‘ अथ शब्दानुशासनम् ’ इति सूत्रं पाणिनिनैव कृतम् न पतञ्जलिना नाप्यन्येन केनचित् । शब्दानुशासनमिति पाणिनिव्याकरणस्य प्राचीनं नामास्ति । ‘ अथ योगानुशासनम् ’ इति सूत्रम् यदि योगशास्त्रस्यास्ति चेत् ‘ अथ शब्दानुशासनम् ’ पाणिनिव्याकरणशास्त्रस्य कृतो न स्यात् । महाभाष्यकारोऽप्याह तत्रैव – ‘ शब्दानुशासनं नाम शास्त्रम् । ’

अत्र ‘ नाम ’ शब्देन पाणिन्यष्टकस्य ‘ शब्दानुशासनम् ’ नामान्तरमस्तीति विज्ञेयम् । व्याकरणस्य इदमन्वर्थन्नाम शब्दानुशासनमिति ।

अस्मिन् विषये महाभाष्यनिगूढाकूतयः इति ग्रन्थस्य लेखको महावैयाकरणो देवस्वरूपमिश्रः ‘ अथ शब्दानुशासनम् ’ इदं वचनं पाणिनेरिति स्वीकृतानां प्राचीनार्वाचीनवादीनां युक्तीः स्वतर्कैः निराकृत्य ‘ अथ शब्दानुशासनम् ’ इदं वचनं भाष्यकारस्यैवेति कैयटनागेशप्रभृतीनां विदुषां प्राचीनानां साम्प्रतिकानाञ्च भाष्यतत्त्वविदामपि मतानि सविस्तरं समुद्धृत्यसुप्रबलतरतर्कैः सुदृढतराभिश्च युक्तिभिः सिद्धान्तरूपेण समीचीनं मतं स्थापयति स्म । तथाहि स आह – अथ व्याकरणमहाभाष्यस्य संशयविषयीभूतानां गूढस्थलानां यथासम्प्रदायं यथासन्दर्भमनुदक्षरञ्च व्याख्यानं प्रारभ्यते । तत्र व्याकरणशास्त्रस्य परमप्रमाणभूते महर्षिपतञ्जलिनिर्मिते महाभाष्ये सर्वप्रथमम् – ‘ अथ शब्दानुशासनम् ’ इति वचनमुपलभ्यते । अस्य वचनस्य कृते पक्षद्वयं दरीदृश्यते । तथाहि – केचिद् वदन्ति यद् महाभाष्यकारस्य वचनमिदमिति । अपरे प्राहुर्यन्नेदं महाभाष्यकारस्य वचनम्, प्रत्युत भगवतः पाणिनेः सूत्रकारस्यैवेदं प्रथमं सूत्रमिति । तत्राद्यपक्षे कैयटादयो विद्वांसो महाभाष्यव्याख्यारः सम्मताः । कैयटव्याख्याने प्रदीपे नागेशकृते उद्द्योते च स्पष्टमेव तथा प्रतिपादितम् । समीचीनमेव तत्, यतो हि “ वृद्धिरादैच् ” इति सूत्रे कथं वृद्धिरादैच् इति ? एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । ‘ माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्ति, आयुष्मत्पुरुषकाणि च अध्येतारश्च वृद्धियुक्त यथा भवेयुरिति ’[439] इति

[439] महाभाष्यम् – (1-1-1)

महाभाष्ये प्रोक्तम्। एतद्भाष्यदर्शनेनेदमेव निश्चीयते यद् ‘ वृद्धिरादैच् ’ इत्येव भगवतः पाणिनेरष्टाध्याय्याः प्रथमं सूत्रम्, न तु ‘ अथ शब्दानुशासनम् ’ इति। इदं तु महाभाष्यकारस्य प्रथमं वाक्यम्।

तत्र तावद् “ वृद्धिरादैच् ” इति सूत्रे यथा वृद्धिपदेन पाणिनिना, ‘ सिद्धे शब्दार्थसम्बन्धे ’ इति वार्त्तिके सिद्धपदेन कात्यायनेन च मङ्गलाचरणं विहितम्, तथैव पतञ्जलिना महाभाष्यादौ ‘ अथ ’ इत्यनेन मङ्गलं क्रियते। अथशब्दस्य मङ्गलत्वन्तु –

ॐकारश्चाथशब्दश्च द्वावेतौब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥

तदुक्तं शङ्कराचार्यैः ‘ अथान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति ’ इति।

यद्यपि ‘ अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ’ इति भाष्यव्याख्यानादापाततो भाति, यदिदम् ‘ अथ शब्दानुशासनम् ’ इति वाक्यं सूत्ररूपमेव, अत एव महाभाष्यकारेण व्याख्यातमिति, तथापि भाष्यकारवचनमेवेदम्, यतो हि भाष्यस्थवचनस्यापि भाष्ये व्याख्येयत्वेऽपि भाष्यस्थत्वमेव, न तु तद्भिन्नत्वम्। अत एवोक्तम् –

सूत्रस्थं पदमादाय वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥ इति।

अत एव कैयटो वाक्यव्याख्याने – ‘ भाष्यकारो विवरणकारत्वाद् व्याकरणस्य साक्षात्प्रयोजनं प्राह – अथ शब्दानुशासनमिति ’ इति प्राह।

महावैयाकरणेन श्रीनागेशेनापि स्पष्टमुक्तमेव – भगवान् विवरणकारत्वान्मन्दाधिकारिणां प्रवृत्तेः प्ररोचकप्रयोजनप्रतिपत्तिप्रवणत्वात् व्यवहितेषु स्वर्गापूर्वादिष्वनाश्वासात् साक्षात्प्रयोजनं शब्दव्युत्पत्तिलक्षणं वदति।

महाभाष्यकारो भगवान् पतञ्जलिर्महाभाष्यरचनावसरे प्रथमतो वचनमिदमत एवोट्टङ्कितवान्, यतो हि प्रतिदिनं यावन्तमंशं तेन छात्राः पाठिताः स एवाह्निकशब्देन प्रतिनिर्दिष्टः, अह्ना निर्वृत्तमाह्निकमिति व्युत्पत्तेः। “ तेन निर्वृत्तम् ”[440] इत्यनेन सूत्रेण ठक्। पाठने च शिष्याः सावधाना भवेयुरिति कृत्वा सफलप्रस्तावनार्थं मङ्गलार्थञ्चेदं वाक्यं प्रथमत उपात्तम्। अत एव ब्रह्मसूत्रभाष्यव्याख्यानभामतीव्याख्याने कल्पतरुपरिमलकारः ‘ मङ्गलश्लोके शास्त्रीयविषयप्रयोजनप्रदर्शनेन तथाभूते ब्रह्मणि भाष्यस्य तात्पर्यमिति कृत्स्नं भाष्यं सामान्यतो व्याख्यातम्। इदानीं प्रतिग्रन्थं व्याख्यानं प्रारभ्यते इत्येतदर्थोऽथशब्द इत्यर्थः। यद्यपि प्राभ्यत इत्यनुक्तेऽपि प्रारम्भादेवेदं प्रारभ्यत इत्यवगन्तुं

---

[440] अष्टाध्यायी – (4-2-68)

शक्यम्, तथापि श्रोतॄणां श्रद्धेयत्वप्रतिपत्त्यर्थं तदुक्तिः । दृश्यते हि तदर्थमेव लोकेऽप्याप्ताः किञ्चिदहं वक्ष्यामीत्युक्त्वा हितमुद्दिशन्ति ' इति ।

अतोऽत्रायं निष्कर्षः – साधुशब्दज्ञानरूपमुख्यप्रयोजनप्रदर्शनार्थं शिष्याणां सावधानीकरणार्थं मङ्गलार्थञ्च भगवान् भाष्यकारः पतञ्जलिः प्रयुक्तवान् वाक्यमिदम् – ' अथ शब्दानुशासनम् ' इति ।

तत्र केचिद् वदन्ति यदिदम् ' अथ शब्दानुशासनम् ' इति वाक्यं न महाभाष्यकारस्य पतञ्जलेः, प्रत्युत पाणिनेरेवेदं प्रथमं सूत्रमिति । तथा च प्राह महर्षिः स्वामी श्रीदयानन्दः ' अष्टाध्यायी-महाभाष्यम् ' इति नामके ग्रन्थे ' अथ शब्दानुशासनम् ' इति वाक्यविषये –

' इदं सूत्रं पाणिनीयमेव । प्राचीनलिखितपुस्तकेषु आदाविदमेवास्ति । दृश्यन्ते च सर्वेष्वार्षेषु ग्रन्थेषु प्रतिज्ञासूत्राणीदृशानि ' इति ।

तत्र टिप्पण्याञ्च ' अत्र मेधातिथिर्भृगुप्रोक्तसंहिताः प्रथमश्लोकव्याख्याने एनमेवार्थमादिशत् । पौरुषेयेष्वपि ग्रन्थेषु नैव सर्वेषु प्रयोजनमभिधानमाद्रियते । तथाहि भगवान् पाणिनिरनुक्त्वैव प्रयोजनम् ' अथ शब्दानुशासनम् ' इति सूत्रसन्दर्भमारभते ' इति ।

' अथ शब्दानुशासनम् ' इति वचनं भगवतो महाभाष्यकारस्य पतञ्जलेरिति प्रतिपादयन्तो महाभाष्यव्याख्याकाराः कैयटनागेशप्रभृतयो महान्तो विद्वांसोऽपि भ्रान्ता हेयवचना इति तेषां समुद्घोषः ।

अन्येऽपि महर्षिदयानन्दप्रणीतस्याष्टाध्यायीमहाभाष्यग्रन्थस्य व्याख्याकाराः – ' अथ शब्दानुशासनम् ' इति वचनं भगवतः पाणिनेरेवेति, न तु महाभाष्यकारस्य पतञ्जलेरिति पक्षं कक्षीकुर्वाणाः प्राहुर्यत् यथा ' अथ योगानुशासनम् ' इत्यपि महर्षिप्रणीतमाद्यं सूत्रम्, तथैव पाणिनेरेवेदम् ' अथ शब्दानुशासनम् ' सूत्रम्, न भाष्यवचनमिति ।

तेषामयमाशयः – सर्वत्र सूत्रकाराणां शैलीयं दृश्यते यदादौ तथैव सूत्राणि प्रणीतवन्तः । यथा –

योगशास्त्रे – अथ योगानुशासनम् ।

मीमांसायाम् – अथातो धर्मजिज्ञासा ।

वेदान्ते – अथातो ब्रह्मजिज्ञासा ।

वैशेषिकदर्शने – अथाऽतो धर्मं व्याख्यास्यामः ।

निदानसूत्रे – अथातश्छन्दसां नियचं व्याख्यास्यामः ।

चरके – अथातो दीर्घञ्जीवितीयमध्यायं व्याख्यास्यामः ।

सुश्रुते – अथातो वेदोत्पत्तिनामाध्यायं व्याख्यास्यामः

पारस्करगृह्यसूत्रे – अथातो गृहस्थालीपाकानां कर्म ।

खदिरगृह्यसूत्रे – अथातो गृह्यकर्माणि ।

गोभिलीयगृह्यसूत्रे – अथातो गृह्यकर्माण्युपदेक्ष्यामः ।

एवञ्च महर्षिपतञ्जलिप्रणीतयोगशास्त्रे, महर्षिजैमिनिप्रणीतपूर्वमीमांसाख्ये, महति पूजनीये शास्त्रे कृष्णद्वैपायनव्यासप्रणीते वेदान्तशास्त्रे च यदा प्रथममेतादृशं सूत्रं दरीदृश्यते, तर्हि सर्वशास्त्रोपकारके व्याकरणशास्त्रे सूत्रत्वात् तथैव भाव्यमिति हेतोरिदम् ‘ अथ शब्दानुशासनम् ’ इति वाक्यं पाणिनेरेवादिमं सूत्रम्, न तु व्याख्याकृतो महाभाष्यकारस्येति प्रतिपादन्ति ।

तत्सर्वमविचारितरमणीयमिति । तत्र नहि प्रतिज्ञामात्रेण वस्तुसिद्धिः, किन्तु हेतुप्रतिपादनादिति हेतोरहं यथाशक्ति यथामति यथौचित्यञ्च प्रतिपादये । तथाहि – महर्षिणा दयानन्देन प्राचीनपुस्तकेषु पाठोऽस्य सर्वप्रथममुपलभ्यते इत्यनेन हेतुना वाक्यस्यास्य ‘ अथ शब्दानुशासनम् ’ इत्यस्य भगवतः पाणिनेरादिसूत्रत्वे हेतुर्न भवितुमर्हति, यतो हि भ्रमात् प्रमादादविचारात् प्रथमत्वेनोपादानं तस्यादिसूत्रत्वे साधकं भवितुं नार्हति, युक्त्या तस्य बाधेऽकिञ्चित्करत्वात् । तथा चोक्तं गदाधरभट्टाचार्यैः –

‘ नहि कस्यचिद् ग्रन्थकृतो विपरीतलेखनं युक्तिबलाद् वस्तुसिद्धौ बाधकम् ’ इति ।

किञ्च, भ्रमप्रमादकरणबाधादिदोषा मनुष्यस्य स्वाभाविकाः । अतः केनापि कदाचिद् भ्रमेण विपरीतं वक्तुं लिखितुं वा शक्यते । नहि तेन विपरीतेन वचनेन किञ्चित् प्रामाणिकं वस्तु साधयितुं शक्यते । अत एवोक्तमभियुक्तैः –

प्राचीनमित्येव न साधु सर्वं न नव्यमित्येव भवत्यवद्यम् ।

सन्तः परीक्षान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः ।।[441] इति ।

अपरञ्च – प्राचीनपुस्तकान्तर्गतानि महाभाष्यव्याख्याकारैः कैयटनागेशप्रभृतिभिः विद्वद्भिः प्रणीतानि टीकारूपाणि पुस्तकान्यपि वर्तन्ते, तानि तु प्रमाणरूपाणि वचनानि ‘ अथ शब्दानुशासनम् ’ इति वचनं भाष्यकारस्येति प्रतिपादयन्ति । तानि कथं नास्य भाष्यकारीयवचनत्वे मानानीति पृष्टो भवान् व्याचष्टाम् ।

या चेयं युक्तिरपरा महर्षिदयानन्दस्वामिभिः प्रोक्ता यद् ‘ दृश्यन्ते च सर्वेष्वार्षेषु ग्रन्थेषु प्रतिज्ञासूत्राणीदृशानि ’ इति । सापि न वस्तुसाधिका, यतोहि येऽपि ऋषयः प्रतिज्ञारूपेण ईदृशानि सूत्राणि प्रणीतवन्तस्तेषां महर्षीणां पद्धतिर्न विस्मर्तव्या । ते हि प्रतिज्ञासूत्रेण प्रतिज्ञातं वस्तु प्रतिज्ञासूत्रानन्तरमेव (वचनानन्तरं वा) लक्षणवचनेन सूत्ररूपेण वा अन्यरूपेण वा लक्षितवन्तः । यथा – “ अथ

[441] मालविकाग्निमित्रम् – (1-2)

योगानुशासनम् "[442] इति सूत्रेण योगं प्रतिज्ञाय भगवान् पतञ्जलिस्तदनन्तरसूत्रेणैव योगस्य लक्षणं कृतवान् – " योगश्चित्तवृत्तिनिरोधः "[443] इति । एवमेव पूर्वमीमांसायाम् – " अथातो धर्मजिज्ञासा "[444] इति सूत्रेण महर्षिर्जैमिनिर्धर्मं प्रतिज्ञाय तदनन्तरसूत्रेणैव धर्मस्य लक्षणं प्राह – " चोदना लक्षणोऽर्थो धर्मः "[445] इति सूत्रेण । वेदान्तसूत्रेऽपि " अथातो ब्रह्मजिज्ञासा "[446] इति सूत्रेण जिज्ञास्यं ब्रह्म प्रतिज्ञाय भगवान् व्यासो ब्रह्मसूत्रे तदनन्तरमेव ब्रह्मणो लक्षणमाह द्वितीयेन सूत्रेण – " जन्माद्यस्य यतः "[447] इत्यनेन । ते हि सर्वे महर्षयः, मान्याः सूत्रकाराः प्रतिज्ञासूत्रेणैव लक्षणात्मकेन लक्षितवन्तः । इमां सूत्रकारीयपद्धतिमवेक्ष्य प्रकृतेऽपि विचार्यते ।

यदि ' अथ शब्दानुशासनम् ' इति वचनं भगवतः पाणिनेः स्यात्, तदावश्यं भगवता तदनन्तरसूत्रेण द्वितीयेन अनुशासनकर्मत्वेन प्रतिज्ञातस्य शब्दस्य लक्षणं लक्षितं स्यात् । एवञ्च येषां महर्षिदयानन्दतदनुयायिवर्गाणामपरेषाञ्च केषाञ्चिन्मतेन यदि ' अथ शब्दानुशासनम् ' इति वचनं भगवतः पाणिनेरेवादिमं सूत्रमिति पक्षो वर्त्तते, तदा द्वितीयं सूत्रं स्यात् " वृद्धिरादैच् " इति । किन्तु नात्र भगवान् पाणिनिः प्रतिज्ञातस्य शब्दस्य लक्षणं कृतवानिति सूत्रकारीयपद्धतिहानप्रसङ्गः । सूत्रकाराणां च तथैव शैली विद्यते यत्ते प्रतिज्ञातवस्तुनो लक्षणं प्रतिज्ञासूत्रानन्तरमेव चक्रुः । यदा च वचनमिदं भाष्यकारस्येति पक्षः समाश्रीयते, तदा न कापि क्षतिः । यतो हि सूत्रकारेण स्वन्तत्रेच्छस्य मुनेः नियन्तुमशक्यत्वेनेति नियमात् शब्दविषयिणी प्रतिज्ञैव न कृता । अतो न तेन महर्षिणा शब्दस्वरूपं वक्तव्यम् । यदा चेदमङ्गीक्रियते यदिदं वाक्यम् – ' अथ शब्दानुशासनम् '[448] इति महाभाष्यकारस्य पतञ्जलेः पाणिनिसूत्रव्याख्याकारस्यादिमं वाक्यम्, तदा तेन प्रतिज्ञातस्य शब्दस्य स्वरूपं वक्तव्यम् । तच्च प्रोक्तमेव तेन महर्षिणा पातञ्जलव्याकरणमहाभाष्ये – ' येनोच्चारितेन सास्नालाङ्गूलककुद-खुरविषाणिनां संप्रत्ययो भवति स शब्दः '[449] इत्यनेन प्रथमेन स्फोटरूपशब्दस्वरूपपरिचायकेन वचनेन

---

[442] योगसूत्रम् – (1-1-1)

[443] योगसूत्रम् – (1-1-2)

[444] मीमांसासूत्रम् – (1-1-1)

[445] मीमांसासूत्रम् – (1-1-2)

[446] ब्रह्मसूत्रम् – (1-1-1)

[447] ब्रह्मसूत्रम् – (1-1-2)

[448] महाभाष्यम्

[449] महाभाष्यम् – पस्पशा.

। ततश्च – अथवा ‘ प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते ’[450] इति द्वितीयेन ध्वनिरूपशब्द-परिलक्षकेण लक्षणवचनेन।

एवञ्चात्रेदमाकूतं यद् भगवतः पाणिनेस्तु प्रथमं सूत्रम् “ वृद्धिरादैच् ”[451] इत्येव, ‘ अथ शब्दानुशासनम् ’ इति वचनं तु भगवतो महाभाष्यकारस्य पतञ्जलेरेव । तथा स्वीकारे नियमे बाधाभावात्। पाणिनिसूत्रत्वे तु सर्वथैव सूत्रकारीयपद्धतिहानप्रसङ्गात्। अतोऽत्र ‘ बुद्धेः सत्पक्षपाततः ’ इत्युक्तेरनुसारेण वच्मि यद् दुराग्रहं विहाय ‘ बालादपि सुभाषितं ग्राह्यम् ’ इति प्रमाणाद् यथाबुद्धि सप्रमाणमुपपादितं पक्षं यत् ‘ अथ शब्दानुशासनम् ’ इति वचनं भगवतो महाभाष्यकारस्यैव, न तु पाणिनेरिति स्वीकृत्य निष्पक्षपातं पन्थानं प्रशस्तं कुर्वन्तु धीधनाः।

व्याकरणसिद्धान्तसुधानिधिकारो निःसंशयेन पक्षमिमं स्वीकुर्वन्नाह – तत्र प्रवृत्तिं प्रति स्वविषय-विशेष्यकस्येष्टसाधनताज्ञानस्य हेतुत्वात् साधुशब्दज्ञाने वक्ष्यमाणेष्टसाधनत्वज्ञानवतां पुंसां शब्द-ज्ञानोपायाकाङ्क्षायां व्याकरणस्य शब्दज्ञानोपायत्वप्रदर्शनपरं भाष्यमवतरति – ‘ अथ शब्दानुशासनमिति ’

इममेव पक्षं महान् विद्वान् माध्वाचार्यः सर्वदर्शनसंग्रहे स्वीकृतवान् । तथा हि – ‘ नन्वयं प्रकृतिभागोऽयं प्रत्ययभागः ’ इति प्रकृतिप्रत्ययविभागः कथमवगम्यते इति चेत् पीतपातञ्जलानाम् एतच्चोद्यं चमत्कारं न करोति, व्याकरणशास्त्रस्य प्रकृतिप्रत्ययप्रतिपादनपरतायाः प्रसिद्धत्वात्। तथा हि पतञ्जलेर्भगवतो महाभाष्यकारस्येदमादिमं वाक्यं – ‘ अथ शब्दानुशासनम् ’ (म.भा. पस्पशा. 1-1-1) इति[452]। अस्य वाक्यस्य कश्चन विलक्षणोऽर्थः कृतो माध्वाचार्येण स प्रदर्श्यते प्रसङ्गात्।

अस्यार्थः – अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। अधिकारः प्रस्तावः, प्रारम्भः इति यावत्। शब्दानुशासनशब्देन च पाणिनिप्रणीतं व्याकरणशास्त्रं विवक्ष्यते। शब्दानुशासनमित्येतावदभिधीयमाने सन्देहः स्यात्, किं शब्दानुशासनं प्रस्तूयते न वेत्ति । तथा मा प्रयाङ्क्षीदित्यथशब्दं प्रायुङ्क्त । अथशब्दप्रयोगबलेनार्थान्तरव्युदासेन प्रस्तूयते इत्यस्यार्थस्याभिधीयमानत्वात् । अनेन हि वैदिकाः शब्दाः ‘ गौरश्वः पुरुषो हस्ती शकुनिः ’ इत्यादयश्चानुशिष्यन्ते। व्युत्पाद्य संस्क्रियन्ते प्रकृतिप्रत्यय-विभागवत्त्या बोध्यन्ते इति शब्दानुशासनम्।

---

[450] महाभाष्यम् – पस्पशा.

[451] अष्टाध्यायी – (1-1-1)

[452] सर्वदर्शनसङ्ग्रहे व्याकरणदर्शनप्रकरणे

अत्रेदमवधेयम् – नहि केवलं ‘ अथातो धर्मजिज्ञासा ’, ‘ अथातो ब्रह्मजिज्ञासा ’, ‘ अथ योगानुशासनम् ’ इति पूर्वोत्तरमीमांसायोगदर्शनसूत्रदर्शनमात्रेण तथैव सूत्रकाराणां शैलीति कल्पयितुं शक्यते, यतो हि महान् प्रमाणज्ञो भगवान् महर्षिः श्रीगौतमः प्रथमतो विनैवाथशब्दं सूत्रं प्रणिनाय। तथाहि – ‘ प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ’[453] इति।

अपि च यदीदं वाक्यम् ‘ अथ शब्दानुशासनम् ’ इति पाणिनिसूत्रं स्यात्, तर्हि महाभाष्यकारः पाणिनिसूत्रं व्याख्यानप्रकरणे एवास्यापि व्याख्यानं कुर्यात् । तथा तु न कृतमित्याद्यव्यतिरेक-निश्चयस्यापत्तिं प्रति प्रयोजकत्वादत्रेयमापत्तिरेवास्य वचनस्य भाष्यकारीयत्वसाधिका । महाभाष्ये तृतीयाह्निकत आरभ्य एव पाणिनिसूत्राणां विवरणं कृतम्। प्रथमाह्निके पस्पशाभिधे तु महाभाष्यकारः शब्दस्य स्वरूपम्, व्याकरणस्य प्रयोजनं व्याकरणस्य स्वरूपादिकञ्च निर्दधार । द्वितीयाह्निके च माहेश्वरसूत्राणां व्याख्यानं फलमवसरप्राप्तविषयान्तरविवेचनञ्च कृतम्। यदि चेत् ‘ अथ शब्दानुशासनम् ’ इति वाक्यं पाणिनीयं सूत्रमेव स्यात्, तर्हि तद्व्याख्यानान्तरं झटित्येव द्वितीयस्य पाणिनीयसूत्रस्यैव भाष्यं कृतं स्याद्। तथा तु न कृतम्, अपि तु चतुर्दशसूत्राणां विवेचनं कृतमिति दृश्यते। यदि च ‘ अथ शब्दानुशासनम् ’ इति वाक्यं पाणिनिसूत्रं स्यात्, तर्हि महाभाष्यकारस्तत्सूत्रव्याख्यानं पाणिनिसूत्र-व्याख्यासन्दर्भे कुर्यात्, किन्तु तथा तु न कृतम्। यतो हि पाणिनिसूत्रव्याख्यानं तृतीयाह्निकतः प्रारब्धम्। मध्ये द्वितीयाह्निके माहेश्वरसूत्राणां व्याख्या कृता । अस्य वचनस्य महाभाष्यकारीयत्वे तु न किमप्यनुपपन्नम्, यतो हि प्रथमाह्निके महाभाष्यकारो भूमिकारूपेण व्याकरणशास्त्रप्रयोजनभूतस्य शब्दसाधुत्वस्योद्देश्यभूतः शब्दः किं स्वरूपः ? तन्निष्ठसाधुत्वनिर्धारकं व्याकरणञ्च किमिति ? शब्दसाधुत्वं शब्दं वा निर्माति व्याकरणशास्त्रम्, उताहो ज्ञापयतीत्यादिगूढविषयान् विमृष्टवान् । द्वितीयाह्निकतस्तु सूत्राणां व्याख्यानं प्रारब्धम्। न्यायभाष्येऽपिभाष्यकारो वात्स्यानः प्रथमतः कतिभिः वाक्यैरवतरणं विधायैव सूत्रव्याख्यानमारब्धवान्। तथाहि –

‘ प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम् । प्रमाणमन्तरेण नार्थप्रतिपत्तिः, नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्। प्रमाणेन खल्वयं ज्ञातार्थमुपलभ्य तमर्थमभीप्सति, जिहासति वा। तस्येहाजिहासाप्रयुक्तस्य समीहाप्रवृत्तिरित्युच्यते। सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः। समीहमानः

[453] न्यायसूत्रम् – (1-1-1)

तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा । अर्थस्तु सुखं सुखहेतुश्च । सोऽयं प्रमाणार्थोऽपरिसंख्येयः, प्राणभृद्भेदस्यापरिसंख्येयत्वात् '[454] । इत्यादि ।

वेदान्तशास्त्रेऽपि ब्रह्मसूत्रभाष्यव्याख्यानावसरे आद्यशङ्कराचार्यो ब्रह्मसूत्राणां व्याख्यानतः प्राग् भूमिकारूपेण विषयावताररूपं स्ववाक्यं सारगर्भितं समायोजितवान् ।

तथैव न्यायभाष्येऽपि षोडशपदार्थेषु प्रमाणप्रमेयादिषु प्रथमतः प्रमाणमेकं वस्तु किमर्थं गृहीतम्, यतो हि प्रमाणमन्तरेणापि सर्वाः प्रवृत्तयो भविष्यन्त्येव । नहि केवलं प्रमाणज्ञा एव प्रवर्तन्ते सफला वा भवन्ति, किन्तु सर्वथैवाज्ञा अपि प्रमाणप्रमेयप्रभृतिपदार्थानविजान्त एव प्रवर्तन्ते लभन्ते च स्वाभीप्सितम् । अत एव ' पशुभिश्चाविशेषात् ' इति वचनं प्रमाण्यं बिभर्ति, अतः किमर्थं प्रमाणमभ्युपेयमिति प्रश्नस्य निवर्तनाय वात्स्यायनभाष्येऽन्यत्र चावतरणं भूमिकारूपं प्रवृत्तम् ।

तथैव प्रकृतेऽपि व्याकरणमहाभाष्ये पूर्वदर्शिताः प्रश्नाः स्वभावतो जायमानाः समाधेया एव महाभाष्यकृता इति तत्समाधानाय प्रवृत्तेन महर्षिणा भगवता पतञ्जलिना ' अथ शब्दानुशासनम् ' इति वचनेनानुषङ्गिकमङ्गलप्रयोजनकेनारम्भार्थाभिधायिना चाथशब्देन घटितेन भाष्यमारब्धवान् । नहि केवलमन्यशब्दं दृष्ट्वा सूत्ररूपतैवेति निर्णयोऽनाग्रहग्रहं जनयति । ब्रह्मसूत्रशाङ्करभाष्यव्याख्यानभूतायां श्रीवाचस्पतिमिश्रप्रणीतायां भामत्यामपि प्रथमस्य वचनस्य मङ्गलानन्तरं प्रवृत्तस्याथशब्दघटितत्वेऽपि सूत्रत्वाभावात् । तत्र हि – ' अथ यदसन्दिग्धमप्रयोजनञ्च न तत्प्रेक्षावत्प्रतिपित्सागोचरम् '[455] इत्यादिना प्रवृत्तं व्याख्यानम् । अतोऽनाग्रहेण प्रमात्मकग्रहेण वचनस्यास्य विषये इदमेव वक्तव्यं भवति यदिदम् ' अथ शब्दानुशासनम् ' इति न पाणिनिसूत्रम्, किन्तु महाभाष्यकारस्य पतञ्जलेरेवेदं प्रथमं वाक्यमिति ।

अत्र भीमसेनशास्त्रिणा प्रदत्ता शङ्का समाहिता ' प्रत्याहार – सूत्रो का निर्माता कौन ? ' इति नामके ग्रन्थे यथा – अथ शब्दानुशासनम् ' इति वाक्यं पाणिनिसूत्रं स्यात्, तर्हि महाभाष्यकारस्तत्सूत्र-व्याख्यानं पाणिनिसूत्रव्याख्यासन्दर्भे कुर्यात्, किन्तु तथा तु न कृतम् । यतो हि पाणिनिसूत्रव्याख्यानं तृतीयाह्निकतः प्रारब्धम् । मध्ये द्वितीयाह्निके माहेश्वसूत्राणां व्याख्या कृता । अस्य वचनस्य महाभाष्यकारीयत्वे तु न किमप्यनुपपन्नमिति चेन्न, ' अथ शब्दानुशासनम् ' इति वाक्यं पाणिनेरेव इति मतं येन स्वीकृतम्, तेन प्रत्याहारसूत्राणि पाणिनिनिर्मितान्येव स्वीकृतानि । अत एव न तत्प्रमाणमिदं वाक्यं पतञ्जलेरिति ।

---

[454] वात्स्यायनभाष्यम् – (पृ. 1)

[455] भामती – ब्रह्मसूत्रे – (1-1-1)

‘ अथ शब्दानुशासनम् ’ इति वचनं भगवतः पाणिनेः स्यात्, तदावश्यं भगवता तदनन्तरसूत्रेण द्वितीयेन अनुशासनकर्मत्वेन प्रतिज्ञातस्य शब्दस्य लक्षणं लक्षितं स्यात्। एवञ्च येषां केषाञ्चिन्मतेन यदि ‘ अथ शब्दानुशासनम् ’ इति वचनं भगवतः पाणिनेरेवादिमं सूत्रमिति पक्षो वर्त्तते, तदा द्वितीयं सूत्रं स्यात् “ वृद्धिरादैच् ” इति । किन्तु नात्र भगवान् पाणिनिः प्रतिज्ञातस्य शब्दस्य लक्षणं कृतवानिति सूत्रकारीयपद्धतिहानप्रसङ्गः । सूत्रकाराणां च तथैव शैली विद्यते यत्ते प्रतिज्ञातवस्तुनो लक्षणं प्रतिज्ञासूत्रानन्तरमेव चक्रुः। यदा च वचनमिदं भाष्यकारस्येति पक्षः समाश्रीयते, तदा न कापि क्षतिः इति चेन्न, ऋषिप्रणीतेषु कतिपयेषु ग्रन्थेषु एतस्मात् विपरीतमपि दरीदृश्यते । यथा – निदानसूत्रे – अथातश्छन्दसां नियचं व्याख्यास्यामः इति सूत्रेण ‘ छान्दस् ’ प्रतिज्ञाय भगवान् पतञ्जलिस्तदनन्तर-सूत्रेणैव छान्दसः लक्षणं न कृतवान्। संख्यातत्त्वसमासे – अथातस्तत्त्वसमासः इति सूत्रेण ‘ तत्त्वम् ’ इति प्रतिज्ञाय तदनन्तरमेव द्वितीयेन सूत्रेण किमपि तत्त्वस्य लक्षणं न कृतम्। सांख्यादर्शने – अथ त्रिविधदुःखाऽत्यन्तनिवृत्तिरत्यन्तपुरुषार्थः, सुश्रुते – अथातो वेदोत्पत्तिनामाध्यायं व्याख्यास्यामः इत्यादिष्वपि प्रतिज्ञानन्तरमेव द्वितीयेन सूत्रेण किमपि लक्षणं न कृतम्। तस्मात् पाणिनिना ‘ अथ शब्दानुशासनम् ’ इति वचनानन्तरं लक्षणं न कृतम्, तेन भाष्यकारस्य वचनमिदं न वक्तुं शक्यते।

अनया रीत्या विमर्शने कृते सति प्रबलप्रमाणदृढतरयुक्तिविमर्शमूलकतर्कसमर्थिततया कैयट-दीक्षित-विश्वेश्वरसूरि-नागेशप्रभृतयो विद्वांसः प्राचीनाः साम्प्रतिकाश्च भाष्यतत्त्वविदः ‘ अथ शब्दानुशासनम् ’ इति वचनं पतञ्जलेरेव मन्यन्ते तथैव मतमत्र दृढप्रमाणत्वेन स्वीकार्यमिति । गुणदोषादिविषये ते एवात्र प्रमाणम्। अतोऽल्पमतिरयं जिज्ञासुः विद्वद्भिः युक्तायुक्तविषयेऽनुग्राह्य इति अभ्यर्थनां विज्ञापयति विनीतः सविनयम्।

(ख) प्रत्याहारसूत्राणि

व्याकरणे साधवः शब्दा अभिधेयाः। तेषां शब्दानां प्रत्येकमुच्चार्य बोधनन्त्वसम्भवम्, कुतः ? शब्दानामानन्त्यात्। तथा चोक्तं भाष्यकृता अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते – बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो नान्तं जगाम। किम्पुनरद्यत्वे यः सर्वथा चिरञ्जीवति स वर्षशतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति। आगमकालेन (अध्ययनकालेन), स्वाध्यायकालेन (अभ्यासकालेन), प्रवचनकालेन (अध्यापनकालेन), व्यवहारकालेन (

यागादिकर्मण्युपयोगकालेन) तत्रागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात् । तस्मादनभ्युपायः शब्दानां प्रतिपतौ प्रतिपदपाठ इति ।

तस्मात्सामान्यविशेषलक्षणेनैव शब्दा बोद्धव्या इत्यतः साधुशब्देषु कति वर्णा इष्टा इति सूचयितुं प्रत्याहारद्वारा लाघवेन सूत्रं निर्मातुञ्च महेश्वरोपदिष्टमक्षरसमाम्नायमाह –

- **अइउण्**

अत्र वृत्तिः – ‘ अ, इ, उ ’ इत्येतान् वर्णानुपदिश्यन्ते णकारमितं करोति (पाणिनिराचार्यः) प्रत्याहारार्थम् । स णकार एकेन आदिना अकारेण गृह्यते “ उरण् रपरः ” (1-1-50) इत्यादिषु सुत्रेषु । अकारोऽत्र विवृतः प्रतिज्ञायते सावर्ण्यार्थम् ।

भाष्यम् – ‘ अकारस्य विवृतोपदेश आकारग्रहणार्थः ’ ।

अकारः संवृत इति शिक्षावाक्यात् संवृतप्रयत्नस्य ह्रस्वाकारस्य विवृतप्रयत्नैर्दीर्घप्लुताकारैः सह सावर्ण्याभावात् कथम् “ अस्य च्वौ ”[456] इत्यादौ दीर्घग्रहः ? “ अणुदित्सवर्णस्य चाप्रत्ययः ”[457] इति सूत्रेण सवर्णानामेव ग्रहणोक्तेः । भिन्नप्रयत्नानां च सावर्ण्याभावात् । एवमिह अग्निदत्त इत्यत्र “ गुरोरनृतोऽनन्त्यस्याप्येकैकस्यप्राचाम् ”[458] इति सूत्रेण प्लुताकारेण सह सवर्णदीर्घो न स्याद् अत एव विवृत एवाकारोऽत्रोपदिष्टः । अत्र भाष्यम् –

‘ अकारस्य विवृतोपदेश आकारग्रहणार्थः ’ इति ।

अत्र च शास्त्रान्ते “ अ अ ”[459] इति प्रत्याप्रत्तिसूत्रं ज्ञापकम् । व्याकरणशास्त्रस्येदमन्तिमं सूत्रं द्विपदम् । अस्मिंश्च प्रथमोऽकारो विवृतः, द्वितीयः संवृतः, विवृतोऽप्यकार उच्चारणकाले संवृतो भवति । अयम्भावः – अ इति विवृतत्वविशिष्टम् अ इति च संवृतत्वविशिष्टम् अकारमुच्चार्य विवृतोपद्देशेन संवृताकारो विधीयते । सविशेषणे हीति न्यायेन संवृतत्वस्यैव विधेयत्वपर्यवसानम् । अकारस्य च संवृतत्वे शास्त्रीयप्रक्रियादशायामाश्रीयमाणे संवृतत्वविधिवैयर्थ्यापत्तेः । ततः पूर्वमकारो विवृतः प्रतिज्ञायत इति प्रक्रियादशायां वा न दोषः । शास्त्रान्ते विहितस्य संवृतत्वस्य संपूर्णशास्त्रं प्रत्यसिद्धत्वात् । आकारस्य विवृतत्वं च पाणिनीयशिक्षायामुक्तम् –

स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् ।

---

[456] अष्टाध्यायी – (7-4-32)

[457] अष्टाध्यायी – (1-1-69)

[458] अष्टाध्यायी – (8-2-86)

[459] अष्टाध्यायी – (8-4-68)

तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ।।

स्वरपदमेज्भिन्नपरम् ह्रस्वाकारान्यपरं च । संवृतोऽकार इति शिक्षान्तरोक्तेः । एवं च ह्रस्वान्याकारस्य इउऋलृवर्णानां च विवृतत्वम् ।

अयम्भावः – " तुल्यास्यप्रयत्नं सवर्णम् " इति तुल्यताल्वादिस्थानानां तुल्याभ्यन्तरप्रयत्नानां च वर्णानां सवर्णसञ्ज्ञा विधीयते । " अणुदित्सवर्णस्य चाप्रत्ययः " इति सूत्रमाध्यमेन अविधीयमानश्चाण् सवर्णानांग्राहको भवति । तत्र अकारस्य अष्टादश भेदाः प्रोक्ताः । ह्रस्वदीर्घप्लुतेतिभेदेन त्रिविधोऽकारः पुनः प्रत्येकमुदात्तानुदात्तस्वरितेतिभेदेन त्रिविधः सन् नवविधः, सोऽपि प्रत्येकमनुनासिकाननुनासिक-भेदेन द्विविधः, एवमष्टादशधाऽकारो भवति । एवमिकारादयोऽपि । तत्राभ्यान्तरप्रयत्नेषु अचां विवारः प्रयत्नः, ह्रस्वस्य तु अवर्णस्य संवृतः । ततश्च अकारस्य आकारादिना प्रयत्नभेदात् परस्परं सवर्णसञ्ज्ञाऽभावे ग्रहणकशास्त्रेण अकार आकारादीन् न गृह्णीयात् । अतोऽत्र सूत्रेऽकारो विवृत उपदिश्यते, ततश्च तुल्यप्रयत्नतया सवर्णः सन् आकारादीन् गृह्णाति । शास्त्रान्ते च " अ अ " इति प्रत्यापत्तेः प्रयोगकालेऽकारः संवृतो भवति, शास्त्रजन्यप्रक्रियायान्तु विवृतः, " पूर्वत्रासिद्धम् "[460] इत्यस्याधिकारत्वात् " अ अ " इत्यस्य सम्पूर्णामष्टाध्यायीं प्रत्यसिद्धत्वात् । काशिकायाञ्चोक्तम् – ह्रस्वमवर्णं प्रयोगे संवृतम् दीर्घप्लुतयोस्तु विवृतत्वम् । तेषां सावर्ण्यप्रसिद्ध्यर्थमकार इह शास्त्रे विवृतः प्रतिज्ञायते ।

भाष्यम् – ' वृत्तिसमवायार्थो वर्णानामुपदेशः ' इति । प्रत्याहारद्वारा वर्णानामुपदेशः पाणिनेः लाघवेन शास्त्रप्रवृत्त्यर्थ इत्यर्थः, ' इष्टबुद्ध्यर्थश्च ' इति च । व्याकरणे इष्टानां वर्णानां ज्ञानार्थ इत्यर्थः । इत्सञ्ज्ञकवर्णविशिष्टवर्णोपदेशफलम् अकारादिणन्तादिवर्णानुदिश्य ' अण्, अक् ' इत्यादि सञ्ज्ञाकरणम् । एतेन णकारादीनाम् ' ञमङणनम् ' इत्यत्र प्राधान्येनोपदेशसत्त्वात् ' अइउण् ' इत्यादिषु णकाराद्युपदेशो व्यर्थं इत्यपास्तम् । तेन लाघवेन सूत्रनिर्माणं पाणिनेः सिध्यति । अन्यथा अणादि-बोध्यप्रत्येकवर्णमुच्चार्य्य कार्यविधाने महागौरवं स्यादिति भावः । अत एव काशिकायामुक्तम् – अथ किमर्थो वर्णानामुपदेशः ? प्रत्याहारार्थः, प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थरिति [461] । भट्टोजिदीक्षितेन चोक्तम् वैयाकरणसिद्धान्तकौमुद्याम् – आदिरन्त्येन.....(सू. 2) इत्येतत्सूत्रेण कृताः सञ्ज्ञाः प्रत्याहार-शब्देन व्यवह्रियन्ते[462] । अ इ उ..... इत्यादिक्रमेण वर्णविशेषान् उपदिश्य प्रतिसूत्रञ्चान्ते

---

[460] अष्टाध्यायी – (8-2-1)

[461] काशिका प्रत्याहारप्रकरणम्

[462] वैयाकरणसिद्धान्तकौमुदी – संज्ञाप्रकरणम्

क्रमविशेषसन्निवेशापेक्षणकारककारादिकमेकैकमनुबन्धमासज्य अन्त्येनानुबन्धेन सह आदिः कश्चित् मिलित्वा आदिविशिष्टानाम् आद्यन्तपदाक्षिप्तमध्यगानां सञ्ज्ञा क्रियते ' प्रत्याहार ' पदवाच्या " आदिरन्त्येन सहेता "[463] इति वक्ष्यमाणसूत्रेण । प्रत्याहारेण च व्यवहारे लाघवं भवति, संज्ञाकरणस्य लघ्वर्थत्वात् । यथा – ' अच् ' इति प्रत्याहारेण सर्वेऽपि स्वरवर्णाः, ' हल् ' सञ्ज्ञया सर्वेऽपि व्यञ्जनवर्णाः, ' अल् ' इति सञ्ज्ञया तु सर्वाण्यपि स्वरव्यञ्जनानि साकल्येन बोध्यन्ते । तदेवं लाघवेन शास्त्रप्रवृत्त्यर्थं प्रत्याहारकरणम्, अन्तेऽनुबन्धकरणञ्च ।

अत्र चायं रचनाक्रमः – प्राधान्यात् प्रथमस्वराः । तत्र अ इ उ इति प्रथमसूत्रं मूलस्वरत्वात् । रेफलकाररूपव्यञ्जनांशोपस्कृताभ्यां ऋलृभ्यां द्वितीयम् । ' अ + इ = ए, अ + उ = ओ ' इति मूलस्वरद्वयसंकीर्णाभ्यां एओभ्यां तृतीयम् । ' अ + अ = आ, आ + इ = ऐ, आ + उ = औ ' इति संसृष्टाकारविशिष्टसङ्कररूपाभ्यां ऐऔभ्यां चतुर्थम् । ए, ओ, ऐ, औइत्येते स्वराः सङ्कररूपत्वात् सन्ध्यक्षराणीत्युच्यन्ते । स्वरानन्तरं स्वराणां पूर्वव्यञ्जनानां च मध्यपतितत्वात् मध्यमव्यपदेशभाग्भिः यवरलैः पञ्चमषष्ठे सूत्रे । ' इ उ ऋ लृ ' इति स्वराणां ' यवरल ' इति मध्यमानां च सगर्भ्याणां भ्रातृणामिव कोऽपि सजातीयो धर्मः प्रकटमुपलभ्यते, तत्र ' इ उ ऋ लृ ' इति स्वराणां क्रममनुसर्त्तुं ' यवरल ' इति (यरलव इति लौकिकक्रमात् भिन्नः) क्रम उपात्तः । मध्यमानन्तरं वर्ग्याः पठ्यन्ते । ते च साम्प्रदायिकीं रीतिमुल्लङ्घ्य विवारयत्नवतो वर्णान् पृथक्, श्वासयत्नवतो वर्णान् पृथक् इत्यादि भङ्ग्या सङ्घीकृत्य (अनुनासिकसंज्ञका घोषयत्नका अल्पप्राणयत्नकाश्च वर्णा इति) व्युत्क्रमेण परिगणिताः । वर्ग्येभ्यःपर उष्माणा वर्णाः पठिताः । सूत्रसीवने च मध्ये मध्ये विच्छेदद्योतनार्थमिव ' ण्, क्, ङ् ' इत्यादयः केवल-व्यञ्जनरूपा ग्रन्थयो निवेशिताः । अन्ते श्रूयमाणानामेषा केवलव्यञ्जनानां ' इत् ' इति सञ्ज्ञा कृता । अन्यत्रापि (आगमादेशप्रत्ययादिषु) इत्सञ्ज्ञितानि व्यञ्जनान्यायोजयत्याचार्यः । इत् नानाप्रकाराणि प्रयोजनान्युद्दिश्य चकार । अक्षरसमाम्नाये तावत् इता प्रत्याहारः प्रयोजनम् । प्रत्याहारो नाम मध्यपतितानां ग्रहणाय आद्यान्तयोर्मेलनम् । तथाहि – उद्दिष्टमेकमक्षरमादाय तेन सह सूत्रान्त-पठितानामितां योजनेन सम्पादितः शब्दो मध्यगतानां वर्णानां सञ्ज्ञा भवति " आदिरन्त्येन सहेता " इति वचनात् । यथा – ' अच् ' इति स्वराणां प्रत्याहारः, ' हल् ' इति व्यञ्जनानाम्, ' अल् ' इति वर्णमात्रस्य । ' खर् ' इति विवारसंवाराघोषाणाम्, ' हश् ' इति संवारनादघोषाणाम्, ' जश् '' यण् ' चेति अल्पप्राणानाम्, ' झष् '' शल् ' चेति महाप्राणानाञ्च सञ्ज्ञा भवति । अनियतसंख्याकैर्वर्णैः सूत्र-करणमपि प्रत्याहारसौकर्यार्थमेव

[463] अष्टाध्यायी – (1-1-71)

‘ अइउण् ’ इति सूत्रेऽन्ये विचारणीया ये विषयाः तेऽधः प्रदृश्यन्ते

- **सन्ध्यभावस्य विचारः –**

‘ अइउण् ’ इत्यत्र अकारस्य इकारे परे “ आद्गुणः ” इति सूत्रेण गुण एकारः स्यात्, तदेवैकारस्य उकारेऽचि परे “ एचोऽयवायावः ”[464] इति सूत्रेण अयादेशः स्यात्, ननु तत्सन्धिः कथं न क्रियते ? इति सन्धिविषयिणी जिज्ञासोदेति ।

स्यादेतत्, इह स्वरसन्धिना भाव्यम् । तत्र अ इत्यत्र विभक्तेः रोः स्थाने “ भोभगोअघोअपूर्वस्य योऽशि ”[465] इति सूत्रेण यादेशः स्यात्, तस्य यकारस्य “ लोपः शाकल्यस्य ”[466] इति सूत्रेण लोपः स्यात् । अतोऽत्र ‘ वृक्ष इह ’ इत्यादाविव लोपासिद्ध्या सन्धिर्नेति समाधानेऽपि, इकारस्य “ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ”[467] इति सूत्रेण इकारस्य ह्रस्वः स्यात्, ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः, ऋकारस्य लृकारे परे “ ऋत्यकः ”[468] इति सूत्रेण प्रकृतिभावाच्च समाधानसम्भवेऽपि ‘ एओङ् ’,‘ ऐऔच् ’ इत्यत्र एकारस्य ओकारे परे, ऐकारस्य औकारे परे च “ एचोऽयवायावः ” इति सूत्रेण एकारैकारयोः स्थाने ‘ अय् ’‘ आय् ’ एतावादेशौ दुर्वारौ

अस्य समाधानं त्वेवं वर्तते यद् स्पष्टप्रतिपत्त्यर्थं गुणादीनामभावः ।

यद्वा अत्र सौत्रत्वात् सन्धिर्न भवति । यथा – “ भोभगोअघोअपूर्वस्य योऽशि ” इति सूत्रे असन्धि सौत्रः । ‘ अइउण् ’ इत्यादीनां चतुर्दशसूत्रत्वव्यवहारस्तु चतुर्दशानुबन्धघटितत्वात् ।

यद्वा वर्णानामसन्दिग्धत्वेन बोधनाय संहिताविरहान्न स्वरसन्धिः भवति । अत एव असंहितायां यणादिनिवृत्त्यर्थो हि “ परः सन्निकर्षः संहिता ”[469] इति सूत्रेण संहिताधिकारः ज्ञेयः । उक्तञ्च –

संहितैकपदे नित्या   नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ।। इति ।

एकमेव पदमित्येकपदम्, तत्र संहिता नित्या । यथा – ‘ राजयति अस्य राजानमिच्छति ’ इति विग्रहे क्यच्प्रत्ययेन निष्पन्नस्य समुदायस्य तिङन्तत्वेन पदत्वात् उत्तरखण्डस्य ‘ यति ’ इत्यस्य च अपदत्वाद् एकपदत्वम् । धातूपसर्गयोः संहिता नित्या । यथा – ‘ प्रेक्ष्यते, पर्यभूषयत् ’ इत्यादौ नियमेन

[464] अष्टाध्यायी – (6-1-77)
[465] अष्टाध्यायी – (8-3-17)
[466] अष्टाध्यायी – (8-3-19)
[467] अष्टाध्यायी – (6-1-125)
[468] अष्टाध्यायी – (6-1-126)
[469] अष्टाध्यायी – (1-4-109)

धातूपसर्गयोः संहिता विवक्षा अत एव यण्घटित प्रयोग एव साधुः । समासे संहिता नित्या अवान्तरपद-विभागाभावात् समासे ह्येकपदत्वात् । यथा – ‘ देवेन्द्रः ’ । सा संहिता वाक्ये विवक्षां वक्तुमिच्छापेक्षते । यथा – ‘ हे रोहिणि त्वमसि शीलवतीषु धन्या एनं निवारय पतिं सखि दुर्विनीतम् ’ इत्यत्र धन्या एनमित्यस्य संहिताविरहात् सन्धिः न भवति । अत्र विवक्षाधीना संहिता ज्ञेया । तेन वाक्ये विवक्षितः सन्धिर्भवति न त्वविवक्षित इति ।

ननूक्तरीत्या ‘ अइउण् ’ इत्यादीनां सुबन्तत्वतिङन्तत्वयोरभावेन पदत्वाभावात् पदसमूहरूप-वाक्यत्वस्यैवाभावसत्त्वात् अवाक्यत्वाद्वाक्यीयाऽविवक्षा कथमत्रेति चेत् ।

तत्र परिनिष्ठितत्वेन सुबन्तपदतुल्यपरिनिष्ठितसमूहस्यापि वाक्यत्वेन ग्रहणेनादोषात् । अत एव ‘ गो इत्ययमाह ’ इत्यत्र गोशब्दस्य अपदत्वेन वाक्यघटकत्वाभावेपि संहिताया अविवक्षा सिद्धा ।

ननु वाक्ये संहिताया अनित्यत्वादिति तच्चिन्त्यम् परस्परार्थान्वयप्रतियोग्यर्थानुपस्थापकत्वेन वाक्यत्वाभावात् ।

‘ अइउण् ’ इत्यादिषु वृद्धोक्त्या वाक्ये संहिताया अविवक्षा सुगमा । न च ‘ सुप्तिङन्तचयो वाक्यम् ’ इति लक्षितवाक्यत्वस्याप्यभावादविवक्षाया अप्यभावः, कारिकायां वाक्यपदेन एकपद-समास-धातूपसर्गभिन्नस्य शिष्टोच्चरितशब्दसमुदायस्य विवक्षितत्वात्, तादृशसमुदायत्वस्य ‘ अइउण् ’ इत्यादावक्षतत्वात् ।

यद्वा ‘ अ इ उ ’ इत्यादीनां स्वरत्वात् ‘ उपसर्गविभक्तिस्वरप्रतिरूपकाश्च ’ इति चादिगणान्तर्गत-सूत्रेण चादित्वबोधनेन निपातत्वात् “ निपात एकाजनाङ् ”[470] इति सूत्रेण प्रगृह्यसञ्ज्ञायाम् “ प्लुतप्रगृह्या अचि नित्यम् ”[471] इति सूत्रेण प्रकृतिभावेन सन्धिः न भवति ।

‘ अइउण् ’ इत्यादौ वर्णसमाम्नायो स्वरसन्धिस्तु न प्रवर्तते, वर्णोपदेशकालेऽजादि-सञ्ज्ञानामनिष्पादादिति कैयटः । तन्मतं कौस्तुभे दीक्षितेन निरस्तम् । उद्द्योते नागेशभट्टेन कैयटमतनिरासे दीक्षितोक्तवाक्यानि तत्र तत्र यथायथं स्वीकृतानि ।

---

[470] अष्टाध्यायी – (1-1-14)

[471] अष्टाध्यायी – (6-1-123)

* **विभक्त्यभावस्य विचारः**

ननु ‘ अइउण् ’ इत्यत्र विभक्तेरनुत्पादेन पदत्वासम्भवात्, पदत्वन्तु “ सुप्तिङन्तं पदम् ”[472] इति सूत्रेण विभक्त्यन्तं पदमिति पदसञ्ज्ञाविधानात् । अतोऽत्र ‘ अपदं न प्रयुञ्जीत ’ इति भाष्यवचनेन ‘ अइउण् ’ इति प्रयोगार्हः कथं स्यात् ? ।

अपदं न प्रयुञ्जीतेति निषेधस्तु अपरिनिष्ठितपरत्वेन ग्रहणेनादोषात् ।

नन्वेवमपि चात्र प्रतिवर्णं यद्यपि स्वरूपस्य धात्वादिस्थस्य वाऽनुकार्यस्याकारादेरुपस्थापकम्, अर्थोपस्थापकत्वरूपार्थवत्त्वेन च प्रातिपदिकत्वाद्विभक्त्युत्पत्त्या भाव्यम्, तथापि विभक्त्यश्रवणे को हेतुरित्याशङ्कोदेति ।

‘ अ इ उ ’ इत्यादीनां स्वरत्वात् ‘ उपसर्गविभक्तिस्वरप्रतिरूपकाश्च ’ इति चादिगणान्तर्गतसूत्रेण चादित्वबोधनेन निपातत्वम् “ स्वारादिनिपातमव्ययम् ”[473] इति सूत्रेण अव्ययसञ्ज्ञा भवति तया अव्ययासञ्ज्ञया उत्पन्नाया अपि विभक्तेः “ अव्ययादप्सुपः ”[474] इति सूत्रेण लुक् भवति ।

ननु ‘ हयवरट् ’ इत्यादीनां स्वरत्वाभावत्वेन निपाताव्ययसञ्ज्ञारहितत्वाद्चेत्यादिना तेभ्यो निष्पन्नाया विभक्तेः लुग् न भवति । अत एवात्र विभक्त्युत्पत्त्या भाव्यम् तथापि विभक्त्यश्रवणे को हेतुरिति शङ्का पुनरुदेति ।

अस्य समाधानं शब्दकौस्तुभे भट्टोजीदीक्षितेनेत्थं कृतम् - अत्र अकारादीनां स्वरूपेण अनुकार्येण वा सतोऽप्यर्थवत्त्वस्याविवक्षितत्वात्प्रातिपदिकत्वं नेति ‘ गवित्ययमाह ’ इत्यादाविव विभक्तेरनुत्पात्तिः “ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ”[475] इति सूत्रेण लुग्वा (इयमेवमानुपूर्वीका श्रुतिरेवेति सुपामिति लुगिति तत्त्वम्) ‘ छन्दोवत्सूत्राणि ’ इति भाष्यकारेष्ट्या छन्दोगेषु व्याकरणसूत्रेष्वपि छान्दसकार्यातिदेशात् “ यू स्त्र्याख्यौ नदी ”[476] इति सूत्रे छन्दःप्रदेशेषु गौणमुख्यन्यायो न प्रवर्त्तते इति वक्ष्यमाणत्वाद्वा[477] । प्रदीपेऽपि कैयट एवं समाधानं कृतवान् अत्राकारादीनां स्वरूपेणानुकार्येण वा सतोऽप्यर्थवत्त्वस्याविवक्षितत्वाद्विभक्त्यनुत्पत्तिः । अत्र अर्थवत्त्वस्याविवक्षितत्वाद्विभक्त्यनुत्पत्तिः इति कैयटवचनं व्याचक्षाणो नागेशस्तु एवं प्रत्यपीपदत् – शब्दजन्यज्ञानविषयो हि शब्दस्यार्थः । एवं च

---

[472] अष्टाध्यायी – (1-4-14)

[473] अष्टाध्यायी – (1-1-37)

[474] अष्टाध्यायी – (2-4-82)

[475] अष्टाध्यायी – (7-1-39)

[476] अष्टाध्यायी – (1-4-3)

[477] शब्दकौस्तुभः – अइउण् इति सूत्रे

स्वरूपमपि स्वजन्यबोधविषयत्वेनार्थः । अनुकार्यमर्थ इति तु स्पष्टमेव । एवं विद्यमानस्याप्यर्थवत्त्वस्य अविवक्षितत्वात् – ' अर्थवत् ' सूत्रेऽग्रहणादित्यर्थः । स्वरूपस्य श्रोत्रगृहीतस्यैव शाब्दे भानोपपत्तौ न तत्र शक्तिः कल्प्या । अनुकार्यं च सादृश्येनोपस्थापयतीति न तत्रापि वृत्तिः । वृत्त्याऽर्थबोधकत्वं चार्थवत्त्वं ' अर्थवत् ' सूत्रे निविष्टमिति भावः । अनुकरणत्वभङ्गान्न विभक्तिरिति तत्त्वम्, सौत्रत्वाद्वा । अर्थात् केयटमतेन अर्थवत्त्वसद्भावेऽपि तस्याविवक्षिततया प्रातिपदिकत्वाभावः । नागेशस्तु एतन्मतमसहमान आह – यद् स्वरूपबोधकतारूपाऽनुकार्योपस्थापकतारूपा वा याऽर्थवत्ता अकारादावस्ति, न सा प्रातिपदिकत्वोपयोगिनी । प्रातिपदिकसञ्ज्ञाविधायकसूत्रे हि वृत्त्याऽर्थविषयकबोधजनकत्वरूपम् अर्थवत्त्वम् । अनुकरणं ह्यनुकार्यानुकरणयोरभेदविवक्षापक्षे न वृत्त्यानुकार्यमुपस्थापयति, किन्तु सादृश्य-ज्ञानाधीनम् । स्वरूपन्तु श्रोत्रगृहीतत्वमात्रेण शाब्दे भासते इति न तत्राऽपि वृत्तिः । एवञ्च वृत्त्याऽर्थबोधकतारूपार्थवत्त्वादेव न प्रातिपदिकसञ्ज्ञा, ततश्च विभक्त्यभावः ।

अत्रेदं समीक्षणम् – अनुकार्यानुकरणयोरभेदविवक्षापक्षे अनुकरणेन अनुकार्यस्यसादृश्य-ज्ञानाधीनोपस्थित्या वृत्तिमत्त्वरूपार्थवत्त्वाभावाद् न प्रातिपदिकत्वम् । अयम्भावः – ' अइउ ' इत्यादीनि चतुर्दशसूत्राणि श्रुतेः अनुकरणरूपत्वेन अनुकार्यानुकरणयोरभेदविवक्षापक्षे अनुकरणेन अनुकार्यस्य सादृश्यसम्बन्धेन उपस्थिततया शक्तिलक्षणान्यतरज्ञानाधीनोपस्थित्या अर्थविषयकबोधजनकस्यैव अर्थवत्सूत्रे अर्थवत्पदेन ग्रहणात् प्रकृते सादृश्यसम्बन्धेन उपस्थितस्य अनुकार्यस्य बोधकत्वेन अनुकरणस्य तथाविधार्थबोधकत्वाभावन्न प्रातिपदिकत्वम् । अतस्तत्र पक्षे नागेशेन प्रोक्तं युक्तम् । यत्र तु भेदविवक्षापक्षः तत्र अनुकार्यनिरूपितायाः शक्तेः अनुकरणे स्वीकारात् शक्त्या अर्थबोधकत्वेन अर्थवत्त्वात् प्रातिपदिकत्वेऽवश्यं विभक्त्युत्पत्तिः स्यात् । पक्षद्वयस्यापि सूत्रकारसम्मतत्वात् । अभेदविवक्षायाम् ' भू सत्तायाम् ' इत्यविभक्तिनिर्देशात् । भेदविवक्षायान्तु " भुवो वुग्लुङ्लिटोः "[478] इति सविभक्तिकनिर्देशात् । अत एव नागेशः सौत्रत्वाद्वा इति समाधानान्तरमाह भेदविवक्षापक्षं तथा ' हयवरट् ' इत्यादीनां स्वरत्वाभावत्वेन निपाताव्ययसञ्ज्ञारहितत्वाद् चेत्यादिना तेभ्यो निष्पन्नाया विभक्तेः लुग् न भवतीति पक्षं मनसिकृत्येति मन्यामहे । न च भेदपक्षे सुबन्तत्वेन द्वन्द्वापत्तिः, अनुकरणे सह विवक्षाया अभावात् ।

[478] अष्टाध्यायी – (6-4-88)

- **कारप्रत्ययाभावस्य विचारः**

यदीमेऽकारादयो वर्णवाचकास्तर्हि ‘ वर्णात्कारः ’[479] इति वार्त्तिकेन तेभ्यः कारप्रत्ययः कथं न भवति ? तदभावे तु ‘ अइउण् ’ इत्यादयो न वर्णवाचका इति विज्ञेयमिति शङ्कायाः शब्दकौस्तुभे भट्टोजीदीक्षितः समाधानमाह – कारप्रत्ययस्तु न भवति बहुलग्रहणात् । स हि रोगाख्यायां ण्वुल् बहुलम् (पा.सू. 3-3-108) इत्यत्रोपसंख्यातः ।

अन्तरमपि समादधात् दीक्षितः – अन्ये तु ‘ इक्श्तिपौ धातुनिर्देशे ’ (वार्त्तिकम्) इत्यतो निर्देशशब्दः कारप्रत्ययविधावनुवर्तते । निर्देशश्च प्रतिपादनम् । तेन प्रयोगविशेषनिर्दिष्टानां वर्णानां प्रतिपादने प्रत्ययः, इह तु आनुपूर्वीसम्पादनमात्रे तात्पर्यम्, न तु ‘ कविपुत्र ’ इत्यादौ दृष्टानामकारादीनां प्रतिपादने । अतः कारप्रत्ययाभाव इत्याहुः[480] । एतच्च समाधानं नास्मदीयेन मनसा समाधेयम्, अकारादीनामनुकरणतया अनुकार्यस्य धात्वादिस्थस्याकारादेः प्रतिपादकतायाः पूर्वमेव प्रतिपादितत्वात् स्वरूपबोधकत्वाच्च ।

यद्वा अनुकार्यानुकरणयोरभेदविवक्षापक्षे तु अर्थवत्त्वस्याविवक्षिततया वर्णवाचित्वाभावात्कार-प्रत्ययाभावः ।

यद्वा वार्त्तिकं दृष्ट्वा सूत्रकृतः प्रवृत्त्यसम्भवान्न कारप्रत्ययः ।

ननु ‘ ण् ’ इत्यनुबन्धस्य ‘ अइउण् ’ ‘ लण् ’ इत्युभयत्र करणेन अण्प्रत्याहारेइण्प्रत्याहारे च सन्देहः स्यादिति चेन्न, ‘ सन्देहे व्याख्यानतो निर्णयः कर्तव्यः ’ इत्यर्थस्यभाष्यकृतैवोक्तत्वात् । तथा हि – “ अणुदित्सवर्णस्य चाप्रत्ययः ”[481] इत्येतत्परिहाय पूर्वेणाण्ग्रहणम्, परेणेण्ग्रहणम्, इति व्याख्यास्यामः इति । तदुक्तम् –

परेणैवेण्ग्रहाः सर्वे पूर्वेणैवाण्ग्रहा मताः ।
ऋतेऽणुदित्सवर्णस्येत्येतदेकं परेण तु ।। इति ।

एतत्सूत्रस्थेनान्त्येनेता णकारेण सह आदिरकारः ‘ अण् ’ प्रत्याहारो भवति अ इ उ वर्णानां वाचकः । तस्य विधिप्रदेशाः “ अणोऽप्रगृह्यस्यानुनासिकः ”[482] इत्यादयः ।

---

479 अष्टाध्यायी – (3-3-108 सूत्रे वार्त्तिकम्)
480 शब्दकौस्तुभे ‘ अइउण् ’ सूत्रे
481 अष्टाध्यायी – (1-1-69)
482 अष्टाध्यायी – (8-4-57)

- **ऋलृक्**

वृत्तिः – ऋ लृ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ककारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति त्रिभिः अ-इ-उ इत्येतैः। अक् - अकः सवर्णे दीर्घः (6-1-97)। इक् – इको गुणवृद्धी (1-1-3)। उक् – उगितश्च (4-1-6)॥

भाष्यम् – लृकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः

‘ ऋलृक् ’ ककारोऽगादिप्रत्याहारार्थः। नन्वक्षरसमाम्नाये लृकारोपदेशस्य किमपि प्रयोजनं न दृश्यते। यच्च कथञ्चिद् दृश्यते तदपि क्लृपिस्थस्यैव क्लृपेश्च लत्वस्याऽसिद्धत्वात् ऋकारस्यैवाच्कार्याणि भविष्यन्ति। तन्नास्ति वर्णसमाम्नाये लृकारोपदेशस्य किञ्चित्फलमिति चेन्न, ‘ हे क्लृ3प्तशिख ’ इत्यादौ “ गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ”[483] इति सूत्रेण प्लुतार्थम्, ‘ प्रक्लृप्त ’ इत्यत्र “ उदात्तादनुदात्तस्य स्वरितः ”[484] इति सूत्रेण स्वरितार्थम्, ‘ क्लृप्तवान् ’ इत्यत्र “ अनचि च ”[485] इति सूत्रेण द्वित्वार्थम्, तदुपदेशस्य चारितार्थ्यात्। न च “ कृपो रो लः ”[486] इत्यनेनोक्तस्थले “ पूर्वत्रासिद्धम् ”[487] इत्यनेन लत्वस्यासिद्धत्वाद् ऋकारबुद्ध्या पूर्वोक्तानि अच्कार्याणि स्युरितिवाच्यम्, प्लुत-स्वरित-द्वित्वविधायकशास्त्राणाम् “ कृपो रो लः ” इति सूत्रापेक्षया परत्रिपादीस्थत्वेन तद्दृष्ट्याऽसिद्धत्वासम्भवात्, कयाचिद् ‘ ऋतक ’ इति प्रयोक्तव्ये ऋकारस्य वक्तुमशक्यतया ‘ लृतक ’ इति प्रयुक्ते तस्यानुकरणे ‘ कुमार्य्य्लृतकः ’ इत्याह इत्यत्र यणर्थञ्च तस्यावश्यकत्वात्।

ननु विधिप्रदेशेषु ऋकारेणाष्टादशस्वभेदानामिव द्वादशलृवर्णभेदानामपि ग्रहसम्भवाद् इह लृकारोपदेशो व्यर्थः।

न च मूर्द्धदन्तरूपस्थानभेदेन सावर्ण्याभावात् कथं ग्रहणकशास्त्रप्रवृत्तिरिति वाच्यम्।

‘ ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् ’ इति वाचनिकसावर्ण्येन तत्सिद्धिः। न च तदेव नारभ्यमिति वाच्यम्।

---

[483] अष्टाध्यायी – (8-2 86)

[484] अष्टाध्यायी – (8-4-66)

[485] अष्टाध्यायी – (8-4-47)

[486] अष्टाध्यायी – (8-2-18)

[487] अष्टाध्यायी – (8-2-1)

“ उपसर्गादृति धातौ ”[488] इति सूत्रात् “ वा सुप्यापिशलेः ”[489] इत्यत्र ऋतीत्यनुवृत्त्या प्राल्कारीयतीत्यत्रवृद्धिविकल्पप्रवृत्त्यर्थं तदावश्यकत्वात् ।

अत एव अकाराद्युपदेशे यथा तत्सवर्णानामाकारादीनां लाभात्पृथगाकारादयो नोपदिष्टास्तथा ऋलृवर्णयोरपि सावर्ण्यात् ऋकारोपदेशेनैवोभयग्रहणसिद्धेः किं पृथगुपदेश इति प्रश्नो भवति ।

उच्यते । ऋलृवर्णयोः सावर्ण्यस्यानित्यतां ज्ञापयितुमुभयोरुद्देशः । तत्फलं तु क्लृप्ता शिखा यस्य स क्लृप्तशिखस्तस्य दूरात्सम्बोधने क्लृप्तशिखेत्यत्र प्लुतभवनम् । ऋलृवर्णयोः सावर्ण्यस्य नित्यत्वे तु गुरोरनृतोऽनन्त्यस्यापीत्यत्रानृत इति निषेधादृकारस्येव लृकारस्यापि प्लुतो न स्यादित्यर्थः । एवञ्च ऋलृवर्णयोः सावर्ण्येन अकारादीनां ह्रस्वानामेवोपदेशेऽपि दीर्घाकारादीनां विधिसूत्रेषु ग्रहणवदृकारेण लृकारस्याप्यच्कार्याणि स्युरिति वाच्यम्, जातिपक्षे विजातीयत्वेन ग्रहणासम्भवात् । यदि ऋलृवर्णयोः इति वार्त्तिकेन जातेरेव परस्परमतिदेशस्तदोक्तदोषाभावेऽपि लृकारस्य साधुत्वबोधनार्थ एवावश्यको वर्णसमाम्नाये पाठः ।

- **एओङ्,**

वृत्तिः – ‘ ए, ओ ’ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ङकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन एङि पररूपम् (6-1-93) इत्येकारेण ॥

- **ऐऔच्**

वृत्तिः – ‘ ऐ, औ ’ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते चकारमितं करोति प्रत्याहारार्थम् ।

भाष्यम् – ‘ सन्ध्यक्षरेषु विवृतत्वात् । यदत्रावर्णं विवृततरं तदन्यस्मादवर्णात् । ये अपीवर्णोवर्णे विवृततरे ते अन्याभ्यामिवर्णोवर्णाभ्याम् ’ ॥ अत एव तत्र प्रयत्नभेदादेव एङैचोः परस्परं सावर्ण्याभावः । अर्थात् सन्ध्यक्षरेषु अकार-इकार-उकारवर्णाः लोकेऽन्येभ्यः अकार-इकार-उकारवर्णेभ्यो विवृततराः सन्ति तस्मात्प्रयत्नवैषम्यात् अन्तरतमत्वाऽभावात् प्राप्ताः सर्वे विधयः निरस्ताः भवन्तीति विज्ञेयम् ।

ननु कण्ठतालुस्थानिनोर्विवृतप्रयत्नवतोश्चैकारैकारयोरेवं कण्ठौष्ठस्थानिनोर्विवृतप्रयत्नवतो - श्चौकारौकारयोस्तुल्यत्वेन “ तुल्यास्यप्रयत्नं सवर्णम् ” इति सूत्रेण परस्परं सावर्ण्यं कथं न स्यात् ? ।

अस्य समाधानं वैयाकरणसिद्धान्तकौमुद्यामित्थं कृतम् – ‘ एदैतोरोदौतोश्च न मिथः सावर्ण्यम् । कुतो न सावर्ण्यमत आह – ‘ ऐऔच् ’ इति सूत्रारम्भसामर्थ्यात् ’ ।

---

[488] अष्टाध्यायी – (6-1-90)

[489] अष्टाध्यायी – (6-1-91)

अत्रेदमेव हृदयं यद् - यदि हि एदैतोरोदौतोश्च मिथः सावर्ण्यं स्यात्तर्हि ह्रस्वाकारादिभिः दीर्घाकारादीनामिव एकारेण ऐकारस्य ओकारेण औकारस्य च ग्रहणसम्भवात् ' ऐऔच् ' इति सूत्रं नारभ्येत, आरभ्यते चातः एदैतोरोदौतोश्च न मिथः सावर्ण्यमिति कल्प्यत इत्याशयः। ' अच्, इच्, एच् ' इत्यादि प्रत्याहारास्तु ङकारेणैव निर्वाह्याः। ' एच्, एङ् ' इति प्रत्याहारद्वयग्रहणसामर्थ्यात् एदैतोः ओदौतोश्च न मिथः सावर्ण्यम्।

ननु ' ऐऔच् ' इति सूत्राभावे " वृद्धिरादैच् "[490] इत्यत्र ' वृद्धिरादेङ् ' इति न्यासे गुणवृद्धिसञ्ज्ञा-विधायकसूत्रयोर्विषयविभागो न सिद्ध्यतीति तदर्थं ' ऐऔच् ' इति सूत्रमावश्यकमेवेति चेन्न। अत्राप्येङित्येव पठितव्यं तत्र गुणसूत्रे च मिथः सवर्णसञ्ज्ञावादिनये चतुर्णां ग्रहणेन दोषाभावात्। न च " एचोऽयवायावः "[491] इत्यत्र एचां चतुर्णां क्रमादयाद्यादेशसिद्ध्यर्थम् ' एओङ् '' ऐऔच् ' इति सूत्रद्वयमप्यावश्यकमेवेति कथं ' ऐऔच् ' इति सूत्रानर्थक्यप्रसङ्गशङ्केति वाच्यम्। " स्थानेऽन्तरतमः "[492] इति सूत्रेणैव एचां क्रमादयाद्यादेशाः सिद्ध्यन्तीति तदर्थम् ' ऐऔच् ' इति सूत्रोपन्यासस्य अनावश्यकत्वात्।

नचैवमपि ' ऐऔच् ' इति सूत्राभावे " न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् "[493] इति सूत्रे ऐजिति प्रत्याहारो न सिद्ध्येत् – " न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामेङ् " इति न्यासे तु भाव्यमानस्य सवर्णाग्राहकत्वेन ' वैयाकरणः ', ' सौवश्वः ' इत्यादावेदोतावेवागमौ स्तो नत्वैदौतौ ततश्च वैयर्थ्याभावात्। ' ऐऔच् ' इति सूत्रं सावर्ण्याभावं न ज्ञापयेदिति वाच्यम्। " न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् " इति सूत्रेऽपि ऐजित्यस्य स्थाने ' ऐऔ ' इति स्वरूपतोऽवश्यं पठनीयम्। अन्यथा प्रत्याहारेण एङोरपि ग्रहणात् लक्ष्यवैरूप्यापत्तिः। परञ्च तेन पाठेनाप्युक्तलक्ष्यसिद्ध्यातदर्थमैऔजिति सूत्रस्यानुपयोगात्।

वस्तुतस्तु स्वरूपज्ञानाय ऋलृवर्णवदैकारौकारयोरप्युपदेश आवश्यक एव, अन्यथा ' अनुपदिष्टं सत्कथं शक्यं विज्ञातुम् – असच्च कथं शक्यं प्रतिपत्तुम् '[494] इति भाष्यात् तेषामसाधुत्वं स्यात्। अत एव इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः इत्यपि भगवता पतञ्जलिना अभिहितम्। तथा च ' एओङ् ' इति सूत्रस्थभाष्यप्रामाण्येन ' ऐऔ ' इत्यनयोर्वर्णयोरसत्त्वशङ्कावारणाय ' ऐऔच् ' इति सूत्रमावश्यकमेवेति

---

[490] अष्टाध्यायी – (1-1-1)

[491] अष्टाध्यायी – (6-1-77)

[492] अष्टाध्यायी – (1-1-50)

[493] अष्टाध्यायी – (7-3-3)

[494] महाभाष्यम् – प्रत्याहारसूत्रम् – 3-4

न तद्व्यर्थमित्युच्यते तदा तु “ प्लुतावैच् इदुतौ ”[495] इति पूर्वसूत्रादैच् पदानुवृत्त्यैव सिद्धे “ एचोऽप्रगृह्यस्यादूराद्धूतेपूर्वस्यार्धस्याऽऽदुत्तरस्येदुतौ ”[496] इत्युत्तरसूत्रे एज्ग्रहणस्यानर्थक्यप्रसङ्गाद् एदैतोरोदौतोश्च न मिथः सावर्ण्यमिति वक्तव्यम् ’[497] । एवञ्च ङकारचकाररूपपृथगनुबन्धद्वयकरण-सामर्थ्यादेव सावर्ण्याभावः साधनीयः । तथा च एङो विवृततरप्रयत्नवत्त्वमैचश्च विवृततम-प्रयत्नवत्त्वमित्येवं रूपेण तयोः प्रयत्नभेदात् सावर्ण्याभावोपपत्तौ तदर्थमैऔजिति सूत्रवैयर्थ्यद्वारा तयोः सावर्ण्याभावो न भवितुमर्हतीति ज्ञेयम् ।

यद्यपि ग्रहणकशास्त्रबलादेव स्वरूपज्ञानसम्भवे सवर्णसञ्ज्ञावादे स्वरूपज्ञानाय ऐकारौकारयोरुच्चारणं व्यर्थमेवेति स्वरूपज्ञानं नान्यथासिद्धफलमिति वक्तुं शक्यते, तथापि यथा एकारौकाराभ्यामुपदिष्टाभ्याम् ऐकारौकारयोरपि स्वरूपसाधुत्वज्ञानसम्भवस्तथैवैकारौकाराभ्यां चाप्युपदिष्टाभ्यामेकारौकारयोः स्वरूपसाधुत्वज्ञानसम्भव इति कयोर्वर्णसमाम्नाय उपदेश इत्यत्र विनिगमकाभावेन चतुर्णामप्युपदेशः स्वरूपज्ञानायापेक्षितः ।

‘ एओङ् ’ ‘ ऐऔच् ’ इत्यत्र ङकारचकारावेङेजादिप्रत्याहारार्थौ ।

इमानि ‘ ए ऐ ओ औ ’ इति सन्ध्यक्षराणि । तानि सन्धिजानि मन्तव्यानि । स्वरेष्विमानि चत्वार्यक्षराणि नहि स्वयमुद्भूतानि, किन्तु द्वयोर्द्वयोर्वर्णयोः सन्धौ सति निष्पद्यन्ते । स्थानद्वयोच्चार्यमाणत्वमैषां सन्धिजत्वं द्रढयति ।

ननु अवर्णस्येवर्णेन सह सन्धावेकारः, अवर्णस्योवर्णेन सह ओकारो भवति । एषां सन्ध्यक्षराणां पूर्वो भागोऽकारः, एकारैकारयोः परो भाग इकारः, ओकारौकारयोः परो भाग उकारश्च भवति । स्थानमपि एकारैकारयोः ‘ अ इ ’ वर्णाभ्यां तुल्यं कण्ठतालु, ओदौतोश्च ‘ अ उ ’ वर्णाभ्यां तुल्यं कण्ठोष्ठम् । “ तस्यादित उदात्तमर्धह्रस्वम् ”[498],“ एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्याऽदुत्तरस्येदुतौ ”[499] इत्यादिसूत्र-वचनात् । वार्त्तिकाकारोऽप्याह – ‘ ऐचोश्चोत्तरभूयस्त्वात् ’ इति । अत एव ‘ अग्ने इन्द्रः ’ इत्यत्र “ अकः सवर्णे दीर्घः ”[500] इति सूत्रेण परावयवकार्यं दीर्घत्वं प्राप्नोति, “ एचोऽयवायावः ”[501] इति सूत्रेण

[495] अष्टाध्यायी – (8-2-106)
[496] अष्टाध्यायी – (8-2-107)
[497] वैयाकरणसिद्धान्तकौमुदी – भावबोधिनीटीका – पृ. 9
[498] अष्टाध्यायी – (1-2-32)
[499] अष्टाध्यायी – (8-2-107)
[500] अष्टाध्यायी – (6-1-99)
[501] अष्टाध्यायी – (6-1-77)

समुदायकार्यम् अयादेशत्वञ्च । तत्रान्तरङ्गत्वात् तत्र च साक्षाच्चोदितत्वात्, प्रत्यक्षत्वात् वाऽवयवकार्यप्रसङ्गः, अवयवावगतिपूर्वकत्वाद्धि समुदायावगमस्य समुदायकार्यं बहिरङ्गम्, अयादीनां त्ववकाशः ‘ अग्ने आयाहि ’ इति। नन्वत्राप्यवयवस्य यादेशेन भाव्यमिति चेद्, न ‘ येन प्राप्ते ’ इति यकारादेशस्यैवायादयो बाधकाः स्युः। तत्र यथा दधीन्द्र इत्यत्र दधिशब्दस्य इकारः सवर्णदीर्घत्वं प्रतिपद्यते, एवमेकारस्थोऽपि प्रतिपद्येत । नैवम्, एषु सन्ध्यक्षरेषु भागद्वयसत्त्वेऽपि अवयवानां तिरोहितत्वात्, समुदायसंपादनरूपे कार्ये च पारतन्त्र्यात् स्वकार्यस्याप्रयोजकत्वाद्, नरसिंहवत् जात्यन्तराक्रान्तत्वेन वा वर्णान्तरसारूप्यमात्रेण तत्कार्याप्रवर्तनादवयवकार्यस्य सवर्णदीर्घत्वं न भवति। गोनौग्रहणं चात्र ज्ञापकम् । यदि हि भागा अपि स्वतन्त्रवर्णप्रयुक्तं कार्यं प्रवर्तयेयुस्तर्हि “ गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ” इति “ नौद्व्यचष्ठन् ” इति च सूत्रद्वये द्व्यज्ग्रहणेनैव गतार्थत्वाद् गोशब्दं नौशब्दं च नोपाददीत। तेन ‘ अग्ने इदम् ’‘ वायो उदकम् ’ इत्यत्र “ अकः सवर्णे दीर्घः ” इति सूत्रेण सवर्णदीर्घत्वं न भवति । तथा ‘ अग्न एति ’ इत्यत्र “ एङः पदान्तादति ”[502] इति सूत्रेण पूर्वरूपमेकादेशो न, ‘ आलूय ’‘ प्रमाय ’ इत्यत्र “ ह्रस्वस्य पिति कृति तुक् ”[503] इति सूत्रेण तुङागमो न, ‘ मालाभिः ’ इत्यत्र “ अतो भिस ऐस् ”[504] इति सूत्रेण ऐसादेशो न, ‘ याता ’ इत्यत्र “ अतो लोपः ”[505] इति सूत्रेण आकारलोपो न, ‘ वाचा तरति ’ इत्यत्र “ नौद्व्यचष्ठन् ”[506] इति सूत्रेन ठन्प्रत्ययो न, ‘ वाचो निमित्तम् ’ इत्यत्र “ गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ”[507] इति सूत्रेण यत्प्रत्ययश्च न भवति।

‘ ए ऐ ’ इत्यनयोरकारेकारप्रयुक्तम् ‘ ओ औ ’ इत्यनयोरकारोकारप्रयुक्तं कार्यन्तु सन्ध्यक्षरत्वेऽपि न भवति, “ दीर्घात् ”[508] इति पृथक्सूत्रकरणेन द्विमात्रिकेणैकमात्रिककार्याभावज्ञापनात्। अत एव ‘ अग्ने एति ’ अत्र “ एङः पदान्तादति ” इति पूर्वरूपम्, ‘ अग्ने इन्द्रः ’‘ वायो उदकम् ’ अत्र “ अकः सवर्णे दीर्घः ” इत्यादि कार्यं न। अन्यथा “ छे च ”[509] इत्यनेनैव दीर्घेऽपि तुकि सिद्धे “ दीर्घात् ” इति योगविभागो व्यर्थमेव स्यात्।

---

[502] अष्टाध्यायी – (6-1-107)
[503] अष्टाध्यायी – (6-1-70)
[504] अष्टाध्यायी – (7-1-9)
[505] अष्टाध्यायी – (6-4-48)
[506] अष्टाध्यायी – (4-4-7)
[507] अष्टाध्यायी – (5-1-39)
[508] अष्टाध्यायी – (6-1-74)
[509] अष्टाध्यायी – (6-1-72)

एवम् ‘ ऋ, लृ ’ इत्यत्र रेफलकारप्रयुक्तः प्रातर्ऋतम् इत्यत्र “ रो रि ”[510] इति लोपः, शरद् लृकारः इत्यत्र “ तोर्लि ”[511] इति लत्वञ्च न, मध्ये प्रतीयमानरेफलकारयोः सत्त्वेन पूर्वोत्तरवर्त्यज्भागेन व्यवधानात् । यच्चाव्यवधानानिमित्तकं कार्यं तद्भवत्येव, यथा ‘ आनृजे ’ इत्यत्र “ तस्मान्नुड् द्विहलः ”[512] इति नुट् । वस्तुतस्तु द्विहलः इति प्रत्याख्यातं भाष्ये । न च ‘ आट ’ इत्यादौ नुडापत्तिः ‘ आनशे ’ इत्यत्र तस्मान्नुड् इति नुटि सिद्धे “ अश्नोतेश्च ”[513] इति सूत्रस्य एकहल्घटितस्य नुट् चेत्तर्हि अश्नोतेरेवेति नियमार्थता स्वीकारेणादोषात् । “ क्षुभ्नादिषु च ”[514] इति सूत्रेण क्षुभ्नादिगणे ‘ तृप्नोति ’ इत्यस्य णत्वनिषेधार्थपाठवैयर्थ्येन ऋकारान्नस्य णत्वं भवतीति ज्ञापनेन ‘ ऋवर्णान्नस्य णत्वम् ’ इति वार्त्तिकं न कर्तव्यमिति भाष्ये प्रोक्तम् ।

पृथक्प्रयत्ननिष्पाद्यो हि वर्णः, सन्ध्यक्षरेषु ऋकारादिषु च वर्णसादृश्यावगाहिनोऽवयवाः, न तु ते वर्णाः । अत एव ऋकारादिषु ज्ञापकादिना णत्वादिकार्यं साधितं भाष्ये ।

- **प्रत्याहारेऽनुबन्धानामग्रहणम् -**

‘ अइउण् ’, ‘ ऋलृक् ’, ‘ एओङ् ’, ‘ ऐऔच् ’ इति प्रत्याहारसूत्रेषु य एते प्रत्याहारार्थाः ‘ ण्, क्, ङ्, च् ’ इति अनुबन्धाः क्रियन्ते । तत्रेयं जिज्ञासोदेति यद् यदा “ आदिरन्त्येन सहेता ” इति सूत्रेण अन्त्येन इता सह आदिरुच्चार्यमाण आद्यन्ताक्षिप्तानां मध्यानां स्वस्य च सञ्ज्ञा भवति, तदा यथा अच् सञ्ज्ञा मध्यवर्त्तिनामिकारादीनां बोधो भवति, तथैव ‘ अण् ’, ‘ अक् ’,‘ एङ् ’ इत्यादिप्रत्याहारबोध्य-समुदायघटकेषु मध्यगानाम् ‘ ण्, ङ्, क् ’ इत्येतेषामित्सञ्ज्ञाकानामपि अज्ग्रहणेन भाव्यम् । ततश्च अनुनासिका इत्यत्र ककाररूपेऽचि परे इकारस्य स्थाने यणादेशः कस्मान्न भवति ? ।

ननु नासैव नासिका इति “ न सामिवचने ”[515] इति सूत्रज्ञापितात्यन्तस्वार्थिककप्रत्ययस्य कप्प्रत्ययावधिकस्वादित्वेन “ स्वादिष्वसर्वनामस्थाने ”[516] इत्यनेन सूत्रेण पदत्वे “ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ”[517] इत्यनेन सूत्रेण प्रकृतिभावे ह्रस्वे वा यण् न स्यात् ।

---

[510] अष्टाध्यायी – (8-3-14)
[511] अष्टाध्यायी – (8-4-60)
[512] अष्टाध्यायी – (7-4-71)
[513] अष्टाध्यायी – (7-4-72)
[514] अष्टाध्यायी – (8-4-39)
[515] अष्टाध्यायी – (5-4-5)
[516] अष्टाध्यायी – (1-4-17)
[517] अष्टाध्यायी – (6-1-125)

न च इत्सञ्ज्ञाकानामनुबन्धानां ह्यज्ग्रहणेन ककारस्याच्त्वात् " यचि भम् "[518] इत्यनेन सूत्रेण भत्वेन पदसञ्ज्ञाबाधात् " इकोऽसर्वणे शाकल्यस्य ह्रस्वश्च " इत्यस्य सूत्रस्य प्राप्तिः न भवति ।

न चैवमुक्तम्, " यचि भम् " इति सूत्रे ' य् ' इत्यस्य अच्त्व-हल्त्वोभयानाश्रयत्वेन तत्साहचर्य्याद् अचोऽप्यच्त्व-हल्त्वोभयानाश्रयस्यैव ग्रहणेन ककारस्योभयाश्रयत्वेन भत्वाप्राप्तेः । एतेन भत्वात् " यस्येति च "[519] इति सूत्रेण इकारस्य लोप एव स्यादिति यणोऽपादानमसङ्गतमित्यपास्तमिति चेन्न, प्रकृतिभावस्य वैकल्पित्वेन तदभावपक्षे यणप्राप्तेः ।

न चैवमपि प्रकृतिभावपक्षमादाय निर्देशसङ्गतिः स्यात् ।

यणं कृत्वा प्रयोगे धर्माधिक्येन ऋषेश्च धर्मपक्षपातित्वेन यण्करणस्यैवौचित्यात्[520] । ङमो ह्रस्वादचि ङमुण्नित्यम् इत्यत्र ङकाररूपेऽचि परे " इको यणचि " इत्यनेन सूत्रेण यणादेशः प्रसज्येत, तच्चानिषटमाद्येत । इयमाशङ्का वार्त्तिककृता इत्थं परिहृता –

' आचारात् ' आचार्याणामुपचारात्, तृषिमृषिकृषेः काश्यपस्य, पापाणके कुत्सितैः, एकः पूर्वपरयोः, ङमो ह्रस्वादचि ङमुण्नित्यम् इत्यादिषु सूत्रेषु न आचार्याः अच्कार्याणि कृतवन्तः ।

' अप्रधानत्वात् ' न खल्वेतेषामक्षुप्राधान्येनोपदेशः क्रियते । एतेषान्तु हल्षु प्राधान्येनोपदेशः कृतः । एषा ह्याचार्यस्य शैली दृश्यते यत्तुल्यजातीयांस्तुल्यजातीयेषूपदेशति – अचोऽक्षु, हलो हल्षु ।

' लोपश्च बलवत्तरः ' लोपः खल्वपि तावत् बलवत्तरो भवति । परत्वान्नित्यत्वाद्वा " आदिरन्त्येन सहेता " इत्यनेन सूत्रेणाच्सञ्ज्ञाविधानकालेऽनुबन्धानां लोपादसन्निधानादच् सञ्ज्ञा न प्रवर्तते । अनुबन्धा ह्युच्चारण एव सन्ति, इत्सञ्ज्ञाप्रतिबन्द्धं च कार्यमसन्त एव प्रतिपादयन्ति । स्वतस्तु न किञ्चित्कार्यं प्रतिपद्यन्ते ।

तदुक्तमत्र सङ्ग्रहः –

प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ॥

अथवा

ऊकालोऽजिति वा योगस्तत्कालानां यथा भवेत् ।
अचां ग्रहणमच्कार्यं तानैषां न भविष्यति ॥

[518] अष्टाध्यायी – (1-4-18)

[519] अष्टाध्यायी – (6-4-148)

[520] सिद्धान्तकौमुद्याः लक्ष्मीटीका – (पृ. – 20)

अथवा योगविभागः करिष्यते – ऊकालोऽच् ‘ उ, ऊ, उ ३ ’ इत्येवं कालो अज्भवति । ततः – ह्रस्वदीर्घप्लुतसञ्ज्ञश्च भवति – उकालोऽच् ।

सिद्धेऽच्त्वे योगविभागेन कालविशेषावच्छिन्नस्याच्त्वं नियम्यते ततोऽनुबन्धानाम् ऊकालत्वाऽभावादच्त्वाऽभावः ॥

अथवा –

ह्रस्वादीनां वचनात् प्राग्यावत्तावद्योगोऽस्तु ।

अच्कार्याणि यथा स्युस्तत्कालेष्वक्षु ॥

एष एवार्थः वार्त्तिककृतोच्यते – ह्रस्वादीनामिति ह्रस्वदीर्घप्लुतः इत्यतः प्राक् ‘ ऊकालोऽच् ’ इतितावदस्तु, अज्निमित्तकार्याणि तत्कालेष्वक्षुकर्तुमर्हाणि यथा स्युः ।

- **हयवरट्**

वृत्तिः – ह य व र इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते टकारमितं करोति प्रत्याहारार्थम् ।

तस्य ग्रहणं भवत्येकेन शश्छोऽटि (8-4-62) इत्याकारेण ॥

हकारस्य द्विरुपदेशः - यद्यपि वर्णसमाम्नाये सर्वे वर्णा एकवारमेवोपदिष्टाः । परं हकारोऽयं द्विरुपदिश्यते ‘ हयवरट् ’ इत्यत्र तथा ‘ हल् ’ इत्यत्र । तथा च हकारस्यैव कथं द्विरुपदिष्टत्वमिति जिज्ञासोदेति ।

‘ हयवरट् ’‘ हल् ’ इत्युभयत्र हकारोपादानम् अट्-अश्-हश्-इण्ग्रहणेषु चप्रथमहकारग्रहणेन ‘ अर्हेण ’ इत्यत्र हकारस्य अट्ग्रहणेन ग्रहणात् “ अट्कुप्वाङ्नुमव्यवायेऽपि ”[521] इति सूत्रेण णत्वस्य सिद्ध्यर्थम्, ‘ देवा हसन्ति ’ इत्यत्रअश्ग्रहणेन ग्रहणात् “ भोभगोअघोअपूर्वस्य योऽशि ”[522] इति सूत्रेण रोर्यत्वस्यसिद्ध्यर्थम्, ‘ देवो हसति ’ इत्यत्र हश्ग्रहणेन ग्रहणात् “ हशि च ”[523] इति सूत्रेण रोरुत्वस्य सिद्ध्यर्थम्, ‘ लिलिहिध्वे ’, ‘ लिलिहिढ्वे ’ इत्यादौ इण्ग्रहणेन ग्रहणात् “ विभाषेटः ”[524] इति सूत्रेण ढत्वविकल्पस्य सिद्ध्यर्थञ्च । अन्यथा पूर्वोक्तेषु प्रत्याहारेषु हकारस्याभावात् पूर्वोक्तानि कार्याणि न स्युः ।

---

[521] अष्टाध्यायी – (8-4-2)

[522] अष्टाध्यायी – (8-3-17)

[523] अष्टाध्यायी – (6-1-112)

[524] अष्टाध्यायी – (8-3-79)

वलि, रलि, झलि, शलि च द्वितीयहकारग्रहणेन ‘ रुदिहि ’ इत्यत्र “ रुदादिभ्यः सार्वधातुके ”[525] इति सूत्रेण इट्, ‘ स्निहित्वा ’,‘ स्नेहित्वा ’ इत्यत्र “ रलो व्युपधाद्धलादेः संश्च ”[526] इति सूत्रेण विकल्पेन कित्वम्, ‘ अदाग्धाम् ’ इत्यादौ “ झलो झलि ”[527] इति सूत्रेण सकारलोपः, ‘ अलिक्षत् ’ इत्यत्र “ शल इगुपधादनिटः क्सः ”[528] इति सूत्रेण क्सादेशश्च सिध्यन्ति, नान्यथा तानि सिध्येयुः । तस्मादुभयत्रोपदेशः कर्तव्य इत्येव भगवतसिद्धान्तः ।

केचिद्भाषावैज्ञानिकास्तु –

हकारो द्विविधः, अर्द्धस्वररूपो व्यञ्जनरूपश्च । ‘ हयवरट् ’ इत्यत्र हकारः अर्द्धस्वरः, ‘ हल् ’ इत्यत्र च हकारो व्यञ्जनम् । तदेवं हकारस्य स्वरूपद्वयत्वात् अर्द्धस्वरसमुदाये व्यञ्जनसमुदाये च पाठ इति ब्रुवन्ति ।

वर्णसमाम्नाये वर्णानां पौर्वापर्य्येण बोधने एव भाष्यतात्पर्य्यम् । अत एव लोकप्रसिद्धककारादि-क्रमं परित्यज्य भिन्नक्रमेण वर्णानामुपदेशः

अत्र यदि यकारात्पूर्वं रेफ उपदिश्येत तदा ‘ पचेरन् ’ इत्यादौ “ लोपो व्योर्वलि ”[529] इति सूत्रेण यलोपो न स्यात् वल्परत्वाभावात् । किञ्च ‘ देवित्वा ’ इत्यत्र “ रलो व्युपधाद्धलादेः संश्च ”[530] इति सूत्रेण कित्वाभावस्यातिदेशो न स्यात्तदर्थं वकारात्पर उपदिष्टः । रेफादिप्रश्लेषेण वारणे तु गौरवम् । यद्यपि यकारात्पूर्वं पाठे‘ प्रातर्नयति ’ इत्यत्र “ यरोऽनुनासिकेऽनुनासिको वा ”[531] इति सूत्रेण स्थानकृतान्तरतम्येन रेफस्य यरः स्थानेऽनुनासिको णकारः स्यात् । एवञ्च “ अनचि च ”[532] इति सूत्रेण रेफस्य द्वित्वमपि स्यात् । ‘ मद्रह्रदः ’, ‘ भद्रह्रदः ’ इत्यादौ “ अचो रहाभ्यां द्वे ”[533] इति सूत्रेण हकारात् परस्य रेफरूपयरस्य द्वित्वं स्यात् ।तथा च यय्ग्रहणेन ग्रहणात् ‘ वनं रथेन ’, इत्यत्र “ अनुस्वारस्य ययि परसवर्णः ”[534] इति सूत्रेण रेफरूपे ययि परेऽनुस्वारस्य परसवर्णः रेफ एव स्यात्,

---

[525] अष्टाध्यायी – (7-2-76)
[526] अष्टाध्यायी – (1-2-26)
[527] अष्टाध्यायी – (8-2-26)
[528] अष्टाध्यायी – (3-1-45)
[529] अष्टाध्यायी – (6-1-65)
[530] अष्टाध्यायी – (1-2-26)
[531] अष्टाध्यायी – (8-4-45)
[532] अष्टाध्यायी – (8-4-47)
[533] अष्टाध्यायी – (8-4-46)
[534] अष्टाध्यायी – (8-4-58)

रेफस्यान्यसवर्णत्वाभावात्। एतेषाञ्च भाष्याभिमताऽप्रवृत्तिः फलं तथापि ‘ नेमौ रहौ कार्यिणौ किन्तर्हि निमित्तं द्विर्वचनस्य ’ इति, ‘ रेफोष्माणां सवर्णा न सन्ति ’[535] इति च भाष्येण समाधानान्तरस्य वक्ष्यमाणतया तत्फलस्यान्यथासिद्धत्वात्।

- **लण्**

वृत्तिः – ‘ ल ’ इत्येकं वर्णमुपदिश्य पूर्वांशचान्ते णकारमितं करोति प्रत्याहारार्थम्। अण्– अणुदित्सवर्णस्य चाप्रत्ययः (1-1-69) इण् – इण्कोः (8-3-57) यण् – इको यणचि (6-1-74)।

णकारस्याकृदनुबन्धत्वम् -

ननु वर्णसमाम्नाये सर्वेऽनुबन्धाः सकृदुपदिष्टाः। अयं णकारो द्विरनुबध्यते, ‘ अइउण् ’ इति सूत्रेऽपि, ‘ लण् ’ इति सूत्रेऽपि च। तत्र ‘ लण् ’ सूत्रे णकारस्य किं प्रयोजनम् ? इत्याशङ्कोदेति।

तत्र अण्प्रत्याहारे इण्प्रत्याहारे च अचाम्, उष्मणो हकारस्य, अन्तस्थानां यवरलानां ग्रहणं यथा स्यात्। तथा च “ अणुदित्सवर्णस्य चाप्रत्ययः ”[536] इति सूत्रेण सर्वेषामेतेषां सवर्णसञ्ज्ञा यथा स्यात्।

ननु चैवं तत्र ‘ अइउण् ’ सूत्रस्थणकारेण ‘ अण् ’‘ इण् ’ इत्येतौ द्वावेव प्रत्याहारौ भवतः, तौ च ‘ लण् ’ सूत्रस्थणकारेणापि भवेतामिति। अतः सर्वत्राणिण्ग्रहणेषु सन्देहो जायते – अयं पूर्वेण स्यात्, परेण वा। कतमस्मिंस्तावदण्ग्रहणे सन्देहः ? तद्यथा अण्ग्रहणेषु “ अणुदित्सवर्णस्य चाप्रत्ययः ” “ अणोऽप्रगृह्यस्यानुनासिकः ”[537],“ केऽणः ”[538] इत्यादिषु सन्देहः सम्भवेत्, अयं प्रत्याहारोऽण् पूर्वेण वा गृह्येत, परेण वा ? इति। तथैव सर्वत्र इण्ग्रहणेष्वपि “ इणः षः ”[539],“ इणः षीध्वंलुङ्लिटां धोऽङ्गात् ”[540] इत्यत्र सन्देहो सम्भवति इण्प्रत्याहारोऽयं पूर्वेण वाऽस्ति परेण वा ? तत्रासन्देहार्थं कस्मिञ्चिदेकत्रापरवर्णस्यैव कथमनुबन्धत्वं न कृतम् ?इत्येवं महाभाष्ये[541] आशङ्क्य समाहितम्। तद्यथा – ‘ किं पुनर्वर्णेत्सत्ताविवायं णकारो द्विरनुबध्यते, पूर्वश्चैव परश्च ? ’ सन्देहप्रयोजकेत्सञ्ज्ञकणद्वय-करणस्य सन्देहे सति मुनित्रयादिव्याख्यानं दृष्ट्वा निर्णयो विधेय इत्यर्थकः ‘ व्याख्यानतो विशेषप्रतिपत्तिः नहि सन्देहादलक्षणम् ’ इतिवचनज्ञापनपरकत्वस्य भाष्यकृतैवोक्तत्वात्। तदुक्तं भाष्ये – ‘ अणुदित्सवर्णे

[535] महाभाष्यम् – हयवरट्सूत्रे
[536] अष्टाध्यायी – (1-1-69)
[537] अष्टाध्यायी – (8-4-57)
[538] अष्टाध्यायी – (7-4-13)
[539] अष्टाध्यायी – (8-3-39)
[540] अष्टाध्यायी – (8-3-78)
[541] महाभाष्यम् – लण्सूत्रे

परिहाय पूर्वेणाण्ग्रहणं परेणेण्ग्रहणमिति व्याख्यास्यामः ' इति। अत्र हि परेण ग्रहणे तावन्मानमस्ति – " उरॠत् "[542] इति सूत्रे क्रियमाणं तपरकरणम् । तथा हि यदि सवर्णग्राहकसूत्रेऽण् पूर्वेण गृह्यते, तर्हि ऋकारस्यानण्त्वात् स्थानिना आदेशेन वा ऋकारेणसवर्णाग्रहणात् भिन्नकालव्यावृत्त्यर्थं क्रियमाणं तपरकरणं व्यर्थं स्यात्। यद्यपि परेणापि ग्रहणे ऋकारस्य अण्त्वेऽपि तस्य विधेयतया ' अप्रत्ययः ' इति निषेधात् तेन सवर्णग्रहणाप्रसक्तेस्तपरकरणं व्यर्थमेवेत्यपि गदितुं शक्यते, तथापि तपरकरणाभावे ऋकारस्य ऋकार एव यथा स्यात्, यदन्यत् प्राप्नोति तन्मा भूत् इत्येवमादेशान्तरनिवृत्त्यर्थतया अविधेयत्वात् । कृते तु तपरत्वे विधीयमानताऽपि इत्यन्यदेतत् । अतत्सूत्रं विहायान्यत्र सवर्त्र " अणोऽप्रगृह्यस्यानुनासिकः "," केऽणः " इत्यादौ पूर्वेणैव णकारेणाण् गृह्यते, अण्ग्रहणसामर्थ्यात्, अन्यथा ' अच् ' इत्येव वक्तव्यम्, तदपि वा न वक्तव्यम्, अच एव ह्रस्वादिविधानात्सामर्थ्यादेव तल्लाभात्। एवं व्याख्यानादेव ' इण् ' सवर्त्र परेणैव गृह्यते। यतो हि यदि पूर्वेण ' इण् ' ग्राह्यम्, तदा इकारोकारौ एव तद्वाच्यौ स्याताम् । तत्र च दृश्यते आचार्यव्यवहारो यद् यत्रायम् इकारोकारयोरेव ग्रहणमिच्छति, तत्र इकारोकारयोरेव स्वरूपेण ग्रहणं करोति, न तु इण्प्रत्याहारग्रहणं, यथा " अचि श्नुधातुभ्रुवां य्वोरियङुवङौ "[543] इत्यादौ ज्ञेयम्।

हकारादावकारस्य सुखोच्चारणमात्रार्थत्वेऽप्यत्र लकाराकारानुनासिकत्वादित्सञ्ज्ञा । ' प्रतिज्ञानुनासिक्याः पाणिनीयाः ' इति सिद्धान्तात्। तेन रेफेण सहाकारोच्चारणे " उरण् रपरः "[544] इत्यत्र रप्रत्याहारेण रेफलकारयोरुपादानम्। ' ऋकारऌकारयोः सावर्ण्यम् ' इति वार्त्तिकनिर्देशश्चात्र मानम्[545]। रप्रत्याहारस्तु " उरण् रपरः " इत्यत्र रपरपदे एव नान्यत्र। नागेशमते लकाराकारस्येत्सञ्ज्ञा नास्ति अतो रप्रत्याहारो न सिध्यति । अत एव भाष्यकृता लकाराकारस्येत्त्वं नोक्तम् । " उरण् रपरः " इत्यनेन तवल्कारः इत्यादौ लपरत्वं तु " तुल्यास्यप्रयत्नं सवर्णम् "[546] इति सूत्रे ' लपरत्वं वक्ष्यामि ' इतिवचनसूचितेन ' लपरश्चेति वक्तव्यम् ' इति वार्त्तिकेन बोध्यम्।

कैयट-भट्टोजिदीक्षितादिमते तु लपरत्वं वक्ष्यामि इति भाष्यस्य लण्सूत्रस्थाकारस्येत्सञ्ज्ञकत्वेन " उरण् रपरः " इति सूत्रस्थपदस्य रलबोधकप्रत्याहारपरतया व्याख्यानं करिष्यामीत्यर्थमाश्रित्य लपरत्वं साधितम्।

---

542 अष्टाध्यायी – (7-4-7)

543 अष्टाध्यायी – (6-4-77)

544 अष्टाध्यायी – (1-1-51)

545 व्याकरणसिद्धान्तसुधानिधिः – लण्सूत्रे

546 अष्टाध्यायी – (1-1-9)

- **ञमङणनम्**

वृत्तिः – ञ, म, ङ, ण, न इत्येतान् वर्णानुपदिश्य पूर्वांचान्तेमकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति चतुर्भिः अ-य-ङ-ञ इत्येतैः । अम् – पुमः खय्यम्परे (8-3-6) , यम् – हलो यमां यमि लोपः (8-4-63), ङम् – ङमो ह्रस्वादचि ङमुण् नित्यम् (8-3-32), अम् – ञमन्ताड्डः (उणा. 1-114)

- **झभञ्**

वृत्तिः – झ, भ इति द्वौ वर्णावुपदिश्य पूर्वांश्चान्ते ञकारमितं करोति प्रत्याहारसिद्ध्यर्थम् । तस्य ग्रहणं भवत्येकेन अतो दीर्घो यञि (7-3-101) इति यकारेण ।

" उत्सादिभ्योऽञ् "[547], " अत इञ् "[548], " गर्गादिभ्यो यञ् "[549] इत्येवमादौ न प्रत्याहारः, भाव्यमानत्वात्, अनभिधानाच्च । " उञि च पदे "[550] इत्यत्र न प्रत्याहारः,पदेन विशेषणात् ।

ननु ' ञमङणनम् ' अत्यत्र मकारमनुबन्धमकृत्वा ' ञमङणनझभञ् ' इत्येकमेव सूत्रं सूत्रयितुं शक्नुयात् । मकारेण च ये प्रत्याहाराः – अम्-यम्-ङमः, ते ञकारेणैव कर्तुं शक्याः तथा च तद्घटितसूत्राण्यपि " पुमः खय्यञ्परे ", " हलो यञां यञि लोपः ", " ङञो ह्रस्वादचि ङञुण्नित्यम् " इत्येवंरूपेणापि कर्तुं शक्नुयात् । तथापि नास्ति कश्चन दोषः, तेषु प्रत्याहारेषु झकारभकारयोरन्तर्भावेऽपि दोषाभावात् । न चैवम्, " ङमो ह्रस्वादचिङमुण् नित्यम् "[551] इत्यत्र ' ङञ् ' करणे झभयोरपि ह्रस्वात्परयोः पदान्तयोर्झुडभुडागमः स्यादिति वाच्यम्, पदान्तयोर्झभयोर्जश्त्वेन झुड्भुड्योः प्राप्तिः न भवति । तदुक्तं भाष्ये – ' एवमपि पञ्चागमास्त्रय आगमिनो वैषम्यात्संख्यातानुदेशो न प्राप्नोति । सन्तु तावद्येषामागमानामागमिनः सन्ति । झकारभकारौ पदान्तौ न स्त इति कृत्वा आगमावपि न भविष्यतः '[552] इति ।

---

[547] अष्टाध्यायी – (4-1-86)
[548] अष्टाध्यायी – (4-1-95)
[549] अष्टाध्यायी – (4-1-105)
[550] अष्टाध्यायी – (8-3-21)
[551] अष्टाध्यायी – (8-3-32)
[552] महाभाष्यम् – झभञ्सूत्रे

- **घढधष्**

घ, ढ, ध इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते षकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति द्वाभ्यां झ-भ इत्येताभ्याम्। भष्, झष् – एकाचो बशो भष् झषन्तस्य स्ध्वोः (8-2-37)।

- **जबगडदश्**

ज, ब, ग, ड, द इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते शकारमितं करोति प्रत्याहारसिद्ध्यर्थम्। तस्य ग्रहणं भवति षड्भिः अ-ह-व-झ-ज-ब इत्येतैः। अश् – भोभगोअघोअपूर्वस्य योऽशि (8-3-17)। हश् – हशि च (6-1-110)। वश् – नेड् वशि कृति (7-2-8)। झश्, जश् – झलां जश झशि (8-4-52) बश् – एकाचो बशो भष् झषन्तस्य स्ध्वोः (8-2-37)।

- **खफछठथचटतव्**

ख, फ, छ, ठ, थ, च, ट, त इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते वकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन नश्छव्यप्रशान् (8-3-7) इति छकारेण।

- **कपय्**

क, प इत्येतौ वर्णानुपदिश्य पूर्वांश्चान्ते यकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति पञ्चभिः य, म, झ, ख, च इत्येतैः। यय् – अनुस्वारस्य ययि परसवर्णः (8-4-57)। मय् – मय ञो वो वा (8-3-33)। झय् – झयो होऽन्यतरस्याम् (8-4-61)। खय् – पुमः खय्यम्परे (8-3-6)। चय् – चयो द्वितीयाः शरि पौष्करसादेः (वार्त्तिकम् – 8-4-47)।

- **शषसर्**

श, ष, स इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते रेफमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति पञ्चभिः य-झ-ख-च-श इत्येतैः। यर् – यरोऽनुनासिकेऽनुनासिको वा (8-4-44)। झर् – झरो झरि सवर्णे (8-4-64)। खर् – खरि च (8-4-54)। चर् – अभ्यासे चर्चः (8-4-53) . शर् – वा शरि (8-3-36)।

- **हल्**

ह इत्येकं वर्णानुपदिश्य पूर्वांश्चान्ते लकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति षड्भिः अ-ह-व-र-झ-श इत्येतैः। अल् – अलोऽन्त्यात् पूर्व उपधा (1-1-64)। हल् – हलोऽनन्तराः संयागः

(1-1-7) । वल् – लोपो व्योर्वलि (6-1-64) । रल् – रलो व्युपधाद्धलादेः संश्च (1-2-26) । झल् – झलो झलि (8-2-26) । शल् – शल इगुपधादनिटः क्सः (3-1-45) ।

अत्र हकारः पुनरुपदिश्यते तस्य प्रयोजनन्तु हयवरट् इति सूत्रव्याख्यावसरे एव विस्तृतत्वेन विचारितम् ।

ननु ‘ शषसहर् ’ इत्येव सूत्रं सूत्रयितुं शक्यम् ‘ अल्, हल् ’ इत्यादि प्रत्याहाराश्च रेफेणैव ‘ अर्, हर् ’ इत्यादिरूपा भवेयुः । ‘ खर् ’ इति प्रत्याहारे हकारग्रहणात् ‘ हरिर्हरति ’ इत्यत्र “ खरवसानयोर्विसर्जनीयः ” इति सूत्रेण विसर्गापत्तिस्तु न, ‘ प्रेष्यब्रुवोर्हविषोः ’ इतिसूत्रनिर्देशेन ‘ खर् ’ ग्रहणेन हकाराग्रहणज्ञापनात् । न च ‘ सुगण् हसति, प्राङ् हसति ’ इत्यादौ “ ङणो कुक्टुक् शरि ” इति सूत्रेण कुगाद्यापत्तिः, एङ्ह्रस्वात्सम्बुद्धेः इति सूत्रनिर्देशेन शरग्रहणेनाग्रहणज्ञापनादिति चेन्न, ज्ञापकादिना अनेकवचनकल्पनापेक्षया ‘ हल् ’ इति पृथक्सूत्रकरणे एव लाघवात्, उक्तनिर्देशानां सौत्रत्वेनोपपत्तेश्च ।

चतुर्दशसु सूत्रेषु वर्णसमाम्नाये स्वरूपतो निर्दिष्टैर्वर्णैर्येऽपरे प्रत्याय्यन्ते, ते द्वाविशंतिः स्वाराः । यथा – ‘ अ इ उ ऋ ’ इमे चत्वारो ह्रस्वदीर्घप्लुतभेदेन द्वादश । लृकारो ह्रस्वप्लुतभेदेन द्विविधः । दीर्घप्लुतभेदेन एचोऽष्टौ एवं सङ्कलनया द्वाविंशतिः स्वराः । स्पर्शाः पञ्चविंशतिः । यादयोऽष्टौ । 22 + 25 + 4 + 4 = 55 पञ्चपञ्चाशदेव बुध्यन्ते । ‘ अयोगवाहानामट्सु णत्वम् ’[553] इति वार्त्तिकेन ‘ के पुनरयोगवाहाः विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारनासिक्ययमा ’ इत्यनेन भाष्येण च इमे नव तत्र सङ्कल्यन्ते, तर्हि चतुःषष्टिर्वर्णाः । चतुर्मात्रौ ऐचौ । दीर्घप्लुतभेदेन, ईषत्स्पृष्टयोर्ऋकारलृकारयोश्च सत्त्वाच्चत्वारोऽधिकाः ।

“ व्योर्लघुप्रयत्नतरः शाकटायनस्य ”[554] इत्यनेन पादमात्रिकयोर्यकारवकारयोः सत्त्वात् पुनरपरौ द्वौ वर्णौ । एवं सङ्कलनया द्वासप्ततिः । उरस्यस्य हकारस्यापि स्वीकारात् त्रिसप्ततिर्वर्णाः पाणिनीये मते सिद्ध्यन्ति । यद्यपि उरस्यो हकारः पाणिनीये मते नायाति, तथापि पाणिनेरपि पूर्वं हयवरट्, हल् इत्यनयोः सूत्रयोर्द्विविधस्य हकारस्य सत्तानुमीयते ।

यद्यपि महाभाष्यकारेण द्वयोर्हकारयो रूपमेकमेव मत्वा फलं प्रदत्तम्, तथापि स्थानभेदेन वर्णभेदाङ्गीकारे बाधाभावात् किमुत वर्णैक्ये विरोधादेव द्विविधो हकारो गवेषकैरभ्युपगन्तव्य एव । यद्यप्यनुस्वारद्वैविध्यं सूत्रवार्त्तिकभाष्येषु नोपलभ्यते, तथापि शिक्षासु तैतिरीयप्रातिशाख्ये ऋक्तन्त्रे व्याकरणे तृतीयदशके अनुस्वारौ च इति सूत्रे ह्रस्वाद् दीर्घो दीर्घाद्ध्रस्व इति भाष्ये चानुस्वारद्वैविध्यं

---

553 महाभाष्यम् – हयवरट् सूत्रे – (पृ. –32)

554 अष्टाध्यायी – (8-3-18)

शिक्षाभाष्ये पञ्चिकायां चोपलभ्यते । तदुपलम्भाद् अन्योऽप्येको वर्णोऽधिकः सङ्ग्रहीतव्यः, स च द्विमात्र इति कथयितुं शक्यते इति चेत् न, परिमाणकृतो वर्णभेदः स्वरविषय एवेति तैतिरीयप्रातिशाख्य-भाष्योक्त्या तत्प्रयुक्तसङ्ख्याधिकस्याप्रामाणिकत्वात्[555] ।

- **वर्णोत्पत्तिविमर्शः –**

संस्कृतभाषायां वर्णाः कति वा सन्ति ? इति प्रश्नस्य समाधानं प्रोक्तं पाणिनीयशिक्षायां यत्

त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ता स्वयंभुवा ।। इति ।

भावार्थः – शिवस्य मते वर्णानां संख्या त्रिषष्टिः चतुःषष्टिः वा स्वीकृता वर्तते । लोकप्रसिद्धमातृ-पाठे संस्कृतभाषायामपि वर्णाः त्रिषष्टिः चतुःषष्टिर्वा सन्ति इति ब्रह्मा स्वयमेव अवोचत् । अनेन त्वनिश्चियात्मिका बुद्धिर्भवति । संस्कृतभाषा वैज्ञानिकी भाषा, अतः वर्णानामेतादृक् सन्देहो नोचितः । वस्तुतः महर्षिपाणिना यदुक्तं तत्तूचितमेव, कारणमिदं देशकालक्रमानुसारेण ध्वनिपरिवर्तनं भवति । तेन कारणेन वर्णमालायाः स्वरूपमपि परिवर्तनशीलं भवति । यथा वर्तमानकाले ‘ लृ ’ वर्णस्य प्रयोगो व्यवहारे कुत्रापि न दृश्यते । हिन्द्यां तु ‘ ऋ ’ वर्णस्य प्रयोगोऽवरुद्ध इदानीम् । पुनश्च भवति चेत् क्षेत्रविशेषकारणात् तस्योच्चारणं भिन्नं भवति । उत्तरभारते ‘ रि ’ वद् । यथा – ‘ ऋषिः ’ इत्यस्य ‘ रिषिः ’, ‘ ऋद्धिः ’ इत्यस्य ‘ रिद्धिः ’ इत्युच्चारणं भवति । एवमेव दक्षिणभारते एतस्योच्चारणम् ‘ रु ’ वद् भवति । यथा – ‘ ऋषिः ’ इत्यस्य ‘ रुषिः ’, ‘ ऋद्धिः ’ इत्यस्य ‘ रुद्धिः ’ । तथापि मूलवर्णास्त्वविकृताः भवन्ति ।

संस्कृते अष्टादशमूलवर्णाः भवन्ति । यथा जगत्यां सर्वप्रथममेककोशिकीयजीवाः ततश्च मत्स्यादिसरलसंरचनायुक्तदेहा अजायन्त । अन्ते च मानवादीनां जटिलप्राणिनामुत्पत्तिरभवत् तथैव प्रथमं ह्रस्वसञ्ज्ञकाः पञ्च स्वराः, अनन्तरमल्पप्राणादयः त्रयोदश व्यञ्जनाश्च । एतेषामष्टादशमूलवार्णानां विस्तारेणैव वर्तमानवर्णप्रपञ्चोत्पद्यते । तेषु ‘ अ-इ-उ-ऋ-लृ ’ एते पञ्च मूलस्वराः ।

एभिः मूलस्वैरेवान्ये स्वरा उत्पद्यन्ते । यथा – “ अकः सवर्णे दीर्घः ”[556] इत्येतत् सूत्रं विज्ञापयति यद् ह्रस्ववर्णानां योगेन विकारस्वरूपेण दीर्घवर्णोत्पत्तिर्भवति । यथा –

अ + अ = **आ**
इ + इ = **ई**

---
555 व्याकरणदर्शनभूमिका – (पृ. – 44)
556 अष्टाध्यायी – (6-1-99)

उ + उ = **ऊ**

ऋ + ऋ = ॠ

इत्थं अ-आ-इ-ई-उ-ऊ-ऋ-ॠ एतानि अष्टौ अक्षराणि समानाक्षरसञ्ज्ञकानि भवन्तीति ऋक्प्रातिशाख्ये। लृ इत्यस्य अत्रापि समानाक्षरेषु स्थानं नास्ति, अतो मन्ये ऋक्प्रातिशाख्यस्य कालेऽपि समाजे स्वररूपेण अस्य अस्तित्वमासीदिति विसन्देहः।

अथ गुणवर्णोत्पत्तिः। " आद्गुणः "[557] इति सूत्रेण अकारस्य इकारोकाराभ्यां सह संसर्गेण विकारोत्पत्तिरिति प्रसिद्धम्। तेन गुणवर्णोत्पत्तिः भवति। यथा –

अ + इ = **ए**

अ + उ = **ओ**

ततश्च वृद्धिवर्णोत्पत्तिः। " वृद्धिरेचि "[558] इति सूत्रेण अकारगुणाभ्यां योगेन वृद्धिवर्णोत्पत्तिः। यथा –

अ + ए = **ऐ**

अ + ओ = **औ**

' ए-ओ-ऐ-औ ' एतानि चत्वारि अक्षराणि संध्यक्षरसञ्ज्ञकानीति ऋक्-प्रातिशाख्ये। एते ' अ-आ-इ-ई-उ-ऊ-ऋ-ॠ-लृ-ए-ऐ-ओ-औ ' त्रयोदश स्वरवर्णाः। इत्थं स्वरोत्पत्तिः स्यात्।

अथ व्यञ्जनोत्पत्तिः। मूलव्यञ्जनध्वनयस्तु त्रयोदश एव। तत्र वर्गाणां प्रथमतृतीयावल्प-प्राणवर्णौ सकारानुस्वारविसर्गाश्च। यथा – क्-ग्-च्-ज्-ट्-ड्-त्-द्-प्-ब्-स्-अनुस्वारः-विसर्गश्च। अल्प-प्राणस्य विसर्गस्य च मेलनेन महाप्राणवर्णोत्पत्तिः भवति। पुनश्च वर्गस्य तृतीयवर्णेन सह अनुस्वारस्य योगेन ' ञम् ' इति अनुनासिकवर्णानामुत्पत्तिः भवति। क्रमशः सकारेण विसर्गस्यान्वयेन शकारोत्पत्तिः, ततश्च शकारेण विसर्गस्यान्वयेन षकारोत्पत्तिश्च भवति। विसर्गेणैव हकारोत्पत्तिः। " इको यणचि "[559] इति सूत्रेण अचि परे इकः स्थाने यणादेशो भवति। इत्थमन्तःस्थानामुत्पत्तिः। यथा –

इ + अ = **य**

उ + अ = **व**

---

[557] अष्टाध्यायी – (6-1-86)

[558] अष्टाध्यायी – (6-1-87)

[559] अष्टाध्यायी – (6-1-76)

ऋ + अ = **र**

लृ + अ = **ल**

संस्कृतवर्णास्तु साक्षात् प्रजापत्तेः मुखारविन्दान्निर्गताः । तस्मादतुलनीयाः किन्तु ‘ सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः ’ इति सूक्त्याधारेण वयमाङ्गलभाषानिकषोपरि सम्परीक्ष्य पश्यामः । यथा –

वर्गः	**अल्पप्राणः**	**महाप्राणः**	**अल्पप्राणः**	**महाप्राणः**	**अनुनासिकः**
कवर्गः	क्	क् + : = ख्	ग्	ग् + : = घ्	ग् + अनुस्वारः = ङ्
	K	K + H = KH	G	G + H = GH	N
चवर्गः	च्	च् + : = छ्	ज्	ज् + : = झ्	ज् + अनुस्वारः = ञ्
	CH	CH + H = CHH	J	J + H = JH	N
टवर्गः	ट्	ट् + : = ठ्	ड्	ड् + : = ढ्	ड् + अनुस्वारः = ण्
	T	T + H = TH	D	D + H = DH	N
तवर्गः	त्	त् + : = थ्	द्	द् + : = ध्	द् + अनुस्वारः = न्
	T	T + H = TH	D	D + H = DH	N
पवर्गः	प्	प् + : = फ्	ब्	ब् + : = भ्	ब् + अनुस्वारः = म्
	P	P + H = PH	B	B + H = BH	N
ऊष्मवर्णाः	स्	स् + : = श्	श् + : = ष्	: + अ = ह	
	S	S + H = SH	SH + H = SHH	H+A=HA	

`

देशकालानुसारेण केचन भिन्नध्वनयः उद्भवन्ति । यथा वेदेषु – शल्प्रत्याहारवर्णपरे अनुस्वारस्योच्चारणम् गुम् इति ध्वनिरूपेण क्रियते । यथा – ‘ ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः ’ इत्यत्र ‘ अन्तरिक्षं शान्तिः ’ इति स्थाने ‘ अन्तरिक्ष गुम् शान्तिः ’ इति वदन्ति । एवमेव कुत्रचिद् डकारस्य उच्चारणं लकारवद् भवति । यथा – ‘ मीडे ’ इत्यस्य ‘ मीले ’ इत्युच्चारणम् । यजुर्वेदे यकारस्य उच्चारणं कुत्रचिद् जकारवद् भवति । एवमेव षकारस्योच्चारणं कुत्रचिद् खकारवद् भवति । यथा – ‘ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ’ इत्यत्र ‘ यत्पुरुषेण हविषा ’ इति स्थाने ‘ जत्पुरुखेण हविखा ’ इति ब्रुवन्ति ।

ननु इदं न्यूनम्, ईषत्स्पृष्टयोर्ऋकारलृकारयोराधिक्यात् । एओङ्सूत्रस्थभाष्येण त्रिमात्रचतुर्मात्रा वा आदेशा मा भूवन्नित्यनेन सूचितयोः त्रिमात्रचतुर्मात्रयोरेकारौकारयोराधिक्याच्चेति चेदत्र केचित्, भाष्यप्रामाण्यात्तेषामपि तत्र पूरणात् । अत एवाक्षरसमाम्नाये अविद्यामाना अपि यमाः भाष्यप्रामाण्यात् शिक्षाप्रामाण्याच्च यर्णराशिषु पूर्यन्ते इत्याहुः । परे तु त्रिषष्टिरित्यादिसंख्या न व्यक्तिकृता, वर्णानां

प्रत्युच्चारणं भदपक्षेऽसम्भावात् । किन्तु धर्मकृता । यथा चाऽभितोऽज्भिक्तिसहितरेफघटितत्व-तादृशलकारघटितत्वरूपधर्माभ्यां विवृतयोरीषत्स्पृष्टयोर्ऋलृवर्णयोर्द्वित्वमेव । एवं द्विमात्राधिकत्वेन अनुगमेन त्रिमात्रचतुर्मात्रयोरपि प्लुतमध्येऽन्तर्भावान्नाधिक्यमित्याहुः, युक्तञ्चैतत्, अत एव उदात्तत्वादिधर्मभेदादधिका संख्या इत्यपि निरस्तम् । अत्र एकविंशतित्वविभाजको धर्मः ह्रस्वतासमानाधिकरणत्वादिरूपः, दीर्घत्वसमानाधिकरणत्वादिरूपः, प्लुतत्वसमानाधिकरणत्वादिरूपः । दीर्घत्वसमानाधिकरणैत्वादिरूपः प्लुतत्वसमानाधिकरणैत्वादिरूपो बोध्यः तेन न न्यूनत्वप्रसङ्गोऽपि इति ।

अस्तु ! उक्तवर्णानामेव ह्रस्वदीर्घप्लुतोदात्तानुदात्तस्वरितानुनासिकाननुनासिकरूपेण बहुविस्तारः, किन्तु मूलवर्णास्तु अष्टादश एव भवन्तीति सिद्धम्[560] ।

- **उपसंहारः –**

प्रत्याहारशब्दः प्रति उपसर्गपूर्वकात् ‘ हृञ् हरणे ’ इति धातोः घञि प्रत्यये कृते सिद्ध्यति । पाणिनिव्याकरणे सूत्रसङ्क्षेपणाय प्रत्याहाराः समाश्रिताः । प्रत्याह्रियन्ते सङ्क्षिप्यन्ते वर्णा यत्रासौ प्रत्याहारः । अष्टाध्याय्या विशालभवनं प्रत्याहाराधाराश्रितमेव ।

अक्षरसमाम्नायात्मकेषु चतुर्दशसु सूत्रेषु स्थितैरित्सञ्ज्ञकैश्चतुर्दशभिः हल्भिस्तादृशा एकचत्वारिंशत् प्रत्याहाराः विद्यन्ते, ये सूत्रकृता पाणिनिना स्वकृतौ प्रयुक्ताः । “ उरण् रपरः ”[561] इति सूत्रे सूत्रकृता प्रयुक्तोऽपि रप्रत्याहार इता अकारेण सम्पन्न इति स एतत्संख्याबहिर्भूतः । एवं अन्यैरित्सञ्ज्ञकैः हल्भिरिद्भिर्जाता अपि वार्त्तिककृदादिभिः ‘ चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् ’ – (वार्त्तिकम् – 8-4-48) ञमन्ताड्डः (उणा. – 1-111) इत्यादिस्थलेषु प्रयुक्ताश्चयादि-प्रत्याहारा एतत्संख्याबहिर्भूता एव । अस्मिन् विषये संग्राहकश्लोकमाह काशिकाकारः –

एकस्मान्ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः ।
ज्ञेयौ चयौ चतुर्भ्योरः पञ्चभ्यः शलौ षड्भ्यः ।। इति ।[562]

[560] भारती संस्कृत-मासपत्रिका – (पृ. – 14)
[561] अष्टाध्यायी – (1-1-51)
[562] काशिकायां प्रत्याहारप्रकरणम्

चतुर्दशसुत्रीस्थैर्हल्भिरिद्भिः कृतानामष्टाध्याय्यां व्यहृतानां प्रत्यहाराणामयं सङ्ग्रहः । तेन सुप्तिङादेः रप्रत्याहारस्य ञमन्ताड्डः, यमिर्ञमन्तेषु इति उणादिव्याघ्रभूतिकारिकयोर्व्यवहृतस्य ञम्प्रत्याहारस्य चयो द्वितीया इति वार्त्तिककृद्व्यवहृतस्य चय्प्रत्याहारस्य चाधिक्येऽप्यदोष इति[563] ।

पाणिनिना स्वकृतौ प्रयुक्ताः प्रत्याहाराः स्वग्राह्यैर्वर्णैः सहाधः प्रदृश्यन्ते ।

(1) एङ्, (2) यञ्, (3) अण्, (4) छव्, (5) अट्	= 5
(1) झष्, (2) भष्	= 2
(1) अक्, (2) इक्, (3) उक्	= 3
(1) अण्, (2) इण्, (3) यण्	= 3
(1) अम्, (2) यम्, (3) ङम्	= 3
(1) अच्, (2) इच्, (3) एच्, (4) ऐच्	= 4
(1) यय्, (2) मय्, (3) झय्, (4) खय्	= 4
(1) यर्, (2) झर्, (3) खर्, (4) चर्, (5) शर्	= 5
(1) अश्, (2) हश्, (3) वश्, (4) झश्, (5) जश्, (6) बश्	= 6
(1) अल्, (2) हल्, (3) वल्, (4) रल्, (5) झल्, (6) शल्	= 6
कुलयोगः	– 41

- **समानाक्षरसञ्ज्ञा –**

अकारादयः स्वतन्त्राः वर्णाः समानाक्षरसञ्ज्ञकाः सन्ति । एतेषां वर्णानां स्थानप्रयत्नाभ्यां समानं तुल्यं मानं भवति तस्माद् एतेषां वर्णानां समानाक्षरसञ्ज्ञा क्रियते । समानाक्षरवर्णानामुच्चारणं सर्वांशतः समानरूपेण भवति । तेषामुच्चारणे एकरूपतां सम्पद्यते । समानाक्षराणामुच्चारणसमये जिह्वादीनाम् उच्चारणावयवानामेकैव स्थितिर्विद्यते । ‘ अ-आ-इ-ई-उ-ऊ-ऋ-ॠ-लृ ’ इत्येतेषां समानाक्षरसञ्ज्ञोच्यते ।

- **सन्ध्यक्षरसञ्ज्ञा –**

स्वरवर्णेषु एकारादयश्चत्वारो वर्णा अकारादिवन्न स्वतन्त्राः सन्ति । वर्णद्वयोपेतास्तेन तेषां सन्ध्यक्षरसञ्ज्ञा सञ्जाता । सन्धावक्षराणीति सन्ध्यक्षराणि । ‘ ए-ऐ-ओ-औ ’ इत्येतेषां वर्णानां सन्ध्यक्षरसञ्ज्ञा क्रियते । स्वरद्वयसंयोगेन जाता वर्णाः सन्ध्यक्षराणि इत्यभिधीयन्ते । ते च ‘ ए-ऐ-ओ-

[563] व्याकरणसिद्धान्तसुधानिधिः – प्रत्याहारप्रकरणे

औ ' इत्येते चत्वारो वर्णाः । तत्र अकारेकारसंयोगे एकारः, पुनश्च ' अकार + एकारः = ऐकारः ', एवमेव ' अ + उ = ओकारः ', पुनः ' अ + ओ = औकारः ' । इत्येते वर्णा वर्णद्वयसंयुक्तस्वरूपाः सन्ध्यक्षराणीति कथ्यन्ते ।

- **सवर्णसञ्ज्ञा** –

समानस्थानकरणप्रयत्नः सवर्णः । पाणिनीयाष्टके पाणिनिना " तुल्यास्य प्रयत्नं सवर्णम् "[564] इति सूत्रेण सवर्णसञ्ज्ञायाः विधानं कृतम् । तुल्यौ आस्यप्रयत्नौ यस्य वर्णस्य येन वर्णेन सह स समानजातीयं प्रति सवर्णसञ्ज्ञो भवतीति बोध्यम् । यथा अकारस्य आकारः सवर्ण आकारस्य च अकारः सवर्णः, तद्वत् वर्णेषु ' कु-चु-टु-तु-पु ' इति पञ्च उदिताः क-च-ट-त-प क्रमशः ' क-ख-ग-घ-ङ, च-छ-ज-झ-ञ, ट-ठ-ड-ढ-ण, त-थ-द-ध-न, प-फ-ब-भ-म ' इत्येतेषां प्रति परञ्च वर्णानां बोधकाः कु-चु-टु-तु-पु स्थानप्रयत्नाभ्यां समानाः । अतः क-ख-ग-घ सवर्णाः । एवं खकारादीनां चकारादयोऽपि सवर्णाः । एवं चकारीनां मिथः परस्परं सावर्ण्यं बोध्यम् ।

(ग) वृद्ध्यादिसञ्ज्ञाप्रकरणम्

- **वृद्धिरादैच् – (1-1-1)**

वृत्तिः – पदच्छेदः, विभक्तिः – वृद्धिः (1-1) आदैच् (1-1) समासः – आत् च = आच्च, ऐत् च = ऐच्च आदैच्, समाहारद्वन्द्वसमासः ॥ सञ्ज्ञासूत्रमिदम् ॥

अर्थः – आ ऐ औ इत्येतेषां वर्णानां वृद्धिसञ्ज्ञा भवति ।

" वृद्धिरादैच् " इत्यस्मिन् सञ्ज्ञासूत्रे बहव आक्षेपाः समागताः । यथा – अत्र सूत्रे द्विपदं वा त्रिपदं ? । अत्र कुत्वं कथं न भवति ? । आदैचां तद्भाविताऽतद्भाविता भवितुमर्हति न वा ? । विधेयशब्दस्य पूर्वप्रयोगः कथं भवितुमर्हति ? । सञ्ज्ञायां प्राप्तान्यान्याश्रयदोषस्य परिहारः कथं भवति ? । आदैच् इत्यत्र तपरकरणस्य किं प्रयोजनम् ? ।

भाष्यकारस्य चेयं शैली लोकोत्तरा वर्त्तते यत्सम्भावितेषु पक्षेषु महतो बहून् दोषान् प्रदर्श्यायं पश्चात् सिद्धान्तपक्षं वर्णयति । अत्र के पक्षाः सम्भावितास्तत्र च के दोषा इति प्रदर्श्यते ।

---

[564] अष्टाध्यायी – (1-1-9)

● द्विपदं त्रिपदं वा सूत्रम्

" वृद्धिरादैच् " इति सूत्रे ' कृतमनयोः साधुत्वम् ' इति महाभाष्यवाक्येऽनयोरिति पदादत्र द्वे एव पदे इति विज्ञायते। ' वृद्धिः '' आत् '' ऐच् ' इति पस्पशायां पृथक्पदत्वमप्युक्तत्वात् ' वृद्धिः '' आत् '' ऐच् ' इति पदत्रयं न तु ' आदैच् ' इति समाहारद्वन्द्वेन पदद्वयं भवति । यदा पदद्वयं स्यात् तदा " द्वन्द्वाच्चुदषहान्तात्समाहारे "[565] इति सूत्रेण टजापत्तेः । न चेतरेतरद्वन्द्वः स्यात्, द्विवचनापत्तेः । यदि तु " प्रतेरंश्वादयस्तत्पुरुषे "[566] इति सूत्रे अंश्वादिगणे राजन् शब्दपाठः। प्रतेः परे अंश्वादयोऽन्तोदात्ता इति तदर्थः । " राजाहःसखिभ्यष्टच् "[567] इति सूत्रेण टचो नित्यत्वे तु चित्वादेवान्तोदात्तत्वं स्यात्। अंश्वादिगणे राजन् शब्दपाठात् समासान्तविधिरनित्य इति ज्ञाप्यत इत्यनित्यत्वान्न टजित्युच्यते तदा पदद्वयमेव । परन्तु अनित्यत्वस्यागतिकगतित्वान्नेदं युक्तम् । न चात्र पदत्रयत्वेऽत्रैव ' कृतमनयोः साधुत्वम् ' इति महाभाष्यवाक्येऽनयोरिति द्विवचनासङ्गतिः, ' अनयोः ' इत्यस्य उद्देश्यदल-विधेयदलयोरित्यर्थेनादोषात् । यद्यपि वृद्धिः आत् ऐजिति पस्पशायां पृथक्पदत्वमप्युक्तम्, तथाऽपि तदभ्युच्चयमात्रम्। अनयोः सुत्रखण्डयोरिति व्याख्यानापत्तेः । तस्य च ' वृद्धिरस्मै अविशेषेणोपदिष्टः प्रकृतिपाठे तस्मात्स्त्रियां क्तिन्प्रत्ययः, आदैचोऽप्यक्षरसमाम्नाये उपदिष्टाः ' इति भाष्यविरुद्धत्वात् । चकाराध्याहारप्रसङ्गाच्च इति व्याकरणसिद्धान्तसुधानिधिकाराणामाशयः । अत एव " सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः "[568] इति सूत्रेण औङो लोपं मत्वा आच्च ऐच्च इति इतरेतरयोगद्वन्द्वपक्षमपि तत्त्वबोधिनीकारः प्राह[569] । अनेन नात्र भाष्यकाराणां नैर्भयं यत् द्विपदमुत त्रिपदमिदं सूत्रमिति।

नन्वत्र पस्पशायाम् ' कृतमनयोः साधुत्वम् ' इति प्रोक्तं भगवता भाष्यकारेण तेन द्विपदमेव सूत्रमिति निश्चीयते । पक्षेऽस्मिन् ' कृतमनयोः साधुत्वम् ' इति भाष्यग्रन्थोऽनुकूलः । एवञ्च ' न केवलानि चर्चापदानि .... वृद्धिः, आत्, ऐच् ' इति पस्पशायां पृथक्पदत्वमप्युक्तम्, तथाऽपि तदभ्युच्चयमात्रम्। एवं पस्पशायां ' शब्दाप्रतिपत्तिः ' इति वार्तिके ' न केवलानि चर्चापदानि .... वृद्धिः, आत् ऐच् ' इति पदविभागपूर्वकं भाष्यकारेणैवोक्तं तेन त्रिपदमिदं सूत्रमिति निश्चीयते। अस्मिंश्च

---

[565] अष्टाध्यायी – (5-4-106)

[566] अष्टाध्यायी – (6-2-193)

[567] अष्टाध्यायी – (5-4-91)

[568] अष्टाध्यायी – (7-1-39)

[569] सिद्धान्तकौमुदी – तत्त्वोधिनी – पृ. 29

पक्षे ‘ कृतमनयोः साधुत्वम् ’ इति भाष्यम् ‘ अनयोः सूत्रखण्डयोः (उद्देश्यविधेयरूपभागयोः) ’ इत्यर्थकं ज्ञेयम् । अन्यथा ‘ वृद्धिः, आत् ऐच् ’ इति पदविभागपूर्वकं भाष्यकारेणैवोक्तं तेन सह भाष्यकाराणां सिद्धान्तेऽसङ्गत्यापत्तिः स्यात् । अत एवोक्तं शब्दकौस्तुभे उद्द्योते च प्रकृतसूत्रव्याख्याने ‘ अनयोः सूत्रखण्डयोः ’ इति । अस्मिन् पक्षे उद्देश्यानेकत्वाद् वृद्धिपदमावर्त्यं स्यात् । आवृत्तिपक्षस्तु दीक्षितेन कौस्तुभे एव दर्शितः । स एव नागेशेनापि स्वीकृतः । तथा चोक्तं नागेशेन लघुशब्देन्दुशेखरे – ‘ वृद्धिः आत् ऐजिति पदत्रयमिति न समासान्तादिप्रवृत्तिशङ्का ’[570] ।

तत्रायं निष्कर्षः - भट्टोजिदीक्षितमते वृद्धिसञ्ज्ञासूत्रं द्विपदं त्रिपदं वा भवतु उभयस्मिन्नपि पक्षे प्रमाणानां सत्त्वाद् न काचित् क्षतिः । नागेशभट्टैस्तु वृद्धिः आत् ऐजिति पदत्रयात्मकं सूत्रमित्येव पक्षः प्रधानरूपेण प्रस्तूयते[571] । ‘ न केवलानि चर्चापदानि .... वृद्धिः, आत्, ऐच् ’ इति पस्पशास्थभाष्ये साक्षादुक्तत्वेन त्रिपदं सूत्रमिति । ‘ आदैच् ’ इत्यस्य समस्तपदत्वे, समाहारद्वन्द्वे “ द्वन्द्वाच्चुदुषहान्तात् समाहारे ” इति सूत्रेण टच् प्रसज्येत । इतरेतरयोगद्वन्द्वे द्विवचनप्रसङ्गः । अद्यपि ‘ कृतमनयोः साधुत्वम् ’ इति प्रकृतसूत्रभाष्याद् द्विपदं सूत्रमिति लभ्यते । “ प्रतेरंश्वादयस्तत्पुरुषे ” इति सूत्रे अश्वादिगणे राजन्शब्दपाठाल्लिङ्गात् । अन्यथा “ राजाहःसखिभ्यष्टच् ” इति टचा सिद्धे किं तेन । तेन समासान्तविधेरनित्यत्वज्ञापनेन समाहारद्वन्द्वे टचः प्रसक्तिर्नास्ति । एवमितरेतरद्वन्द्वेऽपि “ सुपां सुलुक् .... ” इति लुका द्विवचनश्रवणं नास्तीति ‘ आदैच् ’ इत्यस्य समस्तपदत्वेऽपि न दोषः, तथापि शङ्कासमाधानयोः करणस्य भाष्यकारशैलीसिद्धतया प्रकृते तदकरणात् पदत्रये एव तेषां तात्पर्यमिति सम्भाव्यते । अन्यथा कुत्वं कस्मान्न भवति इति कुत्वादिशङ्कापरिहाराविव समासान्तादिशङ्कापरिहारौ कर्तव्यौ स्याताम् । कृतमनयोस्साधुत्वमिति भाष्यं तु उद्देश्यविधेयभावेन खण्डयोरित्यर्थपरतया योजनीयम् । एवं वृद्धिशब्दस्तु तन्त्रेणावृत्या वा योजनीयः । “ द्विर्वचनेऽचि ”[572], “ इग्यणः सम्प्रसारणम् ”[573] इत्यादाविव अत एव चकाराध्याहारप्रसङ्गोऽपि न स्यादिति नागेशभट्टानामभिप्रायः ।

---

[570] लघुशब्देन्दुशेखरः - प्रकृतसूत्रे

[571] यद्वा पदत्रयं पस्पशायां भाष्ये वृद्धिः आत् ऐच् इति पदविभागदर्शनात् । (महाभाष्यम् – उद्द्योतः पृ. 128)

[572] अष्टाध्यायी – (1-1-59)

[573] अष्टाध्यायी – (1-1-45)

● आदैच् इत्यत्र चकारस्य कुत्वाभावः

' आदैच् ' इत्यत्र समासत्वेनार्थवत्त्वाद् विभक्त्युत्पत्तौ पदत्वाद् अथवा चात्र अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन सञ्ज्ञिनि विनियोगान्नित्यत्वाच्च सर्वसञ्ज्ञानां लौकिकत्वादादैच् शब्दस्याऽनुकरणशब्दत्वाज्जातिशब्दत्वाद्वा " सुप्तिङन्तं पदम् "[574] इत्यनेन पदसञ्ज्ञायां " चोः कुः "[575] इति सूत्रेण चकारस्य कुत्वे प्राप्ते भाष्यकार आह – भसञ्ज्ञत्वात् पदान्तनिमित्तककुत्वं न भवति। भत्वञ्च " अयस्मयादीनि छन्दसि "[576] इति सूत्रेण बोद्धव्यम्। न च नेदञ्छन्दः, इति वाच्यम्? ' छन्दोवत्सूत्राणि भवन्ति ' इति वचनात्। इष्टश्चैवं व्याकरणसूत्राणां प्राचीनाचार्यस्मृतेश्च। न चैवम्, यदि भसञ्ज्ञा चेत् ' वृद्धिरादैजदेङ्गुणः ' इति संहितापाठे जश्त्वन्न भविष्यतीति वाच्यम् ? छन्दसामुभयसञ्ज्ञत्वात् जश्त्वोपयोगिनी तु पदसञ्ज्ञास्त्येव। तथाहि – ' स सुष्टुभा स ऋक्वता गणेन ' इत्यत्र पदत्वात् कुत्वं भत्वाज्जश्त्वं न भवति। दृष्टान्ते कुत्वोपयोगिनी पदसञ्ज्ञास्ति, न तु जश्त्वोपयोगिनीति एवमिहापि पदत्वाज्जश्त्वेन भत्वात्कुत्वेनाऽदोषात्। न चैवं पदान्तत्वाभावाद्गत्वं न स्यादिति वाच्यम्। असन्देहार्थतया पूर्वशेषत्वस्यापि सम्भवात्। दकारस्य तत्कालग्राहकत्वेऽपि पूर्वं निर्णितम्।

वस्तुतस्तु ' आदैच् ' इतिनिर्देशात् सुप्सकारपरत्वाभावे प्रत्याहारघटकस्य चस्य कुत्वं नेति ज्ञाप्यते। अत एव " उपदेशेऽजनुनासिक इत् "[577], " अजादेर्द्वितीयस्य "[578], " इजादेः सनुमः "[579], इत्यादिसौत्रनिर्देशाः। सकारपरत्वाभावे इत्युक्त्या अचोऽक्षु इति भाष्ये कुत्वस्य नासङ्गतिः। सुप्सकारेत्युक्त्या ' अच्सन्धिः ' इत्यत्र कुत्वं न[580]।

● तद्भावितातद्भावितासञ्ज्ञा

अत्र पूर्वं तद्भाविताऽतद्भावितशब्दयोरर्थो विज्ञातव्यः।

तद्भाविताः – वृद्धिशब्दोच्चारणेन यत्र आकारैकारौकाराः भाविताः – विहिताः ते वृद्धिसञ्ज्ञका भवन्ति।

---

[574] अष्टाध्यायी – (1-4-14)
[575] अष्टाध्यायी – (8-2-30)
[576] अष्टाध्यायी – (1-4-20)
[577] अष्टाध्यायी – (1-3-2)
[578] अष्टाध्यायी – (6-1-2)
[579] अष्टाध्यायी – (8-4-32)
[580] सिद्धान्तकौमुदी – लक्ष्मीटीका – (पृ. –59)

अतद्भाविताः – वृद्धिशब्दोच्चारणं विनैव स्वयं सिद्धाः – प्रकृतिरूपा ये आकारैकारौकाराः ते वृद्धिसञ्ज्ञकास्सन्ति ।

विहितीनामविहितानां चादैचां प्रत्येकं सामान्येन वृद्धिसञ्ज्ञा भवति । तेन आश्वलायनः, ऐतिकायनः इत्यत्र " किति च "[581] इति सूत्रेण वृद्धिशब्दोच्चारणेन ' आ ऐ ' इति द्वौविहितौ भवतः । शालीयः, मालीयः इत्यत्रवृद्धिशब्दोच्चारणं विनैव आकारौ स्वयं सिद्धौ स्तः ।

विधेयवाचकवृद्धिशब्दस्य पूर्वप्रयोगः –

वाक्यप्रयोगे नियमोऽयं वर्त्तते यदुद्देश्यविधेयवाचकयोः पदयोः कस्य पूर्वमुपादानं कर्तव्यं कस्य च पश्चादिति विचारे उद्देश्यवचनं पूर्वं प्रयोक्तव्यं विधेयवाचकश्च पश्चादिति । तथा चोक्तमभियुक्तैः –

यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम् ।

तच्छब्दयोगः पश्चात्त्वं साध्यत्वं च विधेयता ।। इति ।

शाब्दबोधे प्रथमनिर्दिष्टमुद्देश्यं परनिर्दिष्टं विधेयमिति नियमात् उद्देश्यभूतस्य आदैच्छब्दस्य पूर्वप्रयोगस्यापेक्षा स्यात्, तत्कथमत्र आदैजुद्देशेन वृद्धिसञ्ज्ञा विधीयत इति चेदाह भगवान् पतञ्जलिः – ' एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति । सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः सञ्ज्ञी, परोच्चारिता सञ्ज्ञा । " अदेङ् गुणः " इति यथा '[582]।

इदानीमिदं विचारणीयं विद्यते यद् मङ्गलार्थतया वृद्धिशब्दस्य पूर्वं प्रयोगेऽपि " अपृक्त एकाल्प्रत्ययः "[583] इति सूत्रे पूर्वोक्तनियममुल्लङ्घ्य विधेयस्य ' अपृक्त ' इत्यस्य पूर्वं प्रयोगः कथम् ? ।

यद्यप्यत्रेत्थं समाधातुं प्रभवेत् यद् विधेयस्य पूर्वं प्रयोगेऽसाधुत्वं भवति एतादृशो भ्रमो मा भूदिति बोधयितुं नियमवैपरीत्येन सूत्रकारस्तथा प्रायुङ्क्त । तथा च उद्देश्यस्य प्रथमप्रयोगे औचित्यमात्रं बोधितं न त्वसाधुत्वमिति ।

एवञ्चास्याभाणकस्य प्रामाण्यात् तथा दर्शनाच्च क्वचिद्विधेयवाचकस्य पदस्य पूर्वप्रयोगे लोकानां स्यात् किलासाधुत्वभ्रमः । किन्तु तत्र न साधुत्वव्यतिरेक इति शब्दसाधुत्वप्रमात्मकार्षज्ञानवता भगवता पाणिनिना विधेयवाचकपदानां पूर्वप्रयोगेण तादृशो भ्रमोऽपाकारि । तथाहि – " वृद्धिरादैच् "

---

[581] अष्टाध्यायी – (7-2-118)

[582] महाभाष्यम् – (1-1-1)

[583] अष्टाध्यायी – (1-2-41)

इति “ अपृक्त एकाल्प्रत्ययः ” इत्यादि । एवञ्चाचार्यव्यवहारेणेदमपि ज्ञाप्यते यद्विधेयबोधकपदानां पूर्वप्रयोगेऽपि साधुत्वं न निवर्त्तते इति । अत एव ‘ वाक्यं वक्तर्यधीनं हि ’ इति प्रोक्तम् । अत एव च “ स्थानिवदादेशोऽनल्विधौ ”[584] इति सूत्रेऽपि विधेयबोधकस्य स्थानिवद् इति पदस्य न पश्चात् प्रयोगः । यद्यपि वृद्धिशब्दस्य महाभाष्ये मङ्गलार्थत्वं प्रतिपादितम्, तथापि प्रकृतार्थज्ञापनसम्भवेन तदविरोधात् । अन्यत्रापि तथाप्रयोगोपदर्शनेन प्रकृतार्थलाभात्[585] ।

- **सञ्ज्ञासञ्ज्ञिनोरितरेतराश्रयदोषोद्धारः**

सतः सञ्ज्ञिनः सञ्ज्ञाभावात् तदाश्रये सञ्ज्ञिनि वृद्ध्यादिष्वितरेतराश्रयत्वादप्रसिद्धिः । का इतरेतराश्रयता ? सतामादैचां वृद्धिसञ्ज्ञया भवितव्यम्, वृद्धिसञ्ज्ञया चादैचो भाव्यन्ते । तदेतदितरेतराश्रयं भवति । ‘ इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते ’ इति शङ्कायां भाष्यकार आह – ‘ सिद्धं तु नित्यशब्दत्वात् । नित्याः शब्दाः, नित्येषु शब्देषु सतामादैचां सञ्ज्ञा क्रियते, न च सञ्ज्ञया आदैचो भाव्यन्ते ’ ।

- **तपरकरणस्य प्रयोजनम्**

भिन्नकालसवर्णग्रहणनिवृत्तिः समकालसवर्णग्रहणञ्च तपरकरणस्य प्रयोजनमस्ति । ‘ आदैच् ’ इत्यत्र ‘ तः परो यस्मात् स तपरः ’ इति बहुव्रीहिविग्रहे आकारस्तपरः, ‘ तात् परः ’ इति पञ्चमीतत्पुरुष-विग्रहे ऐजपि तपरः ।

‘ आद् ’ इत्यत्र तपरकरणन्तु अनुनासिकत्वादीनां गुणानां भेदकत्वाभावात् आकारेण षड्विधानां तेषां ग्रहणेन आकारस्य अण्त्वाभावादेव “ अणुदित्सवर्णस्य चाप्रत्ययः ”[586] इति सूत्रस्य प्रवृत्तित्वेन प्लुतग्रहणाभावात् सिद्धत्वात् समकालग्रहणार्थत्वेन भिन्नकालव्यावृत्त्यर्थत्वेन च तपरस्योपयोगाभावाद् असन्देहार्थस्तकारो वर्त्तते । तकाराभावे आकारस्य ऐचा सह वृद्धौ आकारस्य विलयेन तत्सत्त्वे सन्देहः स्यात् किमिमावैचावेव, आहोस्विदाकारोऽप्यत्र निर्दिश्यते ? ।

उत्तरत्र ऐचि तु वर्णसमाम्नाये ऐऔ इति स्वरूपेण पाठात् अण्प्रत्याहारे श्रूयमाणत्वेन “ अणुदित्सवर्णस्य चाप्रत्ययः ” इति सूत्रे अण्पदेन ग्रहणात् प्लुतस्यापि ऐच्पदेन ग्रहणं प्राप्तम् । तस्य वारणाय तपरकरणमवश्यं कर्तव्यम् । तेन त्रिमात्राणां चतुर्मात्राणां च स्थानिनां स्थाने द्विमात्रा एव

---

[584] अष्टाध्यायी – (1-1-56)

[585] महाभाष्यनिगूढाकूतयः – (पृ. – 41)

[586] अष्टाध्यायी – (1-1-69)

वृद्धिसञ्ज्ञका आदेशाः स्युः । तथा च द्विमात्रिक आकार ऐकार औकारश्च वृद्धिपदवाच्या भवन्तीति सूत्रस्य निर्गलितोऽर्थः ।

ननु गुणानां भेदकत्वाद् अनुनासिकत्वोदात्तत्वानुदात्तत्वादीनां समकालानां सङ्ग्रहाय तपरकरणस्य ‘ आद् ’ इत्यत्र बहुव्रीहिविग्रहत्वेनापि सम्भवेन असन्देहार्थत्वं कुतः ? ।

तत्र भाष्यकार आह – “ वृद्धिरादैच् ” इति सूत्रव्याख्यायाम् – ‘ उभयमिदं गुणेषूक्तम् – भेदकाः, अभेदका इति । किं पुनरत्र न्याय्यम् ? अभेदका गुणा इत्येव न्याय्यम् ’ इति । गुणा अभेदकाः – इतरव्यावर्तका न भवन्ति । अत एव “ अस्थिदधिसक्थ्यक्ष्णामनङुदातः ”[587] इति सूत्रे उदात्तग्रहणं कृतम् । अन्यथा उदात्तगुणकमेवानङमुच्चारयेत् । अत एव “ अस्थिदधिसक्थ्यक्ष्णामनङुदातः ” इति सूत्रे उदात्तपदोच्चारणरूपयत्नविशेषस्य सत्त्वात् अत्र गुणस्य भेदकत्वं स्वीक्रियते । “ वृद्धिरादैच् ” इत्यत्र सूत्रे यत्नविशेषस्याभावाद् गुणानामभेदकत्वं मन्यते ।

- **सञ्ज्ञासञ्ज्ञिभावः**

अत्र “ वृद्धिरादैच् ” इति सूत्रे अनर्थकं साध्वनुशासनं प्रयोगनियमार्थमादेशार्थमागमार्थं चेमान् सम्भाव्यमानान् पक्षान् निराकृत्य भगवान् महाभाष्यकारः पतञ्जलिः इदं खल्वपि भूयः सामानाधिकरण्यमेकविभक्तित्वञ्च द्वयोश्चैतद् भवति । कयोः, विशेषणविशेष्ययोर्वा, सञ्ज्ञासञ्ज्ञिनोर्वा ? तत्रैतत्स्याद्विशेषणविशेष्ये इति । तच्च न द्वयोर्हि प्रतीतपदार्थकयोर्लोके विशेषणविशेष्यभावो भवति । न चादैच्छब्दः प्रतीतपदार्थकः, तस्मात्सञ्ज्ञासञ्ज्ञिनावेव इति परमोजस्विसहेतुकवाक्यकदम्बेन सञ्ज्ञा-सूत्रत्वमेवोररीचकार ।

कृतानामकृतानां चादैचां प्रत्येकं साधारण्येन वृद्धिसञ्ज्ञा स्यादित्ययं निर्गलितः सूत्रार्थः ।

- **भट्टोजिदीक्षितनागेशभट्टयोः मतभेदः**

भट्टोजिदीक्षितस्य मतम् – सिद्धान्तकौमुद्यां भट्टोजिदीक्षितैः अस्य सूत्रस्य आच् च ऐच् च वृद्धिसञ्ज्ञः स्यात् इत्यर्थः क्रियते तथा च तद्रीत्या इदं द्विपदं सूत्रम् । वृद्धिः आदैच् इति । तत्र आदैच् पदे आच्च ऐच्च इतीतरेतरयोगद्वन्द्वः[588] । तेन उक्तसूत्रार्थलाभः ।

---

[587]अष्टाध्यायी – (7-1-75)

[588] इहाच्च ऐच्चेतीतरेतरयोगद्वन्द्वः सुपां सुलुक्....... इति सुलुग्वा । (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 66)

अथवा तन्मतेन समाहारद्वन्द्वस्वीकारेऽपि न दोषः । समासान्तविधेरनित्यत्वेन तत्र पक्षेऽपि टजभावस्य सिद्धेः[589] । ‘ कृतमनयोः साधुत्वम् ’ इत्यादिभाष्यग्रन्थाश्चास्मिन्पक्षेऽनुकूलाः । अनयोः पदयोरिति स्वरसात् ।

अथवा ‘ आत् ’ इत्यसमस्तमेव पस्पशायाम् ‘ शब्दाप्रतिपत्तः ’ इति वार्तिके भाष्यकारेणैव ‘ वृद्धिः आदैच् ’ इति पदविभागदर्शनात् । अस्मिंश्च पक्षे ‘ अनयोः सूत्रखण्डयोः ’ इति नेयम् । पक्षान्तराभिप्रायकमेव वा तत् । वृद्धिशब्दस्तु तन्त्रेणावृत्या वा योजनीयः । “ द्विर्वचनेऽचि ”[590], “ इग्यणः सम्प्रसारणम् ”[591] इत्यादाविवोभयथाऽप्यदोषात् ’[592] । अनया रीत्या इदं त्रिपदं सूत्रमिति ।

अत्र सूत्रे तपरकरणं परार्थ नाम ऐजर्थमेव, इति भट्टोजिदीक्षितानां सिद्धान्तः । तेन त्रिमात्रचतुर्मात्राणां न वृद्धिसञ्ज्ञा इति फलं बोध्यम्[593] । आकारस्य कृते तु तत्स्पष्टार्थमिति तेषामभिप्रायः[594] ।

किं च ऐजर्थं यत्तपरकरणं तदपि यथोद्देशपक्षे एव आवश्यकं न तु कार्यकालपक्षे इत्यपि भट्टोजिदीक्षितानां मतं बोध्यम्[595] । तद्रीत्या कार्यकालपक्षे यत्र वृद्धिपदं तत्र आदैजित्युपतिष्ठते इति सूत्रार्थात् आदैच् पदस्य वृद्धिविशेषणतया विधेयत्वम् ।

एवं च ‘ अप्रत्ययः ’ इति निषेधादेव सवर्णग्रहणस्य अप्रसक्त्या तत्पक्षे तद्ग्रहणवारणाय कार्यकालपक्षे तपरकरणस्य प्रयोजनाभावात्[596] । तस्माद् यथोद्देशपक्षे एव तदावश्यकं न तु कार्यकाल-पक्षे इति भट्टोजिदीक्षितानां मतं बोध्यम् ।

---

[589] अथवा समाहारद्वन्द्वो न चैवं द्वन्द्वच्चुदषहान्तात् इति टच् स्यादिति वाच्यं समासान्तविधेरनित्यत्वात् । (शब्दकौस्तुभः भागः - 1 – प्रकृतसूत्रे – (पृ. – 66)

[590] अष्टाध्यायी – (1-1-59)

[591] अष्टाध्यायी – (1-1-45)

[592] शब्दकौस्तुभः – प्रकृतसूत्रे

[593] आदिति तपरकरणमैजर्थम्, तेन त्रिमात्रचतुर्मात्रणामैचां सञ्ज्ञा न भवतीति । (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 68)

[594] इह तु तपरकरणं स्पष्टार्थमेवेति । (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 68)

[595] भाष्ये तु पक्षान्तराभिप्रायेण ऐजर्थत्वमुक्तम् । तदपि यथोद्देशपक्षे बोध्यम् । (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 76)

[596] कार्यकालपक्षे तु विधिवाक्येनैव वृद्धिसञ्ज्ञाविशिष्टानामादैचां भाव्यमानतया सवर्णग्रहणं न प्राप्नोत्येव । (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 76-77)

‘ वृद्धिः आत् ऐच् ’ इति पदत्रयात्मकं सूत्रमित्यपि भाष्योक्तः पक्षः भट्टोजिदीक्षितैः प्रदर्श्यते। किन्तु तत्पक्षे तेषां सहमति न दृश्यते[597]। यतोहि ‘ कृतमनयोः साधुत्वम् ’ इति भाष्यस्य तत्र पक्षे ‘ अनयोः, सूत्रखण्डयोः ’ इत्यर्थकतया नेयत्वेन तैः वर्णनात्। अथवा भट्टोजिदीक्षितरीत्या ‘ कृतमनयोः साधुत्वम् ’ इति भाष्यं द्विपदात्मकं सूत्रमिति पक्षाभिप्रायकमेव। तथा च तद्रीत्या द्विपदं सूत्रमित्येव पक्षः प्रधानः इति बोध्यम्।

नागेशभट्टस्य मतम् – नागेशभट्टैस्तु वृद्धिः आत् ऐजिति पदत्रयात्मकं सूत्रमित्येव पक्षः प्रधानरूपेण प्रस्तूयते[598]। अतः तद्रीत्या समासान्तादिप्रवृत्तिशङ्कैव न[599]।

नागेशभट्टरीत्या तपरकरणस्य असन्देहार्थं पूर्वार्थत्वमपि प्रयोजनम्[600]। भाष्यरीत्या गुणानामभेदकत्वेन प्राप्तस्य सवर्णग्रहणस्य अभावार्थं तत्रापि तस्य प्रयोजनसम्भवात्। कृष्णैकत्वमित्यादौ त्रिमात्रव्यावृत्तये परार्थमपि तपरकरणं सप्रयोजनमिति नागेशभट्टानां सिद्धान्तः[601]। किञ्च तपरकरणस्य परार्थत्वं तद्रीत्या कार्यकालपक्षे यथोद्देशपक्षे चावश्यकम्। तद्रीत्या कार्यकालपक्षे मृजेर्वृद्धिरित्यादौ वृद्धिपदार्थजिज्ञासायां “ वृद्धिरादैच् ” इत्युपस्थित्या तदर्थबोधरूपशक्तिग्रहे वृत्ते विधिवाक्यार्थबोधः[602]।

एवञ्च सञ्ज्ञासूत्रस्य पक्षद्वयेऽपि पृथग् वाक्यार्थबोधात् तपरकरणं द्वयोरपि पक्षयोः आवश्यकमिति नागेशभट्टानामभिप्रायः।

कार्यकालपक्षे तपरत्वं स्पष्टार्थम् ‘ आदैच् ’ पदार्थस्य वृद्धिविशेषणतया विधेयत्वेन सवर्णग्रहणप्रसक्तेः इत्यादि भट्टोजिदीक्षितमतं तु नागेशभट्टैः नाङ्गीक्रियते[603]। उक्तरीत्या तन्मते पृथक् वाक्यार्थबोधस्य आवश्यकत्वाद् इति बोध्यम्। ‘ सर्वे सर्वार्थवाचकाः ’ इति पक्षे सञ्ज्ञासूत्राणां

---

597 ‘ कृतमनयोः साधुत्वम् ’ इत्यादिभाष्यग्रन्थाश्चास्मिन् पक्षे अनुकूलाः। अनयोः पदयोरिति स्वरसात्। अथवा ‘ आत् ’ इत्यसमस्तमेव ‘ पस्पशायां शब्दाप्रतिपत्तिः ’ इति वार्तिके भाष्यकारैरेव वृद्धिः आदैजिति पदविभागप्रदर्शनात्। अस्मिंश्च पक्षे अनयोः सूत्रखण्डयोरिति नेयम्। (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 67-68)

598 यद्वा पदत्रयं पस्पशायां भाष्ये वृद्धिः आत् ऐच् इति पदविभागदर्शनात्। (महाभाष्यम् – उद्द्योतः पृ. 128)

599 वृद्धिः आत् ऐजिति पदत्रयमिति न समासान्तादिप्रवृत्तिशङ्का। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

600 तपरकरणमसन्देहार्थतया पूर्वार्थम्, प्रकृतसूत्रे भाष्येऽत्र शास्त्रे गुणानामभेदकत्वं ज्ञापकादाश्रित्य सवर्ण-ग्रहणार्थत्वाभावस्योक्तत्वात्। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

601 ‘ कृष्णौत्कण्ठम्, गङ्गौघः ’ इत्यादौ त्रिमात्रव्यावृत्तये परार्थमपि। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

602 अत्र पक्षे एकत्र शक्तिग्रहे वृत्तेऽपि तत्प्रदेशस्थस्यैव तत्रार्थे शक्तिरिति सम्भावनया प्रदेशान्तरस्थे बोधो न स्यादिति सर्वप्रदेशेषु तत्तत्पदशक्तिग्रहपूर्वकं विधिवाक्यार्थबोधः। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

603 एतेन कार्यकालपक्षे तपरत्वं स्पष्टार्थमेव आदैच् पदार्थस्य वृद्धिविशेषणतया विधेयत्वेन सवर्णग्रहणाप्रसक्तेः। यत्र वृद्धिपदं तत्रादैजित्युपतिष्ठते इति क्रमेण सञ्ज्ञासूत्राणामर्थादित्यापास्ताम्। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

नियमार्थत्वमित्यपि भट्टोजिदीक्षितमतं नागेशभट्टैः नाङ्गीक्रियते । तैः एतद्विषये लघुशब्देन्दुशेखरे विशेषरूपेण स्वमतं प्रकटितं दृश्यते । तत्र ' सर्वे सर्वार्थवाचकाः ' इति सिद्धान्तस्य द्विधा खण्डनं विधीयते ।

प्रथमतः अस्य सिद्धान्तस्य स्वीकारेऽपि वाचकत्वस्य गृहीतस्यैव बोधजनकत्वेन सञ्ज्ञासूत्राणां सञ्ज्ञिविषये अज्ञातशक्तिज्ञापकतायाः सत्त्वाद् विधित्वमेव उचितमिति तेषां सिद्धान्तः ।

अपरतश्च ' सर्वे सर्वार्थवाचकाः ' इति सिद्धान्तः अस्मद्दृष्ट्या नैवोपयुक्तः योगिदृष्ट्या तस्य स्वीकारयोग्यत्वेऽपि अस्मादृशां सर्वे सर्वशब्दानां सर्वेषु अर्थेषु विशिष्यज्ञानाभावाद् अयं सिद्धान्तः नोपपद्यते । यद्यपि सामान्यतया तादृशं ज्ञानं अस्मासु वर्तते किन्तु न तद्बोधोपयोगी अतः अस्य सिद्धान्तस्य स्वीकारयोग्यत्वादेव तदाधारेण सञ्ज्ञासूत्राणां नियमार्थत्वं न स्वीकारयोग्यमिति नागेशभट्टानां सिद्धान्तः ।

एवञ्च वृद्धिसञ्ज्ञासूत्रं द्विपदं त्रिपदमिति उभयपक्षो भट्टोजिदीक्षितैः समर्थ्यते । त्रिपदसूत्रमिति पक्षश्च नागेशभट्टैः समर्थ्यते ।

तपरकरणमाकारविषये स्पष्टार्थम्, ' ऐच् ' विषये यथोद्देशपक्षे आवश्यकम्, कार्यकालपक्षे स्पष्टार्थमिति भट्टोजिदीक्षितानामभिप्रायः । किन्तु आकारविषये असन्देहार्थम्, ' ऐच् ' विषये यथोद्देशपक्षे कार्यकालपक्षे च तपरकरणमावश्यकमिति नागेशभट्टानामभिप्रायः ।

' विधिनियमसम्भवे विधिरेव ज्यायान् ' इति परिभाषाप्रामाण्यात् सञ्ज्ञासूत्राणां विधित्वमेव उचितं न तु नियमत्वमिति नागेशभट्टानां सिद्धान्तः ।

एवञ्च भट्टोजिदीक्षितैः सञ्ज्ञासूत्राणाम् एकस्मिन् पक्षे नियमत्वम्, अपरस्मिन् पक्षे विधित्वं स्वीक्रियते । किन्तु नागेशभट्टैः सञ्ज्ञासूत्राणां विधित्वमेव स्वीक्रियते, न तु नियमार्थत्वमिति ।

सञ्ज्ञासूत्राणां नियमार्थत्वमिति भट्टोजिदीक्षितानां सिद्धान्तः, विध्यर्थत्वमिति नागेशभट्टानां सिद्धान्तः ।

अतः उपर्युक्तेषु विषयेषु भट्टोजिदीक्षितनागेशभट्टयोः मतभेदः स्पष्टः इति बोध्यम्[604] ।

वृत्तौ दत्तान्युदाहरणानि

तद्भावितोदाहरणम् – भागः, त्यागः, यागः, नायकः, चायकः, पावकः, स्तावकः, कारकः, हारकः, पाठकः, पाचकः, औपगवः, औपमन्यवः, ऐतिकायनः, आश्वलायनः, आरण्यः, अचैषीत्, अनैषीत्, अलावीत्, अपावीत्, अकार्षीत्, अहार्षीत्, अपाठीत् ।

[604] पाणिनिसञ्ज्ञासूत्रविमर्शः – (पृ. –73)

अतद्भावितोदाहरणम् – शालीयः, मालीयः।

अत्रेदं समालोच्यते यद् अतद्भावितस्याकारस्योदाहरणं दत्तम्, परञ्च महाभाष्यवद् ऐकारौकारयोस्त्वतद्भावितयोरुदाहरणं नात्र प्रदर्शितम् । तयोरुदाहरणे रैमयम्, नौमयम् । अत्रैकारौकारयोर्वृद्धिसञ्ज्ञायां सत्यां वृद्धसञ्ज्ञा। तस्याञ्च सत्यां रायो विकारः, नावो विकारः इति " नित्यं वृद्धशरादिभ्यः "[605] इति सूत्रेण मयड् भवति।

भाष्ये दत्तानि चोदाहरणानि

तद्भावितोदाहरणम् – खट्वा एलका खट्वैलका, खट्वा ओदनः खट्वौदनः, खट्वा ऐतिकायनः खट्वैतिकायनः, खट्वा औपगवः खट्वौपगवः।

अतद्भावितोदाहरणम् – शालीयः, मालीयः, आम्रमयम्, शालमयम्, आम्रगुप्तायनिः, शालगुप्तायनि।

अत्रापि भाष्ये ऐकारौकारयोस्त्वतद्भावितयोरुदाहरणं नात्र प्रदर्शितम्।

वृत्तिभाष्ययोरुदाहरणानि समीक्ष्य इदं स्पष्टं भवति यद् वृत्तिकारः प्रायेण महाभाष्यमनुसरति।

- **तद्भावितवृद्धिसञ्ज्ञाप्रदेशाः** – प्रदिश्यन्ते कथ्यन्ते प्रयोजनानि यत्र स प्रदेशः। यथा –

1. वृद्धिरेचि – (6-1-87)

आदेचि परे वृद्धिरेकादेशः स्यात् । उदाहरणम् – कृष्णैकत्वम्, गङ्गौघः, देवैश्वर्यम्, कृष्णौत्कण्ठ्यम्।

2. एत्येधत्यूठ्सु – (6-1-88)

अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। उदाहरणम् – उपैति,उपैधते, प्रष्ठौहः।

3. आटश्च – (6-1-89)

आटोऽचि परे वृद्धिरेकादेशः स्यात्। उदाहरणम् – ऐधत, ऐक्षत, बहुश्रेयस्यै।

4. उपसर्गादृति धातौ – (6-1-90)

अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। उदाहरणम् – उपार्च्छति, प्रार्च्छति।

5. वा सुप्यापिशलेः – (6-1-91)

अवर्णान्तादुपसर्गादृकारादौ सुबन्तप्रकृतिकधातौ परे वृद्धिरेकादेशो वा स्यात्। उदाहरणम् – प्रार्षभीयते, प्रर्षभीयति।

---

[605] अष्टाध्यायी – (4-3-144)

6. अचो ञ्णिति – (7-2-115)

अजन्ताङ्गस्य वृद्धिः स्यात् ञिति णिति च प्रत्यये परे। उदाहरणम् – सखायौ, कारकः,कार्यम्।

7. अत उपधायाः – (7-2-116)

उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे। उदाहरणम् – जगाद, पाचकः।

8. तद्धितेष्वचामादेः – (7-2-117)

ञिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः स्यात्। उदाहरणम् – गार्ग्यः, दाक्षिः, औपगवः।

9. किति च – (7-2-118)

किति तद्धिते परेऽचामादेरचो वृद्धिः स्यात्। उदाहरणम् – नाडायनः, आक्षिकः।

10. देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् – (7-3-1)

एषां पञ्चानां वृद्धिप्राप्तावादेरच आत् स्यात्, ञिति णिति किति च। दाविकम्, शांशपः, दात्यौहम्, दार्घसत्रम्, श्रायसम्।

11. केकयमित्रयुप्रलयानां यादेरियः – (7-3-2)

एषां यकारादेरियादेशः स्यात् ञिति णिति किति च परे। कैकेयः, मैत्रेयिका।

12. न कर्मव्यतिहारे – (7-3-6)

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् इति सूत्रेण प्राप्तस्य निषेधेनादिवृद्धिः स्यात्। उदाहरणम् – व्याक्रोशी, व्यावहासी।

13. स्वागतादीनां च – (7-3-7)

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् इति सूत्रेण प्राप्तस्य निषेधेनादिवृद्धिः स्यात्। उदाहरणम् – स्वागतिकः, स्वाध्वरिकः, स्वाङ्गिः।

14. श्वादेरिञि – (7-3-8)

श्वन्शब्दपूर्वपदस्याङ्गस्य इञि परे न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् इति सूत्रेण प्राप्तस्य निषेधेनादिवृद्धिः स्यात्। उदाहरणम् – श्वादंष्ट्रिः।

15. पदान्तस्यान्यतरस्याम् – (7-3-9)

श्वादेरङ्गस्य पदशब्दान्तस्यैज्वा स्यात्। उदाहरणम् – श्वापदस्येदं श्वापदम्, शौवापदम्।

16. अवयवादृतोः – (7-3-11)

अवयववाचिनः पूर्वपदादृतुवाचिनोऽचामादेरचो वृद्धिः स्यात् ञिति णिति किति च तद्धिते परे। उदाहरणम् – पूर्ववार्षिकः, अपरहैमनः।

17. सुसर्वार्धाज्जनपदस्य – (7-3-12)

सुसर्वार्धपूर्वस्य जनपदवाचिन उत्तरपदस्य वृद्धिः स्यात् । उदाहरणम् – सुपाञ्चालकः, सर्वपाञ्चालकः, अर्धपाञ्चालकः ।

18. दिशोऽमद्राणाम् – (7-3-13)

दिग्वाचकाज्जनपदवाचिनो मद्रवाचिभिन्नस्य वृद्धिः स्यात् । उदाहरणम् – पूर्वपाञ्चालकः,

19. प्राचां ग्रामनगराणाम् – (7-3-14)

दिशः परे ये प्राच्यग्रामवाचिनः प्राच्यनगरवाचिनश्च तेषामवयवस्यादेः वृद्धिः स्यात् । उदाहरणम् – पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः ।

20. सङ्ख्यायाः संवत्सरसंख्यस्य च – (7-3-15)

संख्याया उत्तरपदस्य संवत्सरसंख्यस्य वृद्धिः स्यात् ञिदादौ परे । उदाहरणम् – द्विसांवत्सरिकः ।

21. वर्षस्याभविष्यति – (7-3-16)

अभविष्यति यो ञिदादिः, तस्मिन् परे संख्याया उत्तरपदस्य वर्षस्य वृद्धिः स्यात् उदाहरणम् – द्विवार्षिकः ।

22. परिमाणान्तस्यासञ्ज्ञाशाणयोः – (7-3-17)

परिमाणान्तस्याङ्गस्य संख्याया उत्तरपदवृद्धि स्यात् ञिदादौ, सञ्ज्ञायां विषये शाणे चोत्तरपदे तु न । उदाहरणम् – परमनैष्किकः ।

23. जे प्रोष्ठपदानाम् – (7-3-18)

प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिः स्याज्जातार्थे ञिति णिति किति च परे । उदाहरणम् – प्रोष्ठपदासु जातः प्रोष्ठपादो माणवकः ।

24. हृद्भगसिन्ध्वन्ते पूर्वपदस्यच – (7-3-19)

हृदाद्यन्ते पूर्वोत्तरपदयोरचामादेरचो वृद्धिः ञिति णिति किति च परे । उदाहरणम् – सौहार्दः, सौहार्द्यम्, सौभागिनेयः, साक्तुसैन्धवः ।

25. अनुशतिकादीनां च – (7-3-20)

एषामुभयपदवृद्धिर्ञिति णिति किति च परे । उदाहरणम् – अधिदेवस्येदमिति आधिदैविकम्, आधिभौतिकम्, ऐहलौकिकम्, पारलौकिकम् ।

26. देवताद्वन्द्वे च – (7-3-21)

अत्र पूर्वोत्तरपदयोराद्यचो वृद्धिर्ञिति णिति किति च परे। उदाहरणम् – अग्नामरुतौ देवता अस्य आग्निमारुतम्।

27. दीर्घाच्च वरुणस्य – (7-3-23)

दीर्धात् परस्य वरुणस्य वृद्धिर्न स्यात्। उदाहरणम् – ऐन्द्रावरुणम्।

28. प्राचां नगरान्ते – (7-3-24)

प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्योत्तरपदस्य चाचामादेरचो वृद्धिर्ञिति णिति किति च परे। उदाहरणम् – सुह्मनगरे भवः सौह्मनागरः, पौण्ड्रनागरः।

29. जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् – (7-3-25)

जङ्गलाद्यन्तस्याङ्गस्य पूर्वपदस्याचामादेरचो वृद्धिरुत्तरपदस्य तु वा ञिति णति किति च परे। उदाहरणम् – कुरुजङ्गले भवम् कौरुजङ्गलम्, कौरुजाङ्गलम्, वैश्वधेनवम्, वैश्वधैनवम्, सौवर्णवलजम्, सौवर्णवालजम्।

30. अर्धात् परिमाणस्यपूर्वस्य तु वा – (7-3-26)

अर्धात् परिमाणवाचकस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा ञिति णित किति च उदाहरणम् – अर्धद्रोणेन क्रीतम् अर्धद्रौणिकम्, आर्धद्रौणिकम्।

31. प्रवाहणस्य ढे – (7-3-28)

प्रवाहणशब्दस्योत्तरपदस्याचामादेरचो वृद्धिः पूर्वपदस्य तु वा ढे परे। उदाहरणम् – प्रवाहणस्य अपत्यम् प्रावाहणेयः, प्रवाहणेयः।

32. तत्प्रत्ययस्य च – (7-3-29)

ढप्रत्ययान्तस्य प्रवाहणस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा। उदाहरणम् – प्रवाहणेयस्य अपत्यम् प्रावाहणेयिः, प्रवाहणेयिः।

33. नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् – (7-3-30)

नञः परेषां शुच्यादिपञ्चानामादेरचो वृद्धिः पूर्वपदस्य तु वा ञिदादौ परे। उदाहरणम् – आशौचम्, अशौचम्। आनैश्वर्यम्, अनैश्वर्यम्। आक्षैत्रज्ञम्, अक्षैत्रज्ञम्।

34. यथातथयथापुरयोः पर्यायेण – (7-3-31)

नञः परयोरेतयोः पूर्वोत्तरपदयोः पर्यायेणादेरचो वृद्धिर्ञिदादौ परे। उदाहरणम् – अयथातथाभाव आयथातथ्यम् , अयाथातथ्यम्। आयथापुर्यम्, अयाथापुर्यम्।

35. उतो वृद्धिर्लुकि हलि – (7-3-89)

लुग्विषये उकारस्य वृद्धिः स्यात् पिति हलादौ सार्वधातुके, न त्वभ्यस्तस्य। उदाहरणम् – यौति, स्तौति, नौमि।

36. ऊर्णोतेर्विभाषा – (7-3-90)

ऊर्णोतेर्वा वृद्धिः स्यात् हलादौ पिति सार्वधातुके। उदाहरणम् – ऊर्णौति, ऊर्णोति।

- **अतद्भावितवृद्धिसञ्ज्ञाप्रदेशाः**

1. वृद्धाट् ठक् सौवीरेषु बहुलम् – (4-1-148)

वृद्धात्सौविरगोत्राद्यूनि बहुलं ठक् स्यात्कुत्सायाम्। उदाहरणम् – भागवित्तिकः,भागवित्तायनः।

2. उदीचां वृद्धादगोत्रात् – (4-1-157)

वृद्धसञ्ज्ञकादगोत्रप्रत्ययान्तात्फिञ् वा स्यात्। उदाहरणम् – आम्रगुप्तायनिः, आम्रगुप्तिः।

3. वृद्धेत्कोसलाजादाञ् ञ्यङ् – (4-1-169)

जनपदक्षत्रियोभयवाचकाद् वृद्धसञ्ज्ञकाद्, इदन्तात्, कोसलादिभ्यां चापत्ये ञ्यङ् स्यात्। उदाहरणम् – आम्बष्ठ्यः, सौवीर्यः।

4. वृद्धाच्छः – (4-2-114)

वृद्धसञ्ज्ञकाच्छप्रत्ययः स्यात् शेषे। उदाहरणम् – शालीयः, मालीयः।

5. वाहीकग्रामेभ्यश्च – (4-2-117)

वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः। उदाहरणम् – कास्तीरिकी, कास्तीरिका।

6. विभाषोशीनरेषु – (4-2-118)

उशीनरेषु ये ग्रामास्तद्वाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ वा स्तः। उदाहरणम् – सौदर्शनिकी, सौदर्शनिका, सौदर्शनीया।

7. वृद्धात् प्राचाम् – (4-2-120)

प्राग्देशवाचिनो वृद्धादेवेति नियमार्थं सूत्रम्। उदाहरणम् – आढकजम्बुकः, शाकजम्बुकः।

8. धन्वयोपधाद् वुञ् – (4-2-121)

धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वृद्धाद्वुञ् शेषे। उदाहरणम् – ऐरावतकः, साङ्काश्यकः।

9. प्रस्थपुरवहान्ताच्च – (4-2-122)

एतदन्ताद् वृद्धाद्देशवाचिनो वुञ्। उदाहरणम् – मालाप्रस्थकः, नान्दीपुरकः।

10. रोपधेतोः प्राचाम् – (4-2-123)

रोपधादीकारान्ताच्च प्राग्देशवाचिनो वृद्धाद्वुञ्। उदाहरणम् – पाटलिपुत्रकः, काकन्दकः।

11. जनपदतदवध्योश्च – (4-2-124)

जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद्वुञ्। उदाहरणम् – आदर्शकः, त्रैगर्तकः।

12. अवृद्धादपि बहुवचनविषयात् – (4-2-125)

अवृद्धाद् वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात् प्रातिपदिकाद्वुञ्। उदाहरणम् – आङ्गकः, आजमीढकः, दारवकः कालञ्जरकः।

13. कच्छाग्निवक्त्रवर्तोत्तरपदात् – (4-2-126)

कच्छाद्युत्तरपदाद्देशवाचिनो वृद्धादवृद्धाच्च वुञ्। उदाहरणम् – दारुकच्छकः, काण्डाग्नकः,सैन्धुवक्त्रकः, वाहुवर्तकः।

14. वृद्धादकेकान्तखोपधात् – (4-2-141)

‘ अक ’, ‘ इक ’ एतदन्तात् खोपधाच्च वृद्धाद्देशवाचिनः छप्रत्ययः स्यात्। उदाहरणम् – ब्राह्मणकीयः, शाल्मलिकीयः, आयोमुखीयः।

15. कन्थापलदनगरग्रामह्रदोत्तरपदात् – (4-2-142)

कन्थादिपञ्चकोत्तरपदाद्देशवाचिनो वृद्धाच्छप्रत्ययः स्यात्। उदाहरणम् – दाक्षिकन्थीयम्, दाक्षिपलदीयम्, दाक्षिनगरीयम्।

16. नित्यं वृद्धशरादिभ्यः – (4-3-144)

एतेभ्यो मयट् स्यात् नित्यम्। उदाहरणम् – आम्रमयम्, शरमयम्, मृन्मयम्।

17. मालादीनां च – (6-2-88)

प्रस्थशब्दे उत्तरपदे मालादीनामादिरुदात्तः। उदाहरणम् – माला॑प्रस्थः, शोणा॑प्रस्थः।

- **अदेङ् गुणः – (1-1-2)**

अत्र सूत्रे तु यथैव एङर्थं तपरकरणम्, तथैव अकारार्थमपि। तेन ह्रस्वैवाकारस्य दीर्घयोरेव एकारौकारयोर्गुणसञ्ज्ञा।

तथा च ‘ तरति ’ इत्यादिषु स्थानिनो दीर्घत्वेऽपि ह्रस्वाकाररूप एव गुणः। न आकारो गुणसञ्ज्ञकत्वाभावात्। न च तपरत्वाभावेऽपि वृद्धिसञ्ज्ञया गुणसञ्ज्ञाया निरवकाशत्वाद् बाधादाकारो न स्यादिति वाच्यम्, आकडारादन्यत्र सञ्ज्ञासु बाध्यबाधकभावाभावात्। अत एव राजभ्याम् इत्यादौ

प्रातिपदिकपदाङ्गसञ्ज्ञादीनां समावेशः सिध्यति। तात्परत्वादेङामपि दीर्घाणामेव गुणसञ्ज्ञा। अत एव ' रथेशः ',' रमेशः ',' गङ्गोदकम् ',' रम्भोरुः ' इत्यादौ त्रिमात्रचतुर्मात्रा एङ आदेशा न।

अन्ये सर्वेऽपि विषयास्त एवात्रापि विवेचनीयास्सन्ति, ये " वृद्धिरादैच् " इत्यत्र विवेचिताः। वृत्तौ – ' अ ए ओ ' इत्येषां वर्णानां गुणसञ्ज्ञा भवति इति सामान्यतया वृत्तिर्लिखिता। परं काशिकाकृता – वृद्धिरादैच् इत्यत्र प्रदर्शितं सर्वमपि भाष्यार्थं सङ्गृह्य वृत्तिर्लिखिता। सा चेत्थम् – ' गुण शब्दः सञ्ज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानां सामान्येन तद्भावितानाम्, अतद्भावितानां च। तपरकरणं त्विह सर्वार्थम्। तरिता, चेता, स्तोता, पचन्ति, जयन्ति, अहं पचे। गुणप्रदेशाः – " मिदेर्गुणः " इत्येवमादयः '[606]।

- **तद्भावितातद्भावितगुणसञ्ज्ञाप्रदेशाः**

1. आद्गुणः – (6-1-86)

अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् संहितायाम्। उदाहरणम् – रमेशः, गङ्गोदकम्, कृष्णर्द्धिः।

2. अतो गुणे – (6-1-96)

अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः स्यात्। उदाहरणम् – भवन्ति, एधे।

3. न शसददवादिगुणानाम् – (6-4-126)

शसेर्ददेर्वकारादीनां गुणशब्देन भावितस्य च योऽकारस्तस्यैत्वाभ्यासलोपौ न। उदाहरणम् – विशशसतुः, विशशरतुः, ववमतुः, दददे।

4. ओर्गुणः – (6-4-146)

उवर्णान्तस्य भस्य गुणः तद्धिते। उदाहरणम् – वाहूबाहवि, बाभ्रव्यः।

5. स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः – (6-4-156)

एषां यणादिपरं लुप्यते, पूर्वस्य च गुणः इष्ठादिषु। उदाहरणम् – स्थविष्ठः, दविष्ठः, यविष्ठः. ह्रसिष्ठः. क्षेपिष्ठः, ह्रसिमा, क्षेपिमा।

6. मिदेर्गुणः – (7-3-82)

मिदेरिको गुणः स्यादित्सञ्ज्ञकशकारादौ। उदाहरणम् – मेद्यते।

7. जुसि च – (7-3-83)

---

[606] काशिका – (1-1-2)

अजादौ जुसीगन्ताङ्गस्य गुणः स्यात् । उदाहरणम् – अबिभयुः, अजुहवुः, अबिभरुः ।

8. सार्वधातुकार्धधातुकयोः – (7-3-84)

अनयोः परयोरिगन्ताङ्गस्य गुणः स्यात् । उदाहरणम् – नयति, भवति, तरति ।

9. जाग्रोऽविचिण्णल्ङित्सु – (7-3-85)

जागर्तेर्गुणः स्याद् विचिण्णल्ङिद्भ्योऽन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च । उदाहरणम् – जागरयति, जागरकः, जागरितः ।

10. पुगन्तलघूपधस्य च – (7-3-86)

पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात् सार्वधातुकार्धधातुकयोः । उदाहरणम् – व्लेपयति, रेपयति, क्नोपयति, भेदनम् ।

11. नाभ्यस्तस्याचि पिति सार्वधातुके – (7-3-87)

अभ्यस्तस्य लघूपधस्य गुणो न, अजादौ पिति सार्वधातुके । उदाहरणम् – नेनिजानि, वेविजानि, अनेनिजम्, अवेविजम् ।

12. भूसुवोस्तिङि – (7-3-88)

भू सू एतयोः सार्वधातुके तिङि परे गुणो न । उदाहरणम् – अभूत्, अभूः, अभूवम्, सुवै, सुवावहै, सुवामहै ।

13. गुणोऽपृक्ते – (7-3-91)

ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके । उदाहरणम् – और्णोत्, और्णोः ।

14. ह्रस्वस्य गुणः – (7-3-108)

ह्रस्वस्य गुणः स्यात् सम्बुद्धौ । उदाहरणम् – हे हरे !, हे गुरो !, हे मते ! ।

15. जसि च – (7-3-109)

ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे । उदाहरणम् – हरयः, गुरवः मतयः ।

16. ऋतो ङि सर्वनामस्थानयोः – (7-3-110)

ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात् । उदाहरणम् – ङौ – धातरि, सर्वनामस्थाने – धाता, हे धातः !, धातारौ, धातरः ।

17. घेर्ङिति – (7-3-111)

घिसञ्ज्ञकस्य ङिति सुपि गुणः स्यात् । उदाहरणम् – हरये, गुरवे, । हरेः, गुरोः ।

18. ऋतश्च संयोगादेर्गुणः – (7-4-10)

ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्याल्लिटि। उदाहरणम् – जह्वरतुः, जह्वरुः, सस्मरतुः,।

19. ऋच्छत्यॄताम् – (7-4-11)

तौदादिकस्य ऋच्छतेः ऋधातोः ॠतां च गुणः स्याल्लिटि। उदाहरणम् – आनर्च्छ, आनर्च्छतुः, आरतुः, निचकरतुः ।

20. ऋदृशोऽङि गुणः – (7-4-16)

ऋवर्णान्तानां दृशेश्च गुणः स्यादङि। उदाहरणम् – जरा, अदर्शत्।

21. शीङः सार्वधातुके गुणः – (7-4-21)

शीङ्धातोः गुणः स्यात् सार्वधातुके परे। उदाहरणम् – शेते, शयाते, शेरते।

22. गुणोऽर्तिसंयोगाद्योः – (7-4-29)

अर्तेः संयोगादेर्ऋदन्तस्य च गुणः स्याद् यकि यादावार्धधातुके लिङि च। उदाहरणम् – अर्यते, अर्यात्, स्मर्यते, स्मर्यात्।

23. यङि च – (7-4-30)

अर्तेः संयोगादेश्च ऋतो गुणः स्याद् यङि। उदाहरणम् – अरार्यते, सास्मर्यते।

24. मुचोऽकर्मकस्य गुणो वा – (7-4-57)

अकर्मकस्य मुचः गुणो वा सादौ सनि। उदाहरणम् – मोक्षते, मुमुक्षते,।

25. निजां त्रयाणां गुणः श्लौ – (7-4-75)

णिजिर् विजिर् विष्लृ एषामभ्यासस्य गुणः श्लौ। उदाहरणम् – नेनेक्ति, वेवेक्ति।

26. गुणो यङ्लुकोः – (7-4-82)

अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च। उदाहरणम् – बोभूयते, बोभवीति, बोभोति।

- **इको गुणवृद्धी – (1-1-3)**

इयं परिभाषा, न सञ्ज्ञासूत्रम्, समानविभक्त्यन्तत्वाभावात्, सञ्ज्ञाया अन्येन कृतत्वाच्च। नापि विधिसूत्रम्, “ ओर्गुणः ”[607] इत्यादिना पुनर्विधानस्य वैयर्थ्याद् गुणवृद्ध्योरन्यत्र विधानाच्च । नापि नियमसूत्रम्, अन्यैरगतार्थत्वाद् वाक्यभेदापत्तेश्च । नाप्यतिदेशः, वतिप्रत्ययेन समानविभक्त्या

[607] अष्टाध्यायी – (6-4-146)

चानिर्देशात् । नाप्यधिकारः, " न धातुलोप आर्द्धधातुके"[608] इत्यनेन सूत्रेण सहैव पठितव्ये पृथक् योगकरणसामर्थ्याद् अस्वरितत्वाच्च । अन्यदेवेदं परिभाषान्तरमसम्बद्धमनया परिभाषया इति प्रकृतसूत्र-भाष्यरूपव्याख्यानादुक्तार्थलाभः । तथा चेयं परिभाषा । अतोऽन्यासंभवात् परिभाषात्वमेवेति भावः ।

इक इति इक्शब्दप्रकृतिकषष्ठ्येकवचनान्तस्यानुकरणं शब्दस्वरूपपरतया प्रथमैकवचनान्तं नपुंसकम्, नपुंसकात् सोर्लुक् अन्यथा " अत्वसन्तस्य चाधातोः "[609] इति सूत्रेण दीर्घादेशः स्यात् ।

गुणश्च वृद्धिश्चेतीतरेतरद्वन्द्वसमासे वृद्धिशब्दस्य घिसञ्ज्ञत्वात् " द्वन्द्वे घि "[610] इति सूत्रेण वृद्धिशब्दस्य पूर्वं निपाते वृद्धिगुणौ इति स्यात्, न तु गुणवृद्धीति । इत एव निर्देशात् " लक्षणहेत्वोः क्रियायाः "[611] इति सूत्रनिर्देशाच्च पूर्वनिपातस्यानित्यत्वात् ।

" वृद्धिरादैच् " " अदेङ् गुणः " इति पूर्वसूत्राभ्यां गुणवृद्धिपदयोरनुवृत्त्या गुणवृद्धिपदार्थस्य लाभेन सूत्रे गुणवृद्धिग्रहणस्य वैयर्थ्यम्, पुनर्गुणवृद्धिग्रहणात् शब्दव्यापारमाश्रित्य ' गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी ' इत्यर्थबोधकं गुणवृद्धिपदमिति कल्प्यते । गुणपदस्य अदेङ्निष्ठविधेयताप्रयोजकगुणपदे वृद्धिपदस्य आदैज्निष्ठविधेयताप्रयोजकवृद्धिपदे च लक्षणां ग्राहयति । अत एवात्र गुणवृद्धिशब्दौ गुणवृद्धिपदबोध्ये लाक्षणिकौ इति भावः ।

न च गुणसञ्ज्ञासूत्रे वृद्धिसञ्ज्ञासूत्रे च श्रूयमाणं गुणवृद्धिपदं सञ्ज्ञापरत्वेन स्वरूपपरम् । अत्रानुवृत्तौ तस्य स एवार्थः स्यात्, न तद्बोध्यः सञ्ज्ञी अकारादिः । अत एव सञ्ज्ञिबोधाय " इको गुणवृद्धी " इत्यत्र सूत्रे गुणवृद्धिग्रहणं चरितार्थम् ।

यत्र, विधीयेते, तत्र, उपतिष्ठते इत्येतानि पदानि चाध्याह्रियन्ते । एवञ्च गुणवृद्धिशब्दाभ्यामुच्चारिताभ्यां यत्र गुणवृद्धी विधीयेते – विधीयतयोच्चार्येते तत्रेक इति षष्ठ्यन्तं पदमुपतिष्ठत इति सूत्रार्थः । विधेयताप्रयोजकं यत्र गुणवृद्धिपदं यत्र ' इकः ' इति षष्ठ्यन्तं पदमुपतिष्ठते । विधेयता च ' अदेङ् ', ' आदैच् ' निष्ठा गृह्यते । अतः " अदेङ् गुणः "," वृद्धिरादैच् " इत्यत्र नास्याः परिभाषाया उपस्थितिः । तत्र गुणवृद्धिपदाभ्यां न अकारादयो विधीयन्ते, परन्तु अकारादीन् उद्दिश्य गुणसञ्ज्ञा वृद्धिसञ्ज्ञा च बोध्यते इति न दोषावकाशः । " त्यदादीनामः "[612], " पथिमथ्यृभुक्षामात् "[613]

---

[608]अष्टाध्यायी – (1-1-4)

[609]अष्टाध्यायी – (6-4-14)

[610]अष्टाध्यायी – (2-2-32)

[611]अष्टाध्यायी – (3-2-126)

[612] अष्टाध्यायी – (7-2-102)

[613] अष्टाध्यायी – (7-1-85)

इत्यादौ नास्याः परिभाषायाः प्रवृत्तिः, गुणवृद्धिपदेन तेषामकारादीनां विधानाभावात्। " अतो गुणे "[614], " वृद्धिर्यस्याचामादिस्तद्वृद्धम् "[615] इत्यादौ अनुवादवाक्ये इक्परिभाषाया उपस्थितिः न भवति, ताभ्यां सूत्राभ्यां क्रमेण पररूपस्य वृद्धसञ्ज्ञायाश्च विधानेन तत्र श्रूयमाणगुणवृद्धिपदयोर्निमित्ततया उद्देश्यरूपत्वेन विधेयसमर्पकत्वाभावात्। अत एव ' भवन्ति ' इत्यत्र पररूपम् ' शालीयः ' इत्यत्रवृद्धलक्षणश्छप्रत्ययश्च सिद्धो भवति। अन्यथा इक्परिभाषोपस्थित्या इकः स्थाने निष्पन्ने गुणे परतः पररूपस्य विधानेन ' एधै ' इत्यत्र इक्स्थानिकस्य एकारस्य सत्त्वात् तत्रैव पररूपं स्यात्। एवम् इक्स्थानिकवृद्धेः वृद्धसञ्ज्ञायाम् ' औपगवः ' इत्यत्र स्यात्, शालाशब्दस्य न स्यात् , इकः स्थाने वृद्धेरभावात्। अत्र पदोपस्थितपक्षो महाभाष्यकारेण स्वीकृतः।

ननु गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते इत्युक्त्या गुणवृद्ध्योर्लक्ष्ये विधानेन तत्रेक इति षष्ठ्यन्तपदोपस्थितिः स्यात्, परन्तु तत्र नेष्टेति चेदत्राहुः। यत्रेत्यत्र यत् पदेन शास्त्रं ग्राह्यम्। घटकत्वं सप्तम्यर्थः। तथा च गुणवृद्धिशब्दाभ्यां यच्छास्त्रघटकगुणवृद्धी विधीयेते तत्र शास्त्रे ' इकः ' इति षष्ठ्यन्त-पदमुपतिष्ठत इत्यर्थस्वीकारेण न कश्चिद्दोष इति।

अत एव वृत्तिकारः पदोपस्थितपक्षं स्वीकृत्य एवं वृत्तिमाह – ' वृद्धिः स्यात्, गुणः स्याद् इति गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते, तत्र ' इकः ' इति षष्ठ्यन्तं पदमुस्थितं द्रष्टतव्यम् – तत्रेकः स्थाने भवत इत्यर्थः '।

उदाहरणानि ' चेता, स्तोता, कर्ता, अचैषीत्, अस्तौषीत्, अहार्षीत् ' इति।

प्रत्युदाहरणानि तु ' याता, ग्लायति, उम्भिता ' इति। अत्र आकारस्य अकारः, ऐकारस्य एकारः, मकारस्य स्थानसाम्यादोकारश्च गुणो मा भूत्। अत एव भाष्यकारः " इको गुणवृद्धी " इति सूत्रे इग्ग्रहणं किमर्थमिति प्रश्नमुद्भाव्य प्राह – ' इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम् '। एतत्सूत्राभावे आतः, सन्ध्यक्षरस्य, व्यञ्जनस्य च गुणः स्यात्तन्निवृत्तये सूत्रमिदम्।

ननु इदं सूत्रं न कार्यम्। न च सूत्राभावे गुणविधायके " पुगन्तलघूपधस्य च "[616] इत्यादौ ' इकः ' इत्यस्यानुपस्थित्या पुगन्तलघूपधाङ्गावयवस्य गुणः स्यादित्यर्थे ' पचति ' इत्यादौ ह्रस्वाकारस्य

[614] अष्टाध्यायी – (6-1-96)

[615] अष्टाध्यायी – (1-1-73)

[616] अष्टाध्यायी – (7-3-86)

ह्रस्वाकारगुणो यद्यपि विशेषाभावस्तथापि ‘ पच् ’ धातोः लिटि थलि ‘ पेचिथ ’ इत्यादौ गुणे कृते गुणशब्देन भावितत्वात् “ न शसददवादिगुणानाम् ”[617] इत्यनेन एत्वाभ्यासलोपौ न स्यातामिति वाच्यम्

“ थलि च सेटि ”[618] इति सूत्रारम्भसामर्थ्येन अत्र एत्वाभ्यासलोपौ भवत इति स्वीकारात्। न च सूत्राभावे ‘ याता, वाता ’ इत्यादौ “ सार्वधातुकार्धधातुकयोः ”[619] इत्यनेन दीर्घाकारस्य स्थाने ह्रस्वाकारगुणे ‘ यता, वता ’ इति स्यादिति वाच्यम् “ आतोऽनुपसर्गे कः ”[620] इत् सूत्रे ककारग्रहणेन दीर्घाकारस्य गुणो न भवतीति ज्ञापनात् । अन्यथा ‘ आतोऽनुपसर्गाद् अ ’ इति वक्तव्ये अकारे परे आकारस्य गुणादेशे द्वयोरकारयोः पररूपेण ‘ गोदः, कम्बलदः ’ इत्यादीनां सिद्धावाकारलोपार्थे कृतं ककारग्रहणं व्यर्थं स्यात्। “ तुन्दशोकयोः परिमृजापनुदोः ”[621] इत्यत्रानुवृत्त्यर्थं ककारग्रहणमिति चेत्तर्हि “ गापोष्टक् ”[622] इति सूत्रे टकःकित्करणमनर्थकं स्यात् । कित्करणं हि “ अतो लोपः ”[623] इत्याकारलोपार्थम् । यद्याकारस्य गुणः स्यात्तदा द्वयोराकारयोः पररूपेण ‘ सामगः ’ इत्यादि सिद्धौ कित्करणं व्यर्थं स्यात्तदेव व्यर्थीभूय ज्ञापयति – नाकारस्य गुणो भवतीति।

न च ग्लायतीत्यादौ सन्ध्यक्षरस्य गुणव्यावृत्त्यर्थमिग्ग्रहणमावश्यकमिति वाच्यम्। यदि ‘ ग्लायति ’ इत्यादावैकारादेर्गुणः स्यात्तदा ‘ ग्लै ’ इत्यत्र ऐकारग्रहणमनर्थकं स्यात् ‘ ग्ले ’ इत्येवोपदिशेत्, इत्यैकारोच्चारणसामर्थ्यान्न सन्ध्यक्षरस्य गुणो भवतीति ज्ञापनात्।

न चैकारोच्चारणेन यथा गुणो वार्य्यते तथैवायादेशः कथं न वार्य्यत इति वाच्यम्। ‘ यं विधि प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते ’ यस्य तु विधेर्निमित्तमेव नास्ति नासौ बाध्यत इति ज्ञापनात्।

न च सूत्राभावे ‘ उम्भिता, मन्दुरजः, पङ्कजम् ’ इत्यादावानन्तर्य्यतोऽर्धमात्रिकस्य व्यञ्जनस्य, मात्रिकोऽकारो गुणादेशस्स्यादिति वाच्यम् “ सप्तम्यां जनेर्डः ”[624] इति सूत्रे डित्त्वकरणाज्ज्ञाप्यते न व्यञ्जनस्य गुणो भवतीति । अन्यथा प्रमाणकृतान्तर्य्येण नकारस्याकारे गुणे पररूपे ‘ पङ्कजम् ’ इत्यादिसिद्धेः। न चानुनासिकापत्तिः, पररूपेण रूपग्रहणात्पररूपस्य विधानेन सिद्धेः। वस्तुतस्तु स्थान-कृतान्तर्य्यस्य बलीयस्त्वात्।

---

[617] अष्टाध्यायी – (6-4-126)

[618] अष्टाध्यायी – (6-4-121)

[619] अष्टाध्यायी – (7-3-84)

[620] अष्टाध्यायी – (3-2-3)

[621] अष्टाध्यायी – (3-2-5)

[622] अष्टाध्यायी – (3-2-8)

[623] अष्टाध्यायी – (6-4-48)

[624] अष्टाध्यायी – (3-2-97)

न च " अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः "[625] इति सूत्रोपरि ' सुदुरोरधिकरणे '[626] इति वार्त्तिके अनुवृत्त्यर्थं डकारग्रहणं चरितार्थमन्यथा ' गम् ' धातोर्मकारस्यौष्ठस्थानिकत्वेन ओकारगुणादेशे ' सुगः, दुर्गः ' इत्यादीनां सिद्धिर्न स्यादिति वाच्यम् तत्र तु " अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः " इति सूत्रात् डकारस्यानुवृत्तेः । व्यञ्जनस्य गुणाभावे तु " सप्तम्यां जनेर्डः " इति सूत्रस्थडकारग्रहणं ज्ञापकं बोध्यमिति चेन्न " सप्तम्यां जनेर्डः " इत्युत्तरं पठिते " अन्येष्वपि दृश्यते "[627] इति सूत्रे दृशि ग्रहणं सर्वोपाधि-व्यभिचारार्थं तेनैव धात्वन्तरादपि डप्रत्यये ' सुगः, नगः ' इत्यादीनां सिद्धौ " अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः " इति सूत्रस्थवार्त्तिकं प्रत्याख्यातमिति स्थितिः तथा च तत्रानुवृत्त्यर्थं डकारग्रहणस्य चारितार्थ्यात् । अन्यथा स्थानतः आनन्तर्य्यात् मकारस्य औकारगुणादेशे ' सुगः, नगः ' इत्यादीनां सिद्धिर्न स्यात् अतः डकारग्रहणं कर्तव्यमेव । न च गमेर्विचि एव सिद्धे ' गमेर्डोः '[628] इत्यनेन ' गम् ' धातोर्डो प्रत्ययविधानेन मकारस्य ओकारगुणेन भवतीति वाच्यम् । विचि सति सानुनासिक ओकारो गुणः स्याद् निरनुनासिक ओकारसिद्धये डोप्रत्ययस्यविधानात् । न च ' तनोतेर्ड उः सन्वच्च '[629] इति डित्करणान्न व्यञ्जनस्य गुण इति वाच्यम् । उणादीनामव्युत्पन्नत्वेन ज्ञापकत्वासम्भवात् । तथा च व्यञ्जनस्य गुणवारणार्थे सूत्रं कर्तव्यमेव ।

किञ्च सूत्राभावे ' भिन्नम् ' इत्यादौ इग्लक्षणत्वाभावेन " क्क्ङिति च "[630] इत्यनेन सूत्रेण वृद्धिनिषेधवारणाय च निषेधस्य इग्लक्षणे एव प्रवृत्तये च " इको गुणवृद्धी " इति सूत्रं कर्तव्यम् । अनिग्लक्षणस्यापि निषेधे " कमेर्णिङ् "[631] इति सूत्रेण णिङ्प्रत्यये परे ' कामयते ' इत्यादौ " क्क्ङिति च " इति निषेधात् " अत उपधायाः "[632] इत्यनेन वृद्धिर्न स्यात् तथा च तत्र निषेधाभावाय " इको गुणवृद्धी " इति सूत्रस्य कर्तव्यत्वादिति दिक् ।

" इको गुणवृद्धी " इति सूत्रम् " अलोऽन्त्यस्य "[633] इत्यस्य शेषः आहोस्वित् तदपवाद इति द्वयोः पक्षयोर्दोषान् समुद्भाव्य तन्निराकरणायैव पदोपस्थितिपक्षं प्राह – ' वृद्धिर्भवति गुणो भवतीति यत्र ब्रूयाद्

---

[625] अष्टाध्यायी – (3-2-48)

[626] सिद्धान्तकौमुदी – वार्त्तिकम् – (2016) – (पृ. – 63)

[627] अष्टाध्यायी – (3-2-101)

[628] सिद्धान्तकौमुदी – कृत्प्रकरणम् उणादिसूत्रम् – (225) – (पृ. – 198)

[629] सिद्धान्तकौमुदी – कृत्प्रकरणम् उणादिसूत्रम् – (730) – (पृ. – 302)

[630] अष्टाध्यायी – (1-1-5)

[631] अष्टाध्यायी – (3-1-30)

[632] अष्टाध्यायी – (7-2-116)

[633] अष्टाध्यायी – (1-1-52)

‘ इकः ’ इत्येतत्तत्रोपस्थितं द्रष्टव्यम् ’ । अदेङ्निष्ठविधेयताप्रयोजकं गुणपदम् आदैज्निष्ठविधेयता-प्रयोजकं वृद्धिपदञ्च यत्र तत्र इक इति षष्ठ्यन्तं पदमुपतिष्ठते इति पदोपस्थितिपक्षो भगवता सिद्धान्तित इति दिक् ।

- **न धातुलोप आर्धधातुके – (1-1-4)**

वृत्तिः – यस्मिन्नार्धधातुके धातोरवयवस्य लोपो भवति, तस्मिन्नेवार्धधातुके इकः स्थाने ये गुणवृद्धी प्राप्नुतस्ते न भवतः । लोलुवः, पोपुवः । मरीमृजः, सरीसृजः ।

अत्र धातुपदं धात्ववयवे लाक्षणिकम् । यद्यपि ‘ दुःखेन ईयते गम्यते ’ इति ‘ दुरिणो लोपश्च ’ इत्युणादिसूत्रेण दुःशब्दे उपपदे इण् गतावित्यस्माद् रक्प्रत्ययः, धातोश्च लोपः, ततः रोरि इति सूत्रेण उपसर्गान्त्यरेफलोपे “ ढ्रलोपे पूर्वस्य दीर्घोऽणः ” इति सूत्रेण दीर्घे सति च दूरमित्यत्र समस्तस्यापि धातोर्लोपोऽस्ति, तथापि तत्र गुणवृद्धिप्रसङ्गाभावात् तन्निषेधवैर्थ्यात् धातुशब्दोऽत्र तदेकदेशे विद्यते

प्रदीपे कैयटेनापि प्रोक्तम् – ‘ कृत्स्नस्य धातोर्लोपे गुणवृद्धिप्रसङ्गाभावादनर्थको निषेधः स्यादिति सामार्थ्याद्धात्वेकदेशलोपोऽत्र धातुलोपोऽभिमतोऽवयवक्रिययापि समुदायस्य व्यपदेशदर्शनात् । पटैकदेशे दग्धे ‘ पटो दग्धः ’ इतिवत् । अथवा समुदायशब्दोऽवयवे समुदायरूपारोपाद् वर्तते ’ ।

- **आर्धधातुकपदं कस्य विशेषणम्**

तत्पुरुषपक्षे आर्धधातुकग्रहणम् लोपविशेषणं वा गुणवृद्ध्योर्विशेषणं वा, बहुव्रीहिपक्षे तूभयविशषणं वेत्यत्र त्रयः पक्षाः सम्भवन्ति ।

तत्राद्ये पक्षे – सूत्रस्थार्धधातुकपदे सप्तम्येकवचनं मत्वा ‘ धातुलोपे ’ इत्यस्य सप्तम्येकवचनस्य विशेषणं वा स्यात् – आर्धधातुकनिमित्तके धातुलोपे सति यत्किञ्चिन्निमित्तके गुणवृद्धी न भवत इति सूत्रार्थः स्यात् । तत्रान्यनिमित्तयोरपि गुणवृद्ध्योर्निषेधापत्त्या प्रपूर्वत इन्धेः आर्धधातुकक्तप्रत्यये तन्निमित्तके “ अनिदितां हल उपधायाः क्ङिति ” इति सूत्रेण इन्धिधात्ववयवनकारलोपे च सति ‘ प्रेद्धः ’ इत्यत्र प्राप्नुवन्नाद्गुणोऽपि निषिध्येत । यद्यपि “ न धातुलोप आर्धधातुके ” इति सूत्रे “ इको गुणवृद्धी ” इति परिभाषाऽनुवृत्त्या यत्र सा परिभाषा प्रवर्तते, तथा च ये इग्लक्षणे गुणवृद्धी तत्रैवायं निषेध इति स्वीकारात् ‘ प्रेद्धः ’ इत्यादौ न गुणनिषेधापत्तिः, “ आद्गुणः ” इत्यादेरनिग्लक्षणत्वात् । ‘ प्रेद्धः ’ इत्यादौ दोषाभावेऽपि ‘ भेद्यते ’ इत्यत्र भिदेर्ण्यन्तात् कर्मणि यकि ‘ भिद् + इ + य ’ इति स्थिते नित्यत्वाण्णिलोपे

कृते प्रत्ययलक्षणेन णिचमाश्रित्य क्रियमाणोऽपि गुणो निषिध्येत। अत्र लोपेन सह गुणवृद्ध्योरैक-निमित्तकत्वं च न लभ्येत।

द्वितीयपक्षे – तु सूत्रस्थार्धातुकपदे प्रथमाद्विवचनं सम्मन्य ‘ गुणवृद्धी ’ इत्यस्य प्रथमाद्विवचनस्यार्धधातुकपदं विशेषणं वा स्यात् – यत्किञ्चिन्निमित्तके धातुलोपे सत्यार्धधातुकनिमित्ते गुणवृद्धी न स्त इति सूत्रार्थः स्यात्। ततश्च ‘ क्नूयी शब्दे ’ इत्यस्माद्धातोः णिचि पुकि “ लोपो व्योर्वलि ” इति सूत्रेण धात्ववयवयकारलोपे कृते आर्धधातुकणिच्प्रत्ययनिमित्तः पुगन्तलक्षणो गुणोऽनेन निषिध्येत। तथा च ‘ क्नोपयति ’ इति न सिद्ध्येत। यदि तु “ चेले क्नोपेः ”[634] इति सूत्रज्ञापकाद् गुणः स्यात्तर्हीहापि ‘ भेद्यते ’ इत्यस्यासिद्धिरेव दोषः।

तृतीयपक्षे – उभयविशेषणत्वे तु न कुत्रापि दोषः। तथा सति ‘ आर्धधातुकनिमित्ते धातुलोपे सति आर्धधातुकनिमित्ते गुणवृद्धी न स्याताम् ’ इत्यर्थलाभात् ‘ प्रेद्धः ’ इत्यादौ गुणस्य आर्धधातुक-निमित्तत्वाभावात् न निषेधापत्तिः।

ननु सकृदुच्चारितमार्धधातुकपदं कथमुभयविशेषणं स्यादिति चेत्, आर्धधातुकेऽन्यपदार्थे धातुलोपपदे बहुव्रीहिस्वीकारात्। अत एव च धातुग्रहणसार्थक्यम्, धातुपदं विना बहुव्रीह्यसम्भवात्। तस्य शब्दतो गुणवृद्धिविशेषणत्वम्, बहुव्रीहिद्वारा च लोपविशेषणत्वम्। किञ्च धातुपदाभावे कथञ्चिदावृत्त्या उभयविशेषणत्वे स्वीकृतेऽपि लोपगुणवृद्धीनामेकार्धधातुकनिमित्तत्वन्तु न लभ्येत, तत्तु बहुव्रीहिमात्रलभ्यम्, तच्च धातुपदोपादानसाध्यम्। सति बहुव्रीहौ तु धातोर्लोपोऽस्मिन् तद्धातुलोपमार्धधातुकम्, तस्मिन् = तन्निमित्ते गुणवृद्धी न स्यातामित्यर्थाद् लोपस्य गुणवृद्द्योश्चैकार्धधातुकनिमित्तत्वं लभ्यते। तथा च ‘ भेद्यते ’ इत्यादौ न कश्चित्पूर्वोक्तदोषः। तत्र धात्ववयवणिलोपस्य गुणस्य च आर्धधातुनिमित्तकत्वेऽपि एकार्धधातुकनिमित्तत्वाभावात्, गुणस्य णिज्रूपार्धधातुकनिमित्तकत्वात्, णिलोपस्य च यक्रूपार्धधातुकनिमित्तकत्वात्। अत एव वृत्तिकृता महाभाष्यव्याख्यानमनुसृत्यैव स्वग्रन्थे तत्रत्यमर्थजातं संक्षिप्तरूपेण संगृह्य वृत्तिः लिखिता। यथा – यस्मिन्नार्धधातुके धातोरवयवस्य लोपो भवति, तस्मिन्नेवार्धधातुके इकः स्थाने ये गुणवृद्धी प्राप्नुतस्ते न भवतः। अतश्चैतद्वृत्तिसमालोचनेन स्पष्टं प्रतिभाति यदेषा वृत्तिः महाभाष्याक्षरार्थानुगुणा।

- **अस्य सूत्रस्यास्ति प्रयोजनं न वा**

[634] अष्टाध्यायी – (3-4-33)

इदं सूत्रं भाष्ये प्रत्याख्यातम् । तथाहि – ‘ पापचकः ’ इत्यत्र यथा यङन्तात् ‘ पचतेः पापच्य ’ इत्यस्माद् “ ण्वुल्तृचौ ” इति सूत्रेण ण्वुलि “ यस्य हलः ”[635] इत्यनेन हलः परस्य लोपविधाने “ आदेः परस्य ”[636] इति परिभाषया परस्य यद्विहितं तत्तस्यादेर्बोध्यमित्यनेन व्यञ्जमात्रस्य लोपे “ अतो लोपः ”[637] इति सूत्रेण अकारस्य पृथक्लोपे “ अचः परस्मिन् पूर्वविधौ ”[638] इति सूत्रेण अकारलोपस्य स्थानिवद्भावेन अकारस्य उपधात्वाभावाद् वृद्ध्यप्रवृत्तिः । तथैव एतदुदाहरणान्यपि ‘ लोलुवः, मरीमृजः ’ इत्यादीनि । “ यङोऽचि च ” [639] इत्यज्निमित्तकमनैमित्तिकं वा समुदायलोपं बाधित्वा “ अतो लोपः ” ‘ यस्य ’ इति योगविभागसामर्थ्यात् पूर्वमकारलोपे कृते ततो यङो यकारलोपे सर्वत्र अल्लोपस्य स्थानिवत्त्वादेव गुणवृद्ध्यप्रवृत्त्या इष्टरूपसिद्धौ सूत्रस्य न किंचित्प्रयोजनमिति चेत् । सत्यम्, अत एव भाष्ये भाष्यकारेण प्रत्याख्यातमिदमिति ।

न च “ यङोऽचि च ” इति लुक् येन नाप्राप्तिन्यायेन अतो लोपस्य बाधकः स्यादिति वाच्यम् । “ यस्य हलः ” इत्यत्र यस्येति योगं विभज्य “ अतो लोपः ” इति चानुवृत्य यशब्दाकारस्य लोपविधानेन व्यञ्जनमात्रलोपस्य “ यङोऽचि च ” इत्येतद्विधेयत्वात् । ततश्च अकारस्य लोपः यकारस्य लुगिति विषयभेदेन येन नाप्राप्तिन्यायाभावात् ।

न चैवं ‘ कृष्णो नोनाव वृषभो तदीदम् ’ इत्यत्र नोनूयतेर्नोनाव इत्यस्य “ अचो ञ्णिति ”[640] इत्यनेन वृद्धिर्न स्यादल्लोपस्य स्थानिवद्भावादिति वाच्यम् । अज्निमित्तकस्यैव लुको व्यञ्जनमात्र-प्रतियोगिकत्वस्वीकारात् ।

यस्तु चकारादनुकृष्टबहुलग्रहणेन जायमानस्य लुकोऽन्तरङ्गतया लकारोत्पत्तेः प्रागेव अकारविशिष्टस्य यङः समुदाये प्रवृत्तेः । तस्य न स्थानिवद्भावः अज्झलादेशत्वात् । अज्मात्रस्थानिकस्य एवादेशस्य स्थानिवद्भावाविधानात् ।

अथैवं ‘ लोलुवः ’ इत्यत्र गुणवदुवङादयोऽपि न स्युः । अकारस्य स्थानिवत्त्वे अच्प्रत्ययस्य अव्यवहितपरत्वाभावादिति चेदत्र कैयटादयः –

स्थानिवद्भूतमकारमेवाश्रित्य तत्र उवङादयः, न तु पचाद्यचं निमित्तीकृत्य, उक्तयुक्तेः ।

---

[635] अष्टाध्यायी – (6-4-49)
[636] अष्टाध्यायी – (1-1-54)
[637] अष्टाध्यायी – (6-4-48)
[638] अष्टाध्यायी – (1-1-57)
[639] अष्टाध्यायी – (2-4-74)
[640] अष्टाध्यायी – (7-2-114)

न च यङवयवस्य केवलाकारस्य प्रत्ययत्वं नास्तीति वाच्यम् । यकारलोपोत्तरं ह्यवशिष्टाकारस्यापि प्रत्ययत्वात् ।

न च यकारस्थितिकाले अकारस्य प्रत्ययत्वाभावाद् यकारापेक्षया प्रागेव लुप्ततया यकारलोपोत्तरमपि प्रत्ययत्वानन्वयात् कथं तस्य प्रत्ययत्वम्, स्थानिनिष्ठात्यन्ताभावप्रतियोगिनो धर्मस्य अतिदेशेनाप्यलाभादिति वाच्यम् ।

सम्भवमात्रेणाप्यतिदेशस्वीकारात् । यकारलोपोत्तरं यद्यकारस्य लोपो न स्यात्तदा तस्य स्यादेव प्रत्ययत्वमिति योग्यतया लुप्तेऽपि तत्र सम्भावितस्य प्रत्ययत्वस्यातिदेशे बाधकाभावात् ।

वरे निषेधश्चेह लिङ्गम् । यङन्ताद् यातेर्वरचि " अतो लोपः " इति " लोपो व्योर्वलि " इति अल्लोपयलोपयोः कृतयोरल्लोपस्य स्थानिवद्भावेनाकारं निमित्तीकृत्य प्राप्तः " आतो लोप इटि च "[641] इत्याकारलोपो मा भूदित्यतस्तत्र स्थानिवद्भावनिषेधारम्भात् । स्थानिनि दृष्टस्यैवातिदेशे तु अकारस्य स्थानिवद्भावेऽपि प्रत्ययत्वाभावे सुतरामार्धधातुकत्वाभावात् वरप्रत्ययस्य चानजादित्वादकारेण व्यवधानाच्च आतो लोपस्यैवाप्रसक्त्या तद्वैयर्थ्यापत्तेः[642] ।

न चैवमपि ' लोलुवः' इत्यादावुवङि कृते लघूपधगुणः स्यात् तद्वारणाय निषेधोऽयमावश्यकः । उवङ आदिष्टादचः पूर्वत्वेन लघूपधगुणे कर्तव्ये स्थानिवत्त्वाभावादिति वाच्यम्, स्थानिद्वारानादिष्टादचः पूर्वत्वेन उवङो दृष्टत्वात् । स्थानिद्वारा दृष्टत्वेऽपि स्थानिवद्भवतीत्येतद् " न पदान्त...... " इति सूत्रे सवर्णग्रहणेन ज्ञापितम् । न हि ' शिण्ढि ' इत्यत्र स्थानिभूतादचः पूर्वत्वेनानुस्वारो दृष्टः, किं तु स्थानिद्वारा । तथा चानुस्वारस्य परसवर्णे कर्तव्ये श्नमः अल्लोपस्य स्थानिवत्त्वनिषेधाय तत्र सवर्णग्रहणं कृतमितीह स्थानिवद्भावः सिद्धः[643] ।

अत्र हरदत्तादयः – ह्रस्वदीर्घान्तेषु इयङुवङोः कृतयोर्लघूपधगुणो दुर्वारः । न चाल्लोपस्य स्थानिवद्भावेन उकारस्योपधात्वाभावादिति वाच्यम् । उकारस्यानादिष्टादचः पूर्वत्वाभावात् । अल्लोपानन्तरमेवोवङः प्रवृत्तेः । तथा ' जङ्गमः ' इत्यत्र " गमहनजनखनघसां लोपः क्ङित्यनङि "[644] इति सूत्रेण उपधालोपः स्यात् । यदि त्वनङीति निषेधः, तर्हि ' दरीदृशः ' इत्यत्र " ऋदृशोऽङि गुणः "[645]

---

[641] अष्टाध्यायी – (6-4-64)

[642] व्याकरणसिद्धान्तसुधानिधिः (सू. 1-1-4)

[643] वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिन्यां यङ्लुगन्तप्रकरणम् – (पृ. – 504)

[644] अष्टाध्यायी – (6-4-98)

[645] अष्टाध्यायी – (7-4-16)

इति सूत्रेण गुणः स्यात् । ‘ देद्यः ’ इत्यत्र “ दीङो युडचि क्ङिति ”[646] इति सूत्रेण युडागमः स्यात् । ‘ सनीस्रंसः ’, ‘ दनीध्वंसः ’ इत्यादौ “ अनिदितां हल उपधायाः क्ङिति ”[647] इति सूत्रेणोपधालोपः स्यात् । ‘ यायावरः ’, ‘ वावावरः ’ इत्यादौ “ आतो लोप इटि च ”[648] इति सूत्रेण आकारलोपः स्यात् । अतो योगविभागद्वारा अल्लोपो विधातुमशक्यः । समुदायलुकि तु तस्य हलचोरादेशस्य स्थानिवद्भावाभावात् उपर्युक्तस्थलेषु न दोषः । तस्मात् समुदायलोपस्वीकारस्यावश्यकतया ‘ लोलुवः ’ इत्यादौ गुणवृद्धी स्याताम्, अतस्तन्निषेधाय सूत्रमिदमवश्यं कर्तव्यम्[649] । इदं सूत्रं भाष्ये प्रत्याख्यातमेव । हरदत्तेन पुनरुद्धृतं पुनः भट्टोजिदीक्षितेन शब्दकौस्तुभे तु तदपि दूषयित्वा प्रत्याख्यातमेव ।

अत्रेदं समालोच्यते – अल्लोपस्य स्थानिवद्भावेन ‘ लोलुवः, चेक्षियः ’ इत्यादौ गुणवारणसम्भवेऽपि अकारसहितस्य लघूपधाङ्गस्य च प्राप्तगुणस्य अन्तरङ्गत्वाद् इयङुवङद्वारा बाधेन इष्टे सिद्धेऽपि ‘ मरीमृजः ’ इत्यादौ वृद्धिवारणसम्भवमेव । तत्र स्थानिवद्भावोज्जीवितस्य अकारसहितस्याकारान्ताङ्गस्य इकः “ मृजेर्वृद्धिः ”[650] इति वृद्धिसम्भवात्, तत्र उपधाभूतस्यैव मृज्यवयवर्कारस्य वृद्धिरिति तु नार्थोऽस्ति, मृज्यवयवस्य इको वृद्धिरित्येव हि तस्यार्थः । अतो योगविभागकल्पिताकारलोपस्य स्थानिवद्भावद्वारापि तत्र वृद्धिवारणसम्भवात् तदर्थं सूत्रमावश्यकमिति मन्तव्यम्[651] । यद्यप्यत्रेत्थं समाधानं गुरुवर्याः महावैयाकरणाः श्रीभोलाझामहाशयाः स्वग्रन्थे कृतवन्तः तदेवात्र सूक्ष्मसूक्ष्मतरपरिष्काराविष्कारेण स्वीकार्यमिति । अधीतव्याकरणशास्त्रस्य पुरुषस्येतोऽधिकानन्दप्रदं समाधानं नापरं स्यादिति मन्यामहे वयम् ।

अपि च ‘ जङ्गमः ’ इत्यादावुपधालोपादीनां ङित्त्वोपजीविनामापादनमुभयेषामपि ह्यनुपपन्नं स्यात् । ङकारस्य यङि समुदायानुबन्धत्वात् । अकारमात्रस्य स्थानिवद्भावेऽपि तस्य यङात्मकताया दुर्लभत्वात् । अत एव ‘ रमा + याड् + ए ’ इत्यत्र याडवयव आड् इति मत्वा “ आटश्च ”[652] इति सूत्रेण वृद्धौ प्राप्तायां याट्स्याटोः टकारस्य समुदायानुबन्धत्वेनेह आटोऽभावात् ‘ रमायै ’ इत्यादौ “ वृद्धिरेचि ”[653] इति सूत्रेणैव वृद्धिर्न तु “ आटश्च ” इति प्रोक्तं वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेनैव ।

[646] अष्टाध्यायी – (6-4-63)
[647] अष्टाध्यायी – (6-4-24)
[648] अष्टाध्यायी – (6-4-64)
[649] काशिका-पदमञ्जरी – (1-1-4)
[650] अष्टाध्यायी – (7-2-114)
[651] भाषावृत्तेः समीक्षात्मकमध्ययनम् – (पृ. –104)
[652] अष्टाध्यायी – (6-1-89)
[653] अष्टाध्यायी – (6-1-87)

आर्धधातुकग्रहणस्य प्रयोजनम् – स्वयं भाष्यकार आर्धधातुकग्रहणस्य प्रयोजनमाह – ‘ आर्धधातुके इति किम् ? त्रिधा बद्धो वृषभो रोरवीति ’ । अत्रेदमेव हृदयं यत् – आर्धधातुकग्रहणे सति अन्यपदार्थलाभात् बहुव्रीहिरसंदिग्धो भवति, आर्धधातुकग्रहणेऽसति ततोऽन्तरङ्गत्वात्तत्पुरुष एव स्यात् । तदभावे धात्ववयवलोपे सति गुणवृद्धी न स्त इति सूत्रार्थसत्त्वे रुधातोः यङि अनैमित्तिकत्वेनान्तरङ्गत्वात् यङो लुकि अन्तरङ्गत्वादद्वित्वेऽभ्यासकार्ये “ सनाद्यन्ता धातवः ”[654] इति सूत्रेण धातुत्वात् लटि तिपि शपि ‘ चर्करीतम् ’ इत्यस्य अदादिगणे पाठात् शपो लुकि “ यङो वा ”[655] इत्यनेन सूत्रेण तस्येटि सार्वधातुकतिप्निमित्तकगुणस्यापि निषेध आपद्येतेति बहुव्रीहिलाभाय आर्धधातुकग्रहणस्यावश्यकता वर्तते ।

काशिकाव्याख्याकारस्य हरदत्तस्य मते – आर्धधातुकपदग्रहणेऽपि ‘ धातुलोपे ’ इति पदे तत्पुरुषसम्भवाद् आर्धधातुकग्रहणं न बहुव्रीहौ प्रमाणम् । ततश्च तदभावेऽपि – धातोर्लोपो यस्मिन् तस्मिन् ये गुणवृद्धी प्राप्नुतस्ते न भवतः इति सूत्रार्थात् लोपगुणवृद्धीनामेकप्रत्ययनिमित्तकत्वे लब्धे रोरवीति इत्यत्र यलोपस्य अनैमित्तकत्वान्न दोषः । अत आर्धधातुकग्रहणप्रयोजनम् – ‘ तोतोर्ति ’, ‘ मोमोर्ति ’ इति । तत्र यङ्लुङन्तात् ‘ तुर्वी ’, ‘ मुर्छा ’ धातोर्लटि तिपि शपि तल्लुकि च राल्लोपे छ्वोर्लोप-निमित्तस्य तिप एव गुणनिमित्तत्वात् गुणस्य प्रतिषेधः प्राप्नुयात्, अतस्तन्निवृत्त्यर्थमार्धधातुक- ग्रहणम् । कृते तु तस्मिन् न दोषः । धात्ववयवलोपस्य गुणस्य च एकनिमित्तकत्वेऽपि न आर्धधातुक-निमित्तकत्वम्, किन्तु सार्वधातुकनिमित्तकत्वमेव, अतो न गुणनिषेधः[656] ।

- **क्क्ङति च** – **(1-1-5)**

वृत्तिः – गित् – कित् – ङित् निमित्तके इकः स्थाने ये गुणवृद्धी प्राप्नुतस्ते न भवतः । गित् – जिष्णुः, भूष्णुः । कित् – चितः, चितवान्, स्तुतः, स्तुवान्, कृतः, कृतवान् । ङित् – चिनुतः, सुनुतः, चिन्वन्ति, सुन्वन्ति, मृजन्ति ।

अत्र काशिकाकारेणाप्येवमेव वृत्तिरुक्ता – निमित्तसप्तम्येषा । क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः । अत्र भट्टोजिदीक्षितः सिद्धान्तकौमुद्यामपि प्रोक्तवान् – गित्किन्ङिनिमित्ते इग्लक्षणे गुणवृद्धी न स्तः । सर्वैरपि व्याख्यातृभिः वृत्तिः महाभाष्याक्षरार्थानुगुणा कृता ।

---

[654] अष्टाध्यायी – (3 -1 - 32)

[655] अष्टाध्यायी – (7-3-94)

[656] काशिका – पदञ्जरी (1-1-4)

शब्दकौस्तुभे गितं कितं ङितञ्च निमित्तयाऽऽश्रित्य ये प्राप्नुतस्ते न स्तः इति भट्टोजिदीक्षितेनोक्तम्, तच्चिन्त्यम्, निमित्तादिपदान्वयिपदजन्यबोधे प्रकारतया भासमानस्य धर्मस्य निमित्ततावच्छेदकत्वेन प्रतीतिनियमात् । दण्डः कारणमित्यादौदण्डत्वादेः कारणतावच्छेदकत्वस्य, घटः कार्यमित्यादौ घटत्वादेः कार्यतावच्छेदकत्वस्य च प्रत्ययात् । अन्यथा तादृशशब्दात् कारणत्वाद्यग्रहापत्तेः । ततश्च कित्त्वाद्यवच्छिन्नकारणतानिरूप्यकार्यत्वस्य गुणवृद्ध्योः शाब्दविषयत्वे वृत्तेरप्रमाणत्वापत्तेः । तत्र शास्त्रस्यापि तात्पर्ये तु षोडशिग्रहणाग्रहणवद्विकल्पापत्तेरित्यास्तान्तावत्[657] ।

- **निमित्तसप्तमी वा परसप्तमी**

अत्र " इको गुणवृद्धी " इति सम्पूर्णं सूत्रमनुवर्तते । तत्र क्क्ङितीत्यनेन ' इकः ' इत्यस्य विशेषणं स्यात्, तदा " तस्मिन्निति निर्दिष्टे पूर्वस्य " परिभाषोपस्थितौ निर्दिष्टशब्दस्याव्यवहितोच्चारितार्थकतया ' चितः ', ' स्तुतः ' इत्यादौ । किदाद्यव्यवहितपूर्ववर्त्तिन एव इको ये गुणवृद्धी प्राप्नुतस्ते न स्याताम्, न तु भिन्नमित्यादौ । दकारेण इकः व्यवहितत्वात् । तस्मात् क्क्ङितीति गुणवृद्धिविशेषणमेव । ततश्च नेयं परसप्तमी, किन्तु निमित्ततामात्रे । तच्च इगन्तेऽव्यवधानेन लघूपधे व्यवधानेनेति यथाप्राप्तं गृह्यते । क्क्ङिति ये गुणवृद्धी ते न भवत इत्येवंप्रकारेणगुणवृद्ध्योरनूद्यमानतया ' विधौ परिभाषोपतिष्ठते नानुवादे ' इति वचनेन इक्परिभाषा यथा " वृद्धिर्यस्याचामादिस्तद्वृद्धम् "[658] इत्यादौ अनूद्यमानवृद्धिपदे न प्रवर्त्तते, अन्यथा ' शालीयः ' इत्यादि न सिध्येत् । यद्यपि निमित्तत्वं सप्तम्यर्थो विशिष्य नोक्तः, तथापि क्क्ङिति सति प्राप्ते ये गुणवृद्धी इति सम्बन्धे अर्थात् तत्प्रत्ययस्य निमित्तत्वं पर्यवस्यति । तथा च ' क्क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न स्तः ' इत्यर्थो निष्पद्यते । " रलो व्युपधाद्धलादेः संश्च "[659] इत्यादिना कित्त्वातिदेशश्चात्र मानम् । अन्यथा व्यवधानेन गुणनिषेधाप्रवृत्तौ तदर्थकित्त्वस्य वैयर्थ्यापत्तेः ।

वस्तुतः " क्क्ङिति च "[660] इत्यत्र विशेष्याकाङ्क्षायां धातुपदमनुवर्त्य विहितविशेषणतया धात्वधिकारोक्तप्रत्ययत्वमेव विशेष्यतावच्छेदकं विशिष्टवाचकपदानां सति बाधके विशिष्यमात्र-परत्वस्य लक्षणां विना स्वीकारात् । ततश्च प्रत्ययेनाङ्गस्योपस्थित्या लघूपधस्याङ्गस्याव्यवधानाद् उभयत्रापि निषेधसिद्धिः । अङ्गापेक्षस्यैवाव्यवधानस्य स्वीकारात्[661] । ' धातोर्विहिते क्क्ङिति अनन्तरो यो धातुर्विकरणो वा तस्य गुणवृद्धी न स्तः ' इत्यर्थस्वीकारात् ' भिन्नः, भिन्नवान्, चितः, चितवान्,

---

[657] व्याकरणसिद्धान्तसुधानिधिः – (1-1-5)

[658] अष्टाध्यायी – (1-1-73)

[659] अष्टाध्यायी – (1-2-26)

[660] अष्टाध्यायी – (1-1-5)

[661] व्याकरणसिद्धान्तसुधानिधिः – (1-1-5)

स्तुतः, स्तुवान्, कृतः, कृतवान् ' इत्यादौ सर्वत्र धात्ववयवस्य विकरणावयवस्य च इको गुणनिषेधः सम्भवति। किं वा " त्रसिगृधिधृषिक्षिपेः क्नुः "[662] इति क्नोः कित्त्वं " इको झल् "[663], " हलन्ताच्च "[664] इति हलन्ताद्धातोः परस्य सनः कित्त्वं च आचार्यप्रवृत्तिरूपं ज्ञापकं भवेत्। उपधाभूतस्यापि इको गुणवृद्धनिषेधे। एवं ' रोरवीति ' इत्यत्र लुप्तयक्प्रत्ययपरकत्वमाश्रित्य गुणनिषेधप्रसङ्गो नापादनीयः। " न लुमताऽङ्गस्य "[665] इति सूत्रेण प्रत्ययलक्षणप्रतिषेधेन ङित्परत्वाऽभावात्, यङ्लुकश्छान्दसत्वात्, अन्तरङ्गप्रतिषेधदृष्ट्या बहिरङ्गगुणस्यासिद्धत्वाच्च निषेधाप्रवृत्तिः।

न च " न ल्यपि "[666] इति सूत्रेणाऽनुबन्धवृत्तिधर्मकत्वनिष्ठकित्त्वानयने " स्थानिवदादेशोऽनल्विधौ " इति निषेधो न प्रवर्तते इति ज्ञापनात् स्थानिवद्भावेन मिपि लकारवृत्तिधर्मङित्त्वमादाय ' अचिनवम् ', ' असुनवम् ' इत्यादौ गुणनिषेधो दुर्वार इति वाच्यम्?।

लिङ्वद्भावप्रयुक्तङित्त्वेन तदादेशानां ङित्त्वे तदवयवस्य यासुटोऽपि तत्त्वात् " यासुट् परस्मैपदेषूदात्तो ङिच्च "[667] इति सूत्रे यासुटो ङिद्वचनं ज्ञापकं लादेशानां स्थानिवद्भावेन ङित्वन्न भवतीति। ' ङिति यत्कार्यं तन्न भवति, ङितो यत्कार्यं तत्तु भवत्येव ' इति ज्ञापनात् तदुक्तं भाष्यकृता ' लकारस्य ङित्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेत् यासुटो ङिद्वचनासिद्धम् ' इति। तथापि वृत्तिकारैर्निमित्तार्थकत्वपक्ष एव समाश्रितः। यतोहि परसप्तमीपक्ष उपसर्जनस्यापि पदैकदेशधातुशब्दस्य अनुवृत्त्यर्थं स्वरितत्वप्रतिज्ञाने, क्नुसनोः कित्त्वस्य उपधाभूतस्यापि इको गुणनिषेधाय ज्ञापकत्वाश्रयणे च गौरवप्रसङ्गात्। भाष्ये तु निमित्तग्रहणाभावेऽपि सम्प्राप्तदूषणानि एव दूरीकृतानि, न तु परसप्तमीपक्षः सिद्धान्ततया समर्थितः। अतश्चात्रोक्तम् – ' गित्-कित्-ङित् निमित्तके इकः स्थाने ये गुणवृद्धी प्राप्नुतः ते न भवतः ' इति।

- **गकारप्रश्लेषस्य प्रयोजनम्**

ग् क् ङ् एषां समाहारद्वन्द्वः कात्पूर्वं गकारस्य " खरि च " इति सूत्रेण चर्त्वेन निर्देशात् क्क्ङ् च इद् यस्येति बहुव्रीहौ " क्क्ङिति च " इति सूत्रे चर्त्वभूतगकारस्यापि निर्देशात् गित्कित्ङिन्निमित्ते इति भट्टोजिदीक्षित आह। काशिकाकारेणापि ' गकारोऽप्यत्र चर्त्वभूतो निर्देश्यते ' इत्युक्तम्।

---

[662] अष्टाध्यायी – (3-2-140)

[663] अष्टाध्यायी – (1-2-9)

[664] अष्टाध्यायी – (1-2-10)

[665] अष्टाध्यायी – (1-1-63)

[666] अष्टाध्यायी – (6-4-69)

[667] अष्टाध्यायी – (3-4-103)

गकारप्रश्लेषस्येतत्प्रयोजनम् – यत् " ग्लाजिस्थश्च क्स्नुः "[668]," भुवश्च "[669] इत्यत्र क्स्नुप्रत्ययो गिद् भवति । अत्रगकारचर्त्वभूतनिर्दिश्यते । तस्मिन् परेऽपि गुणनिषेधे ' जिष्णुः ', ' भूष्णुः ' इति प्रयोगस्य सिद्धिः यथा स्यात् । गकारप्रश्लेषाभावे गित्प्रत्ययनिमित्तकगुणस्य वारणं केन स्यात् ? क्स्नुप्रत्ययः किदेव अङ्गीकृत्य गुणस्य वारणं सम्भवेत्, एवं सति ' स्थास्नुः ' इत्यत्र " घुमास्थागापाजहातिसां हलि "[670] इति सूत्रेण ईत्वप्रसङ्गात् क्स्नुप्रत्ययः किन्न परन्तु गिदेवायम् । तथा च ' जिष्णुः ' इत्यादौ गुणनिषेधाय गकारप्रश्लेषः कर्तव्य एव ।

न च क्स्नुप्रत्ययस्य गित्त्वे " भुवश्च " इति सूत्रेऽपि तस्यैवानुवृत्तेः ' भूष्णुः ' इत्यत्र " श्र्युकः क्किति "[671] इति सूत्रेण किन्निमित्तकेडागमस्य निषेधः कथं स्यात्, तत्रापि चर्त्वभूतगकारनिर्देशेन भवति ।

न चैवं चर्त्वस्यासिद्धतया विसर्जनीयो न स्यात्, " हशि च "[672] इति सूत्रेण रोरुत्वञ्च प्रवर्तेत । तत्र सौत्रत्वाच्च निर्देशस्य चर्त्वस्यासिद्धत्वात्प्राप्तमपि " हशि च " इति सूत्रेण रोरुत्वं न भवति किन्तु " कुप्वोः..... "[673] इति सूत्रेणविसर्जनीयश्च भवति ।

- **इग्लक्षणगुणवृद्धिनिषेधः**

अत्र हि चकारः क्रियते ' इकः ' इति पदानुकर्षणार्थः । तत्र चकारेणानुकर्षणसामर्थ्यात् ' इकः ' इति अनुवृत्तं पदं स्वरूपपरम् । तथा च यत्र " इको गुणवृद्धी " इति परिभाषा गुणवृद्धिविधौ उपतिष्ठते ' इकः ' इति षष्ठ्यन्तं पदञ्चोपस्थापयति, तत्रैवायं निषेधोऽपि प्रवर्तते । यत्र इक्परिभाषा नोपतिष्ठते, तत्र इकः स्थाने एव गुणवृद्धिविधावपि निषेधोऽयं न प्रवर्तते । अतश्च ' कामयते ', ' लैगवायनः ' इत्यादीनां सिद्धिर्भवति । यथा च " कमेर्णिङि "[674] णिङ्निमित्ता कमेर्वृद्धिः " अत उपधायाः "[675] इति प्रवर्तमाना, तत्र वृद्धिपदेन वृद्धिविधानेऽपि स्थानिनोऽकारस्य निर्देशात् इक्परिभाषा नोपतिष्ठतेऽतो नायं निषेधः प्रवर्तते । ' लैगवायनः ' इत्यत्रापि " नडादिभ्यो फक् "[676] इति फक्प्रत्ययनिमित्तके किति च इत्यादिवृद्धौ

---

[668] अष्टाध्यायी – (3-2-139)
[669] अष्टाध्यायी – (3-2-138)
[670] अष्टाध्यायी – (6-4-66)
[671] अष्टाध्यायी – (7-2-11)
[672] अष्टाध्यायी – (6-1-112)
[673] अष्टाध्यायी – (8-3-37)
[674] अष्टाध्यायी – (3-1-30)
[675] अष्टाध्यायी – (7-2-116)
[676] अष्टाध्यायी – (4-1 99)

“ ओर्गुणः ”[677] इति गुणे च सत्यपि साक्षादिकारोकारयोः स्थानिनिर्देशात् । यत्र साक्षात् स्थानी न निर्देश्यते तत्रासावुपतिष्ठते । अत्र स्थानिनिर्देशाद् इक्परिभाषाऽनुपस्थितौ इग्लक्षणत्वाभावाद् निषेधोऽयं न प्रवर्तते । ततश्च आदिवृद्धौ गुणे च सति ‘ लैगवायनः ’ इति प्रयोगस्य सिद्धिर्भवति ।

- **दीधीवेवीटाम् – (1-1-6)**

अर्थः – दीधी च वेवी च इट् चेति दीधीवेवीटः, तेषां दीधीवेवीटाम्, इतरेतरयोगद्वन्द्वसमासः । दीधीङ् दीप्तिदेवनयोः, वेवीङ् वेतिना तुल्ये छान्दसौ धातू अदादिगणे पठितौ स्तः । “ न धातुलोप आर्धधातुके ” इत्यस्मात् सूत्रात् ‘ न ’ इति पदमनुवर्तते । “ इको गुणवृद्धी ” इति सूत्रतः ‘ गुणवृद्धी ’ इति पदमनुवर्त्तते । तथा च सूत्रार्थो निष्पद्यते दीधीवेव्योः इटश्च इकः स्थाने ये गुणवृद्धी प्राप्नुतस्ते न भवतः । उदाहरणञ्चास्य – आदीध्यनम् आदीध्यकः, आवेव्यनम् आवेव्यकः । पठिता कणिता ॥

- **अत्र चत्वारो धातवो वा त्रयो वा द्वौ**

ननु च ‘ दीङ् क्षये ’, ‘ धीङ् अनादरे ’, ‘ वेञ् तन्तुसन्ताने ’, ‘ वी गतिप्रजनकान्त्यसनखादनेषु ’ इत्येषां ग्रहणं कस्मान्न विज्ञायते ? ‘ अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलयसी ’ इति न्यायात् यथा ‘ वर्षासु रथकारोऽग्नीनादधीत ’ इत्यत्र ‘ रथं करोति ’ इति विग्रहापेक्षया रूढस्य समुदायस्य स्वीकारवदित्यदोषात् । किञ्च यदि चतुर्णां ग्रहणं स्यात्तर्हि “ मीनातिमिनोतिदीङां ल्यपि च ”[678] इति सूत्रे चकारेणैज्निमित्ते आत्वविधानात् दीङ्ग्रहणं व्यर्थं स्यात् । चकारस्तावन्मीनातिमिनोत्यर्थः स्यात्, दीङोऽपि ग्रहणं ल्यबर्थं सार्थकं स्यात् । एवं तर्हि एजन्तस्य वेञ् धातोः गुणप्राप्त्यभावात् तद्गुणनिषेधाय वेञ्ग्रहणं व्यर्थं स्यात्तस्मान्न चर्तुणां ग्रहणं स्यात् । ‘ वेञ् ’ धातोः “ अचो यत् ”[679] इति सूत्रेण यत्प्रत्यये सति “ आदेच उपदेशेऽशिति ”[680] इति सूत्रेण आत्वे कृते “ ईद्यति ”[681] इति सूत्रेण ईत्वे कृते गुणः प्राप्नोति । एवं तर्हि चर्तुणां ग्रहणेऽभिप्रेतेऽसन्देहार्थं ‘ दीवेधीवीटाम् ’ इत्येवं न्यासेन सूत्रं कुर्यात्, परञ्च तथा न कृतम्, तस्मात् स्थालिपुलकन्यायेनैकदेशानुमत्याऽवयवविभागो नास्ति किन्तु दीधीवेव्योरेव

[677] अष्टाध्यायी – (6-4-146)
[678] अष्टाध्यायी – (6-1-50)
[679] अष्टाध्यायी – (3-1-97)
[680] अष्टाध्यायी – (6-1-45)
[681] अष्टाध्यायी – (6-4-65)

ग्रहणं स्याल्लक्ष्यनुरोधात्, ‘ दीधीवेव्योः ’ इति वार्त्तिके द्विवचनदर्शनात्, भाष्ये ‘ आदीध्यनम् ’, ‘ आवेव्यनम् ’ इत्याद्युदाहरणदर्शानात्।

इट् चात्रागम एव गृह्यते न तु ‘ इट् गतौ ’ इति धातुः। ननु ‘ सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ’ इति परिभाषया धातुसाहचर्याद् ‘ इट् गतौ ’ इति धातुरेव गृह्यताम्। मैव, साहचर्यस्य सर्वत्र अनियमकत्वात्। अन्यथा “ द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ”[682] इति सूत्रे कृत्वोऽर्थग्रहणं न कुर्यात्, द्विस्त्रिरिति सुजन्ताभ्यां साहचर्येण चतुरित्यस्यापि सुजन्तस्य ग्रहणसम्भवात् । अत एवागमापेक्षया प्रकृतेरभ्यर्हितत्वाद्दीधीङः पूर्वनिपातः सूत्रे कृतः। इटोऽपि धातुत्वे तु प्रकृतित्वाविशेषेऽप्यल्पाच्तरत्वात् तस्यैव पूर्वनिपातः स्यात्[683]।

- **भाष्यवार्त्तिकयोस्त्वेतत्सूत्रं प्रत्याख्यातम्**

महाभाष्यकारेण त्वेदं सूत्रं प्रत्याख्यातम् । तथाहि – दीधीवेव्योश्छान्दसत्वेन लोके प्रयोगानर्हत्वात्, छन्दसि दृष्टानुविधानात्, दीयमानस्य एतदुदाहरणस्य ‘ आदीध्यनम्, आवेव्यनम्, आदीध्यकः, आवेव्यकः ’ इत्यादेश्छन्दसि अनुपलम्भात् ‘ अदीधेत्, अदीधयुः ’ इत्यादौ च गुणदर्शनात् तदर्थं नेदमारब्धव्यम्। छान्दसत्वेनैतत्समाधानापेक्षया च क्वचित्श्रूयमाणगुणाभावस्यैव तेन साधयितुं युक्तत्वात्।

गुणनिषेधाय इटोऽपि ग्रहणं व्यर्थम्। यतो हि “ नेड् वशि कृति ”[684] इति सूत्रतः ‘ क्वचिद् एकदेशोऽप्यनुवर्त्तते ’ इति परिभाषाबलात् ‘ इट् ’ इत्यस्य “ आर्धधातुकस्येड् वलादेः ”[685] इति सूत्रे अनुवर्त्तमानेनेष्टसिद्धौ पुनस्तत्र कृतमिड्ग्रहणं ज्ञापयति तच्चेटो विकाराभावार्थम् इट् इडेव न तु आदेशेन विकृतिं प्राप्नुयात्। तथा च इटो गुणाभावसिद्धत्वात् एतत्सूत्रं निष्प्रयोजनम्।

न चैवं पिपठीरित्यादौ “ र्वोरुपधाया दीर्घ इकः ”[686] इति सूत्रेण दीर्घोऽपि न स्यादिति वाच्यम्। अङ्गस्येत्यनुवर्तनादङ्गाधिकारविहितं यद्रूपान्तरमिटस्तदेव निवार्यते, र्वोरुपधाया इति च दीर्घत्वं नाङ्गम्। अत एव नियमस्याङ्गाधिकारीयत्वात् तत्रत्यस्यैव विकारस्य नियमेन व्यावृत्तिरित्युक्तदीर्घं निर्बाधमिति भाष्यकृतः।

---

682 अष्टाध्यायी – (8-3-43)

683 शब्दकौस्तुभे – (1-1-6)

684 अष्टाध्यायी – (7-2-8)

685 अष्टाध्यायी – (7-2-35)

686 अष्टाध्यायी – (8-2-76)

अपाठीदित्यत्रापि ‘ सिज्लोप एकदेशे सिद्धो वक्तव्यः ’ इति ज्ञापकात् सवर्णदीर्घः । नन्वेवम् अग्रहीत् इत्यत्र “ ग्रहोऽलिटि दीर्घः ”[687] इति सूत्रेण आङ्गदीर्घो न स्यात्, तत्र आरम्भसामर्थ्यान्न क्वचिद् दोषः इति कैयटादयः ।

वस्तुतस्तु विकारपदस्य इकारवृत्तिभावप्रतियोगितावच्छेदकजातिमत्परतया तादृशविकारस्य एकारादिरूपस्यैव निषेधो न तु दीर्घस्य ।

- **हलोऽनन्तराः संयोगः – (1-1-7)**

अर्थः – अनन्तराः – व्यवधानरहिताः हलः संयोगसञ्ज्ञका भवन्ति । ‘ अनन्तराः ’ इति पदं ‘ हलः ’ इति पदस्य विशेषणम् न तु स्वातन्त्र्येण सञ्ज्ञाया उद्देश्यम् ।

तत्रोद्देश्यम् हलोऽनन्तराः, विधेयम् संयोगः । अनन्तरशब्दे बहुव्रीहिसमासः – अविद्यमानम् अन्तरम् = व्यवधानं येषां ते अनन्तराः । अत्र व्यवधानापरपर्यायच्छिद्रवाची एवान्तरशब्दो गृह्यते, अन्यार्थस्यासम्भवात् । ततश्च अनन्तराः इत्यस्य अव्यवहिता इत्यर्थः । व्यवधानञ्च प्रायेण भिन्नजातीयेनैव दृश्यते लोके, न तु सजातीयेन । अत्र हलां भिन्नजातीया अच एव भवन्ति । ततश्च ‘ अनन्तराः ’ इति पदस्य फलितोऽर्थः अज्भिरव्यवहिता इति । अत एवास्य सूत्रस्य वृत्तिमाह कौमुदीकारः – ‘ अज्भिरव्यवहिता हलः संयोगसञ्ज्ञाः स्युः ’[688] इति । अत एव वृत्तिकारः सूत्रार्थमाह - अनन्तराः – व्यवधानरहिताः हलः संयोगसञ्ज्ञका भवन्ति । उदाहरणञ्च – अग्निः, अत्र ग् न् । अश्वः – श् व् । इन्द्रः – न् द् र् ।

हल्समुदायस्यैव सञ्ज्ञा, न प्रत्येकम् – अत्र यद्यपि गुणवृद्धिसञ्ज्ञे इव एकैकस्य हलः संयोगसञ्ज्ञा प्राप्नोति । ‘ सर्वे ब्राह्मणा भोज्यन्ताम् ’ इति न्यायेन यथा भोजनक्रिया प्रत्येकस्मिन् भोजनकर्तरि ब्राह्मणे विश्राम्यति, न तु ब्राह्मणसमुदाये तथैवात्र संयोगसञ्ज्ञा अवयवस्य प्राप्नोति न तु हल्समुदायस्य । ननु चायमस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति । तद्यथा ‘ गर्गाः शतं दण्ड्यन्ताम् ’ अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति इति भाष्योक्त्या च हल्समुदायस्यैव संयोगसञ्ज्ञा न त्वेकैककस्य । उभावपि न्यायौ शास्त्रे आश्रितौ ।

यत्तु शेखरे ‘ संयुज्यन्ते वर्णा यत्रेत्यन्वर्थसञ्ज्ञाबलान्न प्रत्येकं सञ्ज्ञा इति, तन्न,’ यथा घटपटौ संयुज्येते, स्थले संयुज्यमानघटपटार्थातिरिक्तस्य अन्यपदार्थस्य प्रतीयमानतया भिन्नः प्रासादादिर्बोध्यते,

[687] अष्टाध्यायी – (7-2-37)

[688] वैयाकरणसिद्धान्तकौमुदी – (1-1-7)

तथैवात्रापि संयोगसञ्ज्ञायां तद्वर्णघटितस्य तदतिरिक्तस्य वाक्यात्मकसमुदायस्य ग्रहणेन हल्समुदायस्य सञ्ज्ञा न स्यात्।

यत्तु ' व्रीहयः संयुज्यन्ते यत्र राशौ ईदृशप्रयोगदर्शनात् संयुज्यमानातिरिक्तोऽन्यपदार्थ इति नियमो व्यभिचरितः ' इत्याहुः तन्न, ' धान्यानां राशिः ' एवंविधप्रयोगस्य दर्शनेन अभिन्नेऽपि भेद आरोपितः। पुरुषा एव सेना, वृक्षा एव वनम्, परं तत्र भेदेन व्यवहार आरोपेणैव उपपाद्यते यथा, तथात्रापि आरोपितभेदेन तद्व्यवहारोपपत्तौ अन्यपदार्थोऽन्य एव भवतीति नियमो न क्वचिदपि व्यभिचरति। भेदो वास्तविक एव इति न विवक्षितः।

अस्य समाधानमित्थं प्रभवेत् – न विद्यते अन्तरा व्यवधानं येषामित्यर्थकस्य अनन्तरशब्दस्य व्यवधानशून्यार्थकत्वं प्रतीयते व्यवधानञ्च द्वयोर्मध्ये केनाप्यन्येन भवति। नहि एकस्य केनापि व्यवधानं दृष्टम्। एवञ्च ' संयोगो विप्रयोगश्च साहचर्यं विरोधिता ' इत्याद्यभियुक्तोक्तदिशा विप्रयोगस्यापि संयोगवद् अर्थविशेषनिश्चायकत्वेन व्यवधानराहित्ये विवक्षिते व्यवधानयोग्यतायाः सत्त्वमप्यपेक्षितम्। तथा च द्वयोरेव व्यवधानयोग्यतायाः सम्भवेन द्वयोरेव संयोगसञ्ज्ञा न तु प्रत्येकमिति।

यद्यपि प्रत्येकं संयोगसञ्ज्ञः स्यात्, तर्हि बहवो दोषाः सम्भवन्ति। तद्यथा निर्यायात् इत्यादौ यकारमात्रस्य संयोगत्वे ' या ' धातोः संयोगत्वे सति " वाऽन्यस्य संयोगादेः "[689] इति सूत्रेणेत्त्वापत्तिः, ' संहृषीष्ट ' इत्यत्र " ऋतश्च संयोगादेः "[690] इति सूत्रेणेडापत्तिः, ' संह्रियते ' इत्यादौ " गुणोऽर्तिसंयोगाद्योः "[691] इति गुणापत्तिः, ' निर्यात् ' इत्यत्र " संयोगादेरातो धातोर्यण्वतः "[692] इति सूत्रेण निष्ठानत्वापत्तिः, ' सुदृषत्प्रासादः ' इत्यत्र तकारस्य संयोगसञ्ज्ञायाम् " संयोगान्तस्य लोपः "[693] इति सूत्रेण तलोपापत्तिश्च स्यात्। अत एव पूर्वोक्तानुसारेण समुदायसञ्ज्ञापक्ष एव स्वीकर्तव्यः। तस्मात् प्रयोगदेशे यावन्तः अज्भिरव्यवहिता हलः सन्ति, तेषामेकैव संयोगसञ्ज्ञा भवतीति ' निर्यायात् ' इत्यादौ न कुत्रापि एत्वाद्यापत्तिदोषः।

ननु समुदायसञ्ज्ञापक्षे हलः इति बहुवचननिर्देशात् अज्भिरव्यवहितानां बहूनां हलां संयोगसञ्ज्ञा स्यात्, न तु द्वयोरपि। ततश्च ' शिक्ष् ' धातौ क्ष् वर्णयोः संयोगसञ्ज्ञाभावे " संयोगे गुरु "[694] इति सूत्रेण

[689] अष्टाध्यायी – (6-4-68)
[690] अष्टाध्यायी – (7-2-43)
[691] अष्टाध्यायी – (7-4-29)
[692] अष्टाध्यायी – (8-2-43)
[693] अष्टाध्यायी – (8-2-23)
[694] अष्टाध्यायी – (1-4-11)

इकारस्य गुरुसञ्ज्ञाभावे " गुरोश्च हलः "[695] इति सूत्रेण अप्रत्ययाभावे ' शिक्षा ' इति न सिध्येदिति चेन्न, ' हलः ' इत्यत्र बहुवचनन्तु हलौ च हलश्चेत्यस्येकशेषाभिप्रायेणेति न द्वयोः संयोगे बाधः ।

न च एकशेषो द्वन्द्वापवादः, द्वन्द्वस्तु समानविभक्तिषु भवति, अत उत्सर्गदेशस्यैवापवाददेशत्वात् द्विवचनबहुवचनयोः एकशेषः कथं स्यात् ? एवमिदृशैकशेषेण बहुवचनस्य क्वापि प्रयोगो न दृष्ट इति वाच्यम्, " स्वरितात्संहितायाम्..... " इति सूत्रभाष्ये एकशेषनिर्देशोऽयम् – अनुदात्तस्य चानुदात्तयोश्चानुदात्तानाञ्चानुदात्तानामिति इत्युक्तत्वात् ।

ननु तदा ' हलौ ' इति विशेष्यपदस्य अनन्तराः इति विशेषणपदार्थेऽन्वयः कथं स्यात् ? । अनन्तरा इत्यत्रापि न विद्यतेऽन्तरं ययोस्तौ अनन्तरौ, न विद्यतेऽन्तरं येषां तेऽनन्तराः । अनन्तरौ च अनन्तराश्चेत्येकशेषः ज्ञेयः । अत एव द्वयोर्वा बहूनां वा यथासम्भवं अज्भिरव्यवहितानां हलां संयोगसञ्ज्ञा सिध्यति ।

' हलः ' इत्यत्र जातौ " जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् "[696] इति सूत्रेण बहुवचनसत्त्वात् बहुत्वसङ्ख्याया अविवक्षितत्वादिति केचित् । अस्मिन् पक्षेऽपि द्वयोर्वा बहूनां वा यथासम्भवं संयोगसञ्ज्ञा सिद्धा भवति, ' अथवा अविशेषेण संयोगसञ्ज्ञा विज्ञायते द्वयोरपि बहूनामपि ' इति भाष्यात् । तस्मात् ' शिक्षा ' इत्यत्र द्वयोरपि हलोः संयोगत्वे ततः पूर्वस्याचो गुरुत्वे ' अ ' प्रत्ययः सिध्यति

ननु बहुत्वविक्षायां तु भाष्योक्ता द्वयोः सञ्ज्ञाऽसङ्गता स्यात्, बहूनामानन्तर्य्ये द्वयोः सञ्ज्ञायां प्राप्तौ मध्यमेन हला आद्यन्तयोर्व्यवधानसत्त्वादिति चेन्न, व्यवधानस्य विजातीयैरेव प्रसिद्धत्वात् ।

यत्र प्रयोगदेशे अज्भिरव्यवहिता बहवो हलः, तत्र किं सर्वेषां हलामेकैव संयोगसञ्ज्ञा भवति, आहोस्वित् द्वयोर्द्वयोः पृथक् - पृथक् संयोगसञ्ज्ञा भवतीति जिज्ञासा निसर्गतो जायते । यत्रापि बहूनां हलामव्यवधानेन सन्निधानं तत्रापि द्वयोर्द्वयोः वर्णयोरेव संयोगसञ्ज्ञा, न बहूनां हलाम् । " स्कोः संयोगाद्योरन्ते च "[697] इति सूत्रेण झलि परे यः संयोगः तदाद्योः सकारककारयोर्लोपो विहितः । स च न सम्भवति । झल्सहितस्य अन्यहल्वर्णद्वयस्य संयोगसञ्ज्ञायां संयोगो न झल्परः स्यात्, सर्वत्रैव हि झल्सहितस्य सञ्ज्ञायाः प्राप्तत्वात् । अतः सूत्रवैयर्थ्यभिया बहूनां सञ्ज्ञा नेति युक्तम् । द्वयोर्द्वयोः संयोगसञ्ज्ञायान्तु तृतीयस्य हलो झल्रूपत्वे सूत्रस्य चारितार्थ्यात् । यथा ' मग्नः ' इत्यत्र ' मस्ज् ' धातोः

---

[695] अष्टाध्यायी – (3-3-103)

[696] अष्टाध्यायी – (1-2-58)

[697] अष्टाध्यायी – (8-2-29)

क्तप्रत्यये “ मस्जिनशोर्झलि ”[698] इति सूत्रेण सकारजकारयोर्मध्ये नुमि सकारनकारयोः संयोगसञ्ज्ञायां जकारस्य झल्त्वम्, तस्मिन् सति यः सकारनकारयोः संयोगः तस्यादिभूतस्य सकारस्य लोपः सिद्धः । अतः फलाभावाद् बहूनां संयोगसञ्ज्ञा न भवतीति मन्तव्यम् ।

बहूनां संयोगसञ्ज्ञायाः फलं द्वयोः संयोगसञ्ज्ञायाः व्यावृत्तिरिति न युक्तम् । धात्ववयवस्य पदावयवयस्य श्रृङ्गावयवस्य इत्येवंरूपार्थस्य भाष्ये तत्र तत्राश्रयणेन एकस्मिन् प्रयोगे बहूनां द्वयोश्च संयोगसञ्ज्ञायां प्राप्तायां बहूनां न सञ्ज्ञा, फलाभावात् । धात्ववयवेति व्याख्यानेन वर्णद्वयसंयोगोऽपेक्ष्यते । अङ्गसञ्ज्ञायां वर्णत्रयस्य अन्तेऽभावाद् बहूनां सञ्ज्ञा निष्फला । वर्णत्रयसंयोगस्य धात्ववयवस्य अभावेन असङ्गतिः स्यात् । अत एव द्वयोः वर्णयोरेव संयोगसञ्ज्ञा न तु बहूनामिति सिद्धान्तः[699] ।

- **भट्टोजिदीक्षितानामभिप्रायः**

पाणिनेः संयोगसञ्ज्ञाविधायकस्य “ हलोऽनन्तरा संयोगः ” इति सूत्रस्य भट्टोजिदीक्षितैः सिद्धान्तकौमुद्याम् – अज्भिरव्यवहिता हलः संयोगसञ्ज्ञा स्युरिति सूत्रार्थः क्रियते ।

गुणवृद्ध्यादिसञ्ज्ञावत् प्रत्येकं संयोगसञ्ज्ञायाः प्रसक्तिः तैः महासञ्ज्ञाकरणस्य अन्वर्थसञ्ज्ञाविज्ञानार्थत्वं स्वीकृत्य निरस्यते । तथा च तद्रीत्या संयुज्यन्तेऽस्मिन् समुदाये वर्णाः इति संयोगशब्दस्य व्युत्पत्या समुदाये एव वाक्यपरिसमाप्तिः[700] ।

यद्यपि सूत्रे ‘ हलः ’ इति बहुवचनम्, तथापि जातौ बहुवचनस्वीकारात् द्वयोरपि संयोगसञ्ज्ञा तैः स्वीक्रियते । तेन ‘ शिक्षा ’ इत्यादौ “ गुरोश्च हलः ” इति ‘ अ ’ प्रत्ययः सिध्यति ।

‘ यत्र तु बहवो हलः संश्लिष्टाः तत्र द्वयोर्बहूनां वा अविशेषेण सञ्ज्ञा ’[701] इति भट्टोजिदीक्षितानां सिद्धान्तः । वृक्षप्रचलनन्यायस्य तु अत्र न विषयः इति कौस्तुभे तैः स्पष्टीक्रियते ।

- **नागेशभट्टानामभिप्रायः**

नागेशभट्टैरपि समुदायस्यैव संयोगसञ्ज्ञा स्वीक्रियते, न तु प्रत्येकस्य । परं भट्टोजिदीक्षितैः स्वीकृतोऽन्वर्थसञ्ज्ञात्वरूपः हेतुः तैः न स्वीक्रियते । तद्रीत्या ‘ गर्गाः शतं दण्डयन्तामर्थिनश्च राजानः,

---

[698] अष्टाध्यायी – (7-1-60)

[699] लघुशब्देन्दुशेखरस्य राधिकाव्याख्यायाम् – पृ. 197

[700] महासञ्ज्ञाकरणमन्वर्थसञ्ज्ञाविज्ञानार्थम् । संयुज्यन्तेऽस्मिन् समुदाये वर्णा इति । तेन अत्र समुदाये वाक्यपरिसमाप्तिर्न तु गुणवृद्ध्यादिसञ्ज्ञावत् प्रत्येकम् । (शब्दकौस्तुभः – प्रकृतसूत्रे)

[701] शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे

हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति ' इति न्यायादेव अत्र समुदाये वाक्यपरिसमाप्तिः स्वीक्रियते। अनन्तरा इत्युक्तिश्च तद्रीत्या समुदायसञ्ज्ञात्वे प्रमाणमानन्तर्यं च तद्रीत्या विशेषणं न तु उपलक्षणम्।

किञ्च संयुज्यन्ते वर्णाः यत्र इति अन्वर्थसञ्ज्ञाबलात् न प्रत्येकं सञ्ज्ञा इति भट्टोजिदीक्षितमतस्य तैः युक्त्या खण्डनं विधीयते। तथा च नागेशभट्टरीत्या घटपटौ संयुज्येते यत्र इत्यादौ संयुज्यमान-पदार्थातिरिक्तस्यैव अन्यपदार्थतया प्रतीतेः व्युत्पन्नत्वेन तदतिरिक्ततद्धटितपदवाक्यरूपसमुदायस्यैव संयोगसञ्ज्ञापत्तौ अनिष्टापत्तिः। अतोऽन्वर्थसञ्ज्ञाबलात् समुदायस्य सञ्ज्ञा इति भट्टोजिदीक्षितानां व्याख्यानं नोचितमिति नागेशभट्टानां सिद्धान्तः। तद्रीत्या संयोग इति महासञ्ज्ञाकरणं तु प्राचामनुरोधेन। किञ्च ' हलः ' इति जातौ बहुवचनमिति भट्टोजिदीक्षितानां व्याख्यानमपि नागेशभट्टैः नाङ्गीक्रियते। तद्रीत्या बहुवचनं सौत्रम्।

एवमेव यत्र बहवो हलः श्लिष्टाः तत्र द्वयोर्बहूनां वा विशेषेण संयोगसञ्ज्ञा इति भट्टोजिदीक्षितानां मतं नागेशभट्टैः नाङ्गीक्रियते। तद्रीत्या यत्रापि बहवः श्लिष्टाः तत्रापि द्वयोर्द्वयोरेव संयोगसञ्ज्ञा न बहूनाम्।

एवञ्च तद्रीत्या बहूनामपि संयोगसञ्ज्ञा इति भट्टोजिदीक्षितानां व्याख्यानमपि चिन्त्यमेव, तादृशव्याख्याने फलाभावात्।

तस्मात् संयोगसञ्ज्ञाविधायकसूत्रव्याख्यानविषये अन्वर्थत्वविषये बहुवचनविषये अविशेषणसञ्ज्ञाविषये च भट्टोजिदीक्षितनागेशभट्टयोः मतभेदः स्पष्टः इति बोध्यम्[702]।

- **संयोगसञ्ज्ञाप्रदेशाः**

1. असंयोगाल्लिट् कित् – (1-2-5)

असंयोगात्परोऽपित् लिट् कित् स्यात्। उदाहरणम् – एधाञ्चक्रे।

2. संयोगे गुरु – (1-4-11)

संयोगे परे ह्रस्वं गुरुसञ्ज्ञं स्यात्। उदाहरणम् – कुण्डा, शिक्षा।

3. स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् – (4-1-54)

असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्ताददन्तात् प्रातिपदिकाद् वा ङीष् स्यात्। उदाहरणम् – अतिकेशी, अतिकेशा।

4. न न्द्राः संयोगादयः – (6-1-3)

---

702 पाणिनिसञ्ज्ञासूत्रविमर्शः – (पृ. – 76)

अचः पराः संयोगादयो नदरा द्विर्न भवन्ति। उदाहरणम् – उन्दिदिषति, अड्डिडिषति।

5. सान्तमहतः संयोगस्य – (6-4-10)

सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे। उदाहरणम् – अजरांसि, श्रेयान्, महान्।

6. वाऽन्यस्य संयोगादेः – (6-4-68)

घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा स्यादार्धधातुके किति लिङि। उदाहरणम् – ग्लेयात्, ग्लायात्। म्लेयात् म्लायात्।

7. एरनेकाचोऽसंयोगपूर्वस्य – (6-4-82)

धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे। उदाहरणम् – निन्यतुः, उन्न्यौ।

8. ओः सुपि – (6-4-83)

धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि। उदाहरणम् – खलप्वौ, सुल्वौ।

9. हुश्नुवोः सार्वधातुके – (6-4-87)

जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्य चासंयोगपूर्वोवर्णस्य यण् स्यादजादौ सार्वधातुके। उदाहरणम् – जुह्वति, सुन्वन्ति।

10. उतश्च प्रत्ययादसंयोगपूर्वात् – (6-4-106)

असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तादङ्गात् परस्य हेर्लुक्। उदाहरणम् – धिनु, तनु।

11. लोपश्चास्यान्यतरस्यां म्वोः – (6-4-107)

असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तस्याङ्गस्य लोपो वा म्वोः परयोः। उदाहरणम् – धिन्वः, धिनुवः। धिन्मः, धिनुमः।

12. न संयोगाद् वमन्तात् – (6-4-137)

वकारमकारान्तसंयोगात्परस्यानोऽकारस्य लोपो न। उदाहरणम् – यज्वनः, यज्वना, ब्रह्मणः, ब्रह्मणा।

13. संयोगादिश्च – (6-4-166)

संयोगादिः इन् प्रकृत्या स्यादणि परे। उदाहरणम् – चाक्रिणः।

14. ऋतश्च संयोगादेः – (7-2-43)

ऋदन्तात्संयोगादेः परयोर्लिङ्सिचोरिड् वा स्यात्तङि। उदाहरणम् – स्तरिषीष्ट, स्तृषीष्ट, अस्तरिष्ट, अस्तृत।

15. ऋतश्च संयोगादेर्गुणः – (7-4-10)

ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्याल्लिटि। उदाहरणम् – जह्वरतुः, जह्वरुः,सस्मरतुः,सस्मरुः।

16. गुणोऽर्तिसंयोगाद्योः – (7-4-29)

अर्तेः संयोगादेर्ऋदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च। उदाहरणम् – अर्यते, अर्यात्, स्मर्यते, स्मर्यात्।

17. संयोगान्तस्य लोपः – (8-2-23)

संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्। उदाहरणम् – गोमान्, श्रेयान्।

18. रात्सस्य – (8-2-24)

रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य। उदाहरणम् – ऊर्क्।

19. स्कोः संयोगाद्योरन्ते च – (8-2-29)

पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात्। उदाहरणम् – भृट्, लग्नः।

20. संयोगादेरातो धातोर्यण्वत् – (8-2-43)

संयोगादेराकारान्ताद्यण्वतो धातोः निष्ठातस्य नः। उदाहरणम् – द्राणः, ग्लानः।

- **मुखनासिकावचनोऽनुनासिकः – (1-1-8)**

वृत्तिः – मुखनासिकमावचनं यस्य वर्णस्य सोऽनुनासिकसञ्ज्ञको भवति। अत्र ‘ मुखनासिकावचनः ’ इति उद्देश्यपदम्, ‘ अनुनासिकः ’ इति विधेयपदम्।

खन्यते = अवदीर्य्यतेऽन्नादिकमनेनेति मुखम्। अत्र “ डस् खनेर्मुट् चोदात्तः ”[703] इत्यनेन ‘ खनु अवदारणे ’ इत्यस्माद्धातोः डसप्रत्यये मुट् चागमे मुखमिति। ‘ णासृ शब्दे ’ इत्यतः “ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ”[704] इत्यनेनाचि प्रत्यये नासते = प्राणवायोः प्रवेशनिर्गमाभ्यां शब्दं करोतीति नासा। तस्मात् “ सञ्ज्ञायां कन् ”[705] इति सूत्रेण अत्यन्तस्वार्थिके वा कनि नासिकेति यद्वा नासतेर्ण्वुलि नासिकेतियद्वा ‘ नासते ’ इति विग्रहे णासु शब्दे इत्यस्माद्धातोः कर्तरि ण्वुलि नासिकेति। उच्यते =

[703] दशपाद्युणादिवृत्तिः – (पृ. – 78)

[704] अष्टाध्यायी – (3-1-134)

[705] अष्टाध्यायी – (5-3-87)

उच्चारणजन्यज्ञानविषयीक्रियते वर्णोऽनेनेति करणे ल्युटि वचनमिति । यद्वा उच्यतेऽसौ इति बाहुलकात् कर्मणि ल्यटि वचनमिति ।

मुखेन सहिता मुखसहिता " कर्तृकरणे कृता बहुलम् "[706] इति सूत्रेण समासे मुखसहिता चासौ नासिका चेति " विशेषणं विशेष्येण बहुलम् "[707] इति सूत्रेण कर्मधारयसमासे " वर्णो वर्णेन "[708] इति सूत्रे समानाधिकरणाधिकारे ' शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च ' इति वार्त्तिकेन सहितेत्यस्य लोपे मुखनासिकेति । मुखनासिका वचनमुच्चारणमस्य वर्णस्येति बहुव्रीहिणा मुखनासिकावचनो वर्णोऽनुनासिकसञ्ज्ञ इत्यर्थः । अस्मिन् बहुव्रीहिसमासे वचनशब्दः करणल्युडन्तः ।

मुखसहिता नासिका मुखनासिका, तया वचनः मुखनासिकावचनः । अस्मिन् विग्रहे वचनशब्दो बाहुलकात् कर्मल्युडन्तः । अत्र अधिकरणकारकस्यापि स्थाल्यादेः करणत्वेन विवक्षायां स्थाल्या पच्यते तण्डुल इत्यादिवदत्रापि करणत्वेन विवक्षितत्वात् तृतीयान्तस्य मुखनासिकापदस्य वचनपदेन सह " कृत्यैरधिकार्थवचने " इति सूत्रपठितेन ' साधनं कृता ' इति वार्त्तिकेन समासे मुखनासिकावचन इति सिध्यति । यद्यपि " कर्तृकरणे कृता बहुलम् "[709] इति सूत्रेणापि समासः कर्तुं शक्यते, तथापि ' पादहारकः ' इत्यत्र कर्मणि ण्वुल्प्रत्ययात्तेन हारकशब्देन सह पादाभ्यामिति पञ्चम्यन्तस्य एवं सप्तम्यन्तस्य च कृदन्तेन सह समासविधानाय वार्त्तिकारम्भस्य साफल्यं दर्शयितुं वार्त्तिकेन समासोऽभिहितः[710] ।

मुखसहितनासिकयोच्चार्य्यमाणोऽनुनासिक इति तु उच्यतेऽसौ वचन इति कर्मणि ल्युटोऽभिप्रायेण फलितार्थपरम् मुखनासिकं वचनमस्य मुखोपसहिता वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः इत्यादिभाष्यात्करणसाधनस्यैकवचनशब्दस्य बहुव्रीहेश्च प्रतीतेः ।

मुखं च नासिका चेति द्वन्द्वस्तु नात्र, " द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानाम् "[711] इति सूत्रेण समाहारनियमात् " स नपुंसकम् "[712] इति सूत्रेण नपुंसकत्वे " ह्रस्वो नपुंसके प्रातिपदिकस्य "[713] इति सूत्रेण ह्रस्वत्वे मुखनासिकं वचनं यस्य स मुखनासिकवचनः इति प्राप्नोति, प्रयुक्तञ्च सूत्रकृता मुखनासिकावचनः इति । तत्र सौत्रत्वाद् वा निपातनत्वाद् वा सदीर्घतथाप्रयोगो मन्तव्यः । अथवा यथोक्तं

---

[706] अष्टाध्यायी – (2-1-32)

[707] अष्टाध्यायी – (2-1-57)

[708] अष्टाध्यायी – (2-1-69)

[709] अष्टाध्यायी – (2-1-32)

[710] लघुशब्देन्दुशेखरस्य राधिकाव्याख्यायाम् – (पृ. – 94)

[711] अष्टाध्यायी – (2-4-2)

[712] अष्टाध्यायी – (2-4-17)

[713] अष्टाध्यायी – (1-2-47)

भगवता भाष्यकृता ‘ मुखनासिकामावचनम् योऽयं मुखनासिकावचनः। आ = ईषद् वचनमावचनमिति । किञ्चिन्मुखवचनं किञ्चिन्नासिकावचनम् ’[714] । ‘ भागस्य मुखेन भागस्य नासिकया चोच्चरणादीषत्त्वम् । इदञ्च पूर्वपरयोर्भागयोर्मध्ये एको भागो मुखेनोच्चार्यते द्वितीयस्तु नासिकया । तत्र नासिकावचनभागोपरागवशान्मुखवचनभागस्यापि नासिकावचनवद्भानम् । यथा सँय्यन्तेत्यादौ अनुनासिकयकाराद्युपरागादकारस्याप्यनुनासिकत्वेन प्रतीतिरिति मतमाश्रित्योक्तम् । यदा तु मुखस्य नासिकायाश्चान्तरालवर्त्तिस्थानान्तरमेवैतदुच्चारणे निमित्तम्, तदा मुखोपसंहिता नासिकेति समासः ’[715] ।

ननु मुखनासिकावचनमस्येति विग्रहोऽसङ्गतः, वचनशब्दस्य नासिकाविशेषणतया ‘ पचनी, स्थाली ’ इत्यत्रेव ङिबापत्तेरिति चेन्न, प्रकृते वचनस्यैव विशेष्यत्वेन विवक्षितत्वात्, मुखनासिकेत्यस्य मुखनासिकास्थानमित्यर्थकत्वात्, पदसंस्कारपक्षे प्रथमम् ‘ उच्यतेऽनेनेति वचनम् ’ इति ‘ सामान्ये नपुंसकम् ’ इत्यनेन क्लीबे साधयित्वा पश्चात् मुखनासिकापदेन सामानाधिकरण्येऽपि बहिरङ्गत्वात् ङीबभावः साध्यते ।

यद्यपि नासिकाशब्दसामानाधिकरण्यात्स्त्रीत्वविशिष्टस्यैव करणत्वेन ‘ पञ्चमी स्थाली ’ इत्यत्रेव ल्युटि ङीपि “ नद्यृतश्च ”[716] इति सूत्रेण कपि ‘ मुखनासिकावचनीकः ’ इति प्राप्नोति । तस्माद्वचनशब्दे बाहुलकात्कर्मणि ल्युट्, अन्तरङ्गात्वाच्च तत्पुरुषसमास एवाङ्गीकार्य इति नागेशमतमेव समीचीनमिति प्रतीयते, तथापि पदसंस्कारपक्षे मुखनासिकापदनिरपेक्षं वचनमित्येतत्पदं लिङ्गसर्वनामनपुंसकाश्रयेण संस्क्रियते । पश्चात् स्त्रीत्वस्य पदान्तरसम्बन्धेन प्रतीयमानत्वाद् बहिरङ्गत्वाद् ङीप्प्रत्ययो न भवति ।

वाक्यसंस्कारपक्षेण दोषदानं न समीचीनम् । ‘ पक्षान्तरैरपि परिहारा भवन्ति ’ इति ऋलृक् – सूत्रस्थभाष्योक्तेः । प्रत्युत कर्मसाधनपक्षाङ्गीकारे कर्मणि ल्युटो बाहुलकलभ्यत्वाच्छास्त्रबोधितार्थ-व्यभिचारकल्पनप्रयुक्तं गौरवं गले पततीति सुधीभिर्विभावनीयम् ।

यद्यपि विलम्बेनोपस्थितेऽन्यपदार्थे वृत्तिकल्पनप्रयुक्तं गौरवं भाष्यकारमते, तेन निषादस्थपतिन्यायविरोधः । नागेशमते तु लौकिकवाक्ये पदार्थस्मरणेन तत्पुरुषलभ्यार्थस्योद्बुद्धसंस्कारेण शीघ्रोपस्थितिकत्वात्तत्पुरुषलभ्येऽर्थे वृत्तिकल्पनप्रयुक्तलाघवमस्ति इति वक्तुं शक्यते । तथा च

---

[714] महाभाष्यम् – (1-1-8)

[715] व्याकरणसिद्धान्तसुधाविधिः – (पृ. – 8)

[716] अष्टाध्यायी – (5-4-153)

निषादस्थपतिन्यायसामञ्जस्यमपि लभ्यते, किन्त्वनुशासनप्राप्तस्य करणल्युटो बाहुलकात्कर्मणि कल्पनायां शास्त्रबाधकृतापराधः शिरस्यापतति । अतश्च करणसाधनपक्ष एव श्रेयानिति[717] ।

अनुनासिकत्वस्य लोकप्रसिद्धतया महासञ्ज्ञानुरोधात् अनुशब्दस्य लक्ष्यानुरोधेन ' अभिहत्य व्यञ्जितः ' इत्यर्थे लक्षणया नासिकामभिहत्य वायुना व्यञ्जितो वर्णोऽनुनासिक इति योगाश्रयणेन वा सिद्धे इदं सूत्रं स्पष्टार्थम् । अनु = पश्चात् = स्थानान्तरेणोच्चारणानन्तरं नासिकां गतोऽनुनासिक इत्यर्थस्तु न ञमङणनानां कण्ठादिस्थानसहितनासिकयोच्चारणेन, यमानुस्वाराणां केवलनासिकयैव वोच्चारणेन चानुनासिकत्वसिद्ध्यनापत्तेः ।

अत्र मुखग्रहणं किम् ? यमानुस्वाराणामेव मा भूदिति भाष्यम् । अस्यार्थः – नासिकावचनः एतावति सूत्रे केवलं नासिकया उच्चार्यमाणानां यमानुस्वाराणामेव अनुनासिकसञ्ज्ञा प्राप्नोति, ' अनुस्वारयमानाञ्च नासिका स्थानमिष्यते ' इति शिक्षावचनेन तेषां नासिकास्थानस्य निश्चयात् । तथा च ' अभ्र आं ' इत्यत्र " आङोऽनुनासिकश्छन्दसि "[718] इति सूत्रेण अनुनासिकपदाद् अनुस्वारस्य उक्तरीत्या निधानाद् अनुनासिकरूपस्य श्रवणं न स्यात्, अतो मुखग्रहणम् । अनुस्वारस्य नासिकामात्रं स्थानमिति नास्य प्रवृत्तिः ।

ननु ' नासिकावचनः ' एतावत्पदेनैव प्रासादवासिन्यायेन मुखवचनानामपि ग्रहणसम्भवाद् तद्व्यर्थमेव । ननु चानुनासिकसञ्ज्ञा यमानुस्वाराणामपि प्राप्नोति । अनुवादे यमानुस्वाराणामसम्भवात्, विधौ च स्थानिनो मुखनासिकावचनत्वात् तदन्तरतमत्वेन मुखनासिका-वचनस्यैवादेशत्वात् केवलनासिकावचनानां यमादीनामान्तरतम्याभावादेव न प्राप्नोति । अत एव भगवान् भाष्यकारस्तु प्रासादवासिन्यायाश्रयणेन मुखग्रहणं प्रत्याचख्यौ । तथाहि – यथा लोके ये प्रासादे वसन्ति तेषां प्रासादवासिनमानय इत्युक्ते आनयनम्, ये भूमौ वसन्ति तेषां भूमिवासिनमानय इत्युक्तौ आनयनं भवति , ये च भूमौ प्रासादे च उभयत्र वसन्ति तेषां प्रासादवासिपदेन भूमिवासिपदेन च ग्रहणं दृष्टम्, तथैवात्रापि ये ञमङणनादयः वर्णा मुखवचना नासिकावचनाश्चभवन्ति, ते मुखवचनेनापि नासिकावचनेनापि च ग्रहिष्यन्ते । अत एव ' नासिकावचनोऽनुनासिकः ' इत्येतावन्मात्रे सूत्रे सत्यपि स्यादेव तेषाम् अनुनासिकसञ्ज्ञा, केवलनासिकास्थाना ये यमानुस्वारास्तेषामनुनासिकसञ्ज्ञायां सत्यामपि नास्ति किञ्चित् प्रयोजनम्, असत्यामपि न कश्चिद्दोष इति तेषामस्तु । तदुक्तं भाष्यकृता – ' नैव दोषो नैव प्रयोजनम् ' इति ।

---

[717] बालमनोरमागर्भिततत्त्वबोधिनीलघुशब्देन्दुशेखरयोस्तुलनात्मकमध्ययनम् – (पृ. – 2)

[718] अष्टाध्यायी – (6-1-124)

‘ परमत्र प्रदीपकारमनुसृत्य न्यासपदमञ्जरीकारा एवमाहुः – अत्रानुनासिकविषये त्रीणि दर्शनानि सन्ति । पूर्णोऽप्यनुनासिकवर्णो मुखेन नासिकया चोच्चार्यते – इत्येकः पक्षः । तस्य पूर्वभागो मुखेन परभागो नासिकया – इति द्वितीयः पक्षः । पूर्वभागो नासिकया परभागो मुखेनेति च तृतीयः पक्षः । एषु पक्षेषु प्रथमपक्षे एव प्रासादवासिन्यायावतारसम्भवात् तस्मिन्नेव पक्षे मुखग्रहणप्रत्याख्यानसम्भवो न तु अन्ययोः पक्षयोः । तयोः पक्षयोः भागस्यैव मुखेन भागस्यैव च नासिकयोच्चारणात्, न ते मुखवचनपदेन न वा नासिकावचनपदेन ग्रहीतुं शक्यन्ते । अतस्तत्र पक्षयोः प्रासादवासिन्यायावतारो न सम्भवति, येन मुखग्रहणं प्रत्याख्यायेत । मुखग्रहणं पूर्वतः सूत्रकारस्य चायमेव पक्षः (भागो नासिकया, भागो मुखेन च) अभिमत आसीदिति निर्धारयितुं शक्यते ’[719] ।

- **अनुनासिकसञ्ज्ञाप्रदेशाः**

1. आङोऽनुनासिकश्छन्दसि – (6-1-124)

आङोऽचि परेऽनुनासिकः स्यात्स च प्रकृत्या । उदाहरणम् – अभ्र आँ अपः,गभीर आँ उग्रपुत्रे ।

2. अत्रानुनासिकः पूर्वस्य तु वा – (8-3-2)

अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् । उदाहरणम् – सँस्स्कर्ता, संस्स्कर्ता ।

3. अणोऽप्रगृह्यस्यानुनासिकः – (8-4-57)

अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात् । उदाहरणम् – दधिँ, दधि ।

4. यरोऽनुनासिकेऽनुनासिको वा – (8-4-45)

यरः पदान्तस्यानुनासिके परेऽनुनासिको वा । उदाहरणम् – वाङ्नयति, वाग्नयति, ।

- **अनुवादप्रदेशाः** –

1. उपदेशोऽजनुनासिक इत् – (1-3-2)

उपदेशेऽनुनासिकोऽजित्सञ्ज्ञः स्यात् । उदाहरणम् – एधँ – एधते, सुँ – रामः ।

2. अनुनासिकस्य क्विझलोः क्ङिति – (6-4-15)

अनुनासिकान्तस्योपधाया दीर्घः स्यात् क्वौ झलादौ च क्ङिति । उदाहरणम् – प्रशान्, शान्तः, शंशान्तः ।

3. च्छ्वोः शूडनुनासिके च – (6-4-19)

---

719 भाषावृत्तेः समीक्षात्मकमध्ययनम् – (पृ. – 115)

सतुक्कस्य छस्य वस्य च क्रमात् श् ऊठ् एतावादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति। उदाहरणम् – विश्नः, स्योनः।

4. अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति – (6-4-37)

अनुनासिकान्तानामनुदात्तोपदेशानाम्, अनुनासिकान्तां तनोत्यादीनाम्, वनतेश्च लोपः स्याज्झलादौ क्ङिति परे। उदाहरणम् – यतः, यतिः। गतः।

5. विड्वनोरनुनासिकस्यात् – (6-4-41)

विड्वनोः परयोरनुनासिकस्य आत् स्यात्। उदाहरणम् – अब्जाः, विसखाः।

6. नुगतोऽनुनासिकान्तस्य – (7-4-85)

अनुनासिकान्तस्याङ्गस्य योऽभ्यासोऽदन्तस्तस्य नुक् स्यात् यङ्यङ्लुकोः । उदाहरणम् – यंयम्यते, यंयमीति, जङ्गम्यते, जङ्गमीति।

7. अनुनासिकात्परोनुस्वारः – (8-3-4)

अनुनासिकाभावपक्षे रोः पूर्वस्मात् परोऽनुस्वारागमः स्यात्। उदाहरणम् – पुंस्कोकिलः।

- **तुल्यास्यप्रयत्नं सवर्णम् – (1-1-9)**

सवर्णसञ्ज्ञाविधायकमिदं सूत्रम्। ‘ तुल्यास्यप्रयत्नम् ’ इति उद्देश्यपदम्, ‘ सवर्णम् ’ इति विधेयपदम्। अत्र पदव्याख्यानं पूर्वं विचारणीयम्। तोल्यतेऽनया तुला = उन्मानम्। तुल उन्माने इत्यस्माद्धातोः “ तुल्यार्थैरतुलोपमाभ्यामन्यतरस्याम् ”[720] इति सूत्रे ‘ तुला ’ इति निर्देशाद् “ षिद्भिदादिभ्योऽङ् ”[721] इति भिदादिकल्पनात् निपाताद्वाङि निपातनादेव चुरादिणिचोऽनित्यत्वात् गुणाभावाद्वा ‘ तुला ’ इति तुलाशब्दात् तुलया सम्मितम् इत्यर्थे “ नौवयोधर्मविषमूलमूलसीता-तुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु ”[722] इति सूत्रे ‘ सञ्ज्ञायाम् ’ इति पदमनुवर्त्य यत्प्रत्यये तुल्यपदं साध्यते, तथापि रूढ्या सदृशपर्यायोऽयं शब्दः रथन्तरादिवत्। अत एव पथोऽनपेतः पथ्य इति शब्दः “ नौवयोधर्मविष...... ” इत्यनेनैव यति शास्त्रीयात् पथः = मार्गाद् अनपेतमेव पथ्यमित्युच्यते, न तु ग्रामादिमार्गं गच्छन् चौरोऽपि पथ्यः।

---

[720] अष्टाध्यायी – (2-3-72)

[721] अष्टाध्यायी – (3-3-104)

[722] अष्टाध्यायी – (4-4-91)

आङ्पूर्वात् ‘ स्यन्दू प्रस्रवणे ’ इति धातोः आस्यन्दते = अन्नादिकं प्राप्य द्रवीभवतीत्यर्थे ‘ अन्येभ्योऽपि दृश्यते ’ इति वार्त्तिकेन कर्तरि ‘ ड ’ प्रत्यये, अथवान्नेन द्रवीक्रियते इत्यन्तर्भावितण्यर्थात् स्यन्दधातोः परिखेत्यत्रेव कर्मणि ‘ ड ’ प्रत्यये, अस्यन्ति = प्रकाशन्ते वर्णा अनेनेत्यर्थे, अस्यते ग्रासोऽस्मिन्नित्यर्थे वा ‘ असु क्षेपणे ’ इत्यस्माद्धातोः “ ऋहलोर्ण्यत् ”[723] इति सूत्रेण बाहुलकात् करणेऽधिकरणे वा ण्यति ‘ आस्यम् ’ इति निष्पद्यते। तदुक्तं भाष्ये अस्यन्ति अनेन वर्णानिति आस्यम्। ततश्च मुखवाचकात् आस्यशब्दात् आस्ये भवमिति विग्रहे “ तत्र भवः ”[724] इत्यधिकारे “ दिगादिभ्यो यत् ”[725] इत्यस्माद् सूत्राद् यत्प्रत्ययोऽनुवृतौ “ शरीरावयवाच्च ”[726] इति सूत्रेण यत्प्रत्यये भसञ्ज्ञायां “ यस्येति च ”[727] इति सूत्रेण अकारलोपे “ हलो यमां यमि लोपः ”[728] इति सूत्रेण यकारलोपे च कृते निष्पन्नोऽयमास्यशब्द आस्यान्तर्गतताल्वादिस्थानवाची । यदि तु तद्धितान्तमास्यपदं न स्यात्, तर्हि ओष्ठदारभ्य ग्रीवायामुन्नतप्रदेशपर्य्यन्तं लोके मुखमिति प्रसिद्धः स्वार्थ आस्यपदेन गृहीतः स्यात्। तच्च सर्वेषामेव वर्णानामुच्चारणे मुखसाहाय्यस्य समानमिति न तेन कस्यचिद् व्यावृत्तिः । अतस्तादृगास्यपदोपदानमनर्थकं स्यात्। यद्यपि प्रयत्नविशेषणार्थमास्यपदोपदानम्। आस्ये प्रयत्ना इति । तथा व्याख्यानेन बाह्याप्रयत्ना व्यावृत्ता भवन्तीति वक्तुं शक्यते, तथापि प्रारम्भो यत्नस्य प्रयत्न इत्येवंरूपेण प्रयत्नपदं व्याख्याय तेनैव बाह्यप्रयत्नानां व्यावृत्तौ सिद्धायां तदर्थमास्यपदोपादानस्य चारितार्थ्यं न सम्भवति।

ननु नासिकास्थानञङादिनिवृत्त्यर्थमास्योपादानं स्यात् । नासिकाऽपि न आस्यात्बाह्या वर्णोत्पत्तिनिमित्तम् किन्तु आस्यान्तर्गतविततचर्मरेखैव[729]।

प्रपूर्वाद् ‘ यती प्रयत्ने ’ इत्यस्माद्धातोः यतनमित्यर्थे “ यजयाचयतविच्छप्रच्छरक्षो नङ् ”[730] इति सूत्रेण भावे नङि ‘ नङन्तः ’[731] इत्यनेन पुंस्त्वम् – प्रयत्नः । तदुक्तं भाष्ये ‘ प्रपूर्वकाद्यतिर्भावसाधनो नङ्प्रत्ययः ’। यत्न इत्येव वक्तव्ये सूत्रे प्रग्रहणात् प्रकृष्टो यत्नः – प्रयत्नः इत्यर्थेन वर्णाभिव्यक्त्यव्यवहित

---

[723] अष्टाध्यायी – (3-1-124)

[724] अष्टाध्यायी – (4-3-53)

[725] अष्टाध्यायी – (4-3-54)

[726] अष्टाध्यायी – (4-3-55)

[727] अष्टाध्यायी – (6-4-148)

[728] अष्टाध्यायी – (8-4-64)

[729] महाभाष्यम् – प्रदीपः – (पृ. – 197)

[730] अष्टाध्यायी – (3-3-90)

[731] लिङ्गानु. – 39

– प्राक्कालभवत्वरूपप्रकर्षस्य आभ्यन्तरे एव सत्त्वात्, तस्यैवात्र ग्राह्यः । ‘ सन्ति ह्यास्याद्बाह्याः प्रयत्नास्ते हापिता भवन्ति ’[732] इति तुल्यास्यसूत्रभाष्याच्चात्र सूत्रे आभ्यन्तरप्रयत्नस्यैव ग्रहणं बोध्यम्। वर्णाभिव्यक्तिविषयेऽभिव्यक्तेः पूर्वमारभ्यमाणाः स्पृष्टादयः प्रयत्ना उत्पद्यन्ते। शब्दप्रयोगेच्छायां सत्यां तादृशेच्छावतः पुंसो मनो जाठराग्निं ताडयति । ताडितो जाठराग्निर्नाभिप्रदेशस्थं वायुं प्रेरयति, वायुर्वेगान्मूर्द्धानं गच्छति, ऊर्द्ध्वं गत्वा ततः प्रतिनिवृत्य वायुः यत्नविशेषसहायेन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यञ्जयति = आविर्भावयति, न तु जनयति, वैयाकरणमते वर्णानां नित्यत्वात्, स्फोटरूपत्वात् । यद्वा पूर्वोक्तो वायुर्ध्वनिं जनयति, ध्वनिश्च स्वकीयरूपेण कत्वादिना वर्णान् दीपो घटादीनिव प्रकाशयति। ततो यत्नविशेषसहायेन परावृत्तिसमये गलविवरादीनां विकासादीन् करोति। तयोर्मध्ये ये तत्तत्स्थानाभिघातका यत्नास्ते आस्यान्तर्गतत्वात् ‘ आभ्यन्तराः ’ इत्युच्यते । तथा च नाभिप्रदेशान्मुखस्थानपर्यन्तं वर्णाविभावात्प्राक्तदनन्तरश्च यो हि वायुव्यापारः स एव यत्नशब्देनोच्यते । प्रकृष्टो यत्न इत्येवं विवक्षणेन यत्ने प्रकर्षबोधनार्थं प्रशब्दोपादानम्। यत्ने च प्रकृष्टत्वं वर्णोत्पत्तेरव्यवहिते प्राक्काले = व्यवधानरहितपूर्वकाले, एतादृशः प्रकर्षः आभ्यन्तरे प्रयत्ने एव । अत एव प्रारम्भो यत्नस्येति व्याख्याने गृहीता भवन्ति । गलविवरादिविकासादिकराश्च आस्यबहिर्भूतदेशे कार्यकारित्वात् बाह्या इति व्यवह्रियन्ते । तदुक्तं शिक्षायाम् –

आत्मबुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः॥

एवञ्च प्रशब्दबलादेवाभ्यन्तरप्रयत्नेऽपि लब्धे तेषां साम्यस्यैव सवर्णसञ्ज्ञाप्रयोजनत्वेन बाह्यप्रयत्नानां व्यावृत्तिः सुतरां सिद्ध्यति। अतश्च भिन्नस्थानानां प्रयत्नैक्येऽपि सवर्णसञ्ज्ञा न स्यादिति तद्धितान्तमेवास्यं ग्राह्यम्।

यावदास्यभवतुल्यत्वविवक्षणे प्रयत्नस्याप्यास्यभवत्वात् प्रयत्नग्रहणवैयर्थ्यं तु न वाच्यम्। तथा सति ह्रस्वदीर्घयोः सवर्णसञ्ज्ञा न स्यात्, ह्रस्वदीर्घजनकास्यभवानां वायुसंयोगानामतुल्यत्वात् । तस्मादास्यान्तर्गतानां कण्ठादीनामेव तद्धितान्तास्यपदेन ग्रहणमिति बोधनाय प्रयत्नग्रहणं सफलम् ।

[732] महाभाष्यम् – (1-1-9)

स्पृष्टतादिप्रयत्नानामास्यान्तर्भवत्वेऽपि न आस्यपदेन ग्रहणम्, तस्य पृथगुपादानात् । अत एव पृथक् प्रयत्नपदोच्चारणसामर्थ्यात् द्वयोस्तुल्यत्वे एव सवर्णसञ्ज्ञा भवति ।

नन्वेवमपि आस्यभवार्थबोधकेन आस्यशब्देन कण्ठताल्वादिस्थानानां यथा ग्रहणं कण्ठताल्वादिस्थानविशेषाणाम् ऊर्ध्वाधोमध्यभागानां ग्रहणेन तत्तत्भागभेदेन उच्चारितानाम् उदात्तानुदात्तादीनां वर्णानां तुल्यस्थानत्वाभावात् परस्परं सवर्णसञ्ज्ञा न प्राप्नोति ? ।

' कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ' इति शिक्षावचने कण्ठताल्वादीनां कण्ठत्वेन तालुत्वेनैव च स्थानिता प्रदर्शिता अतोऽन्तरङ्गत्वाद् उपस्थितेन कण्ठत्वादिनैव स्थानिनः साम्यं विवक्षितमिति ऊर्ध्वादिभागभेदेनोदात्तादीनामकारादीनां तुल्यास्यत्वाभावेन परस्परं सवर्णसञ्ज्ञायाम् अनापत्तिः दूरं पराहता ।

ननु कवर्गादिवर्णजनकस्य स्थानस्य यत्नस्याभ्यन्तरस्यैक्येऽपि कथं कत्वखत्वादिकृतः यत्नेषु भेदो दुर्वच इति चेन्न, प्रत्येकवर्णजनकस्य वायुसंयोगस्य जिह्वाग्रादिस्पर्शादेश्च सूक्ष्मभेदस्यैव धर्मभेदप्रयोजकत्वस्य वक्तुं शक्यत्वात्, कार्य्यभेदेन कारणभेदानुमानात् । मात्रकालिकत्वादिरूप-ह्रस्वत्वादिकमपि नाभिप्रदेशस्थाल्पत्वमहत्त्वकृतमेव । तत्तद्वर्णानां स्पर्शेषत्स्पर्शविवृतत्वसंवृतत्वेष्वपि सूक्ष्मभेदाद् बाह्यप्रयत्नकृतभेदाच्च समानस्थानप्रयत्नानामपि वर्णानां परस्परं भेदः ।

तुल्यास्यसूत्रे लक्ष्य सम्भावितानां सर्वेषां स्थानानां साम्यम् ? अथवा यस्य कस्यचिदेकस्यापि स्थानस्य साम्यं विवक्षितम् ? इति जिज्ञासायामाह श्रीनागेशभट्टः शेखरे – " यजुष्येकेषाम् "[733] इत्यत्र यजुषि एकेषामिति सन्धिरहितायां दशायां प्राप्तस्य यणादेशस्य दध्यत्रेत्यादौ चारितार्थ्यात् तं बाधित्वा " अकः सवर्णे दीर्घः "[734] इति सूत्रेण दीर्घः स्यात्, इकारस्य तालुस्थानजन्यत्वम्, एकारस्य च कण्ठतालूभयस्थानजन्यत्वेऽपि तालुस्थानजन्यत्वरूपेण साम्यमादाय परस्परं सवर्णसञ्ज्ञायां दीर्घः स्यात् । तथा च सूत्रे कृतयणो निर्देशोऽनुपपन्नः स्यात् । अतो यावदास्यभवानां तुल्यत्वं यावतां स्थानानां साम्यं विवक्षितम् । तथा च एकारस्य कण्ठस्थानमधिकमिति हेतोः इकारेण सह यावत्स्थानसाम्याभावात् सवर्णसञ्ज्ञाया अप्राप्त्या न दीर्घस्य प्रसङ्गः । तस्मादेतन्निर्देशात् यावत्स्थानसाम्यं गृह्यते ।

यावत्स्थानसाम्यस्य विवक्षणादेव, ' नैतौ तुल्यस्थानौ ' इति भाष्यस्य सङ्गतिः, वकारस्य ओष्ठस्थानस्याधिक्यात् दन्तमात्रस्थानिकलकारेण सह सवर्णसञ्ज्ञा न । तथा च ' तद्वानासाम् '

---

[733] अष्टाध्यायी – (8-3-104)

[734] अष्टाध्यायी – (6-1-99)

इत्यादिस्थले “ तोर्लि ”[735] इति सूत्रेण परसवर्णो न । अत एव च भाष्यकृता प्रयत्नशब्देन आभ्यन्तरस्य बाह्यस्य चोभयविधस्य ग्रहणे यत्किञ्चित्प्रयत्नभेदे सति यत्किञ्चित्प्रयत्नैक्ये सवर्णसञ्ज्ञा इत्यस्मिन्नर्थे “ झरो झरि सवर्णे ”[736] इति सूत्रस्थं सवर्णग्रहणं ज्ञापकमित्युक्तम् । तथा हि यावत्प्रयत्नसाम्ये एव सवर्णसञ्ज्ञायां सूत्रे सवर्णग्रहणे कृतेऽपि ‘ शिण्ढि ’ इत्यत्र डकारढकारयोः यावत्प्रयत्नसाम्याभावेन लोपाप्राप्त्या ‘ झरो झरि ’ इत्येव सूत्रं लाघवात् कर्तव्यम् । यथासङ्ख्यसूत्रानुरोधेन ‘ झर् ’ – प्रत्याहारघटकवर्णस्य तत्समानजातीये एव परस्मिन् झरि सति लोपस्य सिद्ध्या व्यावर्त्त्यस्य अधिकसङ्ग्रहस्य चाभावेन सवर्णग्रहणस्य वैयर्थ्यम् । सवर्णग्रहणं विभिन्नरूपेणावगम्यमानेऽपि झरि लोपरूपाय फलाय, तत्तु प्रयत्नभेदात् वक्तुं न शक्यते । ततो ज्ञायते – यावत्प्रयत्नसाम्यं न विवक्षितम् । यत्किञ्चित्प्रयत्नैक्येऽपि सवर्णसञ्ज्ञायां ‘ शिण्ढि ’ इत्यत्र ढकारे परस्मिन् सति डकारस्य लोपार्थं सवर्णपदोपादानमावश्यकम् । तदभावे यथासङ्ख्यसूत्रानुसारेण लोपे डकारस्य ढकारे परस्मिन् सति लोपो न स्यात् । अल्पप्राणमहाप्राणरूपबाह्यप्रयत्नभेदो न तयोर्बोध्यः[737]।

नचैवं कुचुट्वादीनां स्वस्ववर्ग्याणां ञमङादिपञ्चमेन सह सावर्ण्यस्य प्राप्तिः न स्यात्, नासिकास्थानस्याधिक्यात् । इकारादीनामेकारादिना सह सावर्ण्यवारणाय यावत्स्थानतुल्यत्वस्य आवश्यकत्वात् ।

तुल्यास्यसूत्रस्थास्यपदेन नासिकास्थानस्य न ग्रहणमिति मुखनासिकावचनोऽनुनासिकः इति सूत्रभाष्ये ध्वनितत्वेन पञ्चमानां स्वस्ववर्ग्येण सह नासिकेतरयावदास्यभवतुल्यत्वसत्त्वेन सवर्णसञ्ज्ञायां बाधकाभावात् । भाष्ये हि – अनुनासिकसञ्ज्ञाविधायकसूत्रभाष्ये ‘ मुखनासिकम् आवचनमस्य मुखनासिकावचनः । किमिदमावचनम् ? ईषद् वचनम् आवचनम् किञ्चिन्मुखवचनं किञ्चिन्नासिकावचनम् ’ इति भाष्येण ‘ भागस्य मुखेनोच्चारणाद्भागस्य नासिकया ’ इति कैयटेन च ङादीनां कियतो भागस्य कण्ठादिस्थानं कियतो भागस्य नासिकास्थानमिति प्रतीयते । ‘ मुखोपसंहिता वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः ’ इति भाष्येण, ‘ मुखस्य नासिकायाश्च यदन्तरालं स्थानान्तरं तदेव स्थानमनुनासिकस्य ’ इति कैयटेन च मुखानासिकयोर्मध्यगतं यत्स्थानं तदेव स्थानमनुनासिकस्येत्यपरः पक्ष उपलभ्यते । मुखद्वितीया वा नासिका वचनमस्य इति भाष्येण, ‘ यदा तु सर्व एव वर्णः (अनुनासिको वर्णः) मुखेन नासिकया चोच्चार्यते ’ इति कैयटेन च ‘ सर्वो भागो मुखेन

[735] अष्टाध्यायी – (8-4-60)

[736] अष्टाध्यायी – (8-4-65)

[737] लघुशब्देन्दुशेखरस्य राधिकाव्याख्यायाम् – (पृ. – 100)

नासिकयो चोच्चार्य्यते ’ इति तृतीयः पक्षः । एवं पक्षत्रयेऽपि नासिकाया मुखात्पृथगुपादानेन आस्यभवस्थानेन नासिकास्थानं न गृह्यते इति स्पष्टमेव लभ्यते । किञ्च ‘ मुखग्रहणं किमर्थम् ? नासिकावचनोऽनुनासिकः इत्युच्यमाने यमानुस्वाराणामेव प्रसज्येत ’ , ‘ अथ नासिकाग्रहणं किमर्थम् ? ‘ मुखवचनोऽनुनासिकः इत्युच्यमाने कचटतपानामेव प्रसज्येत ’ इति भाष्येण च नासिका न आस्यभवस्थानग्राह्येति स्पष्टमेव, नासिकास्थानानां यमानुस्वाराणामपि नासिकाया मुखग्रहणेन ग्रहणे कचटतपानामेवेत्यवधारणोक्त्यसङ्गतेः ।

किञ्च ‘ प्रयत्नविशेषणमास्योपादानम् ’ इत्यास्यभवप्रयत्नस्य आभ्यन्तरस्य ग्रहणे बाह्यप्रयत्नस्य न ग्रहणमित्युक्त्वा ‘ यथा तृतीयास्तथा पञ्चमा आनुनासिक्यमेषामधिको गुणः ’ इति भाष्योक्त्यापि नासिकाया आस्यभवग्रहणेन नासिकाभवप्रयत्नस्य च सूत्रस्थप्रयत्नग्रहणेनाग्रहणं सूचितम् । नासिकाया आस्यपदेन ग्रहणे तु तत्रत्यप्रयत्नस्यास्यग्रहणोक्तिरसङ्गता स्यात् । इदञ्च नासिकाया आस्यग्रहणेनाग्रहणं प्रतिबन्धकमणिमन्त्रादिन्यायेन । यद्वा आस्यभवशब्देन पाणिनिशिक्षोक्तस्थानानामेव ग्रहणम्, पाणिनिशिक्षायां ङादिपञ्चानां नासिकास्थानानुक्त्या अनुभवतः नासिकास्थानत्वस्य सत्त्वं सवर्णसञ्ज्ञायां न बाधकम्, शिक्षोक्तस्थानानामेव सावर्ण्यप्रयोजकत्वात्[738] । यद्वा यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्यमेषामधिको गुणः इति भाष्यकृतोक्तं प्रकृतसूत्रे । नासिकास्थप्रयत्नस्य गुणत्वात् गुणा अभेदका इति पक्षमाश्रित्य समानस्थानिकत्वात् सवर्णसञ्ज्ञा सिद्धा ।

न च नासिकाया आस्यभवग्रहणेनाग्रहणे ‘ अनुस्वारयमानाञ्च नासिकास्थानमिष्यते ’ इति शिक्षोक्त्या अनुस्वारस्यानुस्वारेण यमस्य यमेन सह सावर्ण्यं न स्यादिति वाच्यम्, एतेषां सवर्णसञ्ज्ञायाः फलाभावेनादोषात् । तदुक्तं भाष्ये – ‘ यमानुस्वाराणामपि प्राप्नोति । नैव दोषौ न प्रयोजनम् ’ इति ।

यत्नो द्विधा – आभ्यन्तरो बाह्यश्च । तत्राभ्यन्तरश्चतुर्धा – स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतता चेति भेदात् । बाह्य एकादशधा – विवारसंवारश्वासनादघोषाघोषाल्पप्राणमहाप्राणोदात्तानुदात्त-स्वरितभेदात् । तत्र आभ्यन्तरयत्नः प्रयत्नशब्दबोध्यः, प्रकृष्टो यत्नः प्रयत्नः इति व्युत्पत्तेः, प्रकर्षश्च वर्णोत्पत्त्यव्यवहितप्राग्भावित्वरूपः[739] । अभ्यन्तरम् = मध्यम् तत्र भव आभ्यन्तरः । ओष्ठात्प्रभृति प्राक्काकलकं मुखं तन्मध्यभव इत्यर्थः । बहिः = मुखाद्बहिः – गलाद्यधोभागः । तत्र भवो यत्नो बाह्यः । जिह्वाग्रोमध्यमूलस्पर्शादिरूपमुखभवकार्य्यगतमाभ्यन्तरम्, गलविवरविकासादिरूपमुखबहिष्कार्य्यगतं बाह्यत्वञ्च यत्नेष्वारोप्य आभ्यन्तरः बाह्यश्च यत्न इति व्यवहारः ।

---

[738] वैयाकरणसिद्धान्तकौमुद्याः लक्ष्मीटीकायाम् – (पृ. – 34)

[739] लघुशब्देन्दुशेखरे - सञ्ज्ञाप्रकरणे - प्रकृतसूत्रे

तुल्यञ्च (आस्यम्) तुल्यश्च (प्रयत्नः) इति विग्रहे पुंलिङ्गस्य तुल्यशब्दस्यैकशेषे, ‘ आस्यञ्च प्रयत्नश्चास्यप्रयत्नौ ’ इति द्वन्द्वे, तुल्यौ आस्यप्रयत्नौ यस्य वर्णस्य तद्वर्णस्य तत् तुल्यास्यप्रयत्नं वर्णं सवर्णसञ्ज्ञं स्यादिति ‘ तुल्यास्यप्रयत्नम् ’ इति समस्तपदस्य फलितोऽयमर्थः ।

ननु तुल्यञ्च तुल्यश्च इति विग्रहे “ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ”[740] इति सूत्रेण नपुंसकतुल्यशब्दस्यैवैकशेषे ‘ तुल्ये आस्यप्रयत्नौ यस्येति ’ वा एकवद्भावे ‘ तुल्यम् आस्यप्रयत्नौ यस्येति ’ चैव विग्रहो न्याय्य इति चेन्न, प्रवृत्तिनिमित्तनिष्ठनानाप्रकारतानिरूपितनाना – विशेष्यताकबोधविषयकशब्दतन्त्रे एव एकशेषस्वीकारेण प्रकृते तुल्यत्वरूपैकप्रवृत्तिनिमित्तनिष्ठैकप्रकारतानिरूपितनानाविशेष्यताकबोधविषयत्वरूपार्थतन्त्रस्यैव स्वीकारेण व्यक्तिगतसंख्याभिप्रायेण द्विवचनोत्पत्तौ न दोषः ।

न च ‘ तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वंसादृश्यम् ’ इति न्यायेन अकारादेरकारादिना सह सवर्णसञ्ज्ञा न स्यात् । उभयोः कण्ठस्थानत्वेन कण्ठस्य कण्ठे भेदघटिततुल्यत्वासम्भवादिति वाच्यम्, ‘ प्रत्युच्चारणं शब्दा भिद्यन्ते ’ इति अकारादिवर्णयोर्भेदं स्थानेषु आरोप्य तुल्यत्वस्य सम्भवात् ।

तुल्यास्यप्रयत्नपदे समासचतुष्ट्यं भाष्ये स्थितम् । तद्यथा – आस्यं च प्रयत्नश्च आस्यप्रयत्नौ, तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नम् इति द्वन्द्वगर्भो बहुव्रीहिः प्रथमः । तुल्य आस्ये प्रयत्नो यस्य तत् तुल्यास्यप्रयत्नम् इति त्रिपदो बहुव्रीहिर्द्वितीयः । पूर्वं तुल्य आस्ये तुल्यास्य इति तत्पुरुषः, ततस्तुल्यास्यः प्रयत्नो यस्य तत् तुल्यास्यप्रयत्नम् इति पूर्वभागे तत्पुरुषस्ततो बहुव्रीहिः तृतीयः । पूर्वम् आस्ये प्रयत्न आस्यप्रयत्न इति तत्पुरुषस्ततस्तुल्य आस्यप्रयत्नो यस्य तत् तुल्यास्यप्रयत्नम् इति उत्तरभागे तत्पुरुषस्ततो बहुव्रीहिश्चतुर्थः ।

तत्र त्रिपदो बहुव्रीहिरिति द्वितीयः पक्षः स्वीकृतः काशिकाकारेण तद्व्याख्याकारैश्च । तथा चोक्तं तेन एतत्सूत्रवृत्तौ – ‘ तुल्य आस्ये प्रयत्नो यस्य वर्णस्य येन वर्णेन सह स समानजातीयं प्रति सवर्णसञ्ज्ञो भवति ’[741] इति । प्रथमावृत्तिकारेणापि अयमेव द्वितीयपक्ष आदृतः । तथाहि वृत्तिः – ‘ तुल्य आस्ये प्रयत्नो येषां ते वर्णाः परस्परं सवर्णसञ्ज्ञका भवन्ति ’[742] इति

उद्द्योतकारनागेशादिभिः बहुभिराचार्यैः द्वन्द्वगर्भबहुव्रीहिरिति प्रथमपक्ष अङ्गीकृतः । काशिकाकारेण यद्भाष्यं प्रमाणीकृत्य प्रथमपक्ष स्वीकृतः, तद्भाष्यस्य नागेशप्रभृतिभिराचार्यैः

[740] अष्टाध्यायी – (1-2-69)

[741] काशिका – प्रकृतसूत्रे

[742] अष्टाध्यायीभाष्यप्रथमावृत्तिः – प्रकृतसूत्रे

एकदेश्युक्तित्वं स्थापितम्। प्रारम्भो यत्नस्य प्रयत्नः इति भाष्यप्रामाण्यात् प्रयत्नशब्दस्य आभ्यन्तरयत्न-मात्रबोधकत्वं स्वीकरणीयम्, तदा द्वन्द्वगर्भबहुव्रीहिरूपः प्रथमः पक्ष एव समादरो भवतीति मन्यामहे।

आस्यग्रहणं कचटतपानां तुल्यस्पृष्टप्रयत्नानां भिन्नस्थानानां सवर्णसञ्ज्ञावारणार्थम्। अन्यथा ' तर्प्ता ' इत्यत्र पकारस्य " झरो झरि सवर्णे " इति सूत्रेण लोपापत्तिः स्यात्।

प्रयत्नग्रहणं किम्, इचुयशानां तुल्यस्थानानां भिन्नप्रयत्नानां सावर्ण्ये ' वाक् श्च्योतति ' इत्यत्र " झरो झरि सवर्णे " इत्यनेन शकारस्य चकारे परे लोपो मा भूत्। आभ्यन्तर इत्यस्य फलं श्वासाघोषाविवाररूपबाह्यप्रयत्नसाम्येन तत्रैव कशयोः सावर्ण्ये लोपो मा भूत्।

- **प्रयत्नविवेकः**

स्पृष्टादिचतुर्णामपि आभ्यन्तरत्वं वर्णोत्पत्तिप्राग्भावित्वात्। तथा हि नाभिप्रदेशात् प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमाक्रामान्नुरः प्रभृतीनि स्थानान्याहन्ति। ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वा उत्पत्तिः। तत्रोत्पत्तेः प्राग् यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादि सम्यक् स्पृशन्ति तदा स्पृष्टता। ईषद् यदा स्पृशन्ति तदा ईषत्स्पृष्टता। समीपावस्थानं संवृतत्वम्। दूरावस्थानं विवृतत्वम्। सामीप्यं दूरत्वञ्च ताल्वादिस्थानापेक्षया। भाष्यकारास्तु " नाज्झलौ "[743] इत्यस्य प्रत्याख्यानावसरे ऊष्मणां स्वाराणाञ्च ईषद्विवृतत्वं विवृतत्वञ्चेति वैलक्षण्यं वदन्ति। तदप्यनुभावानुसार्येवेति सहृदयाः।

बाह्यप्रयत्नाश्च वर्णोत्पत्तेः पश्चान्मूर्ध्नि प्रतिहते निवृते प्राणाख्ये वायौ उत्पद्यन्ते। अत एव बाह्या इत्युच्यन्ते। गलबिलस्य सङ्कोचात्संवारः। तस्यैव विकासाद्विवारः। संवृते गलबिलेऽव्यक्तः शब्दो नादः। विवृते गलबिलेऽव्यक्तः शब्दो हि श्वासः। घण्टानिर्ह्रादवत् स्थानाभिघातगे ध्वनो नादोऽनुप्रतीयते तदा नादध्वनिसंयोगाद् घोषः। यदा श्वासोऽनुप्रतीयते तदा श्वासध्वनिसंयोगाद् अघोषः। महति वायौ महाप्राणः। अल्पे वायौ अल्पप्राणः। यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रो भवति, तमुदात्तम् आचक्षते। यदा तु मन्दप्रयत्नो भवति, तमनुदात्तम् आचक्षते। उदात्तानुदात्तसन्निकर्षात् स्वरितगुण इति। इमे हि बाह्यप्रयत्ना यद्यपि सवर्णसञ्ज्ञायामनुपयुक्ता, तथापि आन्तरतम्यपरीक्षायामुपयोक्ष्यन्ते[744]

- **भट्टोजिदीक्षितानामभिप्रायः**

---

743 अष्टाध्यायी – (1-1-10)

744 शब्दकौस्तुभः – प्रकृतसूत्रे

भट्टोजिदीक्षितैः ताल्वादिस्थानमाभ्यान्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसञ्ज्ञं स्यादित्यर्थः । तत्र आस्यशब्दे " शरीरावयवाच्च " इति सूत्रेण यत्प्रत्ययमाश्रित्य ' आस्ये भवम् आस्यमिति ' आस्यशब्दार्थः भट्टोजिदीक्षितैः मनोरमायां स्पष्टीक्रियते । प्रयत्नशब्देन च प्रशब्दबलात् आभ्यान्तरप्रयत्नरूपोऽर्थः तैः स्वीक्रियते । तेन उपर्युक्तसूत्रार्थलाभः ।

किन्तु ईदृशरीत्या आस्यशब्दस्य तद्धितान्तत्वस्वीकारे प्रयत्नस्यापि तेनैव लाभात् सूत्रे प्रयत्नग्रहणं व्यर्थमिति शङ्कां समाधातुं भट्टोजिदीक्षितैः शब्दकौस्तुभे स्वमतमित्थं स्पष्टीक्रियते ।

प्रयत्नग्रहणाभावे प्रत्येकसाम्ये स्थानसाम्ये प्रयत्नसाम्ये च सवर्णसञ्ज्ञा स्यात् । अतः तद्वारणार्थं सूत्रे उभयोः उपादानमावश्यम् । तेन स्थानप्रयत्नोभयसाम्ये सत्येव सञ्ज्ञा, न तु अन्यतरसाम्येऽपि इति भट्टोजिदीक्षितानां सिद्धान्तः । तस्मात् भट्टोजिदीक्षितरीत्या प्रयत्नग्रहणं न व्यर्थं किन्तु उक्तरीत्या प्रत्येकं व्यापारनिरासार्थं बोध्यम्[745] ।

अत्र स्थानसाम्यविषयेऽपि भट्टोजिदीक्षितैः स्वमतं शब्दकौस्तुभे स्पष्टीक्रियते । तद्रीत्या सवर्णसञ्ज्ञायां यावत् स्थानसाम्यं न विवक्षितम् । तथा सति ञमङणनानां स्ववर्ग्यैः सह असावर्ण्यापत्तेः यवलानां सानुनासिकनिरनुनासिकानां च असावर्ण्यापत्तेश्च[746] ।

अत्र नासिकायाः स्थानत्वम् आस्यान्तर्गतत्वञ्च भट्टोजिदीक्षितैः स्वीक्रियते । तद्रीत्या ' अन्तरास्ये विततं चर्मास्ति प्रणवचर्मवत् तत्सम्बद्धो रेखाविशेषो नासिका '[747] । तथा च तस्याः अपि ओष्ठादिभ्यः अविशेषात् आस्यभवत्वेन यावत् स्थानसाम्यस्वीकारे उपर्युक्तदोषापत्तिः । तस्मात् यावत् स्थानसाम्यं न विवक्षितमिति तैः व्याख्यायते ।

- **नागेशभट्टानामभिप्रायः**

नागेशभट्टैः तुल्यास्यप्रयत्नमित्यस्य तुल्यौ आस्यप्रयत्नौ यस्य इत्यर्थः स्वीक्रियते तत्र आस्ये भवमास्यमिति तद्धितान्तम् आस्यपदं तद्रीत्या स्थानमेव बोधयति, प्रयत्नस्य पृथगुपदानात् । तथा च

---

[745] नन्विह सूत्रे प्रयत्नग्रहणं व्यर्थम्, तद्धितान्तास्यशब्दबलादेव ताल्वादिस्थानस्य प्रयत्नस्य च लाभादिति चेत् ? न, प्रत्येकं व्यापारनिरासार्थमुभयोरुपादानात् । तेन स्थानप्रयत्नोभयसाम्ये सत्येव सञ्ज्ञा न त्वन्यतरसाम्येऽपि । (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 118)

[746] न हि स्थानसाम्यं विवक्षितम् । ञमङणनानां स्ववर्ग्यैः सह असावर्ण्यापत्तेः यवलानां सानुनासिकनिरनुनासिकानामसावर्ण्यापत्तेश्च । (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 118)

[747] शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 118

तद्रीत्या ताल्वादिस्थानमाभ्यान्तरप्रयत्नश्च यस्य एतदद्वयं येन यदीयेन एतदद्वयेन तुल्यं तत्सवर्णमिति सूत्रार्थः[748] ।

नागेशभट्टरीत्या सवर्णसञ्ज्ञायां यावत् आस्यभवतुल्यत्वं ग्राह्यम् । तत्र च पाणिनेः " यजुष्येकेषाम् " इति निर्देशः प्रमाणम्[749] । किञ्च " झरो झरि सवर्णे " इति सवर्णग्रहणेन ज्ञापकेन यत्किञ्चित् प्रयत्नैक्यमादाय सवर्णसञ्ज्ञा इत्यर्थस्य भाष्ये प्रयत्नशब्देन यत्नमात्रग्रहणमिति पक्षे साधितत्वात् स्थानांशे यावत् स्थानसाम्ये सवर्णसञ्ज्ञा इत्यर्थस्य भाष्यतः अपि स्वरसतो लाभादिति नागेशभट्टानां सिद्धान्तः ।

यद्यपि भट्टोजिदीक्षितरीत्या अस्मिन्नपि व्याख्याने प्रयत्नग्रहणस्य वैयर्थ्यं प्रतीयते । तथापि नागेशभट्टरीत्या न तद्व्यर्थम् । प्रयत्नग्रहणाभावे वर्णजनकानां आस्यभवानां वायुसंयोगानामपि तुल्यत्वस्य सवर्णसञ्ज्ञायां स्वीकारापत्तौ ह्रस्वदीर्घयोः सावर्ण्यानापत्तिः स्यात्, तयोर्जनकानां वायुसंयोगानां तुल्यत्वाभावात् । अतः आस्यभवशब्देन कण्ठादीनामेव ग्रहणं न तु वायुसंयोगानाम् इत्यर्थबोधनाय प्रयत्नग्रहणं सार्थकमिति नागेशभट्टानामभिप्रायः[750] ।

यत्तु भट्टोजिदीक्षितैः प्रयत्नग्रहणस्य प्रयोजनं प्रत्येकव्यापारद्वयनिरासार्थमुभयोरुपादानम्, इत्यादिरूपेण प्रदर्शितं तत्तु नागेशभट्टानां नाभिमतमिति टीकाग्रन्थदर्शनात् स्पष्टीभवति ।

यद्यपि स्थानांशे यावत् स्थानसाम्ये सवर्णसञ्ज्ञा इत्यर्थे नासिकाया अपि स्थानत्वात् कङयोः यावत् स्थानसाम्याभावात् सावर्ण्यं न लभ्यते इत्याक्षेपः नागेशभट्टमते कर्तुं शक्यः । तथापि नागेशभट्टैः अत्र सूत्रे आस्यशब्देन नासिकायाः न ग्रहणमिति सिद्धान्तस्य स्वीकारेण न दोषः । तथा च तद्रीत्या प्रयत्नविशेषणं आस्योपादानमिति भाष्येण बाह्यप्रयत्नानां व्यावर्तत्वं प्रदर्शनेन भाष्यरीत्या नासिकायाः आस्यान्तर्गत्वस्य स्वीकाराभावः किञ्च नासिका आस्यबाह्या इत्येव पक्षः सम्मतः तेन न दोषः ।

एवञ्च नासिकास्यान्तर्गता इति कैयटादिसम्मतं पक्षमाश्रित्य उक्तदोषवारणाय यावत् स्थानसाम्यं न विवक्षितमिति भट्टोजिदीक्षितानां व्याख्यानं नागेशभट्टानां नाभिमतमिति बोध्यम् ।

---

748 यस्यैतद्द्वयं येन यदीयेनैतद्द्वयेन तुल्यमित्यर्थः । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

749 यजुष्येकेषाम् इति निर्देशाद्यावदास्य भव तुल्यत्वं ग्राह्यम् । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

750 अत एव प्रयत्नशब्देन यत्नमात्रग्रहणमिति पक्षे यत्किञ्चित्प्रयत्नभेदे यत्किञ्चित्प्रयत्नैक्यमादाय सवर्णसञ्ज्ञेत्यर्थो " झरो झरि सवर्णे " इति सवर्णग्रहणेन ज्ञापकेन साधितो भाष्ये । तेन स्थानांशे यावत्स्थानसाम्ये इत्येव स्वारसिकोऽर्थ इति प्रतीयते । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

एवञ्च स्थानसाम्यविषये नासिकायाः स्थानत्वविषये च भट्टोजिदीक्षितनागेशभट्टयोः मतभेदः अत्र सूत्रे स्पष्टः इति बोध्यम्[751] ।

- **सवर्णसञ्ज्ञाप्रदेशाः**

1. अकः सवर्णे दीर्घः – (6-1-99)

अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात् । उदाहरणम् – दैत्यारिः, श्रीशः, विष्णूदयः ।

2. प्रथमयोः पूर्वसवर्णः – (6-1-100)

अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् । उदाहरणम् – रामाः, रामान्, हरी, विष्णू ।

3. सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः – (7-1-39)

सुपां स्थाने स्वादय आदेशाः स्युश्छन्दसि । उदाहरणम् – ऋजवः सन्तु पन्थाः । परमे व्योमन् ।

4. अनुस्वारस्य ययि परसवर्णः – (8-4-58)

ययि परेऽनुस्वारस्य परसवर्णः स्यात् । उदाहरणम् – अङ्कितः, अञ्चितः, शान्तः ।

- **अनुवादप्रदेशाः**

1. न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु – (1-1-58)

पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशो न स्थानिवत् । उदाहरणम् – कौ स्तः, दध्यत्र इत्यादि ।

2. अणुदित् सवर्णस्य चाप्रत्ययः – (1-1-69)

अविधीयमानोऽणुदिच्च सवर्णस्य सञ्ज्ञा स्यात् । उदाहरणम् – इको यणचि, कुहोश्चुः ।

3. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च – (6-1-125)

पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्वश्च वा । उदाहरणम् – चक्रि अत्र, चक्र्यत्र ।

4. ऋत्यकः – (6-1-126)

पदान्ता अकः ऋति परे प्रकृत्या स्युर्ह्रस्वश्च वा । उदाहरणम् – ब्रह्म ऋषिः, ब्रह्मर्षिः ।

5. अभ्यासस्यासवर्णे – (6-4-78)

इवर्णोवर्णान्तस्याभ्यासस्येयङुवङौ स्तोऽसवर्णेऽचि । उदाहरणम् – इयेष, उवोख ।

6. झरो झरि सवर्णे – (8-4-65)

---

[751] पाणिनिसञ्ज्ञासूत्रविमर्शः – (पृ. – 78)

हलः परस्य झरो लोपो वा स्यात् सवर्णे झरि। उदाहरणम् – कृष्णर्धिः, कृष्णर्द्धिः।

- **नाज्झलौ – (1-1-10)**

सवर्णसञ्ज्ञानिषेधकमिदं सूत्रम्। तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रेण तुल्यस्थानानां वर्णानां या सवर्णसञ्ज्ञा कृता, सा तुल्यस्थानप्रयत्नत्वात् अकारहकारयोः इकारशकारयोश्च प्राप्नुयादिति तन्निषेधार्थं सूत्रमिदमारब्धम्। अच्च हल् चेति इतरेतरद्वन्द्वसमासे ‘ अज्झलौ ’ इति पदम्। ‘ न ’ इति पृथक्पदम्। “ तुल्यास्यप्रयत्नं सवर्णम् ” इत्यतोऽनुवृत्तं सवर्णमिति पदम् अज्झलौ इत्युद्देशपदानुरोधेन पुँल्लिङ्गत्वेन द्विवचनेन च विपरिणम्यते। तथा च सूत्रार्थः – ‘ तुल्यास्यप्रयत्नौ अच् हल् च एतौ परस्परं सवर्णसञ्ज्ञकौ न भवतः ’ इति निष्पद्यते। ‘ दण्ड हस्तः, दधि शीतम्, वैपाशो मत्स्यः, आनडुहं चर्म ’ इत्युदाहरणानि। अत्रोदाहरणेषु दण्डशब्दाकारस्य हकारे परे हकारादकारे परे च सवर्णदीर्घो न, दधिशब्देकारस्य शकारे परे शकारादीकारे परेऽपि सवर्णदीर्घो न स्यात्। एवं विपाड् नदी, तत्र भवो वैपाशो मत्स्यः, अनडुह इदम् आनडुहं चर्म इत्यादौ “ यस्येति च ”[752] इति सूत्रेण इकारेण शकारस्य अकारेण हकारस्य सावर्ण्याल्लोपो न।

अज्झलौ केनापि समं सवर्णसञ्ज्ञौ न भवत इति तु नार्थः, तुल्यास्यसूत्रवैयर्थ्यापत्तेः। अचामज्भिर्हलां हल्भिर्न सावर्ण्यमित्यपि नार्थः, सवर्णविधिवैयर्थ्यापतेः, “ नाज्झलौ ” इत्यत्र दीर्घानापत्तेर्झकाररूपपूर्वसवर्णासिद्धेश्च। किन्तु हलामाचाञ्च परस्परं सवर्णसञ्ज्ञा न भवतीत्येवार्थः।

ननु अकारहकारयोः सावर्ण्यस्य “ नाज्झलौ ” इत्यनेन निषेधेऽपि दीर्घाकारप्लुताकारयोर्हकारेण सह सावर्ण्यं दुर्वारम्, न च “ नाज्झलौ ” इति सूत्रघटकाच्पदेन अणुदित्सूत्रसहकारेण दीर्घादीनामपि ग्रहणान्न हकारेण सह सावर्ण्यमिति वाच्यम्, “ नाज्झलौ ” इति सूत्रस्य वाक्यार्थबोधककाले ‘ अणुदित् ’ इत्यस्य वाक्यार्थबोधाभावेन नाज्झलाविति सूत्रघटकाच्पदे तदप्रवृत्तेः। तथाहि – ‘ अणुदित्सवर्णस्य ’ इति वाक्यार्थबोधे पदार्थोपस्थितिः कारणम् इति न्यायेन वाक्यघटकपदार्थोपस्थितिरपेक्ष्यते। शाब्दबोधकारणीभूतपदार्थोपस्थितिश्च पदनिष्ठवृत्तिज्ञानं विना न सम्भवति। तत्राणपदवृत्तिज्ञानाय ‘ अइउण् ’ इत्यादिवर्णसमाम्नायज्ञानमपेक्ष्यते, तज्ज्ञानं विना ‘ आदिरन्त्येन ’ इति सूत्रवाक्यार्थ-बोधासम्भवात्। ‘ आदिरन्त्येन ’ इति वाक्यार्थबोधश्च इत्पदार्थज्ञानमन्तरा असम्भवि। इत्पदशक्तिज्ञानं

---

[752] अष्टाध्यायी – (6-4-148)

च “ उपदेशेऽजनुनासिक इत् ”[753] “ हलन्त्यम् ”[754] इत्यादिशास्त्राधीनम् । एतावता वाक्यकदम्बेन ‘ अणुदित् ’ इति सूत्रघटकाण्पदार्थोपस्थितिः । सवर्णपदशक्तिज्ञानाय “ तुल्यास्यप्रयत्नं सवर्णम् ” इति सूत्रवाक्यार्थज्ञानापेक्षा । तद्यदि स्वातन्त्र्येण सवर्णसञ्ज्ञां विदध्यात्तदा अज्झलोरपि सवर्णसञ्ज्ञा स्यात् । ततः “ नाज्झलौ ” इति सूत्रं ‘ भुक्तवन्तं प्रति ब्रूयाद् मा भुक्थाः ’ इति न्यायेन व्यर्थमेव स्यादिति ‘ पूर्वं हि अपवादा अभिनिविशन्ते पश्चादुत्सर्गाः ’ इति न्यायेन पूर्वमपवादशास्त्रीयोद्देश्यभिन्नत्वेनोत्सर्ग-शास्त्रीयोद्देश्ये सङ्कोचं कृत्वा उत्सर्गशास्त्रवाक्यार्थबोधः । तथा च प्रकृते अज्भिन्नेन तुल्यास्य-प्रयत्नमज्भिन्नं सवर्णसञ्ज्ञं भवति इत्यर्थेन हलां हल्भिः सवर्णसञ्ज्ञा, हल्भिन्नेन तुल्यास्यप्रयत्नं हल्भिन्नं सवर्णसञ्ज्ञं भवति इत्यर्थान्तरेण च अचामज्भिः सवर्णसञ्ज्ञा भवति । एतदर्थे एव तात्पर्य्यग्राहकं नाज्झलाविति सूत्रम् । तथा च तुल्यास्यसूत्रे एव नाज्झलावित्यस्य प्रवेशेन तदानीमणुदित्सूत्रवाक्यार्थ-बोधाभावेन वर्णसमाम्नाये पठितानामेव “ नाज्झलौ ” इति सूत्रस्थाच्पदेन ग्रहणम्, सवर्णविधानकाले अणुदित्सूत्रार्थज्ञानाभावेन अच्पदवाच्या ये अकारादयस्ते नाष्टादशानां सञ्ज्ञाः, किन्तु स्वरूपबोधका एव[755] । तदुक्तं भाष्ये – ‘ वाक्यपरिसमाप्तेर्वा पुनः सिद्धमेतत् । किमिदं वाक्यपरिसमाप्तेरिति ? वर्णानामुपदेशस्तावत् । उपदेशोत्तरकाला इत्सञ्ज्ञा । इत्सञ्ज्ञोत्तरकालः “ आदिरन्त्येन सहेता ” इति प्रत्याहारः । प्रत्याहारोत्तरकाल- सवर्णसञ्ज्ञा । सवर्णसञ्ज्ञोत्तरकालम् “ अणुदित्सवर्णस्य चाप्रत्ययः ” इति सवर्णग्रहणम् । एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानां ग्रहणं भवति ’[756] ।

अयं भावः – 1. अइउण् 2. इत्सञ्ज्ञाशास्त्रम् हलन्त्यम् 3. आदिरन्त्येन 4. तुल्यास्यप्रयत्न नाज्झलौ 5. अणुदित् इति पञ्चानां वाक्यानामर्थबोधानन्तरमेव अणुदित्सूत्रप्रवृत्तिः न स्वस्मिन्नपि ‘ अइउण् ’ इत्यादिषु चतुर्षु । अयं भावः – “ तुल्यास्यप्रयत्नं सवर्णम् ”[757] इति सूत्रस्य प्रामाणिको वाक्यार्थबोधस्तावन्न सम्भवति, यावत् “ नाज्झलौ ” इति निषेधशास्त्रस्य बोधो न स्यात् । निषेधरूप-बाधकविषयस्य परिहारेण उत्सर्गशास्त्रस्य प्रवृत्तेरभ्युपगमेन निषेधशास्त्रविषयातिरिक्तत्वेन तुल्यास्य सूत्रबोधे सङ्कोचस्यावश्यकत्वात् । तथा च तुल्यास्यसूत्रबोधात् प्रागेव “ नाज्झलौ ” इत्यस्य बोधोऽपेक्षितः । तदानीं सवर्णसञ्ज्ञाया अभावेन सवर्णपदार्थस्यानिश्चयेन सवर्णबोधकस्य “

[753] अष्टाध्यायी – (1-3-2)

[754] अष्टाध्यायी – (1-3-3)

[755] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – (पृ. – 55)

[756] महाभाष्यम् - प्रकृतसूत्रे

[757] अष्टाध्यायी – (1-1-9)

अणुदित्सवर्णस्य चाप्रत्ययः "[758] इति सूत्रस्य कथमपि प्रामाणिकबोधस्य कर्तुमशक्यतया " नाज्झलौ " इत्यत्र अच्पदेन दीर्घादीनां ग्रहणं कथमपि न स्यात् । " नाज्झलौ " इत्यस्य वर्णसमाम्नाये श्रूयमाणानामेव अकारादीनां बोधकस्य अचो हला सह सवर्णसञ्ज्ञाया निषेधरूपे वाक्यार्थसम्पन्ने तद्विषयं परिहाय " तुल्यास्यप्रयत्नं सवर्णम् " सूत्रस्य असन्दिग्धो वाक्यार्थबोधो जायते । ततः परम् " अणुदित्सवर्णस्य चाप्रत्ययः " सूत्रस्यापि सवर्णपदार्थनिश्चयेन सन्देहप्रतिबन्धकनिश्चयसत्त्वात् प्रामाणिको बोधो जायते इति भाष्याशयः ।

अत एव " नाज्झलौ " इति सूत्रे " अणुदित्सवर्णस्य चाप्रत्ययः " इति सूत्रेण दीर्घाकारादीनामग्रहणात् " नाज्झलौ " इति सूत्रेण दीर्घाकारहकारयोः सवर्णसञ्ज्ञाया निषेधाभावेन दीर्घाकारहकारयोः सवर्णसञ्ज्ञायाम् " हो ढः "[759] इत्यत्र ग्रहणशास्त्रबलात् हकारग्रहणेन दीर्घाकारस्य ग्रहणे विश्वपाभिरित्यादौ " हो ढः " इति सूत्रेण ढत्वं स्यादिति चेन्न, " नाज्झलौ " इति सूत्रे दीर्घाकारादीनां प्रश्लिष्टत्वात् । " नाज्झलौ " इति सूत्रे दीर्घाकारादीनां प्रश्लेषेण दीर्घाकारहकारयोरपि सवर्णसञ्ज्ञाया निषेद्धत्वात् " हो ढः " इत्यत्र हकारग्रहणेन दीर्घाकारस्याग्रहणे विश्वपाभिरित्यादौ " हो ढः " इत्यनेन ढत्वस्याप्रवृत्तेरिति भावः । यदि हकाराकारयोः सावर्ण्यं स्यात्तदा " कालसमयवेलासु तुमुन् "[760] इत्यत्र सूत्रे ढत्वस्य षत्वस्य च प्राप्त्या पाणिनेराकारसकारोच्चारणमसङ्गतं स्यात् । तत्र " हो ढः " इति सूत्रेण आकारस्य ढत्वे, इण्प्रत्याहारे हकारस्य पाठेन, अकारस्य हकारसवर्णत्वेन आकारस्यापि इण्त्वात् " आदेशप्रत्यययोः "[761] इति सूत्रेण सकारस्य षत्वे निर्देशासङ्गतिश्च स्यात् । तदुच्चारणेन पाणिनिना ज्ञाप्यते – आकारप्रश्लेषो " नाज्झलौ " इति सूत्रेऽस्तीति । एवमत्राकारप्रश्लेषे प्रमाणञ्च " नाज्झलौ " इति सूत्रप्रत्याख्यानपरं भाष्यमपि । आकारप्रश्लेषाभावे प्रयत्नभेदेन हकारप्रयोज्यं कार्यमाकारे न प्राप्नोति । सूत्रारम्भे च हकाराकरयोः सावर्ण्याद् हकारप्रयुक्तं कार्यमाकारे प्राप्नोतीति फलभेदः ।

न च प्लुताकारप्रश्लेषाभावात् ' हे यियासो ' इत्यादौ षत्वं दुर्वारं स्यादिति वाच्यम् ? । ' हेयिया३सो ', ' हेपिपा३सो ' इति भाष्यप्रयोगात् प्लुताकारस्यापि प्रश्लेषोऽत्र बोध्यः । तत्र " गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् "[762] इत्याकारस्य प्लुतत्वे इण्पदबोध्य इकारेऽणुदित्सूत्रप्रवृत्त्या हकारसवर्णप्लुताकारस्यापि इण्ग्रहणेन ग्रहणे " आदेशप्रत्यययोः " इति सूत्रेण षत्वापत्तिः । तत्र

---

[758] अष्टाध्यायी – (1-1-69)

[759] अष्टाध्यायी – (8-2-31)

[760] अष्टाध्यायी – (3-3-167)

[761] अष्टाध्यायी – (8-3-59)

[762] अष्टाध्यायी – (8-2-86)

षत्वस्येष्टत्वं तु न, ‘ ईषद्विवृतमुष्मणाम् ’ इति भाष्यमते हकारस्य सकलाकारैः सावर्ण्याभावेन षत्वाप्राप्तेः । प्लुतस्यापि प्रश्लेषे तु न सुत्रकारभाष्यकारयोः फलभेदः, अथ च यदा पक्षद्वये फलभेदस्तदा प्रत्याख्यानं न युक्तं भवतीति, प्रत्याख्यानपक्षे सर्वेषामकाराणां सवर्णसञ्ज्ञा न भवति, अथ च सूत्रारम्भपक्षे ह्रस्वदीर्घयोर्द्वयोरेव सावर्ण्यनिषेधो भवतीति प्रत्याख्यानपरकभाष्यासङ्गत्या सूत्रारम्भपक्षेऽपि सर्वेषामकाराणां सवर्णसञ्ज्ञा न भवतीति भावः । अत एव उभयमते षत्वाप्राप्तेः । तथा च समासः आश्च आ३ च औ, आभ्यां सहित इत्यर्थे “ कर्तृकरणे कृता बहुलम् ”[763] इति सूत्रेण समासे , आसहितः इति । ‘ आसहितश्चासौ अच् चेति आच् ’ इत्युत्तरपदलोपसमासे सवर्णदीर्घेण आकारस्यापि संयुक्तत्वात् । आच् च हल् चेति आज्झलौ, न आज्झलौ इति नाज्झलौ । दीर्घाकारेण प्लुताकारेण वर्णसमाम्नाय-पठितेन अकारादिस्वरेण च सह हल्वर्णानां सवर्णसञ्ज्ञा न भवतीत्यर्थः ।

ननु हकाराकरयोः सावर्ण्येऽपि आकारेण हकारग्रहणन्तु नैव स्यात्, आकारस्यानण्त्वेन अणुदित्सवर्णसूत्राप्रवृत्तेः । हकारेण आकारं गृहीत्वा यत्कार्यं ढत्वादिकं प्राप्नोति तत्सर्वं त्रिपादीस्थमेव । तथा च “ अणुदित्सवर्णस्य चाप्रत्ययः ”[764] इत्यस्य सपादसप्ताध्यायीस्थतया तद् दृष्ट्या “ पूर्वत्रासिद्धम् ” इति सूत्रेण “ हो ढः ”[765] इत्यादीनामसिद्धतया हकारेण आकारग्रहणाप्राप्तिः स्पष्टैवेति वाच्यम्, अणुदित्सूत्रस्य त्रिपाद्यां प्रवृत्तेर्मुनित्रयसम्मतत्वात् । यदि तत्सूत्रस्य त्रिपाद्यां प्रवृत्तिर्न स्यात्तदा “ गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ”[766]“ इदुदुपधस्य चाप्रत्ययस्य ”[767] इति सूत्रे अणुदित्सूत्राप्रवृत्त्या तद्वारणाय कृतं तपरत्वं व्यर्थमेव स्यादिति तद्वैयर्थ्यमेव ज्ञापयति – अणुदित्सूत्रदृष्ट्या त्रिपाद्या नासिद्धत्वमिति । तेन तपरत्वस्य चारितार्थ्यम्, “ ङमो ह्रस्वादचि ङमुण् नित्यम् ”[768] इत्यादौ प्रवृत्त्या ‘ सुगण्णीशः ’ इत्यादौ णुडादिकञ्च सिद्ध्यति[769] ।

न चैवं दीर्घेकारस्य शकारेण, दीर्घऋकारस्य षकारेण सह सावर्ण्यवारणाय यत्नान्तरं वक्तुमुचितमिति वाच्यम्, तेषां सत्यपि दोषाभावात् । न च ‘ कुमारी शेते ’,‘ कृ षष्ठः ’ इत्यादौ सवर्णदीर्घापत्तिः । शकारषकारयोरण्त्वाभावेन न शकारषकाराभ्यामीकारऋकारयोर्ग्रहणम्, नापीकार-

[763] अष्टाध्यायी – (2-1-32)
[764] अष्टाध्यायी – (1-1-69)
[765] अष्टाध्यायी – (8-2-31)
[766] अष्टाध्यायी – (8-2-86)
[767] अष्टाध्यायी – (8-3-41)
[768] अष्टाध्यायी – (8-3-32)
[769] वैयाकरणलिद्धान्तकौमुदी – लक्ष्मीटीका – (पृ. – 56)

ऋकाराभ्यां शकारषकारयोर्ग्रहणम्, दीर्घयोस्तयोराक्षरसमाम्नायिकत्वाभावेन अणुदित्सूत्राप्रवृत्तेः । तेन " शि तुक् "[770] " ङ्णोः कुक्टुक् शरि "[771] इत्यादौ न शकारषकारग्रहणेन ईकारऋकारयोर्ग्रहणम् । ह्रस्वेकारादिना तु न सावर्ण्यम्, " नाज्झलौ " इति सूत्रेण निषेधात् । तथा च कथमपि शकार-षकाराभ्यामचाम् अजादिना च शकारषकारयोर्वा ग्रहणाप्रात्या न तेषां सावर्ण्यनिषेधाय यत्नान्तरानुसरणं करणीयम् ।

न च व्यक्तिपक्षे दीर्घाकारप्रश्लेषेण दीर्घाकारहकारयोः सवर्णसञ्ज्ञायाः निषेधेऽपि दीर्घेकारशकारयोः सवर्णसञ्ज्ञायाम् ' गौरीभ्याम् ' इत्यत्र इकारग्रहणेन ईकारस्य ग्रहणे " व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः "[772] इति सूत्रेण ईकारस्य षत्वं स्यादिति वाच्यम्, अण्प्रत्याहारे हकारस्य पाठेन हकारग्रहणेनाकारस्य बोधेऽपि अण्प्रत्याहारे शकारस्य पाठाभावेन ग्राहकसूत्रेण शकारग्रहणेन ईकारस्य ग्रहणं न भवति ।

भाष्ये प्रयत्नभेदोऽज्झलोरुन्नीतः तद्यथा – ' सिद्धमनच्त्वात् । कथमनचत्वम् । ' स्पृष्टं करणं स्पर्शानाम् ' । ' ईषत्स्पृष्टमन्तःस्थानाम् ' । ' विवृतमूष्मणाम् ' । ईषदित्येवानुवर्त्तते । ' स्वाराणां च ' विवृतम् । ईषदिति निवृत्तम् '[773] । एवं चेदं प्रत्याख्यानमिति कैयटीयाः ।

अपरे तु प्रयत्नभेदप्राप्तसावर्ण्याभावानुवादकं सत्तस्यैव बोधकमिदं सूत्रम् । अत एव भाष्ये एतन्न कर्तव्यमिति नोक्तमित्याहुः ।

अनया रीत्या अस्मिन्नध्याये (क) अथ शब्दानुशासनम्, (ख) प्रत्याहारसूत्राणि, (ग) वृद्ध्यादिसञ्ज्ञाप्रकरणम् – वृद्धिरादैच्, अदेङ् गुणः, इको गुणवृद्धी, न धातुलोप आर्धधातुके, क्क्ङिति च, दीधीवेवीटाम्, हलोऽनन्तराः संयोगः, मुखनासिकावचनोऽनुनासिकः, तुल्यास्यप्रयत्नं सवर्णम्, नाज्झलौ इत्येतानि सूत्राणि यथामति व्यचारिषत ।

॥ इति द्वितीयोऽध्यायः ॥

---

[770] अष्टाध्यायी – (8-3-31)

[771] अष्टाध्यायी – (8-3-28)

[772] अष्टाध्यायी – (8-2-36)

[773] महाभाष्यम् – प्रकृतसूत्रे

॥ अथ तृतीयोऽध्यायः ॥

(क) प्रगृह्यसञ्ज्ञाप्रकरणम्

- **ईदूदेद् द्विवचनं प्रगृह्यम् – (1-1-11)**

प्रगृह्यसञ्ज्ञासूत्रेषु इदमादिमं सूत्रम् । अस्मिन् सूत्रे त्रीणि पदानि सन्ति । तेषु ' ईदूदेद् ' इति प्रथमं पदम्, ईच्च ऊच्च एच्चेति विग्रहे समाहारद्वन्द्वे ईदूदेदिति प्रथमान्तम् । तच्च द्विवचनस्य विशेषणम् । वृत्तिः – ईदाद्यन्तं द्विवचनं शब्दरूपं प्रगृह्यसञ्ज्ञं भवति । अयमेवार्थः भाष्ये कौमुद्यां काशिकायां च प्रकाशितः । उदाहरणञ्चास्य – अग्नी इति, वायू इति, माले इति, पचेते इति । इन्द्राग्नी इमौ, इन्द्रवायू इमे सूताः (ऋ. 1-2-4)

चत्वारोऽत्र पक्षाः सम्भवन्तीति महाभाष्ये प्रतिपादितम् । यद्यथा –

1. ईदादीनां विशेष्यत्वं द्विवचनस्य च विशेषणत्वम्, तत्र द्विवचनान्तस्य ईदादीनामसम्भवाद् द्विवचनेति विशेषणात् तदन्तविध्यभावे द्विवचनसञ्ज्ञं यदीदादि तत् प्रगृह्यमिति प्रथमः पक्षः ।

2. ईदादीनां विशेषणत्वं द्विवचनस्य विशेष्यत्वम्, " येन विधिस्तदन्तस्य "[774] इति सूत्रेण ईदादिरूपविशेषणस्य तदन्तविधौ ईदन्तम्, ऊदन्तम्, एदन्तञ्चेति यद्द्विवचनं तत् प्रगृह्यमिति द्वितीयः पक्षः । अयमेव द्वितीयः सिद्धान्तपक्षो भाष्यकारेण संस्थापितः ।

3. द्विवचनस्य प्रत्ययबोधकत्वेन ' प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ' इति परिभाषया तदन्तविधौ सति पश्चाद् द्विवचनान्तस्य विशेषणमीदादि, अतश्च " येन विधिस्तदन्तस्य " इति तदन्तविधिस्तदा ईदाद्यन्तं यद् द्विवचनान्तं तत् प्रगृह्यमिति तृतीयः पक्षः ।

4. पूर्वमीदादिशब्दे तदन्तविधिः, पश्चाद् ईदादिविशिष्टेन द्विवचनशब्देन तदन्तविधौ, ईदाद्यन्तं यद्द्विवचनं तदन्तं प्रगृह्यमिति चतुर्थः पक्षः ।

तत्र प्रथमपक्षे ' पचेते, पचावहे ' इत्यादौ प्रगृह्यसञ्ज्ञा न स्यात्, एकारस्य द्विवचनावयवत्वेऽपि द्विवचनस्य एकाररूपत्वाभावात् प्रगृह्यसञ्ज्ञा न स्यादिति दोषः ।

---

[774] अष्टाध्यायी – (1-1-72)

ननु मुख्यानुपपत्त्या शास्त्रप्रामाण्याद् गौणे प्रवृत्तिः स्यादिति चेन्न, ‘ गङ्गे ’ इत्यादौ “ अन्तादिवच्च ”[775] इति सूत्रेणादिवद्भावेन एकारस्य मुख्यद्विवचनत्वेन तत्र चारितार्थ्यात्[776] ।

ननु ईदूदेदन्तं यद् द्विवचनमिति सिद्धान्तपक्षे तु ‘ पचेते इमौ ’, ‘ पचेथे एतौ ’ इत्यादौ ‘ एते ’,‘ एथे ’ इत्येदन्तद्विवचनसत्त्वेन प्रगृह्यत्वे सिद्धत्वेऽपि ‘ हरी ’‘ विष्णू ’‘ गङ्गे ’ इत्यादौ परादिवद्भावेन ईवर्णादेर्द्विवचनत्वेऽपि ईदाद्यन्तद्विवचनत्वाभावात्प्रगृह्यत्वं न स्यादिति चेन्न, एकपुत्रेऽपि कनिष्ठत्वादि-व्यवहारवत्, ‘ व्यपदेशिवदेकस्मिन् ’ इति लोकन्यायेन वर्णरूपेऽपि तदन्तत्वबोधनात्, ईदूदन्त-द्विवचनाभावेन ईदूद्ग्रहणसामर्थ्याद् ईदूद्रूपेऽपि द्विवचने प्रवृत्तिकल्पनाच्च [777] ।

ननु ईकारेण ऊकारेण च विशेषणेन तदन्तविधेरुपयोगो न, ‘ हरी, विष्णू ’ इत्युभयत्र दीर्घेकारोकारयोः केवलयोर्द्विवचनरूपत्वेन तदन्तत्वसम्पादनाय व्यपदेशिवद्भावस्यापेक्षिततया प्रत्युत गौरवमेव स्यात्, अतः तदन्तविधिर्नावश्यकः स्यादिति चेन्न, ‘ पचेते ’ इत्यत्र एकारमात्रस्य द्विवचनत्वाभावात् एतदर्थम् एदन्तमित्यर्थस्तदन्तविधिना अवश्यं वाच्यः । तथा च ऐकरूप्याय ईकारोकारयोरपि तदन्तविधिः कृतः । व्यपदेशिवद्भावाच्च ईदन्तम् ऊदन्तञ्च सम्पादनीयम् [778] ।

ईदाद्यन्तं यद् द्विवचनान्तं तत्प्रगृह्यमिति तृतीयपक्षे ‘ कुमार्य्यगारम्, वध्वगारम् ’ इत्यादौ प्रगृह्यत्वापत्तिः स्यात् । तथा हि कुमार्य्यगारम् इत्यत्र षष्ठीसमासे ओसो लुकि ‘ कुमारी अगारम् ’ इत्यवस्थायाम् ईदन्तं कुमारीति, प्रत्ययलक्षणेन ओसमादाय द्विवचनान्तञ्चेति प्रगृह्यत्वापत्तिः स्यात् । अत ईदूदेदन्तं द्विवचनं प्रगृह्यमित्येवार्थो न तु द्विवचनान्तमिति । ईदाद्यन्तं द्विवचनमित्यर्थे तु नात्र प्रगृह्यम्, ओसः सान्तत्वात् ।

ईदाद्यन्तं यत् द्विवचनं तदन्तमिति चतुर्थपक्षे पूर्वोक्तोदाहरणयोर्द्विवचनस्य ईदाद्यन्तत्वाभावात् दोषाभावेऽपि अशुक्ले शुक्ले समपद्येतां शुक्ल्यास्तां वस्त्रे इत्यत्र प्रथमाद्विवचनस्य “ नपुंसकाच्च ”[779] इति सूत्रेण ‘ शी ’ इत्यादेशे च्विप्रत्यये “ सुपो धातुप्रातिपदिकयोः ”[780] इति सूत्रेण शी लोपे “ अस्य च्वौ ”[781] इति शुक्लशब्दान्त्याकारस्य ईत्वे तद्धितान्तत्वादुत्पन्नस्य सुप्रत्ययस्याव्ययत्वाल्लुकि कृते ‘

---

[775] अष्टाध्यायी – (6-1-84)

[776] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

[777] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीकायाम् – प्रकृतसूत्रे

[778] लघुशब्देन्दुशेखरः - राधिकाव्याख्यायाम् – प्रकृतसूत्रे

[779] अष्टाध्यायी – (7-1-19)

[780] अष्टाध्यायी – (2-4-71)

[781] अष्टाध्यायी – (7-4-32)

शी ' इत्यादेशस्य द्विवचनस्य व्यपदेशिवद्भावेन ईकारान्तत्वात्, प्रत्ययलक्षणेन शुक्लीत्यस्य द्विवचनान्तत्वादित्यतिप्रसङ्गः स्यात्।

वस्तुतस्तु ईदूदेदन्तं यद् द्विवचनान्तं तत्प्रगृह्यमिति तृतीयः पक्षो न सम्भवति ' सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ' इति परिभाषया द्विवचनरूपप्रत्ययोद्देश्यकेऽत्र प्रगृह्यसञ्ज्ञाविधौ द्विवचने तदन्तविधेर्निषेधात्। एवं ईदाद्यन्तं यद् द्विवचनं तदन्तमिति चतुर्थः पक्षोऽपि न समुत्पद्यते। तथापि यदि केनापि प्रकारेण सम्भाव्येतामपि दूषणग्रस्तत्वात् न तौ स्वीकर्तव्यौ। प्रथमपक्षेऽपि ' पचेते, पचावहे ' इत्यत्र एकारस्य द्विवचनावयवत्वेऽपि द्विवचनस्य एकाररूपत्वाभावात् प्रगृह्यसञ्ज्ञा न स्यादिति दोषो भवति । अत एव ईदन्तम्, ऊदन्तम्, एदन्तञ्चेति यद्द्विवचनं तत् प्रगृह्यमिति द्वितीयः पक्ष एव सिद्धान्तरूपेण स्वीकर्तव्यतयाऽवशिष्यते।

- **असन्देहार्थं तपरकरणम्**

अत्र ईश्च ऊश्च एश्च इति समाहारद्वन्द्वे नपुंसकह्रस्वत्वे च कृते ' य्वि ' इति स्यात्, इतरेतरयोगे वा ' य्वयः ' इति स्यात्। उभयथाऽपि सन्दिह्येत के वर्णा एते ? इकारोकारैकारा वा यकारवकारैकारा वा ? तस्माद् यणादिसंहिताकार्यवारणद्वारा तपरकरणमसन्देहार्थं स्यात्।

न च तपरकरणं दीर्घाणां ग्रहणार्थमिति वाच्यम्, ' गुणा अभेदकाः ' इति परिभाषयैव षण्णां ग्रहणसिद्धेः।

न च प्लुतेकारादीनां निवृत्त्यर्थं तपरकरणम्, अणुदित्सूत्रेऽण्ग्रहणेन दीर्घस्याग्रहणात् प्लुतग्रहणाप्राप्तेः । एकारस्याण्तया तथाप्रसङ्गेऽपि प्रगृह्यदृष्ट्या प्लुतस्यासिद्धतया दीर्घत्वबुद्ध्या प्लुतानामपि प्रगृह्यत्वमिष्टमेव । एवञ्च तपरकरणस्य न तत्कालग्रहणं प्रयोजनम्, नापि अतत्कालनिवृत्तिः। किन्तु असन्देहार्थं तपरकरणम्।

किन्तु असन्देहार्थेनापि कृतेन तेन तपरकरणेन जातिपक्षप्राप्तप्लुतग्रहणनिवृत्तिः समापतति, यद्यपि इष्टैव तेषां प्रगृह्यसञ्ज्ञा इति तपरकरणे दोष एवेति या आशङ्का, सा इत्थं समाहिता आचार्यैः – " पूर्वत्रासिद्धम् "[782] इति प्लुतस्य असिद्धतया द्विमात्रबुद्ध्यैव स्यात् तेषां प्रगृह्यसञ्ज्ञा। न च प्लुतानां प्रगृह्यसञ्ज्ञाया आवश्यकतैव का ? प्रगृह्यसञ्ज्ञाफलस्य प्रकृतिभावस्य ' प्लुतः प्रकृत्या ' इति प्लुतभावनयैव सिद्धेरिति वाच्यम्, " अप्लुतवदुपस्थिते "[783] इति प्लुताश्रये प्रकृतिभावे प्रतिषिद्धे

---

[782] अष्टाध्यायी – (8-2-1)

[783] अष्टाध्यायी – (6-1-127)

प्रगृह्याश्रयप्रकृतिभावाय, “ अणोऽप्रगृह्यस्यानुनासिकः ”[784] इति ‘ अग्नी३ ’ इत्यादौ अनुनासिकवारणाय च प्लुतानां प्रगृह्यसञ्ज्ञावश्यकी । न चैवं ‘ प्लुतः प्रकृत्या ’ इति ज्ञापितेन ‘ सिद्धः प्लुतः स्वरसन्धिषु ’ इति वचनेन स्वरसन्धिविधौ प्लुतस्य सिद्धतया कथं स्यात् प्रगृह्यसञ्ज्ञेत्याशङ्क्यम्, स्वरविधौ सिद्धत्वेऽपि सञ्ज्ञाविधौ असिद्धत्वात् । न च ‘ कार्यकालं सञ्ज्ञापरिभाषम् ’ इति परिभाषया कार्यकालपक्षे सञ्ज्ञाशास्त्राणां विधिप्रदेशस्थत्वात् तत्र स्थिते सञ्ज्ञाविधौ अपि सिद्ध एव प्लुत इत्याशङ्क्यम्, अत्र विषये ‘ यथोद्देशं सञ्ज्ञापरिभाषम् ’ इति यथोद्देशपक्षस्यैव स्वीकारात्[785] ।

न चात्र प्रमाणाभावः, किं न एतेन यत्नेन कार्यकालं सञ्ज्ञापरिभाषमिति । ‘ यथोद्देशमेव सञ्ज्ञापरिभाषम् ’ । अत्र चासावसिद्धः इति भाष्यस्यैव मानत्वात् ।

न च प्लुतानां प्रगृह्यत्वे फलाभावः, “ अणोऽप्रगृह्यस्यानुनासिकः ” इति अनुनासिकत्वाभावस्य, उपस्थिते इतिशब्दपरे ‘ अग्नी३ इति ’ इत्यादौ प्लुतनिमित्तकप्रकृतिभावाप्राप्त्या प्रगृह्यनिमित्तकप्रकृति-भावस्य “ एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ”[786] इति सूत्रेण प्लुतोत्तरभागस्य इदुदादेशाभावस्य च फलस्य सत्त्वात् ।

- **प्रगृह्यसञ्ज्ञाप्रदेशाः**

1. अदसो मात् – (1-1-12)

अस्मात्परावीदूतौ प्रगृह्यौ स्तः । उदाहरणम् – अमी ईशाः, रामकृष्णावमू आसाते ।

2. शे – (1-1-13)

अयं प्रगृह्यः स्यात् । उदाहरणम् – अस्मे इन्द्राबृहस्पती ।

3. निपात एकाजनाङ् – (1-1-14)

एकोऽज्निपात आङ्वर्जः प्रगृह्यः स्यात् । उदाहरणम् – इ इन्द्रः, उ उमेशः ।

4. ओत् – (1-1-15)

ओदन्तो निपातः प्रगृह्यः स्यात् । उदाहरणम् – अहो ईशाः ।

5. सम्बुद्धौ शाकल्यस्येतावनार्षे – (1-1-16)

सम्बुद्धिनिमित्तकः ओकारो वा प्रगृह्योऽवैदिक इतौ परे । उदाहरणम् – विष्णो इति, विष्ण इति, विष्णविति ।

---

[784] अष्टाध्यायी – (8-4-57)

[785] भाषावृत्तेः समाक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[786] अष्टाध्यायी – (8-2-107)

6. उञः ऊँ – (1-1-17)

उञः इतौ वा प्रगृह्यत्वम् । उदाहरणम् – उ इति, ऊँ इति, विति ।

7. ईदूतौ च सप्तम्यर्थे – (1-1-19)

सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यम् । उदाहरणम् – सोमो गौरी अधिश्रितः, मामकी तनू इति ।

8. प्लुतप्रगृह्या अचि नित्यम् – (6-1-123)

प्लुताः प्रगृह्याश्चाचि परे नित्यं प्रकृत्या स्युः । उदाहरणम् – एहि कृष्ण३ अत्र गौश्चरति,हरी एतौ ।

9. एचोऽप्रगृह्यस्यादूराद्धुते पूर्वस्यार्धस्यादुत्तरस्येदुतौ – (8-2-107)

अप्रगृह्यस्य एचोऽदूराद्धूते प्लुतविषये पूर्वस्यार्धस्याकारः प्लुतः स्यादुत्तरस्य त्वर्धस्य इदुतौ स्तः । उदाहरणम् – अगमः३ पूर्वा३न् ग्रामा३न् अग्निभूत३इ ।

10. अणोऽप्रगृह्यस्यानुनासिकः – (8-4-57)

अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात् । उदाहरणम् – दधिँ, दधि ।

- **अदसो मात् – (1-1-12)**

वृत्तिः – अदसः सम्बन्धी यो मकारः, तस्मात् परे ये ईदूदेतः तेषां प्रगृह्यसञ्ज्ञा भवति । उदाहरणम् – अमी अत्र, अमी आसते, अमू अत्र, अमू आसाते ।

अत्रानुवृत्तिविषये विचारभेदात् मतद्वयं विद्यते – एकं काशिकाकारस्य मतम् [787], द्वितीयन्तु भट्टोजिदीक्षितस्य मतम् [788] ।

काशिकाकारस्य मतम् – एतन्मते ‘ एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ’ इति परिभाषया ‘ ईदूदेत् ’ इति समस्तं पदमनुवर्त्यम्, ‘ एत् ’ इत्येकदेशं विहाय ‘ ईदूद् ’ इति पदैकदेशानुवृत्तेरनौचित्यात् । सत्यामपि च एकारानुवृत्तौ न स प्रगृह्यसञ्ज्ञो भवति, मकारात्परस्य तस्य असौलभ्यात् । अतश्च ‘ माद् ’ ग्रहणसाफल्यम् । अन्यथा यदि एकारोऽनुवर्त्येत एव न, तर्हि ‘ अमुकेऽत्र ’ इत्यादौ अतिप्रसङ्गाभावात् तत्रातिप्रसङ्गवारणाय कृतं ‘ माद् ’ ग्रहणं विफलं स्यात्, ईकारोकारयोस्तु मादेव परत्वात् न तयोर्विषये क्वापि अतिप्रसङ्गः, यद्वारणाय ‘ मात् ’ इति पदं गृह्येत । एवञ्च ‘ अमुकेऽत्र ’ इत्यादौ प्रसक्तातिव्यापत्तिवारणाय कृतं माद्ग्रहणं समस्तपदानुवृत्तौ प्रमाणम् । अत एव

[787] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[788] सिद्धान्तकौमुदी – बालमनोरमा -प्रकृतसूत्रे

अर्थाधिकारमाश्रित्य पूर्वसूत्रे द्विवचनविशेषणतया तेन तदन्तविधौ ' ईदूदेन्ताः ' इत्यर्थो नानुवर्त्येत, तथा सति ' अमुकेऽत्र ' इत्यत्रापि अतिप्रसङ्गात् ' मात् ' पदवैयर्थ्यापत्तेः । किन्तु शब्दाधिकारात् ' ईदूदेद् ' इति तत्रत्यार्थनिरपेक्ष एव इहानुवर्त्यते, अत्र तस्य विशेष्याभावान्न तदन्तविधिः[789] । अतश्चैव काशिकाकारो वृत्तिमाह – ' अदसः सम्बन्धी यो मकारः, तस्मात् परे ईदूदेतः प्रगृह्यसञ्ज्ञा भवन्ति '[790] ।

भट्टोजिदीक्षितस्य मतम् – अत्र ' ईदूत् ' इति, ' प्रगृह्यम् ' इति चानुवर्तते । एदिति तु नानुवर्तते, अत एव एकारस्य प्रगृह्यत्ववारणाय माद्ग्रहणम्, कृते च तस्मिन् एकारस्य अदश्शब्दावयवमकाराव्यवहितोत्तरस्य एकारस्यानुपलब्धेः । नन्वेवमपि माद्ग्रहणं व्यर्थम्, एद्ग्रहणमननुवृत्त्य ईदूतोरेवात्र प्रगृह्यत्वविधानाभ्युपगमेन ' अमुके ' इत्यत्र प्रगृह्यत्वाप्रसक्तिः स्यादिति चेन्न, माद्ग्रहणाभावे ' एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ' इति परिभाषया " अदसो मात् " इत्यत्र ईदूदेताम् एकसमासपदोपात्तानां मध्ये ईदूतोर्द्वयोरनुवृत्तौ एतोऽप्यनुवृत्तिस्स्यात् ततश्च ' अमुके अत्र ' इत्यत्राप्येकारस्य प्रगृह्यत्वं स्यात् । माद्ग्रहणे सति तु " तस्मादित्युत्तरस्य "[791] इति परिभाषाबलेन मकारादव्यवहितपरत्वस्य एकारेऽसम्भवान्नानुवृत्तिः । तस्माद् माद्ग्रहणं एकारानुवृत्ति-तात्पर्यग्राहकफलकमिति फलितम् ।

अदसो मादव्यवहितं यदेदन्तं तत्प्रगृह्यम् इत्यर्थे ' अमुकेऽत्र ' इत्यत्र मकारात्परस्य ' उक ' इत्येदन्तस्य सम्भवेन प्रगृह्यार्थं तु स्यादिति चेन्न, अत्राह भाष्यकारः ' न माद्ग्रहणेन ईदाद्यन्तं विशेष्यते । किं तर्हि ईदादयो विशेष्यन्ते । मात्परे ये ईदादय इति '[792] इति भाष्यविरोधात् ।

द्विवचनन्तु नानुवर्तते ' अमी ईशाः ' इत्यादौ बहुवचनान्ते प्रगृह्यत्वानापत्तेः, सम्भव-व्यभिचाराभ्यां विशेषणस्यार्थवत्त्वेन मकारात्परस्मिन्नूकारे व्यभिचाराभावाच्च ।

ननु स्त्रीलिङ्गे नपुंसकलिङ्गे च ' अमू आसाते ' इत्यत्र " औङ आपः "[793], " नपुंसकाच्च " इति द्वाभ्यां सूत्राभ्यामौकारस्य शीभावे " आद्गुणः "[794] इति सूत्रेण गुणे कृते ' अदे ' इति स्थितौ एकारस्य ऊकारादेशे दस्य मादेशे ' अमू ' इत्येव रूपम्, अत्र उत्वमत्वयोरसिद्धत्वे ' अदे ' इति रूपे जाते " ईदूदेद्

---

[789] भाषावृत्तेः समीक्षात्मकमध्ययनम् – (पृ. – 129)

[790] काशिका – प्रकृतसूत्रवृत्तिः

[791] अष्टाध्यायी – (1-1-67)

[792] महाभाष्यम् – प्रकृतसूत्रे

[793] अष्टाध्यायी – (7-1-18)

[794] अष्टाध्यायी – (6-1-86)

द्विवचनं प्रगृह्यम् " इति सूत्रेणैव प्रगृह्यत्वसिद्ध्या ' ऊद् ' इत्यस्यानुवृत्तिः व्यर्था स्यादिति चेन्न, पुंसि त्यदाद्यत्वादिकार्ये जाते ' अद औ ' इति स्थितौ वृद्ध्यनन्तरं मूत्वे कृते ' अमू ' इति । तत्र मूत्वस्यासिद्धत्वेऽपि ' अदौ ' इति रूपं भवति, न तु अदे इति । एवञ्च " ईदूदेद् द्विवचनं प्रगृह्यम् " इति सूत्रेणास्याप्राप्त्याऽनेन प्रगृह्यत्वम् । " अदसो मात् " इति सूत्रं प्रति मूत्वं नासिद्धम्, सूत्रारम्भसामार्थ्यात् । तथा च वार्त्तिकम् – ' आश्रयात्सिद्धत्वं च यथा रोरुत्वे ' इति । अर्थात् – यथा उत्वे रोः स्थानित्वेन आश्रयणात् तत्र कर्तव्ये रुत्वे नासिद्धम्, एवमत्र प्रगृह्यसञ्ज्ञायां मकारपरेकारोकारयोः सञ्ज्ञित्वेनाश्रयणात् तयोरसिद्धत्वे सूत्रवैयर्थ्यापातात् न ते असिद्धे भवतः । पुंसि ऊकारान्तस्य सम्भवादनुवृत्तिः सफला भवति ।

न चैवमपि आरम्भसामार्थ्यान्मूत्व-मीत्वयोर्यथोद्देशपक्षेऽपि असिद्धत्वाभावेऽपि स्वरसन्धौ तयोरसिद्धत्वात् ' अमी आसते ', ' अमू आसाते ' इत्यादौ अयावेकादेशप्रसङ्गः, ' अमी अत्र ' इत्यत्र " एङः पदान्तादति "[795] इति पूर्वरूपप्रसङ्गश्च, तत्र ' ई – ऊ ' शब्दयोः प्रगृह्यत्वेऽपि तत्स्थानिनोः एकारौकारयोरप्रगृह्यत्वात् प्रकृतिभावाभावात् इति वाच्यम्, एवमपिप्रगृह्यसञ्ज्ञावचनवैयर्थ्यात् तत्सामर्थ्यादेव स्वरसन्धौ अपि " अणोऽप्रगृह्यस्यानुनासिकः " इति कर्तव्ये ययोः प्रगृह्यसञ्ज्ञा जाता तयोरीदूतोः पूर्वत्वेनानुनासिकप्रतिषेधं प्रति सिद्धत्वेन अनुनासिकप्रतिषेधेनार्थवत्त्वात् ।

कार्यकालपक्षे तु अनुनासिकपर्युदासस्थप्रगृह्यदृष्ट्या मूत्वीत्वयोः सिद्धतया सञ्ज्ञायाश्चारितार्थ्यं तदेवमुभयोः पक्षयोः स्वरसन्धिर्दुवार इति चेन्न, प्रगृह्यसञ्ज्ञाया अनुनासिकपर्युदासमात्रस्य प्रयोजनत्वे ' नैकमुदाहरणं योगारम्भं प्रयोजयति ' इति न्यायात् अनुनासिकविधायकशास्त्रोत्तरं ' अदसो न ' इति न्यासेन सिद्धे " अदसो मात् " इति सूत्रं व्यर्थं सत् स्वरसन्धौ अपि तयोरसिद्धत्वाभावज्ञापकं भवति इति न दोषः ।

न च ' अदसो न ' इति न्यासेनानुनासिकप्रतिषेधे ' हे असुक ', ' असुका ' इत्यादावपि अनुनासिकप्रतिषेधापत्तिः, " अदसो मात् " इति सूत्रसत्त्वे तु मात्परत्वाभावान्न दोष इति वाच्यम्, अनुनासिकनिषेधफलं प्रकृत्य यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयात् " अणोऽप्रगृह्यस्यानुनासिकः " ' अदसो न ' इति भाष्येण तादृशानामनभिधानकल्पनात्, ' यथोत्तरं मुनीनां प्रामाण्यम् ' इति न्यायेन तत्रापि प्रतिषेधस्येष्टत्वस्य कल्पयितुं शक्यत्वात्, दस्य सः दसः नास्ति दसो यत्रादश्शब्दे तस्यैवादश्शब्दस्य

[795] अष्टाध्यायी – (6-1-107)

एकशेषेण ‘ अदसो न ’ इति न्यासकल्पनायामेव भाष्यतात्पर्यसत्त्वेनादोषाच्च । यत्रादश्शब्दे दस्य सकारो न तत्रैवादश्शब्दसम्बधिनोऽणोऽनुनासिकत्वं नेत्यर्थः[796] ।

कार्यकालपक्षे तु “ अणोऽप्रगृह्यस्यानुनासिकः ” इत्यत्रोपस्थितेन सूत्रेण सञ्ज्ञायां क्रियमाणायां मुत्वस्य सिद्धत्वाल्लिङ्गत्रयेऽपि द्विवचनेऽनुनासिकपर्युदासः पूर्वेणैव सिद्धः । एतत्सूत्रं तु बहुवचनार्थं पुंसि द्विवचने प्रकृतभावार्थं चेति विवेकः[797] ।

- **शे – (1-1-13)**

एकपदं सूत्रम् । प्रगृह्यमित्यनुवर्तते । छन्दसीत्यनुवृतौ “ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ”[798] इत्यनेन छन्दसि सुपः ‘ शे ’ इत्येकारान्त आदेशः प्रगृह्यः स्यादित्यर्थः । उदाहरणम् – अस्मे इन्द्राबृहस्पती, युष्मे इति, अस्मे इति, त्वे इति, मे इति ।

शे इति लुप्तप्रथमान्तो निर्देशः । यद्वा “ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ” इत्यनेन छन्दसि सुपः शेरादेशो भवति । तस्याभेदानुकरणे शक्त्या लक्षणया वा अर्थवत्त्वाभावेन प्रातिपदिकसञ्ज्ञाया अभावान्न विभक्त्युत्पत्तिः । ‘ अपदं न प्रयुञ्जीत ’ इत्यस्य तु न विषयः, तस्य अपरिनिष्ठितं नोच्चारयेदित्यर्थेनास्य नित्यविध्युद्देश्यताऽवच्छेदकानाक्रान्तत्वरूपपरिनिष्ठितत्वस्य सत्त्वात् । यत्र कस्यापि नित्यसूत्रस्य न प्राप्तिः शास्त्रेण बोधितसाधुत्ववाँश्च स एव परिनिष्ठितः शब्दः । शास्त्रारम्भसामर्थ्यात्साधुशब्देष्वेव शास्त्रप्रवृत्तिः । अन्यथा सर्वत्रैवाभ्रंशे सूत्रप्रवत्त्या व्याकरणानर्थक्यं स्यात् । अनुकरणानाञ्च “ अनुकरणञ्चानितिपरम् ”[799] इत्यादिसूत्रसामर्थ्यात्साधुत्वम्[800] ।

‘ अस्मे इन्द्राबृहस्पती ’ इत्यत्र अस्मच्छब्दाद् भ्यसः “ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्या-याजालः ” इत्यनेन शे आदेशे, “ लशक्वतद्धिते ”[801] इत्यनेन शकार इत्, “ शेषे लोपः ”[802] इति सूत्रेण अदित्यस्य लोपे ‘ अस्मे ’ इति रूपम् ‘ अस्मभ्यम् ’ इत्यर्थः । अत्र ‘ ए ’ इत्यस्य प्रगृह्यत्वात्प्रकृतिभावे अयादेशो न भवति । अद्विवचनत्वादप्राप्तौ वचनम् ।

---

796 वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीकायाम् – प्रकृतसूत्रे

797 व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

798 अष्टाध्यायी – (7-1-39)

799 अष्टाध्यायी – (1-4-62)

800 वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीकायाम् – प्रकृतसूत्रे

801 अष्टाध्यायी – (1-3-8)

802 अष्टाध्यायी – (7-2-90)

ननु ‘ काशे, कुशे, वंशे ’ इत्यादौ “ शे ” इति सूत्रेण प्रगृह्यसञ्ज्ञा कुतो न भवतीति चेन्न, “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ”[803] इति सूत्रे ‘ स्वं शब्दस्य ’ इति न्यासेनैवान्तरङ्गत्वादहेयत्वाद् असाधारणत्वाच्च रूपपरिग्रहे सिद्धे रूपवदर्थस्याप्यङ्गीकरणार्थं रूपग्रहणेन बोधितत्वात्। अत्र च ‘ श ’ शब्दोऽनर्थकः, सप्तम्येकवचनन्त्वनर्थवत्, तयोः समुदायोऽर्थान्तराप्रादुर्भावादनर्थकः । तदुक्तं पतञ्जलिना ‘ शेऽर्थवद्ग्रहणात्। अर्थवतः शे शब्दस्य ग्रहणम्। न चैषोऽर्थवान्निति ’[804]।

न चैवमपि मत्वर्थीय शप्रत्ययान्ते ‘ हरिशे ’,‘ बभ्रुशे ’ इत्यादौ शे शब्दस्यार्थवत्त्वात् प्रगृह्यसञ्ज्ञा प्राप्नेति वाच्यम्, ‘ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ’ इति परिभाषया प्रतिपदोक्तत्वात् शकारेत्सञ्ज्ञकस्यैव ग्रहणात् तद्दोषस्य निरस्तत्वात् । अथवा पुनरस्तु ‘ अर्थवद्ग्रहणे नानार्थकस्य ’ इत्येव। कथं ‘ हरिशे बभ्रुशे ’ इति ? एकोऽत्र विभक्त्यर्थेनार्थवान्, अपरस्तद्धितार्थेन। समुदायोऽनर्थकः । अर्थवत्समुदायस्यापि कस्यचिदानर्थ्यक्यम्, यथा – ‘ दशदाडिमानिषडपूपा ’ इत्यादिवाक्यस्य पदार्थानां परस्परसमन्वयाभावात् । इहापि हरिशब्दवाच्यार्थगतसङ्ख्याधिकरणशक्तिप्रतिपादनाय प्रवृत्ता सप्तमी न शप्रत्ययमात्रप्रतिपाद्येनार्थेनान्वेतीति शशब्दस्यानर्थक्यमिति।

निपात एकाजनाङ् – (1-1-14)

त्रिपदञ्चेदं सूत्रम् । निपतन्त्यनेकेऽर्था यत्रासौ निपातः । बाहुलकादधिकरणे घञ् । निपतत्यर्थेषूच्चावचेषु इति निपातः (निरुक्ते) नानाविधार्थेषु वृत्त्या स्वार्थबोधकतया पतनशील इत्यर्थः । निपातसञ्ज्ञकश्चादिः । एकश्चासौ अच् इति “ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ”[805] इति सूत्रेण कर्मधारयः। एकोऽज्रूपनिपात इत्यर्थः। न आङ् अनाङिति नञ्समासः। निपात इत्यस्य पुंस्त्वात् “ ईदूदेद् द्विवचनं प्रगृह्यम् ” इति सूत्रादनुवृत्तं प्रगृह्यम् इति पदमपि पुँल्लिङ्गतया विपरिणम्यते, सति सम्भवे विशेष्यविशेषणयोः समानलिङ्गकत्वनियमात्। आङि ङकारकरणात् ङिदाकारभिन्नः, निपातसञ्ज्ञको य एकोऽच् स प्रगृह्यसञ्ज्ञको स्यादिति सूत्रस्यायमर्थः फलितो भवति। ‘ अ अपेहि, अ अपक्राम, इ इन्द्रं पश्य, उ उत्तिष्ठ ’ इत्यादीन्युदाहरणानि।

‘ एकाच् ’ इत्यत्र पदे कर्मधारयो वा बहुव्रीहिर्वा इत्यस्ति विचारावसरः। यदा च कर्मधारयस्तदा ‘ एकश्चासौ अच्च एकाच् ’ इत्येवं विग्रहो भवति। बहुव्रीहिसमासस्तर्हि ‘ एकोऽच् यस्मिन् एकाच् ’

---

[803] अष्टाध्यायी – (1-1-68)

[804] महाभाष्यम् – प्रकृतसूत्रे

[805] अष्टाध्यायी – (2-1-49)

इत्येवं विग्रहो भवति। अत्र सम्भाव्यमानयोरनयोर्द्वयोः समासयोः कतरेण भाव्यमिति विषये ये विचाराः सम्पन्नास्तेऽत्र प्रदर्श्यन्ते।

'एकाच्' इत्यत्र कर्मधारय एव न तु 'एकोऽच् यस्मिन्' इति बहुव्रीहिः। कर्मधारयस्वीकारादेव "व्याहरति मृगः"[806], "प्रोपाभ्यां समर्थाभ्याम्"[807] इत्यादिनिर्देशोपपत्तिः। न हि 'वि', 'प्र' इति एकम् अज्रूपम्। बहुव्रीहौ तु एकोऽच् इकारो यस्मिन् विशब्दे, एकोऽच् अकारो यस्मिन् प्रशब्दे चेति स्यादेव विप्रयोः प्रगृह्यसञ्ज्ञा। यदि कर्मधारयः, तर्हि 'अनाङ्' इति पर्युदासवैयर्थ्यञ्च, तथा सति तस्य अनेकाच्त्वात् व्यपदेशिवद्भावेन तस्य अज्रूपस्य एकाच्त्वसाधनेऽपि 'व्याहरति' इत्यादिनिर्देशस्य नोपपत्तिः स्यात्।

ननु 'एकाच्' इत्यत्र कर्मधारये एकग्रहणं व्यर्थम्, अच् इत्यनेनैव एकत्वविवक्षया तदर्थलाभात्, बहुव्रीहिलाभाय तु तदपेक्षितं स्यात्?।

न चैकग्रहणाभावे अजित्यस्य निपातविशेषणतया तदन्तविधौ अजन्तनिपातानां चादीनां प्रगृह्यत्वापत्तिः सम्भाव्येत, तथा सति अज्ग्रहणस्य वैयर्थ्यापत्तेः। न च हलन्तव्यावृत्त्यर्थमज्ग्रहणम्, हलन्तस्य सत्यपि प्रगृह्यत्वे प्रयोजनाभावाद् असत्यपि च दोषाभावात् 'निपातोऽनाङ्' इत्येतावति उक्तेऽपि हलन्तस्य प्रगृह्यत्वाभावात् अजन्तस्यैव प्रगृह्यत्वे प्राप्ते पुनः अज्ग्रहणसामर्थ्याद् अज्रूपस्यैव निपातस्य प्रगृह्यत्वं सिद्धमिति नास्त्येव प्रयोजनमेकग्रहणस्य [808]।

न च हलन्तस्य प्रगृह्यत्वे 'पुरोऽस्ति' इत्यादौ सकारान्तस्य प्रकृतिभावे रोः उत्वाभावः प्रयोजनं स्यादिति चेन्न, प्रगृह्यशास्त्रदृष्ट्या रुत्वस्यासिद्धत्वेन रोः प्रगृह्यत्वाप्राप्तेः। न च सस्यैव प्रगृह्यत्वापत्तिः, अचि परतः सस्य किञ्चित्कार्याप्राप्त्या अज्निमित्तकप्रकृतिभावरूपफलाभावात्। न च सान्तस्य कृता प्रगृह्यसञ्ज्ञा एकदेशविकृतन्यायेन रेफान्तस्य प्रगृह्यसञ्ज्ञाप्रसङ्गः। प्रकृतिभावं प्रत्यपि रुत्वस्य असिद्धत्वात्।

न च अज्ग्रहणसामर्थ्यात् अजन्तस्यैव 'प्र, परा' इत्यादिनिपातस्य प्रगृह्यसञ्ज्ञा स्यात्, न तु अज्रूपस्य 'अ इ उ' इत्यादेरिति विपरीतार्थशङ्कानिवारणाय एकग्रहणं कृतमिति वाच्यम्, "व्यवहृपणोः समर्थयोः"[809], "व्याहरति मृगः" इत्यादिनिर्देशात्, अनाङिति पर्युदासाच्च

---

[806] अष्टाध्यायी – (4-3-51)

[807] अष्टाध्यायी – (1-3-42)

[808] वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिनीटीकायाम् – प्रकृतसूत्रे

[809] अष्टाध्यायी – (2-3-57)

तथाविधविपरीतार्थशङ्काया अप्यप्रवृत्तेः[810] । अजन्तस्य प्रगृह्यत्वे ‘ वि ’ इत्यस्य प्रगृह्यसञ्ज्ञायां प्रकृतिभावप्रसङ्गात् ‘ व्यवहृपणोः ’, ‘ व्याहरति ’ इत्यादिनिर्देशानुपपत्तेः, अज्रूपस्य प्रगृह्याप्रसक्तौ अनाङ् इति प्रतिषेधवैयर्थ्यात् । तदुक्तं भाष्ये – ‘ आचार्यप्रवृत्तिर्ज्ञापयति, इयं च न भवति “ येन विधिस्तदन्तस्य ” इति । यदयम् ‘ अनाङ् ’ इति प्रतिषेधं शास्ति ’[811] । अनेन भाष्येण ‘ निपातः ’ इति विशेषणम्, ‘ अज् ’ इति विशेष्यमिति तदन्तविधेरभाव इति सूचितम् ।

न च ‘ अ इ उ अपेहि ’ इत्यादौ एकाच्द्विर्वचनन्यायेन समुदायस्यैव सञ्ज्ञा स्यात्, न तु पूर्वयोरिति तत्र गुणादिकं स्यात्, अतः समुदायस्यैव प्राप्तसञ्ज्ञायाः प्रत्येकं प्रवृत्त्यर्थम् एकग्रहणमावश्यकमिति वाच्यम्, सञ्ज्ञाविधेयत्वात् प्राधान्यम्, सञ्ज्ञिनस्तु गुणत्वमिति पशुना यजेतेतिवद् ‘ अज् ’ इत्येकवचनेनैकत्वविवक्षयैव समुदायस्य प्रगृह्यत्ववारणसम्भवात्, लाघवात्प्रत्येकस्योद्देश्यत्वसम्भवे समुदायस्योद्देश्यत्वे प्रमाणाभावाच्च समुदायस्य प्रगृह्यत्वाप्राप्तेः ।

यद्यपि समुदायकार्येणावयवानां कार्यनिर्वाह एकाज्द्विर्वचनन्याये बीजम्, न चात्र तथा, समुदायसञ्ज्ञयाऽवयवानां प्रकृतिभावानिर्वाहादिति न तस्यात्र विषयः, तथाऽपि समुदायग्रहणशङ्का-निरासायैव कृतमेकग्रहणं ज्ञापयति – वर्णवृत्तिजातेर्वर्णसमुदाये आरोपाद् ‘ वर्णग्रहणे जातिग्रहणम् ’ इति । एवञ्च अच्समुदायेऽच्त्वारोपात् समुदायस्यैव प्रगृह्यत्वे प्राप्ते तद्वारणार्थमेकग्रहणस्य सत्त्वात् । न च फलाभावः, दम्भधातोः सनि तस्य “ सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ”[812] इति सूत्रेण इड्विकल्पे इडभावे “ दम्भ इच्च ”[813] इति सूत्रेण अकारस्य इत्त्वे “ हलन्ताच्च ”[814] इति सूत्रेण तत्रत्यहल्ग्रहणस्य जातिपरतया सनः कित्त्वे नलोपे अभ्यासलोपे सिद्धेरेव फलसत्त्वात् । अन्यथा ‘ दीम्भ् स ’ इति दशायाम् इक्समीपो हल् मकार न तु ततः परः सन् । भकारेण व्यवधानात् । भशब्दात्तु परः सन्, न तु भशब्द इकः परः । मकारेण व्यवधानात् ‘ इक्समीपाद्धलः परो झलादिः सन् कित्स्यात् ’ इत्यर्थकस्य “ हलन्ताच्च ” इत्यस्य अप्रवृत्तौ सनः कित्त्वाभावे किन्निमित्तकस्य “ अनिदितां हल उपधायाः क्ङिति ”[815] इति सूत्रेण नलोपस्याप्राप्तौ ‘ धीत्सति ’ इत्यादेः सिद्धिरेव न स्यात् । परञ्च ‘ वर्णग्रहणे जातिग्रहणम् ’ इति स्वीकारे तु वर्णत्वव्याप्यहल्त्वजात्यवच्छिन्नस्य ग्रहणेन हल्त्वजात्यवच्छिन्नारब्धसमुदायस्य ‘

---

[810] वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिनीटीकायाम् – प्रकृतसूत्रे

[811] महाभाष्यम् – प्रकृतसूत्रे

[812] अष्टाध्यायी – (7-2-49)

[813] अष्टाध्यायी – (7-4-56)

[814] अष्टाध्यायी – (1-2-10)

[815] अष्टाध्यायी – (6-4-24)

म् भ् ' इति ग्रहणेन दोषाभावात्। " निपात एकाजनाङ् " इति सूत्रे तु एकग्रहणात् न जातिग्रहणम्। अत एव ज्ञापनोत्तरमेकग्रहणस्य चारितार्थ्यम्।

तदुक्तं भाष्ये – ' सिद्धे सति यदज्ग्रहणे क्रियमाणे एकग्रहणं करोति, तज्ज्ञापयत्याचार्यः – ' अन्यत्र वर्णग्रहणे जातिग्रहणं भवति ' इति '[816]। एकग्रहणेऽत्र कृते त्वेकग्रहणसामर्थ्यादेकस्यैवाचो ग्रहणं न तु अच्समुदायस्याच्पदेन ग्रहणम्। तेन तितउघटकस्य ' अ उ ' इत्यानुकरणे ' अ उ अकरोत् ' इत्यत्र " अनुकरणं चानितिपरम् " इति सूत्रेण निपातत्वेऽपि न प्रगृह्यम् एकाज्रूपनिपातस्याभावात्।

अनाङिति पर्युदास एव, न तु प्रसज्यप्रतिषेधः, वाक्यभेदासमर्थसमासशास्त्र – बाधशास्त्रकाराप्रामाण्यग्रहरूपदोषचतुष्टयग्रस्तत्वात् । शास्त्रकारेऽप्रामाण्यग्रहश्च ' वाक्यभेदे वागेका वाग्मिनः सतः ' इति न्यायेन स्पष्ट एव । क्वचिद् भाष्ये प्रतिषेधोक्तिस्तु पर्युदासेऽपि प्रतिषेधस्य फलितत्वाभिप्रायेण।

' अकारः वासुदेवः स्यात् ' इत्यनुसारेण वासुदेववाचकस्याकारस्य आङा सहवासुदेवं मर्यादीकृत्य संसार इत्यर्थे " आङ् मर्यादाभिविध्योः "[817] इति सूत्रेण समासे, समाससमकाले एवान्तरङ्गत्वात् सवर्णदीर्घे " अव्ययीभावश्च "[818] इति सूत्रेण नपुंसकत्वे, " ह्रस्वो नपुंसके प्रातिपदिकस्य "[819] इति सूत्रेण ह्रस्वत्वे, सोरमादेशे ' अ अम् ' इत्यवस्थायां पूर्वान्तवद्भावेनाकारस्य निपातत्वेऽपि आङ्भिन्नत्वस्य स्वतः सिद्धत्वेन प्रगृह्यत्वं तु न, पूर्वान्तवद्भावेन आङ्त्वस्याप्यतिदेशेन अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभावस्य स्वभावसिद्धतया स्वतः सिद्धाङ्भिन्नत्वप्रयुक्त-प्रगृह्यत्वस्याप्राप्तेः। तथा च " अमि पूर्वः "[820] इति सूत्रेण पूर्वरूपे ' अम् ' इति सिध्यति। एवम् इणः क्ते इत इति, वेञः क्ते उत इति, आभ्यां पूर्वोक्तस्य आङेकादेशस्य अशब्दस्य समासे गुणे एत इति, ओत इति च रूपम् । अकारे पूर्वान्तवद्भावेनाङ्त्वातिदेशे प्रगृह्यत्वाभावात्प्रकृतिभावाभावे सिध्यति । अत्राकारस्य समासान्तर्गतविभक्त्या पदत्वात्प्रगृह्यत्वे प्रकृतिभावो दुर्वारः स्यात्। वस्तुतस्तु " अदसो मात् "[821] इति सूत्रे पदान्तप्रकरणे प्रकृतिभावः, इति भाष्यात्पदान्तयोरेव प्लुतप्रगृह्ययोः प्रकृतिभावेनामि परे पूर्वस्य पदत्वाभावेन प्रकृतिभावाप्राप्त्या फलाभावेन प्रगृह्यत्वस्याप्यभावादाङ्त्वातिदेशेन

[816] महाभाष्यम् – प्रकृतसूत्रे

[817] अष्टाध्यायी – (2-1-13)

[818] अष्टाध्यायी – (2-4-18)

[819] अष्टाध्यायी – (1-2-47)

[820] अष्टाध्यायी – (6-1-105)

[821] अष्टाध्यायी – (1-1-12)

प्रगृह्यत्ववारणं शेखरोक्तं चिन्त्यम् । यत्तु परादिवद्भावेनाङ्भिन्नत्वातिदेशे ‘ अतिदिश्यमानधर्मविरुद्ध ’ इत्यस्य विषयाभावेन प्रगृह्यत्वं दुर्वारमिति तन्न, “ ओत् ” इति सूत्रे ‘ प्रतिषिद्धार्थोऽयमारम्भः । ओ आयातं मरुतः ’ इति । अत्र ‘ आ + उ = ओ ’ इत्यस्य पूर्वान्तवत्त्वेनाङ्त्वादनाङिति निषेधे प्राप्ते तद्बाधनार्थम् “ ओत् ” इति सूत्रमित्युक्तम् । अत्र परादिवद्भावेनाङ्भिन्नत्वातिदेशेन प्रगृह्यत्वे ओदित्यस्य बाधनार्थोक्तिरसङ्गता स्यात् “ निपात एकाजनाङ् ” इत्यनेनैव प्रगृह्यत्वसिद्धेरिति प्रसज्यप्रतिषेध एव । उपाध्यायास्तु इदमेकदेश्युक्तिगौरवादित्याहुः । आङा सहाव्ययीभावघटितम् ‘ एतः ’, ‘ ओतः ’ इत्यादि-रूपमप्रमाणन्तु न, ‘ प्रतिषिद्धार्थोऽयमारम्भः ’ इति भाष्यात् [822] ।

अत्राह तत्त्वबोधिनीकारः – यदि तु “ अपृक्त एकाल् प्रत्ययः ”[823] इत्यत्रत्यैकग्रहणमुक्तार्थ-ज्ञापकमित्याश्रित्य प्रकृतसूत्रे एकाज्ग्रहणं त्यक्तुं शक्यम् [824] ।

अत एवाह शब्दकौस्तुभे भट्टोजिदीक्षितः – वस्तुतस्त्वपृक्तसञ्ज्ञायामेकग्रहणमुक्तार्थे ज्ञापकमित्याश्रित्य प्रकृतसूत्रे एकग्रहणस्य परित्याग एव ज्यायान् [825] ।

अत्र वदन्ति – ‘ अनाङ् ’ इत्यस्य पर्युदासत्वं न युक्तम् । तथा हि – अशब्दो वासुदेवार्थकः । “ आङ् मर्यादाभिविध्योः ” इत्यव्ययीभावः । आ + आत् = अम् “ ह्रस्वो नपुंसके प्रातिपदिकस्य ” इति ह्रस्वः । अशब्दस्य स्वाभाविकमाङ्भिन्नत्वं स्थानिवद्भावकृतं निपातत्वं चाश्रित्य ‘ अ इतः एत ’ इत्यत्र प्रगृह्यसञ्ज्ञाप्रसङ्गात् । ‘ आसमुद्रक्षितीशानाम् ’ इतिवत् समासः । न च आङ्भावातिदेशे आङ्भिन्नत्वव्यपदेशनिवृत्तिः । गुरुवद् गुरुपुत्रे वर्तितव्यमित्यत्रगुरुत्वस्येव आङ्वद्भावेन आङ्त्वस्य अनतिदेशात् । अतिदेशे वा आङयमकारः इत्याहार्यबुद्धेराङ्भिन्नोऽयमिति बुद्धावविरोधात् । अतिदेशानां च स्वाश्रयानिवर्तकत्वात् । ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमित्यत्र क्षत्रियत्वव्यपदेश-निवृत्त्यभावात् ।

अस्तु वा एकादेशेऽपि स्थानिवद्भावेनैव परावर्णगतस्याङ्भिन्नत्वस्याश्रयणम् । कैयटादावपि परादिवद्भावेनैकादेशस्याङ्भिन्नत्वाश्रयणात् । तस्मात्प्रसज्यप्रतिषेध एव युक्तः । वाक्यभेदासमर्थ-समासाश्रयणस्य कार्यानुरोधेनादोषत्वात्, ‘ अनचि ’‘ अशिति ’ इत्यादिवत् । अत एवोत्तरसूत्रे प्रतिषिद्धार्थोऽयमारम्भ इति भाष्यं सङ्गच्छते इति ।

---

[822] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीकायाम् – प्रकृतसूत्रे

[823] अष्टाध्यायी – (1-2-41)

[824] वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिन्यां प्रकृतसूत्रे

[825] शब्दकौस्तुभः – प्रकृतसूत्रे

इदं त्ववधेयम् – पर्युदासपक्षे नञिवयुक्तन्यायबलादेव निपातलाभसम्भवेऽपि निपातपदोपादानं स्वयमेव यो निपातस्तस्यैव प्रगृह्यत्वम्, न तु स्थानिवद्भावप्रयुक्तनिपातत्वकस्येत्येतदर्थकम् । तेन नोक्तदोषः । अतिदेशेनैव तत्र निपातत्वस्यानीयमानत्वात् । निपातग्रहणस्य चोत्तरार्थत्वेऽपि ' इह किञ्चित्त्रपो इति ' इति न्यायेनात्रोपादानस्यापि प्रयोजनसम्भवे सति त्यागायोगात् । एवम् एकग्रहणस्याप्यत्र पूर्वोक्तरीत्या प्रयोजनाभावान्मुख्यार्थकमेवैकपदं व्याख्यायताम् । ' एके मुख्यान्यकेवलाः ' इत्यमरोक्तेः । तच्चोपदेशिकत्वरूपमत्र ग्राह्यम् । तेन मुख्यत्वस्य समानाधिकरण्येन निपातत्वलाभादातिदेशिकनिपातत्वमाश्रित्य नोक्तदोषः । न चैवं ' वर्णग्रहणे जातिग्रहणम् ' इत्यत्र ज्ञापकानुपपत्तिः । अपृक्तसञ्ज्ञासूत्रे एकग्रहणस्यापि भाष्य एव तज्ज्ञापकत्वोक्तेः । एतेन तत एव सिद्धावत्रत्यमेकग्रहणं व्यर्थमित्यपि शङ्काऽन्तरं परास्तम् । विनिगमकाभावाच्च । वक्ष्यति तत्र तथैव कैयटः[826] ।

निपातग्रहणाभावे एकस्य अचो णलोऽकारस्य प्रगृह्यत्वमनेन स्यात् । तथा च चकार अत्र इति प्रयोगे चकारघटकस्य तिपो णलादेशेन निष्पन्नाकारस्य प्रगृह्यत्वे " अकः सवर्णे दीर्घः "[827] इति सूत्रेण दीर्घो न स्यात् ।

न च अर्थवद्ग्रहणपरिभाषाया वर्णग्रहणेऽपि प्रवृत्त्या अर्थवत एव एकस्याचो ग्रहणेनात्र प्रगृह्यसञ्ज्ञाया न स्यादिति चेन्न, अर्थवद्ग्रहणपरिभाषायां शास्त्रीयोऽपि अन्वयव्यतिरेकाभ्यां कल्पितोऽर्थो गृह्यते । यस्य सत्त्वे योऽर्थः प्रतीयते सोऽन्वयः, यस्याभावे योऽर्थो न प्रतीयते स व्यतिरेक इति । णलोऽकारस्य शास्त्रीयार्थस्य सद्भावात् नानर्थकत्वं णलकारस्य । अत एवोक्तं शेखरे – ' प्रत्ययस्य शास्त्रकल्पितार्थवत्त्वात् '[828] इति ।

आ इति निपातो द्विविधः – ङकारेत्सञ्ज्ञकः, तद्भिन्नश्च । तत्र ङिदाकारभिन्न एकाज्निपातः प्रगृह्यसञ्ज्ञक इत्युक्तेर्ङिदाकारो न प्रगृह्यसञ्ज्ञकस्तेन तत्र न प्रकृतिभावः ।

न च कथं ज्ञास्यते कुत्र आ इति सानुबन्धको निपातः, यः प्रगृह्यसञ्ज्ञको न भविष्यति, कश्च निरनुबन्धको यः प्रगृह्यसञ्ज्ञको भविष्यति ? आङिति उपदेशावस्थायामेव ङकारस्येत्सञ्ज्ञालोपयोः सवर्त्रायं लुप्तङकार एव श्रूयते अविशेषेण ' आ ' इत्यस्योपलम्भात्प्रयोगे ङिदङिद्विवेको दुर्लभोऽत आह वार्त्तिककारः –

---

[826] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

[827] अष्टाध्यायी – (6-1-99)

[828] लघुशब्देन्दुशेखरे – प्रकृतसूत्रे

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित् ।।

अङिदाकारस्य बहुत्वाल्लाघवात् ङितमाकारं परिगणयति ईषदर्थ इति – अल्पार्थ इत्यर्थः। यथा – ईषदुष्णम् = आ + उष्णम् = ओष्णम्। क्रियायोग इति – धात्वर्थक्रियागतविशेषार्थद्योतक उपसर्ग-सञ्ज्ञक इति यावत्। यथा - आ एति ऐति आगच्छतीत्यर्थः। मर्यदेति – म्रियतेऽवशिष्यते ग्रामादिकं यत्र सा मर्या = सीमा। सा दीयते = खण्ड्यते यत्र सा मर्यादा। मर्यादा द्विविधा कालरूपा दाशरूपा च। तत्राद्या कालरूपा यथा – ' आमुक्तेः संसारः ' इत्यादावाङोऽर्थः। अत्र मुक्तिपदं तत्कालपरम्। मर्यादामर्यादिभावसम्बन्ध आङ्द्योत्यः पञ्चम्यर्थः। एवं च मुक्तिमर्यादाकः संसारः इति बोधः। द्वितीया देशरूपा यथा – ' प्रयागात्प्रभृत्या काश्या वृष्टो देवः ' इत्यादौ देशे मर्यादा। अत्र प्रयागादिकाशीमर्यादक-वृष्टिकर्ता देवः इति बोधः। अभिविधिरिति – कार्यान्वयित्वेनाभिसन्धाय विधीयते इत्यभिविधिः। अभिविधिर्द्विविधः कालिकः दैशिकश्च। तत्राद्यो यथा – ' आ अध्ययनाद् गुरुशुश्रूषा ' गुरुशुश्रूषारूप-कार्येणाध्ययनकालस्याभिव्याप्त्या सम्बन्धेनाध्ययनकालोऽभिविधिरिति बोधः। द्वितीयो यथा – ' काशीतः पाटलिपुत्रं यावद्वृष्टो देवः ' इत्यादौ। अत्र काशीप्रभृतिपाटलिपुत्रान्तदेशव्यापकत्वं वृष्टौ प्रतीयते[829]। कैयटेऽपि विना तेन मर्यादा। सह तेनाभिविधिरिति।

ईषदाद्यर्थेषु ङितो विद्यमानत्वे प्रमाणानि च – ' आङ् ईषदर्थे ' इति वार्तिकम्, प्रादौ पठित आङ् – यः क्रियायोगे उपसर्गसञ्ज्ञो भवति, " आङ् मर्यादाभिविध्योः " इति सूत्रञ्च।

एषु ईषदाद्यर्थेषु विद्यमान आ निपातो ङित्, ङित्वान्न भवति प्रगृह्यसञ्ज्ञः। वाक्ये स्मरणे च य आकारः, सोऽङित्, स च भवति प्रगृह्यसञ्ज्ञ इति तयोरुक्ते उदाहरणे। आ एवं नु मन्यसे इति। अत्र ङिद्भिन्न आकार इति प्रगृह्यत्वेन प्रकृतिभावाद् वृद्धिर्न। अत्र वाक्यपूर्तिमात्रप्रयोजन आकारः, केषाञ्चिद् व्याख्यातॄणां मतेन वाक्यशब्दस्य पूर्वप्रक्रान्तवाक्यार्थस्य अन्यथात्वपरतया आ एवं नु मन्यसे इति वाक्यस्य नैवं पूर्वममंस्थाः, इदानीं तु मन्यसे इत्यर्थो भवति [830]। आ एवं किल तत् इति। यत्त्वया विस्मृतं तदेव किल इति स्मर्यते इत्यर्थः। अत्र स्मरणद्योतक आकारः।

---

[829] न्यायकोशः (महामहोपाध्याय – भीमाचार्येण विरचितः)

[830] भाषावृत्तेः समीक्षात्मकमध्ययनम् – (पृ. – 134)

अत्र च वाक्यस्मरणयोरङित्त्वे एव तात्पर्यम् । अतो वाक्यस्मरणाभ्यामन्यत्रेषदर्थाद्यभावेऽपि ङित्त्वं बोध्यम् । तेन ' अभ्र आँ अप ' इत्यत्र सप्तम्यर्थवृत्तेरप्याकारस्य ङित्त्वेन " आङोऽनुनासिकश्छन्दसि "[831] इति सूत्रेणानुनासिको भवति [832] ।

- **भट्टोजिदीक्षितानामभिप्रायः**

भट्टोजिदीक्षितैः " निपात एकाजनाङ् " इति सूत्रस्य ' एकोऽज् निपातः ' आङ्वर्जः प्रगृह्यः स्यादिति सूत्रार्थः क्रियते ।

मनोरमायामत्र सूत्रे निपातग्रहणस्य प्रयोजनं भट्टोजिदीक्षितैः विचार्यते तद्रीत्या ' अनाङ् इति पर्युदासादेव अज्रूपनिपाते लब्धे निपातग्रहणमुत्तरार्थं स्पष्टार्थमिहैव कृतम् '[833] ।

अयं भावः – ' अनाङ् ' इति शब्दे पर्युदासेन आङ्भिन्नः आङ्सदृशः इत्यर्थलाभात् तेनैव निपातरूपेऽर्थे लब्धेऽत्र सूत्रे निपातग्रहणस्य न किमपि प्रयोजनम् । किन्तु " ओत् " इत्युत्तरसूत्रे तस्यावश्यकत्वात् सूत्रकृता स्पष्टार्थमत्रैव सूत्रे निपातग्रहणं कृतमिति ।

एवञ्च भट्टोजिदीक्षितरीत्या निपातपदमत्र सूत्रेऽनावश्यकम् । किन्तु उत्तरसूत्रे एव तस्य प्रयोजनमिति तेषामाशयः लभ्यते ।

एवमेव शब्दकौस्तुभे भट्टोजिदीक्षितैः ' एकाच् ' इति पदे कर्मधारयः स्वीक्रियते । तत्र च तद्रीत्या वर्तिपदार्थप्राधान्येन अन्तरङ्गत्वम् । " व्याहरति मृगः " इत्यादि निर्देशश्चात्र प्रमाणम्[834] ।

अत्र शब्दकौस्तुभे यद्ययं कर्मधारयः तर्हि एकग्रहणं व्यर्थमिति विचारः प्रस्तूयते । अन्ते ' तस्माद्वा निपातस्य विशेषणे अज्ग्रहणं व्यर्थमेव स्यादिति सुष्ठूक्तम् '[835] इति अज्ग्रहणस्य वैयर्थ्यं प्रदर्श्यते । किञ्च पुनः ' तस्मादचो विशेषणत्वेन आङ्ग्रहणाज्ज्ञापकात् तदन्तविधिर्न, अचो विशेष्यत्वे तु सुतरां तदन्तविधिरिति उभयथापि एकग्रहणं व्यर्थमेवेति स्थितम् '[836] इति स्वमतं प्रस्तूयते ।

यद्यपि भाष्यकृता एकग्रहणस्य ' वर्णग्रहणेषु व्यक्तिसङ्ख्या न विवक्ष्यते किन्तु जातिरेव निर्दिश्यते '[837] इति ज्ञापनं प्रयोजनमुक्तम् । तथापि तद्विषये भट्टोजिदीक्षितैः स्वमतमित्थं प्रतिपाद्यते । '

---

[831] अष्टाध्यायी – (6-1-124)

[832] शब्दकौस्तुभः – प्रकृतसूत्रे

[833] प्रौढमनोरमा – प्रकृतसूत्रे – पृ. 251

[834] एकाजिति कर्मधारयः वर्तिपदार्थप्राधान्येनान्तरङ्गत्वात् ' व्याहरति मृगः ' इत्यादिनिर्देशाच्च । (शब्दकौस्तुभः भागः – 1 – पृ. 130)

[835] स्यादेतत्, यद्यम्....... सुष्टूक्तम् । (शब्दकौस्तुभः भागः – 1 – पृ. 130)

[836] शब्दकौस्तुभः भागः – 1 – पृ. 130

[837] शब्दकौस्तुभः भागः – 1 – (पृ. – 131)

वस्तुतस्तु अपृक्तं सञ्ज्ञायामेकग्रहणं उक्तार्थे ज्ञापकमित्याश्रित्य प्रकृतसूत्रे एकग्रहणस्य परित्याग एव ज्यायान् ’[838] इति ।

एवञ्च भट्टोजिदीक्षितैः अत्र सूत्रे एकग्रहणं व्यर्थमिति स्वमतं प्रतिपाद्यते इति बोध्यम् ।

- **नागेशभट्टानामभिप्रायः**

नागेशभट्टैः निपातग्रहणमुत्तरार्थमिति भट्टोजिदीक्षितमतं नाङ्गीक्रियते । तद्रीत्या ‘ अनाङिति पर्युदासादेव निपात एकाज्रूपत्वे लब्धे निपात एकाज्ग्रहणं स्पष्टार्थम् ’[839] । नागेशभट्टैः ‘ अनाङ् ’ इत्यत्र पर्युदास एव स्वीक्रियते औचित्यात् । यदि प्रतिषेधः इष्टः स्यात् तर्हि ‘ एकाज् नाङ् ’ इति सूत्रितं स्यात्[840] ।

प्रतिषिद्धार्थोऽयमारम्भः इति भाष्यमपि तद्रीत्या पर्युदासेऽपि प्रतिषेधस्य गम्यत्वात् न अनुपपन्नम्[841] । तस्मात् ‘ अनाङ् ’ इति पर्युदासादेव निपात एकाज्रूपत्वे लब्धे निपातग्रहणं स्पष्टार्थमिति नागेशभट्टानां सिद्धान्तः ।

भट्टोजिदीक्षितैः स्वीकृतं एकग्रहणस्य वैयर्थ्यमपि नागेशभट्टैः नाङ्गीक्रियते । किन्तु अन्यत्र वर्णग्रहणे जातिग्रहणार्थमेकग्रहणस्य भाष्योक्तं ज्ञापकत्वं नागेशभट्टैः स्वीक्रियते ।

किञ्च तद्रीत्या तितउशब्दे एकदेशस्य ‘ अ उ ’ इत्यस्यानुकरणे ‘ अ उ अकरोत् ’ इत्यत्र “ अनुकरणं चानितिपरम् ” इति निपातत्वेऽपि प्रगृह्यत्वाभावः एकग्रहणस्य फलम्[842] ।

तस्मात् अपृक्तं सञ्ज्ञायामेकग्रहणस्य भाष्योक्तार्थज्ञापकत्वं स्वीकृत्यात्र एकग्रहणं व्यर्थमिति भट्टोजिदीक्षितमतं तद्रीत्या नोचितम्, पूर्वोक्तस्य एकग्रहणफलस्यात्रापि सत्त्वादिति बोध्यम् ।

एवञ्च निपातग्रहणस्य उत्तरार्थत्वविषये, एकग्रहणस्य वैयर्थ्यविषये च भट्टोजिदीक्षित-नागेशभट्टयोः मतभेदोऽत्र सूत्रे स्पष्टः इति बोध्यम्[843] ।

- **ओत् – (1-1-15)**

---

[838] शब्दकौस्तुभः भागः – 1 – (पृ. – 131)

[839] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

[840] आङ्वर्ज इति । पर्युदासस्य औचित्यात् । अत एव एकाज् नाङ् इति नासूत्रि । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

[841] ओदिति सूत्रे आ उ ओ इत्यत्र अनाङिति प्रतिषिद्धार्थोऽयमारम्भः इति भाष्यं तु पर्युदासेऽपि गम्यस्य प्रतिषेधस्य सत्त्वान्नानुपपन्नम् । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

[842] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

[843] पाणिनिसञ्ज्ञासूत्रविमर्शः – (पृ. – 81)

“ निपात एकाजनाङ् ” इति पूर्वसूत्राद् अनुवर्तमानं निपात इति विशेष्यम् ओदिति विशेषणम्। “ येन विधिस्तदन्तस्य ” इति सूत्रेण “ ओत् ” इति विशेषणेन तदन्तविधौ, पुंवृत्तिनिपातपदानुरोधात् अनुवृत्तस्य ‘ प्रगृह्यम् ’ इति पदं पुँल्लिङ्गतया विपरिणम्यते। ओदन्तो निपातः प्रगृह्यसञ्ज्ञको भवति इति सूत्रार्थो निष्पद्यते । ‘आहो इति, उताहो इति, नो इदानीम्, अथो इति, अहो अधुना ’ – इत्यादीन्युदाहरणानि।

न च ‘ आ उ ’ इत्यनयोरेकादेशे ‘ ओ ’ इत्यत्रान्तवद्भावेन आङ्ग्रहणेन तद्ग्रहणेन ‘ अनाङ् ’ इति प्रतिषेधः स्यादतस्तन्निरासायेदम्। अन्यथा ‘ ओषु यातं मरुतः ’, ‘ ओषु यातं बृहती शक्वरी च ’ इत्यादौ प्रगृह्यसञ्ज्ञाऽनापत्तेः।

न चाच्परत्वाभावात्तत्सत्त्वेऽपि न विशेष इति वाच्यम्। कस्याञ्चिच्छाखायाम् ‘ ओ अयातम् ’ इति पाठे निशेषसम्भवात्।

‘ अथवा प्रतिषिद्धार्थोऽयमारम्भः ’[844] इति भाष्यस्यैव च तत्र प्रमाणत्वात्। न च नैतद्भाष्यकृतो विवक्षितम्, ‘ अदोऽभवद् ’ इत्यादावतिप्रसङ्गस्याग्रे शङ्कितत्वात्, प्रतिषेधार्थत्वे तत्र प्रसक्तेरेव अभावादिति वाच्यम् । उभयार्थत्वेऽप्यविरोधात् । विध्यर्थत्वात्परत्वाद् ‘ अनाङ् ’ इति प्रतिषेध-बाधकत्वस्य च सम्भवादिति समाहितत्वात्[845]।

अत एव आङा सह उ इत्यस्य द्वन्द्वस्तत एकादेशे ‘ ओ ’ तदा पूर्वान्तवत्त्वेनाङ्भिन्नत्वाभावेन “ निपात एकाजनाङ् ” इति सूत्रेण प्रगृह्यत्वाप्राप्त्या तत्र प्रगृह्यसञ्ज्ञाविधानार्थम् “ ओत् ” इति सूत्रं महाभाष्ये प्रतिपादितम्।

न च शास्त्रीयकार्याभावान्नाङ्त्वातिदेशः, ‘ प्रतिषिद्धार्थोऽयमारम्भः ’ इति भाष्याद् गम्यमानस्यापि पर्युदासलभ्य प्रतिषेधस्य शास्त्रीयकार्यत्वाभ्युपगमात् । न च परादिवत्त्वेन आङ्भिन्नत्वातिदेशेन प्रगृह्यत्वसिद्धिः, शास्त्रीयधर्मस्यैव प्रत्यासत्त्या अतिदेशेन आङ्भिन्नत्वाशास्त्रीयत्वात्।

ननु ‘ आह उ ’,‘ उत आह उ ’ इत्येवमोदन्तो निपातसमाहारा इमे मन्येरन्, तदा अञित्त्वात् “ उञः ” इत्युत्तरसूत्रेण असिद्धावपि परादिवद्भावाद् “ निपात एकाजनाङ् ” इत्यनेनैव प्रगृह्यं सिध्यतीति चादिषु पाठदर्शनादेकनिपातत्वेन पूर्वेणासिद्धेः। तदुक्तं भाष्ये – ‘ एवं तर्हि एकनिपाता इमे ’[846]।

---

[844] महाभाष्यम् – प्रकृतसूत्रे

[845] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

[846] महाभाष्यम् – प्रकृतसूत्रे

निपातसमाहारपक्षे यदि उञः प्रवेशस्तदा “ उञः ऊँ ” इत्यस्यैव प्रवृत्तिः, परत्वात्। निरनुबन्धक उ इत्यस्य तदा “ निपात एकाजनाङ् ” इत्यस्य विषयः।

अखण्डा एव, न तु निपातसमुदायाः। अतोऽपूर्वविधिरेवायम्। अत एव ‘ ओषु यातं मरुतः ’ इत्यादौ पदपाठकाले ऐकपद्येनैव पाठः । एवम् ‘आम् आहो देवदत्त ’ इत्यत्र “ आम एकान्तरमामन्त्रितमनन्तिके ”[847] इति निघातप्रतिषेधेऽपि[848]।

ननु अदश्शब्दात् “ ऊर्यादिच्विडाचश्च ”[849] इति गतिसञ्ज्ञायां “ कुगतिप्रादयः ”[850] इति समासे ‘ अनदः अदः अभवत् अदोऽभवत् ’ इत्यत्र च्व्यन्ते ओदन्तनिपातेऽतिप्रसङ्गः। न च लक्षणप्रतिपदोक्त-परिभाषया निर्वाहः। वर्णग्रहणेषु तदप्रवृत्तेः। अन्यथा ‘ हरये ’ इत्यादौ “ एचोऽयवायावः ”[851] इत्यस्य अप्रवृत्त्यापत्तेः। ‘ चक्रे इदम् ’ इत्यादौ चारितार्थ्यात्। तत्रारोपित-धर्मवद्बोधकतया ‘ गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ’ इति भाष्योक्तन्यायेन गौणार्थबोधके निपाते तदप्रवृत्तेः।

न च गौणमुख्यन्यायस्य स्ववृत्त्यानुपूर्वीरूपेण साक्षात् बोधके एव प्रवृत्त्याऽत्र निपातपदस्य तथात्वाभावेनाप्रवृत्तिः, निपातपदेऽपि भाष्यप्रवर्तितगौणमुख्यन्यायानुरोधेन स्ववृत्तिस्वबोध्य-वृत्त्यन्यतरानुपूर्वीरूपेण साक्षादुपस्थापके पदे प्रवृत्तिस्वीकारेण निपातपदस्य स्वबोध्यचादिवृत्त्यानुपूर्व्याः साक्षादुपस्थापकतया न्यायप्रवृत्तौ बाधकाभावात्।

च्व्यन्तांशे तु न विशिष्टरूपोपादानमित्यर्थवत्परिभाषागौणमुख्यन्याययोर्न प्रवृत्तिः। न च च्व्यन्ते “ ओत् ” इत्यस्य प्रवृत्त्या भाष्यविरोधः, अर्थवत्परिभाषया गौणमुख्यन्यायेन च निपातपदेन मुख्यार्थानामेव ग्रहणेन च्व्यन्तानां गौणार्थबोधकत्वेनाग्रहणात्। न च ऋषिशापादिना यत्रागौः गौरभवत् तत्र ‘ गोऽभवत् ’ इत्यत्रानारोपितगोत्वस्य च्व्यन्तेनापि बोधान् मुख्यार्थकत्वं तत्रापि सम्भवतीति वाच्यम्, “ कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः ”[852] इत्यत्र सम्पद्यकर्तरीत्यत्र षष्ठीतत्पुरुषः सम्पद्यः सम्पत्तिः, निपातनाद्भावे शः, अन्यथाभवनं तदर्थः, विकार इति यावत्। स चारोपितोऽत्र विवक्षितः। यो वस्तुतो येन रूपेणाभूतस्तस्यायथार्थेन तेन रूपेण भवनमभूततद्भावः। न तु वस्तुतस्तेन रूपेण भवनम्।

---

847 अष्टाध्यायी – (8-1-55)

848 व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

849 अष्टाध्यायी – (1-4-61)

850 अष्टाध्यायी – (2-2-18)

851 अष्टाध्यायी – (6-1-77)

852 अष्टाध्यायी – (5-4-50)

तथा सति सम्पद्य कर्तरीति सौत्रेणैव लाभेऽभूततद्भाव इत्यस्य वैयर्थ्यापत्त्या अयथार्थरूपेण भवने विवक्षिते च्विविधानेन शापादिना गोभवने च्विप्रत्ययाभावात्।

इदमत्र रहस्यं बोध्यम् – ' च्व्यन्ता निपाताः ' इत्यनेन च्विप्रत्ययान्तस्यापि ' गोऽभवत् ' इत्यादावनेन प्रगृह्यसञ्ज्ञा स्यादिति चेन्न, चादीनां निपातसञ्ज्ञा सति सम्भवे अर्थवतामेव भवतीति निपातपदेन उपस्थितानां तत्तदर्थविशिष्टानां चादीनां बोधे ' गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ' इति न्यायेन मुख्यार्थस्य ग्रहणात् च्व्यन्ते गौणार्थकेऽस्य सूत्रस्य न प्रवृत्तिरिति ' गोऽभवत् ' इत्यादौ न प्रगृह्यसञ्ज्ञा। अन्यत्र निपातग्रहणेन गौणस्यापि ग्रहणमिष्यते। अत एव ' ओतः च्व्यन्तस्य प्रतिषेधः ' इति वार्त्तिके " ओत् " इत्यस्यैव प्रतिषेध आरब्धो नान्यस्य (ओत् इत्यस्मिन्नेव सूत्रे निपातपदेन गौणार्थानां न प्रगृह्यम्, अन्यत्र तु ग्रहणं भवत्येवेति भावः) यद्यपि निपातपदेन चादीनामर्थवतामेवोपस्थितिरिति गौणमुख्यन्यायः चाद्यंशे उपतिष्ठताम्, च्व्यन्तांशे तु न विशिष्टरूपोपादानम्, अतोऽर्थवद्ग्रहणपरिभाषाया नोपस्थितिः, तदनुपस्थितौ गौणमुख्यन्यायस्याऽप्यप्रवृत्तिः स्यात्। तथापि भाष्यानुरोधात् तथा व्याख्यमतम्। वस्तुतः ' ओतः च्विप्रतिषेधः, ओदन्तो निपात इत्यत्र च्व्यन्तस्य प्रतिषेधो वक्तव्यः '[853] इति वार्त्तिकारम्भादेव प्रगृह्यसञ्ज्ञा गोऽभवत् इत्यादौ वारणीया।

न चैवं " गोतो णित् "[854], " औतोऽम्शसोः "[855] इत्यादावपि गौणमुख्यन्यायप्रवृत्त्या गौणार्थकगोशब्दस्य ' गौः, गाः ' इत्यादीनि रूपाणि न स्युरिति चेदत्र कैयटहरदत्तादयः – पदकार्येष्वयं न्यायो न प्रातिपदिककार्येषु इति।

स्वार्थे वृत्तात् प्रातिपदिकाद्विभक्तावुत्पन्नायां कार्येषु कृतेषु शब्दान्तरसन्निधानाद् गौणत्वं प्रतीयते [856]। गोऽभवदित्यत्र तु गौणत्वं विना च्विप्रत्यय एव दुर्लभ इति वैषम्यम्, गां वाहिकमानयेति पूर्वं क्रियासम्बन्धापेक्षया विभक्तावुत्पन्नायां पश्चात्सामानाधिकरण्यात् गौणार्थप्रादुर्भावो भवतीति [857]। तदेतदुक्तं भाष्यकृद्भिः – ' यत्तु शब्दाश्रयं तच्छब्दमात्रे भवति, शब्दाश्रये च वृद्ध्यात्वे '[858] इति

[853] महाभाष्यम् – प्रकृतसूत्रे

[854] अष्टाध्यायी – (7-1-90)

[855] अष्टाध्यायी – (6-1-92)

[856] महाभाष्यम् – प्रदीपः – प्रकृतसूत्रे

[857] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

[858] महाभाष्यम् – प्रकृतसूत्रे

अयम्भावः – पदस्य पदान्तरेण अन्वयानन्तरमेव गौणार्थकत्वज्ञानसम्भवात्, पदनिष्पत्ते पूर्वं तज्ज्ञानासम्भवात् पदकार्ये एवेयं परिभाषा प्रवर्तते, न तु प्रातिपदिककार्ये इत्यदोषात्। " गोतो णित् ", " औतोऽम्शसोः " इत्यादीनि हि सुप्प्रत्ययनिमित्तकानि कार्याणि प्रातिपदिकसम्बन्धीनि, न पदकार्याणि, इति तत्र कर्तव्ये नेयं परिभाषा प्रवर्तितुमर्हतीति[859]

- **सम्बुद्धौ शाकल्यस्येतावनार्षे – (1-1-16)**

" ओत् " इति सूत्रमत्रानुवर्तेते। ' सम्बुद्धौ ' इति ' ओत् ' इत्यस्य विशेषणम्, तत्र सप्तमी च निमित्तार्थिका। प्रगृह्यमित्यनुवर्तते, पुँल्लिङ्गतया च विपरिणम्यते। ऋषिर्वेदः, ' तदुक्तमृषिणा ' इत्यादौ तथा दर्शनात्। ऋषौ भव आर्षः, न आर्षोऽनार्षः = अवैदिकः। एतच्च ' इतौ ' इत्यस्य विशेषणम्। शाकल्यस्येति विकल्पार्थम्। सम्बुद्धिनिमित्तको य ओकारः, तस्य प्रगृह्यसञ्ज्ञा भवति, शाकल्यस्याचार्यस्य मतेन, अनार्षे (लौकिके) इतौ परतः इति सूत्रार्थः सम्पन्नो भवति। शाकल्यस्याचार्यस्य मतेन प्रगृह्यसञ्ज्ञा भविष्यति, अन्येषामाचार्याणां मतेन न भविष्यति। तेन शाकल्यस्य ग्रहणेन विकल्पोऽपि सिध्यति। सामान्यर्षिः सामान्यर्षिमतं जानाति, विशेषर्षिस्सामान्यर्षिमतं जानाति, सामान्यर्षिर्विशेषर्षिमतं जानाति, विशेषर्षिर्विशेषर्षिमतं न जानाति, तथा च सामान्यर्षिस्मृतस्य प्रगृह्यत्वाभावस्य शाकल्यमते सत्त्वात्तस्मिन् पक्षेऽवादेशे वलोपः सिद्ध्यतीति बोद्ध्यम्[860]। (शाकल्यमते) वायो इति, (अन्येषां मते) वायविति। भानो इति, भानविति। अध्वर्यो इति, अध्वर्यविति इत्याद्युदाहरणानि।

निमित्तसप्तमीग्रहणप्रयोजनम् – ननु " तस्मिन्निति निर्दिष्टे पूर्वस्य "[861] इति परिभाषाबलात् ' सम्बुद्धिपरे ' इति व्याख्यानमुचितं स्यादिति चेन्न, सम्बुद्धौ परत इति व्याख्याने तु नपुंसके ' त्रपो इति ' इत्यत्र सम्बोधनस्य लुका लुप्ततया प्रत्ययलक्षणाभावेन सम्बुद्धिपरत्वाभावात् प्रगृह्यसञ्ज्ञा न स्यादतः सम्बुद्धिनिमित्तक ओकार इति व्याख्यातम्।

---

[859] परिभाषावृत्तेः समीक्षात्मकमध्ययनम् – (पृ. – 135)

[860] वैयाकरणसिद्धान्तकौमुदी – भावबोधिनीटीकायाम् – (पृ. – 32)

[861] अष्टाध्यायी – (1-1-66)

ननु ‘ हे त्रपो ’ इत्यत्र लुका लुप्तः सु, तथापि भवति प्रत्ययलक्षणम्, “ न लुमताङ्गस्य ”[862] इति निषेधस्यानित्यत्वस्य भाष्ये ज्ञापितत्वात् [863] । ज्ञापकं च तत्र “ इकोऽचि विभक्तौ ”[864] इति सूत्रे अज्ग्रहणाभावे ‘ वारिभ्याम् ’ इत्यादौ हलादौ विभक्तावपि नुम् स्यात् । सत्यपि नुमि “ नलोपः प्रातिपदिकान्तस्य ”[865] इति सूत्रेण नकारस्य लोपेन दोषाभावात् । न च सम्बुद्धौ नुमि सति “ न ङिसम्बुद्ध्योः ”[866] इति सूत्रेण नलोपस्य निषेधाद् नकारस्य श्रवणापत्तिरिति वाच्यम्, सम्बुद्धेर्लुका लुप्तत्वात् प्रत्ययलक्षणाभावादेव तत्र नुमप्रवृत्तेः । एवञ्च अज्ग्रहणस्य तत्र पाठो व्यर्थः सन् “ न लुमताङ्गस्य ” इत्यस्यानित्यत्वं ज्ञापयति । तस्यानित्यत्वे ज्ञापिते तु प्रत्ययलक्षणेन सम्बुद्धौ नुमि तच्छ्रवणप्रसङ्गदोषवारणाय अचि इति सार्थकम् [867] । तथा च न लुमतेति निषेधस्यानित्यत्वेनाप्रवृत्तौ प्रत्ययलक्षणेन सम्बुद्धिपरत्वस्य ‘ त्रपो ’ इत्यत्रापि सौलभ्येन तथा किं न व्याख्यातम् । अगतिकस्येयं निषेधानित्यत्वरूपा गतिः । अस्य तु सम्बुद्धिनिमित्तकेति व्याख्यानरूपा गतिरस्ति, अतो निषेधानित्यत्वं नात्र ।

वस्तुतस्तु “ तस्मिन्निति निर्दिष्टे पूर्वस्य ” इति सूत्रस्य बाधापेक्षया इष्टसिद्ध्यर्थं ज्ञापितेन निषेधानित्यत्वेन ‘ त्रपो इति ’ इत्यादौ प्रगृह्यत्वं सुवचम् । अत एव ‘ सौ शाकल्यस्य ’ इति सिद्धे सम्बुद्धिग्रहणं प्रगृह्यत्वे न लुमतेति निषेधस्याप्रवृत्तिज्ञापनार्थम्, तेन ‘ मिथो इति ’ इत्यत्रातिव्याप्तिवारणेन सम्बुद्धिग्रहणं चारितार्थम् । फलञ्च ‘ त्रपो इति ’ इत्यत्र निषेधानित्यत्वेन प्रगृह्यत्वम् इति सूत्रकृन्मतं न तु निमित्तसप्तमीत्याहुः इति सदाशिवोक्तिः सङ्गच्छते[868] ।

‘ इतौ ’ इति पदाभावे अन्यत्रापि सम्बुद्धिनिमित्तस्यौकारस्य प्रगृह्यसञ्ज्ञा न स्यात्, तथा सति ‘ हे पटो अत्र ’ इत्यवस्थायां प्रगृह्यत्वे पूर्वरूपं न स्यात् ।

‘ अहो इति ’ इत्यादावन्तरङ्गत्वात् “ ओत् ” इत्यस्यैव प्रवृत्त्या सम्बुद्धिग्रहणं व्यर्थम् । न च ‘ नाजानन्तर्ये ’ इति निषेधः, ‘ असुब्वत् ’ इत्यादिसिद्धये ज्ञापकसाजात्येन जातबहिरङ्गे एव तत्प्रवृत्तेरिति तन्न, स्वरादिपठिते ‘ मिथो ’ इत्यव्यये प्रगृह्यत्वाभावाय ‘ सम्बुद्धौ ’ इत्यस्यावश्यकत्वात् ।

---

[862] अष्टाध्यायी – (1-1-63)

[863] महाभाष्यम् – “ इकोऽचि विभक्तौ ” इति सूत्रे

[864] अष्टाध्यायी – (7-1-73)

[865] अष्टाध्यायी – (8-2-7)

[866] अष्टाध्यायी – (8-2-8)

[867] वैयाकरणसिद्धान्तकौमुदी – अजन्तनपुंसकलिङ्गप्रकरणे “ इकोऽचि विभक्तौ ” इति सूत्रव्याख्याप्रसङ्गे बालमनोरमाटीकायाम् ।

[868] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीकायाम् – (पृ. – 174)

प्रत्युदाहृतं काशिकाकृता – सम्बुद्धाविति किम् ? ‘ गवित्ययमाह ’ इति

अत्र वदन्ति – तत्र प्रगृह्यसञ्ज्ञासत्त्वेऽपि न क्षतिः । प्रकृतिभावविधौ पदान्ताधिकारादेव तदप्रसक्तेः । गवित्ययमाहेत्यत्र च विभक्तिश्रवणाभावाद् अनुकार्यानुकरणयोरभेदविवक्षयार्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद् भक्तेरनुत्पत्त्या पदान्तत्वाभावात् । अत एवेह “ लोपः शाकल्यस्य ”[869] इति न प्रवर्तत इति । न चैवं ‘ हेऽलयो हेऽलयो इति कुर्वन्तः ’ इत्यत्र कथं रुत्वयत्व-यलोपा इति वाच्यम् । तत्र भेदविवक्षया सुप्रत्ययं कृत्वा “ हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ”[870] इति विभक्तिलोपेन प्रकृतिवद् अनुकरणम् इत्यतिदेशेन वा पदान्तत्वात् । तस्मात्प्रकृतिभावविधौ पदान्तग्रहणानुवृत्तिः नास्तीत्यभिप्रायेण वृत्तिग्रन्थो योज्य इति[871] ।

इदं सूत्रं भाष्ये भगवता पतञ्जलिना न व्याख्यातम् ।

- **उञ ऊँ – (1-1-17)**

“ उञ ऊँ ” इत्येकं सूत्रं भाष्यकृता विभज्य सूत्रद्वयं कृतम् । “ उञ ऊँ ” इत्येकसूत्रत्वे तु यदि “ सम्बुद्धौ शाकल्यस्येतावनार्षे ”[872] इति सूत्रात् शाकल्यस्य इति नानुवर्तेत तदा उञः प्रगृह्यसञ्ज्ञा स्यात् प्रगृह्यसञ्ज्ञकस्य तस्य ‘ ऊँ ’ इत्यादेश इत्यर्थः स्यात्तदा ‘ ऊँ इति ’ इत्येकमेव रूपं स्यात् । प्रगृह्यसञ्ज्ञायाः प्रकरणे एतस्य सद्भावेन ‘ ऊँ ’ इत्यादेशेन सहैव प्रगृह्यसञ्ज्ञाऽपि विधीयते, न तु आदेशस्य प्रगृह्यसञ्ज्ञा । सर्वत्र उद्देश्ये एवान्वयस्य दर्शनेनात्रापि तत्रैव प्रगृह्यत्वान्वयस्यौचित्यात् । तथा च स्थानिवद्भावेन प्रगृह्यत्वस्य आदेशे सत्त्वात् प्रकृतिभावे ‘ ऊँ इति ’ इत्येकं रूपं सिध्येत् ‘ उ इति ’,‘ विति ’ इति च न निष्पद्यते । यदि च शाकल्यग्रहणमनुवर्तेत, तदा आदेशस्य प्रगृह्यसञ्ज्ञायाश्च विकल्पेन विधानात् ‘ ऊँ इति ’ वैकल्पिकत्वात् तयोरभावे यणि ‘ विति ’ इति रूपद्वयं स्यात्, ‘ उ इति ’ इति न स्यात् ।

न च निरनुबन्धके उनिपाते “ निपात एकाजनाङ् ”[873] इति सूत्रेण प्रगृह्यत्वेन ‘ उ इति ’ इति सिध्यति, ञकारानुबन्धकेऽपि तथा प्रयोगस्येष्टस्य सिद्ध्यर्थं योगविभागस्यावश्यकत्वात् ।

यदि “ उञ ऊँ ” इत्येकयोगः स्यात् तर्हि ‘ श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान् ’ इति न्यायेन उञ इत्यस्य श्रुतेनादेशेनैव सम्बन्धः स्यान्न तु प्रगृह्यसञ्ज्ञया । अनुवृत्ता प्रगृह्यसञ्ज्ञाऽपि समान-

---

[869] अष्टाध्यायी – (8-3-19)

[870] अष्टाध्यायी – (6-1-67)

[871] व्याकरणसिद्धान्तसुधानिधिः – “ ओत् ” इति सूत्रे

[872] अष्टाध्यायी – (1-1-16)

[873] अष्टाध्यायी – (1-1-14)

विभक्तिकत्वेन ' ऊँ ' इत्यत्रैव सम्बध्येत । उञः प्रगृह्यसञ्ज्ञा तु " निपात एकाजनाङ् " इत्यनेन नित्यैव स्यात् । " सम्बुद्धौ शाकल्यस्येतावनार्षे " इति सूत्रात् शाकल्यस्येत्यनुवृत्त्या चादेशे विकल्पिते रूपद्वयं स्यात् ' उ इति ', ' ऊँ इति ' । किन्तु ' विति ' इति रूपं न सिध्यति ।

योगविभागे कृते ' उञः ' इति सूत्रे शाकल्यस्येति इतौ प्रगृह्यमिति चानुवर्तते । अस्य इति शब्दपरे प्रगृह्यसञ्ज्ञा वा स्यात् । ' उ इति ', अभावपक्षे ' विति ' इति रूपद्वयम् । ततः ' ऊँ ' इति द्वितीयो योगः । अनेन सूत्रेण ऊँ इत्यादेशे ' ऊँ इति ' इति रूपत्रयं निष्पन्नम् ।

" उञ ऊँ " इति एतावदेकमेव सूत्रं पाणिनिना प्रोक्तम् । अत एव प्रकृतसूत्रपदमञ्जर्याम् ' यद्ययमेको योगः स्यात् " उञ ऊँ " इति यथा पठितं सूत्रकारेण '[874] इति हरदत्तोक्तिः सङ्गच्छते । तथा च समुदिते " उञ ऊँ " इत्यत्र एक एव संख्याङ्क उचितः, न त्वाधुनिककल्पितः काशिकायां कौमुद्यां शब्दकौस्तुभे भाष्ये चोपलभ्यमानः क्रमिकः पृथक् संख्याङ्कः । भाष्यकृत्कृतयोगविभागेन " सह सुपा "[875] इत्यादाविव प्रकृतेऽपि पृथक् संख्याङ्को न युक्तः[876] ।

योगविभागस्य फलविषये मतभेदो दृश्यते । योगविभागस्य फलं ' विति ' इति प्रदीप-न्यास-पदमञ्जरी-बालमनोरमाकारादयः प्रतिपादयन्ति । परन्तु नागेशः फलमिदं न स्वीकरोति । तस्य मते ' उ इति ' भवति योगविभागस्य फलम्[877] । तथा हि " उञ ऊँ " इत्येकयोगे शाकल्यस्येति नानुवर्तेत तदा उञः प्रगृह्यसञ्ज्ञा स्यात् । प्रगृह्यसञ्ज्ञकस्य तस्य ' ऊँ ' इत्यादेशः स्यात् । अर्थात् प्रगृह्यत्वादेशस्य च सहविधानात् । ' ऊँ इति ' इत्येकमेव रूपं स्यात् । परन्तु ' उ इति ',' विति ' इति रूपं न सिध्येत् । शाकल्यग्रहणानुवृत्तावपि प्रगृह्यसञ्ज्ञाया आदेशस्य च वैकल्पितकत्वेन ' ऊँ इति ',' विति ' इत्यनयोः सिद्धावपि ' उ इति ' न सिद्ध्यति ।

यद्यपि लक्ष्मीटीकाकारः श्रीसभापतिशर्मोपाध्यायः ' केचित् '[878] पदोपन्यस्य कैयटमतमुपस्थापयति तथापि स्वमतत्वेन नागेशमतमेव स्वीकरोति ।

मन्तव्यम् – वस्तुतस्तु नागेशमतं समीचीनं प्रतिभाति । कारणम् ' उञः इति योगविभागः ' इति कथनानन्तरं ' किमर्थो योगविभागः ' इति पृच्छति भाष्यकारः । तस्य प्रश्नस्यायमेवाशयो यत् प्रगृह्यत्वादेशयोः शाकल्यमते एव प्राप्त्या एकप्रयोगे एव प्रवृत्तिः स्यात् । एवञ्च ' ऊँ इति '' विति '

---

[874] काशिका – पदमञ्जर्याम् - प्रकृतसूत्रे

[875] अष्टाध्यायी – (2-1-4)

[876] महाभाष्यम् – तत्त्वालोकव्याख्यायाम् – प्रकृतसूत्रे

[877] लघुशब्देन्दुशेखरे – प्रकृतसूत्रे

[878] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीकायाम् – (पृ. – 175)

इति रूपे स्याताम्। ते च एकयोगेऽपि सिध्यतः। तर्हि ‘ किमर्थो योगविभागः ’ इति जिज्ञासायामुच्यते ‘ ऊँ वा शाकल्यस्य ’ इति। अर्थात् ‘ उ इति ’ रूपसिद्ध्यर्थं योगविभागः कर्तव्य इति स्पष्टं प्रतीयते।

यदि नागेशमतं स्वीक्रियते तर्हि विकल्पेनोभयोरभावपक्षे “ निपात एकाजनाङ् ” इति सूत्रेण प्रगृह्यत्वे ‘ उ इति ’ इति स्यान्नतु ‘ विति ’ इति शङ्का उदेति। परन्तु प्राप्तविभाषात्वेनास्य पक्षेऽभाव-विधायकतया तदप्रवृत्तिः स्यात्[879]।

न च दीर्घे आदेशविधानादेव सन्धिर्न स्यादिति ‘ ऊँ ’ इत्यस्य प्रगृह्यसञ्ज्ञा व्यर्था, विधानसामर्थ्यात्सन्धिशास्त्रबाधकल्पनापेक्षया प्रगृह्यसञ्ज्ञासम्बन्धकल्पनेऽग्रे मण्डूकानुवृत्त्यकल्पनेन लाघवसत्त्वात् संहिताया अविवक्षायाम् ‘ ऊँ ’ इति दीर्घविधानस्य चारितार्थ्येन सामर्थ्येन यणादिबाधे मानाभावाच्च।

यद्यपि ‘ गुणा अभेदकाः ’ इति न्यायेन ‘ ऊँ ’ इत्यनुनासिकत्वस्याविवक्षया प्राप्ता तथापि ‘ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इति ’[880] इति भाष्यादत्रानुनासिकत्वं विवक्षितम्। अनुनासिकत्वस्य फलन्तु प्रयोगे तथोच्चारणम्, ‘ यदेतनूँ इति पठसि तद्दीर्घम् ’ इत्यादौ “ यरोऽनुनासिकेऽनुनासिको वा ”[881] इति सूत्रेण दकारस्य वा नकारः, ‘ लिङ् ऊँ इति ’,‘ लिणूँ इति ’ इत्यत्र डकारस्य णः।

प्रथमयोगविभागे ‘ उञः ’ इत्यनेन किम् ‘ उञ् ’ प्रत्याहारोऽथवा वेञ्धातोः सम्प्रसारणे कृते यद्रूपं तद् गृह्यते ? अत आह लघुशब्देन्दुशेखरे नागेशः – ‘ उञ् इति निपात एव ’[882]। यदि उञ् प्रत्याहारो झभञ्सूत्रघटकञकारेण विवक्षितः स्यात् तदा चकारेण ‘ उच् ’ इति व्यवहरेत्, चकारात् परेषां वर्णानां हलां पाठेन तेषां प्रगृह्यत्वं फलादर्शनात्। सम्प्रसारणस्यापि उञा ग्रहणं नेष्यति, ‘ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ’ इति परिभाषया प्रतिपदोक्तस्यैव ग्रहणात्।

- **ईदूतौ च सप्तम्यर्थे – (1-1-18)**

शाकल्यस्य, अनार्षे, इतौ इति पदत्रयं निवृत्तम्। अत्र विधेयं पदं नास्तीति चकाररूपप्रयत्नेन प्रगृह्यत्वमित्यनुवर्तते। ईच्च ऊच्च = ईदूतौ, इतरेतरयोगद्वन्द्वः। अत्र तपरकरणं गुणान्तरभिन्नानां तुल्यकालानां ग्रहणार्थं न, ‘ गुणा अभेदकाः ’ इति न्यायेनैव तद्ग्रहणसिद्धेः। नापि प्लुतनिवृत्तये,

---

[879] पाणिनीयव्याकरणे योगविभागविमर्शः – (पृ. – 26)

[880] महाभाष्यम् – प्रकृतसूत्रे

[881] अष्टाध्यायी – (8-4-45)

[882] लघुशब्देन्दुशेखरे – (पृ. – 393)

दीर्घेकारोकारयोः अणुदित्सूत्रे अण्पदेन न स्वस्मिन् न स्वाङ्गे इति दिशा ग्रहणाभावेन सवर्णग्रहणाप्रसक्तौ सूत्रे तपरकरणं सन्ध्यभावसम्पादनद्वाराऽसंदेहार्थम् । सप्तम्या अर्थः = सप्तम्यर्थः, तस्मिन्निति सप्तम्यर्थे, षष्ठीतत्पुरुषः । ' ईदूतौ ' इत्यस्य शब्दस्वरूपविशेषणतया तदन्तविधौ अनुवृत्तस्य प्रगृह्यस्य विभक्ति-विपरिणामेन द्विवचनान्तत्वे सप्तम्यर्थे वर्तमानौ ईकारान्त-ऊकारान्तौ शब्दौ प्रगृह्यसञ्ज्ञकौ भवत इत्यक्षरार्थः सञ्जायते । उदाहरणन्तु – ' सोमो गौरी अधिश्रितः ' । गौर्यामधिश्रितः इत्यर्थम् ' गौरी अधिश्रितः ' इति प्रयोगे " सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः "[883] इति सूत्रेण ' ङे ' इति सप्तम्या लुकि कृते ' यः शिष्यते स लुप्यमानार्थाभिधायी ' इति नियमेन लुप्तायाः सप्तमीविभक्तेरर्थं शिष्टो भागो गौरीशब्दो बोधयति । तथा च ईकारान्तगौरीशब्दस्य सप्तम्यर्थवृत्तित्वात् भवत्यनेन सूत्रेण प्रगृह्यसञ्ज्ञा, ततः " प्लुतप्रगृह्या अचि नित्यम् "[884] इति सूत्रेण प्रकृतिभावः । एवं वेदेऽवग्रहे मामकी तनू – ' मामकी इति ', ' तनू इति ' इत्युदाहरणानि भवन्ति ।

- **अर्थग्रहणस्य प्रयोजनम्**

भाष्येऽस्मिन् सूत्रेऽर्थग्रहणस्य प्रयोजनं द्वाभ्यां वार्त्तिककारिकाभ्यां व्याख्यातम् । तदत्र सङ्ग्रहः कृतो भाष्यकारेण –

ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद् भवेत् ।
पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते ।।
वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ।
ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत् ।।

ईदूतौ सप्तमीत्येव - ननु " ईदूतौ च सप्तम्यर्थे " इत्यत्र ' ईदूतौ सप्तमी ' इत्येव सूत्रमस्तु सप्तम्याविशेष्यत्वेन ईदूतोर्विशेषणत्वेन " येन विधिस्तदन्तस्य "[885] इति सूत्रेण तदन्तविधौ ' ईदूदन्तम् ' इति लब्धम्, सप्तम्या अपि प्रत्ययत्वेन ' प्रत्ययग्रहणे तदन्तग्रहणम् ',' न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्ययः ' इति न्यायेन ' सप्तम्यन्तम् ' इति । तथा च ईदूदन्तं यत्सप्तम्यन्तं तत्प्रगृह्यसञ्ज्ञं स्यादित्यर्थे ' सोमो गौरी अधिश्रितः ' इत्यादौ " सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः " इति सूत्रेण सुपां लुक्यपि प्रत्ययलक्षणन्यायेन सप्तम्यन्ततया च सिद्धे प्रगृह्यत्वेऽर्थग्रहणं किमर्थमिति प्रश्नः[886] ।

[883] अष्टाध्यायी – (7-1-39)
[884] अष्टाध्यायी – (6-1-123)
[885] अष्टाध्यायी – (1-1-72)
[886] कौमुदीकल्पलतिकायाम् – (पृ. – 53)

लुप्तेऽर्थग्रहणाद् भवेत् – अर्थग्रहणाभावे ' सोमो गौरी अधिश्रितः ' इत्यादेः सञ्ज्ञा न स्यात् । ' सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ' इति परिभाषया सुप्तिङन्तमित्यन्तग्रहणज्ञापितया तदन्तविधिनिषेधेन ईदूदन्ता या सप्तमी सा प्रगृह्या इत्यर्थे यत्र सप्तमी श्रूयते ईदाद्यन्तस्तत्रैव स्यात् । यथा – ' वातप्रमी ' इत्यादौ, ' गौरी अधिश्रितः ' इत्यादौ सप्तम्या लुकापहारेणाभावात् सा न स्यादिति तदर्थमावश्यकमर्थग्रहणमिति । कृते तु अर्थग्रहणेऽत्र ' ङे ' इति सप्तम्या लुकि कृते ' यः शिष्यते स लुप्यमानार्थाभिधायी ' इति नियमेन लुप्तायाः सप्तमीविभक्तेरर्थं शिष्टो भागो गौरीशब्दो बोधयति । तथा च ईकारान्तगौरीशब्दस्य सप्तम्यर्थवृत्तित्वात् भवत्यनेन सूत्रेण प्रगृह्यसञ्ज्ञा [887] ।

पूर्वस्य चेत्सवर्णोऽसौ – ननु ' सोमो गौरी ' इत्यादौ विभक्तिर्न लुप्यते किन्तु ' धीती, मती ' इत्यादाविव " सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः " इति सूत्रेण पूर्वसवर्णे कृते " अकः सवर्णे दीर्घः " इति सूत्रेण दीर्घैकादेशे तस्यादिवद्भावेन सप्तमीग्रहणेन ग्रहणात् अर्थग्रहणाभावेऽपि सिध्यति सञ्ज्ञा, किमर्थमर्थग्रहणम् [888] ? ।

आडाम्भावः प्रसज्यते – यदि धीत्यादाविव विभक्तेः पूर्वसवर्णे कृते सवर्णदीर्घ एकादेश इति व्याख्यायेत तदा सवर्णदीर्घात् प्राक् परत्वात् " आण्नद्याः "[889] इति आडागमः " ङेराम्नद्याम्नीभ्यः "[890] इति आमादेशश्च प्रसज्येत इति रूपसिद्धिर्न स्यात् । अतः सुपोऽत्र लुगेव युक्तः । तस्मादर्थग्रहणं कर्तव्यम् ? न कर्तव्यम्, यस्मात् सर्वत्र यदि सप्तम्या लुगेवास्ति, न क्वचित्सप्तम्यस्ति । प्रगृह्यसञ्ज्ञाऽनापत्तौ वचनं व्यर्थमापद्येत, अतस्तत्र वचनसामर्थ्यात्सञ्ज्ञाविधावपि तदन्तविधिर्भविष्यति [891]

वचनाद्यत्र दीर्घत्वम् – ' दृतिं न शुष्कं सरसी शयानम् ' इत्यत्र सरः शब्दात् परस्य ङिशब्दस्य ' ड्याडियाजीकाराणामुपसंख्यानम् ' इतीकारे कृते सूत्रस्य चारितार्थ्यमिति वाच्यम् ।

तत्रापि सरसी यदि – यदि सरसीशब्दो वर्तते तदात्रापि सप्तम्या लुगेव न तु सरःशब्दात् ङेरीकारोऽत एव सूत्रस्य चारितार्थ्याऽभावात् । तथा च भाष्ये ' दक्षिणापथे हि महान्ति सरांसि सरस्य ' इत्युच्यन्ते इति भगवदुक्तम् । तेन ङीषन्तान्ङेर्लुकैवोक्तप्रयोगे सिद्धे सरः शब्दात् परस्य ङिशब्दस्य ' ड्याडियाजीकाराणामुपसंख्यानम् ' इति वार्त्तिके ईकारादेशो न विधेयः । अत एव सप्तम्या लुकः सत्त्वात्

---

[887] काशिका – न्यासः, पदमञ्जरी – प्रकृतसूत्रे,

[888] शब्दकौस्तुभः – प्रकृतसूत्रे

[889] अष्टाध्यायी – (7-3-112)

[890] अष्टाध्यायी – (7-3-116)

[891] काशिका – न्यासः, पदमञ्जरी – प्रकृतसूत्रे, वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे

वचनसामर्थ्यादेव तदन्तविधौ प्रत्ययलक्षणेन सप्तम्यन्तत्वमाश्रित्य प्रगृह्यसञ्ज्ञा भविष्यतीति नार्थग्रहणस्य प्रयोजनम् ।

ज्ञापकं स्यात्तदन्तत्वे – एवन्तर्हि प्रगृह्यसञ्ज्ञाप्रकरणे प्रत्ययलक्षणं नास्तीति ज्ञापनायेदमर्थग्रहणमस्तु । एवञ्च " ईदूदेद् द्विवचनं प्रगृह्यम् " इति सूत्रे चत्वारः पक्षाः कथिताः । ते चैवं

1. द्विवचनम् ईदादि प्रगृह्यम् ।

2. ईदाद्यन्तं यत् द्विवचनं तत् प्रगृह्यम् ।

3. ईदाद्यन्तं यत् द्विवचनान्तं तत् प्रगृह्यम् ।

4. ईदाद्यन्तं यत् द्विवचनं तदन्तं प्रगृह्यम् ।

तत्र तृतीयचतुर्थपक्षयोः क्रमशः ' कुमार्योरगारम् इति कुमार्यगारम् ', ' अशुक्ले शुक्ले समपद्येतां वस्त्रे ' इति शुक्ल्यास्तां वस्त्रे इत्यत्र प्रगृह्यसञ्ज्ञापत्तिरूपदोषः, प्रत्ययलक्षणेन ' कुमारी ' इत्यादेर्द्विवचनान्तत्वात् । तस्य च निवारणं भवत्यनेन अर्थग्रहणेन, व्यर्थेन सता ' प्रत्ययलक्षणेन प्रगृह्यसञ्ज्ञा न भवति ' इति ज्ञापयता । यदि हि प्रत्ययलक्षणेन सञ्ज्ञा स्यात्, ' गौरी ' इत्यादौ तथैव सिद्धेरर्थग्रहणं व्यर्थं स्यात् । अतः प्रगृह्यसञ्ज्ञायां प्रत्ययलक्षणाभावस्तेन ज्ञापितः, तेन ' कुमार्यगारम् ' इत्यादौ दोषो निवारितः ।

मा वा पूर्वपदस्य भूत् – ननु च सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधादेव तत्र तृतीयतुरीयौ पक्षौ अनाश्रितौ – इति तत्पक्षौ आश्रित्य दोषोत्थापनासम्भवात् तन्निवारणं न भवति प्रयोजनमेतज्ज्ञापनस्य इति चेत्तर्हि समासे पूर्वपदस्य प्रगृह्यसञ्ज्ञावारणार्थमर्थग्रहणस्य प्रयोजनम् । तथाहि – अर्थग्रहणसामर्थ्यात् सप्तम्यर्थविशिष्ट-स्वार्थमात्रबोधकं यद् ईदाद्यन्तं तत् प्रगृह्यम् इत्यर्थात् वाप्यामश्वो वाप्यश्वः इत्यादौ समासे वापी इति पूर्वपदस्य ईदन्तस्य जहत्स्वार्थाया वृत्तिरिति पक्षे पूर्वोत्तरपदयोरानर्थक्यान्न प्रगृह्यसञ्ज्ञा । अजहत्स्वार्थायामपि वृत्तौ स्वार्थसंसृष्टप्रधानार्थस्याभिधानात् पांसूदकवत्स्वार्थस्य विवेकानवगमान्न भवति प्रगृह्यसञ्ज्ञा । एवञ्च समासे ईदूदन्तरूपपूर्वपदसञ्ज्ञा-वारणफलकमिदमर्थग्रहणम्[892] ।

अस्यायं भावः " ईदूतौ च सप्तम्यर्थे " इति सूत्रे ' अर्थ ' पदोपदानस्य किं प्रयोजनमिति प्रश्नस्याशयः । यतः ' ईदूतौ च सप्तमी ' इति सूत्रितेऽपि सप्तमीविभक्तेः प्रत्ययत्वात् ' प्रत्ययग्रहणे तदन्ता ग्राह्याः ' इति नियमेन तदन्तविधौ ' ईदूदन्तं सप्तम्यन्तं प्रगृह्यसञ्ज्ञा स्यात् ' इत्यर्थसम्भवेन ' सोमो गौरी अधिश्रितः ' इत्यादौ प्रत्ययलक्षणेन सप्तम्यन्ततया प्रगृह्यत्वेन अभीष्टसिद्धिः स्यादेव । न च ' सञ्ज्ञाविधौ

[892] भाषावृत्तेः समीक्षात्मकमध्ययनम् – (पृ. – 140)

’ इति परिभाषया तदन्तविधिनिषेधात् “ ईदूदेद्द्विवचनम् प्रगृह्यम् ” इतिवत् ईदूदन्ता या सप्तमी सा प्रगृह्यसञ्ज्ञिका इत्यर्थापत्त्या एकादेशस्य परादिवद्भावात् सप्तमीत्वेन ‘ ययी आस्ते ’ इत्यादौ एव प्रगृह्यसञ्ज्ञा स्यात् न तु ‘ सोमो गौरी अधिश्रितः ’ इत्यादौ सप्तम्या लुकापहारात्, तदर्थमर्थ-ग्रहणमावश्यकमिति वाच्यम्, ‘ ययी ’ इत्यादेः अनभिधानात् । कथञ्चन ईकारांशे चारितार्थ्येऽपि ऊकारांशे सर्वथासम्भवात् । सूत्रारम्भसामर्थ्यात्, ‘ ईदूतौ सप्तमीप्रगृह्यम् ’, ‘ अदसः ’, ‘ एच्च द्विवचनम् ’ इति लघुभूतन्यासेनैव सिद्धे गुरुभूतन्यासकरणाच्च ‘ सञ्ज्ञाविधौ ’ इत्यस्याः परिभाषाया अप्रवृत्त्या तदन्तविधिना ईदूदन्तं सप्तम्यन्तं इत्याद्यर्थे ‘ सोमो गौरी अधिश्रितः ’ इत्यादौ दोषाभावेन अर्थग्रहणवैयर्थ्यात् । सप्तम्यर्थमात्रबोधकत्वे एव ईदूदन्तस्य प्रगृह्यसञ्ज्ञाविधानार्थं तस्यावश्यकत्वात् । अत एव ‘ वाप्यामश्वो वाप्यश्वः ’ इत्यत्र प्रगृह्यसञ्ज्ञा न भवति । यतः समासत्वात् तत्र सप्तम्यर्थमात्र-वृत्तित्वं न वर्तते ।

अत्रेदमवधेयम् – अयं योदश्छान्दस एव । तेन ‘ ययी, पपी, वातप्रमी ’ इत्यादिशब्दानां सप्तम्येकवचने ईकारान्तानामपि न प्रगृह्यसञ्ज्ञा । अन्यथा एषामपि श्रूयमाणसप्तमीकानामीदन्तत्व-सम्भवेन तत्रापि सरसी यदि इत्येतत्पर्यन्तानुधावनवैयर्थ्यापत्तेः । एतेन ऊकारान्तस्य भाषायामसम्भवात् तदनुसार इत्यपि निरस्तम् । अत एव प्रसादकारेण वैदिकप्रक्रियायामेवेदं सूत्रमुपन्यस्तम् ।

(ख) घ्वादिसञ्ज्ञाप्रकरणम्

- **दाधा घ्वदाप् – (1-1-19)**

अस्मिन् सूत्रे त्रीणि पदानि सन्ति । तेषु ‘ दाधाः ’ इति प्रथमं पदम्, दाश्च धौ चेति विग्रहे इतरेतरयोगद्वन्द्वे ‘ दाधा ’ इति प्रथमान्तमुद्देश्यपरम् । ‘ घु ’ इति लुप्तप्रथमान्तं विधेयपरं द्वितीयं पदम् । ‘ अदाप् ’ इति तृतीयं पदम्, दाप् च दैप् चेति दाप् – एकशेषः, न दाप् इति अदाप्, नञ्तत्पुरुषः ।

वृत्तिः – दारूपाः धारूपौ च धातवो घुसञ्ज्ञका भवन्ति, दाप्दैपौ वर्जयित्वा । दारूपाश्चत्वारो धातवः – जौहोत्यादिक उभयपदी ‘ डुदाञ् दाने ’, भौवादिकः परस्मैपदी ‘ दाण् दाने ’, दैवादिकः परस्मैपदी ‘ दो अवखण्डने ’, भौवादिक आत्मनेपदी ‘ देङ् रक्षणे ’ । एतेषां चतुर्णां अनुबन्धविनिर्मुक्तानामनुकरणे ‘ दा ’ इति । एजन्तानामनुकरणे “ आदेच उपदेशेऽशिति ”[893] इत्यात्वेन

[893] अष्टाध्यायी – (6-1-45)

दारूपत्वम् । अनैमित्तिकमात्वं शिति तु प्रतिषेध इति सिद्धान्तात् । जौहोत्यादिक उभयपदी ‘ डुधाञ् धारणपोषणयोः ’, भौवादिकः परस्मैपदी ‘ धेट् पाने ’ । अनयोः लुप्तानुबन्धयोरनुकरणं ‘ धा ’ इति । ततश्चतुर्णां दारूपाणां द्वयोश्च धारूपयोरेकशेषोत्तरं द्वन्द्वः । दाश्च दाश्च दाश्च दाश्च दाः । धाश्च धाश्च धौ । दाश्च धौ च दाधा इति विग्रहः[894] । तदेवं दारूपाः (दाञ्-दाण्-दो-देङः) धारूपाश्च (धाञ्धेटौ) घुसञ्ज्ञा भवन्ति, अदाप् = आदादिकः परस्मैपदी ‘ दाप् लवने ’, भौवादिकः परस्मैपदी ‘ दैप् शोधने ’ इत्येतौ धातू विना । प्रणिददाति, प्रणिदीयते, प्रणिदाता । प्रणियच्छति । प्रणिद्यति । प्रणिदयते । प्रणिदधाति, प्रणिधीयते, प्रणिधाता । प्रणिधयति । देहि । धेहि ।

ननु प्रणिदयते, प्रणिधयतीत्यादौ “ आदेच उपदेशेऽशिति ” इति सूत्रे अशिति इति प्रतिषेधवचनात् दाधाशब्दयोर्विधीयमाना घुसञ्ज्ञा रूपान्तरयुक्तानां ‘ दो अवखण्डने ’, ‘ देङ् रक्षणे ’, ‘ धेट् पाने ’ इत्येषां धातूनां न प्राप्नोति । किञ्च ‘ प्रणिदाता, प्रणिधाता ’ इत्यादौ दाधाशब्दयोः लाक्षणिकत्वात् ‘ लक्षणप्रतिपदोक्तयोर्प्रतिपदोक्तस्यैव ग्रहणम् ’ इति परिभाषया घुसञ्ज्ञा न स्यात् तदर्थं सूत्रे प्रकृतिग्रहणं कर्तव्यम् । दाधा घुसञ्ज्ञा भवन्ति प्रकृतयश्चैषामित्यर्थे कृते पूर्वोक्तप्रयोगाणां सिद्धिः । न च “ ईदूतौ च सप्तम्यर्थे ”[895] इति सूत्रतोऽर्थग्रहणमनुवर्त्य दाधामर्थे ये वर्त्तन्तेते घुसञ्ज्ञाः भवन्तीत्यर्थकरणेन सकलेष्टसिद्धौ प्रकृतिग्रहणं व्यर्थमिति वाच्यम् । ‘ ददातिना समानार्थान् राति रासति दासति ’ इत्यादीनां धातूनामपि घुसञ्ज्ञापत्तेः । तथा च प्रकृतिग्रहणं कर्तव्यमेवेतिचेन्न, “ नेर्गदनदपत-पदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ”[896] इति सूत्रे घुमाशब्दयोर्मध्ये प्रकृतिग्रहणं कर्तव्यम् । अर्थात् – ‘ घुमा ’ इत्यस्य स्थाने ‘ घुप्रकृतिमाङ् ’ इति पठनीयम्, घुश्च प्रकृतिश्च माङ्चेति द्वन्द्वः, तत्र प्रकृतिश्च सामीप्यात् घुमाङोर्ग्राह्या तथा च घुसञ्ज्ञाया या प्रकृतिर्माश्च या प्रकृतिस्तस्यां परायां सत्यां नेर्नस्य णत्वं स्यादित्यर्थेन ‘ प्रणिधयते ’, ‘ प्रणिमयते ’ इत्यादिसिद्धेः । आकारान्तस्य ङितो मा प्रकृतेर्ग्रहणात् ‘ प्रनिमिनोति ’ इत्यादौ न दोषः ।

यत्तु भारद्वाजीयैरुक्तम् विकृतार्थमपि प्रकृतिग्रहणं कर्तव्यं तदपि न । ‘ गामादाग्रहणेष्वविशेषः ’ इति लक्षणप्रतिपदोक्तपरिभाषापवादेन दाग्रहणे लाक्षणिकस्यापि ग्रहणाद् दोदेङोस्तावत् ग्रहणं सिद्धम् । ‘ गामादाग्रहणेषु ’ इत्यत्र च ज्ञापकम् – दैपः पित्त्वम् । तद्धि ‘ अदाप् ’ इति घुसञ्ज्ञाप्रतिषेधार्थम् । यदि ह्यत्र लाक्षणिकस्य ग्रहणं न स्यात्तर्हि दैपो घुसञ्ज्ञाया अप्राप्तेस्तन्निषेधार्थं क्रियमाणं पित्त्वं व्यर्थं स्यात्,

---

[894] वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिन्याम् – प्रकृतसूत्रे

[895] अष्टाध्यायी – (1-1-19)

[896] अष्टाध्यायी – (8-4-17)

तस्य पित्त्वस्य च नान्यत्प्रयोजनं किमपि भवितुमर्हति, “ अनुदात्तौ सुप्पितौ ”[897] इत्यस्य तु सुप्साहचर्यात् प्रत्ययस्यैव पितोऽनुदात्तत्वं विधानार्थत्वात्। तदेव च व्यर्थं सत् सामान्यापेक्षतया गामादा इत्यस्य ज्ञापकं भवति। अत्र दा शब्देन सामान्यापेक्षतया धोऽपि ग्रहणात् धेटोऽपि ग्रहणं सिद्धम्। किञ्च “ दो दद् घोः ”[898] इत्यत्र दः इति धेटो ग्रहणे लिङ्गम्। तथा हि “ दो दद् घोः ” इति सूत्रे दः इति पदं धेट एव निवृत्त्यर्थं कृतम्। धाञस्तु “ दधातेर्हिः ”[899] इत्यनेन अपवादेन ह्यादेशेन निवृत्तिः सिद्धा। तथा च यदि धेटो घुसञ्ज्ञा न स्यात्, तर्हि तन्निवृत्त्यर्थं कृतं दः इति पदमनर्थकमापद्यमानं धेटोऽपि घुसञ्ज्ञां ज्ञापयतीति तस्यापि विषये लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तिः । एवञ्चात्र सूत्रे लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तेरविशेषेण दाञ्दाण्धाञाम् दोदेङ्धेटां च घुसञ्ज्ञा सिद्धा [900]।

ननु ‘ दा, धा ’ इत्यानुपूर्व्यायां विधीयमानायां घुसञ्ज्ञायाम् ‘ प्रनिदारयति, प्रनिधारयति ’ इत्यादौ नेर्णत्वापत्तिः स्यात्, तस्या वारणं तु अर्थवद्परिभाषया अर्थवतोरेव दाधाशब्दयोर्घुसञ्ज्ञाविधानेन भाष्ये समाश्रितम्।

नन्वेवमपि ‘ गामादाग्रहणेष्वविशेषः ’ इत्यनया परिभाषया ‘ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ’ इति परिभाषायाः ‘ निरनुबन्धकग्रहणेन सानुबन्धकस्य ’ इति परिभाषायाश्च यथा बाधस्तथा ‘ अर्थवद्ग्रहणे नानर्थकस्य ’ इति परिभाषाया अपि बाधः स्यात्। तथा च ‘ प्रनिदारयति, प्रनिधारयति ’ इत्यत्राप्यतिप्रसङ्ग इति चेत् ? न, घुसञ्ज्ञानिरूपितं यस्योपसर्गत्वं ततः परस्य नेर्णत्वविधानात्। तत्र च रेफविशिष्टं प्रत्येवोपसर्गत्वं न तु तन्निर्मुक्तपूर्वभागनिरूपितम्। अर्थात् – प्रादिर्यं प्रति उपसर्गः सः ‘ दार् ’ इति ‘ धार् ’ इति घुसञ्ज्ञो न, यश्च भवितुमर्हति घुसञ्ज्ञो ‘ दा, धा ’ रूपः, न तं प्रति उपसर्गस्तत्र प्रादिः। एवं न तत्र णत्वापत्तिर्दोषः। ‘ यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसञ्ज्ञा ’ इति नियमात्। नन्वेवं स्यात्, तर्हि ‘ प्रणिदापयति ’, ‘ प्रणिधापयति ’ इत्यादावपि णत्वं न स्यादिति चेन्न, ‘ यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ’ इति परिभाषया प्रणिदापयतीत्यादौ दाशब्दमुद्दिश्य पुको विहितत्वात् पुग्विशिष्टस्य दाग्रहणेन ग्रहणाद् घुसञ्ज्ञोपपद्यते। ‘ प्रनिदारयति ’, ‘ प्रनिधारयति ’ इत्यादौ तु दाग्रहणमुद्दिश्य रेफस्य विहितत्वाभावात् रेफविशिष्टस्य दाग्रहणेनाग्रहणान्न घुसञ्ज्ञा प्रसज्यते।

[897] अष्टाध्यायी – (3-1-4)

[898] अष्टाध्यायी – (7-4-46)

[899] अष्टाध्यायी – (7-4-42)

[900] महाभाष्यम् – प्रदीपः – काशिका – पदमञ्जरी – भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

यदा तु उपसर्गस्य ण्यर्थविशेषकत्वम्, तदा दाधारूपं प्रत्युपसर्गत्वाभावान्नित्यं णत्वं न भवत्येव, किन्तु “ शेषे विभाषाऽकखादावषान्त उपदेशे ”[901] इति सूत्रेण वैकल्पिकमेवेति । तदेवं मतत्रयं पर्यवसन्नम् । पूर्वोक्तास्त्रय आदन्तास्त्रयश्च एङन्ता विशिष्य घुसञ्ज्ञाः इति सूत्रकारस्य, प्रयोगे आकारान्तानां दाधारूपाणां तत्प्रकृतीनां च इति वार्त्तिककारस्य, प्रयोगे आकारान्तानामेव सञ्ज्ञा, तत्प्रकृतीनां तु णत्वविधौ प्रकृतिग्रहणाण्णत्वमात्रम्, न तु घुसञ्ज्ञा इति भाष्यकारस्य मतमिति । एवं स्थिते ‘ उपदिदीषते ’ इत्यत्र दीङः सन्प्रत्यये “ सनि मीमाघुरभलभशकपतपदामच इस् ”[902] इत्यादिना इस्भावः स्यात् । “ मीनातिमिनोतिदीङां ल्यपि च ”[903] इति दीङ आत्वविधानेन तस्य दाप्रकृतित्वात् वार्त्तिकमते घुसञ्ज्ञात्वात् । अन्यमतद्वये तु नायं दोष इति स्पष्टमेवेति चेदुच्यते –

यदि ईकारान्तस्यैव दीङ आत्वविधानम्, तदायं दोषः स्यात्, न त्वेवम्, किन्तु गुणे कृते एकारान्तस्यैव आत्वं विधीयते । ततश्च दाप्रकृतित्वं ‘ दे ’ इत्यस्यैव, न तु ‘ दी ’ इत्यस्य । ‘ उपदिदीषते ’ इत्यत्र च एजन्तत्वाभावेन दाप्रकृतित्वं नास्तीति घुसञ्ज्ञाविरहात् । दाभावनिरूपितस्थानित्वस्य तत्प्रयोज्यनिवृत्तिप्रतियोगित्वरूपस्य एजन्त एव विश्रान्तेः ।

न चैवम् आदन्तत्वनिमित्तकयुच्प्रत्ययाद्यसिद्धिः । आकारान्तलक्षणः प्रत्ययविधिः इति विशिष्यैव वार्त्तिककृता तस्य विहितत्वात् । नन्वेवमपि वार्त्तिकभाष्यकारयोर्मते ‘ उपादास्त ’ इत्यत्र “ स्थाघ्वोरिच्च ”[904] इति इत्वं स्यात्, प्रयोगे आदन्तत्वस्यात्र सत्त्वेन भाष्यमतेऽपि घुसञ्ज्ञत्वात्, इति चेदत्र वार्त्तिकं तावत् – ‘ दीङः प्रतिषेधः स्थाघ्वोरित्त्वे ’ इति ।

तथा च वाचनिक एव तदभावः । भाष्यकृता तु सन्निपातलक्षणन्यायेन समाहितम् । तथाहि – पूर्वोक्तरीत्या एजन्तानामात्वविधानाभ्युपगमे युच्प्रत्ययादिसिद्ध्यर्थं वार्त्तिकान्तरकरणे गौरवाद् एज्विषये आत्वं विधीयते । गुणवृद्धिनिमित्तकप्रत्यये विवक्षिते इति यावत् । तथा च प्रत्ययोत्पत्तिपूर्वमेव दीङादीनामादन्तत्वात्सिद्धस्तल्लक्षणप्रत्यय इति लाघवम् । एवं सति आत्वे अकित्त्वसन्निपातो निमित्तम् । कित्त्वे सति गुणवृद्धिनिषेधेन एज्विषयानुपपत्तेः । ततश्चाकित्त्वसन्निपातकृतमात्वं सिचः कित्त्वप्रवर्तिकां घुसञ्ज्ञा न प्रवर्तयति । कित्त्वेन एज्विषयापहारे घुसञ्ज्ञानिमित्तस्य आत्वस्य निमित्तविघातापत्तेः ।

[901] अष्टाध्यायी – (8-4-18)
[902] अष्टाध्यायी – (7-4-54)
[903] अष्टाध्यायी – (6-1-50)
[904] अष्टाध्यायी – (1-2-17)

स्यादेतत् – सूत्रमते ‘ प्रणिदाता ’ इत्यादौ दीङ आत्वे कृते णत्वं न भवति, घुसञ्ज्ञाविरहात् । भाष्यवार्त्तिकमते तु णत्वापत्तिः, प्रयोगे आदन्तत्वात् दाप्रकृतित्वाच्च घुसञ्ज्ञासत्त्वादिति द्वयोः सूत्रकृता सह विरोधः । एवं ‘ प्रणिदीयते ’ इत्यादौ भाष्यमते “ नेर्गदनदपतपद.......” इति सूत्रेण नित्यं णत्वम्, तत्र प्रकृतिग्रहणेन घुसञ्ज्ञाया अनपेक्षितत्वात् ।

वार्त्तिकमते तु “ शेषे विभाषाऽकखादावषान्त उपदेशे ” इति वैकल्पिकम् । एजन्तानामेव दाप्रकृतित्वोपगमेन ईदन्तस्याप्रकृतित्वादिति द्वयोः परस्परविरोधो दुर्वार इति चेदत्राहुः –

भाष्यरीत्या सर्वत्र दीङो नित्यं णत्वमिति स्थिते सूत्रवार्त्तिकमतेऽपि “ शेषे विभाषाऽकखादावषान्त उपदेशे ” इत्यस्य दीङंशे व्यवस्थितविकल्पत्वमाश्रित्य नित्यणत्वमेव स्वीकार्यम् । ‘ यथोत्तरं मुनीनां प्रामाण्यम् ’ इति सिद्धान्तात् इति[905] ।

ननु ‘ अदाप् ’ इति प्रतिषेधे आदादिकः परस्मैपदी ‘ दाप् लवने ’ इत्यस्यैव ग्रहणं युक्तम्, न तु भौवादिकः परस्मैपदी ‘ दैप् शोधने ’ इत्यस्य । पकारे श्रूयमाणे आत्वायोगादिति चेत् ? न, ‘ अनुबन्धा अनेकान्ताः ’ इति पक्षे पकारसत्त्वे दैप आत्वसम्भवेऽपि दैपोऽनेजन्तत्वेन आत्वासम्भवात् पकार-लोपोत्तरमात्वसत्त्वेऽपि लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तावपि ‘ दाप् ’ रूपत्वाभावात् कथं दैपो घुसञ्ज्ञायाः प्रतिषेधः स्यात्, इति चेन्न, “ उदीचां माङो व्यतीहारे ”[906] इति सूत्रे ‘ मेङः ’ इत्येव पठनीये ‘ माङो व्यतीहारे ’ इति गुरुकरणं ‘ नानुबन्धकृतमनेजन्तत्वम् ’ इति परिभाषाया ज्ञापनार्थमेव । तेन दैपः पकारसत्त्वे एव तस्य एजन्तत्वात् आत्वे दाप्रूपतया प्रतिषेधो भवति [907] ।

अस्मिन् भाष्ये भाष्यकारेण समाधानत्रयं कृतम् । यथा – पूर्वोक्तं ‘ अनुबन्धकृतमनेजन्तत्वम् ’ इति परिभाषाज्ञापनरूपं प्रथमम् । “ दाधा घ्वदाप् ” इति सूत्रे ‘ अदाप् ’ इत्यस्य स्थाने ‘ अपित् ’ इति न्यासभेदरूपं द्वितीयम् । अत्र पक्षे दाप इव दैपोऽपि पित्त्वात् निषेधसिद्धः । ‘ दाप् शोधने ’ इत्येव दिवादौ पठित्वा ‘ दायति ’ रूपसिद्धौ ‘ दैप् शोधने ’ इत्यस्य भ्वादौ पाठाभावरूपं तृतीयमपि समाधानं कृतम् ।

- **घुसञ्ज्ञाप्रदेशाः**

1. स्थाघ्वोरिच्च – (1-2-17)

अनयोरिदादेशः स्यात् सिच्च कित् । उदाहरणम् – समस्थित, अदित, अधित ।

2. गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु – (2-4-77)

---

[905] व्याकरणसिद्धान्तसुधानिधिः – (पृ. – 110)

[906] अष्टाध्यायी – (3-4-19)

[907] शब्दकौस्तुभः, भाषावृत्तेः समीक्षीत्मकमध्ययनम् – प्रकृतसूत्रे

एभ्यः सिचो लुक् स्यात् । उदाहरणम् – अगात्, अधात्, अदात् ।

3. उपसर्गे घोः कि – (3-3-92)

उपसर्गे घुसञ्ज्ञकेभ्यः धातुभ्यः किः, अकर्तरि च कारके सञ्ज्ञायां भावे च । उदाहरणम् – प्रदिः, अन्तर्धिः, उपाधिः ।

4. कर्मण्यधिकरणे च – (3-3-93)

कर्मण्युपपदे घोः किः अधिकरणे । उदाहरणम् – जलधिः ।

5. घुमास्थागापाजहातिसां हलि – (6-4-66)

एषामात ईत् स्याद्धलादौ क्ङित्यार्धधातुके । उदाहरणम् – दीयते, धीयते ।

6. एर्लिङि – (6-4-67)

घुसञ्ज्ञकानां मास्थादीनां चैत्वं स्यादार्धधातुके कति लिङि । उदाहरणम् – देयात्, धेयात् ।

7. न ल्यपि – (6-4-69)

ल्यपि परे घुमास्थादेरीत्त्वं न । प्रदाय, प्रधाय ।

8. ई हल्यघोः – (6-4-113)

श्नाभ्यस्तयोरात ईत् स्यात् सार्वधातुके क्ङिति हलि, न तु घुसञ्ज्ञकस्य । उदाहरणम् – क्रीणीतः, पुनीते ।

9. घ्वसोरेद्धावभ्यासलोपश्च – (6-4-119)

घोरस्तेश्चैत्त्वं स्याद्धौ परेऽभ्यासलोपश्च । उदाहरणम् – देहि, धेहि ।

10. घोर्लोपो लेटि वा – (7-3-70)

घुसञ्ज्ञाकानां लेटि परतो लोपो वा । उदाहरणम् – दधद् रत्नानि दाशुषे, सोमो ददद् गन्धर्वाय ।

11. दो दद् घोः – (7-4-46)

घुसञ्ज्ञकस्य दा इत्यस्य दथ् स्यात् तादौ किति । उदाहरणम् – दत्तः, दत्तवान्, दत्तिः ।

12. अच उपसर्गात् तः – (7-4-47)

अजन्तादुपसर्गात्परस्य दा इत्यस्य घोरचस्तः स्यात्तादौ किति । उदाहरणम् – प्रत्तः, उपात्तः ।

13. सनि मीमाघुरभलभशकपतपदामच इस् – (7-4-54)

एषामच इस् स्यात् सादौ सनि । उदाहरणम् – दित्सति, धित्सति ।

14. नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च – (8-4-17)

उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्याद् गदादिषु । उदाहरणम् – प्रणिददाति, प्रणिदधाति ।

- **आद्यन्तवदेकस्मिन् – (1-1-20)**

अतिदेशसूत्रमिदम् । सति परस्मिन् यस्मात्पूर्वो नास्ति स आदिः, सति पूर्वस्मिन् यस्मात्परो नास्ति सोऽन्त्यः इति भाष्योक्तेरादित्वान्तत्वयोः समुदायसापेक्षत्वेन एकस्मिन् तत्प्रयुक्तकार्याप्रसक्त्या तत्प्राप्त्यर्थमिदमारभ्यते । एकस्मिन् = असहाये इत्यर्थः । एकशब्दश्चात्रासहायवाची, न तु सङ्ख्यावाची । एकत्वस्य वस्तुमात्रे सत्त्वेनाव्यावर्तकत्वात् । " एकादाकिनिच्चासहाये "[908] इति पाणिन्युक्तेः, ' एकाकी त्वेक एककः '[909] इत्यमरोक्तेश्च । आदिश्च अन्तश्च आद्यन्तौ इति इतरेतरद्वन्द्वः । अत्र " द्वन्द्वे घि "[910] इति सूत्रं बाधित्वा " अजाद्यदन्तम् "[911] इति सूत्रेण पूर्वनिपातः प्राप्तोऽस्मादेव निर्देशात् न भवति । " द्वन्द्वे घि " इति सूत्रेण " अजाद्यदन्तम् " इति सूत्रस्य अत्यन्तबाधस्तु न भवति, " अन्तादिवच्च "[912] इति सूत्रे अन्तशब्दस्यैव पूर्वनिपातदर्शनात्[913] । आदौ इव अन्ते इवेत्यर्थे सप्तम्यन्तात् " तत्र तस्येव " इति सूत्रेण वतिप्रत्ययः, एकस्मिन् इत्युपमेये सप्तमीनिर्देशाद् आद्यन्तवद् इत्युपमानात् सप्तम्यन्तादेव वतिप्रत्ययो विज्ञायते । उपमेये सप्तमीसत्त्वे सप्तम्यन्तात् वतिप्रत्यये मानमाह कैयटः – यथा ' मथुरावत् पाटलिपुत्रे प्राकारः ' इति । द्वयोर्ह्युपमानोपमेययोराधाराधेयसंबन्धप्रतिपादनाय वाक्यं प्रयुज्यते । यदि च तयोर्भिन्नविभक्तिकत्वं स्याद् उपमानोपमेयभाव एव न गम्यते[914] । ततश्चायं सूत्रार्थो लभ्यते – तदादौ तदन्ते च क्रियमाणं कार्यं तदादौ तदन्ते इवासहाये केवलेऽपि स्यात् ।

वतिप्रत्ययश्चोभाभ्यां सम्बध्यते ' द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते ' इति न्यायात् । ततश्च यथा ' राम ' इत्यादेरङ्गस्य मुख्यादन्तत्वात् " सुपि च "[915] इति सूत्रेण भवति दीर्घत्वम्, तथैव ' अ ' इत्यत्रापि अन्तवत्त्वातिदेशात् अदन्तत्वमाश्रित्य दीर्घः सिध्यति ।

---

908 अष्टाध्यायी – (5-3-52)

909 अमरकोषः – (वर्गः – 1 काण्ड – 3 श्लोकः – 82)

910 अष्टाध्यायी – (2-2-32)

911 अष्टाध्यायी – (2-2-33)

912 अष्टाध्यायी – (6-1-84)

913 काशिका – पदमञ्जरी - प्रकृतसूत्रे

914 महाभाष्यम् – कैयटः – प्रकृतसूत्रे

915 अष्टाध्यायी – (7-3-102)

अतिदेशसूत्रं च अन्यत्र अन्यधर्मारोपबोधकम् अथवा आरोपवत्त्वमतिदेशत्वम् । अथवा वतिघटितत्वमतिदेशत्वम् । यस्मिन् सूत्रे वत्शब्दस्य वदर्थस्य वाऽनुप्रविष्टो भवति तदतिदेशसूत्रं भवति । स चातिदेशः षोढा – शास्त्रातिदेशो यथा " कर्मवत्कर्मणा तुल्यक्रियः "[916] । कार्यातिदेशो यथा " गोतो णित् "[917] । निमित्तातिदेशो यथा " पूर्ववत्सनः "[918] । व्यपदेशातिदेशो यथा " आद्यन्तवदेकस्मिन् "[919] । तादात्म्यातिदेशो यथा " सुबामन्त्रिते पराङ्गवत्स्वरे "[920] । रूपातिदेशो यथा " तृज्वत्क्रोष्टुः "[921] । परञ्च कैयटनागेशौ वैयाकरणौ " आद्यन्तवदेकस्मिन् " इति सूत्रे कार्यातिदेशत्वेन स्वीकुरुतः । यथा – ' सर्वातिदेशानां मध्ये कार्यातिदेशस्य प्राधान्यात् कार्यातिदेशस्यैवेहाश्रयणम् '[922] ।

पदमञ्जरीकारेणापि कार्यातिदेश एवात्राङ्गीक्रियते, सर्वातिदेशानां कार्यार्थतया कार्यस्यैव प्राधान्यात् । कार्यातिदेशाभ्युपगमे यत्र किञ्चिद् बाधकं तत्रैवातिदेशान्तरं व्यवहारः प्रवर्तते । अत्र तु व्यपदेशातिदेशपक्षे एव दोषः सम्भाव्यते न तु कार्यातिदेशपक्षे । तदित्थं विज्ञेयम् – ' कुरुते ',' कुर्वे ' इत्यादौ ' त '' इट् ' प्रत्यययोः अनेकस्वरवर्णानामभावाद् ' अन्त्यो योऽच् स आदिर्यस्य ' इत्येवंरूपस्य बहुव्रीह्यर्थस्याभावाट्टिसञ्ज्ञा न स्यात्, अत एत्वमपि भवितुं नार्हतीति । कार्यातिदेशपक्षे तु ' कुर्वाते ' इत्यादौ दृष्टं टिकार्यम् ' कुर्वे ' इत्यत्राप्यतिदिश्यते इति न दोषः ।

अतिदेशवाचकः शब्दः प्रायेण वतिघटितो भवति । यथा – ' आद्यन्तवत् ', ' तृज्वत् ', ' स्थानिवत् ' । अत्र " तेन तुल्यं क्रिया चेद्वतिः "[923] इति सूत्रेण वति प्रत्ययः । वस्तुतस्तु वद्घटितत्वं अतिदेशत्वम् । यत्र सूत्रे वार्तिके वा वत् शब्दः, वदर्थो वाऽनुप्रविष्टः तद् अतिदेश नाम्नोच्यते । अतिदेशस्तावद्बौद्धिक आरोपः ।

स आरोपः शाब्दिक आर्थिकश्च भेदाद् द्विविधः । यथा –

1. " स्थानिवदादेशोऽनल्विधौ "[924] इति सूत्रे अतस्मिन् तद्बुद्धिः इत्यस्यारोपो भवति । स वद्घटितपदेन भवति । अतस्मिन्नारोपे वत्शब्दस्य श्रुतत्वात् शब्दाऽतिदेश इत्युच्यते ।

---

916 अष्टाध्यायी – (3-1-87)
917 अष्टाध्यायी – (7-1-90)
918 अष्टाध्यायी – (1-3-62)
919 अष्टाध्यायी – (1-1-21)
920 अष्टाध्यायी – (2-1-2)
921 अष्टाध्यायी – (7-1-95)
922 प्रदीपः – उद्द्योतः – प्रकृतसूत्रे
923 अष्टाध्यायी – (5-1-115)
924 अष्टाध्यायी – (1-1-56)

2. " असंयोगाल्लिट् कित् "[925] इति सूत्रे वत्पदं नास्ति । अतः इदमतिदेशसूत्रं भवति अर्थाऽतिदेशः । यतो हि अपित् लिट् तु कित् न भवति । अतस्तस्याऽर्थः किद्वत् स्वीक्रियते । वत् शब्दमन्तरेणापि वत् इत्यर्थस्य प्रतीतेस्तादृशोऽतिदेश अर्थाऽतिदेश उच्यते । अतिदेशः ' इव ', ' वत् ' इति सादृश्यवाचकशब्दयोः प्रयोगेण साक्षादवगम्यते, क्वचित्तु सादृश्यवाचकशब्दप्रयोगाभावेऽपि स परिलक्ष्यते - यथा " गोतो णित् " इति । अत्र पक्षान्तरे दोषसत्त्वाददतिदेशपक्ष एवाङ्गीक्रियते । सादृश्यवाचकशब्दप्रयोगाभावेऽप्यतिदेशो भवितुमर्हतीत्याह महाभाष्यकारः – तद्यथा ' एष ब्रह्मदत्तः, अब्रह्मदत्तं ब्रह्मदत्त इत्याह, ते मन्यामहे ब्रह्मदत्तवदयं भवति इति । एवमिहाप्यणितं णिदित्याह णिद्वदिति गम्यते '[926] इति ।

अतिदेशसूत्रं विधिसंज्ञाप्रभृतिसूत्राणां विषयं कार्यं क्षेत्रं वा विस्तारयति । यदा विधिसूत्रस्य प्रवृत्तये यस्य साधनस्याऽऽवश्यकता अस्ति तस्याऽभावात् सूत्रस्य प्रवृत्तिर्न स्यात्, तदाऽतिदेशसूत्रं तद्वद्भावं करोति । यथा –

' इदम् ' शब्दात् तृतीयाद्विवचने भ्यामि त्यदाद्यत्वे पररूपे " हलि लोपः "[927] इति सूत्रेण इदो लोपे ' अ + भ्याम् ' इत्यवस्थायां " सुपि च " इति सूत्रस्य प्रवृत्तये अदन्ताङ्गस्याऽऽवश्यकताऽस्ति । यञादौ सुपि परे सति सूत्रमिदमदन्ताङ्गस्य दीर्घं विधत्ते । अत्र च ' अ ' इत्यस्य सत्त्वेऽपि तत्र अदन्ताङ्गस्याऽभावात्सूत्राप्रवृत्तिः । अत् अन्तो यस्य सोऽदन्तः । अन्तश्च स उच्यते यस्मात् पूर्वोऽस्ति, परो नास्ति । ' अ ' इत्यस्य अङ्गस्य नास्ति कश्चित् पूर्वः, अतः स न भवति अदन्तः । अदन्तत्वाभावे तस्य दीर्घो न भवेत्, ' रामाभ्याम् ' इत्यादौ ' राम ' इत्यादेरङ्गस्य अदन्तत्वात् तत्रैव भवेत् । अतः " आद्यन्तवदेकस्मिन् " इति सूत्रमारब्धम् । तेन च सूत्रेण अदन्ताङ्गव्यतिरेकाद् दीर्घाऽप्रवृत्तिर्निराकृता, यतो हि अदन्ताङ्गाऽभाववत्यपि अकारे अदन्तरूपो धर्मो समारोप्यते । तथा च यन्निमित्तवैकल्य-प्रयुक्तवैकल्यवती सूत्रप्रवृत्तिस्तन्निमित्तमतिदेशमहिम्ना लब्धमिति ।

- **तत्रादिवत्त्वे प्रयोजनानि**

1. " आद्युदात्तश्च "[928] इति सूत्रेण प्रत्ययाद्युदात्तत्वम् ' तैत्तिरीयः ' इत्यादाविव ' औपगवः ' इत्यादावपि यथा स्यात् ।

---

[925] अष्टाध्यायी – (1-2-5)

[926] महाभाष्यम् – (7-1-90)

[927] अष्टाध्यायी – (7-2-113)

[928] अष्टाध्यायी – (3-1-3)

2. “ आर्धधातुकस्येड् वलादेः ”[929] इतीडागमः ‘ करिष्यति ’ इत्यादाविव ‘ जोषिषद् ’ इत्यादावपि स्यात्।

3. “ ञ्नित्यादिर्नित्यम् ”[930] इति सूत्रेण आद्युदात्तत्वम् ‘ आहिचुम्बकायनिः आग्निवेश्यः ’ इत्यादाविव ‘ गार्ग्यः कृतिः ’ इत्यादावपि स्यात्।

4. ‘ यस्मिन्विधिस्तदादावल्ग्रहणे ’ इति वार्त्तिकेन अजादौ विधीयमानौ इयङुवङौ ‘ श्रियः ’, ‘ भ्रुवः ’ इत्यादाविव ‘ श्रियौ ’, ‘ भ्रुवौ ’ इत्यादावपि स्याताम्।

5. “ आडजादीनाम् ”[931] इति सूत्रेण आडागमः ‘ ऐक्षिष्ट ’ इत्यादाविव ‘ अध्यैष्ट ’ इत्यादावपि यथा स्यात्।

- **अन्तवत्त्वे प्रयोजनानि**

1. “ ईदूदेद् द्विवचनं प्रगृह्यम् ”[932] इति सूत्रेण प्रगृह्यत्वम् ‘ पचेते ’ इत्यादाविव ‘ खट्वे ’ इत्यादावपि यथा स्यात्।

2. “ नपुंसकस्य झलचः ”[933] इति नुम् “ मिदचोऽन्त्यात्परः ” इत्यनेन ‘ कुण्डानि ’ इत्यादाविव ‘ यानि ’ इत्यादावपि अन्ते यथा स्यात्।

3. “ अचोऽन्त्यादि टि ”[934] इति टिसञ्ज्ञया “ टित आत्मनेपदानां टेरे ” इति सूत्रेण एत्वम् ‘ कुर्वाते ’ इत्यादाविव ‘ कुर्वे ’ इत्यादावपि स्यात्।

4. “ सुपि च ”[935] इति सूत्रेण अकारान्तस्याङ्गस्य दीर्घत्वम् ‘ रामाभ्याम् ’ इत्यादाविव ‘ आभ्याम् ’ इत्यादावपि यथा स्यात्।

5. “ येन विधिस्तदन्तस्य ”[936] इति विशेषणं तदन्तस्य सञ्ज्ञया “ अचो यत् ” इति सूत्रेण अजन्तस्य विधीयमानो यत्प्रत्ययः ‘ जेयम् ’ इत्यादाविव ‘ अध्येयम् ’ इत्यादावपि यथा स्यात्।

व्यपदेशिवद्भावेनैवैकस्मिन्नपि स्थानिनि कार्यसिद्धेः किमर्थमिदं सूत्रं क्रियते इति प्रश्ने भाष्यकारः पतञ्जलिः भाष्ये आह – ‘ सत्यन्यस्मिन्नाद्यन्तवद्भावादेकस्मिन्नाद्यन्तवद्वचनम्सत्यन्यस्मिन् यस्मात् पूर्वं

[929] अष्टाध्यायी – (7-2-35)
[930] अष्टाध्यायी – (6-1-194)
[931] अष्टाध्यायी – (6-4-72)
[932] अष्टाध्यायी – (1-1-11)
[933] अष्टाध्यायी – (7-1-72)
[934] अष्टाध्यायी – (1-1-64)
[935] अष्टाध्यायी – (7-3-102)
[936] अष्टाध्यायी – (1-1-72)

नास्ति परमस्ति स आदिरित्युच्यते । सत्यन्यस्मिन् यस्मात् परं नास्ति पूर्वमस्ति सोऽन्तः इत्युच्यते । सत्यन्यस्मिन् नाद्यन्तवद्भावादेतस्मात् कारणाद् एकस्मिन्नाद्यन्तापदिष्टानि कार्याणि न सिध्यन्ति, इष्यते च स्युरिति । तान्यन्तरेण यत्नं न सिध्यन्ति । इत्येकस्मिन्नाद्यन्तवद्वचनम् । एवमर्थमिदमुच्यते ' ।

वार्त्तिककृता तु अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन् इत्युक्तम् । अयम्भावः – यस्मात्पूर्वो नास्ति स आदिः यस्मात्परो नास्ति सोऽन्त्य इत्युच्यते । तथा च ' अ ' इत्यादावेकस्मिन् स्थलेऽपि ततः पूर्वं कश्चन नास्ति, एवं परोऽपि नास्तीति आदित्वमन्तत्वञ्च स्वतः सिद्धम् । सूत्रं न कर्तव्यमित्युक्तम् ।

भाष्यकृता तु एकस्मिन्नादित्वान्तत्वव्यवहारो गौण एव, मुख्यव्यवहारस्तु समुदायरूप एवेत्यभिप्रेत्य उक्तं तत्र भाष्ये – ' गोनर्दीयस्त्वाह – सत्यमेतत् सति त्वन्यस्मिन्निति '[937] ।

नन्वेवञ्चेत् ' व्यपदेशिवदेकस्मिन् ' इत्येवं न्यासः कर्तव्यः। ' इयाय ',' आर ' इत्यादौ ' इण् ' ऋधातोश्च धात्ववयवत्वं प्राथम्यं एकाच्त्वं चाश्रित्य इकारऋकारयोर्द्वित्वं यथा स्यात् । " एकाचो द्वे प्रथमस्य "[938] इति सूत्रे ' एकाचः ' इति बहुव्रीहिनिर्देशः । तथा च एकोऽच् यस्य यस्मिन् समुदाये वा इति बहुव्रीहिणा अन्यपदार्थरूपावयविनो लाभात् यस्यावयविनो धातोः अज्रूपोऽवयव एक एव, तस्य धात्ववयवस्य धातोर्वा " लिटि धातोरनभ्यासस्य "[939] इति सूत्रेण द्वित्वं ' जजागार ' इत्यादावेव स्यात्, यत्रकेवलोऽज्रूप एवधातुः न तु एकाच्घटितान्यवर्णसमुदायरूपः, यथा – ' इयाय ' इत्यत्र ' इ ', ' आर ' इत्यत्र ' ऋ ' इत्यादिः, तस्य एकाच्त्वाभावात् (द्वित्वस्यादित्वान्तत्वव्यपदिष्टकार्यत्वाभावात्) " आद्यन्तवदेकस्मिन् " इति सूत्रेण द्वित्वं न सिध्येत् । न च इण्धातोः वृद्ध्यायादेशयोः ऋधातोश्च वृद्धौ रपरत्वे च कृते ' आय् '' आर् ' इत्यनयोरेकाच्त्वं पचादेरिव मुख्यमेवास्तीति वाच्यम्, " द्विर्वचनेऽचि " इति रूपातिदेशेन ' इ ' ' ऋ ' अनयोरेव द्विरुक्तेः । एवं ' स देवान् यक्षत् ' इत्यादौ यजेः पञ्चमलकारे " सिब्बहुलं लेटि "[940] इति सूत्रेण सिप्, तस्य षत्वं च न सिध्येत् । प्रत्ययस्यावयवो यः सकारस्तस्य षत्वविधानात् । तस्मात् ' व्यपदेशिवदेकस्मिन् ' इत्येव सूत्र्यतां किं प्रकृतसूत्रेण ? व्यपदेशो नाम विशिष्टो मुख्योऽपदेशो व्यवहार एकाच इत्यादिः सोऽस्यास्तीति व्यपदेशी, पचिप्रभृतिस्तस्मिन्निवासहायेऽपि कार्यं स्यादिति चेन्न, अत्राह भाष्यकारः – अवचनाल्लोकविज्ञानात्सिद्धमिति । वचननिरपेक्षाल्लोक-

[937] महाभाष्यम् – प्रकृतसूत्रे

[938] अष्टाध्यायी – (6-1-1)

[939] अष्टाध्यायी – (6-1-8)

[940] अष्टाध्यायी – (3-1-34)

व्यवहारदर्शनादेव सकलेष्टसिद्ध्या " आद्यन्तवदेकस्मिन् " इति ' व्यपदेशिवदेकस्मिन् ' इति चोभयमपि नारम्भणीयम् । इण् धातुर्हि प्रयोगभेदाद्बहुरूपः, ' एति इतः यन्ति ' इत्यादिः । ' इयाय ' इत्यत्र य इकारस्तदवयव इव भासते ।

यद्वा अर्थवतो धातोर्वर्णरूपोऽयमेकोऽच् इति क्रियावाचकतावच्छेदकतदन्यधर्माभ्यां भेदव्यपदेशः । एवं सिप्रत्ययो ' जोषिषत् ' इत्यादौ इट्सहितः, ' वक्षत् ' इत्यादौ केवलोऽपीति प्रत्ययस्यायं सकार इति । लोकेऽपि बहुपुत्रवदेकपुत्रेऽपि अयं मे ज्येष्ठः पुत्रोऽयं मध्यमोऽयं कनिष्ठ इति । या काचित् गौर्न कदाचित् प्रसूता, असोष्यमाणा च, गर्भस्थेन केवलेन एकेन हता, सा उच्यते – प्रथमगर्भेण हता '[941] इति व्यवहरन्ति ।

नन्विमे गौणा व्यवहाराः । आद्यस्य पुत्रान्तरव्यावृत्तितात्पर्यकत्वात्, द्वितीयस्य च तद्गर्भध्वंसासमानकालीनगर्भेणेत्यर्थात् । शास्त्रं च मुख्ये चरितार्थं कथं गौणे प्रवर्तेतेति चेन्न, निरूढतया मुख्यतुल्यकक्षत्वात् । " ऋदोरप् "[942] इति अनुदात्तार्थपित्त्वाच्च । आद्युदात्तत्वाप्रसक्तौ तद्बाधनार्थस्य तस्य वैयर्थ्यात् । " इट ईटि "[943] इति सिचो लोपं शास्ति तज्ज्ञापयति व्यपदेशिवदेकस्मिन्निति । अन्यथा सिचः सकारमात्रस्य वल्रूपत्वेऽपि वलादित्वाभावादिटोऽनुपपत्तेः । तथा " दीर्घ इणः किति "[944] इत्यादीन्यपि ज्ञापकानि । न हि व्यपदेशिवद्भावं विना इणोऽभ्यासो लभ्यते[945] । अत एव भाष्यकृतापि लोकव्यवहारात् ' व्यपदेशवदेकस्मिन् ' इति संसाध्य सूत्रमिदं प्रत्याख्यातम् ।

- **तरप्तमपौ घः – (1-1-21)**

तरप् च तमप् च इति तरप्तमपौ, इतरेतरयोगद्वन्द्वः । " द्विवचनविभज्योपपदे तरबीयसुनौ "[946] इति सूत्रेण विहितस्तरप्प्रत्ययः । " अतिशायने तमबिष्ठनौ "[947], " तिङश्च "[948] इति द्वाभ्यां सूत्राभ्यां विहितस्तमप्प्रत्ययः । ततश्च सूत्रार्थः – तौ एतौ प्रत्ययौ घसञ्ज्ञकौ भवतः । " घरूपकल्पचेलड्ब्रुवगोत्र-

---

[941] महाभाष्यम् – प्रकृतसूत्रे

[942] अष्टाध्यायी – (3-3-57)

[943] अष्टाध्यायी – (8-2-28)

[944] अष्टाध्यायी – (7-4-69)

[945] शब्दकौस्तुभः, व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

[946] अष्टाध्यायी – (5-3-57)

[947] अष्टाध्यायी – (5-3-55)

[948] अष्टाध्यायी – (5-3-56)

मतहतेषु ङ्योऽनेकाचो ह्रस्वः "[949] इति सूत्रेण " तसिलादिष्वाकृत्वसुचः "[950] इत्यनेन सूत्रेण प्राप्तं पुंवद्भावं बाधित्वा ह्रस्वः ।

ननु " तरप्तमपौ घः " इत्यनेन घसञ्ज्ञा चेत् " ॠदोरप् "[951] इति सूत्रेण तॄ धातोः अप्प्रत्यये कृते तरः इति सिध्यति तस्यापि स्यात् । ननु ' तरः ' इति अपित्त्वात् नायं तरप् इति चेन्न, सर्वत्र चानुबन्धाः स्मर्यमाणा एव कार्यं प्रति हेतुत्वं लभन्त इति घुसञ्ज्ञाप्राप्तिः । अर्थात् – अप्प्रत्ययस्य पित्त्वात् तस्यानुबन्धपकारस्मरणेन स्यादयं तरः पित् । अत एव तस्य घसञ्ज्ञायां ' नद्यास्तरो नदीतरः ' इत्यत्र " घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः " इति सूत्रेण ह्रस्वः स्यादिति चेन्न, तमप्प्रत्ययसाहचर्यात्तद्धित एव प्रत्ययस्यैव तरपो ग्रहणात् नास्ति अबन्ते तरे प्रसक्तिः । ननु तमशब्दस्यापि प्रातिपदिकं सम्भवेत्, तर्हि पकारानुबन्धसामर्थ्यात् ' तरप् ' प्रत्यय एव गृह्यते न तु प्रातिपदिकमिति न दोषः । ननु साहचर्यं चेह व्यवस्थाहेतुः सर्वत्र नाश्रीयते । तथाहि " द्वित्रिश्चतुरिति कृत्वोऽर्थे "[952] इति सूत्रे कृत्वोऽर्थग्रहणं चतुश्शब्दविशेषणार्थं कृतम् । अन्यथा द्वित्रिशब्दसाहचर्याच्चतुश्शब्दोऽपि कृत्वोऽर्थ एव ग्रहीष्यत इति किं कृत्वोऽर्थग्रहणेन । अत आह भाष्यकारः – ' इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते यत्रास्यैतद्रूपमिति '[953] (स्वं रूपमित्यनेन यत्रास्यानुबन्धयुक्तं रूपं तत्र घसञ्ज्ञेत्यर्थः) । रूपनिर्ग्रहश्च भवितुमर्हति प्रयोगे वा उपदेशे वा । तत्र प्रयोगे कुत्रापि इत्सञ्ज्ञकविशिष्टानुपलम्भाद् उपदेशे एव रूपग्रहणं भवति । उपदेशे च आतिशायनिकः प्रत्यय एव तरप्, नायम् अप्प्रत्ययान्तस्तॄधातुरिति न दोषः ।

वस्तुतस्तु घसञ्ज्ञायां सत्यामपि न क्षतिः । ' नदीतरः ' इति ह्रस्वप्राप्तिस्तु न, समानाधिकरणे स्त्रीलिङ्गे परे घादौ ह्रस्वविधानात् । सामानाधिकरण्यं च स्वार्थिकस्यैव, न तु तरतीति व्युत्पन्नस्य तरादेः । अर्थात् – आतिशायनिकश्च तरबादिः स्वार्थिकत्वात् प्रकृत्यर्थेन अर्थवत्त्वात् भवति तत्समानाधिकरणस्तल्लिङ्गश्च । अतस्तत्र ' ब्राह्मणितरा ' इत्यादौ भवेत् ह्रस्वः, ' नदीतरः ' इत्यत्र तु असमानाधिकरणतया अस्त्रीलिङ्गतया च न ह्रस्वापत्तिः[954] ।

---

[949] अष्टाध्यायी – (6-3-43)

[950] अष्टाध्यायी – (6-3-35)

[951] अष्टाध्यायी – (3-3-57)

[952] अष्टाध्यायी – (8-3-43)

[953] महाभाष्यम् – प्रकृतसूत्रे

[954] प्रदीपः, उद्द्योतः, पदमञ्जरी, व्याकरणसिद्धान्तसुधानिधिः, भाषावृत्तेः समीक्षात्मकमध्ययनम्

भाष्ये तु ‘ यदा सैव नदी स एव तरस्तदा प्राप्नोति ’ इत्युक्तम् । तत्र भावे स्त्रियां क्तिन्प्रत्यये तस्य निष्ठावद्वचनाद् णत्वे तीर्णिरिति भाव्यमित्याशङ्क्य कैयट आह – ‘ तीर्यत इति तर इति सामान्येन पदं संस्क्रियते, पश्चाद् नद्या विशेष्यते इति न दोषः ’[955] ।

अत्र वदन्ति – आतिशायनिकप्रत्ययप्रकरण एव ‘ तादी घः ’, ‘ पातौ घः ’ इति वा सूत्रमपहाय प्रकरणपरित्यागेनोक्तसूत्रारम्भः स्वार्थिकोऽपि तरप्रत्ययोऽस्तीति ज्ञापनार्थः । तेन “ अल्पाच्तरम् ”[956] इत्यादि सिद्ध्यतीति । केचित्तु सामान्यापेक्षं ज्ञापकमाश्रित्य ईयसुनोऽपि स्वार्थिकतामाहुः । तेन ‘ अहो महीयस्तव साहसिक्यम् ’ इत्यादि प्रयोगाः समर्थिता भवन्ति[957] ।

- **घसञ्ज्ञाप्रदेशाः**

1. किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे – (5-4-11)

किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे । उदाहरणम् – किंतमाम्, प्राह्णेतमाम्, पचतितमाम् ।

2. घकालतनेषु कालनाम्नः – (6-3-17)

एषूत्तरपदेषु कालनाम्नः सप्तम्या अलुग् वा । उदाहरणम् – पूर्वाह्णेतरे, पूर्वाह्णतरे, पूर्वाह्णेतमे, पूर्वाह्णतमे ।

3. घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः – (6-3-43)

भाषितपुंस्काद्यो ङी, तदन्तस्यानेकाचो ह्रस्वः स्याद् घरूपकल्पप्रत्ययेषु परेषु, चेलडादिषु चोत्तरपदेषु । उदाहरणम् – ब्राह्मणितरा, ब्राह्मणितमा, ब्राह्मणिरूपा ।

4. नद्याः शेषस्यान्यतरस्याम् – (6-3-44)

अङ्यन्तनद्या ङ्यन्तस्यैकाचश्च घादिषु ह्रस्वो वा । उदाहरणम् – ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा ।

5. उगितश्च – (6-3-45)

उगितः परा या नदी तदन्तस्य घादिषु ह्रस्वो वा । विदुषितरा, विद्वत्तरा, विदुषितमा, विद्वत्तमा ।

- **बहुगणवतुडति सङ्ख्या – (1-1-22)**

[955] महाभाष्यम् – प्रदीपः – प्रकृतसूत्रे

[956] अष्टाध्यायी – (2-2-34)

[957] शब्दकौस्तुभः – प्रकृतसूत्रे

संख्यासञ्ज्ञासूत्रमिदम् । बहुश्च गणश्च वतुश्च डतिश्चैतेषां समाहार इति विग्रहे समाहारद्वन्द्वे प्रथमैकवचने सोर्लुकि बहुगणवतुडति इति उद्देश्यपदम् । संख्या इति विधेयपदम् । बहुगणशब्दौ प्रातिपदिके, वतुडती प्रत्ययौ तेन तदन्तस्य ग्रहणम् । ' सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ' इति निषेधस्तु न, संख्यासञ्ज्ञायां केवलयोः वतुडत्योः प्रत्यययोः प्रयोगानर्हत्वात्तदन्तग्रहणम् । तद्धितविधौ हि " ङ्याप्प्रातिपदिकात् " इत्यधिकृतम्, न च केवलस्य प्रत्ययस्य प्रातिपदिकत्वमस्तीति बोध्यम् । वतुरिह ' तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणम् ' इति परिभाषया " यत्तदेतेभ्यः परिमाणे वतुप् "[958] इति वतुप् एव तद्धितप्रत्ययो गृह्यते, न तु " तेन तुल्यं क्रिया चेद्वतिः "[959] इति सूत्रेण विहितवतिः, उकारानुबन्धविशिष्टग्रहणात् । डतिरपि तद्धितवतोः साहचर्यात् " किमः संख्यापरिमाणे डति च "[960] इति सूत्रेण विहितः तद्धितो डतिप्रत्यय एव गृह्यते, न तु ' पातेर्डत ' इति कृत्सञ्ज्ञकः[961] । अतः सूत्रार्थः – बहुगणशब्दौ वतुडतितद्धितप्रत्ययान्तौ च शब्दौ संख्यासञ्ज्ञका भवन्तीति ।

बहुशब्दोऽयं संख्यावाच्यप्यस्ति, वैपुल्यवाच्यपि, गणशब्दः संख्यावाच्यप्यस्ति, सङ्घवाच्यपि । अत्र सूत्रे संख्यावाचिनोरेव ग्रहणम्, न तु सङ्घवैपुल्यवाचिनोरपि । संख्यायतेऽनया सा संख्या इति अन्वर्थमहासञ्ज्ञाकरणात् । तस्मात्संख्यावाचिनोरेव बहुगणशब्दयोरिह ग्रहणम्[962] ।

नन्वत्र " बहुगणवतुडति संख्या " इति संख्यासञ्ज्ञासूत्रे ' संख्याग्रहणं कर्तव्यम् '[963] ' बहुगणवतुडतिसंख्या संख्या ' इत्येवं सूत्रयितव्यम्, अन्यथा बह्वादीनामेव संख्यासञ्ज्ञा स्यात्, एकादीनां संख्यासञ्ज्ञा न स्यात्, ' कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः ' इति नियमात् । ' यथा लोके गोपालमानय इत्युक्ते यस्यैषा सञ्ज्ञा भवति स एवानीयते '[964] । एवं शास्त्रेऽपि विधानात् । एवं " ष्णान्ता षट् "[965] इति सूत्रेऽनुवृत्त्यर्थं संख्याग्रहणं कर्तव्यम् ।

न च लोकेऽर्थात् प्रकरणाद्वा ' कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति ' नाऽत्र तथेति वक्तव्यम्, पाणिनिमहोदयेन बह्वादीनां संख्यासञ्ज्ञा कृता इति ज्ञानरूपप्रकरणात् संख्याप्रदेशेषु बह्वादीनां चतुर्णामेव ग्रहणं स्यात्, न तु लौकिकैकद्व्यादेः, ततश्च " संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्

---

[958] अष्टाध्यायी – (5-2-39)

[959] अष्टाध्यायी – (5-1-115)

[960] अष्टाध्यायी – (5-2-41)

[961] शब्दकौस्तुभः, वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा, काशिका – पदमञ्जरी – प्रकृतसूत्रे

[962] काशिका – न्यासः – प्रकृतसूत्रे

[963] महाभाष्यम् – प्रकृतसूत्रे

[964] महाभाष्यम् – प्रकृतसूत्रे

[965] अष्टाध्यायी – (1-1-24)

”[966],“ संख्याया विधार्थे धा ”[967],“ संख्याया अतिशदन्तायाः कन् ”[968],“ संख्यैकवचनाच्च वीप्सायाम् ”[969] इत्यादिविधिषु तेषामग्रहणात् ‘ पञ्चकृत्वः ’,‘ पञ्चधा ’,‘ पञ्चकः ’,‘ पञ्चशः ’ इत्यादिप्रयोगाः कथं स्युरिति चेन्न, ‘ उभयगतिरिह भवति ’ इति शास्त्रीय-परिभाषास्वीकारेण दोषपरिहारात् । अत्र च “ संख्याया अतिशदन्तायाः कन् ” इति सूत्रे त्यन्तशदन्तप्रतिषेधो ज्ञापकः । नहि त्यन्ता शदन्ता वा कृत्रिमा संख्या अस्ति । अस्ति हि डतिप्रत्ययः त्यन्त इति चेन्न, स तु अत्यन्तः न तु त्यन्तः । ‘ समुदायो हि अर्थवान् तस्यैकदेशो निरर्थकः ’ इति न्यायात् डतिघटकः तिः निरर्थकः । स च ‘ अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ’ इति परिभाषया अर्थवत एव तेर्ग्रहणात् डत्येकदेशस्य तेरनर्थकतया न तिशब्देन तस्य ग्रहणं स्यात् ।

एवञ्च कृत्रिमाकृत्रिमन्यायप्रवृत्तौ कृतिमायास्त्यन्तायाः शदन्ताया वा संख्याया अभावात् अतिशदन्तायाः इति पदं व्यर्थीभूतेन निषेधेन ज्ञायते यत् संख्याप्रदेशेषु कृत्रिमाकृत्रिमन्यायो न प्रवर्तते इति ।

अत एव “ कर्मणि द्वितीया ”[970] इति सूत्रे “ कर्तुरीप्सिततमं कर्म ”[971] इति सूत्रोक्ता कृत्रिमा कर्मसञ्ज्ञा गृह्यते, “ कर्तरि कर्मव्यतिहारे ”[972] इत्यत्र च कर्मशब्देन अकृत्रिमस्य क्रियारूपस्यार्थस्य ग्रहणं भवति । तथा हि ‘ कृषीवला व्यतिलुनीते ’ इति क्रियाया व्यतिहारत्वाद् आत्मनेपदं जातम् । अथ च ‘ देवदत्तस्य धान्यं व्यतिलुनन्ति ’ इत्यत्र कृत्रिमकर्मणो व्यतिहाररूपत्वात् “ शेषात् कर्तरि परस्मैपदम् ”[973] इति परस्मैपदमेव अभूत् । “ कर्तरि कर्मव्यतिहारे ” इति सूत्रेण आत्मनेपदं नाभूत् । एवं कर्मकर्तृ-करणाधिकरणशब्दैः ‘ उभयगतिरिह भवति ’ इति नियमोपपत्तिः । उभयस्य कृत्रिमस्य अकृत्रिमस्य च गतिः = बोधः, इह = व्याकरणशास्त्रे भवतीत्यर्थः । तेन संख्याप्रदेशेषु उभयोर्ग्रहणं भविष्यतीति दोषावकाशो नास्ति । कुत्रचिच्च अत्र शास्त्रे उभयं गृह्यते, क्वचित् कृत्रिमस्यैव ग्रहणम्, क्वचिच्च अकृत्रिमस्यैव । तत्र क्व कृत्रिमस्य, क्वाकृत्रिमस्य, कुत्र चोभयोरित्यत्र व्याख्यानमेव लक्ष्यानुसारिशरणम् ।

---

[966] अष्टाध्यायी – (5-4-17)
[967] अष्टाध्यायी – (5-3-42)
[968] अष्टाध्यायी – (5-1-22)
[969] अष्टाध्यायी – (5-4-43)
[970] अष्टाध्यायी – (2-3-2)
[971] अष्टाध्यायी – (1-4-49)
[972] अष्टाध्यायी – (1-3-14)
[973] अष्टाध्यायी – (1-3-78)

न चैवम् कृत्रिमाकृत्रिमन्यायवैयर्थ्यम्, अभ्यासाम्रेडितसञ्ज्ञाविषये एतस्य चारितार्थ्यात् । नन्वेवं बहुगणयोरपि एकादीनामिव संख्याप्रदेशेषु ग्रहणे सिद्धे सूत्रे तद्ग्रहणं व्यर्थमिति चेन्न, तयोर्नियतविषयपरिच्छेदहेतुत्वरूपसंख्यात्वाभावेन एकादिवैषम्यात्सूत्रे ग्रहणात् । अत एव भाष्ये एतत्सूत्रमतिदेश्यर्थं ' यदयमसंख्यां संख्येत्याह '[974] इत्युक्तम् । बहुगणयोः न साक्षान्नियतपरिच्छेदकत्वं किन्तु बहुत्वादिव्याप्यत्रित्वादिरूपपरत्वस्यैव । कतिशब्दोऽपि संख्यानकरणीभूतार्थविषयक-प्रश्नार्थकतया संख्यानकरणम् । एवं यावत्तावच्छब्दादिवत्त्वन्तानामपि संख्यानकरणत्वं स्वव्याप्य-त्रित्वादिना बोध्यं न तु साक्षात्[975] ।

अथवा नेदं सञ्ज्ञाकरणम्, किन्तु बहुगणवतुडतिप्रभृतयः संख्यावद् भवन्ति, इत्यतिदेशो बोध्यः । यथा लोके – ' अब्रह्मदत्तं कश्चिद् ब्रह्मदत्त इत्याह, तेन ब्रह्मदत्तवदयमिति विज्ञायते, तथैवात्रापि असंख्यां संख्या इत्याह आचार्यः तेन संख्यावदिति विज्ञास्यते ' अथवा संख्येति महासञ्ज्ञाकरणेन ' संख्यायतेऽनया सा संख्या ' इति अन्वर्थमहासञ्ज्ञाकरणाद् अकृत्रिमस्यापि ग्रहणसिद्धिः । उत्तरार्थमपि संख्याग्रहणं नैव कर्तव्यम्, सञ्ज्ञापरस्यापि संख्याशब्दस्य स्वरितत्वप्रतिज्ञाबलाद्वाक्यान्तरे सञ्ज्ञिपरत्वात् । अथवा " ष्णान्ता षट् " इत्यत्र ष्णान्तेति सापेक्षः स्त्रिलिङ्गेन निर्देशकृतः तत्र स्वरितत्वमन्तरेणापि प्रकृतत्वादन्यपदार्थत्वेन संख्यैवापेक्ष्यते इति भाष्यकृत्सिद्धान्तः ।

वस्तुतस्तु " वतोरिड् वा "[976]," बहुपूगगणसङ्घस्य तिथुक् "[977]," वतोरिथुक् "[978]," षट्कति-कतिपयचतुरां थुक् "[979] इत्यादिभिः सूत्रैः डति परे आगमानां विधानसामर्थ्यात् बह्वादीनां संख्याकार्यं भवतीति[980] ज्ञापनेनैव सकलेष्टप्रतिपत्तौ सूत्रमिदं निरर्थकमिति प्रत्याख्यातं भाष्यकृतेति विज्ञेयम् ।

न चैवं पूगादीनामपि कृत्वसुजादिकमपि संख्याकार्यं स्यात् । बहुगणशब्दयोः कार्यसामान्ये संख्यात्वं ज्ञाप्यते, पूगादीनां तु विशेषापेक्षमेवेति वैषम्ये मानाभावादिति वाच्यम् । लक्ष्यानुरोधेन तदङ्गीकारात् । एतदनुरोधात्सूत्रमेतदावश्यकमिति शब्दकौस्तुभकृतः[981] ।

---

[974] महाभाष्यम् – प्रकृतसूत्रे

[975] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[976] अष्टाध्यायी – (5-1-23)

[977] अष्टाध्यायी – (5-2-52)

[978] अष्टाध्यायी – (5-2-53)

[979] अष्टाध्यायी – (5-2-51)

[980] महाभाष्यम् – प्रदीपः – प्रकृतसूत्रे

[981] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

बहुत्वस्य संख्यात्वमस्ति न वेति संशये उच्यते – न चैवं त्रित्वादिवत्संख्या । न चैवम् ‘ असंख्यां संख्येत्याह ’ इति भाष्यविरोधः, तद्भाष्यस्य वतुडतिविषयकत्वेनाप्युपपत्तेः । किञ्च बहुत्वस्य संख्यात्वाभावे ‘ संख्या चैव तथा तिङाम् ’ इति भाष्ये संख्यापदेन बहुत्वं विवक्षितम् ।

तथा “ तस्य पूरणे डट् ”[982] इति सूत्रे ‘ संख्यापूरणे इति वक्तव्यम् ’ इति वार्त्तिके ‘ बहुतिथः ’ इति सिद्ध्यर्थं संख्यापदेन बहुत्वं विवक्षितञ्च विरुद्ध्येत । तस्मादस्तु बहुत्वं त्रित्वादिरूपा संख्यैवेति चेन्न, अत्र प्रकरणे संख्यापदेन संख्यावाचकपदस्यैव विवक्षितत्वात् । किञ्च बहुत्वस्य संख्यात्वे भूर्यादीनां संख्याकार्यं दुर्वारम् ।

न च ‘ बहुगण ’ इति नियमेन भूर्यादीनां निराकरणम्, एतत्सूत्रस्य भाष्ये प्रत्याख्यानात् । तथा हि – ‘ बह्वादीनामग्रहणम् ’ । केनेदानीं संख्याप्रदेशेषु संख्यासम्प्रत्ययो भविष्यति ? ज्ञापकात् सिद्धम् यदयं “ वतोरिड् वा ” इति संख्यायां विहितस्य कनो वत्वन्ताद् इटं शास्ति । वतोरेव तज्ज्ञापकं स्यात्[983] ।

- **भट्टोजिदीक्षितानामभिप्रायः**

भट्टोजिदीक्षितैः वैपुल्यवाचिनः बहुशब्दस्य, संघवाचिनः गणशब्दस्य सङ्ख्यासञ्ज्ञावारणार्थः बहुगणशब्दयोः ग्रहणं नियमार्थं स्वीक्रियते ।

तद्रीत्या सूत्रे सङ्ख्यासञ्ज्ञायाः सङ्ख्यायते अनया इति अन्वर्थत्वविज्ञानात् सङ्ख्यावाचिनोरेव बहुगणयोः सूत्रे ग्रहणम् । तच्चोक्तव्युत्पत्त्या तयोर्ग्रहणे सिद्धे नियमार्थम् । तथा च तद्रीत्यायं नियमाकारः अनियमबहुत्ववाचिनां मध्ये अनयोरेव सङ्ख्यासञ्ज्ञा न तु भूर्यादीनामिति ।

बहूपगणसंघ इत्यादि सूत्रे विशेषाश्रयणात् संघवैपुल्यवाचिनोरपि बहुगणशब्दयोः सङ्ख्याकार्यं स्यादिति तु भट्टोजिदीक्षितैः नाङ्गीक्रियते । अनियतसङ्ख्यावाचिनोरप्येतयोः सङ्ख्याकार्यं भवति – इत्येतावन्मात्रज्ञापनेन तद्ग्रहणस्य चारितार्थ्ये सङ्ख्यामप्रतिपादयतोः सङ्ख्याकार्यकल्पने गौरवेण उक्तमतस्य परास्तत्वात् । तस्मात् भट्टोजिदीक्षितरीत्या बहुगणग्रहणं पूर्वोक्तरीत्या नियमार्थं बोध्यम् ।

- **नागेशभट्टानामभिप्रायः**

नागेशभट्टैस्तु भट्टोजिदीक्षितानां मतं नाङ्गीक्रियते । तद्रीत्या बहुगणशब्दयोः नियतविषये परिच्छेदहेतुत्वाभावेनासङ्ख्यात्वात् सूत्रे तयोर्ग्रहणेऽप्राप्ते ग्रहणार्थं न तु नियमार्थम् । अत एव

---

[982] अष्टाध्यायी – (5-2-48)

[983] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

भाष्यकारस्य अतिदेशार्थमिदं सूत्रम् इति मतं संगच्छते । तथा च असङ्ख्यां सङ्ख्येत्याह इति भाष्यमत्र नागेशभट्टरीत्या प्रमाणम् ।

एवञ्च नागेशभट्टरीत्या बहुगणयोः सङ्ख्यात्वस्याभावात् सङ्ख्यात्वविधानं तयोर्ग्रहणस्य प्रयोजनं लभ्यते । न तु भट्टोजिदीक्षितरीत्या सङ्ख्यावाचकत्वमाश्रित्य नियमार्थत्वस्वीकार उचितः इति तेषामभिप्रायः । अत एव शब्देन्दुशेखरे भट्टोजिदीक्षितमतमनूद्य नागेशभट्टैः निरस्यते ।

यद्यपि नागेशभट्टमतस्वीकारे संघवैपुल्यवाचकयोः बहुगणशब्दयोः सङ्ख्यासञ्ज्ञा प्राप्नोति । परं सूत्रे परस्परसाहचर्येण त्र्यादिसङ्ख्याव्यापकधर्मवाचिनोरेव ग्रहणेन तद्रीत्या उक्तापत्तिवारणेन दोषाभावात् ।

एवञ्च बहुगणग्रहणं नियमार्थमिति भट्टोजिदीक्षितमतम् । तत्तु अप्राप्तसङ्ख्याविधानार्थमिति नागेशभट्टानां मतम् । तेन बहुगणग्रहणप्रयोजनविषयकः मतभेदः अनयोः स्पष्टः इति बोध्यम्[984] ।

- **संख्यासञ्ज्ञाप्रदेशाः**

1. अक्षशलाकासंख्याः परिणा – (2-1-10)

एते परिणा समस्यन्ते । उदाहरणम् – एकपरि ।

2. संख्यापूर्वो द्विगुः – (2-1-52)

संख्यापूर्वो द्विगुः स्यात् । उदाहरणम् – पञ्चगवम् ।

3. संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये – (2-2-25)

संख्येयार्थया संख्ययाव्ययादयः समस्यन्ते, स बहुव्रीहिः । उदाहरणम् – उपदशा, आसन्नविंशा, अदूरत्रिंशाः, अधिकचत्वारिंशाः, द्वित्राः

4.दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्र-संख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु – (3-2-21)

एषु कृञष्टः स्यात्, अहेत्वादापि । उदाहरणम् – एककरः, द्विकरः ।

5. संख्याव्ययादेर्ङीप् – (4-1-26)

संख्याव्ययादेरूधोऽन्ताद्बहुव्रीहेः ङीप्स्यात्स्त्रियाम् । उदाहरणम् – द्व्युध्नी ।

6. आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् – (5-1-19)

तदर्हति इत्येतदभिव्याप्य ठञधिकारमध्ये ठञोऽपवादष्ठगधिक्रियते गोपुच्छादीन् वर्जयित्वा ।

---

[984] पाणिनिसञ्ज्ञासूत्रविमर्शः – (पृ. – 83)

7. संख्याया अतिशदन्तायाः कन् – (5-1-22)

संख्यायाः कन् स्यात् आर्हीयेष्वर्थे, न तु त्यन्तशदन्तायाः । उदाहरणम् – पञ्चभिः क्रीतः पञ्चकः, बहुकः ।

8. वतोरिड् वा – (5-1-23)

वत्वन्तात् कनः इड् वा स्यात् । उदाहरणम् – तावतिकः, तावत्कः ।

9. संख्यायाः सञ्ज्ञासंघसूत्राध्ययनेषु – (5-1-58)

तदस्य परिमाणमित्यर्थे प्रथमान्तात् संख्यात्मकपरिमाणवाचिनो यथाविहितं प्रत्ययाः स्युः । उदाहरणम् – पञ्चैव पञ्चकाः शकुनयः, पञ्च परिमाणमस्य पञ्चकः संघः, अष्टौ अध्यायाः परिमाणमस्य सूत्रस्य अष्टकं पाणिनीयम्, पञ्चावृत्तयः परिमाणमस्य अध्ययनस्य पञ्चकमध्ययनम् ।

10. किमः संख्यापरिमाणे डति च – (5-2-41)

का अस्य संख्या इत्येवं संख्यापरिमाणविषयकप्रश्ने विद्यमानात् किंशब्दात् प्रथमान्ताद् अस्य इत्यर्थे डतिप्रत्ययो वतुप्प्रत्ययश्च स्यात्, तस्य च वस्य घः । उदाहरणम् – का संख्या एषां ते कति, कियन्तः ।

11. संख्याया विधार्थे धा – (5-3-42)

क्रियाप्रकारार्थे वर्तमानात् संख्याशब्दात् स्वार्थे धा स्यात् । उदाहरणम् – चतुर्धा, पञ्चधा ।

12. पादशतस्यसंख्यादेर्वीप्सायां वुन् लोपश्च – (5-4-1)

संख्यावाचकशब्दपूर्वकात् पादशब्दात् शतशब्दाच्च वीप्साविशिष्टार्थवृत्तेः स्वार्थे वुन्प्रत्ययः स्यात्, प्रकृतेरन्त्यस्य लोपश्च । उदाहरणम् – द्वौ पादौ ददाति द्विपदिकां ददाति । द्विशतिकां ददाति ।

13. संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् – (5-4-17)

अभ्यावृत्तिर्जन्म, क्रियाजन्मगणनवृत्तेः संख्याशब्दात् स्वार्थे कृत्वसुच् स्यात् । उदाहरणम् – पञ्चवारान् भुङ्क्ते इति पञ्चकृत्वः भुङ्क्ते ।

14. संख्यायाश्च गुणान्तायाः – (5-4-59)

गुणपदान्तायाः संख्यायाः कृञो योगे कृषौ डाच् । उदाहरणम् – द्विगुणं क्षेत्रं करोति इति द्विगुणाकरोति क्षेत्रम् ।

15. अहःसर्वैकदेशसंख्यातपुण्याश्च रात्रेः – (5-4-87)

एभ्यः संख्याव्ययाभ्याञ्च रात्रेः समासान्त-अच् स्यात् । उदाहरणम् – द्वयोः रात्र्योः समाहारः इति द्विरात्रम् ।

16. न संख्यादेः समाहारे – (5-4-89)

समाहारे वर्तमानस्य संख्यादेरह्नादेशो न स्यात्। द्वयोरह्नोः समाहारः इति द्व्यहः, त्र्यहः।

17. संख्यासुपूर्वस्य – (5-4-140)

संख्यासुपूर्वस्य पादस्य लोपः स्यात्समासान्तो बहुव्रीहौ। उदाहरणम् – द्विपात्

18. संख्या – (6-2-35)

द्वन्द्वे संख्यावाचि पूर्वपदं प्रकृत्या भवति। उदाहरणम् – एकादश, द्वादश।

- **ष्णान्ता षट् – (1-1-23)**

षट्सञ्ज्ञाविधायकमिदं सूत्रम्। ष् च न् च ष्णौ इतरेतरयोगद्वन्द्वः। ष्टुत्वेन नस्य णः। ष्णौ अन्तौ यस्याः सा ष्णान्ता द्वन्द्वगर्भो बहुव्रीहिसमासः। ‘ द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते ’ इति नियमेन अन्तपदस्य द्वन्द्वान्ते श्रूयमाणतया षकारनकाराभ्यां प्रत्येकमभिसम्बन्धात् षकारान्ता नकारान्ता च भवति। तस्मात् ‘ षकारान्ता नकारान्ता च या संख्या सा षट्सञ्ज्ञिका भवति ’ इति सूत्रार्थः। षट् तिष्ठन्ति, षट् पश्य। पञ्च, सप्त, नव, दश इति उदाहरणानि

नन्वत्र संख्यापदं नास्ति। न च “ बहुगणवतुडति संख्या ” इति पूर्वसूत्रतः ‘ संख्या ’ इति पदमनुवर्तते। तस्य सञ्ज्ञात्वेन लौकिकसंख्यावाचकत्वाभावादिति चेदुच्यते अतिदेशपक्षे संख्यापदानुवृत्तेः सुस्थात्वात्।

सञ्ज्ञापक्षेऽपि स्त्रीत्वविशिष्टान्यपदार्थबोधकबहुव्रीहेः विशेष्यसाकाङ्क्षतया अस्वरितस्यापि संख्यापदस्यानुवृत्त्या शब्दाधिकारेणात्र तस्याभिमतार्थ-परत्वसिद्धेः। एतत्पूर्वसूत्रे भाष्ये स्पष्टम्। पूर्वसूत्रात् ‘ संख्या ’ इति पदमनुवृतं सत् ‘ ष्णान्ता ’ इत्यनेन विशेष्यते। ‘ ष्णान्ता ’ इति स्त्रीलिङ्गनिर्देशात् , अन्तग्रहणाच्च। अन्यथा ‘ ष्णौ ’ इत्येवोच्येत, शब्दस्वरूपं विशेष्यमादाय तदन्तविधौ ‘ षकारनकारान्ताः षट्सञ्ज्ञाः स्युः ’ इत्यर्थे ‘ विप्रुषः ’, ‘ पामानः ’ इत्यादावपि षट्सञ्ज्ञायां जश्शसोर्लुगापत्तिः। अतः शब्दाधिकारात् पूर्वसूत्रे सञ्ज्ञाशब्दोऽपि संख्याशब्द इह षट्सञ्ज्ञायामुद्देश्यो भवन् ष्णान्तविशेषितो लोकप्रसिद्धः ‘ षष् ’,‘ पञ्चन् ’ इत्यादिसंख्यावाचको भवति। तत्र संख्याशब्दस्य स्वरूपपरतया ष्णान्तत्वासम्भवात् तद्बोध्येषु बहुगणादिष्वपि तथात्वात् संख्याशब्देनात्र संख्याप्रकारकसंख्येयविशेष्यकबोधजनकाः पञ्चादयो गृह्यन्ते। एतदर्थमेव सूत्रे स्त्रीलिङ्गनिर्देशः,

तदर्थमेव चान्तग्रहणम् [985] । तत्सामर्थ्याच्च पूर्वत्र सूत्रे सञ्ज्ञापरमपि संख्याग्रहणमिह सञ्ज्ञिपरं सम्पद्यते [986] ।

ननु नपुंसकशतशब्दात् परयोर्जश्शसोश्शिभावे " नपुंसकस्य झलचः "[987] इति अजन्ताङ्गस्य नुमि " सर्वनामस्थाने चासम्बुद्धौ "[988] इत्युपधादीर्घे ' शतानि ' इति सिध्यति । एवम् ' सहस्राणि ' इत्यपि । अत्र " अट्कुप्वाङ्नुम्व्यवायेऽपि "[989] इति णत्वमतिरिच्यते । इह ' यदागमाः ' इति न्यायेन नुमोऽङ्गावयवत्वात् शतन् इत्यस्य सहस्रन् इत्यस्य च नकारान्ताङ्गत्वात् संख्यावाचकत्वाच्च " ष्णान्ता षट् " इति सूत्रेण षट्सञ्ज्ञायाम् " षड्भ्यो लुक् "[990] इति सूत्रेण जश्शसोर्लुक् स्यादत आह भाष्यकारः – इह तावच्छतानि सहस्राणीति ' सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य '[991] इति । सर्वनामस्थानं परत्वेन आश्रित्य जातस्य नुमः सन्निपातपरिभाषया सर्वनामस्थानभूतजश्शसोर्लुकं प्रति निमित्तं न स्यात्, तथा च लुकोऽभावे फलाभावादत्र षट्सञ्ज्ञा न स्यात् ।

यत्तु ' षट्सञ्ज्ञायामुपदेशवचनम् ' इति भाष्यवार्त्तिकमाश्रित्य उपदेशकाले (प्रत्ययविधानकाले) षकारनकारान्ता संख्या षट् भवतीति नात्र दोषः इति तन्न, भाष्यकृतैव सन्निपातपरिभाषामाश्रित्य तद्वार्त्तिकस्य प्रत्याख्यानात् [992] ।

ननु ' अष्टन् + आम् ' इति स्थिते परत्वान्नित्यत्वाच्च " अष्टन आ विभक्तौ "[993] इति सूत्रेण आत्वे कृते नान्तत्वाभावात् षट्सञ्ज्ञाऽनुपपत्त्या " षट्चतुर्भ्यश्च "[994] इति सूत्रेण नुडागमो न स्यादिति तदर्थमेवोपदेशग्रहणमावश्यकमिति चेन्न, यथोद्देशपक्षे अन्तरङ्गतया विभक्त्युत्पत्तेः प्रागेव षट्सञ्ज्ञाप्रवृत्तौ तस्या एव स्थानिवद्भावेनाकारन्ते सुलभत्वात् षट्सञ्ज्ञकत्वेन नुटः सिद्धत्वात् ।

अथ कार्यकालपक्षे नुड्विध्येकवाक्यतापन्नायाः षट्सञ्ज्ञाया अपि विभक्तिसापेक्षतया अन्तरङ्गत्वाभावादात्वस्यैव प्रथमं प्रवृत्तेर्दोषतादवस्थ्यम्, यथोद्देशपक्षेऽपि षट्सञ्ज्ञायां

---

[985] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे
[986] प्रौढमनोरमा – प्रकृतसूत्रे
[987] अष्टाध्यायी – (7-1-72)
[988] अष्टाध्यायी – (6-4-8)
[989] अष्टाध्यायी – (8-4-2)
[990] अष्टाध्यायी – (7-1-22)
[991] महाभाष्यम् – प्रकृतसूत्रे
[992] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे
[993] अष्टाध्यायी – (7-2-84)
[994] अष्टाध्यायी – (7-1-55)

नकारस्योपजीव्यत्वाददल्विधित्वादतिदेशदौर्लभ्यमिति चेत् सत्यम्, “ अष्टनो दीर्घात् ”[995] इति स्वरसूत्रे दीर्घग्रहणेन कृतात्वस्यापि षट्सञ्ज्ञाज्ञापनात् ।

तथाहि – अष्टन्शब्दस्य ‘ न्रः संख्यायाः ’ इत्याद्युदात्तप्रसङ्गेऽपि घृतादिपाठादन्तोदात्तत्वम् । तस्य ‘ अष्टभिः ’ इति मध्योदात्तम्, ‘ अष्टाभिः ’ इत्यन्तोदात्तं चेति रूपद्वयमिष्टम् । तत्र च “ षट्त्रिचतुर्भ्यो हलादिः ”[996] इति विभक्तेरुदात्तत्वं प्राप्तम्, तद्बाधित्वा च “ झल्युपोत्तमम् ”[997] इति मध्योदात्तत्वं प्राप्तम्, षट्त्रिचतुर्भ्यः परा या झलादिर्विभक्तस्तदन्ते पदे उपोत्तममुदात्तं भवतीति तस्यार्थः । तद्बाधनार्थम् “ अष्टनो दीर्घात् ” इति सूत्रम् । दीर्घान्तादष्टनः परा सर्वनामस्थानभिन्ना विभक्तिरुदात्ता स्यादिति तदर्थः । आत्वाभावपक्षे तत्प्रवृत्तिर्मा भूदिति दीर्घपदोपादानम् । यदि त्वात्वपक्षे षट्सञ्ज्ञा न स्यात्तदा ‘ अष्टनः ’ इति विभक्त्युदात्तस्य तत्रैव सावकाशतया आत्वाभावपक्षे “ झल्युपोत्तमम् ” इत्यनेन परत्वादेव विभक्त्युदात्तबाधोपपत्तौ दीर्घादित्यस्य वैयर्थ्यं स्यात्[998] ।

यत्तु सन्निपातपरिभाषायाः “ कृन्मेजन्तः ”[999] इति सूत्रे भाष्येऽनित्यत्वस्योक्ततया कदाचिदत्र तदप्रवृत्त्या तया समाधानं न वरमिति तन्न, इष्टस्थलेऽपि तदप्रवृत्तौ परिभाषावैयर्थ्यापत्तेः । तदुक्तं भाष्ये ‘ प्रतिविधेयञ्च दोषेषु ’ अनिष्टस्थलेऽनित्यत्वं न त्विष्टस्थले इत्यर्थः[1000] ।

- **षट्सञ्ज्ञाप्रदेशाः**

1. षट्कतिकतिपयचतुरां थुक् – (5-2-51)

एतेषां थुगागमः स्याड्डटि । उदाहरणम् – षण्णां पूरणः षष्ठः, कतिथः, कतिपयथः, चतुर्थः ।

2. षट्त्रिचतुर्भ्यो हलादिः – (6-1-176)

एभ्यो हलादिर्विभक्तिरुदात्ता स्यात् । उदाहरणम् – आषड्भिर्हूयमानः, त्रिभिष्ट्वं देव, चतुर्णाम् ।

3. षट्भ्यो लुक् – (7-1-22)

षड्भ्यः परयोर्जश्शसोर्लुक् स्यात् । उदाहरणम् – पञ्च, षट्, कति ।

4. षट्चतुर्भ्यश्च – (7-1-55)

[995] अष्टाध्यायी – (6-1-169)

[996] अष्टाध्यायी – (6-1-176)

[997] अष्टाध्यायी – (6-1-177)

[998] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

[999] अष्टाध्यायी – (1-1-39)

[1000] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

षट्सञ्ज्ञकेभ्यश्चतुरश्च परस्य आमो नुडागमः स्यात्। उदाहरणम् – षण्णाम्, पञ्चानाम्, सप्तानाम्, चतुर्णाम्।

- **डति च – (1-1-24)**

अत्र " बहुगणवतुडति संख्या " इति सूत्रात् संख्या इति " ष्णान्ता षट् " इति सूत्रात् ' षट् ' इति चानुवर्तते। डति इति प्रत्ययः तेन तदन्तस्य ग्रहणम्। ' सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ' इति निषेधस्तु न, षट्सञ्ज्ञायां केवलस्य डतिप्रत्ययस्य प्रयोगानर्हत्वात्तदन्तग्रहणम् । तद्धितविधौ हि " ङ्याप्प्रातिपदिकात् " इत्यधिकृतम्, न च केवलस्य प्रत्ययस्य प्रातिपदिकत्वमस्तीति बोध्यम् । डतिप्रत्ययान्तासंख्या षट्सञ्ज्ञिका भवतीति सूत्रार्थः।

भाष्ये तु ' इदं डतिग्रहणं द्विः क्रियते। संख्यासञ्ज्ञायां षट्सञ्ज्ञायाञ्च। एकं शक्यमकर्तुम्। कथम्? यदि तावत् संख्यासञ्ज्ञायां क्रियते, षट्सञ्ज्ञायां न करिष्यते। कथम्? " ष्णान्ता षट् " इत्यत्र डतीत्यनुवर्तिष्यते । अथ षट्सञ्ज्ञायां क्रियते । संख्यासञ्ज्ञायां न करिष्यते । " डति च " इत्यत्र संख्यासञ्ज्ञाऽप्यनुवर्तिष्यते ' इति। एवमेकं डतिग्रहणं प्रत्याख्यातम्।

- **क्तक्तवतू निष्ठा – (1-1-25)**

क्तश्च क्तवतुश्च इति इतरेतरयोगद्वन्द्वे प्रथमा द्विवचनान्तम् ' क्तक्तवतू ' इति उद्देश्यपदम्। ' निष्ठा ' इति प्रथमान्तं विधेयपदम्। निष्ठेति प्रत्येकाभिप्रायमेकवचनम्। सूत्रार्थः – क्तक्तवतू प्रत्ययौ निष्ठासञ्ज्ञकौ भवतः। उदाहरणम् – पठितः, पठितवान्। चितः, चितवान्। स्तुतः, स्तुतवान्। भिन्नः, भिन्नवान्। पक्वः, पक्ववान्।

ननु क्तक्तवत्वोः सिद्धयोर्निष्ठेति सञ्ज्ञासिद्धिः, सिद्धायां निष्ठासञ्ज्ञायां क्तक्तवत्वोर्विधानमित्यन्योन्याश्रयदोषः स्यादिति चेत् । अत्राहुः भाविनी सञ्ज्ञाऽत्र विज्ञायते स भूते भवति यस्योत्पन्नस्य निष्ठेति सञ्ज्ञा भवति इत्याश्रयणे सामर्थ्यात् क्तक्तवत्वोर्विधानमेतदिति नास्त्युक्तदोष इति[1001]।

इहानुबन्धाः कार्यार्थमुपादीयन्ते न तु प्रयोगार्थम्, तेषां लोपविधानात् प्रयोगो नास्ति । तथा चानुबन्धलोपे कृते यत्रावशिष्टभागस्यात्यन्तसारूप्यं तत्र सन्देहः स्यात्, क्वानुबन्धकार्यं भवतु क्व वा

[1001] वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे

नेति । न च यथा उत्पतितेऽपि काके देवदत्तगृहस्येतरव्यावृत्तिबुद्धिः, तथाऽत्रापि उपलक्षणस्य व्यावर्त्तकता भविष्यतीति वाच्यम्, काकादिनाऽपि हि वेदिकापुण्डरीकादिकं स्थिरं किञ्चित्परिचाय्यते तद्बलाच्चोड्डिनेऽपि काके व्यवहारो न सङ्कीर्य्यते । न चेह परिचेयान्तरमुपलभ्यते क्तप्रत्यय-तन्प्रत्यययोः काकादिकल्पौ हि ककारनकारौ तदपगमे संवृत्ते ' त ' इत्यत्र परिचेयस्य परस्परव्यावृत्तस्य दुर्वचत्वात् । तदुक्तं भाष्ये – ' निष्ठासञ्ज्ञायां समानशब्दप्रतिषेधः ' इति ।

मैवम्, अध्रुवेणानुबन्धेन नियतसन्निधाना अर्थाः कारककालादयो लक्ष्यन्ते, तद्दर्शनादनुबन्धस्मृतौ च तल्लक्षितानां कार्याणां साधुत्वं विज्ञायते । तत्र यदा ' देवदत्तेन लूनः शालिः ' इति केनचित्प्रयुक्ते लक्षणज्ञेन तदा कर्मभूतकालावगमात् क्तप्रत्ययोऽयमिति निर्णीयते । यदा तु ' लोतमालभेत ' इति प्रयोगस्तदा मेषवाची ककारानुपलक्षितः तन्प्रत्ययान्तलोतशब्दः प्रयुक्त इति निश्चिनोति,[1002] ' हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन् '[1003] इत्युणादिसूत्रात् । अत एवाह भाष्यकारः – ' कारककालविशेषात् सिद्धम् '[1004] इति ।

- **निष्ठासञ्ज्ञाप्रदेशाः**

1. निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः – (1-2-19)

एभ्यः सेट् निष्ठा कित् न स्यात् । उदाहरणम् –शयितः शयितवान् । प्रस्वेदितः, प्रस्वेदितवान् । प्रमेदितः, प्रमेदितवान् । प्रक्ष्वेदितः, प्रक्ष्वेदितवान् ।

2. निष्ठा – (2-2-36)

निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् । उदाहरणम् – कृतकृत्यः ।

3. वाऽऽहिताग्न्यादिषु – (2-2-37)

आहिताग्न्यादिषु निष्ठान्तस्य पूर्वप्रयोगो वा । आहिताग्निः, अग्न्याहितः ।

4. न लोकाव्ययनिष्ठाखलर्थतृनाम् – (2-3-69)

एषां प्रयोगे षष्ठि न स्यात् । उदाहरणम् – विष्णुना हता दैत्याः, दैत्यान् हतवान् विष्णुः ।

5. निष्ठा – (3-2-102)

भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् । उदाहरणम् – स्तुतः त्वया विष्णुः, विष्णुर्विश्वं कृतवान् ।

6. स्फायः स्फी निष्ठायाम् – (6-1-22)

[1002] शब्दकौस्तुभः, प्रदीपः – प्रकृतसूत्रे

[1003] दशपाद्युणादिवृत्तिः – (6-7)

[1004] महाभाष्यम् – प्रकृतसूत्रे

‘ स्फायी वृद्धौ ’ इति धातोः स्फीभावः स्यात् निष्ठायां परतः । उदाहरणम् – स्फीतः ।

7. स्त्यः प्रपूर्वस्य – (6-1-23)

प्र उपसर्गात् परतः स्त्यः सम्प्रसारणं स्यात् निष्ठायाम् । उदाहरणम् - उदाहरणम् – प्रस्तीतः ।

8. निष्ठा च द्व्यजनात् – (6-1-202)

निष्ठान्तस्य द्व्यचः सञ्ज्ञायामादिरुदात्तः न तु आकारः । उदाहरणम् – दत्तः ।

9. निष्ठायां सेटि – (6-4-52)

सेटि निष्ठायां परतो णेर्लोपः स्यात् । उदाहरणम् – भावितः, भावितवान् । कारितम् ।

10. निष्ठायामण्यदर्थे – (6-4-60)

ण्यर्थो भावकर्मणी, ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात् । उदाहरणम् – क्षीणः, क्षीणवान् ।

11. ह्लादो निष्ठायाम् – (6-4-95)

ह्लादोऽङ्गस्योपधाया ह्रस्वः स्यात् निष्ठायाम् । उदाहरणम् – प्रह्लन्नः, प्रह्लन्नवान् ।

12. श्वीदितो निष्ठायाम् – (7-2-14)

श्वयतेरीदितश्च निष्ठाया इट् न स्यात् । उदाहरणम् – शूनः, शूनवान् । उन्नः, उत्तः । उद्विग्नः ।

13.यस्य विभाषा – (7-2-15)

यस्य क्वचिद्विभाषया इड्विहितस्ततो निष्ठाया इण्न स्यात् । उदाहरणम् – विधूतः, वृद्धः ।

14. आदितश्च – (7-2-16)

आकारेतो निष्ठाया इण्न स्यात् । भिन्नः, क्ष्विण्णः ।

15. विभाषा भावादिकर्मणोः – (7-2-17)

भावे आदिकर्मणि च आदितो निष्ठाया इड्वा स्यात् । उदाहरणम् – प्रस्वेदितम्, प्रस्विन्नम् चैत्रेण । प्रस्वेदितः प्रस्विन्नो वा चैत्रः ।

16. इण्निष्ठायाम् – (7-2-47)

निरः कुषो निष्ठाया इट् स्यात् । उदाहरणम् – निष्कुषितः, निष्कुषितवान् ।

17. रदाभ्यां निष्ठातो नः पूर्वस्य च दः – (8-2-42)

रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात्, निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च । उदाहरणम् – स्तीर्णः, शीर्णः, भिन्नः, छिन्नः ।

18. संयोगादेरातो धातोर्यण्वतः – (8-2-43)

संयोगादेराकारान्ताद् यण्वतो धातोः निष्ठातस्य नः स्यात् । उदाहरणम् – द्राणः, ग्लानः ।

19. ल्वादिभ्यः – (8-2-44)

लूञ् छेदने इत्यतः वृञ् वरणे इति यावदेकविंशतेर्लूञादिभ्यः निष्ठातस्य नः स्यात् । उदाहरणम् – लूनः, लूनवान् । जीनः, जीनवान् ।

20. ओदितश्च – (8-2-45)

ओकारेतो धातोः निष्ठातस्य नत्वं स्यात् । उदाहरणम् – भुग्नः, उच्छूनः, प्रहीणः ।

21. क्षियो दीर्घात् – (8-2-46)

दीर्घान्तात् क्षियो निष्ठातस्य नः स्यात् । उदाहरणम् – क्षीणाः क्लेशाः, क्षीणवान् ।

22. शुषः कः – (8-2-51)

शुषः परस्य निष्ठातस्य कः स्यात् । उदाहरणम् – शुष्कः, शुष्कवान् ।

23. पचो वः – (8-2-52)

पचेः परस्य निष्ठातस्य वः स्यात् । उदाहरणम् – पक्वः, पक्ववान् ।

24. क्षायो मः – (8-2-53)

' क्षै क्षये ' इति धातोः परस्य निष्ठातस्य मः स्यात् । उदाहरणम् – क्षामः ।

(ग) सर्वनामसञ्ज्ञाप्रकरणम्

- **सर्वादीनि सर्वनामानि – (1-1-26)**

सर्व आदिः प्रथमावयवयो येषां समुदायरूपाणि तानि सर्वादीनि समुदायरूपाणि

ननु बहुव्रीहेरन्यपदार्थप्रधानत्वात् सर्वशब्दस्य च समासवर्तिपदार्थत्वादन्यपदार्थत्वाभावाद् विश्वादिशब्दानामेव सर्वादिशब्देन बहुव्रीहिणावगमात् सर्वनामसञ्ज्ञा स्यात्, न तु सर्वशब्दस्यापीति चेत्, उच्यते – अत्र आदिशब्दोऽवयववाची । तथा चोक्तम् –

सामीप्येऽथ व्यवस्थायां प्रकारेऽवयवे तथा ।
चतुर्ष्वर्थेषु मेधावी आदिशब्दं तु लक्षयेत् ॥

आदिशब्दः सामीप्यादिषु चतुर्ष्वर्थेषु वर्तते । तद्यथा सामीप्ये – ग्रामादौ घोषः, ग्रामसमीपे इत्यर्थः । व्यवस्थायाम् – वर्णा ब्राह्माणादयः, अनवच्छिन्नक्रमेण व्यवस्थिता इत्यर्थः । प्रकारे – आढ्या देवदत्तादयः, देवदत्तसदृशा इत्यर्थः । अवयवे – स्तम्भादयो गृहाः, स्तम्भावयवा इत्यर्थः । तस्मात् सर्व

आदिरवयवो यस्य समुदायस्येति विग्रहे तद्गुणसंविज्ञानो बहुव्रीहिसमासोऽयं समुदायेऽवयवस्यान्तर्भावात्, अत्र " हलि सर्वेषाम् "[1005], " अदः सर्वेषाम् "[1006] इत्यादिनिर्देशः प्रमाणम् । समुदायोऽन्यपदार्थः । तस्य समुदायस्य युगपल्लक्ष्ये प्रयोगाभावाद् ' आनर्थक्यात्तदङ्गेषु ' इति न्यायेन तदवयवेषु प्रवर्तमाना सर्वनामसञ्ज्ञा विश्वादिशब्दे इव सर्वशब्देऽपि अविशेषात् प्रवर्तते । एवं चात्र सर्वशब्दस्य स्वरूपेण वर्तिपदार्थता, समुदायरूपेण त्वन्यपदार्थप्रवेशः[1007] ।

ननु सर्वघटितसमुदायस्यैकत्वाद् कथं बहुवचनं सङ्गतमिति चेत्, सर्वाद्यर्थसमुदायस्य क्वचिदपि प्रयोगाभावात् ' समुदायेऽवतरन्ती सञ्ज्ञा तदवयवे विश्राम्यति ' इति न्यायेन समुदायघटकप्रत्येकं सञ्ज्ञा विश्राम्यति, इति द्योतनाय अवयवगतसंख्यायाः समुदाये आरोपाद् ' सर्वादीनि ' इति बहुत्वं सङ्गच्छते । समुदायस्य सञ्ज्ञित्वे एकवचनप्रसङ्गात् । उद्भूतावयवभेदः समुदायः समासार्थ इति कैयटोक्तेरप्ययमेवार्थः ।

बहुव्रीहिर्द्विविधः – तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च । तत्र तस्य = अन्यपदार्थस्य गुणाः = विशेषणानि = समस्यमानपदार्थस्वरूपाणीति तद्गुणाः । तेषां संविज्ञानम् = क्रियान्वयितया विज्ञानं यत्र स तद्गुणसंविज्ञानः । न तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानः । तदुक्तं भाष्ये – ' भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि । तद्यथा – चित्रवाससमानय लोहितोष्णीषा ऋत्विजः प्रचरन्ति इति तद्गुण आनीयते, तद्गुणाश्च प्रचरन्ति '[1008] ।

अयं भावः – बहुव्रीहौ अन्यपदार्थे बहुव्रीहिघटकपदार्थो यदि समवायेन संयोगेन वा विशेषणीभूय भासते । स च सम्बन्धो बहुव्रीह्यर्थस्तदा तद्गुणो बहुव्रीहिः । यथा – ' लम्बकर्णमानय ' इत्यत्रान्यपदार्थस्य आनयक्रियायामन्वये वृत्तिघटकपदार्थस्य श्रोत्रस्यापि तस्यामन्वयोऽनुभवसिद्ध इति लम्बकर्ण इति तद्गुणसंविज्ञानो बहुव्रीहिः । एवम् ' शुक्लवाससमानय ' इत्यादौ । अत्र लम्बकर्णौ समवायेनान्यपदार्थौ पुरुषे विशेषणीभूतौ, शुक्लवासश्च संयोगेनेति तद्गुणत्वम् । प्रकृतेऽपि सर्वाभिन्नप्रथमावयवरूपबहुव्रीहि-घटकपदार्थस्यान्यपदार्थे समुदाये आरोपितसमवायेनान्वयः, अवयवावयविनोः समवायसम्बन्धस्य क्लृप्तत्वात् तद्गुणत्वम् । तथा च समुदायरूपान्यपदार्थान्वयिसर्वनामसञ्ज्ञासत्तारूपक्रियायामन्वय इति सर्वशब्दस्य सर्वनामत्वम् । अत्र " हलि सर्वेषाम् " इति निर्देशादि लिङ्गम् ।

[1005] अष्टाध्यायी – (8-3-22)

[1006] अष्टाध्यायी – (7-3-100)

[1007] शब्दकौस्तुभः, वैयाकरणसिद्धान्तकौमुदी – बालमनोरमाटीका – प्रकृतसूत्रे

[1008] महाभाष्यम् – प्रकृतसूत्रे

यदि आदिशब्दः समीपार्थकः स्यात्तदा तद्गुणत्वाभावात्सर्वनामत्वं न स्यात् । अत्र ‘ सर्वनाम ’ इति महासञ्ज्ञाकरणात् सर्वार्थवाचकानामेव सर्वनामसञ्ज्ञा ।

ननु यदीयमन्वर्थसञ्ज्ञा तर्हि “ पूर्वपदात्सञ्ज्ञायामगः ”[1009] इति सूत्रेण ‘ सर्वनामः ’ इत्यस्य नकारस्य णत्वं स्यादिति चेत् ? ‘ सर्वनामः ’ इत्यत्र “ पूर्वपदात्सञ्ज्ञायामगः ” इति सूत्रेण प्राप्तस्य णत्वस्य ‘ सर्वनामानि ’ इति निर्देशेनाभावो निपात्यते । तदुक्तं भाष्ये – ‘ सर्वनामसञ्ज्ञायां निपातनात् णत्वं न भविष्यति ’[1010] इति ।

ननु ‘ सर्व, विश्व ’ इत्येवं सर्वादिशब्दानां केवलानामेव सर्वादिगणे पाठात् परमसर्वादिशब्दानां सर्वनामसञ्ज्ञा न स्यादिति चेन्न, शब्दस्वरूपं विशेष्यमादाय तदन्तविधौ सर्वाद्यन्तानां केवलानामपि सर्वादीनां सर्वनामसञ्ज्ञा स्यात् ।

ननु सत्येव गमके शब्दस्वरूपे विशेष्यमादाय तदन्तविधिर्भवतीति प्रकृते न किमपि गमकं स्यादिति चेन्न, अत्र तदन्तविधौ प्रमाणम् “ द्वन्द्वे च ”[1011] इति सूत्रारम्भसामर्थ्याच्छब्दस्वरूपं विशेष्यमादाय तदन्तविधौ दोषाप्रसक्तेः । अयं भावः - “ द्वन्द्वे च ” इति सूत्रे प्रथमार्थे सप्तमी । द्वन्द्वे सर्वनामसञ्ज्ञा न भवतीति तदर्थः । तथा च ‘ वर्णाश्रमेतराणाम् ’ इति समुदायस्य द्वन्द्वत्वात् समुदायस्यैवायं निषेधो न तु तदवयवानामिति फलितम् एवं सति समुदाये सञ्ज्ञायाः तदन्तविधिं विना प्राप्त्यभावाद् व्यर्थं निषेधसूत्रं ज्ञापयति सर्वाद्यन्तस्यापि सर्वनामसञ्ज्ञा भवतीति स च तदन्तविधिर्विशेष्यवाचकपदाभावाद् भवितुन्नार्हति, अतः शब्दस्वरूपाध्याहार आवश्यकः सति च तस्मिन् तदन्तविधौ सर्वाद्यन्तस्य सर्वनामत्वे निषेधसूत्रस्य स्वांशे चारितार्थ्यं ‘ परमसर्वस्मै ’ इत्यादिलक्ष्यसिद्धेः । अतस्तदन्तस्यापीयं सञ्ज्ञेति विज्ञायते ।

ननु परमसर्वादिशब्देषु गणपठितानां केवलानामेव सर्वादिशब्दानामस्तु सर्वनामता, मास्तु तदन्तानामपि । “ सर्वनाम्नः स्मै ”[1012] इत्यादिसर्वनामकार्याणामङ्गाधिकारस्थत्वेन ‘ पदाङ्गाधिकारे तस्य च तदन्तस्य च ’ इति परिभाषयैव ‘ परमसर्वस्मै ’ इत्यादिसिद्धौ तदन्तस्य सञ्ज्ञाविधानं व्यर्थं स्यादिति चेन्न, षष्टाध्यायचतुर्थपादीयप्रथमसूत्रत एवाङ्गाधिकार इति “ सप्तम्यास्त्रल् ”[1013], “

[1009] अष्टाध्यायी – (8-4-3)

[1010] महाभाष्यम् – प्रकृतसूत्रे

[1011] अष्टाध्यायी – (1-1-31)

[1012] अष्टाध्यायी – (7-1-14)

[1013] अष्टाध्यायी – (5-3-10)

अव्ययसर्वनाम्नामकच् प्राक्टेः "[1014] इत्यादीनामङ्गाधिकारीयत्वाभावात् ' परमसर्वत्र, परमभवकान् ' इत्यादौ फलस्य विद्यमानत्वेन ज्ञापकत्वोपवर्णनस्य सौष्ठवात् ।

न च अशब्दान्यशब्दयोः समाहारद्वन्द्वे दीर्घे ' आन्यानाम् ' इत्यत्र अन्तादिवच्चेति परादिवद्भावेन अन्यशब्दसत्त्वात् सर्वनामसञ्ज्ञावारणाय " द्वन्द्वे च " इति चरितार्थमिति ज्ञापकं कथमिति वाच्यम्, अन्तरङ्गपरिभाषया अन्यशब्दसापेक्षसर्वनामसञ्ज्ञाया अन्तरङ्गत्वेन पदद्वयसम्बन्धिवर्ण-द्वयापेक्षकत्वेन बहिरङ्गस्य दीर्घस्यासिद्धत्वात् तदन्तविधिं विना सञ्ज्ञाया अप्राप्तेर्ज्ञापकत्वस्य युक्तत्वात् ।

न चात्रापि ' प्रातिपदिकात् ' इत्यधिकारात् सर्वनाम्नस्तद्विशेषणत्वेन तदन्तविधिसिद्धौ ज्ञापकादिना पुनस्तदाश्रयणप्रयासो विफल एवेति वाच्यम् । ' समासप्रत्ययविधौ प्रतिषेधः ' इत्यनेन तदन्तविधिनिषेधेन ज्ञापकमूलतदन्तविध्याश्रयणस्यावश्यकत्वात् ।

न च ' परमसर्वत्र ' इत्यत्रावयवनिष्ठसर्वनामत्वेन सुबुत्पत्तितः प्रागेव त्रलादिसिद्धौ ह्यलमेतेन तदर्थप्रयासेनेति वाच्यम् । " कुत्सिते "[1015] इति सूत्रस्थभाष्यरीत्या संख्याकारकाभ्यां पूर्णार्थस्य इतरान्वयेन ' सुबन्तात्तद्धितोत्पत्तिः ' इति सिद्धान्तात् । सर्वनामप्रकृतिकसप्तम्याद्यन्तादेव त्रलादेरुत्पत्त्या तदन्तसञ्ज्ञां विना तदनुपपत्तेः[1016] ।

वस्तुगत्या " येन विधिस्तदन्तस्य " इति सूत्रे भाष्योक्ततदन्तत्वस्य ' प्रयोजनं सर्वनामाव्ययसञ्ज्ञायाम् ' इति वार्त्तिकविशेष्यस्य शब्दस्वरूपस्य सम्भवाच्च विशेष्यविशेषण-भावेनैवास्तां तदन्तविधिः । केवलानां तु व्यपदेशिवद्भावेन ' सर्वादीनि ' इत्यावर्तनेन वा सञ्ज्ञासिद्धिः । गौणे महासञ्ज्ञयैव सञ्ज्ञाऽभावः । किञ्च " द्वन्द्वे च " इत्यस्य ज्ञापकत्वमेव न युज्यते । द्वन्द्वसमासे हि उद्भूतावयवानुद्भूतावयवभेदरूपः समूहो विशेष्यो घटकपदानि विशेषणानीति बहुव्रीहाविवोपसर्जनत्वं घटकपदानाम् । अत एव कुक्कुटमयूर्यावित्यादावुपसर्जनह्रस्वत्वाशङ्क्य ' द्वन्द्वे प्रतिषेधो वक्तव्यः ' इति वचनमवस्थापितं भाष्ये, कैयटे च स्पष्टतरमिदम्[1017] ।

- **उभशब्दपाठप्रयोजनम्**

[1014] अष्टाध्यायी – (5-3-71)

[1015] अष्टाध्यायी – (5-3-74)

[1016] वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा, तत्त्वबोधिनी – प्रकृतसूत्रे

[1017] फक्किकाप्रकाशः – (पृ. – 108)

सर्वादीनां मध्ये उभशब्दो नित्यं द्विवचनान्तः, द्वित्वविशिष्टवाचकत्वात् । स्वार्थ-द्रव्य-लिङ्ग-संख्या-कारकेतिपञ्चविधप्रातिपदिकार्थस्य सिद्धान्तसिद्धत्वेन द्वित्वविशिष्टस्य वाचक इत्यस्य द्वित्वसंख्याप्रकारकसंख्येयविशेष्यकार्थाभिधायीत्यर्थः ।

ननु पञ्चविधप्रातिपदिकार्थस्य सिद्धान्तितत्वात् प्रकृत्यैव सकलार्थबोधस्योपपत्तौ विभक्तेः, " द्व्येकयोर्द्विवचनैकवचने "[1018] इत्यादेश्च नैरर्थक्यापत्तिरिति चेन्न, विभक्तेर्द्योतकत्वेन प्रकृतार्थत्वादेवेत्यर्थः, अनन्वितार्थकविभक्तिकल्पनापेक्षयाऽनुवादकविभक्तेरेव न्यायत्वाद् अत आह भट्टोजिदीक्षितः – ' नित्यं द्विवचनान्तः ' इति ।

ननु उभशब्दसमीपे द्विवचनातिरिक्तवृत्तित्वनिषेधेन सूत्रकारोक्तम् " उभादुदात्तो नित्यम् "[1019] इत्यत्र उभाद् इति तथा भाष्यकारोक्तम् ' उभस्य सर्वनामत्वे कोऽर्थः ' इत्यत्र उभस्य इति प्रयोगो न स्यादिति चेन्न, अर्थपरत्वे एवायं नियमो न तु शब्दपरत्वे । अत एव उभशब्दस्य स्वरूपानुकरणपरत्वेन द्वित्वविशिष्टवाचकत्वाभावात्[1020] ।

ननु " जसः शी "[1021], " सर्वनाम्नः स्मै "[1022], " ङसिङ्योः स्मात्स्मिनौ "[1023], " आमि सर्वनाम्नः सुट् "[1024] इत्युक्तानां सूत्राणां सर्वनामकार्याणां द्विवचने अभावात् सर्वादिगणे उभशब्दस्य पाठे प्रयोजनाभावः, न च " सर्वनाम्नस्तृतीया च "[1025] इति सूत्रेण उभाभ्यां हेतुभ्याम् उभयोर्हेत्वोः इति षष्ठीतृतीयादिसिद्धिरेव फलमिति वाच्यम् । ' निमित्तपर्यायशब्दप्रयोगे सर्वासां प्रायदर्शनम् ' इति वार्त्तिकेनैव तत्सिद्धिः ।

न च तस्य वार्त्तिकस्य " सर्वनाम्नस्तृतीया च " इति सूत्रे पठितत्वेन सर्वनामसञ्ज्ञके एव तत्प्रवृत्तिः, भाष्ये " हेतौ "[1026] इति सूत्रे एव तत्पाठात् तत्प्रवृत्तौ सर्वनामसञ्ज्ञकत्वस्यानपेक्षितत्वात् । अत एव ' अनेन कारणेन ', ' अन्नस्य कारणस्य ' इत्यादिसिद्धिः ।

[1018] अष्टाध्यायी – (1-4-22)

[1019] अष्टाध्यायी – (5-2-44)

[1020] वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे

[1021] अष्टाध्यायी – (7-1-17)

[1022] अष्टाध्यायी – (7-1-14)

[1023] अष्टाध्यायी – (7-1-15)

[1024] अष्टाध्यायी – (7-1-52)

[1025] अष्टाध्यायी – (2-3-27)

[1026] अष्टाध्यायी – (2-3-23)

न च उभशब्दस्य असर्वनामत्वे प्रथमाद्वितीययोरभावः स्यात्, निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनमिति वार्त्तिकस्थप्रायग्रहणेन असर्वनाम्नः प्रथमाद्वितीये न स्त इति बोधनादिति वाच्यम् । उभशब्दातिरिक्तसर्वनामभिन्नप्रातिपदिकात् प्रथमाद्वितीययोरभाव इति कल्पनेनादोषात् ।

न च माऽस्तु सर्वादिगणे उभशब्दस्य पाठः । न च अकच्प्रत्ययो न स्यात्, " कुत्सिते " इत्यादिसूत्रेण कप्रत्ययेनापि ' उभकौ ' इत्यादिसिद्धेः । न च " चितः "[1027] इति सूत्रेणान्तोदात्तत्वासिद्धिः, ' प्रत्यय आद्युदात्तः ' इति प्रत्ययस्वरेणाद्युदात्तत्वेऽपि अन्तोदात्तत्वे सिद्धे कप्रत्ययस्य आद्युदात्तत्वेऽन्तोदात्तत्वे वा विशेषाभावात् ।

न च ' चितः सप्रकृतेर्बह्वकजर्थम् ' इति वार्त्तिकेनाकचि ' स्वार्थेन परिपूर्णं पदमर्थान्तरमाकाङ्क्षते ' इति भाष्यात्सुबन्तस्यैव प्रकृतित्वेन ' उभकाभ्याम् ' इत्यत्र सुबन्तस्यान्तोदात्तत्वम् कप्रत्यये तु प्रत्ययस्यान्तोदात्तत्वेन ' चितः सप्रकृतेः ' इत्यस्याप्राप्त्याभ्यामः प्राग्भागस्य प्रकृतेरेवान्तोदात्तत्वमिति सुबन्तस्यान्तोदात्तत्वाय सर्वादौ पाठस्य चारितार्थ्यमिति वाच्यम्, ' स्वार्थेन परिपूर्णं पदमर्थान्तरमाकाङ्क्षते ' इति भाष्योक्तन्यायात्तद्धितस्य सुबन्तान्तात्परत्वेऽपि ' प्रातिपदिकात् ' इत्यधिकारस्य सत्त्वेन सुप्प्रकृतेरुभकरूपप्रातिपदिकस्यैव कप्रत्ययेऽकचि नान्तोदात्तत्वेन स्वरे विशेषाभावात्[1028] । अत आह भाष्यकारः – ' नास्ति काकचोर्विशेषः ' इति

ननु उभशब्दात् " सर्वनाम्नामकच्प्राक्टेः " इत्यनेनाकच्प्रत्यये कृते ' उभकौ ' इति रूपसिद्धिस्तादृशरूपसिद्धिस्तु कप्रत्ययेनापि सम्भवति, न तु अकचर्थः सर्वादिगणे पाठः स्यादिति चेन्न, ' उभयोऽन्यत्र ' इति वार्त्तिके अन्यत्रेत्यनेन द्विवचनादन्यस्मिन् परे इत्यर्थो विवक्षितः, अर्थात् द्विवचनपरत्वाभावेऽयच्प्रत्ययो भवति, उभशब्दादकचि प्रत्यये सति ' तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ' इति न्यायेन उभशब्देन उभकशब्दोऽपि गृह्यते, तस्य च ' उभक + औ ' इति दशायां द्विवचनपरत्वादयच्प्रत्ययो न भवति ।

कप्रत्यये सति तु तस्य उभशब्दात्परत्र जायमानत्वेन ' तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ' इति न्यायाप्रवृत्त्या उभकशब्दस्य उभशब्देन ग्रहणाभावादुभशब्दस्य कप्रत्ययव्यवधानेन द्विवचनपरकत्वाभावादयचि ' उभकौ ' इति स्यात्, यथा ' उभयतः ', ' उभयत्र ' इत्यत्र पञ्चम्यन्तात्तसि, सप्तम्यन्तात् त्रलि च तद्धितान्तत्वेन प्रातिपदिकतया सुपो लुकि द्विवचनपरत्वाभावे उभशब्दादयच् प्रत्ययो भवति तथा उभशब्दाद् द्विवचनान्तात्कप्रत्यये तद्धितान्तत्वात् प्रातिपदिकत्वेन द्विवचनस्य ' औ

[1027] अष्टाध्यायी – (6-1-160)

[1028] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – (पृ. – 312)

’ विभक्तेर्लुकि पुनर्द्विवचने ‘ उभक + औ ’ इति स्थितौ एकस्य लुका अपहारेण द्विवचनस्य ‘ औ ’ इत्यस्य कप्रत्ययव्यवधानेन उभशब्दादव्यवहितद्विवचनपरत्वाभावादयज्दुर्वार एव स्यात् । सर्वनामत्वे सत्यकचस्तु उभशब्दाकाररूपात् टेः प्राग् भवत्येव तन्मध्यपतितन्यायेन उभशब्दस्यापि उभग्रहणेन ग्रहणादुभकरूपशब्दादव्यवहितोत्तरस्य द्विवचनस्य सत्त्वेन ‘ अयच् ’ इति प्रत्ययो न स्यात् । द्विवचनपरकत्वाच्च तत्र “ उभादुदात्तो नित्यम् ” इति सूत्रे ‘ नित्यम् ’ इति योगविभागात् स्वार्थिकोऽपि अयच् न भवति, तस्य द्विवचनपरकत्वाभावे एव प्रवृत्तेः, ‘ उभयोऽन्यत्र ’ इति वार्त्तिकप्रामाण्यात् ।

अत्राह भाष्यकारः – ‘ केऽपि द्विवचनपरो भविष्यति । कथम् ? ‘ स्वार्थिकाः प्रत्ययाः प्रकृतितोऽविशिष्टा भवन्ति ’ इति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवति ’[1029]। अर्थात् यः प्रकृतेरर्थः स एव स्वार्थिकप्रत्ययस्याप्यर्थ इति विज्ञानात् ‘ क ’ प्रत्यये परतः अपि द्विवचनव्याघाताभावेन ‘ अयच् ’ प्रत्ययाभावाद् इष्टरूपसिद्धौ सर्वादिगणेऽकच् प्रत्ययविधानार्थमुभयग्रहणं नैव कर्तव्यमिति निश्चयः । मनोरमाकारास्तु भाष्यस्य प्रौढिवादत्वमाहुः ।

- **सर्वादिगणपाठसमीक्षा**

सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसञ्ज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् । एते पञ्चत्रिंशत् सर्वादयः[1030] ।

ननु सर्वशब्दस्य बहुत्वव्यापकं सर्वत्वं तत्प्रवृत्तिनिमित्तकत्वात् बहुवचनवद् बहुवचनमेव स्यादिति चेन्न, सर्वशब्दो हि बह्ववयवारब्धसमुदाये वर्तते । तत्र यदा अनुद्भूतावयवः समुदायो विवक्षितः तदा भवत्येकवचनम् । यथा – ‘ सर्वो लोकः ’ इति । अनुद्भूतत्वम् अविवक्षितसंख्याकत्वम् । यदा तु अनुद्भूतावयवकौ समुदायौ तदा द्विवचनम् । यथा – ‘ सर्वौ व्यूहौ ’ इति । यदा तु उद्भूतावयवसमुदायः तदा बहुवचनम् । यथा – ‘ सर्वे जनाः ’ इति[1031] ।

ननु अनेकावयवारब्धसमुदायवाची यदि सर्वशब्दस्तदा ‘ सर्वोऽप्यात्मा नित्यः ’ इत्यादिप्रयोगानुपपत्तिः, आत्मनो निरवयवतया तादृशसमुदायत्वानुपपत्तेरिति चेन्न, ‘ सर्वोऽप्यात्मा नित्यः ’ इत्यादावुद्देश्यवाचकस्यात्मादिशब्दस्यापि समुदायपरकत्वात् । तथा च

[1029] महाभाष्यम् – प्रकृतसूत्रे

[1030] वैयाकरणसिद्धान्तकौमुदी, काशिका – प्रकृतसूत्रे

[1031] वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

अन्तःकरणाद्यवच्छिन्नजीवात्मनाम् निरवच्छिन्नात्मनश्च समुदायस्यानेकावयवारब्धत्वस्य वक्तुं शक्यत्वात्। एवमेव ‘ सर्वं गगनं नित्यम् ’ इत्यादावप्यनुसन्धेयम्[1032]।

- **उभयशब्दविषये मतद्वयम्**

अवयविवाचकस्य उभयशब्दस्य द्विवचनं नास्तीति प्रदीपकारकैयटमतम् । अवयविनः समुदायस्यैकत्वे एकवचनम्, बहुत्वविवक्षायान्तु बहुवचनमिति तदाशयः । पदमञ्जरीकारो हरदत्तस्तु मन्यते द्विवचनमपि अस्यास्तीति । तथा चोक्तं सिद्धान्तकौमुद्याम् – उभयशब्दस्य द्विवचनं नास्तीति कैयटः । अस्तीति हरदत्तः[1033]।

‘ उभयोऽन्यत्र ’ इति वार्त्तिककृदुक्तेर्द्विवचनपरत्वेऽयच्प्रत्ययो नेष्टः । वार्त्तिके उभशब्दात् उभौ अवयवौ यस्य इति विग्रहे “ संख्याया अवयवे तयप् ”[1034] इति सूत्रेण उभशब्दादवयविन्यर्थेऽयच्प्रत्ययः स्यादित्यर्थकेन “ उभादुदात्तः ” इति सूत्रेण विधीयते योऽयच्प्रत्ययः सोऽपि गृह्यते। तस्माद् उभयशब्दो निष्पन्नोऽवयविवाचकः । सोऽयम् एकवचने बहुवचने चैव प्रयुज्यते, ‘ उभयोऽन्यत्र ’ इति वार्त्तिके ‘ उभयो मणिः, उभये देवमनुष्याः ’ इति भाष्ये द्विवचनमुल्लङ्घ्य बहुवचनोदाहरणात्, ‘ नित्यम् ’ इति योगविभागेन स्वार्थिको योऽयच्प्रत्ययः क्रियते, स्वार्थिकायच्प्रत्ययमुपक्रम्य ‘ उभयोऽन्यत्र ’ इति वार्त्तिकप्रवृत्तेश्च द्वयोरप्ययचोर्द्विवचनाभावे एव प्रवृत्तेः । एवञ्च उभयशब्दाद् द्विवचनोत्पत्तौ वार्त्तिकविरोधः स्यादित्युभयशब्दाद् द्विवचनस्यानभिधानमेवेत्यभिप्रायेण उभशब्दाद् द्विवचनानुत्पादादसर्वविभक्तकत्वेन अव्ययत्वे प्राप्ते “ तद्धितश्चासर्वविभक्तिः ”[1035] इति सूत्रे भाष्यप्रदीपे ‘ ननूभयशब्दस्य द्विवचनानुत्पादादसर्वविभक्तित्वम् ’ इति तद्धितानां परिगणनम् इत्युक्तं कैयटेन । वार्त्तिकविरोधादुभयशब्दाद् द्विवचनं न भवतीति कैयटाशयं न ज्ञात्वा ‘ पचतिकल्पम्, पचतिरूपम् ’ इत्यादिवारणेन पाठस्योपक्षीणत्वादनभिधाने प्रमाणं नास्तीति हरदत्तेनोक्तम्। अत्र कैयटमतमेव युक्तम्, भाष्यवार्त्तिकसम्मतत्वात्। वार्त्तिकविरोधादुभयशब्दाद् द्विवचनोत्पत्तेरनौचित्यात्।

[1032] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1033] वैयाकरणसिद्धान्तकौमुदी – प्रकृतसूत्रे

[1034] अष्टाध्यायी – (5-2-42)

[1035] अष्टाध्यायी – (1-1-38)

डतरडतमौ प्रत्ययौ। “ किंयत्तदो निर्धारणे द्व्योरेकस्य डतरच् ”[1036], “ वा बहूनां जातिपरिप्रश्ने डतमच् ”[1037], “ एकाच्च प्राचाम् ”[1038] इति तद्धिताधिकारे विहितयोः “ प्रत्ययः ”[1039], “ परश्च ”[1040] इत्यधिकारेण प्रत्ययसञ्ज्ञकत्वात् प्रत्ययबोधकत्वेन ‘ प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ’ इति परिभाषया प्रत्ययबोधके पदे सति यस्मात्स विहितस्तदादिरित्युपतिष्ठते इति तदादिरित्यस्य विशेष्यतया डतरडतमयोर्विशेषणतया “ येन विधिस्तदन्तस्य ” इति सूत्रेण डतरडतमौ डतरान्त-डतमान्ततदाद्योः सञ्ज्ञे स्तः।

सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तविध्यभावेऽपि ‘ न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः ’ इति न्यायेन केवलप्रत्यययोः डतरडतमयोः सञ्ज्ञाविधानवैयर्थ्यात् तदन्तग्रहणेन कतर-कतमादीनां डतरडतमान्तानां ग्रहणं स्यात् [1041]।

अन्यतरशब्दस्तु अव्युत्पन्नः किं यत्तदेकेभ्य एव डतरडतमयोर्विधानेनान्यशब्दात्तयोरविधानात्। ‘ अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावात् द्विबहुविषये निर्धारणे वर्तेते ’ इति पस्पशायां कैयटः। ‘ अन्यतर ’ इत्यस्य द्वयोर्मध्ये एक इत्यर्थः। ‘ अन्यतम ’ इत्यस्य बहूनां मध्ये एक इत्यर्थः। तत्र अन्यतमशब्दस्य तु सर्वादौ पाठाभावेन न सर्वनामसञ्ज्ञा।

अत्र व्याकरणसुधानिधिकारेण स्वकीये ग्रन्थे शाकटायनस्य मतं प्रस्तुतं कुर्वता प्रोक्तम् – ‘ शाकटायनेन डतरडतमान्तत्वेन तयोर्व्युत्पादनेऽपि अन्यतरशब्दपाठस्य नियामकत्वादन्यतमशब्दस्य गणकार्याद्यभावः व्याख्यानात् ’[1042]।

त्वत्-त्वौ अन्यपर्यायौ ‘ एकस्त्वोऽन्येतरावपि ’ इत्यमरात्। एकस्तान्तोऽपरोऽदन्तः इति एकेषां मतम्। तान्ते प्रमाणन्तु – ‘ त्वत्त्वसमसिमेत्यनुच्चानि ’ इति फिट्सूत्रम्, स्तरीरुत्वद्भवति सूत उत्वत् इति ‘ ऋङ्मन्त्रः ’। एतन्मन्त्रव्याख्यावसरे वेदभाष्ये ‘ त्वदिति सर्वादिपठितः, अनुदात्तोऽयमन्यपर्यायः ’ इत्युक्तत्वाच्च। त्वदधरमधुरमधूनि पिबन्तम् इति जयदेवप्रयोगात्। तत्र हि त्वच्छब्दोऽन्यपर्यायः। ‘ त्वतः अधरः ’ इति विग्रहः। ‘ अन्यस्या अधरः ’ इत्यर्थः। न तु तवाधर इति विवक्षितम्, ‘ पश्यति

1036 अष्टाध्यायी – (5-3-92)
1037 अष्टाध्यायी – (5-3-93)
1038 अष्टाध्यायी – (5-3-94)
1039 अष्टाध्यायी – (3-1-1)
1040 अष्टाध्यायी – (3-1-2)
1041 वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे
1042 व्याकरणसुधानिधिः – प्रकृतसूत्रे

दिशि दिशि रहसि भवन्तम् ' इति पूर्ववाक्येनान्वयानुत्पत्तेः । उभावपि अदन्तौ भिन्नस्वरौ इति द्वितीयमतम् । तत्र प्रमाणन्तु – ' एतं त्वं मन्ये ' इत्युदात्तस्य ' उत त्वः पश्यन् ' इत्यनुदात्तस्य ऋग्वेदे दर्शनात् ।

वस्तुतः भिन्नस्वरयोरप्यकारान्तयोरेकश्रुत्या तन्त्रेणैव पाठसम्भवादुभयपाठसामर्थ्येन प्रथमस्य तकारान्तत्वमेव युक्तम् । तकारान्तस्य सर्वनामत्वे फलन्तु – " अव्ययसर्वनाम्नामकच् प्राक् टेः " इति सूत्रेण अकच्, " आ सर्वनाम्नः "[1043] इति सूत्रेण आत्वम्, " सर्वनामसंख्ययोरुपसंख्यानम् ' इत्यनेन पूर्वनिपातः, " सर्वनाम्नस्तृतीया च " इति सूत्रेण हेतुशब्दप्रयोगे तृतीया षष्ठी च इत्यादि । तान्तस्य त्वच्छब्दस्य सत्त्वेऽपि तस्य सर्वादित्वे मानाभाव इति शेखरः ।

नेम इत्यर्द्धार्थः । अत्र मानम् प्रनेमस्मिन् ददृशे सोमो अन्तः इत्यृचि तदर्थकलक्ष्यदर्शनम् । नेमशब्दस्य अवधिः, कालः, अर्द्धम्, प्राकारः, कैतवम्, गर्त्तः, नाट्यम्, अन्यः, एतेऽर्था इति शब्दस्तोममहानिधिः । अर्धे एव सर्वनामता नान्यत्रेत्यत्र मानं मृग्यम् [1044] ।

समः सर्वपर्यायः । तुल्यपर्यायसमशब्दस्य तु नेयं सञ्ज्ञा " यथासंख्यमनुदेशः समानाम् "[1045] इति ज्ञापकात् । " कृन्मेजन्तः " इति सूत्रे ' एते दोषाः समा भूयांसो वा ' इति महाभाष्यकारप्रयोगाच्च ।

सिमः सर्वपर्यायः । यद्यपि सिमः कृत्स्ने च शक्ते च स्यान्मर्यादावबद्धयोः इति कोशात् सिमोऽर्थान्तरेऽपि तथापि लक्ष्यानुरोधात् सर्वार्थकस्यैव सञ्ज्ञा ।

पूर्वपरेत्यादीनि त्रीणि सूत्राणि समानरूपाण्येव सर्वादिगणपाठेऽष्टाध्याय्याञ्च पठितानि सन्ति, अत एव पौनरुक्तिदोषः स्यादिति चेन्न, तत्र गणसूत्राणि विभक्तिनिरपेक्षतया पूर्वादीनां सर्वादित्वं बोधयति । अष्टाध्याय्यान्तु " सर्वादीनि सर्वनामानि "," विभाषा जसि " इति चानुवर्तते । तथा च जसि पूर्वादीनां सप्तानां विकल्पेन सर्वानामसञ्ज्ञाविधायकानि । एतेन सर्वादिगणे यत् पूर्वपर इति तत् जसोऽन्यत्र नित्यसर्वनामसञ्ज्ञार्थम् । अष्टाध्यायीस्थं तु जसि पूर्वादीनां विकल्पेन सर्वनामसञ्ज्ञार्थम् । तस्मात् न पौनरुक्तिदोषः सम्भवेत् ।

यदा पूर्वादयः शब्दा दिशाकालदेशेषु अर्थेषु स्युस्तदैव सर्वनामत्वम्, नान्येषु अर्थेषु व्यवस्थायामित्युक्तेः । तेन ' दक्षिणा गाथकाः ' अत्र दक्षिणशब्दः कुशलार्थकः, ' उत्तरे प्रत्युत्तरे च शक्तः

[1043] अष्टाध्यायी – (6-3-91)

[1044] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1045] अष्टाध्यायी – (1-3-10)

’ अत्र उत्तरपदं प्रतिवाद्युच्चारितवाक्यार्थकम् । प्रत्युत्तरपदञ्च पूर्ववाद्युच्चारितवाक्यार्थकम् । तस्मादत्रसर्वनामसञ्ज्ञा न भवति ।

स्वाभिधेयापेक्षावधिनियमो व्यवस्था । अभिधीयते = उच्यते यः सोऽभिधेयो वाच्योऽर्थः । स्वस्य = पूर्वादिशब्दस्याभिधेयोऽर्थः, तेन अपेक्ष्यमाणस्य अवधेर्नियमः । यथा ‘ पूर्वो ग्रामः ’ इत्युक्ते आकाङ्क्षा जायते कस्मात्पूर्व इति, एवं “ परो ग्रामः ” इत्युक्ते आकाङ्क्षा जायते कस्मात्पर उत्तरो भिन्नो वेति तथा च पूर्वस्थानस्य यत्पूर्वत्वं तत् परत्वमपेक्षते, परस्थानस्य यत् परत्वं तत् पूर्वत्वापेक्षं भवति ।

एवञ्च पूर्वादिशब्दाभिधेयेनापेक्षः = आकाङ्क्षामाणो योऽवधिः परादिरूपस्तस्य नियमो नियताकाङ्क्षा तस्यां गम्यमानायां पूर्वादीनां सर्वनामत्वम् । एवं कालेऽपि – ‘ पूर्वः फाल्गुनः ’ कस्मादित्याकाङ्क्षायां चैत्रादिति गम्यते ।

पूर्वादीनां सप्तानां दिक् देशश्चार्थः । तत्र मध्याह्नसूर्यसंयोगिदेशात् पृथ्वीमध्याद्वा उदयाचलं यावत् पूर्वा दिग् । तस्यामेव दिशि यत्स्थानापेक्षया यत्स्थानात्संनिहित उदयाचलः स पूर्वो देशः, मध्याह्नसूर्यदेशात् पृथ्वीमध्याद्वा यश्च विप्रकृष्टः स पश्चिम इत्युच्यते । एवम् उक्तस्थानात् अस्ताचलपर्यन्तो भागः पश्चिमा दिक् । ततोऽत्र दिशि यदपेक्षया यस्य अस्ताचलः सन्निहितः स पश्चिमो देशः यश्च विप्रकृष्टः स पूर्वो देश इत्युच्यते ।

असञ्ज्ञायाम् इत्युक्तेः ‘ उत्तराः कुरवः ’ अत्र सर्वनामसञ्ज्ञा न भवति, उत्तरशब्दस्य सञ्ज्ञाशब्दत्वात् । कुरुशब्दोऽत्र देशविशेषे योगरूढो नित्यबहुवचनान्तश्च । एवमत्र उत्तरशब्दोऽपि । भारतवर्षावधिकस्य उत्तरत्वस्य तत्र प्रतीत्या व्यवस्थायाः सत्त्वेऽपि सञ्ज्ञात्वान्न सर्वनामता ।

स्वशब्दः आत्मात्मीयज्ञातिधनवाची ‘ स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने ’ इत्यमरकोशात् । यद्यपि “ स्वामिन्नैश्वर्ये ”[1046] इति सूत्रे ईश्वरत्ववाच्यपि स्वशब्दः स्वीकृतस्तथाप्यसौ मत्वर्थीयेमनिच्प्रत्ययमात्रविषयो न तु केवलः प्रयोगार्हः । तत्र ज्ञातिधनयोर्निषेधाद् आत्मात्मीययोरर्थयोरेव स्वशब्दो भवति सर्वनामसञ्ज्ञः । स्वे स्वाः = आत्मीया आत्मन इत्यर्थो वा । ज्ञातौ धने तु स्वाः स्वानि वा ।

अत्राख्याग्रहणसामर्थ्यात् ज्ञातिधनयोरपि ज्ञातित्वेन धनत्वेन च विवक्षायामेव स्वशब्दस्य न सर्वनामत्वम्, ज्ञातिधनयोरपि आत्मीयत्वेन विवक्षायां तु सर्वनामत्वं भवत्येव ।

अन्तरशब्दो बह्वर्थको भवति । तदुक्तममरसिंहेन –

अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये ।

[1046] अष्टाध्यायी – (5-2-126)

छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ॥ इति ।

1. अवकाशे – अन्तरं देहि । **2.** अवधौ – मासान्तरे देयम् । **3.** परिधाने – अन्तरे शाटकाः । **4.** अन्तर्द्धौ – पर्वतान्तरितः सूर्यः । **5.** भेदे – यदन्तरं सिंहश्रृगालयोः । **6.** तादर्थ्ये – भवदन्तरे मया धनमर्जितम् । **7.** छिद्रे – अन्तरे प्रहर्तव्यम् । **8.** आत्मीये – अयं ममान्तरः । **9.** विनार्थे – अन्तरेण पुरुषकारम् । **10.** बहिरर्थे – अन्तरे चाण्डालगृहाः । **11.** अवसरे – अन्तरज्ञः सेवकः । **12.** मध्ये – आवयोरन्तरे शैलाः । **13.** अन्तरात्मनि – अन्योऽन्तर आत्मा आनन्दमयः । **14.** चात् सादृश्ये – स्थानेऽन्तरतमः ।

तत्र बहिर्योगोपसंव्यानयोरेवार्थयोरन्तरशब्दस्य सर्वनामसञ्ज्ञा भवति । बहिरित्यनावृतो देशः (मैदान) बाह्यं चोच्यते । तत्राद्ये अन्तरे अन्तरा वा गृहाः । नगरबाह्यश्चाण्डालादिगृहा इत्यर्थः । द्वितीये नगराभ्यन्तरगृहा इत्यर्थः । उपसंव्यानशब्दोऽपि करणव्युत्पत्त्योत्तरीयपरः । कर्मव्युत्पत्त्या त्वन्तरीयपरः । उभयथापि बहिर्योगेण गतार्थत्वात् उपसंव्यानग्रहणं न कर्तव्यमिति भाष्ये स्थितम् ।

त्यद् तद् एतौ पूर्वोक्तपरामर्शकौ । यत्पदम् उद्देश्यार्थकम् । एतदिदमौ प्रत्यक्षोपस्थिते (पुरोवर्तिनि बुद्धिस्थे) । अदस् व्यवहिते (परोक्षे बुद्धिस्थे) । एकशब्दो बह्वर्थकः । ष्णान्ता इति सूत्रभाष्येऽप्युक्तम् – एकशब्दोऽयं बह्वर्थः ।

एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा ।
साधारणे समानेऽल्पे संख्यायाञ्च प्रयुज्यते ॥ इति कोशः ।

‘ प्रजामेका रक्षत्यूर्जमेका ’ इत्यत्रान्यार्थः । ‘ एकवीरः ’ इत्यादौ प्रधानार्थः । ‘ एकेऽल्पप्राणाः ’ इत्यादौ प्रथमार्थः । “ अत एकहल्मध्येऽनादेशादेर्लिटि ”[1047] इत्यादौ असहायरूपकेवलार्थः । ‘ एतावेकधनौ द्वौ ’ इत्यादौ साधारणार्थः । “ तेनैकदिक् ” इत्यादौ समानार्थः । साधारणसमानयोरर्थतः संख्यावाचिन एव पर्यवसानम् । तद्यथा – “ तेनैकदिक् ”[1048], ‘ चैत्रमैत्रयोरेका माता ’ इति साधारणा तुल्या वा एकत्वविशिष्टेत्यर्थो वा । ‘ एको द्वौ ’ इत्यादौ संख्यार्थ इति । “ ष्णान्ता षट् ” इति सूत्रे संख्यायामसहायत्वे अन्यत्वे चेत्यर्थत्रयमस्य भाष्ये उक्तम् । ‘ एके मुख्यान्यकेवलाः ’ इत्यमरे मुख्यत्वमप्युक्तम् । “ सर्वस्य द्वे ”[1049] इति सूत्रभाष्ये ‘ एकैकशः ’ इति प्रयोगेऽल्पार्थकत्वं विना “

[1047] अष्टाध्यायी – (6-4-120)

[1048] अष्टाध्यायी – (4-3-112)

[1049] अष्टाध्यायी – (8-1-1)

बह्वल्पार्थाच्छस् कारकादन्यतरस्याम् "[1050] इति सूत्रेण शसोऽसम्भवेनाल्पार्थकत्वम्। तदन्यत्र लक्षणया प्रयोगः।

द्विशब्दो द्वित्वविशिष्टेऽलिङ्गः। सम्बोधनैकविषयो युष्मदर्थः। उच्चारयित्रर्थस्तु अस्मच्छब्दः। अलिङ्गत्वन्तूभयत्र समानम् ' अलिङ्गे युष्मदस्मदी '[1051] इति महाभाष्यीयवाक्यात्। अनेन वचनेन युष्मदस्मदोः सर्वथैव लिङ्गाभावमुक्त्वा भगवान् महाभाष्यकारः पतञ्जलिस्तस्य हेतुत्वे प्रयुक्तस्य ' अलिङ्गे युष्मदस्मदी ' इति वचनोपपत्तये ततोऽग्रे महाभाष्ये वचनमिदं प्रयुक्तवान् ' किं वक्तव्यमेतत् ? नहि। कथमनुच्यमानं गंस्यते ? नह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा '[1052] इति।

तत्र प्रदर्शितेन महाभाष्यवाक्येन सिद्धान्तितमिदं यद् युष्मदस्मदोः शब्दयोः स्त्रियां पुँल्लिङ्गे नपुंसके वा रूपे विशेषाभावन्नहि तत्र तत्तल्लिङ्गप्रयुक्तकार्यप्रतिषेधाय वचनारम्भः कर्तव्य इति

किन्तु विचारणीयमिदं भवति यत्कथमित्थं भगवान् महाभाष्यकारः प्राह यत्सामान्यतो लिङ्गत्रये एव न प्रयोगो युष्मदस्मदोरिति। यदि हि पुंलिङ्गे प्रयोगो न स्यात्, तर्हि ' युष्मान् ' इति प्रयोगसाधनाय " तस्माच्छसो नः पुंसि "[1053] इति सूत्रं कथं प्रवर्तेत ? सूत्रस्य तस्य प्रवृत्तौ निमित्तं पुमभिधायकशब्दत्वमेव। अत एव स्त्रीलिङ्गे तत्सूत्रं नकारकरणाय न प्रवर्तते ' मतीः ' इत्यादौ। तथा च युष्मदस्मदोः पुँल्लिङ्गाभावे ' युष्मान् ', ' अस्मान् ' इति प्रयोगो कथं भवेताम् ? उच्यते भगवता महाभाष्यकृता ' न ह्यस्ति विशेषः पुंसि ' इति।

एवमेव नपुंसके यदि न प्रयोगस्तर्हि ' अलिङ्गे युष्मदस्मदी ' इति महाभाष्यीयवाक्यमेव कथं प्रयुक्तं साधु स्यात् ? यतो ह्यत्र नपुंसकलिङ्गमेव दृश्यते। उच्यते च भाष्ये ' न ह्यस्ति विशेषः पुंसि नपुंसके वा ' इति। अतोऽवश्यमत्र महाभाष्यतात्पर्यवर्णनीयं येन कथमपि बाधो न भवेत्।

अत्रेदं समाधानम् – यद्यपि भाष्यवचनस्यास्य ' अलिङ्गे युष्मदस्मदी ' इति दर्शनेन तदनन्तरं ' न ह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा ' इति व्याख्यानतो विशेषतोऽपि नाम्ना लिङ्गनिषेधेन च प्रतिभात्येव यद् युष्मदस्मच्छब्दयोर्लिङ्गसामान्याभावः, तथापि तत्र केवलं स्त्रीलिङ्गमेव नास्ति युष्मदस्मदोरिति विज्ञेयम्।

[1050] अष्टाध्यायी – (5-4-42)

[1051] महाभाष्यम् – साम आकम् – (7-1-33) इति सूत्रे

[1052] महाभाष्यम् – (7-1-33) सूत्रे

[1053] अष्टाध्यायी – (6-1-101)

यदि तस्य भाष्यस्यायमाशयो न मन्येत, तर्हि ‘ युष्मान् ’, ‘ अस्मान् ’ इत्यादिप्रयोगेषु पुंस्त्वाभावात् “ तस्माच्छसो नः पुंसि ” इति सूत्रेण नकार एव न स्यात्, पुंस्त्वाभावस्य वर्णनात् । ‘ अलिङ्गे युष्मदस्मदी ’ इति महाभाष्यवाक्यमेव विरुद्धं स्यात् । यतो हि एकत्र स्वयं भगवान् भाष्यकारो ब्रवीति ‘ न ह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा ’ इति । स्वयमेव च नपुंसकलिङ्गे प्रयोगमाचष्टे – ‘ युष्मदस्मदी ’ इति ।

तथा च येन वाक्येन युष्मदस्मदोर्लिङ्गसामान्याभावव्यवस्था क्रियते भगवता महाभाष्यकृता अलिङ्गे युष्मदस्मदी इत्यनेन तत्रैव च नपुंसकलिङ्गदर्शनेन वदतो व्याघातादप्रामाण्यमापतेद् भाष्यवचनस्य । यदा च सङ्कोचः क्रियते यद् युष्मदस्मच्छब्दयोः स्त्रीलिङ्गे प्रयोगो न भवतीति, तदा न कोऽपि दोषः, न वा भाष्यवचनव्याघात इति । अत एव शब्देन्दुशेखरे – ‘ अलिङ्गे ’ इति ‘ स्त्रियामनयोरवृत्तेर्न टाबिति भावः ’[1054] इति प्रोक्तम् ।

अनयोर्द्वयोः शब्दयोः युष्मदस्मदोः स्त्रियामेवाप्रयोगाद् भट्टोजिदीक्षितेनापि स्त्रियामेवापत्तिं प्रदर्श्य महाभाष्यीयेनानेन वाक्येन ‘ अलिङ्गे युष्मदस्मदी ’ इत्यनेन टाबापत्तिर्वारितेति प्रतिभाति । तथाहि – ‘ ननु ‘ त्वं स्त्री ’, ‘ अहं स्त्री ’ इत्यत्र ‘ त्व + अम् ’, ‘ अह + अम् ’ इति स्थिते, अमि पूर्वरूपं परमपि बाधित्वान्तरङ्गत्वात् टाप् प्राप्नोति । सत्यम्, ‘ अलिङ्गे युष्मदस्मदी ’ तेन स्त्रीत्वाभावान्नटाप् ’[1055] इति ।

अनेन सर्वेण दृष्टेन प्रमाणेनेदमेव प्रमाणितं भवति यदनयोर्द्वयोः शब्दयोर्युष्मदस्मदोः स्त्रियां प्रयोगो न भवति । अर्थानां तद्वाचकानाञ्च लिङ्गत्रयवत्त्वेऽपि शब्दयोरनयोर्न निर्लिङ्गतेति सिद्धान्ते न कापि क्षतिरिति हृदयं भाष्यवचसो यदि व्याख्यायते, तदा न कोऽपि दोषः । अतोऽत्र युष्मदस्मच्छब्दयोः स्त्रीलिङ्गे प्रयोगो न भवतीति सिद्धान्तो वेदितव्यः[1056] ।

भवच्छब्दस्तु युष्मच्छब्दसमानार्थः । परन्तु लिङ्गयोगी । अत्र भवच्छब्दादौ सम्बोधनव्यभिचारी चेति विशेषः । ‘ भातेर्डवतु ’ इति उणादिसूत्रेण व्युत्पादितः । नन्वस्य हलन्तत्वेन स्मायादीनामभावः, तृतीया तु निमित्तकारण इत्यादिनैव गतार्थेति । चेदत्राहुः –

फिञद्रिमयटः पूर्वनिपातः ठक्छसौ तथा ।
आत्वशेषष्य्ञ्विरहः अकच्च भवतः फलम् ॥

[1054] लघुशब्देन्दुशेखरे हलन्तपुंलिङ्गप्रकरणे – शेषे लोपः – (7-2-90) इति सूत्रे

[1055] वैयाकरणसिद्धान्तकौमुद्यां हलन्तपुंलिङ्गप्रकरणे – शेषे लोपः – (7-2-90) इति सूत्रे

[1056] महाभाष्यनिगूढाकूतयः – (पृ. – 175)

अत्राकजात्वैकशेषा भाष्ये कण्ठोक्ताः । ‘ भवतोऽकच्छेषात्वानि प्रयोजनानि ’ इति । ‘ भवकान् ’ इत्यत्र “ अव्ययसर्वनाम्नामकच् प्राक् टेः ” इति सूत्रेण अकच् । ‘ स च भवान् च इति भवन्तौ ’ इत्यत्र “ त्यदादीनि सर्वैर्नित्यम् ”[1057] इति सूत्रेण एकशेषः । भवानिव दृश्यते ‘ भवादृक् ’ इत्यत्र “ आ सर्वनाम्नः ” इति सूत्रेण आत्वम् । अन्ये उपलक्षणतया सङ्ग्रहीतव्याः । ‘ भवतोऽपत्यं भावतायनिः ’ इत्यत्र त्यदादित्वेन वृद्धसञ्ज्ञायाम् “ उदीचां वृद्धादगोत्रात् ”[1058] इति सूत्रेण फिञ् । ‘ भवन्तमञ्चतीति भवद्र्यङ् ’ इत्यत्र “ विश्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ”[1059] इति सूत्रे चकारेण सर्वनामग्रहणाट्टेरद्र्यादेशः । ‘ भवन्मयः ’ इत्यत्र “ नित्यं वृद्धशरादिभ्यः ”[1060] इति सूत्रेण मयट् । ‘ भवन्मित्रः ’ इत्यत्र ‘ सर्वनामसंख्यायोः ’ इत्यनेन पूर्वनिपातः । ‘ भावत्कः ’,‘ भवदीयः ’ इत्यत्र “ भवतष्ठक्छसौ ”[1061] इति सूत्रेण ठक्छसौ प्रत्ययौ स्याताम् । ‘ भवतो भावो भवत्ता ’ इत्यत्र सर्वनामसञ्ज्ञया गुणवचनसञ्ज्ञाबाधात् “ गुणवचनब्राह्मणादिभ्यः कर्मणि च ”[1062] इति सूत्रेण ष्यञभावः । ‘ गुणवचनसञ्ज्ञाऽसर्वनामसञ्ज्ञा ’ इत्येकसञ्ज्ञाधिकारे वार्त्तिककृता पठितत्वात् । ‘ भवत्याः पुत्रो भवत्पुत्रः ’ इत्यत्र ‘ सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः ’ इति भाष्यवचनात्पुंवद्भावोऽपि फलम् [1063] ।

किंशब्दः प्रश्नाक्षेपयोः । प्रश्नो द्विविधः, जिज्ञासामूलको विप्रतिपत्तिमूलकश्च । प्रथमो यथा – ‘ किमेकं दैवतं लोके किं वाऽप्येकं परायणम् ’ इति । द्वितीयो यथा – ‘ ईश्वरसद्भावे किं प्रमाणम् ’ इति । आक्षेपो यथा – ‘ को नामायं सवितुरुदयः ’ इति । निन्देवाक्षेपः “ खट्वा क्षेपे ”[1064] इत्यादौ दर्शनात् । खण्डने तु किं प्रमाणम् इत्युपन्यस्य किंशब्दोऽयमाक्षेपार्थो वा कुत्सितार्थो वा वितर्कार्थो वा प्रश्नार्थो वा स्यादिति विकल्पचतुष्टयमुक्तम् । अभावप्रतिपादनार्थत्वं दुष्टत्वप्रतिपादनार्थत्वं सन्देहार्थत्वं जिज्ञासाविषयत्वप्रतिपादनार्थत्वमिति च क्रमेण तद्व्याख्यातम् । ईश्वरसद्भावे प्रमाणं नास्तीत्याद्ये, कुत्सितं प्रमाणमिति द्वितीये, प्रमाणमन्यद्वेति तृतीये, प्रमाणं जिज्ञासाविषय इति चतुर्थे अर्थपर्यवसानं तत्फलितार्थमादायेति बोध्यम्[1065] ।

[1057] अष्टाध्यायी – (1-2-72)

[1058] अष्टाध्यायी – (4-1-157)

[1059] अष्टाध्यायी – (6-3-92)

[1060] अष्टाध्यायी – (4-3-144)

[1061] अष्टाध्यायी – (4-2-115)

[1062] अष्टाध्यायी – (5-1-124)

[1063] शब्दकौस्तुभः, व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

[1064] अष्टाध्यायी – (2-1-26)

[1065] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

* **सञ्ज्ञोपसर्जनीभूतास्तु न सर्वादयः**

ननु सर्वो नाम कश्चित् तस्मै सर्वाय देहि, एवमेव अतिसर्वाय देहि, ‘ अतिकतरत् ब्राह्मणकुलम् ’, ‘ अतितद् ब्राह्मणकुलम् ’ इत्यादिप्रयोगसिद्धये सञ्ज्ञोपसर्जनयोर्गणपाठात्पर्युदासो विधेय इति चेन्न, महाभाष्यकारः पतञ्जलिः एतद्वार्त्तिकोक्तमर्थं सूत्रादेव प्रतिपादयाञ्चकार । तथा हि – ‘ सर्वनामः ’ इति महती इयं सञ्ज्ञा । सञ्ज्ञा च नाम यतो न लघीयः, सञ्ज्ञाकरणस्य लाघवार्थत्वात् । यथा ‘ टि, घु, घ, भ ’ इत्यादिसञ्ज्ञा । तत्र महत्याः सञ्ज्ञायाः करणे इदं प्रयोजनं यद् अन्वर्थत्वं यथा विज्ञायेत ‘ सर्वस्य यद् नाम तत् सर्वनाम ’ । एवं च ‘ सर्वेषां नामानि सर्वनामानि ’ इत्यन्वर्थसञ्ज्ञाकरणबलेन प्राधान्येनोपस्थितस्वीयसर्वार्थवाचकस्यैव सर्वादिगणे पाठावगमात् न सञ्ज्ञोपसर्जनीभूतानां सा । प्राधान्येनोपस्थितेत्यनेन हि उपसर्जनव्यावृत्तिः । यदि अत्र स्वीयेति नोच्यते, तदा पूर्वादिशब्देषु अव्याप्तिः स्यात् । तेषां सर्वार्थवाचकताऽभावात् । सर्वार्थवाचकेत्यनेन सञ्ज्ञाव्यावृत्तिः, तेषामेकैकव्यक्तिमात्र-वाचकत्वात्[1066] । एकद्रव्योपनिवेशिनी हि सञ्ज्ञा । इतरविशेषणत्वेनार्थोपस्थापकत्वं चोपसर्जनत्वमित्युभयभूतानामन्वर्थसञ्ज्ञाया अननुरूपत्वात् सर्वनामत्वं नास्ति । एवञ्च “ सर्वादीनि सर्वनामानि ” इत्यत्र अन्वर्थमहासञ्ज्ञया प्राधान्येनोपस्थितिविषयप्रसिद्धस्वीयसर्वार्थवाचकत्व - समानाधिकरणसर्वनामपदवन्ति सर्वादीनि स्युरित्यर्थकरणेन सञ्ज्ञोपसर्जनप्रतिषेधः इति वार्त्तिकं च भगवता भाष्यकृता खण्डितम् । अर्थात् – सूत्रेणैव वार्त्तिकप्रतिपादितार्थलाभात् पृथक् वार्त्तिकपाठो न कार्य इत्याशयः । अन्वर्थसञ्ज्ञायाः फलन्तु सञ्ज्ञाप्रयुक्तं स्मायादिकम्, अन्तर्गणकार्यं तु “ अद्ड्डतरादिभ्यः पञ्चभ्यः ”[1067], “ त्यदादीनामः ”, “ तदोः सस्सावनन्त्ययोः ”[1068] इत्यादिकं च न स्यात् ।

* **भट्टोजिदीक्षितानामभिप्रायः**

भट्टोजिदीक्षितैः “ सर्वादीनि सर्वनामानि ” इति सूत्रेण विहिता सर्वनामसञ्ज्ञा तदन्तस्यापि स्वीक्रियते । तद्रीत्यात्र प्रमाणञ्च “ द्वन्द्वे च ” इति सर्वनामसञ्ज्ञानिषेधकं सूत्रमेव । इदं च सूत्रं तद्रीत्या समुदायस्य सर्वनामसञ्त्रानिषेधकम् । तथा च तदन्तविधिं विना समुदाये सञ्ज्ञाप्रसक्तेरभावात् व्यर्थं सत् तदन्तविधेर्ज्ञापकमिति भट्टोजिदीक्षितानामभिप्रायः । एतच्च शब्दकौस्तुभे इत्थं स्पष्टीक्रियते –

[1066] वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

[1067] अष्टाध्यायी – (7-1-25)

[1068] अष्टाध्यायी – (7-2-106)

‘ तदन्तग्रहणमत्र बोद्धव्यं द्वन्द्वे चेति ज्ञापकात् । तच्च तत्रैव वक्ष्यते ’[1069] ।

द्वन्द्वे चेति सूत्रे कौस्तुभे च विषयोऽयं स्पष्टीक्रियते ‘ तस्मात् समुदायस्यैवायं प्रतिषेधः नावयवानामिति स्थितम् । अत एव सर्वनामसञ्ज्ञायां तदन्तविधिसद्भावे द्वन्द्वे चेति ज्ञापकमित्युक्तम् ’[1070] ।

- **नागेशभट्टानामभिप्रायः**

नागेशभट्टैः “ येन विधिस्तदन्तस्य ” इति सूत्रस्थात् प्रयोजनं सर्वनामाव्ययसञ्ज्ञायाम् इति वार्त्तिकात् सर्वनामसञ्ज्ञाविधायकसूत्रे शब्दरूपं विशेष्यमादाय ‘ सर्वादीनि ’ इत्यस्य विशेषणत्वात् तदन्तविधिः स्वीक्रियते [1071] । तथा च तद्रीत्या प्रयोजनमिति वार्त्तिकं सर्वादिसूत्रे शब्दरूपं विशेष्यमादाय तदन्तविधिस्वीकारे गमकम् ।

एवञ्च भट्टोजिदीक्षितोक्तज्ञापकेन न निर्वाहः किन्तु वार्त्तिकप्रामाण्यात् सूत्रे तदन्तविधिनैव तदन्तस्य सर्वनामसञ्ज्ञा इत्यत्र नागेशभट्टानामभिप्रायो बोध्यः ।

एवञ्च भट्टोजिदीक्षितरीत्या द्वन्द्वे चेति ज्ञापकात् तदन्तविधिः । नागेशभट्टरीत्या उक्तवार्त्तिकबलात् शब्दरूपं विशेष्यमादाय तदन्तविधिः इत्यत्र मतभेदो बोध्यः[1072] ।

- **सर्वनामसञ्ज्ञाप्रदेशाः**

1. सर्वनाम्नः तृतीया च – (2-3-27)

अनभिहिते हेतौ षष्ठी हेतुप्रयोगे

2. किंसर्वनामबहुभ्यः अद्व्यादिभ्यः – (5-3-2)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः

3. इदमः इश् – (5-3-3)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः

4. एतेतौ रथोः – (5-3-4)

[1069] शब्दकौस्तुभः भागः – 1 – (पृ. – 157)

[1070] शब्दकौस्तुभः भागः – 1 – (पृ. – 172)

[1071] प्रयोजनं सर्वनामाव्ययसञ्ज्ञायामिति वार्त्तिकात् शब्दरूपविशिष्यमादाय ज्ञापकात्तदन्तविधिः । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

[1072] पाणिनिसञ्ज्ञासूत्रविमर्शः – पृ. 85

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः इदमः

5. एतदः अन् – (5-3-5)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः

6. सर्वस्य सः अन्यतरस्यां दि – (5-3-6)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः

7. पञ्चम्याः तसिल् – (5-3-7)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः

8. तसेः च – (5-3-8)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः तसिल्

9. पर्यभिभ्यां च – (5-3-9)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः तसिल्

10. सप्तम्याः त्रल् – (5-3-10)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः

11. इदमः हः – (5-3-11)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः

12. किमः अत् – (5-3-12)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः ।

13. यवा ह च छन्दसि – (5-3-13)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः किमः ।

14. इतराभ्यः अपि दृश्यन्ते – (5-3-14)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः ।

15. सर्वैकान्यकिंयत्तदः काले दा – (5-3-15)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः ।

16. इदमः र्हिल् – (5-3-16)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः काले ।

17. अधुना – (5-3-17)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः काले इदमः ।

18. दानीं च – (5-3-18)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः काले इदमः ।

19. तदः दा च – (5-3-19)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः काले दानीम् ।

20. तयोः दार्हिलौ च छन्दसि – (5-3-20)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः काले ।

21. अनद्यतने र्हिल् अन्यतरस्याम् – (5-3-21)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः काले ।

22. सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः – (5-3-22)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः सप्तम्याः काले ।

23. प्रकारवचने थाल् – (5-3-23)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः।

24. इदमः थमुः – (5-3-24)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः प्रकारवचने।

25. किमः च – (5-3-25)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः प्रकारवचने थमुः।

26. था हेतौ च च्छन्दसि – (5-3-26)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः प्राक् दिशः विभक्तिः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः प्रकारवचने किमः।

27. दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यः दिग्देशकालेषु अस्तातिः – (5-3-27)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः किंसर्वनामबहुभ्यः अद्व्यादिभ्यः।

28. अव्ययसर्वनाम्नाम् अकच् प्राक् टेः – (5-3-71)

प्रत्ययः परः च आद्युदात्तः च तद्धिताः तिङः कः।

29. आ सर्वनाम्नः – (6-3-91)

उत्तरपदे दृग्दृशवतुषु

30. विष्वग्देवयोः च टेः अद्रि अञ्चतौ वप्रत्यये – (6-3-92)

उत्तरपदे सर्वनाम्नः

31. सर्वनाम्नः स्मै – (7-1-14)

अतः ङेः

32. ङसिङ्योः स्मात्स्मिनौ – (7-1-15)

अतः सर्वनाम्नः ङसिङ्योः स्मात्स्मिनौ स्तः।

33. पूर्वादिभ्यः नवभ्यः वा – (7-1-16)

अतः सर्वनाम्नः ङसिङ्योः स्मात्स्मिनौ

34. जसः शी – (7-1-17)

अतः सर्वनाम्नः जसः शी स्यात्।

35. आमि सर्वनाम्नः सुट् – (7-1-52)

आत्

36. सर्वनाम्नः स्याट् ह्रस्वः च – (7-3-114)

घेः ङिति आपः ।

- **विभाषा दिक्समासे बहुव्रीहौ – (1-1-27)**

अत्र गौणत्वाद् अप्राप्ता सञ्ज्ञा अनेन विकल्प्यते। यत्तु " न बहुव्रीहौ " इति निषेधे प्राप्तेऽस्यारम्भ इति तन्न, निषेधस्यालौकिकविग्रहवाक्ये प्रवृत्तिरस्य च समासे इति विभिन्नविषयकत्वात्।

ननु " विभाषा दिक्समासे बहुव्रीहौ " इति सूत्रे दिग्ग्रहणं किमर्थम् ? ' विभाषा समासे बहुव्रीहौ ' इत्यनेनैवेष्टसिद्धेरिति चेन्न, क्व ' विभाषा समासे ' इत्यनेन विकल्पः, क्व " न बहुव्रीहौ " इत्यनेन नित्यप्रतिषेध इति ज्ञानं न स्यात् । सर्वत्र बहुव्रीहौ विकल्पे " न बहुव्रीहौ " इत्यस्य वैयर्थ्यम्, सर्वत्र प्रतिषेधे विभाषावैयर्थ्यमित्युभयोर्विषयविभागार्थं तस्यावश्यकत्वात् । तथा च दिगुपदिष्टे समासे विभाषा, अन्यत्र बहुव्रीहौ नित्यं सर्वनामसञ्ज्ञानिषेध इति।

अथ समासग्रहणं किमर्थम् ? बहुव्रीहित्वस्य समासत्वव्याप्यतया बहुव्रीहौ इत्युक्त्यैव समासे लब्धे ' विभाषा दिग्बहुव्रीहौ ' इत्यनेनैवेष्टसिद्धेरिति चेन्न, समास एव यो बहुव्रीहिस्तत्रैव यथा स्यात् बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूत्, यथा – ' दक्षिणदक्षिणस्यै देहि ' । इति विवेकार्थं तस्यावश्यकत्वात्। अर्थात् बहुव्रीहिर्द्विविधः – समाससञ्ज्ञको बहुव्रीहिरेकः, " आबाधे च "[1073] इति सूत्रेण पीडायां द्योत्यायां सर्वस्य पदस्य द्वे स्तो बहुव्रीहिवच्च इत्यतिदिष्टो द्वितीयः । तत्र समास एव यो बहुव्रीहिस्तत्रैव दिग् बहुव्रीहौ विकल्पो यथा स्यादतिदिष्टबहुव्रीहौ ' दक्षिणदक्षिणस्यै देहि ' विरहात्पीडामनुभवत इयमुक्तिरत्र नित्यैव सर्वनामसञ्ज्ञा।

ननु बहुव्रीहिग्रहणं किमर्थम् ? ' विभाषा दिक्समासे ' इत्यनेनैवेष्टसिद्धेरिति चेन्न, द्वन्द्वादौ सर्वनामसञ्ज्ञा मा भूत् तेन ' दक्षिणोत्तरपूर्वाणाम् ' इत्यादौ " द्वन्द्वे च " इत्यनेन समुदायस्य सञ्ज्ञानिषेधेऽप्यवयवस्य ' सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः ' इति वार्त्तिकेन पुंवद्भावे विकल्पो मा भूदित्येतदर्थं तस्यावश्यकत्वात् । यदि च ' लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ' इति परिभाषया प्रकृते न दोष इत्युच्यते चेत् बहुव्रीहिग्रहणमुत्तरार्थम् । तेन च " न बहुव्रीहौ " इत्यनेन

[1073] अष्टाध्यायी – (8-1-10)

बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र ‘ एकैकस्मै देहि ’ इत्यादौ न निषेध इत्युक्त्वा समासो यो बहुव्रीहिरित्यर्थेन परिहृत्य ‘ वस्त्रमन्तरं येषान्ते वस्त्रान्तराः ’,‘ वसनमन्तरं येषान्ते वसनान्तराः ’ । ‘ वस्त्रान्तराश्च वसनान्तराश्च वस्त्रान्तरवसनान्तराः ’ इत्यादौ अवयवभूतस्यापि बहुव्रीहेः प्रतिषेधार्थं सूत्रे बहुव्रीहिग्रहणं स्यात् ।

● न बहुव्रीहौ – (1-1-28)

‘ सर्वादीनि ’, ‘ सर्वनामानि ’ इति पदद्वयमनुवर्तते । ‘ बहुव्रीहौ समासे सर्वादीनि सर्वनामसञ्ज्ञकानि न भवन्ति ’ इति सूत्रार्थः । उदाहरणञ्च –प्रियसर्वाय, प्रियविश्वाय, द्व्यन्याय, त्र्यन्याय ।

ननु ‘ प्रियसर्वाय ’ इत्यत्र बहुव्रीहावन्यपदार्थस्य प्रधानत्वेन घटकपदार्थानां स्वार्थविशिष्टार्थान्तर-बोधकत्वरूपोपसर्जनप्रतिषेधेनैव सञ्ज्ञाया अप्राप्त्या निषेधो व्यर्थः । किञ्च बहुव्रीहिसञ्ज्ञायाः प्राक् बहुव्रीहिसञ्ज्ञार्थे कल्पितेऽलौकिकविग्रहवाक्ये सञ्ज्ञया निषेधो न स्यादिति चेन्न, बहुव्रीहेः प्राग् सर्वनामत्वे निषेधवैयर्थ्यापत्त्या ‘ चिकीर्षिते ’ इत्यध्याह्रियते । ‘ न बहुव्रीहिः ’ इति लघुप्रथमानिर्देशे कर्तव्ये बहुव्रीहौ इति गुरुसप्तमीनिर्देशश्चिकीर्षित इत्यध्याहारतात्पर्यकः । ‘ बहुव्रीहावित्यत्र विषयसप्तम्याश्रयणेन समासात् पूर्वं सञ्ज्ञानिषेधार्थं तत् सार्थकम् । तथा च बहुव्रीहौ प्रसक्ते सति ततः प्रागेव विग्रहवाक्येऽयं निषेधोऽर्थवान् । एकार्थीभावात्मकसामर्थ्यस्य समासदशायामेव सत्त्वेन विग्रहवाक्ये तदभावेन तदानीमुक्तोपसर्जनत्वस्याभावादितिभावः ’[1074] ।

न चालौकिके समासप्रवृत्त्यैकार्थीभावस्यापि तत्रैव कल्पादुपसर्जनत्वादेव निषेधसिद्धौ सूत्रस्य वैयर्थ्यमेवेति वाच्यम् । तत्रैकार्थीभावस्यारोपेऽप्युक्तरूपोपसर्जनत्वाभावेन यथा – ‘ भवकन्तमतिक्रान्तः ’ इति लौकिकविग्रहवाक्यं भवति । तत्र समासदशायां भवच्छब्दार्थस्य स्वोपसंक्रान्तार्थान्तरप्रधानतया उपसर्जनत्वेऽपि अलौकिकविग्रहदशायां भवच्छब्दस्यानुपसर्जनत्वात् सर्वनामत्वे सति प्रवृत्तः अकच् ‘ अतिक्रान्तो भवकन्तम् ’ इति लौकिकविग्रहवाक्ये ‘ अतिभवकान् ’ इति समासे चानुवर्तते, लौकिकविग्रहदशायां भवच्छब्दस्य उक्तरीत्या अनुपसर्जनत्वात्, समासे तस्योपसर्जनत्वेऽपि योनिभूतालौकिकविग्रहदशायां प्रवृत्तस्य अकचो निवर्तकाभावात् तथैवात्रापि प्राप्तस्याकचोऽभावार्थं सञ्ज्ञानिषेध इत्यत्र सूत्रातात्पर्य्यात् ।

[1074] वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसत्रे

न चालौकिकवाक्ये बहुव्रीहेः प्रागुपसर्जनत्वाभावेऽपि बहुव्रीहौ परिनिष्ठिते रूपे उपसर्जनत्वस्य भावितया निमित्तं विनाशोन्मुखं दृष्ट्वा तत्पर्युक्तं कार्यं न कुर्वन्ति पाणिनीयाः इत्यर्थकः ‘ अकृतव्यूहाः पाणिनीयाः ’ इति परिभाषया सर्वनामत्वाप्राप्त्या निषेधवैयर्थ्यम् । “ न बहुव्रीहौ ” इति सूत्रारम्भसामर्थ्येन परिभाषाया अनित्यत्वज्ञापनात् । अत एव ‘ अतिभवकान् ’ इति सिध्यति । अन्यथा अत्रापि अनुसर्जनत्वस्य भाविविनाशकतया सर्वनामत्वाभावेऽकचोऽनापत्तेः[1075] ।

न चोपसर्जनत्वादप्राप्तिः, उपसर्जनप्रतिषेधस्य ‘ सञ्ज्ञोपसर्जनप्रतिषेधः ’ इति वदतो वार्त्तिककारस्य ‘ अन्वर्थग्रहणं विज्ञास्यते सर्वेषां यन्नाम तत्सर्वनाम ’ इत्यन्वर्थसञ्ज्ञामाश्रयतो भाष्यकृतश्चैव न सूत्रकृतः । तथा च ‘ बहुव्रीहौ चिकीर्षिते ’ इत्यर्थो वृत्तिकृदूहित एव न सूत्रसम्मतः ।

अत एव भाष्यकृता बहुव्रीहिपदं तादर्थ्यात्ताच्छब्द्यमिति बहुव्रीहिपदमेव बहुव्रीह्यर्थालौकिक-वाक्यपरमित्युक्तं न तु ‘ चिकीर्षिते ’ इति । बहुव्रीहिपदस्यालौकिकविग्रहपरत्वमपि न भाष्यसम्मतम् । अत एव ‘ अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ ’ इत्युक्तम् ।

एतेन बहुव्रीहिः सर्वनामसञ्ज्ञको न भवतीत्यर्थ एव सूचितः । तथा च सूत्रकारस्याप्यकजिष्ट एव । एतेन सूत्रप्रत्याख्यानमेतत् । ‘ यथोत्तरं मुनीनां प्रामाण्यम् ’ इति कैयटोक्तिश्चिन्त्या । भाष्यकृता तु तर्त्तर्हि वक्तव्यम् । न वक्तव्यम् इत्यादिशब्दैरेव प्रत्याख्यायते । तथा त्वत्र नोक्तम् । अन्वर्थत्वे तु सूत्रस्य नाऽवश्यकतेति त्वन्यत्[1076] ।

- **तृतीयासमासे – (1-1-29)**

तृतीयासमासे सर्वादीनि सर्वनामसञ्ज्ञकानि न भवन्ति । उदाहरणञ्च – मासपूर्वाय, संवत्सरपूर्वाय ।

“ विभाषा दिक्समासे बहुव्रीहौ ” इति सूत्रात् ‘ समासे ’ इत्यनुवर्तमाने पुनः समासग्रहणं तृतीयसमासार्थवाक्येऽपि प्रतिषेधो यथा स्यात् । अन्यथा ‘ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ’ इति न्यायेन मुख्य एव प्रतिषेधः स्यात् न तु गौणे । तस्मात् तत्रापि प्रतिषेधो यथा स्यादित्येवार्थं पुनः समासग्रहणम् । तदुक्तं भाष्ये – ‘ समासे इत्यनुवर्तमाने पुनः समासग्रहणम् .... तृतीयासमासार्थानि

[1075] वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा, लक्ष्मीटीका – प्रकृतसूत्रे
[1076] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

पदानि तृतीयासमास इति ’[1077] तथा च अलौकिकविग्रहवाक्ये विकल्पेन समासप्रवृत्त्या समासाभावेऽपि निषेधप्रवृत्त्या ‘ मासेन पूर्वाय ’ इत्यपि सिध्यति ।

‘ अथवा ‘ समासे ’ इति वर्तमाने पुनः समासग्रहणस्यैतत्प्रयोजनम् – योगाङ्गं यथोपजायेत । सति च योगाङ्गे योगविभागः करिष्यते –‘ तृतीया ’ तृतीयासमासे सर्वादीनि सर्वनामसञ्ज्ञानि न भवन्ति । ‘ मासपूर्वाय देहि ’, ‘ संवत्सरपूर्वाय देहि ’ । ततः ‘ असमासे ’ असमासे च तृतीयायाः सर्वादीनि सर्वनामसञ्ज्ञानि न भवन्ति । ‘ मासेन पूर्वाय देहि ’, ‘ संवत्सरेण पूर्वाय देहि ’[1078] ।

अत्र भाष्ये – ‘ तृतीयायाः ’ इति पञ्चम्यन्तोपादानात् ‘ मासेन पूर्वाय ’ इत्यत्र निषेधः । ‘ पूर्वस्मै मासेन ’ इत्यत्र तु न निषेधः । भाष्ये ‘ पञ्चम्युपादानात् पूर्वपदभूते नास्य प्रवृत्तिः ’ इत्युद्द्योतोक्तेः[1079] ।

“ पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ”[1080] इति सूत्रेण कृतस्य समासस्यैव ग्रहणम् । न तु यस्य कस्यचित्तृतीयासमासस्य “ कर्तृकरणे कृता बहुलम् ”[1081] इति । ‘ त्वयका कृतम् ’, ‘ मयका कृतम् ’[1082] ।

• द्वन्द्वे च – (1-1-30)

द्वन्द्वे समासे सर्वादीनि सर्वनामसञ्ज्ञकानि न भवन्ति । उदाहरणञ्च – पूर्वापराणाम्, दक्षिणोत्तरपूर्वाणाम्, कतरकतमानाम्, वर्णाश्रमेतराणाम् । इदं सूत्रं भाष्ये न व्याख्यातम् ।

वर्णाश्रमेतरेत्यादिसमुदायस्यैव द्वन्द्वता । न तु तदवयवानाम् । ‘ अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयम् ’ इति भाष्यात् समुदायस्यैव निषेध इति गम्यते । तथा चात्र प्रकरणे सर्वाऽपि सप्तमी प्रथमार्थे, छान्दसत्वात् । तथा च द्वन्द्वः सर्वनामसञ्ज्ञको न भवतीत्यर्थेन समुदायस्यैव निषेधो भवति ।

ननु द्वन्द्वावयवानां सर्वनामत्वनिषेधाभावे वर्णाश्रमेतरशब्दे इतरशब्दस्य सर्वनामतया ततः परस्यामः सुटि वर्णाश्रमेतरेषामिति स्यात् ।

न च अवर्णान्तात् सर्वनाम्नोऽङ्गात् परस्यामः सुड्विधानादिह चामि परे इतरशब्दस्य सर्वनामत्वेऽप्यङ्गत्वाभावान्न ततः परस्यामः सुट्प्रसक्तिरिति वाच्यम् । सुड्विधिर्ह्ययमङ्गाधिकारस्थः

[1077] महाभाष्यम् – प्रकृतसूत्रे

[1078] महाभाष्यम् – प्रकृतसूत्रे

[1079] महाभाष्यम् – उद्द्योतः – प्रकृतसूत्रे

[1080] अष्टाध्यायी – (2-1-31)

[1081] अष्टाध्यायी – (2-1-30)

[1082] काशिका – प्रकृतसूत्रे

। ततश्च पदाङ्गाधिकारे तस्य च तदन्तस्य च इति परिभाषया सर्वनामान्ताददन्तादङ्गात् परस्यामः सुड् विधीयते। ततश्च वर्णाश्रमेतरशब्दस्य समुदायस्य द्वन्द्वतया सर्वनामत्वनिषेधेऽपि तदवयवस्य इतरशब्दस्य सर्वनामतया तदन्ताङ्गात् परत्वादामः सुट् स्यात्।

न चैवं सति द्वन्द्वस्य तन्निषेधो व्यर्थः स्यादित्याशङ्क्यम्, पदाङ्गाधिकारादन्यत्र तसिल्त्रलादिविधौ तन्निषेधस्यार्थवत्त्वादित्याशङ्क्य परिहरति । अत्रैवं समाधीयते भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां – एवं सति समुदायस्यैव निषेधे सति तदन्तविधिना सुट्प्रसङ्गो न स्यात्, अवर्णान्तादङ्गात् परस्य सर्वनाम्नो विहितस्यामः सुडिति व्याख्यानात्[1083] । प्रकृते च वर्णाश्रमेतरशब्दात् समुदायादाम् विहितः, न च स समुदायः सर्वनामसञ्ज्ञकः, द्वन्द्वस्य तन्निषेधात् । इतरशब्दस्तु सर्वनामसञ्ज्ञकः, न ततो विहित आम् । आमः समुदायादेव विधानात् । ततो न सुट् स्यात्[1084] ।

‘ अत्र निषेधप्रकरणे सर्वनामानीति नानुवर्तते, किन्तु सर्वादीनीत्यनुवर्तते । तथा च द्वन्द्वे विद्यमानानि सर्वादीनि न भवन्तीत्यर्थः । तथा च समुदायस्यावयवस्य सर्वनामत्वाप्राप्तिरिति यथाश्रुत-सप्तम्यामपि दोषाभावः स्यात् । द्वन्द्वे यानि सर्वादीनीति नार्थः, कारकाणां क्रियान्वयनियमात् । द्वन्द्वे विद्यमानानीत्यपि नार्थो विद्यतिक्रियाध्याहारे गौरवात्, नियमेनाध्याहृतायां प्रधानभूतभवति-क्रियायामन्वयस्यौचित्याच्च ’[1085] इत्युक्तिः लक्ष्मीटीकाकारस्य ।

- **विभाषा जसि – (1-1-31)**

पूर्वेण नित्ये प्रतिषेधे प्राप्ते जसि विभाषाऽऽरभ्यते । द्वन्द्वे समासे जसः कार्यं प्रति सर्वादीनि सर्वनामसञ्ज्ञकानि विभाषा भवन्ति। उदाहरणञ्च –‘ कतरकतमे ’, ‘ कतरकतमाः ’, ‘ दक्षिणपूर्वे ’, ‘ दक्षिणपूर्वाः ’।

वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेनाह – जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वन्द्वे उक्ता सञ्ज्ञा वा स्यात्। वर्णाश्रमेतरे, वर्णाश्रमेतराः। शीभावं प्रत्येव विभाषेत्युक्तम्, अतो नाकच्, किं तु कप्रत्यय एव। वर्णाश्रमेतरकाः।

1083 वैयाकरणसिद्धान्तकौमुदी – प्रकृतसूत्रे

1084 वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

1085 वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

ननु शीभावेन जसो विनाशात् जसाधारमित्यसङ्गतम्, विद्यमानस्यैवाधारत्वनियमात् । अन्यथा ‘ नष्टो घटो जलमानय ’ इत्यापद्येतेति चेन्न, कालगताधारत्वस्य तत्रारोपात् । ‘ जसाधारम् ’ इति वाक्यमसङ्गतम्, सुबन्तानामेव समासेन रुत्वयत्वयलोपानां वारयितुमशक्यत्वात् । एवम् ‘ जस ईः ’ इति व्याख्यानेऽपि दोषः । सूत्रे भत्वेन तद्वारणमप्यनुचितम्, एतादृशव्याख्यानस्य सूत्रकृदभिमतत्वे प्रमाणाभावात् । अन्ये तु ‘ जस ईर्जसि ’ । शब्दस्वरूपापेक्षनपुंसकह्रस्वत्वे “ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ”[1086] इति सूत्रेण सप्तम्या लुका निर्देशो जस ईकारे (शीभावे) कर्तव्ये इत्यर्थः । तेनाकचि कर्तव्ये “ द्वन्द्वे च ” इति सूत्रेण नित्यनिषेध एव । अविशेषेण विभाषायान्तु पक्षेऽकचि तन्मध्येपतितन्यायात् ‘ वर्णाश्रमेतरकाः ’ इत्यत्र शीभावापत्तिः । के तु तद्विशिष्टस्य सर्वनामत्वाभावात् शीभावो न, अत्र “ द्वन्द्वे च ” इति निषेध एव । अत्र मानं तु ‘ जसः कार्यं प्रति विभाषा ’ इति प्रकृतसूत्रस्थभाष्यमेव । अन्ये तु अत एव भाष्यात् व्यवस्थितविभाषात्वमस्य वर्णयन्ति । जसः शीभावादन्यत्र कार्ये तु “ द्वन्द्वे च ” इति नित्यनिषेधात्सर्वनामकार्याभावः[1087] ।

- **प्रथमचरमतयाल्पार्धकतिपयनेमाश्च – (1-1-32)**

अत्र “ विभाषा जसि ” इति सर्वनामानि इति चानुवर्तते । नेमशब्दस्य सर्वादीनि इति प्राप्त्याऽन्यत्र चाप्राप्त्या प्राप्ताप्राप्तविभाषेयम् । अत्र न इति नानुवर्तते, प्रथमादिषु सर्वनामत्वाप्राप्त्या निषेधासम्भवात् । प्रथम, चरम, तयप्प्रत्ययान्त, अल्प, अर्ध, कतिपय, नेम इत्येते शब्दा जसः कार्यं प्रति विभाषा सर्वनामसञ्ज्ञका भवन्ति इति सूत्रार्थो निष्पन्नः । प्रथमे, प्रथमा । चरमे, चरमाः । द्वितये, द्वितयाः । अल्पे, अल्पाः । अर्धे, अर्धाः । कतिपये, कतिपयाः । नेमे, नेमाः – इत्यादीन्युदाहरणानि । सूत्रमिदं भाष्ये न व्याख्यातम् ।

द्वितये इति बहवो द्व्यवयवसमुदाया इत्यर्थः । एतेन द्व्यवयवसमुदायस्यैकत्वात् द्वितये इति बहुवचनमसाधु इति परास्तम् । उद्भूतावयवसंख्याविवक्षया साधुत्वं तु न, अवयवे द्वित्वस्यैव सत्त्वेन बहुत्वासङ्गतेः ।

‘ विभाषा प्रकरणे तीयस्य ङित्सूपसंख्यानम् ’ – “ विभाषा जसि ” इत्यधिकारे तीयान्तस्य ङे-ङसि-ङस्-ङि-इत्येतेषु ङित्सु परेषु सर्वनामसञ्ज्ञावचनं कर्तव्यमिति वार्त्तिकार्थः । द्वितीयस्मै, द्वितीयाय

[1086] अष्टाध्यायी – (7-1-39)

[1087] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

। द्वयोः पूरणो द्वितीयः । “ द्वेस्तीयः”[1088] इति सूत्रेण पूरणार्थे तीयप्रत्ययः । तृतीयस्मै, तृतीयाय । त्रयाणां पूरणः तृतीयः । “ त्रेः संप्रसारणं च ”[1089] इति सूत्रेण पूरणार्थे तीयप्रत्ययः संप्रसारणञ्च ।

‘ प्रथमः ’ इति प्रथ्यते = प्रख्यायते आदौ इति प्रथ प्रख्याने इति धातोः ‘ प्रथेरमच् ’[1090] इति उणादिसूत्रेण अमच्प्रत्ययः । ‘ प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत् ’ इति मेदिनी । ‘ चरमः ’ इति चरति = भक्षयत्यग्रिममिति ‘ चर गतौ भक्षणे च ’ इति धातोः “ चरेश्च ”[1091] इति उणादिसूत्रेण अमच्प्रत्ययः । अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमाः इत्यमरः । ‘ अल्पः ’ इति वार्यतेऽधिकमिति ‘ अल् भूषणादौ ’ इति धातोः बाहुलकात्पप्रत्ययः । ‘ स्तोकाल्पक्षुल्लकाः ’ इत्यमरः ।

अर्धः इति ऋध्यति = वर्धते इति ‘ अर्धः ’ । अर्धशब्दो द्विविधः – अखण्डवाची समांशवाची च । तदुक्तम् – ‘ भित्तं शकलखण्डे वा पुंस्यर्धः ’ इति । अत्राद्यस्य ग्रहणम्, न द्वितीयस्य ‘ अर्धं समेंऽशके ’ इत्यमरश्च, नित्यनपुंसकत्वेन फलाभावात् । ‘ कतिपयः ’ इति कतिशब्दादयच् प्रत्ययः पुगागमश्च निपात्यते । संख्याभेदपरिज्ञानाय पृष्टेऽर्थे । ‘ नेमः ’ इति नयति समांशत्वं प्राप्नोतिति नेमः । नीधातोः ‘ अर्तिस्तुसुहुसृधृक्षिक्षुमायावापदियक्षिनीभ्यो मन् ’[1092] इति उणादिसूत्रेण मन्प्रत्ययः ।

- **पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसञ्ज्ञायाम् – (1-1-33)**

पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर – इत्येतेषां गणे पाठात् पूर्वेण नित्यायां सर्वनामसञ्ज्ञायां प्राप्तायां जसि विभाषाऽऽरभ्यते । पूर्वादीनि जसि विभाषा सर्वनामसञ्ज्ञकानि भवन्ति सञ्ज्ञाभिन्नव्यवस्थायाम् । पूर्वे पूर्वाः, परे पराः, अवरे अवराः, दक्षिणे दक्षिणाः, उत्तरे उत्तराः, अपरे अपराः, अधरे अधराः – इत्यादीन्युदाहरणानि ।

- **स्वमज्ञातिधनाख्यायाम् – (1-1-34)**

[1088] अष्टाध्यायी – (5-2-54)

[1089] अष्टाध्यायी – (5-2-55)

[1090] दशपाद्युणादिवृत्तिः – (7-46) – (प. उ. – 5-68)

[1091] दशपाद्युणादिवृत्तिः – (7-47) – (प. उ. 5-69)

[1092] दशपाद्युणादिवृत्तिः – (7-26) – (प. उ. 1-40)

अत्रापि नित्या सर्वनामसञ्ज्ञा प्राप्ता जसि विभाष्यते । स्वमित्येतच्छब्दरूपं जसि विभाषा सर्वनामसञ्ज्ञं भवति, न चेज्ज्ञातिधनयोस्सञ्ज्ञारूपेण वर्तते । स्वे पुत्राः, स्वाः पुत्राः, स्वे गावः स्वा गावः । आत्मीया इत्यर्थः ।

- **अन्तरं बहिर्योगोपसंख्यानयोः – (1-1-35)**

अत्रापि पूर्वेण नित्या सर्वनामसञ्ज्ञा प्राप्ता सा जसि विभाष्यते । अन्तरमित्येतच्छब्दरूपं विभाषा जसि सर्वनामसञ्ज्ञं भवति बहिर्योगे उपसंव्याने च गम्यमाने । बहिर्योगे - अन्तरे गृहाः, अन्तरा गृहाः । नगरबाह्यश्चाण्डालादिगृहा उच्यन्ते । उपसंव्याने - अन्तरे शाटकाः, अन्तराः शाटकाः । उपसंव्यानं परिधानीयमुच्यते, न तु प्रावरणीयम् । परिधानीयमन्तर्वासः, प्रावरणीयं बहिर्वासः ।

एषा त्रिसूत्री गणमध्येऽपि पठ्यते । इह त्रिसूत्र्यां यद्वक्तव्यं तत्सर्वं गणव्याख्यावसर एवोक्तम् ।

अनया रीत्या ईदूदेद्द्विवचनम् प्रगृह्यम्, अदसो मात्, शे, निपात एकाजनाङ्, ओत्, सम्बुद्धौ शाकल्यस्येतावनार्षे, उञ ऊँ, ईदूतौ च सप्तम्यर्थे, दाधा घ्वदाप्, आद्यन्तवदेकस्मिन्, तरप्तमपौ घः, बहुगणवतुडति संख्या, ष्णान्ता षट्, डति च, क्तक्तवतू निष्ठा, सर्वादीनि सर्वनामानि, विभाषा दिक्समासे बहुव्रीहौ, न बहुव्रीहौ, तृतीयासमासे, द्वन्द्वे च, विभाषा जसि, प्रथमचरमतयाल्पार्धकतिपयनेमाश्च, पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसञ्ज्ञायाम्, स्वमज्ञातिधनाख्यायाम्, अन्तरं बहिर्योगोप-संव्यानयोः इत्येतानि सूत्राणि अध्यायेऽस्मिन् समीक्षितानि ।

।। इति तृतीयोऽध्यायः ।।

।। अथ चतुर्थोऽध्यायः ।।

(क) अव्ययादिसञ्ज्ञाप्रकरणम्

- **स्वरादिनिपातमव्ययम् – (1-1-36)**

इत आरभ्य सूत्रपञ्चकमव्ययसञ्ज्ञाविधायकम् । स्वर् आदिर्यस्य समुदायस्य तत् स्वरादि तानि स्वरादीनि शब्दरूपाणि तद्गुणसंविज्ञानबहुव्रीहिसमासः । निपाताः = एतत्सञ्ज्ञकाः । “ प्राग्रीश्वरान्निपाताः ”[1093] इत्यारभ्य “ अधिरीश्वरे ”[1094] इत्येतत्पर्यन्तं ये वक्ष्यन्ते ते निपाताः । स्वरादीनि च निपाताश्च तेषां समाहारः स्वरादिनिपातम् । समाहारे द्वन्द्वः, अतश्च नपुंसकैकवचनम् । एवञ्च फलितम् – स्वरादयश्च निपातसञ्ज्ञकाश्च ये शब्दास्ते अव्ययसञ्ज्ञाः स्युः । स्वरादिनिपातानामव्ययत्वाद् “ अव्ययादाप्सुपः ”[1095] इति सूत्रेण सुपो लुग्भवति । अव्ययसञ्ज्ञकत्वस्य फलमेतद् ।

- **स्वरादीनां पृथक् पाठप्रयोजनम्**

ननु स्वरादिषु किञ्चित् क्रियाप्रधानम्, किञ्चित्साधनप्रधानमिति, असत्त्ववाचित्वाच्चादिष्वेव स्वरादीन्पठित्वा निपातसञ्ज्ञायां निपातमव्ययमित्यनेनाऽव्ययसञ्ज्ञासिद्धौ सूत्रे स्वरादिग्रहणं व्यर्थमिति चेन्न, सत्त्ववाचिनां स्वरादीनां निपातत्वापत्तिर्दोषः । “ चादयोऽसत्त्वे ”[1096] इति यथा असत्त्ववाचिनामेव चादीनां भवति निपातसञ्ज्ञा, तथैव तत्रैव स्वरादीनां पाठे एषामपि असत्त्ववाचिनामेव स्याद्, न तु सत्त्ववाचिनाम्, सन्ति च सत्त्ववाचिन अपि स्वरादयः, स्वः पश्यति, स्वर्गच्छति, स्वस्ति वाचयति इत्यादौ क्रियासम्बन्धे अनेककारकशक्तियोगदर्शनाद् । ‘ अनेककारकशक्तियोग एव च सत्त्वम् ’ इति

[1093] अष्टाध्यायी – (1-4-56)
[1094] अष्टाध्यायी – (1-4-97)
[1095] अष्टाध्यायी – (2-4-82)
[1096] अष्टाध्यायी – (1-4-57)

उद्योतकारः[1097] । तथा च भाष्यम् – ‘ चादीनां वै असत्त्ववचनानां निपातसञ्ज्ञा । स्वरादीनां पुनः सत्त्ववचनानामसत्त्ववचनानाञ्च ’[1098] ।

न च “ प्राग्रीश्वरान्निपाताः ”[1099] इत्यतः परम् “ स्वरादि ” इत्यारभ्य “ अव्ययीभावश्च ”[1100] इत्यन्तं पठित्वा “ चादयोऽसत्त्वे ” इति पठनीयम् । सर्वेषां निपातसञ्ज्ञैव विधेया । यत्राव्ययपदं तत्र निपातपदमेव पठनीयम् । यथा “ निपातादाप्सुपः ” इत्यादि । निपातसञ्ज्ञयैवाभीष्टसिद्धेरव्यय-सञ्ज्ञाविधानं व्यर्थमिति वाच्यम् ।

स्वरादीनामपि “ निपाता आद्युदात्ताः ” इत्याद्युदात्तापत्तेः । एवं सति स्वरादीनामपि “ किमोऽत् ”[1101], “ दक्षिणादाच् ”[1102] इत्यादौ “ तद्धितश्चासर्वविभक्तिः ”[1103] इति निपातसञ्ज्ञायाम् “ निपात एकाजनाङ् ”[1104] इति सूत्रेण प्रगृह्यसञ्ज्ञत्वापत्तेः ।

ननु तद्धितान्तस्य निपातत्वेन नोक्तदोष इति चेन्न, स्वरादिगणे ‘ तसिलादयस्तद्धित एधाच्पर्यन्तः ’ इति, ‘ कृन्मकारसन्ध्यक्षरान्तोऽव्ययीभावश्च ’ इति गणसूत्राभ्यां केवलतद्धितस्य स्वरादित्वेन उक्तापत्तेस्तादवस्थ्याद् ।

न च प्राग्रीश्वरादव्ययम्, स्वरादीनि, चादयोऽसत्त्वे, इत्येवं सूत्रन्यासं विधाय अव्यय-सञ्ज्ञयाऽभीष्टसिद्धौ निपातसञ्ज्ञाविधानं व्यर्थमिति वाच्यम् ।

चादीनाम् “ निपाता आद्युदात्ताः ” इत्यनापत्तेः “ तत्पुरुषे तुल्यार्थतृतीया-सप्तम्युपमानाव्ययद्वितीयाकृत्याः ”[1105] इति सूत्रे ‘ अव्यये नञ्कुनिपातानामेव ’ इति वार्त्तिके चादीनां बहूनां पठने गौरवापत्तेश्च । तदुक्तं भाष्ये – “ तर्ह्यव्ययसञ्ज्ञैव स्याद् । तच्चाशक्यम् । वक्ष्यत्येतद् ‘ अव्यये नञ्कुनिपातानाम् ’ इति । तद्गरीयसा न्यासेन परिगणनं स्याद् । तस्मात्पृथग्ग्रहणं कर्तव्यम् । उभे च सञ्ज्ञे कर्तव्ये इति ”[1106] इति ।

[1097] महाभाष्यम् – उद्योतः – प्रकृतसूत्रे
[1098] महाभाष्यम् – प्रकृतसूत्रे
[1099] अष्टाध्यायी – (1-4-56)
[1100] अष्टाध्यायी – (1-1-41)
[1101] अष्टाध्यायी – (5-3-12)
[1102] अष्टाध्यायी – (5-3-36)
[1103] अष्टाध्यायी – (1-1-38)
[1104] अष्टाध्यायी – (1-1-14)
[1105] अष्टाध्यायी – (6-2-2)
[1106] महाभाष्यम् – प्रकृतसूत्रे

अव्ययमिति महासञ्ज्ञाकरणम् अन्वर्थसञ्ज्ञाविज्ञानार्थम् । न व्येति – भिन्नभिन्नरूपं विकारं लिङ्गक्रियाकारकप्रयोज्यं न प्राप्नोति तदव्ययम् । तथोक्तं “ तद्धितश्चासर्वविभक्तिः ” इति सूत्रे भाष्ये तु – स्त्रीपुंनपुंसकानि सत्त्वगुणाः, एकत्वद्वित्वबहुत्वानि च एतानर्थान् केचित् वियन्ति, केचिन्न वियन्ति । ये न वियन्ति तदव्ययम् । ‘ न वियन्ति – विविधप्रकारप्रापकान्न प्राप्नुवन्ति ’ इत्युद्द्योतः । एतेन युष्मदस्मदोः संख्यावाचकेषु च नातिव्याप्तिः, तेषां विभक्तिकृतरूपभेदसत्त्वाद् ।

न चाव्ययीभावेऽव्याप्तिः, तत्रारोपिताव्ययत्वस्यैव सत्त्वेनादोषाद् । अत एवाव्ययीभावपदे च्व्यर्थ उपपद्यते ।

अन्वर्थत्वफलन्तु अत्युच्चैः, अत्युच्चैसौ, अत्युच्चैसः – इत्यादौ अतिक्रान्तार्थप्राधान्यात् द्रव्यवाचकतया लिङ्गादियोगात् अव्ययत्वाभावः । यद्यपि ‘ ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ’ इति निषेधात् इह तदन्तविधिर्दुर्लभः, तदभावे च अत्युच्चैः – इत्यादौ प्राप्तिरेव नास्ति, यन्निषेधाय अव्ययपदस्य अन्वर्थत्वाश्रयणमावश्यकं भवेत्, तथापि अन्वर्थत्वलाभाय अत्युच्चैः – इत्यादौ निषेधफलकमहासञ्ज्ञाकरणसामर्थ्याद्वा, ‘ प्रयोजनं सर्वनामाव्ययसञ्ज्ञायाम् ’ इति वचनबलाद्वा इह तदन्तग्रहणात् ‘ अत्युच्चैः ’ इत्यादौ प्राप्तसञ्ज्ञा अन्वर्थत्वसमाश्रयणाद् एव वार्यते । तत्फलञ्च ‘ परमस्वः ’, ‘ उत्तमस्वः ’ इत्यादौ यत्र लिङ्गाद्यनन्वय्यर्थप्राधान्यम्, तत्र सर्वनामत्वसिद्धिः[1107] ।

- **अव्ययसञ्ज्ञाप्रदेशाः**

1. अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्य-सादृश्यसंपत्तिसाकल्यान्तवचनेषु - (2-1-6)

अव्ययं समर्थेन सह समस्यते, सोऽव्ययीभावः । उदाहरणम् – अधिहरि, उपकृष्णम्, संमद्रम्, दुर्यवनम् इत्यादि ।

2. अव्ययादाप्सुपः – (2-4-82)

अव्ययाद्विहितस्यापः सुपश्च लुक्स्यात् । उदाहरणम् – तत्र शालायाम्, कृत्वा ।

3. अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ – (3-4-59)

अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः, प्रियस्य च नीचैः कथनम्, तस्मिन्गम्ये अव्यय उपपदे कृञः क्त्वाणमुलौ स्तः । उदाहरणम् – उच्चैःकृत्य, उच्चैःकृत्वा इत्यादि ।

4. अव्ययात्त्यप् – (4-2-104)

[1107] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

अव्ययात् शैषिकत्यप् प्रत्ययो भवति । उदाहरणम् – अमात्यः, इहत्यः, क्वत्यः, ततस्त्यः ।

5. अव्ययसर्वनाम्नामकच् प्राक्टेः – (5-3-71)

अव्ययेभ्यः सर्वनामेभ्यस्तिङश्च प्रागिवीयेऽर्थेऽकच् प्रत्ययो भवति । उदाहरणम् – उच्चकैः, सर्वके, पचतकि ।

6. कस्य च दः – (5-3-72)

कान्ताव्ययस्य दकारोऽन्तादेशः स्यादकचि । उदाहरणम् – धकित्, हिरकुत्, पृथकत् ।

7. तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः – (6-2-2)

एषां पूर्वपदं प्रकृतिस्वरं भवति । उदाहरणम् – अयज्ञो वा एषः, अब्राह्मणः ।

8. नाव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः – (6-2-168)

एभ्यः परं स्वाङ्गवाचि मुखमुत्तरपदं बहुव्रीहौ समासे नान्तोदात्तं भवति । उदाहरणम् – उच्चैर्मुखः, नीचैर्मुखः ।

- **तद्धितश्चासर्वविभक्तिः – (1-1-37)**

अत्र “ स्वरादिनिपातमव्ययम् ” इति पूर्वसूत्रात् अव्ययम् इत्यनुवर्तते । अत्र तद्धितपदेन प्रत्ययग्रहणे ‘ यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ’ इति परिभाषया तद्धितान्ततदादेर्ग्रहणम् । न च ‘ सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ’ इति परिभाषया तदन्तविधिनिषेधः स्यादिति वाच्यम् , केवलतद्धितस्याव्ययसञ्ज्ञायां फलाभावेन सूत्रवैयर्थ्यापत्त्या केवलतद्धिताद्विभक्तेरप्राप्त्या ‘ असर्वविभक्तिः ’ इति विशेषणवैयर्थ्येन “ येन विधिस्तदन्तस्य ”[1108] इति सूत्रे प्रयोजनं सर्वनामाव्ययसञ्ज्ञायाम् इति भाष्यवार्त्तिकेन च ‘ सञ्ज्ञाविधौ ’ इति निषेधाप्रवृत्तेः, ज्ञापकसिद्धायास्तस्या असार्वत्रिकत्वात् ।

अत्र ‘ असर्वविभक्तिः ’ इति बहुव्रीहिः । तत्र न सर्वा असर्वा इति तत्पुरुषान्तरम्, असर्वा विभक्तिर्यस्मादिति विग्रहः । यस्माद्वचनत्रयं नोत्पद्यते, किन्त्वेकवचनमेव स तद्धितान्तः शब्दोऽव्यय-सञ्ज्ञः स्यादिति सूत्रार्थः । तथा च काशिकावृत्तिः – ‘ तद्धितान्तः शब्दोऽसर्वविभक्तिरव्ययसञ्ज्ञो भवति । यस्मान्न सर्वविभक्तेरुत्पत्तिः सोऽसर्वविभक्तिः ’[1109] इति । एवं कौमुद्यामपि दीक्षितः – ‘ यस्मात्सर्वा

[1108] अष्टाध्यायी – (1-1-72)

[1109] काशिका – प्रकृतसूत्रे

विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात् '[1110] इति । तथा हि भाष्ये – तावद् " द्व्येकयोर्द्विवचनैकवचने "[1111], " बहुषु बहुवचनम् "[1112] इति सूत्रन्यासं भङ्क्त्वा ' एकवचनम् ', ' द्वयोर्द्विवचनम् ', ' बहुषु बहुवचनम् ' इति सूत्रन्यासं कृत्वा ' एकवचनमुत्सर्गतः करिष्यते ', द्विबह्वोरर्थयोः तस्य द्विवचनबहुवचने बाधके इत्यादिस्थितम् । ततश्च एकवचनमित्यनेन " ङ्याप्प्रातिपदिकाद् "[1113] एकवचनं भवतीति सामान्यविधिना द्वित्वबहुत्वाभावे एकवचनमिति लभ्यते । एवं च द्विबहुत्वाभावे सति एकत्वे तदभावे च एकवचनमिति फलति । तत्र द्वित्वबहुत्वयोः द्विवचनबहुवचनोक्त्यैव ततोऽन्यत्र एकवचनस्य सिद्धत्वाद् ' एकवचनम् ' इति सूत्रं कर्मत्वाद्यभावेऽपि प्रापणार्थं संपद्यते । तथा च अलिङ्गसंख्येभ्योऽव्ययेभ्य एकवचनं प्रवर्तमानं विनिगमनाविरहात् सर्वविभक्त्येककवचनं भवति । अत एव " अव्ययादाप्सुपः "[1114] इत्यत्र ' सुपः ' इति प्रत्याहारग्रहणं चरितार्थम् । अन्यथा ' सोः ' इत्येव ब्रूयात् । तस्मात्सर्वा विभक्तयो यस्मादिति न विग्रहः । किन्तु सर्वशब्दोऽत्र ' सर्वः पटो दग्धः ' इतिवत् अवयवकात्स्न्र्ये वर्तते, एवं च सर्वा वचनत्रयात्मिका विभक्तिः यस्मान्नोत्पद्यते, किन्त्वेकवचनान्येवोत्पद्यन्ते, स तद्धितान्तोऽव्ययसञ्ज्ञः स्यादिति निर्गलितोऽर्थः ।

ननु ' पचतिकल्पम् ' इत्यादावपि ' एकवचनम् ' इत्यनेन सर्वैकवचनं स्यादिति चेन्न, सर्वथाऽप्राप्तावेव तस्य प्रवृत्तेः । अत्र च कर्तृत्वकर्मत्वसत्त्वेन क्रियायाम् ' एका क्रिया ' इति भाष्येण स्वत एकत्वसत्त्वेन च सर्वथा तदप्राप्त्यभावात् । अत एव ' पचतिकल्पं भवति ', ' पचतिकल्पस्य भवनम् ' । ' पचतिकल्पेन स्थीयते ', ' पचतिकल्पं पश्य ', ' पचतिकल्पस्य दर्शनम् ', ' पचतिकल्पाय गच्छति ' इत्यादौ कर्तरि कर्मणि च या या विभक्तयो विहितास्तासामुत्पत्तिः संगच्छते ।

न च ' एकवचनम् ' इत्यस्याप्राप्तप्रापणार्थत्वे तिङन्तेभ्योऽप्येकवचनं स्यादिति वाच्यम्, सुब्विधायकशास्त्रैकवाक्यतया प्रातिपदिकेष्वेव तत्प्रवृत्तेः ।

नन्वेकवचनस्य संख्याबोधकत्वाभावेन ' घटः ' इत्यादावेकत्वप्रतीतिर्न स्यादिति चेन्न, द्विवचन-बहुवचनयोरभावेन द्वित्वाद्यनुपस्थितौ घटादेः संख्यावदर्थत्वेन सत्त्वभूतत्वात्प्रकरणाच्चैकत्वस्य मानसबोधनात्[1115] ।

[1110] वैयाकरणसिद्धान्तकौमुदी – अव्ययप्रकरणे प्रकृतसूत्रे

[1111] अष्टाध्यायी – (1-4-22)

[1112] अष्टाध्यायी – (1-4-21)

[1113] अष्टाध्यायी – (4-1-1)

[1114] अष्टाध्यायी – (2-4-82)

[1115] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

ननु ‘ पचतिरूपम् ’ इत्यत्र “ तिङश्च ”[1116] इत्यनुवृत्तौ “ प्रशंसायां रूपप् ”[1117] इति सूत्रेण विहितः रूपप्प्रत्ययः, ‘ पचतिकल्पम् ’ इत्यत्र “ ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ”[1118] इति सूत्रेण विहितः कल्पप्प्रत्यय इत्यादावतिव्याप्तिः, द्विवचनबहुवचनपरकत्वाभावात्, एकत्वादेस्तिङैव उक्ततया द्विवचनाद्यप्राप्तेः, साधुत्वार्थमेकवचनस्यैवौत्सर्गिकस्य एकत्वादेरविवक्षितत्वेऽपि प्रवृत्तिसम्भवात्, वचनत्रयात्मकविभक्तेरभावादसर्वविभक्तिकत्वात् । एवमेवोभयशब्दे चातिव्याप्तिः, उभशब्दाद् अवयववृत्तेः संख्यावाचकात् “ संख्याया अवयवे तयप् ”[1119] इति सूत्रेण अवयविन्यर्थे तयपि तस्य “ उभादुदात्तो नित्यम् ”[1120] इति सूत्रेणायजादेशे, उभशब्दाद्वा अयचि प्रत्यये निष्पन्नस्य उभयशब्दस्य तद्धितान्तस्य द्विवचनपरकत्वं नास्ति । द्व्यवयवारब्धसमुदायैकत्वे एकवचनम्, द्व्यवयारब्ध-समुदायद्वित्वे तु द्विवचनम्, ‘ उभयो मणिः ’, ‘ उभये मणयः ’ इत्यादिरूपाणि । द्व्यवयवारब्ध-समुदायद्वित्वे तु न द्विवचनम्, ‘ उभयोऽन्यत्र ’ इति वार्त्तिकविरोधात्, ‘ अन्यत्र ’ इत्यस्य द्विवचन-परकत्वाभावे इत्यर्थात् । तत्रैव वार्त्तिके ‘ उभयो मणिः ’, ‘ उभये देवमनुष्याः ’ इति भाष्योदाहरण-प्रामाण्याच्च न केवलं स्वार्थिकायजन्तस्यैव, अपि चु अवयविन्यर्थे विहितायजन्तस्यापि द्विवचनपरकत्वाभावः । तथा चोभयशब्दस्य असर्वविभक्तकतया अव्ययत्वापत्तिः ।

एतदापत्तिवारणोपायासम्भवात् परिगणनं कर्तव्यम् । अत एवाह वार्त्तिककारः – ‘ सिद्धं तु पाठात्, तसिलादयः प्राक् पाशपः । शस्प्रभृतयः प्राक्समासान्तेभ्यः, मान्तः कृत्वोऽर्थः तसिवती नानाञाविति ’[1121] । परिगणितानां पाठः स्वरादिषु कर्तव्यः । तेन स्वरादित्वादव्ययत्वं स्यात् । “ तद्धितश्चासर्वविभक्तिः ” इति सूत्रं न कार्यमिति भावः । सत्यपि सूत्रे परिगणनस्यावश्यकतया परिगणनेनैव सिद्ध्या सूत्रवैर्थ्यं स्पष्टमेव[1122] ।

- **भट्टोजिदीक्षितानामभिप्रायः**

“ तद्धितश्चासर्वविभक्तिः ” इत्यत्र सिद्धान्ते परिगणनस्वीकारेऽपि सूत्रमते यस्मात् सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तः अव्ययसञ्ज्ञः स्यादिति सूत्रार्थः भट्टोजिदीक्षितैः प्रस्तूयते ।

[1116] अष्टाध्यायी – (5-3-56)
[1117] अष्टाध्यायी – (5-3-66)
[1118] अष्टाध्यायी – (5-3-67)
[1119] अष्टाध्यायी – (5-2-42)
[1120] अष्टाध्यायी – (5-2-44)
[1121] महाभाष्यम् – प्रकृतसूत्रे
[1122] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

शब्दकौस्तुभे एतत् सूत्रविषये पक्षचतुष्टयं प्रदर्श्य चतुर्थः पक्षः क्षोदक्षमः इति मतं भट्टोजिदीक्षितैः प्रस्तूयते ।

अव्ययेभ्यः सप्तानामपि विभक्तीनां त्रीण्यपि वचनानि, तथा सप्तानामप्येकवचनान्येव अथवा प्रथमाया एव वचनत्रयम्, यद्वा प्रथमाया एकवचनमेवेति पक्षचतुष्टयं यद्यपि ग्रन्थेषूपलभ्यते, तथापि प्रथमैकवचनमात्रमेवेति चतुर्थपक्ष एव क्षोदक्षमः[1123] इति शब्दकौस्तुभग्रन्थः तन्मतस्य प्रदर्शको बोध्यः ।

एवञ्च तद्रीत्या ‘ इतरत्वं पक्षत्रिकमभ्युच्चयवादमात्रेण उपन्यस्यते न तु तात्विकम् ’ इति कथनात् प्रथमाया एकवचनमात्रमव्ययेभ्यो भवतीति भट्टोजिदीक्षितानामभिप्रायः ।

- **नागेशभट्टानामभिप्रायः**

नागेशभट्टैः भाष्यसिद्धान्ताधारेण विनिगमनाविरहात् सर्वविभक्त्येकवचनमव्ययेभ्यः स्वीक्रियते । भट्टोजिदीक्षितैः प्रस्तुतं मतं नागेशभट्टै नाङ्गीक्रियते । किञ्च प्रथमातिक्रमणे कारणाभावादनेक-विधनियमबाधे गौरवाच्च प्रथमैकवचनस्यैव अनेन उत्सर्गत्वं बोध्यते इति कैयटमतमनूद्य नागेशभट्टैः निरस्यते[1124] ।

किञ्च ‘ अत्र प्रथमासंपूर्णाव्ययेभ्यः प्रथमैकवचनमित्यादिपक्षाणि अर्वाचीनग्रन्थे दृश्यन्ते, तान्यसंगतानि ’[1125] इति नागेशभट्टैः भट्टोजिदीक्षितमतस्यापि खण्डनं विधीयते ।

तस्मात् भाष्यकृता एकवचनमिति सूत्रं स्वीकृत्य उत्सर्गतः एकवचनस्य विधानात् विनिगमनाविरहात् सर्वविभक्त्येकवचनमव्ययेभ्यः स्वीकृत्य यस्मात् सर्वा वचनत्रयात्मिकाविभक्तिः नोत्पद्यते किन्तु एकवचनमेव स तद्धितान्तः अव्ययसञ्ज्ञः स्यादिति सूत्रार्थः स्वीक्रियते । तद्रीत्यात्र “ अव्ययादाप्सुपः ” इत्यत्र सुबिति प्रत्याहारग्रहणं प्रमाणम् ।

तस्मात् प्रथमायाः एकवचनमिति भट्टोजिदीक्षितानां पक्षः नागेशभट्टैः नाङ्गीक्रियते इति बोध्यम् । एवञ्च सर्वाः विभक्तिः इत्यस्य व्याख्यानेऽत्र भट्टोजिदीक्षितनागेशभट्टयोः मतभेदः स्पष्टः इति बोध्यम्[1126] ।

[1123] शब्दकौस्तुभः भागः – 1 – (पृ. – 179)

[1124] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

[1125] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

[1126] पाणिनिसञ्ज्ञासूत्रविमर्शः – (पृ. – 86)

- **कृन्मेजन्तः – (1-1-38)**

अत्र कृत् मेजन्त इति पदद्वयम्। म् च एच् चेति द्वन्द्वे ‘ मेचौ ’ इति तौ अन्तौ यस्य स मेजन्तः, मकारान्त एजन्तश्च इत्यर्थः । मेजन्त इति कृद्विशेषणम् । कृता च तदन्तविधिः । सञ्ज्ञाविधौ सत्यपि ‘ सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ’ इति तदन्तविधिनिषेधो नेह प्रवर्तते, केवलस्य कृतोऽव्ययसञ्ज्ञायां प्रयोजनाभावात् । ततश्च मान्त एजन्तश्च यःकृत् तदन्तमव्ययसञ्ज्ञं स्यात् इत्यर्थः सम्पद्यते[1127] ।

मान्तमिति कृदन्तस्य तु न विशेषणम्, स्वरादौ ‘ प्रशाम् ’ इत्यस्य पाठात् । अन्यथा ‘ प्रशाम् ’ इति श्रूयमाणं मान्तं कृदन्तञ्च “ प्रत्ययलोपे प्रत्ययलक्षणम् ”[1128] इति सूत्रेणैवाव्ययत्वसिद्ध्या तत्पाठवैयर्थ्यापत्तेः, श्रुतानुमितन्यायाच्च ।

न च कृद्यो मान्त इत्यर्थे ‘ कारयाञ्चकार ’ इत्यादौ ‘ कारयाम् ’ इत्यस्याव्ययत्वानापत्तिः, ‘ आम् ’ इति मान्तस्य सन्निहिताद् “ धातोः ”[1129] इत्यधिकाराद्विहितत्वाभावेन कृत्त्वाभावादिति वाच्यम् । अस्याव्ययत्वाभावेऽपि क्षतिविरहात् ।

न च लिटः तिङभिन्नत्वेन सन्निहितधात्वधिकारविहितत्वेन च कृत्सञ्ज्ञकत्वात् प्रत्ययलक्षणेन कारयाम् इत्यस्य प्रातिपदिकत्वे सुबुत्पत्तौ सुपो लुगर्थमव्ययत्वावश्यकम् ।

“ आमः ”[1130] इति सूत्रेण लुका सुपो लुक्सिद्धेः । तदुक्तं भाष्ये – ‘ मा भूदेवम् आम इत्येव भविष्यति । न भविष्यति लिग्रहणमनुवर्तते । विग्रहणं तत्र निवर्तिष्यते । यदि निवर्तते प्रत्ययमात्रस्य लुक् प्राप्नोति । इष्यते च प्रत्ययमात्रस्य आमश्चेष्यते । एवं ह्याह “ कृञ्चानुप्रयुज्यते लिटि ”[1131] यदि च प्रत्ययमात्रस्य लुग्भवति । तत्र एतदुत्पन्नं भवति ’[1132] इति । अयम्भावः – आमन्तादव्यवहितोत्तरं लिडव्यवहितपूर्वं कृञोऽव्यवहितोत्तरं व्याहन्येत । प्रत्ययमात्रस्य लुकि तु ‘ आमः ’ इति तरपो लुकि नाव्यवहितोत्तरत्वहानिरिति । अत एवोक्तवान् पदमञ्जरीकारः – ‘ “ आमः ” इत्येव सुपोऽपि लुक् स्यात्, तत्र लेः इत्यस्याननुवर्तनात् लिटः सुपश्चापि लुक्सम्भवात् ’[1133] इति ।

[1127] सिद्धान्तकौमुदी – प्रकृतसूत्रे , काशिका – प्रकृतसूत्रे

[1128] अष्टाध्यायी – (1-1-62)

[1129] अष्टाध्यायी – (3-1-91)

[1130] अष्टाध्यायी – (2-4-1)

[1131] अष्टाध्यायी – (3-1-40)

[1132] महाभाष्यम् – आमः – (2-4-1) इति सूत्रे

[1133] काशिका – पदमञ्जरी – प्रकृतसूत्रे

यद्वा ' मेजन्तः ' इति अन्तग्रहणं व्यर्थम् येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिनैव सिद्धेः, मेचः कृतो विशेषणत्वात्, अतः ' कृन्मेच् ' इत्येव वक्तव्ये अन्तग्रहणसामर्थ्येनौपदेशिकमेजन्तत्वग्रहणेन लाक्षणिकमेजन्तेऽव्ययत्वाप्राप्तेः । औपदेशिक इत्यस्य सुब्विधानकाले य एजन्त इत्यर्थः । एतेन ' उद्देशश्च प्रातिपदिकानां नोपदेशः ' इत्यनेन न विरोधः । एवञ्च ' आधये ' इत्यत्र यः कृत् " उपसर्गे घोः किः "[1134] इति किः, स नोपदेशे मेजन्तः, किन्तु ङेप्रत्यये परे " घेर्ङिति "[1135] इति गुणे एजन्तः, एवम् ' चिकीर्षवे ' इत्यत्र यः कृत् " सनाशंसभिक्ष उः "[1136] इति सूत्रेण उः, स नोपदेश एजन्तः,किन्तु भ्यसि " बहुवचने झल्येत् "[1137] इति सूत्रेण सत्येत्त्वे । एवञ्च उदाहृतस्थलेषु कृत उपदेशे अनेजन्तत्वात् नाव्ययत्वम् ।

न च ' लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ', ' असिद्धं बहिरङ्गमन्तरङ्गे ', ' सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ' इति वा अत्राव्ययत्ववारणसम्भवात् तदर्थमन्तग्रहणं न कार्यमिति वाच्यम्, एवमर्थप्रतिपत्तौ प्रतिपत्तिगौरवपरिहारायान्तग्रहणस्य कृतत्वात् – इति न्यासकारः[1138] । परिभाषाभ्योऽपि समाधाने सम्भवे अन्तग्रहणं यत्नान्तरमिति पदमञ्जरीकाराः[1139] । मनोरमाकारास्त्वाहुः – परिभाषाणामनित्यत्वज्ञापनायान्तग्रहणम्[1140] ।

वस्तुतस्तु – एतत् सर्वं प्रयोजनप्रदर्शनम् " अव्ययादाप्सुपः "[1141] इति सूत्रस्य अव्ययात् परस्य आपः सुपश्च लुक् इति पक्षे एव सम्भवति, तत्पक्षे एव ' आधे ' इत्यव्ययात् परस्य ङेर्लोपापत्तिसम्भवात् । अव्ययात् विहितस्य आपः सुपश्च लुक् इति मुख्यपक्षे तु न दोषः, ' आधे ' इत्यस्याव्ययत्वेऽपि ङेस्स्तस्मात् विहितत्वाभावात् न लुगापत्तिः । अतोऽन्तग्रहणाभावे ' आधे ' इत्यादेरव्ययत्वेऽपि किमनिष्टमापद्येत – इति ऊहनीयमिति तत्त्वबोधिनीकारा व्याचख्युः[1142] । अयमेव च तत्त्वबोधिनीकारपक्षः शोभन इत्यलम् [1143] ।

[1134] अष्टाध्यायी – (3-3-92)
[1135] अष्टाध्यायी – (7-3-111)
[1136] अष्टाध्यायी – (3-2-168)
[1137] अष्टाध्यायी – (7-3-103)
[1138] काशिका – न्यासकारः – प्रकृतसूत्रम्
[1139] काशिका – पदमञ्जरी – प्रकृतसूत्रे
[1140] मनोरमा – प्रकृतसूत्रे
[1141] अष्टाध्यायी – (2-4-82)
[1142] सिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे
[1143] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

- **क्त्वातोसुन्कसुनः – (1-1-39)**

क्त्वा च तोसुंश्च कसुंश्च क्त्वातोसुन्कसुनः, इतरेतरयोगद्वन्द्वसमासः । सूत्रार्थः – क्त्वा तोसुन् कसुन् इत्येवमन्ताः शब्दा अव्ययसञ्ज्ञका भवन्ति । अत्रोदाहरणञ्च – पठित्वा, चित्वा, जित्वा, कृत्वा, हृत्वा । अत्र " समानकर्तृकयोः पूर्वकाले "[1144] इति सूत्रेण भावे क्त्वाप्रत्ययः । उदेतोः, अत्र उत्पूर्वादिणः धातोः " भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् "[1145] इति सूत्रेण भावः लक्ष्यते येन तस्मिन्नर्थे वर्तमानेभ्यः स्थादिभ्यस्तुमर्थे तोसुन् छन्दसि इत्यर्थकेन तोसुन् प्रत्ययः । संस्थानादीनामधित्वेन लक्षणं भावः । उदेतोस्तिष्ठति – उदयपर्यन्तं तिष्ठतीत्यर्थः । विसृपः, अत्र विपूर्वकात्सृपेः धातोः " सृपितृदोः कसुन् "[1146] इति सूत्रेण भावलक्षणे गम्ये भावे कसुन् प्रत्ययः ।

- **अव्ययीभावश्च – (1-1-40)**

अव्ययीभावसमासोऽव्ययसञ्ज्ञको भवतीत्यर्थः । ननु अव्ययीभावस्याव्ययत्वे किम्प्रयोजनमित्याकाङ्क्षायामाह भाष्यकारः – अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचाराः । लुक्युदाहरणम् – ' अधिहरि ', हरौ इत्यर्थे " अव्ययं विभक्तिसमीपसमृद्धि..... "[1147] इति सूत्रेण विभक्त्यर्थे विद्यमानेनाधिनाऽव्ययाभावसमासेऽव्ययत्वे च ' अधिहरि ' शब्दात्परस्य सुपः " अव्ययादाप्सुपः "[1148] इति सूत्रेण सुपो लुक् । मुखस्वरनिवृत्तौ उदाहरणम् – ' उपाग्निमुखः ' । उपाग्नि मुखं यस्येत्यव्ययीभावगर्भो बहुव्रीहिः । तत्र " मुखं स्वाङ्गम् "[1149] इति सूत्रेण पूर्वपदात्परं स्वाङ्गवाचिमुखपदमन्तोदात्तं बहुव्रीहौ प्राप्तस्यान्तोदात्तस्य " नाव्ययदिक्छब्दगोमहत्स्थूल-मुष्टिपृथुवत्सेभ्यः "[1150] इति सूत्रेण अव्ययात्परं मुखं नान्तोदात्तमिति मुखस्वरप्रतिषेधे ' उपाग्नि ' इत्यस्याव्ययसञ्ज्ञा भवति । तथा च " बहुव्रीहौ प्रकृत्या पूर्वपदम् "[1151] इति सूत्रेण पूर्वशब्दप्रकृतिस्वर

[1144] अष्टाध्यायी – (3-4-21)
[1145] अष्टाध्यायी – (3-4-16)
[1146] अष्टाध्यायी – (3-4-17)
[1147] अष्टाध्यायी – (2-1-6)
[1148] अष्टाध्यायी – (2-4-82)
[1149] अष्टाध्यायी – (6-2-167)
[1150] अष्टाध्यायी – (6-2-168)
[1151] अष्टाध्यायी – (6-2-1)

एव भवति, पूर्वपदं च समासस्वरेणान्तोदात्तम् । विसर्गस्थानिकस्य सकारस्य उपचार इति प्राचां सञ्ज्ञा तन्निवृत्तावुदाहरणम् – ‘ उपपयःकामः ’ । इह “ अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ”[1152] इति सूत्रेण विसर्गस्य सत्वे प्राप्तेऽत्र सूत्रे एव पठितेन अनव्ययस्य इत्यनेन तस्य निषेघेऽव्ययीभावस्याव्ययसञ्ज्ञा भवति । एवञ्च लुकि, मुखस्वरप्रतिनिषेधे, उपचारप्रतिषेधे चैतेषु परिगणितकार्येषु त्रिष्वेवाव्ययीभावस्याव्ययसञ्ज्ञा नान्यत्र ।

यथा ‘ उपाग्न्यधीयान ’ इत्यत्र प्राप्तस्य “ सुबामान्त्रिते पराङ्गवत्स्वरे ”[1153] इति सूत्रेण पराङ्गवद्भावस्य ‘ अव्ययानां न ’ इति वार्तिकेन निषेधे कर्तव्ये ‘ उपाग्नि ’ इत्यव्ययीभावस्य नाव्ययसञ्ज्ञेति पराङ्गवद्भावेन षाष्ठम् “ आमन्त्रितस्य च ”[1154] इति सूत्रेणाद्युदात्तत्वं भवत्येव । एवम् – उपाग्निकमित्यादौ “ अव्ययसर्वनाम्नामकच् प्राक् टेः ”[1155] इति सूत्रेणाकच्च न । ‘ उपकुम्भंमन्यः ’ इत्यत्र “ खित्यनव्ययस्य ”[1156] इति वर्तमाने “ अरुर्द्विषदजन्तस्य मुम् ”[1157] इति सूत्रेण विहितो यो मुम् तस्येह प्रतिषेधो न । ‘ उपकुम्भीभूतः ’ इत्यत्र “ अस्य च्वौ ”[1158] इति सूत्रेण विहितस्येत्वस्य प्रतिषेधो न । इत्वविधौ हि ‘ अव्ययस्य च्वावित्वं न ’ इति प्रतिषेध उच्यते । इहाव्ययीभावस्याव्ययपदेन ग्रहणं न भवति । तदुक्तं भाष्ये – ‘ अव्ययीभावस्याव्ययत्वे लुङ्मुखस्वरोपचाराः ’ इति अस्य प्रयोजनानीति शेषः । किं पुनरिदं परिगणनमाहोस्विद् उदाहरणमात्रम् ? परिगणनमित्याह इति ’[1159] । वस्तुतस्तु अव्ययीभावस्याव्ययसञ्ज्ञा व्यर्था । लुक् तु न फलम् । “ नाव्ययीभावादतोऽम्त्वपञ्चम्याः ”[1160] इति सूत्रेण निषेधो ज्ञापयति – अव्ययीभावात्परस्य सुपो लुग्भवतीति । उपचारप्रतिषेधोऽपि न फलम् ‘ उपपयःकारः ’ इत्यादौ ‘ अनुत्तरपदस्य ’ इति निषेधादेवोपचाराभावसिद्धेः । मुखस्वरप्रतिषेधोऽपि न फलम्, मुखस्वरनिषेधके ‘ नाव्ययाव्ययीभाव ’ इति पाठेनैव निषेधसिद्धेः । सर्वञ्चेदं भाष्ये स्पष्टम् ।

अत्रेदं विचार्य्यते – स्वरादिगणे तसिलादिस्तद्धित एधाच्पर्यन्तम्, औणादिकमसिं वर्जयित्वा च्व्यर्थाश्च, कृन्मेजन्तः, क्त्वा – तोसुन्कसुनः, अव्ययीभावश्च एवं पाठेनाव्ययत्वे स्वरादित्वादेव सिद्धे

[1152] अष्टाध्यायी – (8-3-46)
[1153] अष्टाध्यायी – (2-1-2)
[1154] अष्टाध्यायी – (6-1-195)
[1155] अष्टाध्यायी – (5-3-71)
[1156] अष्टाध्यायी – (6-3-66)
[1157] अष्टाध्यायी – (6-3-67)
[1158] अष्टाध्यायी – (7-4-32)
[1159] भाष्यम् – प्रकृतसूत्रे
[1160] अष्टाध्यायी – (2-4-83)

पुनर्वचनमव्ययसञ्ज्ञाया अनित्यत्वज्ञापनार्थम् । तेन परिगणितादन्यत्रानित्यत्वादेव न स्यात् । " न लोकाव्ययनिष्ठाखलर्थतृनाम् "[1161] इति सूत्रे अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेध इत्यप्यनित्यत्वलभ्य एवेति " तद्धितश्चासर्वविभक्तिः " इत्यादिका चतुःसूत्री अत्रैव तात्पर्य्यग्राहिकेति[1162] । इति अव्यय-सञ्ज्ञाप्रकरणम् ।

- **शि सर्वनामस्थानम् – (1-1-41)**

इत आरभ्य सूत्रद्वयं सर्वनामस्थानसञ्ज्ञाविधायकम् । शि = " जश्शसोः शिः "[1163] इति सूत्रेण विहितो यः ' शि ' आदेशः तस्य सर्वनामस्थानसञ्ज्ञा भवतीति सूत्रार्थः । ' कुण्डानि, वनानि, दधीनि, मधूनि, त्रपूनि, जतूनि ' इत्यादीन्युदाहरणानि ।

' अनपुंसक एव , इति पर्युदासात् ' शि ' इत्यस्य सर्वनामस्थानत्वेऽप्राप्ते सूत्रमिदम् ।

- **सर्वनामस्थानसञ्ज्ञाप्रदेशाः**

1. स्वादिषु असर्वनामस्थाने – (1-4-17)

कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसञ्ज्ञं स्यात् । उदाहरणम् – राजभ्याम्, राजत्वम् ।

2. यचि भम् – (1-4-18)

यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसञ्ज्ञं स्यात् । उदाहरणम् – गार्ग्यः, विश्वपः ।

3. तसौ मत्वर्थे – (1-4-19)

तान्तसान्तौ भसञ्ज्ञो स्तो मत्वर्थे प्रत्यये परे । उदाहरणम् – विद्युत्वान्, विदुष्मान् ।

4. अञ्चेः छन्दसि असर्वनामस्थानम् – (6-1-167)

अञ्चेः परा विभक्तिरुदात्ता । उदाहरणम् – दधीचः ।

5. ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः – (6-1-168)

[1161] अष्टाध्यायी – (2-3-69)

[1162] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1163] अष्टाध्यायी – (7-1-20)

एभ्योऽसर्वनामस्थानविभक्तिरुदात्ता। उदाहरणम् – प्रष्ठौहः, प्रष्ठौहा।

6. अष्टनो दीर्घात् – (6-1-169)

शसादिविभक्तिरुदात्ता। उदाहरणम् – अष्टाभिः।

7. शतुरनुमो नद्यजादी – (6-1-170)

अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता स्यात्। उदाहरणम् – अच्छा रवं प्रथमा जानती।

8. उदात्तयणः हल्पूर्वात् – (6-1-171)

उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी अजादिश्च शसादिविभक्तिरुदात्ता स्यात्। उदाहरणम् – चोदयित्री सूनृतानाम्।

9. नोङ्धात्वोः – (6-1-172)

अनयोर्यणः परे शसादय उदात्ता न स्युः। उदाहरणम् – ब्रह्मबन्ध्वा, सेत् पृश्निः सुभ्वे।

10. पथिमथोः सर्वनामस्थाने – (6-1-196)

आदिरुदात्तः। उदाहरणम् – अयं पन्थाः, मन्थाः।

11. सर्वनामस्थाने च असम्बुद्धौ – (6-4-8)

नान्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने। उदाहरणम् – सखा, राजा।

12. वा ष पूर्वस्य निगमे – (6-4-9)

षपूर्वस्याच उपधाया वा दीर्घोऽसम्बुद्धौ सर्वनामस्थाने परे निगमे। उदाहरणम् – ऋभुक्षाणम्, ऋभुक्षणम्।

13. सान्त महतः संयोगस्य – (6-4-10)

सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे। उदाहरणम् – अजरांसि, महान्।

14. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षतृहोतृपोतृप्रशास्तॄणाम् – (6-4-11)

अबादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे। उदाहरणम् – आपः, कर्ता, स्वसा।

15. उगिदचां सर्वनामस्थानेऽधातोः – (7-1-70)

अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात् सर्वनामस्थाने परे। उदाहरणम् – भवान्, श्रेयान्, पचन्, प्राङ्।

16. युजेरसमासे – (7-1-71)

युजेः सर्वनामस्थाने नुम् स्यादसमासे। उदाहरणम् – युङ्, सुयुक्।

17. नपुंसकस्य झलचः – (7-1-72)

झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात् सर्वनामस्थाने परे। उदाहरणम् – पयांसि, मनांसि, ज्ञानानि।

18. इतोऽत् सर्वनामस्थाने – (7-1-86)

पथ्यादेरिकारस्याकारः सर्वनामस्थाने। उदाहरणम् – पन्थाः, मन्थाः, ऋभुक्षाः।

19. थो न्थः – (7-1-87)

पथिमथोः थस्य न्थादेशः सर्वनामस्थाने। उदाहरणम् – पन्थाः, मन्थाः।

20. भस्य टेर्लोपः – (7-1-88)

भसञ्ज्ञकस्य पथ्यादेष्टेर्लोपः स्यात्। उदाहरणम् – पथः, मथः।

21. पुंसोऽसुङ् – (7-1-89)

सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात्। उदाहरणम् – पुमान्, पुमांसौ, पुमांसः।

22. गोतो णित् – (7-1-90)

गोशब्दात्परं सर्वनामस्थानं णिद्वत् स्यात्। उदाहरणम् – गौः, गावौ, गावः।

23. णल् उत्तमो वा – (7-1-91)

उत्तमो णल् वा णित्। उदाहरणम् – चखाद, चखद। पपाच, पपच।

24. सख्युरसम्बुद्धौ – (7-1-92)

सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्। उदाहरणम् – सखायौ, सखायः।

25. अनङ् सौ – (7-1-93)

सख्युरङ्गस्यानङादेशः स्यादसम्बुद्धौ सौ परे। उदाहरणम् – सखा।

26. ऋदुशनस्पुरुदंसोऽनेहसां च – (7-1-94)

ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ परे। उदाहरणम् – धाता, उशना, पुरुदंसा, अनेहा।

27. तृज्वत्क्रोष्टुः – (7-1-95)

क्रोष्टुस्तृजन्तेन तुल्यं वर्तते, असम्बुद्धौ सर्वनामस्थाने परे। उदाहरणम् – क्रोष्टा, क्रोष्टारौ, क्रोष्टारः।

28. स्त्रियां च – (7-1-96)

स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते । उदाहरणम् – क्रोष्ट्री, क्रोष्ट्र्यौ, क्रोष्ट्र्यः ।

29. विभाषा तृतीयादिष्वचि – (7-1-97)

अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् । उदाहरणम् – क्रोष्ट्रा, क्रोष्टुना ।

30. चतुरनडुहोरामुदात्तः – (7-1-98)

अनयोराम् स्यात् सर्वनामस्थाने परे स चोदात्तः । उदाहरणम् – चत्वारः, अनड्वान् ।

31. ऋतो ङिसर्वनामस्थानयोः – (7-3-110)

ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात् । उदाहरणम् – धातरि, धाता, हे धातः ।

- **सुडनपुंसकस्य – (1-1-42)**

नपुंसकभिन्नप्रकृतिकानि स्वादिपञ्चवचनानि सर्वनामस्थानसञ्ज्ञकानि भवन्तीति सूत्रार्थः । स्त्री च पुमांश्च इति विग्रहे “ अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुह .... ”[1164] इति सूत्रेण द्वन्द्वसमासे अच्प्रत्ययः निपातनेन ‘ स्त्रीपुंसौ ’ इति शब्दः सिध्यति । तस्य नञा समासे “ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या ”[1165] इति सूत्रेण नञः प्रकृतिभावः स्त्रीपुंसशब्दस्य निपातनात्पुंसकेत्यादेशेन नपुंसकशब्दः सिध्यति । पुल्लिङ्गोऽप्ययम् ‘ स नपुंसको भवति ’ इति भाष्यप्रयोगात् ।

वस्तुतस्तु ‘ अनपुंसकस्य ’ इति निर्देशादेव निपातनान्नपुंसकशब्दः सिध्येत्, “ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसक...... ” इति सूत्रे नपुंसकग्रहणं न कर्तव्यम् ।

ननु ‘ अनपुंसकस्य ’ इत्यत्र समासो न स्यात् । नञः नपुंसकशब्देनासामर्थ्यात् । तदुक्तं भाष्ये – ‘ असमर्थसमासश्चायं द्रष्टव्योऽनपुंसकस्येति, न हि नञो नपुंसकेन सामर्थ्यम् । केन तर्हि ? भवतिना इतीति चेन्न, अत एव निपातनादसमर्थसमासो भवतीति ज्ञाप्यते । असमर्थसमासस्य बहूनि प्रयोजनानि सन्ति । कानि ? असूर्य्यपश्यानि मुखानि । अपुनर्गेयाः श्लोकाः । अश्राद्धभोजी ब्राह्मण इति ’[1166] इत्युक्तं भाष्ये । असमर्थसमासो वाक्यभेदश्चेति गौरवं तु न दोषः । फलमुखत्वात् । ‘ सुट् स्त्रीपुंसयोः ’ इति वक्तव्ये अनपुंसकस्येति वचनं ज्ञापकम् ‘ प्रसज्यप्रतिषेधेऽपि नञ्समासोऽस्ति ’ इति कैयटः[1167] ।

[1164] अष्टाध्यायी – (5-4-77)

[1165] अष्टाध्यायी – (6-3-75)

[1166] भाष्यम् – प्रकृतसूत्रम्

[1167] भाष्यम् – प्रदीपः – प्रकृतसूत्रे

‘ सुट् ’ इत्यनेन ‘ सु ’ इत्यारभ्य औट्पर्यन्तं प्रत्याहारो गृह्यते। तत्र च सु औ जस् अम् औट् इति पञ्च प्रत्ययाः समाविष्टाः सन्ति।

नन्वत्र टाटकारेण प्रत्याहारः स्यादिति चेन्न, प्रतिपदोक्तपरिभाषया अन्त्यत्वेन यस्येत्सञ्ज्ञा तस्यैव ग्रहणादनन्तरत्वादौटष्टकारोच्चारणसामर्थ्याच्चौटष्टकारेणैव प्रत्याहारः । एतेन फलाभावेन च सुडागमस्यापि ग्रहणं निरस्तम्[1168] । ‘ आदिरन्त्येनेत्यत्रान्त्यत्वप्रयुक्ता यस्येत्सञ्ज्ञा तेन प्रत्याहारः । लकारे त्वकारस्येत्सञ्ज्ञाविधानसामर्थ्यात् प्रत्याहारः ’ इति हरदत्तः[1169] । ‘ न तु टाटकारेण, प्रथमातिक्रमणो कारणाभावात् ’ इति बालमनोरमाकारः[1170]।

- **नवेति विभाषा – (1-1-43)**

‘ न ’ इति निषेधार्थः, ‘ वा ’ इति विकल्पार्थः, अनयोर्निषेधविकल्पार्थयोर्विभाषा सञ्ज्ञा भवतीति सूत्रार्थः। नवाशब्दो निषेधमात्रवाची एकनिपातोऽप्यस्ति। यथा ‘ भवता ग्रामो गन्तव्यो न वा ’ इति। ‘ नेति गम्यते ’ इति। परन्तु सोऽत्र न गृह्यते निषेधमात्रस्य विभाषासञ्ज्ञात्वे “ विभाषा दिक्समासे बहुव्रीहौ ”[1171] इत्यतो निषेधार्थकविभाषाग्रहणानुवृत्त्या सिद्धे “ न बहुव्रीहौ ”[1172] इति सूत्रे न ग्रहणस्य वैयर्थ्यापत्तेः, सर्वत्र विभाषापदघटितसूत्रे ‘ न ’ इत्येव वक्तव्ये सञ्ज्ञाकरणस्य वैयर्थ्यापत्तेः, लघ्वर्थं सञ्ज्ञाकरणमिति भाष्यविरोधाच्च नशब्दापेक्षया विभाषाकरणे गौरवात्। अत एव ‘ मेध्यः पशुरनड्वान् विभाषितः ’ इति वेदे केवलविकल्पोऽपि विभाषाशब्दार्थस्तस्यापि नात्र सञ्ज्ञा। किन्तु मिलितयोर्निषेध-विकल्पयोः सञ्ज्ञार्थं नवेति सूत्रम्। तत्र न च वा चेति द्वन्द्वः। नवेति समुदायस्य निपातान्तत्वेनाव्ययत्वाद् विभक्तेर्लुक्। ‘ द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते ’ इति न्यायेन इति शब्दस्य प्रत्येकं सम्बन्धात् नेति = निषेधः, वेति = विकल्पश्च द्वयं विभाषासञ्ज्ञकं भवति इत्यर्थः।

विभाषासञ्ज्ञायाञ्च उद्देश्यं ‘ नवेति ’ इति। किमिदं ‘ नवेति ’ इति ? अर्थविपर्यासकृत् इतिशब्दस्य परप्रयोगात् न-वा-इति निपातयोरर्थौ निषेधविकल्पौ गृह्येते, तावेव विभाषासञ्ज्ञां प्रति उद्देश्यम्। अत उक्तम् – नवा - शब्दयोरर्थौ निषेधविकल्पौ विभाषासञ्ज्ञकौ स्यातामिति।

[1168] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1169] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[1170] सिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

[1171] अष्टाध्यायी – (1-1-28)

[1172] अष्टाध्यायी – (1-1-29)

ननु व्याकरणशास्त्रे " स्वं रूपं शब्दस्याशब्दसञ्ज्ञा "[1173] इति सूत्रबलात् सूत्रस्थाः सञ्ज्ञाभिन्नाः शब्दाः स्वरूपबोधका एव । यथा " दाधा घ्वदाप् "[1174] इति सूत्रे दाधाशब्दौ दाधाबोधकौ । तथा प्रकृते नवाशब्दयोरेव विभाषासञ्ज्ञा स्यात् । तथा च " विभाषा श्वेः "[1175] इत्यादौ श्विशब्दादेः स्थाने नवाशब्दौ आदेशौ स्याताम् इत्यर्थः स्यादिति चेन्न, इति ग्रहणसामर्थ्येन नवाशब्दार्थयोर्निषेधविकल्पयोरेव विभाषासञ्ज्ञाया इष्टत्वात्[1176] ।

अयम्भावः – लोके शब्दा अर्थबोधका एव । यथा गामानय इत्यादौ गोशब्देनार्थो बुध्यते न गोशब्दः, अर्थबोधनार्थ शब्दप्रयोगात् । परन्तु तत्रेतिशब्दप्रयोगे गोशब्देन स्वरूपमेव बुध्यते न त्वर्थः । यथा ' गवित्ययमाह ' इत्यादौ ' गो ' इति शब्दमाहेत्येव बोधो न तु तदर्थस्य । तथा च ' इति ' शब्दस्य प्रसिद्धार्थविपर्य्यासकत्वेन शास्त्रे शब्दपरकस्य शब्दस्य इतिबलेनार्थपरकत्वम् । तद्यथा – ' नवा ' शब्दाभ्यां परः प्रयुक्त इतिशब्दस्तौ शब्दपदार्थकत्वात् प्रच्याव्यार्थपदार्थकौ करोति । ततश्चायमर्थः फलति – न-शब्दार्थो निषेधः, वा-शब्दार्थो विकल्पश्च विभाषासञ्ज्ञा भवति । अत एव नवाशब्दार्थयोर्निषेधविकल्पयोरेव विभाषासञ्ज्ञा न शब्दयोः । अत उक्तं काशिकाकृता – नेति प्रतिषेधः, वेति विकल्पः, तयोः प्रतिषेधविकल्पयोर्विभाषा सञ्ज्ञा भवति[1177] । कौमुदीकृताऽपि उक्तम् – निषेधविकल्पयोर्विभाषा सञ्ज्ञा स्यात् इत्याह[1178] ।

अत्रेदं तत्त्वं वेदितव्यम् – ' इतिशब्दस्य स्वरूपनिर्धारकत्वं यद्धि लोकसिद्धं तत्तु वर्तत एव । किन्तु शास्त्रेषु – ' इतिकरणोऽर्थनिर्देशार्थः ' इति महाभाष्यकृत्कृतनिर्देशानुसारेणार्थपरकत्वमपीति । तथा च यथावसरं यथालक्ष्यं यथाप्रयोजनञ्च तस्येतिशब्दस्य शास्त्रेष्वपि क्वचिदर्थपरकत्वं क्वचिच्छब्दपरकत्वमिति व्यवस्था बोध्या । तत्रायं विशेषो यद् यत्रानुवादमात्रं तत्र तु स्वरूप-मात्रबोधकत्वम्, यत्र न तथा तत्रार्थपरकत्वमिति । यथा – " अभ्युत्सादयां प्रजनयां चिकयां रमयामकः पावयां क्रियाद्विदामक्रन्निति च्छन्दसि "[1179] इत्यस्मिन् सूत्रे अभ्युत्सादयाम् इत्यादौ स्वरूपपरकत्वमेव । यतो हि सूत्रेणानेन प्रयोगा इमे निपातिताः । अतो निपात्य प्रयुक्ता इमे शब्दा नान्यादृशा इत्यभिप्रायेण

1173 अष्टाध्यायी – (1-1-68)

1174 अष्टाध्यायी – (1-1-20)

1175 अष्टाध्यायी – (6-1-30)

1176 सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

1177 काशिका – प्रकृतसूत्रे

1178 सिद्धान्तकौमुदी – प्रकृतसूत्रे

1179 अष्टाध्यायी – (3-1-42)

भगवता पाणिनिना इतिशब्दोऽनुश्लेषितोऽत्र । अतोऽवश्यमत्र स्वरूपमात्रावबोधक एवेतिशब्द इति निर्णेयमिति भाति । यदि काचनापरापि व्यवस्था चेन्नहि ततोऽन्यत्र ममाभिनिवेशः, निर्दुष्टवचसो मान्यत्वात्, बुद्धेः सत्पक्षपातित्वस्यैव श्रेष्ठत्वात् '[1180] ।

अत्र सूत्रे उच्चारित ' इति ' शब्दः काकाक्षिगोलकन्यायेनोभयत्र न वा शब्देन विभाषाशब्देन च सह सम्बध्यते । स चार्थविपर्यासकृद् भवति । तेन निषेधो विकल्पश्च न वा शब्दार्थः सञ्ज्ञी, विभाषाशब्दार्थो विकल्पः सञ्ज्ञा । अस्मिन् व्याकरणशास्त्रे सञ्ज्ञी क्वचित् शब्दः क्वचिच्चार्थो भवति । यथा – अकारस्य एकारस्य ओकारस्य च शब्दस्य गुण इति सञ्ज्ञा, " अदेङ् गुणः "[1181] इति सूत्रात् । एवमेव आकारस्य ऐकारस्य औकारस्य च शब्दस्य वृद्धिरिति सञ्ज्ञा, " वृद्धिरादैच् "[1182] इति सूत्रप्रामाण्यात् । अर्थस्य सञ्ज्ञित्वं शब्दस्य च सञ्ज्ञात्वं यथा – " स्वतन्त्रः कर्ता "[1183] इत्यादौ । तत्र हि अर्थ एव सञ्ज्ञी शब्द एव सञ्ज्ञा । क्रियायां स्वातन्त्र्येण विवक्षितस्यार्थस्य कर्ता सञ्ज्ञा तेन क्रियते । अतस्तत्रार्थस्य सञ्ज्ञित्वं कर्तृशब्दस्य च सञ्ज्ञात्वम् । तथा चोक्तं कौमुद्यां भट्टोजिदीक्षितेन – ' क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् ' इति । यद्यपि शब्दोऽपि क्वचित्कर्तृत्वेन व्यवह्रियते, यथा – गुणपदमदेङं बोधयतीत्यादौ गुणपदस्यैव कर्तृत्वम्, तथापि तत्र पदार्थत्वेन बोधनकर्तृत्वम्, न तु शब्दत्वेनेति विवेक्तव्यम् । अत एव यदस्मिन् व्याकरणशास्त्रे शब्दानामर्थानाञ्च सञ्ज्ञित्वम्, सञ्ज्ञात्वन्तु केवलं शब्दानामेवेति । शब्दाः सञ्ज्ञा एव भवन्ति । सञ्ज्ञिनश्च क्वचित्शब्दाः क्वचिच्चार्थाः इति ।

किन्तु तत्रैव व्याकरणशास्त्रे इदमेव सूत्रमेकमीदृशं विपरीतं दृश्यते, यतोहि अत्र अर्थस्यैव सञ्ज्ञात्वं सञ्ज्ञित्वमपीति । तथा च प्रतिपादितं तत्त्वबोधिन्यां सिद्धान्तकौमुद्या व्याख्यायाम् – ' अत्रेदं बोध्यम् – इति शब्दः काकाक्षिन्यायेनोभाभ्यां सम्बध्यते, स च पदार्थविपर्यासकृत्, तेन निषेधो विकल्पश्च न वा शब्दार्थः सञ्ज्ञीति विभाषाशब्दार्थो विकल्पः सञ्ज्ञा ' इति । ततोऽग्रे – ' सञ्ज्ञात्वमर्थस्यैव न तु विभाषाशब्दस्येति व्याख्यानस्य " हृक्रोरन्यतरस्याम् "[1184] इत्यादौ वैरूप्योद्धारः फलम् '[1185] इति प्रोक्तम् । तेनेदमेव सिद्ध्यति यत्रार्थस्यैव सञ्ज्ञात्वमर्थस्यैव सञ्ज्ञित्वमिति ।

[1180] महाभाष्यनिगूढाकूतयः – (पृ. – 114)

[1181] अष्टाध्यायी – (1-1-2)

[1182] अष्टाध्यायी – (1-1-1)

[1183] अष्टाध्यायी – (1-4-54)

[1184] अष्टाध्यायी – (1-4-53)

[1185] तत्त्वबोधिनी – प्रकृतसूत्रे

अयमत्र विशेषः – यत्र हि शब्दस्य सञ्ज्ञात्वं वर्तते तत्र तच्छब्दश्रवणेन सञ्ज्ञिनां प्रत्ययो भवति । यथा – अदेङो गुण इति सञ्ज्ञा । एवञ्च यत्र सूत्रे गुणपदं श्रूयते तत्रैवादेङ उपस्थितिः भवति । यथा – " आद्गुणः "[1186] इत्यत्र । किन्तु तथैव यद्यत्रापि विभाषा इति शब्दः सञ्ज्ञा स्यात् निषेधविकल्पौ चार्थौ तर्हि विभाषापदमात्रघटिते एव शास्त्रे निषेधविकल्पयोरुपस्थितिः स्यान्न च स्यात् " हृक्रोरन्यतरस्याम् ", " जराया जरसन्यतरस्याम् "[1187] इत्यादौ । अर्थस्य सञ्ज्ञात्वे तु विभाषाशब्दार्थो विकल्पः । तथा च यत्रैव क्वचन विकल्परूपार्थकः शब्दः श्रूयते स च विभाषाशब्दो वा विकल्पशब्दो वा अन्यतरस्यामिति शब्दो वा तत्र सर्वत्रैव निषेधविकल्पयोरर्थयोरुपस्थितिर्जायते, शब्दस्य सञ्ज्ञात्वे तु कथमपीयं व्यवस्था न स्यात् । अपरञ्च – यदि विभाषाशब्दस्य सञ्ज्ञात्वं भवेत्तर्हि नायमेक एव दोषो यद्यत्र विभाषाशब्दः श्रूयते तत्रैव निषेधविकल्पयोरर्थयोरुपस्थितिः, नान्यत्रेति । किन्तु " हृक्रोरन्यतरस्याम् ", " जराया जरसन्यतरस्याम् " इत्यादौ " स्वं रूपं शब्दस्याशब्दसञ्ज्ञा "[1188] इति सूत्रप्रामाण्यात् तादृशानुपूर्वीविशिष्ट आपन्नः स्यादादेशः । स च महानिष्टः । अत एवार्थस्यैव सञ्ज्ञात्वं सञ्ज्ञित्वञ्चेति विवेकः ।

तथा चाह कैयटोऽपि – ' तत्र लोके क्रियापदसन्निधाने न वा शब्दयोर्योऽर्थो द्योत्यो विकल्पप्रतिषेधलक्षणः स सञ्ज्ञीत्यर्थः । अन्यथा विभाषाप्रदेशेषु न वा शब्दाविवादेशौ स्याताम् '[1189] इति । अतः समीहितशब्दसाधुत्वोपपत्तये न वेति सूत्रेऽर्थस्यैव सञ्ज्ञात्वं सञ्ज्ञित्वञ्चान्यत्रादृष्ट-चरमप्यङ्गीकृतं भगवता पाणिनिना महाभाष्यकृता च तथैव व्यवस्था कृता '[1190] ।

विभाषापदस्य भावसमानाधिकरणे अभावे अभावसमानाधिकरणे भावे च शक्तिः । तथा च नित्ये प्राप्ते यत्र विकल्पेन तस्य विधानं तत्र भावस्य सिद्धतया भावसमानाधिकरणाभावमुखेन विभाषापदात् प्रतीतिः । यत्र तु अप्राप्ते एव विधौ विकल्पेन विधानं तत्र अभावस्य सिद्धतया अभावसमानाधिकरण-भावमुखेन विभाषापदात् उपस्थितिरिति उभयत्रापि स्थले ' नवेति ' सूत्रस्य नोपयोगः । प्राप्तविभाषास्थले भावस्य अर्थात् कार्यस्य सिद्धतया पक्षे तदभावबोधनस्य विवक्षिततया तस्य विभाषापदेन बोधनात् रूपद्वयस्य सिद्धत्वात् । यत्र तु कार्यं न प्राप्तं तत्र अभावस्य प्राप्ततया तत्समानाधिकरण्येन कार्यस्य विधेयस्य सद्भावो बोध्यते । तेन भावाभावयोः समावेशः सिद्धः । तथा च सूत्रस्य एतदर्थं न प्रयोजनम् , सूत्रं विनापि भावाभावान्यतरमुखेनोपस्थित्या उभयविधप्रयोगस्य निष्पादात् ।

[1186] अष्टाध्यायी – (6-1-86)

[1187] अष्टाध्यायी – (7-2-101)

[1188] अष्टाध्यायी – (1-1-68)

[1189] प्रदीपः – प्रकृतसूत्रे

[1190] महाभाष्यनिगूढाकूतयः – (पृ. – 105)

प्राप्ताप्राप्तविभाषासु अस्य सूत्रस्य प्रयोजनम् । तथा हि – एकेन पदेन एकदा एकरूपेणैव उपस्थितिः कर्तुं शक्या, न तु भिन्नभिन्नरूपेण भावसमानाधिकरणाभावमुखेन अभावसमानाधिकरण-भावमुखेन च। तथा च एकतरमुखेन उपस्थितौ कार्यस्य प्राप्तिस्थले अभावस्य बोधनेऽपि, अप्राप्तिस्थले भावसमानाधिकरणाभावमुखेन उपस्थितेः । एवम् अभावसमानाधिकरणभावमुखेन उपस्थितेः प्राप्तिस्थले उपयोगाभावात् उभयविधस्य प्रयोगस्य असिद्धिप्रसङ्गात्। सूत्रे कृते तु विभाषापदघटिते सूत्रे नवेति सूत्रेण पूर्वं नेत्युपतिष्ठते। तथा च सूत्रप्राप्तो विधिर्निषिद्धः। ततश्च निषेधेन, प्राप्तिस्थले अप्राप्तिस्थले चोभयत्र विधेयस्य अप्राप्तत्वेन समीकृते लक्ष्ये तादृशे अभावसमानाधिकरणभावमुखेन विभाषापदाद् एकरूपेणैव वाशब्दार्थस्य विकल्पस्योपस्थित्या पक्षे भावः, पक्षे तदभावश्च सिद्धौ।

- **उदाहरणमुखेन अयमेवार्थः स्फुटीक्रियते**

अत्र शास्त्रे त्रिविधा विभाषा सन्ति। 1. प्राप्तविभाषा, 2. अप्राप्तविभाषा, 3, प्राप्ताप्राप्तविभाषा।

1. प्राप्तविभाषा – यत्र नित्ये कार्ये प्राप्ते पुनर्विकल्पेन विधीयते सा प्राप्तविभाषा । यथा – " विभाषा ङिश्योः "[1191] इति । " अल्लोपोऽनः "[1192] इति सूत्रेण नित्ये लोपे प्राप्ते ङिश्योर्विकल्पेन अनोऽकारस्य लोपो विधीयते।

2. अप्राप्तविभाषा – यत्रैकेनाप्यप्राप्ते कार्ये विकल्पेन विधीयते तत्र अप्राप्तविभाषा इत्युत्यते । यथा – " जराया जरसन्यतरस्याम् "[1193] । जरसादेशः केनापि न प्राप्तः, सोऽनेन विकल्प्यते इत्यप्राप्तविभाषा।

3. यत्र अन्येन प्राप्ते कार्ये, अप्राप्ते च उभयत्र विकल्पेन विधीयते तत्र प्राप्ताप्राप्तविभाषा इत्युच्यते । यथा – " विभाषा श्वेः "[1194] इति। अनेन सूत्रेण श्विधातोर्लिटि यङि च वा सम्प्रसारणं विधीयते। लिटि ' शुशाव ', ' शिश्वाय ' इति णलि। ' शुशुवतुः ', ' शिश्वियतुः ', अतुसि उदाहरणम्। यङि तु ' शोशूयते ' इति । तत्र किति लिटि " वचिस्वपियजादीनां किति "[1195] इति सूत्रेण नित्ये सम्प्रसारणे प्राप्ते, पिति लिटि यङि च कित्वाभावादप्राप्तं सम्प्रसारणं विधीयते इति प्राप्ताप्राप्तविभाषा।

[1191] अष्टाध्यायी – (6-4-136)

[1192] अष्टाध्यायी – (6-4-134)

[1193] अष्टाध्यायी – (7-2-101)

[1194] अष्टाध्यायी – (6-1-30)

[1195] अष्टाध्यायी – (6-1-15)

तत्र प्राप्तविभाषासु अप्राप्तविभाषासु च नास्या उपयोगः, विभाषाशब्दस्य विकल्पमात्रबोधकतयाऽपि इष्टसिद्धेः । तथा हि भावाभावात्मको विकल्पः, पक्षे भावः, पक्षे चाभावः इत्येव विकल्पस्वरूपं तत्र ।

प्राप्तविभाषास्थले भावस्य सिद्धत्वात् अभावमात्रं विधेयम् । अप्राप्तविभाषास्थले तु अभावस्य सिद्धत्वात् भावमात्रं विधेयम्, तच्च विकल्पार्थकविभाषापदेनापि सम्भवति ।

प्राप्ताप्राप्तविभाषास्थले अप्राप्ते अभावानुवादपूर्वकं भावस्यैव विधेयता इष्यते । प्राप्ते च भावानुवादपूर्वकमभावस्यैवेति । एकेन वाक्येन भावाभावयोर्विधातुमशक्यतया शास्त्राऽप्रवृतिः कर्तव्या स्यादिति बहुगौरवं स्यात् । तद्गौरववारणाय निषेधविकल्पयोर्विभाषा क्रियते । तथा च यत्र प्राप्तमप्राप्तञ्च कार्यं तत्र नवेति श्रुतक्रमानुरोधेन विभाषापदेन पूर्वमुपस्थितिनिषेधेन " विभाषा श्वेः " इति सूत्रेण पूर्वं किति प्राप्तस्य सम्प्रसारणस्य निषेधे किति पिति लिटि यङि च सर्वत्र सम्प्रसारणाभावस्य सिद्धतया निषेधोत्तरमुपस्थितकेवलविकल्पेन उक्तस्थले सर्वत्र अभावानुवादपूर्वकसम्प्रसारणसत्ता विधीयते इतीष्टं सिध्यति । अत्र सञ्ज्ञाया अभावे केवलविकल्पार्थाश्रयणे यदि विधिमुखेन प्रवृत्त्या सम्प्रसारणं विधीयेत तदा अप्राप्तस्थले एव सूत्रस्य प्रवृत्तिः स्यादिति तत्र विकल्पः स्यात् । यदि तु निषेधमुखेन अभावस्यैव विधानं तदा ' प्राप्तौ सत्यां निषेधः ' इति न्यायेन किति लिटि सम्प्रसारणप्राप्तया तत्रैव भावपूर्वकं सम्प्रसारणं न भवतीति निषेधमुखेन सूत्रं प्रवर्तेत नाप्राप्तस्थले । इत्युभयत्रोक्तरीत्या विकल्पेन कार्यसिद्धये नवेति सञ्ज्ञाया आवश्यतेति हृदयम्[1196] । अतः काशिकाकृदप्याह – ' उभयत्रविभाषाः प्रयोजयन्ति '[1197] इति

भाष्यकृतस्तु एतत्सूत्रं प्रत्याचख्युः[1198] । तेषामिदमभिमतम् यत् – यत्र विभाषपदं नास्ति, अपितु विकल्पबोधकानि अन्यतरस्याम् वा इत्यादीनि पदानि सन्ति, तादृशोभयत्रविभाषास्थलेऽपि यथा लक्ष्यानुरोधात् जातिव्यक्त्योरुभयोः पक्षयोः प्रतिलक्ष्यं लक्षणप्रवत्तेः क्वचित् विधिमुखेन क्वचिन्निषेधमुखेन प्रवृत्तिं स्वीकृत्य निर्वाहो भवति, तथैव विभाषाग्रहणेऽपि सम्भवात् सूत्रमिदं न दृष्टार्थफलम्[1199] इति ।

- **भट्टोजिदीक्षितानामभिप्रायः**

[1196] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1197] काशिका – प्रकृतसूत्रे

[1198] महाभाष्यम् – प्रकृतसूत्रे

[1199] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

भट्टोजिदीक्षितैः “ न वेति विभाषा ” इति सूत्रस्य ‘ आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्तते ’[1200] । इति दर्शने इदं सूत्रं आरभ्यते इति पक्षः प्रस्तूयते । तत्र सूत्रे इति शब्दस्य प्रयोजनविषयेऽपि स्वाभिप्रायः तैः शब्दकौस्तुभे स्पष्टीक्रियते ।

‘ इतीति किम् ? घुसञ्ज्ञावत् स्वं रूपमिति वचनात् शब्दस्य सञ्ज्ञा मा भूत् ’[1201] । तद्रीत्या इतिशब्दे सति अर्थः सञ्ज्ञी इति लभ्यते । तथा च यथा लोके अर्थः प्रधानः शब्दः इतेः प्रयोगे शब्दस्वरूपपरः तथा व्याकरणे स्वं रूपमिति परिभाषणादर्थपरः सम्पद्यते इति तेषामभिप्रायः[1202] ।

एवञ्च तद्रीत्या अत्र सूत्रे ‘ अर्थस्यैव सञ्ज्ञात्वमपि न तु विभाषाशब्दस्य ’[1203] इति सिद्धान्तः । तत्फलं तु “ ह्वक्रोरन्यतरस्याम् ” इत्यादौ विभाषासञ्ज्ञायाः वैरूप्योद्धार इति तैरङ्गीक्रियते । तस्मात् सूत्रारम्भपक्षे इति शब्दस्यार्थसञ्ज्ञासिद्धिः भट्टोजिदीक्षितरीत्या फलं बोध्यम् ।

- **नागेशभट्टानामभिप्रायः**

नागेशभट्टैः “ न वेति विभाषा ” सूत्रविषये प्रत्याख्यानपक्षस्यैव समर्थनं क्रियते । तद्रीत्या सूत्रारम्भपक्षे भट्टोजिदीक्षितैः यद्व्याख्यानं स्वीकृतं तन्नाङ्गीक्रियते । यद्यपि इति शब्दस्य लोके व्याकरणे चार्थविपर्यासकत्वं दृष्टं परमनुवादवाक्ये तन्नास्ति इति नागेशभट्टैः विशेषरूपेणोल्लिख्यते ।

किञ्च स्वं रूपमिति सूत्रस्य प्रत्याख्यानात् सूत्रे इति शब्दः तद्रीत्या व्यर्थ एव, अर्थे कार्यस्य बाधाभावात् । आरम्भपक्षेऽपि इदं सूत्रमुभयत्र विभाषार्थमिति तेषां सिद्धान्ताद् आदौ निषेधमुखेन प्रवृत्तिः । ऐक्यरूपे सति विधिमुखेन प्रवृत्त्या विकल्पसिद्धिः इति तेषां सिद्धान्तः ।

यत्तु इति शब्दस्य विभाषा इत्यत्रापि सम्बन्धाद् विभाषापदार्थः सञ्ज्ञा इति व्याख्यानं कैश्चित् कृतं तत् नागेशभट्टैः नाङ्गीक्रियते[1204] । किञ्च भट्टोजिदीक्षितैः अर्थसञ्ज्ञाः स्वीकृत्य अर्थाक्षिप्तशब्दमात्रं सञ्ज्ञा इति स्वीकृतं तदपि नागेशभट्टैः नाङ्गीक्रियते । अर्थे सञ्ज्ञात्वस्य अदृष्टत्वात् । एकस्यार्थस्य समानफलकानेकसञ्ज्ञाकरणस्य भाष्यकृता तिरस्काराच्च[1205] । तस्मात् यथा “ ह्वक्रोरन्यतरस्याम् ”

[1200] शब्दकौस्तुभः भागः – 1 – (पृ. – 184)

[1201] शब्दकौस्तुभः भागः – 1 – (पृ. – 185)

[1202] इति शब्दे तु सत्यर्थः सञ्ज्ञीति लभ्यते । तथाहि, लोके अर्थप्रधानः शब्दः ‘ गौरित्ययमाह ’ इत्यादौ तु शब्दस्वरूपपरः सम्पद्यते व्याकरणे तु स्वं रूपमिति परिभाषणात् स्वरूपपरत्वमौत्सर्गिकम् । शब्दकौस्तुभः भागः – 1 – (पृ. – 185)

[1203] शब्दकौस्तुभः भागः – 1 – (पृ. – 185)

[1204] इति शब्दस्य विभाषेत्यत्रापि सम्बन्धाद्विभाषा पदार्थः सञ्ज्ञेति तु न युक्तम्, अर्थे सञ्ज्ञात्वस्यादृष्टत्वात् । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

[1205] अर्थाक्षिप्तशब्दमात्रं सञ्ज्ञेत्यपि न युक्तम्, एकस्यार्थस्य समानाफलकानेकसञ्ज्ञाकरणस्य अनाकृतिः सञ्ज्ञा इति वृद्धिसञ्ज्ञा सूत्रस्य भाष्येण तिरस्कारात् । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

इत्यादौ उभयमुखेन प्रवृत्तिं स्वीकृत्य विकल्पः सिध्यति तथैव विभाषापदघटिते सूत्रेऽपि अस्तु। तस्मात् भाष्योक्तं सूत्रप्रत्याख्यानमेव उचितम्[1206]।

एवञ्च आरम्भपक्षे इति पदस्य प्रयोजनविषये, आरम्भप्रत्याख्यानपक्षयोः व्याख्यानविषये तयोः मतभेदः स्पष्टः इति बोध्यम्[1207]।

व्यक्तिपक्षे लक्ष्यभेदेन लक्षणभेदात् प्रतिलक्ष्यं सूत्रभेदः । तथा चोभयत्र विभाषास्थले लक्ष्यानुरोधेन क्वचिद्विधिमुखेन प्रवृत्तिः, क्वचिन्निषेधमुखेन इति सूत्रमिदं नावश्यकम्। जातिपक्षे तु सूत्रभेदाभावादेकस्यैव सूत्रस्य लिट्त्वजातौ विधिमुखेन प्रवृत्तौ पित्स्वेव स्यात्। निषेधमुखेन प्रवृत्तौ कित्स्वेव न तु सर्वत्रेति सूत्रं कर्तव्यमिति कैयटाशयः। व्यक्तिपक्षे सर्वं लक्ष्यं लक्षणं व्याप्नोति न जातिपक्षे इत्यत्र प्रमाणाभावात् पक्षद्वयेऽपि सूत्रानारम्भ एव भाष्यतात्पर्यमिति नागेशाभिप्रायः।

- **विभाषासञ्ज्ञाप्रदेशाः**

1. विभाषा दिक्समासे बहुव्रीहौ – (1-1-28)
2. विभाषा जसि – (1-1-32)
3. विभाषा छन्दसि – (1-2-36)
4. विभाषा विप्रलापे – (1-3-50)
5. विभाषा उपपदेन प्रतीयमाने – (1-3-77)
6. विभाषा अकर्मकात् – (1-3-85)
7. विभाषा कृञि – (1-4-72)
8. विभाषा कृञि – (1-4-98)
9. विभाषा – (2-1-11)
10. मन्यकर्मणि अनादरे विभाषा अप्राणिषु – (2-3-17)
11. विभाषा गुणे अस्त्रियाम् – (2-3-25)
12. विभाषा उपसर्गे – (2-3-59)
13. विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् – (2-4-12)

[1206] तस्मात्तत्र लक्ष्यानुसारेणैवोभयमुखेन प्रवृत्तिर्वाच्येति विभाषापदघटितेऽपि तथैवास्तु, किं सूत्रेणेति, जातिव्यक्तिपक्षयोरुभयोरपि सूत्रं प्रत्याचख्युः। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

[1207] पाणिनिसञ्ज्ञासूत्रविमर्शः – (पृ. – 88)

14. विभाषा समीपे – (2-4-16)
15. विभाषा सेनासुराच्छायाशालानिशानाम् – (2-4-25)
16. विभाषा लुङ्लृङोः – (2-4-50)
17. विभाषा घ्राधेट्शाच्छासः – (2-4-78)
18. विभाषा धेट्श्व्योः – (3-1-49)
19. मृजेः विभाषा – (3-1-113)
20. विभाषा कृवृषोः – (3-1-120)
21. ददातिदधात्योः विभाषा – (3-1-139)
22. विभाषा ग्रहः – (3-1-143)
23. विभाषा साकाङ्क्षे – (3-2-114)
24. नन्वोः विभाषा – (3-2-121)
25. विभाषा कदाकर्ह्योः – (3-3-5)
26. विभाषा आङि रुप्लुवोः – (3-3-50)
27. विभाषा आख्यानपरिप्रश्नयोः इञ् च – (3-3-110)
28. परस्मिन् विभाषा – (3-3-138)
29. विभाषा कथमि लिङ् च – (3-3-143)
30. विभाषा धातौ सम्भावनवचने अयदि – (3-3-155)
31. इच्छार्थेभ्यः विभाषा वर्तमाने – (3-3-160)
32. विभाषा अग्रेप्रथमपूर्वेषु – (3-4-24)
33. विभाषा सपूर्वस्य – (4-1-34)
34. विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः – (4-2-23)
35. विभाषा उशीनरेषु – (4-2-118)
36. विभाषा कुरुयुगन्धराभ्याम् – (4-2-130)
37. विभाषा अमनुष्ये – (4-2-144)
38. विभाषा रोगातपयोः – (4-3-13)
39. विभाषा पूर्वाह्णापराह्णाभ्याम् – (4-3-24)
40. विभाषा विवधात् – (4-4-17)

41. स्रोतसः विभाषा ड्यड्ड्यौ – (4-4-113)
42. विभाषा हविरपूपादिभ्यः – (5-1-4)
43. विभाषा कार्षापणसहस्राभ्याम् – (5-1-29)
44. विभाषा तिलमाषोमाभङ्गाणुभ्यः – (5-2-4)
45. विभाषा परावराभ्याम् – (5-3-29)
46. विभाषा अवरस्य – (5-3-41)
47. विभाषा सुपः बहुच् पुरस्तात् तु – (5-3-68)
48. विभाषा अञ्चेः अदिक् स्त्रियाम् – (5-4-8)
49. स्थानान्तात् विभाषा सस्थानेन इति चेत् – (5-4-10)
50. विभाषा बहोः धा अविप्रकृष्टकाले – (5-4-20)
51. विभाषा साति कात्स्न्र्ये – (5-4-52)
52. पथः विभाषा – (5-4-72)
53. ऊर्ध्वात् विभाषा – (5-4-130)
54. विभाषा श्यावारोकाभ्याम् – (5-4-144)
55. पूर्णात् विभाषा – (5-4-149)
56. शेषात् विभाषा – (5-4-154)
57. विभाषा अभ्यवपूर्वस्य – (6-1-26)
58. विभाषा श्वेः – (6-1-30)
59. विभाषा परेः – (6-1-44)
60. विभाषा लीयतेः – (6-1-51)
61. सर्वत्र विभाषा गोः – (6-1-122)
62. विभाषा भाषायाम् – (6-1-181)
63. रिक्ते विभाषा – (6-1-208)
64. विभाषा वेण्विन्धानयोः – (6-1-215)
65. विभाषा अध्यक्षे – (6-2-67)
66. विभाषा तृन्नन्नतीक्ष्णशुचिषु – (6-2-161)
67. विभाषा छन्दसि – (6-2-164)

68. विभाषा उत्पुच्छे – (6-2-196)

69. बन्धे च विभाषा – (6-3-13)

70. विभाषा वर्षक्षरशरवरात् – (6-3-16)

71. विभाषा स्वसृपत्योः – (6-3-24)

72. विभाषा चत्वारिंशत् प्रभृतौ सर्वेषाम् – (6-3-49)

73. रात्रेः कृति विभाषा – (6-3-72)

74. विभाषा उदरे – (6-3-88)

75. अर्थे विभाषा – (6-3-100)

76. विभाषा पुरुषे – (6-3-106)

77. तनोतेः विभाषा – (6-4-17)

78. जान्तनशां विभाषा – (6-4-32)

79. ये विभाषा – (6-4-43)

80. क्यस्य विभाषा – (6-4-50)

81. विभाषा आपः – (6-4-57)

82. विभाषा ङिश्योः – (6-4-136)

83. विभाषा ऋजोः छन्दसि – (6-4-162)

84. वेत्तेः विभाषा – (7-1-7)

85. विभाषा चिण्णमुलोः – (7-1-69)

86. विभाषा तृतीयादिषु अचि – (7-1-97)

87. ऊर्णोतेः विभाषा – (7-2-6)

88. यस्य विभाषा – (7-2-15)

89. विभाषा भावादिकर्मणोः – (7-2-17)

90. विभाषा सृजिदृशोः – (7-2-65)

91. विभाषा गमहनविदविशाम् – (7-2-68)

92. विभाषा चेः – (7-3-58)

93. ऊर्णोतेः विभाषा – (7-3-90)

94. विभाषा द्वितीयातृतीयाभ्याम् – (7-3-115)

95. विभाषा छन्दसि – (7-4-44)
96. विभाषा वेष्टिचेष्टयोः – (7-4-96)
97. सपूर्वायाः प्रथमायाः विभाषा – (8-1-26)
98. शेषे विभाषा – (8-1-41)
99. लोपे विभाषा – (8-1-45)
100. शेषे विभाषा – (8-1-50)
101. चादिलोपे विभाषा – (8-1-63)
102. अचि विभाषा – (8-2-21)
103. विभाषा पृष्टप्रतिवचने हेः – (8-2-93)
104. विभाषा इटः – (8-3-79)
105. विभाषा ओषधिवनस्पतिभ्यः – (8-4-6)
106. शेषे विभाषा अकखादौ अषान्ते उपदेशे – (8-4-18)
107. णेः विभाषा – (8-4-30)

- **इग्यणः सम्प्रसारणम् – (1-1-44)**

यणः स्थाने य इक् भूतो भावी वा तस्य सम्प्रसारणसञ्ज्ञा भवतीति सूत्रार्थः । उक्तः, उक्तवान् । सुप्तः, सुप्तवान् । इष्टः, इष्टवान् । गृहीतः, गृहीतवान् । इत्यादीनि उदाहरणानि ।

इग्यो यणः स्थाने वर्णः स सम्प्रसारणसञ्ज्ञो भवतीति, इति भाष्यव्याख्यानात्स्थाने इत्यर्थलाभः । न च " षष्ठी स्थानेयोगा "[1208] इति परिभाषया स्थानपदार्थलाभः, एतत्परिभाषाया भाष्ये प्रत्याख्यानात्, ' निर्दिश्यमानस्यादेशा भवन्ति ' एतदर्थलाभमात्रफलकत्वाच्च । तदुक्तं भाष्ये – ' तस्मान्नार्थोऽनेन नियमेन । व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणमिति । स्थाने इति व्याख्यास्यामः । वक्तव्यश्च किं प्रयोजनम् ? षष्ठ्यन्तं स्थाने यथा युज्येत । यतः षष्ठ्युच्चारिता । किं कृतं भवति ?

[1208] अष्टाध्यायी – (1-1-49)

निर्दिश्यमानस्यादेशा भवन्ति, इत्येषा परिभाषा न कर्तव्या भवति '[1209] इति । अत्र बालमनोरमाकारोऽपि प्राह – ' व्याख्यानात् स्थानार्थलाभः । षष्ठी स्थानेयोगा इति तु नेह भवति, अनुवादे परिभाषाणामनुपस्थितेः । षष्ठी श्रुतौ सर्वत्र व्याख्यानादेव स्थानार्थलाभसंभावात् षष्ठी स्थानेयोगा इत्येतद् निर्दिश्यमानस्यादेशा भवन्ति इत्येतदर्थमिति भाष्ये सिद्धान्तितत्वाच्च '[1210] । तत्त्वबोधिनीकृता तु उक्तं यत् ' षष्ठी स्थानेयोगा इत्यत्र एतत्सूत्रमनुवर्त्य व्याख्यायां तल्लाभात् '[1211] ।

ननु यणः स्थाने य इक् तस्य सम्प्रसारणसञ्ज्ञा इत्युच्यते । एवञ्च सम्प्रसारणपदशक्तिज्ञाने जाते " ष्यङः सम्प्रसारणम् "[1212] इत्यस्य वाक्यार्थबोधः । ततश्च यणः स्थाने इगादेशः । यदा यणः स्थाने इगादेश उपलभ्येत तदा सम्प्रसारणसञ्ज्ञा इतीतरेतराश्रयसत्त्वात् सञ्ज्ञाशास्त्रस्य विधिशास्त्रस्य च वाक्यार्थबोधो न स्यादिति चेन्न, अत एवाह भाष्यकारः – ' एवं तर्हि भाविनीयं सञ्ज्ञा विज्ञास्यते । तद्यथा कश्चित् कञ्चित् तन्तुवायमाह – अस्य सूत्रस्य शाटकं वय इति । स पश्यति – यदि शाटकः न वातव्यः, अथ वातव्यः न शाटकः । शाटको वातव्यश्चेति विप्रतिषिद्धम्, भाविनी खल्वस्य सञ्ज्ञाऽभिप्रेता । स मन्ये वातव्यः – यस्मिन्नुते शाटक इत्येतद्भवति इति । एवमिहापि स यणः स्थाने भवति यस्याभिनिर्वृत्तस्य सम्प्रसारणमित्येषा सञ्ज्ञा भविष्यति '[1213] ।

नन्वेवमपि ' अदुहितराम् ' इत्यत्र लुङो लकारस्य स्थाने उत्तमपुरुषैकवचनमिट्, तस्य यणस्थानिककत्वेन सम्प्रसारणसञ्ज्ञायां सत्यां " हलः "[1214] इति सूत्रेण दीर्घः स्यात् । तरपं प्रति लुङन्तस्याङ्गत्वात् । न च यथासंख्यसम्बन्धाददोषः, ' लृकारोपदेशः किमर्थः ' इति भाष्यविरोधादिति चेन्न, विधिप्रदेशे ' यण इक् ' इत्येव सिद्धे सञ्ज्ञाविधानसामर्थ्येन तद्भावितपक्षाश्रयणात् ।

सम्प्रसारणसञ्ज्ञया यणः स्थाने इक् इत्यस्य उपस्थितिः । तत्रान्तरतम्याद्यस्य इकारः, वस्य उकारः, रेफस्य ऋकारः, लकारस्य लृकार आदेशः । लकारस्य सम्प्रसारणविधायकाभावाद्वस्तुस्थिति-मात्रप्रदर्शनम् । यत्तु सम्प्रसारणसञ्ज्ञाभावे सम्प्रसारणशब्दस्थाने ' यण इक् ' इति पठितव्यमिति तन्न, तथा सति " हलः "इत्यादौ अङ्गावयवाद्धलः परस्य यण्स्थानिकस्य इको दीर्घ इत्यर्थे ' अदुहितराम् ' इत्यादौ दीर्घापत्तेः ।

[1209] महाभाष्यम् – षष्ठी स्थानेयोगा

[1210] सिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

[1211] सिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे

[1212] अष्टाध्यायी – (6-1-13)

[1213] महाभाष्यम् – प्रकृतसूत्रे

[1214] अष्टाध्यायी – (6-4-2)

यदि तु अनुवादेऽपि परिभाषाणां प्रवृत्त्या " स्थानेऽन्तरतमः "[1215] इति परिभाषया यण्स्थानिकस्य इक इत्यस्य यस्थानिकस्य इकारः, वस्थानिकस्य उकारः, रस्थानिकस्य ऋकारः, लस्थानिकस्य लृकारः – इत्येवं रूपेण व्याख्यानं तदा ' यण इक् ' इति पाठेऽपि न दोषः[1216] ।

- **सम्प्रसारणसञ्ज्ञाप्रदेशाः**

1. ह्वः सम्प्रसारणं च न्यभ्युपविषु – (3-3-72)

न्यादिषूपपदेषु ह्वयतेरप्, सम्प्रसारणञ्च । उदाहरणम् – निहवः, अभिहवः, उपहवः, विहवः ।

2. आङि युद्धे – (3-3-73)

आङि ह्वयतेरप् सम्प्रसारणञ्च युद्धे वाच्ये । उदाहरणम् – आहवः ।

3. भावेऽनुपसर्गस्य – (3-3-75)

अनुपसर्गस्य ह्वयतेः सम्प्रसारणमप् च भावे । उदाहरणम् – हवः ।

4. त्रेः सम्प्रसारणं च – (5-2-55)

त्रेस्तीयः सम्प्रसारणं च । उदाहरणम् – तृतीयः ।

5. ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे – (6-1-13)

ष्यङन्तस्य पूर्वपदस्य सम्प्रसारणं स्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे । उदाहरणम् – कौमुदगन्धीपुत्रः, कौमुदगन्धीपतिः ।

6. बन्धुनि बहुव्रीहौ – (6-1-14)

बन्धुशब्द उत्तरपदे ष्यङः सम्प्रसारणं स्याद्बहुव्रीहौ । उदाहरणम् – कारीषगन्धीबन्धुः ।

7. वचिस्वपियजादीनां किति – (6-1-15)

वचिस्वप्योर्यजादीनां च सम्प्रसारणं स्यात्किति । उदाहरणम् – उक्तः, सुप्तः, इष्टः ।

8. ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च – (6-1-16)

एषां किति ङिति च सम्प्रसारणं स्यात् । उदाहरणम् – गृहीतः, जिनाति, ऊयतुः ।

9. लिट्यभ्यासस्योभयेषाम् – (6-1-17)

पूर्वोक्तानां वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं स्याल्लिटि । उदाहरणम् – उवाच, सुष्वाप ।

10. स्वापेश्चङि – (6-1-18)

[1215] अष्टाध्यायी – (1-1-50)

[1216] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

ण्यन्तस्य स्वापेश्चङि सम्प्रसारणं स्यात्। उदाहरणम् – असूषुपत्।

11. स्वपिस्यमिव्येञां यङि – (6-1-19)

एषां सम्प्रसारणं स्याद्यङि। उदाहरणम् – सोषुप्यते, सेसिम्यते, वेवियते।

12. न वशः – (6-1-20)

यङि सम्प्रसारणं न। उदाहरणम् – वावश्यते।

13. स्त्यः प्रपूर्वस्य – (6-1-23)

प्रात्स्त्यः सम्प्रसारणं स्यान्निष्ठायाम्। उदाहरणम् – प्रस्तीमः, प्रस्तीतः।

14. द्रवमूर्तिस्पर्शयोः श्यः – (6-1-24)

द्रवस्य मूर्तौ काठिन्ये, स्पर्शे चार्थे श्यैङः सम्प्रसारणं स्यान्निष्ठायाम्। उदाहरणम् – शीनं घृतम्, शीतं जलम्।

15. प्रतेश्च – (6-1-25)

प्रतिपूर्वस्य श्यः सम्प्रसारणं स्यान्निष्ठायाम्। उदाहरणम् – प्रतिशीनः।

16. विभाषाऽभ्यवपूर्वस्य – (6-1-26)

श्यः सम्प्रसारणं वा स्यात्। उदाहरणम् – अभिश्यानम्, अभिशीतं वा घृतम्।

17. विभाषा श्वेः – (6-1-30)

श्वयतेः सम्प्रसारणं वा स्याल्लिटि यङि च। उदाहरणम् – शुशाव, शिश्वाय, शोशूयते, शेश्वीयते।

18. णौ च संश्चङोः – (6-1-31)

सन्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वा स्यात्। उदाहरणम् – शुशावयिषति, शिश्वाययिषति। अशूशवत्, अशिश्वयत्।

19. ह्वः सम्प्रसारणम् – (6-1-32)

सन्परे चङ्परे च णौ ह्वः सम्प्रसारणं स्यात्। उदाहरणम् – जुहावयिषति, अजूहवत्।

20. अभ्यस्तस्य च – (6-1-33)

अभ्यस्तीभविष्यतो ह्वेञः सम्प्रसारणं स्यात्। उदाहरणम् – जुहाव।

21. बहुलं छन्दसि – (6-1-34)

ह्वः सम्प्रसारणं बहुलं छन्दसि। उदाहरणम् – आहुवे।

22. न सम्प्रसारणे सम्प्रसारणम् – (6-1-37)

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात्। उदाहरणम् – विद्धः, यूनः।

23. लिटि वयो यः – (6-1-38)

वयो यस्य सम्प्रसारणं न स्याल्लिटि। उदाहरणम् – उवाय।

24. वेञः – (6-1-40)

वेञः सम्प्रसारणं न लिटि। उदाहरणम् – ववौ।

25. ल्यपि च – (6-1-41)

वेञो ल्यपि ग्रहिज्यावयि...... इति सूत्रेण सम्प्रसारणं न स्यात्। उदाहरणम् – प्रवाय।

26. ज्यश्च – (6-1-42)

ज्याधातोर्ल्यपि ग्रहिज्यावयि...... इति सूत्रेण सम्प्रसारणं न। उदाहरणम् – प्रज्याय।

27. व्यश्च – (6-1-43)

व्येञो ल्यपि ग्रहिज्यावयि...... इति सूत्रेण सम्प्रसाणं न। उदाहरणम् – उपव्याय।

28. विभाषा परेः – (6-1-44)

परेर्व्येञो वा सम्प्रसारमं ल्यपि। उदाहरणम् – परिवीय, परिव्याय।

29. सम्प्रसारणाच्च – (6-1-106)

सम्प्रसारणादचि पूर्वरूपमेकादेशः स्यात्। उदाहरणम् – इज्यमानः, यज्यमानः।

30. सम्प्रसारणस्य – (6-3-139)

सम्प्रसारणस्य दीर्घः स्यादुत्तरपदे। उदाहरणम् – कौमुदगन्धिपुत्रः।

31. वसोः सम्प्रसारणम् – (6-4-131)

वस्वन्तस्य भस्य सम्प्रसारणम्। उदाहरणम् – विदुषः।

32. वाह ऊठ् – (6-4-132)

भस्य वाहः सम्प्रसारणमूठ्। उदाहरणम् – विश्वौहः।

33. श्वयुवमघोनामतद्धिते – (6-4-133)

अन्नन्तानां भसञ्ज्ञाकानामेषामतद्धिते परे सम्प्रसारणम्। उदाहरणम् – शुनः, यूनः, मघोनः।

34. द्युतिस्वाप्योः सम्प्रसारणम् – (7-4-67)

अनयोरभ्यासस्य सम्प्रसारणं स्यात्। उदाहरणम् – दिद्युते, दिद्योतिषते, सुष्वापयिषति।

35. व्यथो लिटि – (7-4-68)

व्यथोऽभ्यासस्य सम्प्रसारणं स्याल्लिटि। उदाहरणम् – विव्यथते, विव्यथाते, विव्यथिरे।

- **आद्यन्तौ टकितौ – (1-1-45)**

सूत्रार्थः – आदिश्च अन्तश्च आद्यन्तौ । न च ‘ घ्यन्तादजादन्तं विप्रतिषेधेन ’ इत्यनेनान्तशब्दस्य पूर्वनिपातो युक्त इति वाच्यम्, राजदन्तादिषु आद्यन्तौ इति पाठेनादिशब्दस्यापि पूर्वनिपातबोधनात् । इत् च इत् चेत्येकशेषे इतौ इति । टश्च क् चेति द्वन्द्वे टकौ । टकाराकार उच्चारणार्थः, अकारविशिष्टस्य टस्येत्त्वाभावात् । टकौ इतौ ययोस्तौ टकितौ । ‘ द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते ’ इति न्यायात् द्वन्द्वान्ते श्रूयमाणतया इदिति पदं द्वन्द्वघटकेन प्रत्येकं टकारेण ककारेण च अभिसम्बध्यते । ततश्च टकितौ इत्यस्य टित् कित् च इत्यर्थः सम्पन्नः ।

अत्रादिपदार्थस्य टित्पदार्थे अन्तपदार्थस्य च कित्पदार्थे अन्वयेन एकस्मिन् पदार्थे द्वयोरन्वयाभावेन एकपदार्थान्वयित्वरूपसहविवक्षाया अभावेन द्वन्द्वो न स्यात् । अत एव धवं छिन्धि, खदिरं पश्य इति विवक्षायां न द्वन्द्व इति वाच्यम्, पूर्वं टित्कित्समुदायस्याद्यन्तसमुदायेऽभेदेनान्वयं कृत्वा द्वन्द्वसाधुत्वमाश्रयितुं युक्तम् । एवेमेव “ एचोऽयवायावः ” इत्यादावपि बोध्यम् ।

आद्यन्तसमुदायस्य टकित्समुदायार्थे अन्वयेन समासोपपत्तावपि प्रत्येकमन्वयो ‘ वृत्तस्य विशेषणयोगो न ’ इति नियमेन दुर्घटः स्यात् ? अत एवाह वैयाकरणः नागेशः शब्देन्दुशेखरे – ‘ यद्यप्यत्र मिलितस्य नैकत्रान्वयः इति द्वन्द्वो न प्राप्नोति, तथापि समूहयोरन्वयबोधोत्तरं यथासंख्यामनुदेशः समानाम् इति सूत्रारम्भसामर्थ्यात् पुनः प्रत्येकान्वयः । लोके त्वेवंरीत्या प्रयोगोऽसाधुरेवेति भाष्ये स्पष्टम् ’ ।

अयमेव निष्कर्षः – ‘ लोके शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय ’ इत्यादौ यथा क्रमिकान्वयः, तथैव शास्त्रेऽपि क्रमानुरोधेन अन्वयः सिद्ध एव, एतदर्थं “ यथासंख्यमनुदेशः समानाम् ” इति सूत्रकरणं विफलम् । अत एतत्सामर्थ्यात् शास्त्रे समासोत्तरमपि क्रमिकान्वयः । अर्थात् समासोत्तरम् एकदेशान्वयस्य ‘ पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन ’ इत्यादिन्यायेन एकदेशान्वयो वारितोऽपि सामर्थ्यात् “ यथासंख्यमनुदेशः समानाम् ” इति सूत्रेण भवति । लोके तु नैवंविधः प्रयोगः । तत्र क्रमेणान्वयभावात् । अत्र एव भाष्यकृता – ‘ अजाविधनौ देवदत्तयज्ञदत्तौ इति भवतीत्युक्ते तत्र न ज्ञायते कस्याजा धनम्, कस्यावयः इति । यद्यपि तावल्लोक एषः दृष्टान्तः । दृष्टान्तस्यापि तु पुरुषारम्भो निवर्तको भवति । अस्ति वेह कश्चित् पुरुषारम्भः अस्तीत्याह । कः ? संख्यातानुदेशो नाम ’[1217] इति भाष्येण

[1217] भाष्यम् – प्रकृतसूत्रे

समर्थितो भवत्येव । तथा च तादृशभाष्याद् द्वन्द्वगर्भबहुव्रीह्यर्थसमूहस्य द्वन्द्वार्थसमूहेनान्वयोत्तरं पुनः प्रत्येकान्वयो न भवतीत्येवोपलभ्यते । द्वन्द्वार्थसमूहयोस्तु अन्वये प्रत्येकान्वयो भवत्येवेति तत्त्वम् । अत एव इत् च इत् च इतौ इत्येकशेषः सिध्यति, उक्तरूपेण सह विवक्षायाः सत्त्वात् । अन्यथा एकस्येतः टिति अपरस्येतः कित्यन्वयादेकशेषानुपपत्तिः । समूहत्वेन प्रत्येकान्वये तु न दोषः । लोकेऽपि ईदृशप्रयोग-समर्थनं भाष्यविरोधादुपेक्ष्यम् ।

एतद्विषये द्वयोरेव प्राप्तिः " षष्ठीस्थाने योगा " इत्यस्य " प्रत्ययः ", " परश्च " इत्यस्य वा । तत्र ' पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ' इति न्यायेन स्वस्मात् परस्मिन् बाधनीये प्रथमोपस्थिततत्वाद् अनन्तरस्य अव्यहितोत्तरस्य बाधेन सूत्रे चरितार्थे व्यवहितस्य परस्य बाधे मानाभाव इत्येतन्मूलकेन " षष्ठीस्थाने योगा " इत्यस्यैव " आद्यन्तौ टकितौ " इति सूत्रम् अपवादत्वाद् बाधकं भवति । " प्रत्ययः ", " परश्च " इति सूत्रं परत्वाद् " आद्यन्तौ टकितौ " इति सूत्रस्य बाधकम् । अत एव " चरेष्टः " इत्यनेन विहितष्टप्रत्ययो धातोरनन्तरं भवति, न तु टित्वाद् धातोः पूर्वम्[1218] ।

टित् आदिर्भवति, किदन्तो भवति – इत्युक्ते कस्य आदिर्भवति ? कस्य वाऽन्तो भवति ? इत्ययं प्रश्नः समुदेति । तथा च भाष्येऽपि पृष्टम् – ' कौ पुनष्टकितावाद्यन्तौ भवतः ? ' इति । समाहितञ्च – ' आगमावित्याह ' एतत्सर्वमनतिकृत्य वृत्तिर्व्यरचि – षष्ठीनिर्दिष्टस्य ' टित् ' आगम आदिर्भवति, ' कित् ' आगमोऽन्तो भवति ।

भाष्ये तु सञ्ज्ञापक्षोऽपि स्थापितः । तथा हि, टकिताविति कर्मधारयः । इत्सञ्ज्ञकौ टकारककारौ आद्यन्तयोः सञ्ज्ञे स्तः । तथा च इट् इति बहुव्रीहिः इः ट् आदिर्यस्येति विग्रहः । तथा च स्थानेन्तरतमपरिभाषया तव्यस्य इतव्यादेशे सिद्धमिष्टम् । एवं यापयति इत्यत्र यातेर्याप् आदेशः, पुः क् यस्येति व्याख्यानात्[1219] ।

• **मिदचोऽन्त्यात्परः – (1-1-46)**

चतुष्पदेऽस्मिन् सूत्रे ' मित् ' इत्युद्दिश्य अचोऽन्त्यात्परत्वं विधीयते । अनियमे नियमकारिणीत्वादियमपि स्वोत्सर्गवत् परिभाषा । अस्याश्चोत्सर्गः – " षष्ठी स्थानेयोगा "[1220] इति, "

[1218] शब्देन्दुशेखरः – राधिकाव्याख्या

[1219] शब्दकौस्तुभः – प्रकृतसूत्रे

[1220] अष्टाध्यायी – (1-1-49)

प्रत्ययः[1221], परश्च[1222] ” इति च । यद्येषा न स्यात्तर्हि श्नमादयो मित्प्रत्ययाः प्रकृतेः परे स्युः, नुमादयश्च मिदागमाः “ षष्ठी स्थानेयोगा ” इति स्थाने भवन्तः “ अलोऽन्त्यस्य ”[1223] इत्यन्त्यस्य स्थाने स्युः । “ षष्ठी स्थानेयोगा ”, “ प्रत्ययः, परश्च ” इत्यनयोश्च परिभाषात्वात्तदपवादतयेयमपि परिभाषैव । उत्सर्गापवादयोः समानजातीयकत्वनियमात् ।

न च “ आद्यन्तौ टकितौ ”[1224] इतिवत् इयमपि पुरस्तादपवादन्यायात् स्थानेयोगत्वस्यैवापवादो भवतु, न तु प्रत्ययपरत्वस्यापि, तस्य व्यवहितत्वादिति शङ्क्यम्, श्नमादीनां प्रत्ययानां मित्करण-सामर्थ्याद् इयं प्रत्ययपरत्वस्यापि अपवादः । यदीयं प्रत्ययपरत्वं न बाधेत, तर्हि श्नमादयः प्रत्ययाः प्रत्ययपरत्वनियमेन प्रकृतेः परे स्युः, तदा च तेषां मित्करणं व्यर्थं स्यात् । नान्यद्धि अस्ति मित्करणस्य प्रयोजनम् ।

मद्विषये यद् यत् प्राप्तं तत् सर्वं मया बाध्यम् इति बाध्यसामान्यचिन्तापक्षस्याश्रयणेन “ षष्ठी स्थानेयोगा ”, “ परश्च ” इत्येततेसूत्रद्वयमपि इदं सूत्रं बाधते, मित्करणसामर्थ्यात् । न च श्नमादीनां मित्त्वमेव नास्तु, इति वक्तुं शक्यम्, तथा सति प्रयोगदेशे मकारश्रवणप्रसङ्गात् । न च श्नमादिप्रत्यये श्रवणार्थमेव मकारोच्चारणं स्यादिति तदुच्चारणसामर्थ्यात् “ परश्च ” इति सूत्रस्य बाधो न स्यादिति चेन्न, “ तृणह इम् ”[1225] इति सूत्रस्य च श्नमादीनां मित्त्वस्य तेषामन्त्यादचः परस्य श्नम्घटकनकारस्य दर्शनात् बाध्यबाधकभावो युक्त एव । तथाहि – यदि श्नम् मिन्न स्यात्तर्हि सूत्रकारः ‘ तृणह ’ इति कथं निर्दिशेत् ? तदा तु तृह्-धातोः परे श्नमि ‘ तृह्नम् ’ इति रूपं श्नम्विशिष्टं स्यात् । निर्दिष्टं च सूत्रकृता ‘ तृणह ’ इति श्नम्विशिष्टं रूपम् । तेन उभयमिदं साध्यते, श्नमो मित्त्वञ्च, मित्त्वाच्च तस्य अन्त्यादचः परत्वञ्च । तथा सत्येव ‘ तृणह ’ इति निर्देश उपपद्यते । ततश्चास्मान्निर्देशादस्या उभयापवादत्वं साध्यते । अत एव च स्वोच्चारणार्थत्वमपि नेति गम्यते ।

अचां मध्ये अन्त्योऽपि साजात्यादच् एव, न त्वक्षरसमाम्नायेऽचां मध्येऽन्त्य औकार इत्यव्याप्त्यतिव्याप्ती ‘ सर्वादीनि ’ इत्यादिनिर्देशात्, ‘ संघातभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां

[1221] अष्टाध्यायी – (3-1-1)
[1222] अष्टाध्यायी – (3-1-2)
[1223] अष्टाध्यायी – (1-1-52)
[1224] अष्टाध्यायी – (1-1-46)
[1225] अष्टाध्यायी – (7-3-92)

विहन्तुमिति कृत्वा पञ्चरत्निनी इत्यादौ द्विगुस्वरो भविष्यति '[1226] इति भाष्याच्च यस्य समुदायस्य मिद्विहितस्तद्घटकयावदच्समुदायस्तदन्त्यस्यैव ग्रहणात्।

- **' अचः ' इति निर्धारणषष्ठी वा समानाधिकरणपञ्चमी वा**

' अचः ' इति पदं षष्ठ्यन्तमपि संभवति, पञ्चम्यन्तमपि, किमत्र पुनर्युक्तार्थकम् ? इति विचारणायां काशिकाकृता कौमुदीकृता च सर्वैरपि अधिकतराचार्यैः ' अचः ' इति षष्ठ्यन्तं पदं स्वीकृतम्। षष्ठी चात्र " यतश्च निर्धारणम् "[1227] इति निर्धारणेऽर्थे वर्तते। गवां गोषु वा कृष्णा बहुक्षीरा इतिवत्। न तु ' अन्त्यात् ' इति सामानाधिकरण्यात् पञ्चमी। कुतः ? तथा सति ' अन्त्यात् अचः परो मित् ' इति सूत्रार्थे अजन्तादेव शब्दात्परो मित् स्यात्, न तु हलन्तेषु अचः परः स्यात्। तथा सति हलन्तेषु " षष्ठी स्थानेयोगा ", " अलोऽन्त्यस्य " इति अन्त्यस्यालः स्थाने स्यात्। एवञ्च मित्करणमेवानर्थकं स्यात्। तद्यथा " शे मुचादीनाम् "[1228] इति नुम् मुचादेरन्त्यस्य स्थाने स्यात्। " नपुंसकस्य झलचः "[1229] इति नुम् ' ज्ञानानि ' इत्यादौ एव अन्त्यात् अचः परः स्यात्, ' पयांसि ' इत्यादौ तु अचोऽन्त्यत्वाभावात् एतत्परिभाषाप्रवृत्तौ अन्त्यसकारस्थाने नुम् स्यात्। एवम् " इदितो नुम् धातोः "[1230] इत्यादावपि अन्त्यस्य स्थाने स्यात्। " रुधादिभ्यः श्नम् "[1231] इत्यादिमित्प्रत्ययास्तु प्रत्ययपरत्वनियमात् प्रकृतेः पराः स्युः। एवञ्च तेषां मित्त्वमेवापार्थकं स्यात्। " नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः "[1232], " अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च "[1233], " चिन्तिपूजिकथिकुम्बिचर्चश्च "[1234] इत्यादिसौत्रनिर्देशासङ्गतिः। उक्तनिर्देशैर्लक्ष्यानुरोधेन च निर्धारणषष्ठी एव कल्प्यते। नुमो मकारस्य वैयर्थ्यन्तु न, " नपुंसकस्य झलचः " इत्यत्रानुवृत्त्या अजन्ते नुमागमाय चारितार्थ्यात्। न च निर्धारणपदार्थस्य समूहादेकदेशस्य पृथक्करणरूपत्वेन निर्धारणविभक्तेः समूहवाचकादेवोत्पत्तेः, अच्पदे अच् च अच् च अच् च इत्येवमेकशेषस्यावश्यकत्वेन तत्र बहुवचनं न्याय्यम्। अत एव " कारके "[1235]

[1226] महाभाष्यम् – प्रकृतसूत्रे
[1227] अष्टाध्यायी – (2-3-41)
[1228] अष्टाध्यायी – (7-1-59)
[1229] अष्टाध्यायी – (7-1-72)
[1230] अष्टाध्यायी – (7-1-58)
[1231] अष्टाध्यायी – (3-1-78)
[1232] अष्टाध्यायी – (3-1-134)
[1233] अष्टाध्यायी – (3-1-138)
[1234] अष्टाध्यायी – (3-3-105)
[1235] अष्टाध्यायी – (1-4-23)

इति भाष्ये निर्धारणे सप्तम्याम् ‘ कारकेषु ’ इति ब्रूयादित्युक्तमिति वाच्यम्, सौत्रात्वाद् “ व्यत्ययो बहुलम् ”[1236] इत्यनेनैकवचनविधानात् । ततश्चार्थः सम्पद्यते सूत्रस्य – अचां मध्ये अन्त्यात् (अचः) परो मिद् भवति । काशिकावृत्तिरप्येवमेव – अचः इति निर्धारणषष्ठी, जातौ चेदमेकवचनम् । अचां सन्निविष्टानामन्त्यादचः परो मिद् भवति । इति ।

दीक्षितकृता वृत्तिस्तु इत्थम् – ‘ अचां मध्ये योऽन्त्यस्तस्मात् परस्तस्यैवान्तावयवो मित् स्यात् ’ । अत्र वृत्तौ पूर्वोक्तवृत्तिरपेक्ष्य ‘ तस्यैवान्तावयव ’ इति विशेषः । प्रौढमनोरमायां दीक्षितवचनम् – ‘ यत्तु प्राचोक्तम् – अन्त्यादचः पर इति । तन्न, “ शे मुचादीनाम् ” इत्यादावन्त्यस्याचोऽसम्भवात् ’ । एतदनुसारमेवान्यैरपि व्याख्यातृभिः ‘ अचः ’ इति पञ्चम्यन्ततत्वमुपेक्ष्य षष्ठ्यन्तत्वं समाश्रितमिति विस्तरेणोक्तम् ।

साम्प्रतं श्रीपूज्यानां गुरुवर्याणां साक्षात्कृतव्याकरणप्रतिपाद्यविषयाणां श्रीभोलाझामहोदयानां विचारः प्रदर्श्यते । ‘ अचः ’ इति समानाधिकरणपञ्चम्यामपि नास्ति स दोषः । तथाहि – निर्धारणषष्ठीपक्षेऽपि अन्त्यस्य अविशेषितत्वात् यतः कुतश्चित् अन्त्यात् परत्वं प्राप्तम् । नहि सूत्रे द्वितीयमज्ग्रहणमस्ति, येनान्त्यो विशेष्येत – इत्येतद्दोषपरिहाराय यथोच्येत – समानजातीयस्यैव हि लोके निर्धारणप्रतीतिर्भवति । तथाहि – कृष्णा गवां सम्पन्नक्षीरतमा – इत्युक्ते गौरेव प्रतीयते, नाजा, नाप्यश्वा । तस्मादिहापि ‘ अचां मध्येऽन्त्यात् ’ इति अन्त्यत्वेन निर्धार्यमाणः समानजातीयोऽजेव प्रतीयते । तेनाच एवान्त्यात् परो भविष्यति । अत एवोक्तं काशिकाकृता ‘ अन्त्यादचः ’ इति । तथा पञ्चमीपक्षेऽपि ‘ अन्त्यादचः परो मित् ’ इत्यस्य ‘ अज्झल्समुदायस्य सूत्रे आगमितत्वेन वा गृह्यमाणस्य योऽन्त्यावयवः, स यदि अजेव तर्हि तस्मात् परो मित् ’ इत्यर्थकत्वे पूर्वोक्तदिशा मुचादौ अन्त्यस्याचोऽभावाद् एतदप्रवृत्तौ अन्त्यस्यालः स्थाने वा प्रकृतेः परतया वा विधाने प्राप्ते मित्करणस्य अपार्थकत्वे तत्सामर्थ्यात्, “ तृणह इम् ” इति निर्देशाच्च विशेषणीभूतेन (परिच्छेदकेन) अन्त्यशब्देन विशेष्यभूताच्समानजातीयेषु अक्षु एव अचः परिच्छेदात् सामर्थ्यादेव ‘ अक्षु योऽन्त्योऽच् तस्मात् परो मित् स्यात् ’ इत्येवार्थः प्रतीयेत । यथा लोकेऽपि ‘ कृष्णगौः बहुक्षीरा ’ इत्युक्ते, कासु ? इति जिज्ञासायां गोषु – इत्येव लभ्यते, न तु गोषु महिषीषु अजासु च । यतो हि विशेषणेन कृष्णेतिपदेन विशेष्य – गोसजातीयगोषु एव कृष्णाया गोः परिच्छेदो विधीयते । एवञ्च पञ्चमीपक्षेऽपि सामर्थ्यात् (

[1236] अष्टाध्यायी – (3-1-85)

अज्झल्समुदायरूपगृह्यमाण – शब्दघटकेषु) अक्षु योऽन्त्योऽच् तस्मात् परो मित् – इत्यर्थस्य निर्धारण-षष्ठीपक्षे षष्ठ्यन्तपदघटितवाक्यार्थसमानार्थकत्वमेवेति न कुत्रापि दोषः[1237] ।

- **एच इग्घ्रस्वादेशे – (1-1-47)**

सूत्रार्थः – आदिश्यते इत्यादेशः कर्मणि घञ् । आदेशश्चासौ ह्रस्वश्चेति कर्मधारयः अत एव निर्देशाद्विशेष्यस्य ह्रस्वस्य पूर्वनिपातः निर्धारणे सप्तमी । यद्यपि " कारके "[1238] इति सूत्रे भाष्ये ' कारकेष्विति ब्रूयात् ' इत्युक्ते निर्धारणे बहुवचनमेवोचितम् निर्धारणस्थानेकाश्रयत्वात् तथाप्यत्र सौत्रमेकवचनम् जातौ वा ।

नानेन ह्रस्वो विधीयते । किन्तु " ह्रस्वो नपुंसके प्रातिपदिकस्य "[1239] इत्यादिना आदेशत्वेन विधीयमानेषु इक्षु, अनिक्षु च अनिको निवर्त्यन्ते । तदुक्तं भाष्ये नानेनेको निवर्त्यन्ते । किं तर्हि ? अनिको निवर्त्यन्ते सिद्धा ह्यत्र ह्रस्वा इकश्चानिकश्च । तत्रानेनानिको निवर्त्यन्ते इति ।

अयं भावः – एचां पूर्वभागोऽवर्णसदृशः, उत्तरभागश्च ए, ऐ, इत्यत्र इवर्णसदृशःओ,औ, इत्यत्र उवर्णसदृशः । तत्रोभयान्तरतं ह्रस्वाभावाद्भागकृतान्तरतम्येन प्राप्तस्य ह्रस्वाकारस्याभावायेदम् ।

अत्र " यथासंख्यामनुदेशः समानाम् "[1240] इत्यस्य सूत्रस्य नोपस्थितिः, समसम्बन्धिविधेरभावात् । न च ' अर्धमात्रावर्णस्याध्यर्धमात्रेवर्णोवर्णयोः ' इत्यत्रैव भाष्ये उक्ततया उत्तरभूयस्त्वात् तत्सदृश इगेव भविष्यतीति सूत्रं व्यर्थमिति वाच्यम्, एचोश्चोत्तरभूयस्त्वादवर्णे न भविष्यतीति भाष्यकृतैव प्रत्याख्यातत्वात् ।

अयमर्थः – शब्दपरविप्रतिषेधादेङ उत्तरभागान्तरतमौ इउवर्णाविव । तथा च षष्ठे कैयटः – विप्रतिषेधे परं कार्यमिति नायं नियमो लक्षणयोर्विप्रतिषेधे परं भवतीति किं तर्हि एकलक्षणविहितयोरपि कार्ययोर्विप्रतिषेधे परशब्दविषयत्वात्परं कार्यं भवतीत्येषोऽप्यर्थ आश्रीयते इति ।

यद्वा एकारः शुद्धतालव्य ओकारस्तु शुद्धौष्ठ्यः इति मते सिद्धम् । तथा च बह्वृचप्रातिशाख्यम् – तालव्यावेकारचवर्गाविकारैकारौ यकारः शकार इति , शेष ओष्ठोपपाद्य इति च ।

[1237] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[1238] अष्टाध्यायी – (1-4-23)

[1239] अष्टाध्यायी – (1-2-47))

[1240] अष्टाध्यायी – (1-3-10)

ऐक्षु समाधानान्तरमप्याह वार्तिककारः – ऐचोश्चेति । उत्तरभूयस्त्वाच्चेत्यन्वयः । अर्धमात्रा अवर्णस्य सार्धमात्रा त्विवर्णोवर्णयोरिति पक्षे मल्लग्रामादिवद् भूयसा व्यपदेशादपीकारोकारावादेशौ इति प्रकृतसूत्रमनारभ्यमिति । समप्रविभागपक्षोऽप्यष्टमे स्थितः, तत्र पूर्वोक्तसमाधानद्वयमेव[1241] ।

शेखरकृता " प्लुतावैच इदुतौ "[1242] इति सूत्रे अध्यर्धमात्रावर्णस्यार्धमात्रेवर्णोवर्णयोः इति पक्षस्यापि विनिगमनाविरहेणोक्ततया समविभागपक्षस्यैव भाष्यकृत्सम्मततया सूत्रमावश्यकमित्युक्तम् ।

- **षष्ठी स्थानेयोगा – (1-1-48)**

सूत्रार्थः – अस्मिन् शास्त्रे अनियतयोगा (अनियतसम्बन्धा) षष्ठी स्थानेयोगा मन्तव्या ।

पदपदार्थविचारः – किमिदं समस्तमेकं पदमाहोस्वित् स्थाने योगा इति पृथक् –पृथक् पदे ? यदि असमासः, तदा ' योगा ' इति न प्राप्नोति, षष्ठीतिस्त्रीलिङ्गविशेषणतया " अकर्तरि च कारके सञ्ज्ञायाम् "[1243] इति प्राप्तघञं बाधित्वा " स्त्रियां क्तिन् "[1244] इति क्तिनि ' युक्तिः' इत्यापत्तेः । अतः स्थानेयोगेत्येकं पदम् । किन्तु एकपदे सुब्लुक् कुतो न ? एतत्समाधातुं भगवता भाष्यकृता प्रोक्तम् – ' स्थाने योगोऽस्याः सेयं स्थानेयोगा । सप्तम्यलुक् निपातनात् । तृतीयाया वा एत्वम् । स्थानेन योगोऽस्याः सेयं स्थानेयोगेति '[1245] ।

भाष्यकारस्याभिप्रायोऽत्रायम् – पूर्वपदे सप्तम्या तृतीयया वा व्यधिकरणबहुव्रीहिः । उभयत्रार्थे स्थानशब्दस्यैदन्तत्वं निपातनात् । सप्तम्या अलुका तु न, ' स्थानेन योगोऽस्याः ' इति पक्षे तदसिद्धेः ।

स्थानेन = स्थानपदार्थेन योगः = वाच्यवाचकभावलक्षणः सम्बन्धोऽस्याः सा स्थानेयोगा । निरूपितत्वञ्च तृतीयार्थः[1246] । स्थानसामीप्यानन्तर्यादयः षष्ठ्यर्थसम्बन्धनिरूपकाः, न तु षष्ठ्यर्थाः । ततश्च नास्य भाष्यस्य मतुप्सूत्रस्थभाष्येण विरोधः । तत्र हि भाष्ये ' गावोऽस्य सन्त्यनन्तराः ' इत्यर्थे मतुप्शङ्कामुत्स्थाप्य असामर्थ्यात् वृत्त्यभाव उक्तः । आनन्तर्यं यदि षष्ठ्यर्थः स्यात्, तदा तस्य प्रत्ययार्थत्वात् न भवेदसामर्थ्यम्[1247] । कैयटेनापि – आनन्तर्यमस्त्यर्थवत्प्रकृत्यर्थोपाधिरित्युक्तम्, न तु

[1241] व्याकरणसिद्धान्तसुधाविधिः – प्रकृतसुत्रे
[1242] अष्टाध्यायी – (8-2-106)
[1243] अष्टाध्यायी – (3-3-19)
[1244] अष्टाध्यायी – (3-3-94)
[1245] भाष्यम् – प्रकृतसूत्रे
[1246] वैयाकरणसिद्धन्तकौमुदी – बालमनोरमा – तत्त्वबोधिनी – प्रकृतसूत्रे
[1247] महाभाष्यम् – मतुप्सूत्रे

तस्य षष्ठ्यर्थत्वेन प्रत्ययार्थत्वमुक्तम्[1248] । अत एवात्र भगवता सप्तम्यन्तेन तृतीयान्तेन वा व्यधिकरणबहुव्रीहिर्दर्शितः, न तु स्थानं योगोऽस्याः इति समानाधिकरणबहुव्रीहिः । तथा सति स्थानरूपसम्बन्ध षष्ठ्यर्थः सिध्येत् । एवञ्च यदि स्थानरूपोऽर्थः षष्ठ्या विवक्षितस्तदा ' स्थानयोगा ' इत्येव वक्तव्ये निपातनेन एकारघटितप्रयोगो भाष्ये विफल एव स्यात् । प्रकृतसूत्रस्थं ' अस्तेर्भूर्भवतीति सन्देहः – स्थाने अनन्तरे समीपे वा इति ? ' इति भाष्यन्तु स्थानपदाध्याहारेण तन्निरूपितसम्बन्धार्थिका, आनन्तर्यादिपदाध्याहारेण तन्निरूपितसम्बन्धार्थिका वा षष्ठी - इत्यभिप्रायकं भाष्यवचनम् । अतः षष्ठ्याः आनन्तर्याद्यर्थो न । षष्ठीमात्रोच्चारणे सम्बन्धविशेषस्यानिश्चयदशायां स्थानपदमध्याहृत्य तन्निरूपितसम्बन्धः षष्ठी वाच्या इति ध्येयम् ।

यद्वा त्रिपदमिदं सूत्रम् – षष्ठी, स्थाने, अयोगा । ' अयोग ' इति छेदे त्वनिर्धारितसम्बन्धविशेषा षष्ठी स्थानप्रयुक्तसम्बन्धपरा बोध्या । तथा च भाष्यकार आह – ' स्थाने अयोगा – स्थानेयोगा । किमिदमयोगेति ? अव्यक्तयोगा – अयोगा '[1249] । अव्यक्तो योगोऽस्याः सा अयोगेति मध्यपदलोपि-बहुव्रीहिः ।

यद्वा षष्ठी स्थाने योगा इति त्रिपदं सूत्रम् । अत्र पक्षे ' योगा ' इति पदन्तु ' योगोऽस्त्यस्याः ' इति विग्रहेण अर्शआदित्वान्मत्त्वर्थीयाजन्तं भूमार्थे । अनेकसम्बन्धपरतया सम्भव्यमानेति यावत् । तदुक्तं भाष्ये – ' अथवा योगवती – योगा । का पुनर्योगवती ? यस्याः बहवो योगाः । कुत एतत् ? भूम्नि हि मतुब्भवति '[1250] । उभयोरपि असमासपक्षयोरर्थः समान एव ।

सूत्रप्रयोजनम् – षष्ठ्यर्थः सम्बन्धः, " षष्ठी शेषे "[1251] इति सूत्रेण प्रातिपदिकार्थकारक-व्यतिरिक्तसम्बन्धरूपशेषे षष्ठीविधानात् । सम्बन्धाश्चानन्ता एव । यथोक्तं भाष्यकृता – ' एकशतं षष्ठ्यर्थाः, यावन्तो वा । ते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्ति '[1252] । इति । एवञ्च यत्र षष्ठी श्रूयते, तत्र तदर्थरूपाणां समेषां सम्बन्धानामुपस्थितो यत्र सम्बन्धिशब्दमहिम्ना नेदं निर्णेतुं शक्येत – कोऽत्र सम्बन्धविशेषः षष्ठ्यर्थः ? तत्र स्थाननिरूपितसम्बन्धविशेषनिर्णयाय परिभाषेयमुपतिष्ठते । परिभाषायाश्च अनियमे नियमकारिणीत्वात् यत्र सम्बन्धिशब्दमहिम्नैव सम्बन्धविशेषो निर्णीयते, न तत्रेयं

[1248] महाभाष्यम् – प्रदीपोद्यतौ – मतुप्सूत्रे
[1249] भाष्यम् – प्रकृतसूत्रे
[1250] भाष्यम् – प्रकृतसूत्रे
[1251] अष्टाध्यायी – (2-3-50)
[1252] भाष्यम् – प्रकृतसूत्रे

परिभाषोपतिष्ठते । यथा – “ ऊदुपधाया गोहः ”[1253] इत्यादौ अवयववाचकोपधापदसन्निधाने गोहोऽवयविनः श्रुतौ तयोर्मध्ये अवयवावयविभावसम्बन्धे निर्णीते स एव ‘ गोहः ’ इति षष्ठ्यर्थः – इति अनियमाभावात् न तत्रार्थनिर्णयाय परिभाषेयमुपतिष्ठते[1254] । षष्ठ्यर्थसम्बन्धविशेषनिर्णयाभाव-रूपोऽनियमो यत्र, तत्रैव परिभाषाया अस्याः प्रवत्तिमुपलक्ष्य कौमुदीकृता – ‘ अनिर्धारितसम्बन्धविशेषा या षष्ठी सा स्थानेयोगा बोध्या ’ इत्युक्तम्[1255] । काशिकाकृदुक्तिरप्येवमेव – ‘ इह शास्त्रे या षष्ठी अनियत-योगा श्रूयते, सा स्थानेयोगैव भवति, नान्ययोगा ’[1256] ।

क्रियाकारकभावव्यतिरिक्ते सम्बन्धसामान्ये षष्ठी शेषे इति षष्ठीविभक्तिर्विधीयते । सम्बन्धस्य द्विष्ठत्वेन यत्किञ्चित्प्रतियोगिको यत्किञ्चिदनुयोगिकश्च भवति । एवं सम्बन्धस्य सम्बन्धिद्वय-सापेक्षित्वेन द्वितीयसम्बन्धिबोधकपदानुपादाने किं पदार्थनिरूपितः षष्ठ्यर्थस्सम्बन्ध इति संशये प्रकृतपरिभाषया स्थानेपदमध्याह्रियते । ततश्च स्थाननिरूपितसम्बन्ध एव षष्ठ्यर्थ इति निश्चयो जायत इति भावः ।

‘ षष्ठी स्थानेयोगा ’ इति सूत्राभावे लोके यथा चैत्रस्य इत्युक्ते आर्थाः (स्वस्वामित्वादयः), यौनाः (पितृत्वादयः), मौखाः (गुरुशिष्यभावादयः), स्रौवाश्च (ऋत्विक्त्वादयः) सम्बन्धा उपतिष्ठन्ते । भृत्यः, पुत्रः, शिष्यः, पुरोहितः, इत्युक्ते एव एक एवावतिष्ठते, अन्ये निवर्तन्ते । तथा ‘ इकः ’ इत्युक्ते आनन्तर्यम्, सामीप्यम्, अवयवावयविभावः, स्थान्यादेशभावः, इत्यादयः सम्बन्धा उपस्थिता भवन्ति । तत्रासति प्रतिबन्धके स्थानप्रतियोगिकसम्बन्ध एव षष्ठ्यर्थ इत्यनेन निश्चीयते । स्थानपदार्थश्च प्रसङ्गः, “ उरण् रपरः ”[1257] इति सूत्रे भाष्ये षष्ठी स्थाने इत्यतः स्थाने इति वर्तते । स्थानशब्दश्च प्रसङ्गवाची इत्युक्तेः । प्रसङ्गश्च प्राप्तिः । प्राप्तिश्चात्र आहार्य्यज्ञानरूपाया आपत्तिस्तद्रूपैव । तथा हि बाधसमकालिकेच्छाजन्यं ज्ञानमाहार्य्यम् । यथा – ‘ कश्चिद् भृत्यः स्वामिनं ब्रूते त्वं माता त्वं पिता ’ इति । तदाहार्य्यज्ञानं मातृत्वपितृत्वाभावसमकालिकमातृत्वपितृत्वविषयकत्वात् । इच्छाजन्यञ्च ज्ञानं न बाध्यं नापि बाधकम् । प्रकृते ‘ सुध्युपास्यः ’ इत्येव शब्दस्तत्र प्रक्रियानिर्वाहाय ‘ सुधी उपास्य ’ इति

[1253] अष्टाध्यायी – (6-4-89)

[1254] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[1255] व्याकरणसिद्धान्तकौमुदी – प्रकृतसूत्रे

[1256] काशिका – प्रकृतसूत्रे

[1257] अष्टाध्यायी – (1-1-51)

कल्पनामात्रमाहार्य्यज्ञानम् । तथा च इकः प्रसङ्गे आहार्य्यज्ञाने सति यण्घटितज्ञानं कर्तव्यमित्येव सूत्रेण बोध्यते[1258] ।

प्रसङ्गश्च सति सम्भवे अर्थविशिष्टस्य शब्दस्य ग्राह्यः, अर्थबोधनार्थं शब्दस्य प्रयोगात् । " इको यणचि "[1259] इत्यत्र अज्निरूपिताव्यवहितपूर्वत्वविशिष्टस्य इग्घटितस्य प्रयोगप्रसङ्गे यण्घटितस्यार्थ-बोधकस्य प्रयोग इत्यर्थः । अन्यथा कस्यचिद् वर्णस्य स्थाने कस्मिंश्चिद् आदेशे वर्णस्यानित्यत्वमापद्येत । तद्धटितप्रयोगप्रसङ्गे इत्यर्थेऽभ्युपगम्यमाने तादृशं प्रयोगम् अकृत्वा तद्धटितस्य प्रयोगान्तरस्य बोधनात् न नित्यत्वहानिः । अथवा इकारबुद्धिप्रसङ्गे यकारबुद्धिः कर्तव्येति बुद्धिविपरिणामेन शब्दानित्यत्वप्रसङ्गो वारणीयः । वर्णबुद्धिर्नश्यति, न वर्ण इति भावः । स्थानिवत्सूत्रे भाष्येऽपि – कार्य विपरिणामाद् वा इत्यनेन कार्याया बुद्धेर्विपरिणामः स्पष्टमेव दर्शितः । अत एव स्थानिवत्सूत्रे कैयटेऽपि ' अपवादप्रसङ्गस्तु इति प्रतीकमादाय बुद्धिविपरिणाममात्रं यदि स्थान्यादेशभाव इति भाव ' इत्युक्तम्[1260] ।

प्रसङ्गे इगुच्चारणप्राप्तिकाले यण् उच्चारणीयः संहितायां सत्याम् इति " इको यणचि " इत्यस्यार्थः सम्पन्नः । " इको गुणवृद्धी "[1261] इतिवदयं योगः पदोपस्थापक एवास्तु । इह शास्त्रे अनिर्धारितसम्बन्धविशेषा षष्ठी स्थाने शब्देन युज्यते । स्थाने इति सप्तम्यन्तं पदं तत्रोपतिष्ठते इति भावः । " ऊदुपधाया गोहः "[1262], " शास इदङ्हलोः "[1263] इत्यादौ उपधापदसन्निधानेनावयवावयविभाव-सम्बन्धरूपषष्ठ्यर्थस्य निर्णीतत्वात् ' गोहः ', ' शासः ' इति षष्ठी न स्थानपदार्थानुयोगिकसम्बन्धार्थिका । किन्तु अवयवावयविभावसम्बन्धबोधिकैव । तत्रैव ' उपधायाः ' इत्यत्र षष्ठी अनिर्धारित-सम्बन्धार्थकतया स्थानपदार्थानुयोगिकसम्बन्धार्थिकैव । स्थान – सामीप्यानन्तर्यादीनां षष्ठीवाच्यत्वं तु मनोरमा-शब्दरत्न-शेखरादिषु दूषितम् ।

ननु लोके स्थानशब्दोऽधिकरणे प्रसिद्धः । तद्यथा – ' शिवस्थानं कैलासः ', ' विष्णुस्थानं वैकुण्ठः ' । शिवाधिकरणम्, विष्ण्वधिकरणमित्यर्थः । एवं " इको यणचि " इत्यादौ इक्पदार्थस्य

[1258] व्याकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे
[1259] अष्टाध्यायी – (6-1-76)
[1260] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे
[1261] अष्टाध्यायी – (1-1-3)
[1262] अष्टाध्यायी – (6-4-89)
[1263] अष्टाध्यायी – (6-4-34)

निरूपकतया, निरूपिततया, अभेदेन वा स्थानपदार्थेऽन्वये इकोऽधिकरणे यण् स्यात् इति, इगभिन्नाधिकरणको यण् स्यादिति वार्थे इको निवृत्तिर्न स्यात्।

स्थानशब्दो भावसाधनः – स्थितिः स्थानम्। तत् पुनस्त्रिधा – अपकर्षः, निवृत्तिः, प्रसङ्गश्चेति। ‘ गोस्थानेऽश्वो बध्यताम् ’ इत्यपकर्षः स्थानशब्दस्यास्थेयः। ‘ श्लेष्मणः स्थाने कटुकमौषधम् ’ इत्यत्र निवृत्तिः । दर्भाणां स्थाने शरैरास्तरितव्यम् इत्यत्र प्रसङ्गः । तत्राद्यावर्थाविह न सम्भवतः । नित्यत्वाच्छब्दार्थसम्बन्धस्य प्रथमो न संभवति। अस्तेरुपदेशसामर्थ्यान्न द्वितीयः। अतः प्रसङ्ग एव स्थानम्[1264]। अत उक्तं भट्टोजीदीक्षितेनापि स्थानं च प्रसङ्ग[1265] इति।

न च स्थानपदं प्रसङ्गार्थेऽदृष्टचरम्, ‘ अभिचारेष्टौ दर्भाणां स्थाने शरैः प्रस्तरितव्यम् ’ इत्यादिवाक्ये स्थानशब्दस्य प्रसङ्गार्थकत्वदर्शनात्। तत्र यथा शरैर्दर्भा निवर्त्यन्ते तथा “ इको यणचि ” इत्यादावपि यणाद्यादेशैरिगादयो निवर्त्यन्ते। तत्र यः प्रसक्तः सन् निवर्तते स स्थानीति व्यवह्रियते। यो निवर्तयति स आदेश इति। भाष्ये तु ‘ शब्दस्य तु शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हति अन्यदतः स्थानात् ’। शब्दस्यापि शब्देनानन्तरादयोऽभिसम्बन्धाः। अस्तेर्भूर्भवतीति सन्देहः – स्थाने अनन्तरे समीपे वेति। सन्देहमात्रमेतद् भवति। सर्वसन्देहेषु चेदमुपतिष्ठते ‘ व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् ’ इति। स्थाने इति व्याख्यास्यामः। ‘ स तर्हि अयं योगो व्यक्तव्यः ’[1266] इत्येवं सूत्रं प्रत्याख्यातं सम्बन्धनिर्णयाय। ‘ निर्दिशमानस्यादेशा भवन्ति ’ इति परिभाषालाभाय च वक्तव्यमित्युक्तम्। तथा हि – यतः सा इत्यध्याह्रियते यतः षष्ठी सा एव षष्ठीप्रकृतिः = षष्ठीप्रकृतिशक्यः स्थानेयोगा = स्थानपदार्थानुयोगिकसम्बन्धप्रतियोगितया युज्यते न शास्त्रान्तरयो विधियदागमपरिभाषाप्रयोज्यशब्द-बोधविषयस्तदन्तादिरित्याशयः। तथा चादेशस्य निर्दिश्यमानः षष्ठीप्रकृतित्वेनोच्चार्यमाणसजातीय एव स्थानीति ‘ निर्दिश्यमानस्यादेशा भवन्ती ’ ति सिद्धम्[1267]। अयं भावः – यदीदं सूत्रं क्रियते, तर्हि अस्यैव अर्थः – निर्दिश्यमानस्यादेशा भवन्ति इति परिभाषारूपो जायते[1268]। एतद्योगाभावे तु सा वाचनिकी पृथगेव कर्तव्या – इति गौरवं स्यात्। अतस्तत्परिभाषाज्ञापनमस्याः फलम्। तथाहि – षष्ठीति षष्ठ्यन्तं

[1264] काशिका – न्यासः – पदमञ्जरी – प्रकृतसूत्रे
[1265] वैयाकरणसिद्धान्तकौमुदी – प्रकृतसूत्रे
[1266] भाष्यम् – प्रकृतसूत्रे
[1267] व्याकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे
[1268] भाष्यम् – प्रदीपः - प्रकृतसूत्रे

गृह्यते । तेन च (निर्दिश्यमानपदाध्याहारेण) षष्ठ्यन्तमेव निर्दिश्यमानं स्थानेन युज्यते, न तु प्रतीयमानमित्यर्थः[1269] ।

अयं भावः – षष्ठीविभक्त्या निर्दिष्टस्य स्थानिनः प्रसङ्गे ये केऽप्यादेशा उच्यन्ते, ते हि सूत्रकृता वा वार्त्तिककृता वा यावतः स्थानिनो निर्देशः कृतोऽस्ति तावन्मात्रस्यैव स्थाने भवन्ति, न तु तदन्तविधिना पूर्वपदसहितस्य इति, अर्थादनेककालोऽप्यादेशा निर्दिष्टस्थानिमात्रस्यैव स्थाने भवन्ति न तु तस्माद् अधिकस्य । तदनेन ‘ जराया जरसन्यतरस्याम् ’[1270] इत्यादौ जराशब्दान्तं यदङ्गं तदवयवस्य जराशब्दस्य जरसादेशो न तु निरित्यस्यापीति । यत्तु जराशब्दोत्तरषष्ठ्या स्वप्रकृत्यर्थभूतजराशब्दनिष्ठमेव स्थानित्वं बोध्यते, न तु निर्जरादिशब्दनिष्ठम् । तस्य प्रकृत्यर्थत्वाभावात् ।

- **स्थानेऽन्तरतमः – (1-1-49)**

परिभाषेयमादेशनियमार्था । सूत्रार्थः – स्थाने प्राप्यमाणानामन्तरतमः (सदृशतमः) आदेशो भवति । काशिकावृत्तिरप्येवमेव – ‘ स्थाने प्राप्यमाणानामन्तरतम आदेशो भवति सदृशतमः ’ ।

विध्येकवाक्यतया नियामकत्वम् – किमयं स्वतन्त्रो विधिः ? किं वा लक्षणान्तरेणऽभिनिवृत्तानामनेन नियमः क्रियते ? किं वा लक्षणान्तरशेषभूतमिति पक्षत्रयमत्रावतिष्ठते ।

ननु अस्य सूत्रस्य स्वतन्त्ररूपेण विधिसूत्रत्वस्वीकारपक्षे सर्वेषां शब्दानां स्थाने सर्वे आदेशाः प्राप्नुवन्ति । तद्यथा – दधि,मधुशब्दानामपि स्थानेऽन्तरतमा आदेशाः प्राप्नुवन्ति । किं पुनरत्रानिष्टम् ? यावतान्तरतम्यात् दधिमधुशब्दयोस्तावेवादेशौ भविष्यतः, तयोरप्यादेशयोरन्यौ दधिमधुशब्दौ यावादेशौ स्याताम्, तयोरप्यन्यावित्येवमपरिसमाप्तादेशपरम्पराविधानादनवस्था स्यात्[1271] । प्रयोजनमन्तरेण प्रवृत्तौ सत्यामसकृदपि प्रवृत्तिः स्यात् । ततश्च सर्वस्य निवृत्त्यभिमुखत्वात्साधुत्वस्य व्यवस्था नोपपद्यते[1272] । इदानीं सर्वस्यैतत्सूत्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात् अप्रवृत्तनित्यविध्युद्देश्य-तावच्छेदकानाक्रान्तत्वरूपपरिनिष्ठितत्वाभावेन व्यापकाभावे व्याप्याभाव इति नियमात् साधुत्वाभाव इत्याशयः[1273] । तथा च भाष्यम् – ‘ तप्ते भ्राष्टे तिलाः प्रक्षिप्ता मुहूर्तमपि नावतिष्ठन्ते । एवमिमे वर्णा

[1269] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[1270] अष्टाध्यायी – (7-2-101)

[1271] काशिका – न्यासः – प्रकृतसूत्रे

[1272] भाष्यम् – प्रदीपः – प्रकृतसूत्रे

[1273] भाष्यम् – तत्त्वालोकः – प्रकृतसूत्रे

मुहूर्तमपि नावतिष्ठेरन् '[1274] । तथैव पुनः पुनरादेशविधानपरम्पराऽनवरोधात् शब्दपरिनिष्ठितत्वाभावात् अर्थप्रत्यायनाय शब्दप्रयोगाप्रसङ्गः । किञ्च ' बिसम्, मुसलम् ' – इत्यादौ समुदायस्य समुदायादेशपक्षे दोषाभावेपि प्रत्येकं वर्णस्य तत्तत्वर्णादेशपक्षे सकारस्यादेशरूपस्य षत्वापत्तिर्दोषः स्यात् । अतः स्वतन्त्रविधित्वपक्षासम्भवात् ।

तस्मादन्येन निवृत्तानामनेन नियमः क्रियते इत्येव पक्षो न्याय्यः । न चास्मिन्पक्षे स्वीकृतेऽन्येन शास्त्रेण विहितानां नियमं कुर्यात्, तदा ' भुक्तवन्तं प्रति मा भुङ्क्थाः ' इति न्यायेन असदृशादेश-विधानानन्तरमेतत्प्रवृत्तावपि कृतादेशस्य निवृत्त्यसम्भवात् अनर्थकमेवेदं सूत्रं स्यात् । परिभाषा-प्रकरणात् परिभाषेयम् । तस्मात् " षष्ठी स्थानेयोगा "[1275] इति सूत्रात् षष्ठीपदमनुवर्तते । एतत्सूत्रस्थस्थान-पदार्थेन सह अनुवृत्तषष्ठीपदस्य सम्बन्धेन यत्र स्थानपदार्थनिरूपितसम्बन्धार्थबोधिका षष्ठी तत्र सूत्रे अन्तरतमपदमुपतिष्ठते इत्यर्थो निष्पन्नः । विधिसूत्रेण सह अस्य पदैकवाक्यतया अन्वयः । तथा च विधिसूत्रस्य वाक्यार्थः स्थानेऽन्तरतमपरिभाषया उपस्थापितेन अन्तरतमेन सहैव निष्पद्यते । अतः सदृशतमत्वेन भिन्नानामादेशानां व्यावृत्तिः सिद्धा । विधिवाक्येन सहैकवाक्यतयाऽनेन नियमः क्रियते इति असदृशतमस्य प्राप्तिरेव नास्तीत्याशयः ।

यथोक्तं प्रदीपे – ' यत्र षष्ठी, तत्रेदमुपतिष्ठते । तेनैकवाक्यतयाऽनेन सूत्रेण विधिवाक्यानामिति विधानकाल एवान्तरतम आदेशो विधीयते '[1276] । पदमञ्जर्यामपि प्रोक्तम् – ' तेन विधिवाक्यानामनेन सूत्रेणैकवाक्यत्वात् विधानकाल एवान्तरतम आदेशो विधीयते '[1277] । षष्ठीनिर्दिष्टस्य स्थानेऽन्तरतम एवादेशो भवतीति विधिवाक्यैकवाक्यतयाऽर्थे विधानकाले एवान्तरतमादेशविधानात् सकलेष्टसिद्ध्या तृतीयः पक्ष एव भाष्यकृतः सिद्धान्तः । अत एतत्सर्वं मनसि निधाय वृत्तौ प्रोक्तम् – स्थाने प्राप्यमाणानामिति । प्राप्यमाणानामादेशानां मध्ये योऽन्तरतमः स एव भवति, न तु येषां केषाञ्चिद् आदेशानां मध्ये योऽन्तरतमः स भवतीति भावः।

न च विहितानां नियम इति पक्षो नाङ्गीक्रियते, किन्तु यथा " उरण् रपरः "[1278] इत्यस्य उः स्थाने प्रसज्यमान एवाण् रपरः इत्यर्थः, तथैवात्रापि प्रसज्यमान आदेशोऽन्तरतमो भविष्यति, अन्वयश्च वाक्यैकवाक्यतया, एवं रीत्या व्याख्याने मूलं शब्दार्थतयैवोपपन्नम् ? ।

[1274] भाष्यम् – प्रकृतसूत्रे

[1275] अष्टाध्यायी – (1-1-49)

[1276] भाष्यम् – प्रदीपः – प्रकृतसूत्रे

[1277] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[1278] अष्टाध्यायी – (1-1-51)

ननु तथाविधार्थस्वीकारे स्वतन्त्रो विधिरिव गङ्गोदकमित्यत्र आकारस्य उकारस्य त्रैमात्रिकत्वेन तयोः स्थाने जायमानो गुणः सदृशतमत्वात् त्रैमात्रिकः प्रसज्येत। विधिसूत्रेण सहैव पदैकवाक्यतयाऽन्वये तु प्राप्यमाणानामादेशानां मध्ये योऽन्तरतमः स एव प्राप्नुयात्। त्रैमात्रिकस्य प्लुतस्य गुणसञ्ज्ञाया अभावेन गुणानन्तर्गतत्वाद् गङ्गोदकमित्यादौ प्लुतस्य गुणस्यापत्तिर्न । तादृशत्रैमात्रिकगुणस्य गुणविधायकसूत्रेण प्राप्यमाणतैव नास्तीति भावः[1279]।

स्थानेग्रहणप्रयोजनम् – " षष्ठी स्थानेयोगा " इति सूत्राद् स्थाने इत्यस्यानुवृत्तिसम्भवात् पुनरत्र स्थानेग्रहणं किमर्थम् ?।

न च एकस्मिन् सूत्रे यानि परस्परं सम्बद्धार्थानि निर्दिष्टानि पदानि भवन्ति, तेषामन्येषु सूत्रेषु यदाऽनुवृत्तिप्रसङ्गः समुपस्थितो भवति, तदा सहैव तानि प्रवर्तन्ते, सहैव वा निवर्तन्ते। तस्मात् भवत्येषा न्यायसिद्धा परिभाषा ' एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ' इति। अनया परिभाषया स्थानेयोगा इति समस्तपदैकदेशः स्थाने इति नानुवर्तयितुं शक्यमिति वाच्यम्।

अथैतस्यां पूर्वस्यां परिभाषायां सत्यामयं दोषः स्यात् – " अलुगुत्तरपदे "[1280] इति सर्वमपि पदद्वयात्मकमिदं सूत्रमधिकाररूपेण प्रचलति, तत्राऽलुगधिकारस्तु " आनङ् ऋतो द्वन्द्वे "[1281] इत्यानङ्विधानात् पूर्वमेवावतिष्ठते, पुनस्तद्योगस्यैकदेशभूत उत्तरपदाधिकारः सम्प्रसारणस्य इति सूत्रपर्यन्तं कथं गच्छेदित्यतोऽस्तीयं लक्ष्यसिद्धिभूता वाचनिकी परिभाषा एकयोग-निर्दिष्टानामप्येकदेशानुवृत्तिर्भवति इति । अत अस्याः परिभाषाया अपि जागरूकत्वात्, स्वरितत्व-प्रतिज्ञया समस्तपदस्यैकदेशस्यापि स्थानेपदस्येह अनुवृत्तिसद्भावेऽपि पुनः स्थाने ग्रहणसामर्थ्यात्। ' यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ' इति परिभाषा ज्ञाप्यते।

यथोक्तं भाष्ये – ' अथ स्थाने इति वर्तमाने पुनः स्थानग्रहणं किमर्थम् ? यत्रानेकविधमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात् '[1282] । कथं पुनरियं परिभाषा लभ्यते ? इत्यस्मिन् विषये महावैयाकरणेन कैयटेन प्रत्यपादि – ' स्थानग्रहणेऽनुवर्तमाने वाक्यभेदः क्रियते। स्थानेऽन्तरतमो भवति, यत्र चानेकमान्तर्यमस्ति तत्र स्थानकृतमेवान्तर्यमाश्रीयत इति। वाक्यभेदस्य च तमग्रहणमेव लिङ्गम्। स्थानकृत एव हि सादृश्ये गृह्यमाणे सादृश्यान्तरपरित्यागात्तमग्रहणमनर्थकं स्यात् '[1283] यत्र स्थानकृतमपि

[1279] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे

[1280] अष्टाध्यायी – (6-3-1)

[1281] अष्टाध्यायी – (6-3-25)

[1282] भाष्यम् – प्रकृतसूत्रे

[1283] भाष्यम् – प्रदीपः – प्रकृतसूत्रे

सादृश्यन्तत्र परवाक्येन गृह्यमाणे स्थानकृतमात्रसादृश्ये, यत्र च स्थानकृतसादृश्याभावस्तत्र पूर्ववाक्येन गृह्यमाणेऽर्थगुणप्रमाणकृतान्यतमसादृश्येऽतिशयलाभार्थे तमग्रहणमिति भावः[1284]।

वाक्यभेदविषये च मूर्धन्यपण्डितो नागेशः प्रोक्तवान् – ' अनुवृत्तप्रसङ्गवाचिस्थानशब्देनैकं वाक्यम्, ताल्वादिवाचीहत्यस्थानशब्देनापरम्। अत्र च स्थाने इति तृतीयार्थे सप्तमीति भावः '[1285]। " स्थानेऽन्तरतमः "[1286] इति सूत्रे यदि स्थानपदं प्रसङ्गार्थकं तदा " षष्ठी स्थानेयोगा " इति सूत्रात्प्रसङ्गार्थकस्थानपदानुपवृत्त्या सिद्धेऽत्र स्थानपदं व्यर्थं स्यादतः स्थानपदमत्र ताल्वादिस्थानपरम्।। " स्थानेऽन्तरतमः " इति सूत्रघटकं स्थानेपदं तृतीयान्तेन विपरिणम्यते। तथा च वाक्यभेदाश्रयणेन सति सम्भवे, प्रसङ्गे सति स्थानेनैवान्तरतमो बोध्यः। तथा हि – ' अन्तरतमः ' इति प्रथमं सूत्रम्। तस्योक्तरीत्या एकस्य स्थानेऽनेकेषामादेशानां प्रसङ्गे सति सदृशतम आदेशो भवति, इत्यर्थः।

द्वितीयम् – ' स्थाने ' इति। तच्च तृतीयया विपरिणम्यते। अत्र " षष्ठी स्थानेयोगा " इत्यतः ' स्थाने ' इति, ' अन्तरतमः ' इति सूत्रञ्चानुवर्तते। तथा च एकस्य स्थानेऽनेकेषामादेशानां प्रसङ्गे सति स्थानेन सदृशतम आदेशो भवति, इत्यर्थः। एतदर्थस्यापि पूर्वसूत्रेण संग्रहादिदं व्यर्थं सन्नियमार्थम्। प्रमाणादिना सदृशे स्थानेन च सदृशे आदेशे प्राप्ते स्थानेनैव सदृशतम आदेशो भवति नान्येन सदृशः। तथा च ' चेता, स्तोता ' इत्यादौ " सार्वधातुकार्धधातुकयोः "[1287] इत्यादिना प्रमाणेन आन्तर्य्येण मात्रिकेकारोकारयोः स्थाने मात्रिकोऽकारो गुणः प्राप्तः, स नियमेन वार्यते। स्थानकृतसादृश्येन ताल्वोष्ठस्थानयोरिकारोकारयोः ताल्वोष्ठस्थानकौ एकारौकरौ एव भवतो नाकार इति। नन्वेवमपि इकारस्य एकारः, उकारस्य ओकारो गुणो न स्यात्, कण्ठस्थानाधिक्येन स्थानत आन्तर्यतम्याभावादिति चेन्न, ' चेता, स्तोता ' प्रमाणतोऽकारो गुणः प्राप्नोति। स्थानत एकारौकारौ। पुनः स्थाने ग्रहणादेकारौकारौ भवतः इति भाष्यादिप्रामाण्याद्यावत्स्थानसाम्यस्यात्र विवक्षितत्वात्। एकस्य स्थानेऽनेकेषामादेशानां प्राप्तिरस्या लिङ्गम्।

ननु ' सकृदुच्चरितः सकृदेवार्थं गमयति ' परिभाषयाऽनया कथं द्विविधो वाक्यार्थबोध एकेन सूत्रेण ? इति संशयो न कर्तव्यः। आवृत्त्या सकृदुच्चरितत्वशङ्काया निराशात्।

[1284] भाष्यम् – तत्त्वालोकः प्रकृतसूत्रे

[1285] भाष्यम् – उद्द्योतः – प्रकृतसूत्रे

[1286] अष्टाध्यायी – (1-1-50)

[1287] अष्टाध्यायी – (7-3-84)

ननु अन्तरशब्दस्य सदृशोऽर्थः कोशे नोक्तः । तथा हि – अन्तरमवकाशावधिपरिधानान्तर्धि-भेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ॥ इत्यमरः । तथापि भाष्यादिप्रामाण्यात् सदृशार्थकोऽपि । यथा ‘ चैत्रसदृशो मैत्रः ’ इत्युक्तौ केन धर्मेण सदृश इत्याकाङ्क्षा जायते तथा स्थानिसदृश आदेशो भवति इत्यत्रापि सादृश्यनियमाकधर्मविषयिणी आकाङ्क्षा उदेति । एवञ्च ओष्ठस्थानस्य ओष्ठस्थानः, एकार्थस्य एकार्थः, प्रमाणतोऽकारो गुणः प्राप्नोति, ‘ सोष्मणः सोष्माणः ’ ‘ नादवतो नादवन्तः ’ इत्यादिभाष्योक्त्या 1. स्थानम्, 2. अर्थः, 3. गुणः (बाह्यप्रयत्नः), 4. प्रमाणम् (मात्रा) इति चत्वारो सादृश्यनियामकत्वेन गृह्यन्ते ।

तत्र स्थानतो यथा - ‘ सुद्ध्युपास्यः ’ इत्यत्र तालुस्थानस्येकारस्य तालुस्थानो यकारः । यथासङ्ख्यपक्षेऽप्यविरोधादेतत्प्रवृत्तेः । ‘ दैत्यारिः, श्रीशः ’ इत्यादिकमप्युदाहार्यम् ।

अर्थतो यथा – ‘ वातण्ड्ययुवतिः ’ इत्यत्र वतण्डशब्दात् “ वतण्डाच्च ”[1288] इति सूत्रेण गोत्रापत्ये यञ् । तस्य “ लुक् स्त्रियाम् ”[1289] इति सूत्रेण लुक् । शार्ङ्गरवादित्वान्ङीन् । वतण्डी चासौ युवतिश्चेति विग्रहे “ पोटायुवति…..”[1290] इति सूत्रेण समासः, “ पुंवत्कर्मधारयजातीयदेशीयेषु ”[1291] इति सूत्रेणातिदिश्यमानः पुंशब्दो वतण्डापत्यवाचिनो वतण्डीशब्दस्य तदपत्यवाची वातण्ड्यशब्दो भवति, न तु वतण्डादिः ।

गुणतो यथा – ‘ पाकः, त्यागः ’ इत्यत्र “ चजोः कुघिण्ण्यतोः ”[1292] इति सूत्रेण कुत्वेऽल्पप्राणस्याऽघोषस्य चकारस्य घोषवतो नादवतो महाप्राणस्य जकारस्य च यथाक्रमं तादृशावेव ककारगकारौ । यद्यपि गुणोऽत्र बाह्यप्रयत्नः, तथैव भाष्ये दर्शनात्, तथापि गुणशब्दोऽत्र स्थानार्थप्रमाणभिन्नधर्ममात्रपरः । अत एवात्रैव सूत्रे भाष्ये आन्तरतम्याभाववत्त्वरूपमेव ऋकारशकारयोः सादृश्यमित्याशयेन ‘ अनान्तर्य्यमेवानयोरान्तर्य्यम् ’ इत्युक्तिः संगच्छते[1293] ।

प्रमाणतो यथा – ‘ अमुष्मै, अमूभ्याम् ’ इत्यत्र अदसश्चतुर्थ्येकवचने भ्यामि च परतस्त्यदाद्यत्वम्, “ सर्वनाम्नः स्मै ”[1294] इति सूत्रेण स्मैभावः । भ्यामि “ सुपि च ”[1295] इति सूत्रेण दीर्घः,

---

[1288] अष्टाध्यायी – (4-1-108)

[1289] अष्टाध्यायी – (4-1-109)

[1290] अष्टाध्यायी – (2-1-65)

[1291] अष्टाध्यायी – (6-3-42)

[1292] अष्टाध्यायी – (7-3-52)

[1293] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1294] अष्टाध्यायी – (7-1-14)

[1295] अष्टाध्यायी – (7-3-102)

ततो “ अदसोऽसेर्दादु दो मः ”[1296] इति सूत्रेण एकमात्रकस्य एकमात्रकोकारः। द्विमात्रकस्य द्विमात्रकः। एवमन्यदप्यूह्यम्।

तमप्ग्रहणस्य प्रयोजनम् - येन केनापि रूपेण शब्दत्वेन प्रमेयत्वादिना सादृश्यस्य सर्वत्र सत्त्वेन सूत्रे अन्तरशब्दोपादानस्य वैयर्थ्यापत्त्या अन्तरशब्द एव सामर्थ्याद् अन्ततममर्थं बोधयिष्यतीति तमब्ग्रहणं न कर्तव्यमिति चेन्न, तमप् – पदेन अनेकविधमान्तर्यं बोध्यते। एतद् बोधनमस्य प्रयोजनम्। अतः स्वांशे चारितार्थ्यस्य प्रश्न एव नोदेति । एतस्य फलन्तु ‘ वाग्घरिः ’ इत्यत्र महाप्राणत्वरूपबाह्यप्रयत्नसाम्येन वर्गे द्वितीयः खकारो “ झयो होऽन्यतरस्याम् ”[1297] इत्यनेन न। अपि तु नादमहाप्राणत्वोभयसाम्येन घकारो वर्गे चतुर्थो भवति, खकारापेक्षया घकारस्य प्रयत्नद्वयसाम्येन सदृशतमत्वात्[1298]। अतिशयार्थलाभे च तमप्ग्रहणमेव मानम्।

परिभाषात्वम् – अनियमे नियमकारिणीत्वादियं परिभाषा। तथा हि ‘ सुधी उपास्यः ’ इत्यत्र “ इको यणचि ”[1299] इति ईकारस्य स्थाने यण् इत्युक्ते यवरलां चतुर्णामपि प्राप्तौ अनियमे प्रसक्ते, इयम् परिभाषा “ इको यणचि ” इत्यत्रोपस्थाय अन्तरतमो यण् भवतु इति नियम्य अनियमं वारयति, अनन्तरतमादेशनिवारणद्वारा । तथा च स्थानकृतान्तर्यात् तत्र तालव्येकारस्य स्थाने तालव्यो यकार एवादेशो भवति। यद्यपि “ इको यणचि ” इत्यादौ यथासंख्यबलेनापीष्टं सिद्धमिति वक्तुं शक्यते, तथापि ऋकारस्य स्थाने जायमानो रेफ ऋलृवर्णयोरान्तरतम्यात् लृकारस्यापि प्रसज्येत, एवं लृकारस्य जायमानो लकार ऋकारस्यापि स्थाने प्रसज्येतेति तदतिव्याप्तिपरिहाराय ‘ ओणृ – अपनयने ’ इति धातोः ऋदित्, ‘ गम्लृ – गतौ ’ इति धातोः लृदित् –इत्येवं पृथक् - पृथक् करणसामर्थ्यात् ऋलृवर्णयोरनित्यं स्यात्। इको ह्रस्वादिभेदात् षट्षष्टिर्यणस्तु सप्तेति वैषम्यात्संख्यातानुदेशो न सिद्ध्यतीति चेन्न, अत्र भाष्यकार आह – ‘ नैतदस्ति। संख्यातानुदेशेनाप्येतत्सिद्धम् ’[1300]।

महावैयाकरणो नागेशोऽपि न्यगादीत् – ‘ अयं भावः – यथा “ स्यतासी लृलुटो ”[1301] इत्यत्रार्थ-वैषम्येऽपि बोधकशब्दसाम्याद्यथासंख्यम्, तथा इक्पदयण्पदाभ्यामनेकोपस्थितावपि बोधकशब्द-

---

[1296] अष्टाध्यायी – (8-2-80)

[1297] अष्टाध्यायी – (8-4-62)

[1298] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे

[1299] अष्टाध्यायी – (6-1-76)

[1300] भाष्यम् – प्रकृतसूत्रे

[1301] अष्टाध्यायी – (3-1-33)

साम्यमस्त्येवेति न दोषः '[1302]। अत्र तु बुद्धिगौरवं स्यादिति " अकः सर्वणे दीर्घः "[1303] इत्याद्यर्थमवश्य-स्वीकर्तव्यैतत्परिभाषयैवात्रापि समाधानं युज्यते[1304]।

प्रथमान्तपाठनिर्णयः – विश्लिष्टपाठः संश्लिष्टपाठश्चेति द्विधा सूत्रपाठपरम्परा प्राचीनाचार्याणाम्। तत्र संश्लिष्टपाठः संहितापाठ उच्यते। अष्टाध्याय्यां संहितापाठे " स्थानेऽन्तरतम उरण् रपरः " इत्यत्र " स्थानेऽन्तरतमे उरण् रपरः " अथवा " स्थानेऽन्तरतमस् उरण् रपरः " इत्येवमुभय-विधस्य पाठस्य सन्धिविच्छेदेन कल्पयितुं शक्यतया सन्देहः । सप्तम्यन्ततया पाठकल्पने एकारस्यायादेशे यकारस्य " लोपः शाकल्यस्य "[1305] इति सूत्रेण वैकल्पिकलोपे " स्थानेऽन्तरतम उरण् रपरः" इति रूपं सम्भवति। प्रथमान्तपाठे च पदान्तसकारस्य रुत्वे यत्वे यलोपे " स्थानेऽन्तरतम उरण् रपरः " इति रूपं निष्पद्यते इत्येवं पाठः उभयस्मिन्नपि पक्षे निर्वहति। अत एव सन्देहः तत्किम् ' स्थानेऽन्तरतमे ' इति सप्तम्यन्तपाठोऽभिमत आहोस्वित् ' स्थानेऽन्तरतमस् ' इति प्रथमान्तपाठः ?।

तत्रायं निर्णयः – अन्तरतमे इत्येवं सप्तम्यन्तपाठे अन्तरतमे इति न प्रथमान्तस्य आदेशस्य विशेषणं सम्भवति अभेदान्वये समानविभक्तेरपेक्षणात्, किन्तु स्थानिनि अन्वियात्। तथा च अन्तरतमे स्थानिनि आदेश इत्यर्थः । तथा च प्राप्यमाणानां स्थानिनां मध्ये अन्तरतमे स्थानिनि आदेश इत्यर्थस्वीकारेण अनन्तरतमाः स्थानिनो निवृत्यन्ते, न अनन्तरतमा आदेशाः। एवं सति ह्रस्वे इकारे मात्राद्वयन्यूनकालत्वरूपेण आन्तरतम्येन यण्विधानं स्यात्। दीर्घे ईकारे यण् न स्यात्, स्थानिनि ईकारे मात्राद्वयस्य आदेशे यणि च अर्धमात्रायाः सत्त्वेन तयोर्वैषम्यात् । ह्रस्वेकारे एका मात्रा इति मात्राद्वयन्यूनकालिकत्वरूपान्तर्येण सदृशतमो यण् भवति । ' सुध्युपास्यः ' इत्यादौ दीर्घेकारस्य पूर्वोक्तरीत्या यणोऽसिद्ध्या सप्तम्यन्तपाठो भाष्ये दूषितः।

प्रथमान्तपाठे तु ' अन्तरतमः ' इत्यस्य प्रथमान्ततया अभेदेन आदेशेऽन्वयः। तथा च स्थानिनि प्राप्यमाणानाम् आदेशानां मध्ये योऽन्तरतम आदेशः स भविष्यति। एवम्भूतेनार्थेन अनन्तरतमाः (असदृशतमाः) आदेशा व्यावृत्यन्ते, न तु अनन्तरतमाः स्थानिनः। स्थानी अन्तरतमोऽनन्तरतमो वा सर्वोऽपि इक्पदेन संगृहीतः । यण्पदेन तु प्रथमान्तपाठे अनन्तरतमा आदेशा निवारिताः । एवञ्च दीर्घेकाराद् येऽपि स्थानिनो जाताः, तत्र दीर्घेकारस्य स्थाने आदेशान्तरवकाराद्यपेक्षया यकार

1302 भाष्यम् – उद्द्योतः – प्रकृतसूत्रे

1303 अष्टाध्यायी – (6-1-99)

1304 भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

1305 अष्टाध्यायी – (8-3-19)

एवान्तरतमत्वाद् भवति, न तु वकाराद्यादेशः तेषामनन्तरतमत्वेन व्यावर्तनात्। प्राप्यमाणानामादेशानां मध्ये यकारस्यैवान्तरतमत्वमित्याशयः[1306]। तस्मात् " स्थानेऽन्तरतम उरण् रपरः " इति संहितापाठे ' अन्तरतमः ' इति प्रथमान्तपाठ एव सिद्धान्त इति विज्ञेयम्।

सूत्रप्रत्याख्यानम् – भगवता भाष्यकृता सूत्रमिदं दृष्टार्थतया प्रत्याख्यातम्। तथाहि – यथा यो यस्य अन्तरतमः, स एव तस्य स्थाने यथा स्यात्, अन्यस्यान्तरतमोऽन्यस्य स्थाने मा भूत् – इत्यर्थम् ' प्रत्यात्मम् ' इति न वक्तव्यम्। यथोक्तं वार्त्तिककृतैव – प्रत्यात्मवचनमशिष्यं स्वभावसिद्धत्वात्। स्वभावत एव एतत्सिद्धम् – यद्यो यस्य अन्तरतमः स एव तस्य स्थाने भवति, अन्यस्यान्तरतमोऽन्यस्य स्थाने न भवति। यथा समाजेषु समाशेषु समवायेषु चास्यताम् – इत्युक्ते ' प्रत्यात्मम् ' इत्यनुक्तेऽपि स्वभावत एव जनाः स्वस्वसमाजेषु एव आसते।

एवं स्वभावसिद्धत्वादेव कस्यचित् स्थाने अनेकादेशप्रसङ्गे आदेशेषु मध्ये य आदेशः स्थानिनोऽन्तरतमः स एव भवेत्, नासदृशोऽपि[1307]। यथा सभायामास्यतामित्युक्ते हि पण्डिताः पण्डितैः सह समासते, शूराः शूरैः, कवयः कविभिः, न तु सङ्करेण। एवं गवां सङ्घं प्रति गौर्धावति, अश्वोऽश्वानाममित्यादिव्यवस्था तिर्यक्ष्वपि दृश्यते। तस्मात्प्रथमवाक्यार्थस्य लोकत एव लाभान्न तदर्थं सूत्रमारम्भणीयम्। एवं ' स्थानत आन्तर्यं बलीयः ' इत्यपि लोकत एव सिद्धम्। तथाहि भूयः सहचरितयोरश्वयोर्गवोर्वा सजातीयान्तरसंवलने सत्यपि कृशत्वपाण्डुत्वादिगुणसदृशानपि हित्वा स्थानसाम्यपुरस्कारेणैव परस्परापेक्षा दृश्यते। तदेवं लोकतः सिद्धे किं वचनेनेति[1308]। यथा लोके विच्छिन्नसाहचर्याणां सादृश्याद्वर्गीभवनं तथा शास्त्रे स्थान्यादेशानां सादृश्याद्वर्गीभवनं सम्भवतीति तदर्थं प्रकृतसूत्रं नावश्यकमिति भावः[1309]।

- **उरण् रपरः – (1-1-50)**

त्रिपदेऽस्मिन् सूत्रे ' उः ' इति ऋशब्दस्य षष्ठ्येकवचनम्। ' ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् ' इति वार्त्तिकेन ऋलृवर्णयोः सावर्ण्यात् " आदिरन्त्येन सहेता "[1310] इति सवर्णग्राहकसूत्रेण त्रिंशतः

[1306] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे

[1307] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[1308] शब्दकौस्तुभः – प्रकृतसूत्रे

[1309] भाष्यम् – तत्त्वालोकः – प्रकृतसूत्रे

[1310] अष्टाध्यायी – (1-1-71)

सञ्ज्ञात्वात् ऋपदेन अष्टादशानामृकाराणाम्, द्वादशानाम् लृकाराणाञ्चोपस्थितिः । ‘ उः ’ इति षष्ठी स्थानपदार्थनिरूपितसम्बन्धार्थिका । विधौ परिभाषोपतिष्ठते नानुवादे इति परिभाषया ‘ उः ’ इत्यत्र षष्ठ्याः उद्देश्यगतत्वेन “ षष्ठी स्थानेयोगा ”[1311] इति सूत्रस्याप्रवृत्त्या स्थानपदार्थनिरूपितसम्बन्धार्थिका न स्यादिति चेन्न, तस्याः परिभाषायाः “ इको गुणवृद्धी ”[1312], “ अचश्च ”[1313] इत्येतन्मात्र-विषयकत्वेनान्यत्राप्रवृत्तेः । तत्रापि ‘ विधीयते ’ इति पदाध्याहारेण दोषाभावात् । अत एव षष्ठी स्थानेयोगा इति परिभाषायाः उपस्थितौ बाधकाभावात् ।

अनुवादेऽपि प्रवृत्तिस्वीकारे महावैयाकरणः नागेशः प्राह लघुशब्देन्दुशेखरे – “ षष्ठी स्थानेयोगा ” इति परिभाषया लब्धम्, “ उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ”[1314] इतिवत्[1315] । अस्यायं भावः - “ उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ” इति सूत्रेण उदात्तस्य स्थाने, स्वरितस्य स्थाने च यो यण् ततः परस्य अनुदात्तस्य स्वरितो विधीयते, अनूद्यमाने अनुदात्ते विशेषणीभूते यणि विशेषणीभूतयोः उदात्तस्वरितयोः इत्यत्र “ षष्ठी स्थानेयोगा ” इति परिभाषया स्थाननिरूपितसम्बन्धार्थलाभस्य इष्टत्वात् । तथैव अत्रापि तल्लाभात्[1316] ।

यद्वा “ षष्ठी स्थानेयोगा ” इति सूत्रात् एकदेशे स्वरितत्वात् ‘ स्थाने ’ इत्यनुवर्तते । ननु “ स्थानेऽन्तरतमः ” इति सूत्रात् अनुवर्तितस्थानपदस्य तृतीयान्तेन विपरिणामात् स्थानेन - कण्ठ-ताल्वादिना इत्यर्थसम्पादकतया तस्य प्रकृतानुपयोगित्वं स्यादिति चेन्न, “ स्थानेऽन्तरतमः ” इति सूत्रे ताल्वादिपरत्वेन व्याख्यातस्यापि स्थानशब्दस्यात्र शब्दाधिकारेण लक्षणया वा प्रसङ्गपरतया व्याख्यानात् । अत एवात्र सूत्रे “ स्थानेऽन्तरतमः ” इति सूत्रात् स्थाने ग्रहणमनुवर्तते “ षष्ठी स्थानेयोगा ” इति सूत्राच्च स्थाने ग्रहणमनुवर्तते स्थाने स्थाने इत्येकस्यानुवादेऽपि स्थान सम्बन्धलाभः फलम्, अपरस्य लक्षणया प्रसङ्गावस्थाकालबोधः फलं तथा च ऋकारस्य लृकारस्य च स्थाने विधीयमानोऽण् प्रसङ्गकाले रपरो भवतीति सूत्रार्थो निष्पन्नः । प्रसङ्गः – प्राप्तिः । ‘ र ’ इति प्रत्याहारः । ‘ ऋ ’ इति त्रिंशतः सञ्ज्ञा । आन्तरतम्यात् ऋकारस्थानीयो रपरः, लृकारस्थानीयस्तु लपर इति व्यवस्था ।

[1311] अष्टाध्यायी – (1-1-49)

[1312] अष्टाध्यायी – (1-1-3)

[1313] अष्टाध्यायी – (1-2-28)

[1314] अष्टाध्यायी – (8-2-4)

[1315] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

[1316] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे

अतः महावैयाकरणः भट्टोजिदीक्षितोऽप्याह – ‘ ऋ इति त्रिंशतः सञ्ज्ञेत्युक्तम् । तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते ’[1317] । काशिकाकारोऽपि प्रोक्तवान् – ‘ ऋवर्णस्य स्थानेऽण् प्रसज्यमान एव रपरो वेदितव्यः ’[1318] । उभाभ्यां सूत्राभ्यां ‘ स्थाने ’ इति पदस्यानुवृत्तिः भगवता भाष्यकारेणापि भाष्ये स्वीकृता । ‘ सिद्धं तु प्रसङ्गे रपरत्वात् ’ इति वार्तिकस्य व्याख्यानं कुर्वता भगवता भाष्यकारेणोक्तम् – ‘ सिद्धमेतत् । कथम् ? प्रसङ्गे रपरत्वात् । उः स्थानेऽण् प्रसज्यमान एव रपरो भवति । किं वक्यव्यमेतत् ? न हि । कथमनुच्यमानं गंस्यते ? स्थाने इति वर्तते । स्थानशब्दश्च प्रसङ्गवाची । यद्येवमादेशोऽविशेषितो भवति । आदेशश्च विशेषितः । कथम् ? द्वितीयं स्थानग्रहणं प्रकृतमनुवर्तते । तत्रैवमभिसम्बन्धः करिष्यते – ‘ उ स्थाने अण् स्थाने ’ इति । उः प्रसङ्गे अण् प्रसज्यमान एव रपरो भवति ’[1319] ।

‘ अर् ’ इत्यस्यानेकाल्त्वात्सर्वादेशप्रसङ्गः स्यादिति चेन्न, पूर्वपरसवर्णयोरेव सर्वस्थानित्वेनादोषात्, न च “ ॠत इत् धातोः ”[1320] इत्यादौ तदन्तस्थले सर्वादेशापत्तिः, निर्देश्यमानपरिभाषया ऋकाररूप-निर्दिश्यमानस्यैवादेशात् । यद्वा यदा ऋकारस्थानेऽण् तदा रपरः यदा रपरस्तदा अनेकाल्त्वात्सर्वादेशः केन स्यात् आदेशस्तु जात इति जातसंस्कारविरोधात्, ऋकारस्थानिकत्वमुपजीव्य जायमानो रपरः न ऋकारस्थानिकत्वं विहन्यादित्युपजीव्यविरोधाच्च । तदुक्तं स्थानेऽन्तरतमसूत्रे वार्त्तिककृता ‘ सर्वादेश-प्रसङ्गस्त्वनेकाल्त्वात् । न वाऽनेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्याविघातः ’[1321] ।

ननु अवर्णऋवर्णयोर्गुणे प्रसज्यमाने कस्याप्यन्तरतमस्याभावेन सामर्थ्यात्सर्वेषामेव-प्रवृत्तेरौचित्यात्पर्य्यायेण सर्वे गुणा भवन्तीति चेन्न, “ आद्गुणः ”[1322] इति सूत्रेण अवर्णादिकि परे पूर्वपरयोर्गुणो विधीयते, एचि परे “ वृद्धिरेचि ”[1323] इति सूत्रेण गुणस्य बाधात् , अकारादकारे परे “ अकः सवर्णे दीर्घः ”[1324] इति सूत्रेण पूर्वपरयोः दीर्घो विधीयते, अनेन दीर्घेण गुणस्य बाधात् । तथा च इकारे उकारे च परे आन्तरतम्याद् एकार ओकारश्च चरितार्थः । अकाराद् ऋकारे परे, लृकारे वा परे ऋकारलृकारयोस्तुल्यः कोऽपि गुणो नास्ति । अकाररूपगुणस्य कश्चन स्थानी नास्ति इत्यान्तरतम्याभाव

[1317] वैयाकरणसिद्धान्तकौमुदी – प्रकृतसूत्रे

[1318] काशिका – प्रकृतसूत्रे

[1319] भाष्यम् – प्रकृतसूत्रे

[1320] अष्टाध्यायी – (7-1 -100)

[1321] भाष्यम् – (1-1-50)

[1322] अष्टाध्यायी – (6-1-86)

[1323] अष्टाध्यायी – (6-1-87)

[1324] अष्टाध्यायी – (6-1-99)

एव उभयोः सादृश्यम् इति मत्वा ऋकारलृकारयोरकार एव गुणः स्यात् । तदाह भाष्ये भगवाञ्च्छ्रीपतञ्जलिः – ‘ अनान्तर्य्यमेवानयोरान्तर्यम् ’ । ‘ नष्टाश्वदग्धरथवत् ’[1325] इति ।

भाष्यकारस्यायं भावः – त्रिषु गुणेषु प्रसज्यमानेषु अकारस्य अणो रेफलकारशिरस्कतया तस्य ‘ अर् अल् ’ इत्येवमात्मकस्य अकारांशे स्थानिभूतेन अकारेण, रेफांशे ऋकारेण, लकारांशे लृकारेण च स्थानसाम्यादकारऋकारयोः स्थाने अरेव भवति, अकारलृकारयोः स्थाने अलेव भवति । एकारौकारौ तु गुणौ न भवत एव, तयोः ऋकारेण लृकारेण च स्थानसाम्याभावादित्यर्थः[1326] । यद्वा साम्भावनिकात् कण्ठमूर्द्धस्थानत्वेन आन्तरतम्यादकारो गुणः । यदि अकारऋकारयोः स्थाने अकारो गुणः स्यात्तदा अणत्वात् ‘ अ ’ इति गुणो रपरत्वेन स्थानिसदृशः स्यात् । एकार ओकारो वा नाण्, “ अणुदित्सवर्णस्य चाप्रत्ययः ”[1327] इति सूत्रं विहाय सर्वत्र पूर्वणकारेणैवाण्प्रत्याहारो गृह्यते, “ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ”[1328] इति सूत्रे ‘ प्रशास्तॄणाम् ’ इति दीर्घस्य ऋकारस्य निर्देशात् “ उरण् रपरः ” इति सूत्रे अण्प्रत्याहारः पूर्वेणैव णकारेण गृह्यते, न परेण । अन्यथा ऋकारस्य स्थाने जायमानदीर्घस्यापि अण्त्वेन रपरत्वं स्यात् । तथा च तस्य श्रवणं प्रसज्येत तदा प्रशास्तॄणाम् इति निर्देशोऽसङ्गतः स्यात् । पूर्वेण णकारेण अणो ग्रहणे तु ऋकारस्य अण्त्वाभावादिति नास्ति साम्भावनिकं तुल्यत्वं तयोरिति न त्वयवादेशौ अकारऋकारयोः[1329] ।

न च क्रियते इत्यादौ “ रिङ् शयग्लिङ्क्षु ”[1330] इत्यनेन रिङादिष्वण् रपरः कुतो नेति वाच्यम् । अनादेशत्वात्, आदेशत्वं हि समुदाये विश्रान्तम् ।

नन्वेवं कृष्णर्द्धिरित्यादौ पूर्वपरसमुदायस्य स्थानित्वेन ऋकारस्यैव स्थानित्वाभावाद् रपरत्वं न स्यादिति चेन्न, “ एकः पूर्वपरयोः ”[1331] इति सूत्रे पूर्वपरयोरिति द्विवचननिर्देशेन सहितयोरवयवयोरेव स्थानित्वात् । तदुक्तं भाष्ये – ‘ यो ह्युभयोः स्थाने भवति लभतेऽसावन्यतरतो व्यपदेशम् ’ इति । अत एव भिन्नादिष्विव द्वयोः स्थानिनोर्द्वावादेशौ मा भूतामित्येकग्रहणम् ।

[1325] भाष्यम् – (1-1-50)

[1326] वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

[1327] अष्टाध्यायी – (1-1-69)

[1328] अष्टाध्यायी – (6-4-11)

[1329] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1330] अष्टाध्यायी – (7-4-28)

[1331] अष्टाध्यायी – (6-1-83)

‘ रपरः ’ इत्यत्र रःपरो यस्येत्येवं बहुव्रीहिसमासः । तत्र रः = रकारो लकारो वा परः = परत्वविशिष्टोऽवयवो यस्याणः स रपरोऽण् । अत एवाह लघुशब्देन्दुशेखरे नागेशः – अत एव “ रदाभ्यां निष्ठातो नः पूर्वस्य च दः ”[1332] इति सूत्रे, “ थलि च सेटि ”[1333] इति सूत्रे च भाष्ये – ‘ गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसञ्ज्ञकोऽभिनिर्वर्तते ’ इत्युक्तम् । अस्यायं भावः - ‘ रेफः शिरसि यस्य स रेफशिरा ’ इत्यर्थकः रेफशिरा गुणवृद्धिसञ्ज्ञकः इत्यर्थः । ‘ उः स्थानेऽण् प्रसज्यमान एव रपरो भवति, पूर्वभक्तश्च रेफ इत्यर्थः ’ इति कैयटः[1334] । पूर्वभक्तः = पूर्वस्यावयव इत्यर्थः । अत ‘ ऋवर्णस्यान्तर्य्यतो रेफवतो रेफवानकार एवान्तरतमो भवति ’[1335] इति भाष्यं संगच्छते । अकारावयवत्वं रेफे आरोपितं न तु वास्तविकम्, वर्णस्य वर्णान्तरावयवत्वाभावात् । अत एव ‘ वव्रे ’ इत्यादौ “ हलादिः शेषः ” (7-4-60)सिद्धिः, अभ्यासावयवस्यैवानादेस्तेन निवृत्तेः[1336] । अस्यायं निष्कर्षः - ‘ वव्रे ’ इत्यत्र वृधातोर्लिटि द्वित्वे “ उरत् ”[1337] इति सूत्रेण अत्वे रपरत्वे च “ हलादिः शेषः ” इति सूत्रे आदिशब्दस्य अवयववाचित्वेन तेन सूत्रेण आद्यवयवस्य हलः सत्त्वे तदतिरिक्तस्याभ्यासघटकस्य हलः अवयवस्यैव निवृत्तौ रेफस्यापि निवृत्तौ ‘ वव्रे ’ इत्युपपद्यते । रेफस्य अवयवत्वाभावे तु तस्य निवृत्तिर्न प्राप्नोतीति रेफस्य अभ्यासे श्रवणं प्रसज्येत इति[1338] ।

भगवाञ्छ्रीपतञ्जलिः भाष्येऽस्य सूत्रस्य रपरत्वमात्रविधायकत्वस्य प्रतिपादनं सिद्धान्ततया अकार्षीत् । तथाहि – एतत्सूत्रविषये पक्षद्वयं सम्भावितम् –

1. किमेतत् आदेशान्तराणां बाधकमणं निर्वर्तयति, तस्य च वाक्यभेदेन रपरत्वं विदधाति ? ।

2. आहोस्विद्रपरत्वमात्रमनेन क्रियते, उः स्थाने लक्षणान्तरेण निष्पन्नो योऽण् स रपरः ?[1339] ।

यद्यपि भाष्येऽत्र पक्षद्वयमेवोपस्थापितम्, किन्तु न्यासकृता त्रयः, शब्दकौस्तुभकृता पदमञ्जरीकृता व्याकरणसिद्धान्तसुधानिधिकृता च चत्वारः पक्षा अत्र सम्भाविताः । तथाहि – न्यासोक्तास्त्रयः पक्षा एवं सन्ति –

1. उः स्थानेऽण् रपरत्वञ्चानेनोभयं विधीयते इत्येकः पक्षः ।

[1332] अष्टाध्यायी – (8-2-42)
[1333] अष्टाध्यायी – (6-4-121)
[1334] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे
[1335] भाष्यम् – (1-1-50)
[1336] लघुशब्देन्दुशेखरः - प्रकृतसूत्रे
[1337] अष्टाध्यायी – (7-4-66)
[1338] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे
[1339] भाष्यम् – प्रदीपः – प्रकृतसूत्रे

2. लक्षणान्तरेण विहितस्याण उः स्थाने पश्चादनेन रपरत्वमात्रं क्रियते इति द्वितीयः पक्षः ।

3. उः स्थाने लक्षणान्तरेण विधीयमानोऽण् विधानकाल एव तेन लक्षणान्तरेण सह संहत्य रपरत्वविशिष्टोऽनेन भाव्यते इति तृतीयः ।

अत्रैव शब्दकौस्तुभादावुक्ताश्चत्वारः पक्षाश्चेवं वर्तन्ते –

1. उः स्थाने रपरत्वविशिष्टोऽण् विधीयते इति प्रथमः पक्षः ।

2. अणामनणां च प्रसङ्गेऽणेवेति नियमः, स च रपर इति वाक्यभेदेन रपरत्वं विधीयते इति द्वितीयः पक्षः ।

3. उः स्थाने योऽणित्यनूद्य तस्य रपरत्वं विधीयते इति तृतीयः पक्षः ।

4. प्रसङ्गावस्थायामेव रपरत्वं विधीयते इति चतुर्थः ।

शब्दकौस्तुभपदमञ्जरीव्याकरणसिद्धान्तसुधानिधिषु यो द्वितीयपक्षः, स न्यासोक्तपक्षत्रयातिरिक्तः । एषां प्रथमतृतीयतुरीयाश्च पक्षा न्यासोक्तप्रथमद्वितीयतृतीयपक्षैः सह क्रमेण तुल्यार्थका एव । भाष्ये तु द्वावेव पक्षौ समुपस्थापितौ । तत्र हि शब्दकौस्तुभाद्युक्तप्रथमयोः पक्षयोर्भाष्ये प्रथमपक्षे एवान्तर्भावः । एवं तत्रत्यतृतीयतुरीयपक्षयोश्च प्रथमतो भाष्ये द्वितीये पक्षेऽन्तर्भावरूपेणोपस्थापनम्, पश्चात् शब्दकौस्तुभाद्युक्ततुरीयपक्षस्य भाष्ये द्वितीयपक्षरूपेण सिद्धान्तस्थापनम् । न्यासेऽपि शब्दकौस्तुभाद्युक्तद्वितीयपक्षस्य प्रथमपक्षे एवान्तर्भावं मत्वा पक्षत्रयोपस्थापनम्[1340] ।

1. प्रथमः पक्षः – तत्राद्ये पक्षे षष्ठीनिर्दिष्टमात्रस्य भवन्नादेशोऽन्तरतमः स्यात्, ऋवर्णस्य त्वण् रपर इति । ततश्च नाप्राप्तेषूदात्तादिषु विहितोऽण् तेषां बाधकः स्यात् । तथा च ‘ कृति ’ इत्यत्र “ ञ्नित्यादिर्नित्यम् ”[1341] इत्युदात्तो न स्यात् । ‘ प्रकृतम्, प्रहृतम् ’ इत्यत्र “ गतिरनन्तरः ”[1342] इति प्रशब्दस्योदात्तत्वे शेषनिघातः उदात्तादनुदात्तस्य इति स्वरितश्च न स्यात् । ‘ नॄँः पाहि ’ इत्यत्रानुनासिको न स्यात् । सर्वत्र तत्तद्गुणावच्छिन्नस्य रपरस्याणः प्रसङ्गात् । ऋकारस्य चाण्त्वाभावात् । ‘ नॄन् ’ इत्यत्र दीर्घोऽपि न स्यादिति कुतो नोक्तमिति वाच्यम् । “ नॄन्पे ”[1343] इति सूत्रनिर्देशात्तत्सिद्धेः । किञ्च ‘ कर्ता, कारकः ’ इत्यत्र गुणवृद्धिबाधेन विहितोऽण् कदाचिदिकार उकारश्च स्यात् । अकार एवेतिनियमाभावात्

[1340] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[1341] अष्टाध्यायी – (6-1-194)

[1342] अष्टाध्यायी – (6-2-49)

[1343] अष्टाध्यायी – (8-3-10)

। “ ऋत इद्धातोः ”[1344], “ उदोष्ठ्यपूर्वस्य ”[1345] इति प्रतिपदोक्तेषु इत्वोत्वादिषु च रपरत्वं न स्यात् । तेषामेतद्बाधकत्वात् ।

2. द्वितीयः पक्षः – अणनणोः प्रसङ्गेऽणेवेति नियमात् ‘ कर्ता, कारकः ’ इत्यादौ गुणवृद्ध्योर्दोषाभावात् । ननु ह्रस्व ऋकारस्य सर्वा वृद्धिरनन्तरतमा, वृद्धिमात्रस्य द्विमात्रत्वात्, दीर्घस्य तु सर्वाऽपि प्रमाणतोऽन्तरतमेति अविशेषादुभयस्थले सकलवृद्धिप्रसङ्गेऽणेवेति नियमोऽस्तु । गुणस्थले तु ह्रस्वस्य ऋकारस्य ‘ कर्ता ’ इत्यादौ मात्रिकत्वादकार एवान्तरतमः, ‘ तरिता ’ इत्यादौ दीर्घस्य तु द्विमात्रत्वादेङेवान्तरतमः इति उभयत्राप्यणनणोर्व्यवस्थयैव प्राप्त्या उभयत्रोभयोरप्रसक्त्या नियम-प्रवृत्त्यभावे दीर्घस्य ऋकारस्य विधीयमानो गुण एङेव स्यात् । ह्रस्वस्य त्वकारो भवन्नपि रपरो न स्यात् । अणनणोः प्रसक्तावणेवेति यो नियम्यते, तस्यैव द्वितीयेन रपरत्वविधानात् । तस्माद् गुणे दोषो दुर्वार इति चेत् सत्यम्, स्थानेऽन्तरतमपरिभाषाया अवकाशः “ चजोः कु घिण्ण्यतोः ”[1346] इत्यादिः, एतस्यास्तु वृद्धिविधिः, गुणे तूभयप्रसङ्गे परत्वादियमेवेति दोषाभावात् । सत्यम्, उदात्तादिषु प्रतिपदोक्तेषु च दोषतादवस्थ्यात् ।

3. तृतीयः पक्षः – अन्तरतमपरिभाषासंस्कृतैरुदात्तादिविधिभिस्तत्तद्गुणावच्छिन्नस्य ऋकारस्यैव विधानात् तस्य चाण्त्वाभावेन रपरत्वप्रसक्त्यभावात् । प्रतिपदोक्तेषु इत्वादिष्वपि न दोषः । ऋकारस्थानीयाण्त्वस्य तत्रापि सत्त्वात् ‘ किरति ’ इत्यादिषु रपरत्वसिद्धेः । मैवम्, गुणवृद्ध्योर्दोषस्य सत्त्वात् । ‘ कर्ता ’ इत्यत्र मात्रिकस्य ऋकारस्य मात्रिकत्वादकारे गुणे रपरत्वे च दोषाभावेऽपि ‘ तरिता ’ इत्यादौ द्विमात्रस्य दीर्घस्य स्थाने तादृशस्यैङ एव प्रसङ्गात् । वृद्धिस्थले तु पूर्वोक्तरीत्या वृद्धिमात्रस्य ह्रस्वान्तरतम्याभावात् दीर्घान्तरतम्याच्चोभयत्रापि त्रिविधवृद्धिप्रसङ्गे ‘ कारः, तारः ’ इत्यादिसिद्धावपि पक्षे ऐचोऽपि प्रसक्त्या ‘ कायः, कावः, तायः,तावः ’ इत्यादेरनिष्टस्यापि प्रसङ्गात् ।

4. चतुर्थः पक्षः – पूर्वसूत्रे अनान्तर्यमेवैतयोरान्तर्यम् संप्रयोगो वा नष्टाश्वदग्धरथवत् इति भाष्यवार्तिककृद्भ्यामुक्तत्वाददुष्ट एवायं पक्षः । तथा हि – एकस्यान्तरतमा प्रकृतिर्नास्ति अपरस्यान्तरतम आदेशो नास्ति अतोऽनुरूपप्रतिसम्बन्धिराहित्यरूपधर्मेणैवान्तरतम्यनिर्वाहः । नहि चतुर्विधमेवान्तर्यमिति नियमः । मुनित्रयानुक्तेः । प्रत्युत् ‘ सोष्मणः सोष्माणः ’ इति भाष्यादौ स्वीकारात् । संप्रयोग इत्यादेस्त्वयमर्थः – “ स्थानेऽन्तरतमः ” इत्यस्य प्रत्याख्यानपक्षेऽपि उभयोरनुरूपप्रतियोगि-

---

[1344] अष्टाध्यायी – (7-1-100)

[1345] अष्टाध्यायी – (7-1-102)

[1346] अष्टाध्यायी – (7-3-52)

रहितत्वात् परस्परापेक्षामूलकः स्थान्यादेशभाव इति । उच्यते – ऋत्वजात्यवच्छिन्नस्य स्थानिनोऽत्वजात्यवच्छिन्नस्य चादेशस्योक्तान्तरतम्यराहित्येऽपि व्यक्तिपुरस्कारेणान्तरतम्यपरीक्षायां दोषस्योद्धटत्वात्। ऋवर्णस्य मात्रिकस्य तादृशोऽकारोऽन्तरतमः, द्विमात्रस्य त्वेकारौकारौ इति अनुरूप-प्रतियोगिकत्वस्य सुलभत्वात्। " स्वतन्त्रः कर्ता "[1347] इति निर्देशान्न विनिमयः। " ग्रो यङि "[1348], " अचि विभाषा "[1349] इत्यारम्भाच्च न विकल्प इति कल्पनेऽपि गौरवात्। तस्माच्चतुर्थो निर्दोषः। तदुक्तं – सिद्धन्तु प्रसङ्गे रपरत्वादिति। विधिवाक्यस्यैकवाक्यताविधानकाले एव अणो रपरत्वमित्यर्थः[1350]। यथा चैतदर्थलाभस्तथा भाष्यप्रमाणपुरस्सरं पूर्वमेव प्रत्यपादि।

- **' रपरः ' इत्यत्र ' र ' इति प्रत्याहारविषये खण्डनमण्डनम्**

' लण् सूत्रेऽकारश्च ' इति वाक्यं श्रीमता भट्टोजीदीक्षितेन सिद्धान्तकौमुद्यां प्रोक्तम्। वाक्यस्यास्यायमभिप्रायो यल्लण्सूत्रघटकाकारस्येत्सञ्ज्ञा भवतीति। तत्प्रयोजननिरूपणात् पूर्वं तद्वाक्ये प्रमाणनिरूपणमावश्यकम्। अन्यथा – प्रयोजननिरूपणमनर्थकम् भविष्यति। अतो भट्टोजीदीक्षितेन कुत एतदभिप्रायकं वाक्यमधिगतमित्यत्र किमपि विनिगमकं निरूप्यते।

यद्यपि भगवता भाष्यकारेण " तुल्यास्यप्रयत्नं सवर्णम् "[1351] इति सूत्रभाष्ये प्रत्यक्षतया वाक्यमिदं नोक्तम्। तथापि तद्व्याख्याकृता महावैयाकरणेन श्रीमता कैयटेन तद्भाष्यस्य व्याख्यानावसरे स्पष्टतया व्याख्यातं येन वाक्यमिदं दीक्षितेनाधिगतम्।

तद्भाष्यम्, कैयटेन च प्रस्तूयते – तद्यथा सवर्णसञ्ज्ञायाः व्याख्यावसरे भगवता भाष्यकारेण वार्तिकमिदं प्रोक्तम् – ' ऋकारलृकारयोः सवर्णविधिः ' ऋकारलृकारयोः सवर्णसञ्ज्ञायां सत्यां वदति भाष्यकारो यद् – इदमपि सिद्धं भवति ' उपल्कारीयति, उपाल्कारीयति ' अर्थात् " वा सुप्यापिशलेः "[1352] इति सूत्रेण यथा – ऋकारादिसुब्धातौ परतो वृद्धिर्विधीयते। तथैव सावर्ण्यात् लृकारादि-सुब्धातावपि वृद्धिर्भवति, येन ' उपाल्कारीयति ' सिद्धयति।

पुनराशङ्कते भाष्यकारो – यदि ऋकारग्रहणेन लृकारग्रहणं सन्निहितं भवति तदा " उरण् रपरः " इत्यनेन लृकारस्य रपरत्वं प्राप्नोति। अर्थात् ' तवल्कारः ' इत्यत्रापि सावर्ण्यात् रपर एव भविष्यति।

[1347] अष्टाध्यायी – (1-4-54)
[1348] अष्टाध्यायी – (8-2-20)
[1349] अष्टाध्यायी – (8-2-21)
[1350] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे
[1351] अष्टाध्यायी – (1-1-9)
[1352] अष्टाध्यायी – (6-1-91)

एवञ्च ‘ तवल्कारः ’ इति रूपं नैव सेत्स्यति, इत्याशङ्क्य ब्रूते भाष्यकारस्तद्यथा – ‘ लृकारस्य लपरत्वं वक्ष्यामि ’ अत्र भाष्ये ‘ वक्ष्यामि ’ इति भविष्यत् कालावच्छिन्नाक्रिया, किन्तु भगवता भाष्यकारेण कुत्रचिद्भाष्ये कस्मिन्नपि सूत्रे नैव प्रोक्तम् । अतस्तद्भाष्यरहस्यज्ञानाय तद्व्याख्याकृता वैयाकरण-शिरोमणिना कैयटेन किमपि विशिष्टं तद्भाष्यं व्याख्यातं तद्यथा – लपरत्वमिति वक्ष्यामि – व्याख्यास्यामि ‘ रपरः ’ इत्यत्र लकाराकारेण प्रत्याहार आश्रीयते । तस्यायमभिप्रायः – श्रीमता कैयटेन भाष्योक्तं ‘ वक्ष्यामि ’ इति पदस्य ‘ व्याख्यास्यामि ’ इति तात्पर्यमवधारितम् । व्याख्यानाञ्च ‘ र ’ प्रत्याहाराश्रयणरूपं स्वीकृतम् । इदमेव कैयटीयव्याख्यानमाश्रित्य सिद्धान्तकौमुद्यां श्रीमता दीक्षितेन प्रोक्तम् – ‘ लण्सूत्रेऽकारश्चेति ’[1353] ।

‘ र ’ प्रत्याहारसिद्ध्यर्थं सिद्धान्तकौमुद्यां भट्टोजीदीक्षितो ब्रवीति – यल्लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः सञ्ज्ञा । तस्यायं भावः – लण्सूत्रस्थाकार अनुनासिकः तस्मात् “ उपदेशेऽजनुनासिक इत् ”[1354] इति सूत्रेणाकारस्य इत्सञ्ज्ञा भवति । तामित्सञ्ज्ञामादाय “ आदिरन्त्येन सहेता ”[1355] इति सूत्रं प्रवर्तते । तत्र इत्सञ्ज्ञकेन अकारेण (अन्त्येन) सह आदिः = रेफः (हयवरट् – सूत्रस्थः) मध्यगस्य लकारस्य स्वस्य = आदे रेफस्य च बोधको भवति । अर्थात् ‘ हयवरट् ’ सूत्रघटकरेफतः लण्सूत्रघटकाकारं यावत् ‘ र ’ प्रत्याहारो भवति । एवं ‘ र ’ इति प्रत्याहारेण रेफलकारयोः वर्णयोर्बोधो जायते । एतस्य ‘ र ’ प्रत्याहारस्य प्रयोजनन्तु अत्रैव सूत्रे ‘ रपर ’ इति ‘ र ’ प्रत्यहारग्रहणम् । तेन ‘ रपरः ’ इत्यस्य रेफपरो लकारपरश्चेत्यर्थो जायते । अतश्च स्थानकृतान्तर्यात् ऋकारस्य स्थाने जायमानोऽण् रेफशिरस्कः सन् जायते । मूर्धस्थानस्य ऋकारस्य मूर्धस्थानरेफघटितेनाणा सादृश्यात् । लृकारस्य स्थाने च लकारपरोऽण् जायते । दन्त्यस्य लृकारस्य दन्त्यलकारघटितेनाणा सह सादृश्यात् । अत एव ‘ कृष्ण + ऋद्धिः ’ इति अकारस्य ऋकारस्य च स्थाने जायमानो गुण आन्तरतम्याद् ‘ अर् ’ भवति, स्थानिनोः अकारः कण्ठ्यः, ऋकारश्च मूर्धन्यः । आदेशस्थस्य चाकारस्य कण्ठ्यत्वात् रेफस्य मूर्धन्यत्वात् । एवं ‘ तवल्कारः ’ इत्यत्र कण्ठ्यदन्त्ययोरकारलृकारयोः स्थाने कण्ठ्योऽकारो दन्त्य-लकारपर एव आदेशो भवति[1356] ।

[1353] वैयाकरणसिद्धान्तपङ्क्तिप्रकाशिका – (पृ. – 5)

[1354] अष्टाध्यायी – (1-3-2)

[1355] अष्टाध्यायी – (1-1-71)

[1356] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

एवं क्रमेण कैयटादारभ्य दीक्षितं यावत् ‘ र ’ प्रत्याहारः स्वीकृतः प्राचीनैः । अतस्तत्सिद्ध्या ‘ तवल्कारः ’ इत्यत्र लपरत्वं सिद्ध्यतीति भाष्याशयं वर्णयन्ति प्राचीनाचार्याः । तदुत्तरवर्तिभिराचार्यैः लण्सूत्रघटकाकारस्यानुनासिकत्वं नैव स्वीक्रियते, तस्मात् ‘ र ’ प्रत्याहारोऽपि नैवास्ति । ‘ लपरत्वं वक्ष्यामि ’ इति भाष्यस्यास्य भिन्नमाशयमनुवर्णयन्ति तदुत्तराचार्याः ।

भाष्याशयस्तु – भाष्यतत्त्वविदस्तु ‘ लपरत्वं वक्ष्यामि ’ इत्यत्र ‘ वच् ’ पदस्वरस्यात् ‘ ऋलृवर्णयोर्मिथिः ’ इतिवत् उरण् रपरो लपरश्चेति न्यास एव भाष्यतात्पर्यमवधार्य, न्यासेनैव ‘ तवल्कारः ’ इत्यस्य सिद्धिं विधाय कैयटोक्तं ‘ र ’ प्रत्याहारं खण्डयन्ति । अर्थात् ‘ वक्ष्यामि ’ इतिपदस्य यदि व्याख्याने भाष्यतात्पर्यं स्यात्तदा भाष्यकारः परिभाषणार्थकः वच्धातोः प्रयोगं न कुर्यात् । अतो लपरश्चेति वाक्यस्य परिभाषणम् “ उरण् रपरः ” इति सूत्रेऽवश्यं कर्तव्यमिति भावः ।

शेखरकारास्तु ‘ र ’ प्रत्याहारं न मन्यन्ते । स्वमतस्यायमाशयः – यदि लण्सूत्र-घटकोऽकारेऽनुनासिकः स्यात् तदा उक्तरीत्या “ अतो ल्रान्तस्य ”[1357] इत्यत्र रप्रत्याहारबोधकर-शब्दोपादानेन रलयोर्बोधसम्भवात् पृथक् लकारोपादानं किमर्थं सूत्रे कृतमिति तत्सामर्थ्यात् निश्चीयते – नानुनासिकत्वेनेत्सञ्ज्ञकोऽकारः । अतो रप्रत्याहाराभावात् रलयोरुपादानं सूत्रे चरितार्थम् । किञ्च, यदि पूर्वोक्तदिशा रप्रत्याहारः स्वीक्रियेत, तदा “ इको यणचि ”[1358] इति सूत्रे यण्पदमपहाय यप्रत्याहारेण सूत्रकारो व्यवहरेत् ।

तथा च उत्वे गुणे पूर्वरूपे च कृते “ इको योऽचि ” इति सूत्रस्वरूपे णकारानुच्चारणेन अर्धमात्रायाः लाघवमिति कथं न ईदृगेव सूत्रं रचितम् । तेन रप्रत्याहारसाधकं लकाराकारस्यानुनासिकत्वं नेति ज्ञायते । किञ्च अनुबन्धानामच्प्रत्याहारे ग्रहणाभावे ‘ आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ’ इति भाष्योक्तस्य तृतीयहेतोरव्यापकत्वापत्तिः । तस्मादस्यानुनासिकत्वमप्रामाणिकम् । “ उरण् रपरः ” इत्यत्र लग्रहणं कर्तव्यमेव[1359] इत्येवं खण्डनप्रकारेऽनेके पक्षाः लघुशब्देन्दुशेखरे भट्टनागेशेनोपस्थापिताः ।

तस्यायमाशयः – यदि तु “ रदाभ्यां निष्ठातो नः पूर्वस्य च दः ”[1360], “ रषाभ्यां नो णः समानपदे ”[1361] इत्यादाविव “ उरण् रपरः ” इत्यत्र रेफोत्तरोऽकार उच्चारणार्थ एव, ‘ लण् ’ इति सूत्रेऽकारस्य

[1357] अष्टाध्यायी – (7-2-2)

[1358] अष्टाध्यायी – (6-1-76)

[1359] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

[1360] अष्टाध्यायी – (8-2-42)

[1361] अष्टाध्यायी – (8-4-1)

इत्त्वाभावेन रप्रत्याहारो नास्तीत्युच्यते तदा ‘ लपरत्वं वक्ष्यामि ’ इति भाष्यप्रामाण्यात् “ उरण् रपरः ” इत्यत्र ‘ लपरः ’ इति वक्तव्यम् । लृकारस्थाने योऽण् स प्रसङ्गकाले रपरो लपरश्च भवतीत्यर्थः ।

- **अलोऽन्त्यस्य – (1-1-51)**

अत्र “ षष्ठी स्थानेयोगा ”[1362] इति सूत्रमनुवर्तते । षष्ठी, स्थाने इत्युभयम् “ षष्ठी स्थानेयोगा ”, “ स्थानेऽन्तरतमः ”[1363] इति द्वयाद् यथाक्रममनुवर्तते इति वैद्यनाथः । षष्ठी स्थाने अत्र समस्तत्वेन स्थान-पदस्यानुवृत्तौ क्लेश इति तदाशयः । अनुवर्तमानं षष्ठीपदञ्च तृतीयया विपरिणम्यते । विधीयमान आदेश इत्यध्याह्रियते । ‘ अन्त्यस्य ’ इत्यनिर्धारितसम्बन्धार्थिका षष्ठी । अतः ‘ स्थाने ’ इत्युपतिष्ठते । ‘ अलः ’ इति च ङसन्तम् । तत्रैवान्त्यस्येति विशेषणम् । षष्ठीनिर्दिष्टस्य य आदेश उच्यते, सोऽन्त्यस्यालः स्थाने स्यादित्यर्थ उपलभ्यते । ‘ अल् ’ इति च ‘ अइउण् ’ सूत्राकारमारभ्य हल्सूत्रलकारान्तवर्णवाचकः प्रत्याहारः । उदाहरणञ्च – द्यौः, सः, पञ्चगोणिः ।

ननु स्थानेपदानुवृत्तिः किमर्थाः ? तथा सति षष्ठ्या निर्देशेन विधीयमानस्य आदेशमात्रस्य ग्रहणे भूधातोस्तृचि “ आर्धाधातुकस्येड्वलादेः ”[1364] इत्यनेन सूत्रेण विधीयमान इडपि अन्त्यस्य एतत्सूत्रबलादवयवः प्राप्नोति । अतद्वारणाय स्थाने पदानुवृत्तौ स्थाने विधीयमानत्वाभावात् इड्विधौ नास्याः प्रवृत्तिः । इटः इत्सञ्ज्ञकटकारकरणात् अवयवत्वबोधनात् स्थानषष्ठी आर्धधातुकस्य इत्यत्र नास्तीति मन्यते ।

ननु ‘ अलः ’ इति जसन्तं मत्वा स्थानषष्ठ्या विधीयमानोऽल्रूप आदेशोऽन्त्यस्य स्थाने भवतीत्युच्यते । बहुत्वन्त्वविवक्षितम् । अनेकाल्सूत्रेऽनेकाल्ग्रहणं न कर्तव्यम्, अनेकालादेशस्य अल्रूपादेशत्वाभावात्स्वत एव सर्वादेशत्वसिद्धेः । न चैवम् पादस्य लोपः इत्याद्यभावरूपादेशेषु एतदप्रवृत्त्या सर्वादेशत्वापत्तिः, “ लुग्वा दुहदिहलिहगुहात्मनेपदे दन्त्ये ”[1365] इति सूत्रे “ घोर्लोपो लेटि वा ”[1366] इत्यतो ‘ लोप ’ इत्यनुवर्तमाने लुग्ग्रहणं सर्वस्य क्सस्य लोपार्थम् । अधुना अभावादेशस्य सर्वादेशत्वसिद्धौ लुग्ग्रहणसामर्थ्येन ‘ अलोऽन्त्यस्य ’ इति सूत्रेऽल्ग्रहणस्थाने लादेशभिन्नसर्वादेश-

---

[1362] अष्टाध्यायी – (1-1-49)
[1363] अष्टाध्यायी – (1-1-50)
[1364] अष्टाध्यायी – (7-2-35)
[1365] अष्टाध्यायी – (7-3-73)
[1366] अष्टाध्यायी – (7-3-70)

परकत्वज्ञापनेनादोषात्तदा अन्त्यपदेन परस्यापि ग्रहीतुं शक्यतया ‘ परमानडुद्भ्याम् ’ इत्यादौ अन्त्यस्य अनडुदित्यस्यापि “ वसुस्रंसुध्वंस्वनडुहां दः ”[1367] इति सूत्रेण दकारादेशापत्त्या अन्त्यस्यालूपस्यैव ग्रहणार्थम् ‘ अलः ’ इति षष्ठ्यन्तं बोध्यम् । ‘ अलः ’ इति षष्ठ्यन्तमेव, अन्त्यस्येत्यनेन सामानाधिकरण्यस्य सम्भवे वैयधिकरण्यस्यान्याय्यत्वादिति भावः । ‘ अलः ’ इत्यस्य षष्ठ्यन्तत्वेऽपि “ ङिच्च ”[1368] इत्यस्यानेकालादेशोऽन्त्यस्य चेत् ‘ ङिदेव ’ इति नियमेन सिद्धेऽनेकाल्ग्रहणं व्यर्थमित्यपि न, ‘ रामैः ’ इत्यादौ “ आदेः परस्य ”[1369] इति सूत्रस्य बाधनाय उभयपक्षेऽपि तदाश्यकत्वात् । स्थानषष्ठ्या विधीयमान इत्युक्त्या ‘ भविता ’ इत्यादौ तृच ऋकाररूपान्त्यस्याद्यवयवस्य “ आर्धधातुकस्येड् वलादेः ” इतीण् न । अन्त्यस्याल इत्युक्त्या ‘ अनडुद्भ्याम् ’ इत्यादौ ‘ डुह् ’ इत्यस्य ‘ डुह् ’ इत्यादेर्यस्य कस्यचनान्त्यभागस्य लोपो न । पदस्येत्यधिकारात् ‘ परमानडुद्भ्याम् ’ इत्यादावन्त्यस्य पदस्य लोप इति तु न, ‘ उत्तरपदत्वे ’ इत्यनेन प्रत्ययलक्षणनिषेधेन पदत्वाभावात् । “ त्यदादीनामः ”[1370] यः, सः, इत्याद्युदाहरणम् । स्थानषष्ठी अस्या लिङ्गम्[1371] ।

- **ङिच्च – (1-1-52)**

ङ् इद् यस्यादेशस्य स ङित् इति बहुव्रीहिसमासः । “ अलोऽन्त्यस्य ” इत्यनुवर्तते । चोऽप्यर्थे । अपिना पूर्वादेशस्य समुच्चयः । वस्तुतो व्यर्थ एव, समुच्चये फलाभावात् । सूत्रार्थः – षष्ठीनिर्दिष्टस्य यो ङिदादेशः, सोऽन्त्यस्यालः स्थाने भवतीति । “ अनेकाल्शित् सर्वस्य ” इति वक्ष्यति, तस्यायं पुरस्तादपवादः । अपोद्यते बाध्यते अनेनेति अपवादः । बाहुलकात् हलश्च इति सूत्रेण करणे घञ् । योगरूढोऽयम् । ‘ येन नाप्राप्ते यो विधिरारभ्यते स तस्यापवादः ’ इत्यपवादलक्षणम् । तद्विषये यत्कर्तृकावश्यप्राप्तिः स उत्सर्गः । अपवाद उत्सर्गस्य बाधकः । ‘ प्राप्ते ’ इत्यत्र भावे क्तः । न प्राप्ते इति अप्राप्ते । ‘ न अप्राप्ते ’ इत्युक्ते प्राप्ते इति लभ्यते । तथा च प्राप्ते इत्येव वक्तव्ये न नञ् इतिपदद्वयमावश्यकत्वद्योतकम् । ‘ नाप्राप्ते ’ न अप्राप्तम्, नाप्राप्तम्, “ सह सुपा ”[1372] इति सूत्रेण नशब्देन समासः नञोऽभावान्नलोपो न । ‘ येन ’ इति कर्तरि तृतीया

[1367] अष्टाध्यायी – (8-2-72)
[1368] अष्टाध्यायी – (1-1-53)
[1369] अष्टाध्यायी – (1-1-54)
[1370] अष्टाध्यायी – (7-2-102)
[1371] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे
[1372] अष्टाध्यायी – (2-1-4)

। यत्कर्तृकावश्यप्राप्ते सति योऽन्यो विधिः आरभ्यते स आरभ्यमाणविधिस्तस्य = अवश्यं प्राप्तस्य बाधको भवति । यस्मिंस्तु प्राप्ते चाप्राप्ते चान्यो विधिरस्ति, स तु तं प्राप्ताऽप्राप्तविधिं न बाधते । इदं वचनं न्यायसिद्धम् । तथाहि – अवङादयः ङिदादेशाः सर्वेऽनेकाल एवेति यत्र यत्र ङिच्च इति सूत्रस्य प्राप्तिस्तत्र सर्वत्र ' अनेकाल् ' इत्यस्य नियमेन प्राप्तिः । एवञ्च यदि ङिदनेकालेष्वपि अनेकाल्सूत्रं प्रवर्तेत तदा ङिच्चेति सूत्रं व्यर्थमेव स्यादिति ' मर्ता किं न कर्ता ' इति लोकप्रसिद्ध्या " ङिच्च " इति शास्त्रं तदपवादः । अनेकाल्सूत्रं तु ङित्सु बाधेऽपि ङिद्भिन्नेऽनेकालादेशे ' जराया जरस ' इत्यादौ चरितार्थमिति न म्रियमाणम् । उत्सर्गः = सामान्यशास्त्रम्, अपवादः = विशेषशास्त्रमित्युच्यते । तदुक्तम् – सामान्यशास्त्रतो नूनं विशेषो बलीयान् भवेत् इति । सामान्यशास्त्रं तु सामान्यमुखेन विशेषेषु प्रवर्तत इति तस्य तेषु मन्दप्रवृत्तिः । अतो विशेषशास्त्रं प्रबलम् । उक्तं च भट्टवार्तिके –

अवश्यमेव सामान्यं विशेषं प्रति गच्छति ।
गतमात्रं च तत्तेन विशेषे स्थाप्यते ध्रुवम् ॥

किञ्च यदि ङिच्चेति शास्त्रम् अनेकाल्विशेषेषु ङित्सु न प्रवर्तेत, तर्हि तदनर्थकमेव स्यात् । " अनेकाल्शित्सर्वस्य " इत्यस्य तु ङित्सु अप्रवृत्तावपि नानर्थक्यम्, " तस्थस्थमिपां तान्तन्तामः "[1373], " अस्तेर्भूः "[1374] इत्यादिष्वनेकाल्षु अङित्सु तस्य सावकाशत्वात् । अतो विशेषशास्त्रं प्रबलम्[1375] । " अवङ् स्फोटायनस्य "[1376], " अनङ् सौ "[1377] इत्याद्युदाहरणम् ।

ननु " ङिच्च " इति सूत्रं न कार्यम् । न च ङिच्चेति सूत्राभावे " अनङ् सौ " इत्यदावनङः अनेकाल्त्वात् " अनेकाल् शित् सर्वस्य " इति सूत्रेण सम्पूर्णसखिशब्दस्य स्थानेऽनङादेशे कृते ' सखा ' इत्यस्य सिद्धर्न स्यादिति वाच्यम् । अनन्यार्थङित्त्वेष्वनङादिषु ङकारोच्चारण-सामर्थ्यादेवानेकालित्यस्याप्रवृत्त्या अन्त्यस्यालोऽनङादेशो भवतीति स्वीकारात् । अन्यथा ङकारोच्चारणमन्तरापि अनस्यानेकालत्वात् सर्वादेशतायाः सिद्धत्वाद् ङकारग्रहणं व्यर्थं स्यात् । तथा चान्त्यादेशार्थङकारोच्चारणमेव भविष्यति ङिच्चेति सूत्रं न कार्यमिति चेन्न, न्यायसिद्धबाधकस्य ङकारोच्चारणस्यैवानुवादकं ङिच्चेति सूत्रं न तु अपूर्वविधायकमिति स्वीकारात् । तथा च अनन्यार्थ

[1373] अष्टाध्यायी – (3-4-101)
[1374] अष्टाध्यायी – (2-4-52)
[1375] सिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे
[1376] अष्टाध्यायी – (6-1-121)
[1377] अष्टाध्यायी – (7-1-93)

ङित्त्वेष्वेव ङिच्चेति सूत्रस्य प्रवृत्तिः तातङो ङकारस्य तु गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतया कृतार्थत्वेन न तातङि ङिच्चेति सूत्रस्य प्रवृत्तिः अतो नानेकालित्यस्य तत्र बाधः। तथा हि भाष्यम् – ' तातङि ङित्करणं सावकाशम् । कोऽवकाशः ? गुणवृद्धिप्रतिषेधार्थो ङकारः । तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशो भविष्यति '[1378]।

तस्यायं भावः – नेदम् " ङिच्च " इति सूत्रमपूर्वम्। किन्तु तत्र तत्र ङित्करणस्य फलान्तराभावेन ङित्करणवैयर्थ्यसिद्धो योऽनेकालित्यस्य बाधस्तदनुवादकम् । यदि तु यत्र ङित्त्वस्य फलान्तरं विद्यते तत्रापि प्रवृत्तिः स्यात्तदा ङित्करणसामर्थ्यसिद्धं न स्यादित्यपूर्वविधायकत्वेनानुवादकत्वं न स्यात्। तथा सति प्राप्तानुवादेन विधायकत्वरूपनियामकत्वं परिभाषाया विरूध्येत सफलङित्त्वे ङित्करणसामर्थ्य-लब्धान्त्यादेशत्वासिद्धेः। किञ्च भाष्ये विप्रतिषेधात् इत्यस्य " विप्रतिषेधे परं कार्यम् "[1379] इति सूत्रेण परत्वादिति नार्थः, बाध्यबाधकयोः सूत्रयोः सावकाशत्वं हि विप्रतिषेधसूत्रप्रवृत्तौ बीजम्।

न च गुणवृद्धिप्रतिषेधार्थत्वमेव सर्वादेशत्वम्, सर्वादेशत्वे गुणवृद्धिप्रतिषेधार्थत्वम्, अन्त्यादेशत्वे तु अप्रत्ययत्वेन न गुणवृद्धिप्रतिषेधार्थत्वमित्यन्योऽन्याश्रयो भवति। अर्थात् – सर्वादेशत्वे सार्वधातुकार्धधातुकयोर्ङित्त्वेन गुणादिप्रतिषेधः सम्प्रसारणञ्च फलम्। सफलत्वे च ङिच्चेत्यस्याप्रवृत्तौ सर्वादेश इत्यन्योऽन्याश्रयत्वादुभयोरप्रवृत्तौ " अलोऽन्त्यस्य " इत्यनेनान्त्यादेश एव तातङ् स्यादिति वाच्यम्। सर्वादेशत्वालाभेऽन्त्यादेशत्वमेव स्यादिति वाच्यम्। " एरुः "[1380] इति सूत्रस्यानन्तरम् " तिह्योस्तादाशिष्यन्यतरस्याम् " इति सूत्रं कर्तव्यम्, " एरुः " इत्यतः एरित्यनुवर्त्य लोडादेशयोस्तिह्योरिकारस्य ' तात् ' इत्यर्थेनाप्यन्त्यादेशत्वसिद्धौ ङित्करणस्य गुणवृद्धिप्रतिषेधार्थत्व-बोधनद्वारा सर्वादेशत्वे सिद्धौ ङित्करणस्य गुणवृद्धिप्रतिषेधार्थत्वबोधनद्वारा सर्वादेशत्वेनादोषात्।

- **आदेः परस्य – (1-1-53)**

सूत्रार्थः – परस्योच्यमानं कार्यं तस्यादेरलः स्थाने भवति। " तस्मादित्युत्तरस्य " इति परस्य कार्यं शिष्यते। " अलोऽन्त्यस्य " इति सूत्रेणान्त्यस्यादेशत्वे तदपवादोऽयम्। " उदः स्थास्तम्भोः पूर्वस्य

[1378] भाष्यम् – प्रकृतसूत्रे

[1379] अष्टाध्यायी – (1-4-2)

[1380] अष्टाध्यायी – (3-4-86)

"[1381], " द्व्यन्तरुपसर्गेभ्योऽप ईत् "[1382] इत्यादौ " तस्मादित्युत्तरस्य " इति परिभाषया परस्य नियमितं कार्यं यत्, तत् तस्यादेरेव भवति। न तु " अलोऽन्त्यस्य " इति सूत्रेण तदन्तस्येति सूत्रार्थो निष्पन्नः। क्व च परस्य कार्यं शिष्यते ? यत्र पञ्चमीनिर्देशः । अर्थात् - " तस्मादित्युत्तरस्य " इति वचनाद् यत्र पञ्चमीनिर्देशस्तत्र परस्य कार्यं शिष्यते[1383]। उदाहरणानि – " ईदासः "[1384] – आसः परस्य आनस्य ईत्। आसीनः । " द्व्यन्तरुपसर्गेभ्योऽप ईत् " – एभ्योऽपस्य ईत्स्यात्। द्वीपम्, अन्तरीपम्, समीपम्। " ऋक्पूरब्धूःपथामानक्षे "[1385] इति सूत्रेण अकारः समासान्तः।

" अलोऽन्त्यस्य " इति सूत्राद् अनुवृत्तान्त्यपदस्य " ङिच्च " इति सूत्रे सम्बन्धाद् इहापि सम्बध्येत। तथा च परस्य यत् कार्यं तद् अन्त्यस्य आदेरित्यर्थापत्त्या ' द्विर्गता आपो यत्र तद् द्विपम् ' इत्यत्र " द्व्यन्तरुपसर्गेभ्योऽप ईत् " इति सूत्रेण अन्त्यस्य आप्प्रत्ययघटकाकारस्य आदिः आप्समुदायोऽपि इति समुदायस्य ईत्वप्रसङ्गः। अतः अल्पदमनुवर्त्य आदेरल इत्यर्थो निष्पद्यते। तथा च आप्समुदायस्याल्रूपत्वाभावाद् ईत्व न। अनेन अन्त्यपदस्य असम्बन्धः सूचितः। ' परस्य ' इत्यावर्तते। आवृत्तञ्च परार्थबोधकपरं तृतीयया विपरिणम्यते च, तथा च परार्थबोधकशब्देन परस्य स्थाने यत् कार्यं तत् षष्ठीनिर्दिष्टस्यादेरलः स्थाने बोध्यम् । परस्य इत्यत्र अनिर्धारितार्थकतया स्थाने इत्यस्योपस्थितिः ' स्थाने ' इत्यस्य मण्डूकानुवृत्त्या वा । तेन " नित्यं ङितः "[1386] इति सूत्रेण धातोर्विहितस्य ङिदुत्तमस्य सकारान्तस्य लोपो नित्यमित्यर्थकेन सूत्रेण ' भवाव ', ' भवाम ' इत्यादौ आदेर्लोपो न, विहितपञ्चम्या आश्रयणेन परबोधकशब्देन अर्थात् परपदमुच्चार्य कार्यविधानाभावात्। किन्तु " अलोऽन्त्यस्य " इति सूत्रेणान्त्यस्य सकारस्य । तत्र धातोर्विहित इत्यर्थस्वीकारेण विकरणव्यवधानेऽपि सलोपः सिध्यति । अन्यथा ' परस्य ' इत्यर्थे तद्व्यवधाने प्रवृत्तिः सूत्रस्य न स्यात्[1387]।

[1381]अष्टाध्यायी – (8-4-61)
[1382] अष्टाध्यायी – (6-3-97)
[1383] काशिका न्यासटीका च – प्रकृतसूत्रे
[1384] अष्टाध्यायी – (7-2-83)
[1385] अष्टाध्यायी – (5-4-74))
[1386] अष्टाध्यायी – (3-4-99)
[1387] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे

तेन “ नित्यं ङितः ” इत्यादौ न दोषः, इति तु न सम्यक्, “ तिङ्शित्सार्वधातुकम् ”[1388] इत्यादौ “ धातोः ”[1389] इत्यस्य सम्बन्धार्थं प्रकृतसूत्रेऽपि तत्सम्बन्धे “ तस्मादित्युत्तरस्य ” इत्यनेन ‘ परस्य ’ इत्युपस्थितौ परशब्देन परस्य कार्यविधानेन ‘ आदेः ’ इत्यस्योपस्थितिप्रतिबन्धकाभावात्। तस्मात्तत्रेत्थं व्यवस्था बोध्या – उत्तरस्येति षष्ठीनिर्देशेनोपस्थितस्य ‘ अन्त्यस्य ’ इत्यस्य ‘ सः ’ इत्येतद्विशेषणत्वेन धातोः परस्य ङिल्लकारोत्तमपुरुषस्यान्तो योऽल् सकारस्तस्य इत्येव व्याख्यानस्य लक्ष्यानुरोधाद्वैयधिकरण्येनान्वयस्वीकारेण निर्दिश्यमानस्य सकारस्यैव स्थानित्वेनोपादानादसन्देहाद् “ आदेः परस्य ” इत्यनुपस्थित्या दोषाभाव इति बोध्यम् ।

किञ्चदवधिकपरत्वविशिष्टस्य यत्कार्यमित्युक्तौ तु “ टित आत्मनेपदानां टेरे ”[1390] इति सूत्रेण तत्र टेर्नियमेन धात्वादितः एव सत्त्वेन ‘ एधेते ’ इत्यादावामष्टेराकारस्येत्त्वापत्तिः । वस्तुस्तु परस्य इत्यस्यावृत्तिर्न युक्ता। उक्तापत्तिस्तु न, प्रतिपदोक्तपरिभाषयैव परशब्दमुच्चार्यं विहितेष्वेव प्रवृत्तेः। न च परशब्दमुच्चार्य कार्यविधानाभावः, परार्थबोधकशब्दपरत्वात्[1391] ।

- **अनेकाल्शित्सर्वस्य – (1-1-54)**

सूत्रार्थः – न एकः, अनेकः नञ्तत्पुरुषः, अनेके अलः = वर्णाः यस्मिन्सोऽनेकाल्, बहुव्रीहिः । श इत् यस्य स शित्, बहुव्रीहिः । अनेकाल् च शिच्चानयोः समाहारोऽनेकाल्शित्, बहुव्रीहिगर्भः समाहारद्वन्द्वः। अनेकाल् शिच्च य आदेशः स सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने भवतीति सूत्रार्थः सम्पन्नः। अनेकाल् – “ अस्तेर्भूः ”[1392] – भविता, भवितुम्, भवितव्यम्। “ अतो भिस ऐस् ”[1393] – रामैः। शित् – “ इदम् इश् ”[1394] - इह इति उदाहरणानि च।

ननु “ अनेकाल्शित्सर्वस्य ” इत्यतः प्रागेव “ तस्मादित्युत्तरस्यादेः ” इति पठ्यताम्, किमनेन पृथक् सूत्रकरणेन। न चैवं “ तस्मिन्निति निर्दिष्टे पूर्वस्य ” इत्यतो निर्दिष्टग्रहणं नात्रानुवर्तेत इति वाच्यम्, तस्यापि सूत्रस्य प्राक् पठने बाधकाभावेन निर्दिष्टग्रहणानुवृत्तिसिद्धेः। मैवम्, ‘ ब्राह्मणा अष्टौ ’ इत्यत्र

[1388] अष्टाध्यायी – (3-4-113)

[1389] अष्टाध्यायी – (3-1-91)

[1390] अष्टाध्यायी – (3-4-79)

[1391] व्याकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1392] अष्टाध्यायी – (2-4-52)

[1393] अष्टाध्यायी – (7-1-9)

[1394] अष्टाध्यायी – (5-3-3)

अष्टाभ्यः पूर्वयोरपि जश्शसोरौश् प्रसङ्गात् । यथाश्रुतसूत्राभ्युपगमे तु ‘ उत्तरस्य ’ इत्यंशः प्रवर्तते एवेति नायं दोषः प्रसजति इति ।

अत्र केचिन्निष्कर्षमाहुः – “ अनेकाल्शित्सर्वस्य ” सूत्रात् प्रागेव वर्णलाघवाय “ तस्मादित्युत्तरस्यादेः ” इति सूत्रिते परत्वात्सर्वादेशेन ‘ आदेः ’ इत्यंशवदविशेषाद् ‘ उत्तरस्य ’ इत्यंशस्यापि बाधितत्वाद्वाक्यसंस्कारपक्षे ‘ ब्राह्मण अस्, अष्टन् अस् ’ इति स्थिते “ अष्टाभ्य औश् ”[1395] इत्यस्य दिग्योगे पञ्चमीत्वाद् व्याप्तिन्यायेन अष्टनोऽङ्गात्पूर्वयोरपि जश्शसोरौश् स्यात् । व्याप्तिन्यायस्तु “ प्राग्रीश्वरान्निपाताः ”[1396] इति पठितेऽपि प्रत्यासत्तिन्यायेन “ अधिरीश्वरे ”[1397] इति सूत्रावधिकत्वसिद्धौ “ ईश्वरे तोसुन्कसुनौ ”[1398] इति सूत्रावधिकत्वनिराकरणाय रेफविशिष्टग्रहणं कुर्वता सूत्रकृतैव ज्ञापितः । ततश्च सर्वादेशेन ‘ उत्तरस्य ’ इत्यस्याबाधनार्थं निर्दिष्टग्रहणानुवृत्त्यर्थं च “ तस्मिन्निति निर्दिष्टे पूर्वस्य ” इति सूत्रात् परत्र कृते तु ‘ आदेः ’ इत्यस्य सर्वादेशबाधकत्वं स्यात् । तथा च “ अतो भिस ऐस् ”[1399] इत्याद्यादेश आदेरेव स्यात्, “ अनेकाल्शित्सर्वस्य ” सूत्रस्य “ अस्तेर्भूः ” इत्यादौ चरितार्थत्वात् । यथा न्यासे तु ‘ उत्तरस्य ’ इत्यंशः प्रवर्तत एवेत्यष्टाभ्यः परयोरेव जश्शसोरौश् स्यात्, न तु पूर्वयोः । तथा “ तस्मादित्युत्तरस्यादेः ” इति न सूत्रितमित्यादिमनोरमाग्रन्थस्याप्ययमेवाशयः इति । अन्ये तु – यथाश्रुतसूत्रनिराकरमपरतयैव मनोरमां योजयन्ति । तद्यथा – न सूत्रितमित्यस्य “ अनेकाल्शित्सर्वस्य ” सूत्रात् प्राङ् न सूत्रितमिति नार्थः, ‘ आदेः ’ इत्यंशस्य सर्वादेश-बाधकत्वापत्तेरित्याद्यग्रिमग्रन्थविरोधात्, किन्तु तद्ग्रन्थानुकूल्याय “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ”[1400] इति सूत्रात् प्राङ् न सूत्रितमित्यर्थोऽभ्युपेयः । एवञ्च “ अनेकाल्शित्सर्वस्य ” सूत्रात् प्राक् सूत्रिते तु नास्त्येव दोष इति मनोरमाग्रन्थाशयः । एवं स्थिते निर्दिष्टग्रहणानुवृत्तिलाभाय “ तस्मिन्निति निर्दिष्टे पूर्वस्य ”[1401] सूत्रं ‘ तस्मादित्युत्तरस्यादेः परस्य ’ इत्यस्मात् प्रागेव पठनीयम् । अष्टनोऽङ्गात् पूर्वयोरप्यौश् स्यादित्युक्तदोषस्तु इत्थं परिहरणीयः- ‘ तस्मादित्युत्तरस्यादेः परस्य ’ इत्यत्र ‘ आदेः ’ इति पृथग्वाक्यम् । तत्र ‘ उत्तरस्य ’ इत्यनुवर्तते । सा च स्थानषष्ठी, “ षष्ठी स्थानेयोगा ”[1402] इत्यस्य प्राप्तेः ।

[1395] अष्टाध्यायी – (7-1-21)

[1396] अष्टाध्यायी – (1-4-56)

[1397] अष्टाध्यायी – (1-4-97)

[1398] अष्टाध्यायी – (3-4-13)

[1399] अष्टाध्यायी – (7-1-9)

[1400] अष्टाध्यायी – (1-1-68)

[1401] अष्टाध्यायी – (1-1-66)

[1402] अष्टाध्यायी – (1-1-49)

तत्र चायमर्थः – पञ्चमीनिर्देशेन यत्कार्यं तदुत्तरसम्बन्धी, उत्तरस्य स्थाने यद् विधीयते तदादेर्भवतीति। इत्थं वाक्यभेदेन व्याख्यानाश्रयणात् ‘ अनन्तरस्य ’ इति न्यायेन ‘ आदेः ’ इत्यंश एव सर्वादेशेन बाध्यते, न तु ‘ उत्तरस्य ’ इत्यंशोऽपि, इति नास्त्येव पूर्वोक्तदोषः। वाक्यभेदेन व्याख्यानं तु ‘ उत्तरस्यादेः ’ इत्यसमस्तन्यासकरणेन ज्ञाप्यते। अन्यथा उत्तरादेः, इति न सूत्रितम् इति वदेत्। किञ्च, “ अष्टाभ्य औश् ” इत्यस्य दिग्योगे पञ्चमीत्वेन पूर्वपरसाधारणतया अष्टनोऽङ्गाद् जश्शसोरित्युक्तेऽप्यष्टनोऽङ्गसञ्ज्ञानिमितभूतौ यौ जश्शसौ तावेव शीघ्रोपस्थितिकौ इत्यष्टन्शब्दादुत्तरयोरेव औश् स्यात्, न तु पूर्वयोरिति[1403]।

ननु शिद्ग्रहणं व्यर्थम्। न च “ जसः शी ”[1404] इति श्यादेशस्य सर्वादेशार्थम्, अनेकाल्त्वादेव सिद्धेः। न च “ इदम् इश् ”[1405], “ अष्टाभ्य औश् ” इत्यादीनां सर्वादेशार्थम्, तेषामपि शकारोच्चारण-सामर्थ्याद् भूतपूर्वमनेकाल्त्वमादाय सर्वादेशत्वसिद्धेः। न च “ घ्वसोरेद्धावभ्यासलोपश्च ”[1406] इति सूत्रेण विहितस्य लोपस्य अभावरूपत्वेन अनेकाल्त्वाभावात् सर्वादेशत्वं न प्राप्नोति, अतः लोपश्चेत्यत्र लोपश् चेत्येवं शकार इत् निर्दिश्यते, शित्त्वाच्च सर्वादेशो भवति। एतदर्थं शिद्ग्रहणम् “ अनेकाल् शित्सर्वस्य ” इति सूत्रे आवश्यकमिति चेन्न, “ घ्वसोरेद्धावभ्यासलोपश्च ” इति सूत्रे “ लोपो यि ”[1407] इति सूत्रात् लोपपदस्यानुवृत्त्यैव लोपस्य सिद्धतया पुनरत्र सूत्रे लोपग्रहणं सर्वादेशार्थं भविष्यतीति शिद्ग्रहणस्य वैयर्थ्यात् शिद्ग्रहणेन ‘ नानुबन्धकृतमनेकाल्त्वम् ’ अनुबन्धकृतं यदनेकाल् भवेत् तद्धि न अनेकाल् मन्तव्यम्, किं तर्हि ? एकालेव। यद्धि अनुबन्धरहितमनेकाल् भवति यदेवाऽनेकाल् स्वीक्रियते इह शास्त्रे। अनेन किमायातम् ? अनेन ह्येतदायातं यद् इश् इत्येवमादय आदेशाः शित्त्वान्नानेकालो भवन्ति। किन्तर्हि ? एकाल एव। एवञ्च सत्यां ह्यस्यां परिभाषायां शिद्ग्रहणं सार्थकं सत् स्वार्थे चरितार्थतामभजत्। अन्यत्र चेदं फलं यद् “ अर्वणस्त्रसावनञः ”[1408] इति सूत्रेण अर्वन् इत्येतस्य शब्दस्य तृ इत्ययमादेशो विधीयते, स चेद् ऋकारानुबन्धसहितत्वात् अनेकाल् मन्येत तर्ह्यनिष्टः सर्वादेश आपद्येत, अन्त्यस्य तु इष्यते, अनुबन्धकृतोऽयमनेकाल् इति कृत्वा सर्वादेशो न भवति।

[1403] वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे
[1404] अष्टाध्यायी – (7-1-17)
[1405] अष्टाध्यायी – (5-3-3)
[1406] अष्टाध्यायी – (6-4-119)
[1407] अष्टाध्यायी – (6-4-118)
[1408] अष्टाध्यायी – (6-4-127)

अतोऽनुबन्धद्वारा अनेकाल्त्वम् इशादौ न सम्भवति, तदर्थं शिद्ग्रहणं सूत्रे आवश्यकम्। " दिव उत् "[1409] इति सूत्रेण विधीयमान उकारः सर्वादेशो न।

ननु ' अनेकाल्शित् ' इति सूत्रमस्तु, मास्तु ' सर्वस्य ' इति ग्रहणम्, पूर्वसूत्र-विषयान्त्याद्योरादेशनिषेधेन सर्वादेशताया एव पर्यवसन्नत्वादिति चेन्न, यत्र क्वचित् सूत्रक्रमापेक्षया पूर्वं ह्यपवादाः पठिताः सन्ति पश्चाच्चोत्सर्गास्तत्र हि तेऽपवादाः स्वसमीपस्थान् एवोत्सर्गान् बाधन्ते, न तु व्यवहितोत्तरान्। अत एवास्ति ' पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते न परान् ' इति ज्ञापकसिद्धा परिभाषेयम्। अनया परिभाषया " आदेः परस्य " इति सूत्रस्यैव निषेधापत्तेर्दोषात्। यदि तु बाध्यसामान्य-पक्षमाश्रित्य सर्वस्यापि बाधकमित्युच्यते, तदाऽदृष्टार्थमेव तद्ग्रहणं स्यात्।

- **स्थानिवदादेशोऽनल्विधौ – (1-1-55)**

सूत्रमिदमतिदेशसूत्रम्। तच्च बाधज्ञानसमकालिकेच्छाजन्यज्ञानरूपाहार्यारोपबोधकम्। स्थानमस्यास्तीति स्थानी " अत इनिठनौ "[1410] इति सूत्रेण इनिप्रत्ययः, स्थानिना तुल्यं स्थानिवत् " तेन तुल्यं क्रिया चेद् वतिः "[1411] इति सूत्रेण वतिप्रत्ययः। ' स्थानिवद् ' इत्यव्ययम्। यस्य स्थाने अन्यद्विधीयते तत् स्थानि। येन विधीयमानेन अन्यत् प्रसक्तं निवर्तते स आदेशः। ' अल् ' इति वर्णपर्यायः। विधीयत इति विधिः कार्यम्। ' अल्विधौ ' इत्यत्रार्थानुरोधात् चतुर्विधः समासः – अला विधिः इति तृतीयातत्पुरुषसमासः। अलः परस्य विधिः इति अल्विधिः, पञ्चमीतत्पुरुषसमासः। अलः स्थाने विधिः इति अल्विधिः, षष्ठीतत्पुरुषसमासः। अलि विधिः इति अल्विधिः इति सप्तमीतत्पुरुषसमासः। न अल्विधिः अनल्विधिः, तस्मिन् अनल्विधौ, नञ्तत्पुरुषसमासः। आदेशः स्थानिना तुल्यो भवति, अल्विधिं वर्जयित्वा इति सूत्रार्थो निष्पन्नः। यथा ' रामाय ' इत्यत्र यादेशे सुप्त्वाभावेऽपि ' यादेशः सुप् ' इति ज्ञानं बोधयति। तत्रादेशाः प्रायः अष्टविधा भवन्ति – धातु-अङ्ग-कृत-तद्धित-अव्यय-सुप्-तिङ्-पदादेशाः। उदाहरणञ्च यथा -

---

[1409] अष्टाध्यायी – (6-1-129)

[1410] अष्टाध्यायी – (5-2-115)

[1411] अष्टाध्यायी – (5-1-115)

1. धात्वादेशः – धात्वादेशो धातुवद् भवति, “ अस्तेर्भूः ”[1412] आर्धधातुके विषये प्रागेवादेशेषु कृतेषु “ धातोः ”[1413] इति तव्यादयो भवन्ति। भविता, भवितुम्, भवितव्यम्। ‘ वक्ता, वक्तुम्, वक्तव्यम् ’ इत्यादीनि उदाहरणानि च।

2. अङ्गादेशः – अङ्गादेशोऽङ्गवद् भवति ‘ केन, काभ्याम्, कैः ’ इत्यत्र “ किमः कः ” [1414] इति सूत्रेण कादेशे कृतेऽङ्गाश्रया इन दीर्घत्वैस् भवन्ति।

3. कृदादेशः – कृदादेशः कृतवत् भवति प्रकृत्य ‘ प्र + कृ + त्वा ’ इत्यत्र “ कुगतिप्रदयः ”[1415] इति सूत्रेण समासे कृते “ समासेऽनञ्पूर्वे क्त्वो ल्यप् ”[1416] इति सूत्रेण क्त्वास्थाने ल्यपि च विहिते “ ह्रस्वस्य पिति कृति तुक् ”[1417] इति सूत्रेण पिति कृति प्रतयये परतः तुगागमः क्रियते। अत्र पुनः क्त्वाप्रत्ययस्तु कृदासीत् “ कृदतिङ ”[1418] इति नियमात् ल्यब्नास्ति कृत्सञ्ज्ञकः। कृदादेशः कृतवत् इति नियमात् ल्यप्प्रत्ययोऽपि कृत्सञ्ज्ञको भूत्वाऽत्र तुगागमो भवत्येव।

4. तद्धितादेशः – तद्धितादेशस्तद्धितवद् भवति। ‘ दध्नि संस्कृतम् – दाधिकम् ’ इत्यत्र “ दध्नष्ठक् ”[1419] इति सूत्रेण दधिशब्दाद् ठक्प्रत्ययः ठस्य स्थाने “ ठस्येकः ”[1420] इति सूत्रेण इकि कृते “ तद्धिताः ”[1421] इति नियमात् ठक्प्रत्ययः तद्धितः परं इक् नास्ति तत् कथं “ किति च ”[1422] इति सूत्रेण वृद्धिर्भविष्यति। अतः “ स्थानिवदादेशोऽनल्विधौ ” इति सूत्रेण ‘ इक् ’ स्थानिवद् भूत्वा तद्धितवद् भवति। ततः वृद्धिर्जाता।

5. अव्ययादेशः – अव्ययादेशोऽव्ययवद् भवति। ‘ प्रकृत्य + सु ’ इति स्थिते क्त्वाप्रत्ययस्यासीदव्ययसञ्ज्ञा तस्य स्थाने ल्यपपि भवत्यव्ययसञ्ज्ञा ततः “ अव्ययादाप्सुपः ”[1423] इति सूत्रेण सुब्लुग् भवति।

[1412] अष्टाध्यायी – (2-4-52)
[1413] अष्टाध्यायी – (3-1-91)
[1414] अष्टाध्यायी – (7-2-103)
[1415] अष्टाध्यायी – (2-2-18)
[1416] अष्टाध्यायी – (7-1-37)
[1417] अष्टाध्यायी – (6-1-70)
[1418] अष्टाध्यायी – (3-1-93)
[1419] अष्टाध्यायी – (4-2-18)
[1420] अष्टाध्यायी – (7-3-50)
[1421] अष्टाध्यायी – (4-1-76)
[1422] अष्टाध्यायी – (7-2-118)
[1423] अष्टाध्यायी – (2-4-82)

6. सुबादेशः – सुबादेशः सुब्वद् भवति । ‘ पुरुषाय, वृक्षाय ’ इत्यत्र स्थानिवद्भावस्याङ्गीकृतत्वात् ‘ य ’ इत्यत्र सुप्त्वमङ्गीकृतं तदा “ सुपि च ”[1424] इति सूत्रेण दीर्घत्वं जातम् ।

7. तिङादेशः – तिङादेशस्तिङवत् भवति । अकुरुताम्, अकुरुतम् ।

8. पदादेशः – पदादेशः पदवद् भवति । ग्रामो नः स्वम्, ग्रामो वः स्वम् ।

अत्र ‘ स्थानिवदादेशः ’ इत्येकं वाक्यम्, ‘ अनल्विधौ ’ इति द्वितीयम् । स्थानिना तुल्यमिति तृतीयान्ताद्विहितस्य वतेरर्थस्य “ तेन तुल्यं क्रिया चेद्वतिः ”[1425] इत्यनुशासनानुग्रहेण क्रियायामेवान्वयः । ‘ सर्वं वाक्यं क्रियया परिसमाप्यते ’ इति हेतोर्भवतीति क्रियाध्याहाराद् आदेशः स्थानिवद्भवतीति वाक्यस्य आदेशकर्तृकसत्ता स्थानिकर्तृकसत्तावद् भवतीति बोधः सम्पद्यते । स्थानिकर्तृकसत्ताबुद्धि-विषये आदेशकर्तृकसत्ता भवतीत्यर्थः फलति । इत्थं ‘ रामाय ’ इत्यत्र यादेशस्थेकारकर्तृकसत्ताबुद्धि-विषयत्वेऽपि दीर्घो न स्यादिति तु न वाच्यम् । स्थानि एकारः, स च सुप्, तत्कर्तृकसत्ता सुप्कर्तृकसत्ता, तद्बुद्धिविषयत्वस्य ‘ य ’- कर्तृकसत्तायां विधाने ‘ य ’ इत्यत्र फलतः सुब्बुद्धिविषयत्वस्योदयाद् दीर्घसिद्धौ न किञ्चिद् बाधकम् ।

विधिग्रहणप्रयोजनम् – ‘ अल्निमित्तकविधौ न स्थानिवत् ’ इत्येतदर्थस्य ‘ अनलि ’ इति पदेनैव लाभसम्भवात् विधिशब्देन समस्तस्य ‘ अनल्विधौ ’ इति पदग्रहणस्य को लाभ ? इति प्रश्नस्य यथासम्भवं सर्वविभक्त्यन्तेन अनल्शब्देन सह समासलाभाय विधिग्रहणविशिष्टम् ‘ अनल्विधौ ’ इति पदमुच्चारितम् । तेन अला विधौ, अलः परस्य विधौ, अलः स्थाने विधौ, अलि परे विधौ चेति अल्विधिः इति चतुर्विधसमासार्थलाभः । क्रमेणोदाहरणम् - अला विधौ यथा – व्यूढं विशालम् उरो यस्य स तेनेति विग्रहे बहुव्रीहौ कपि ‘ व्यूढोरस्केन ’ अत्र “ सोऽपदादौ ”[1426] इति सूत्रेण विसर्गस्य सत्त्वेऽत्र सकारस्य स्थानिवद्भावेन विसर्गत्वमादाय विसर्गस्याकारोपरि पाठेन (अयोग-वाहानामट्प्रत्याहारे पाठेन) विसर्गे अट्त्वस्य सत्त्वात्, स्थानिवद्भावेन सकारेऽपि वृत्तित्वात् अट्व्यवधाने “ अट्कुप्वाङ्नुम्व्यवायेऽपि ”[1427] इति सूत्रेण णत्वं स्यात् । अतस्तृतीयान्तेन अला इत्यनेन सह समासेन णत्वविधावडादेरलो व्यवधानात्क्रियायाः कर्तृतया करणतया वा निमित्ततया अल्कर्तृक-

[1424] अष्टाध्यायी – (7-3-102)

[1425] अष्टाध्यायी – (5-1-115)

[1426] अष्टाध्यायी – (8-3-38)

[1427] अष्टाध्यायी – (8-4-2)

विधौ अल्करणविधौ वा आदेशो न स्थानिवदित्यर्थकेन स्थानिवत्त्वनिषेधात् अडादिमात्र-व्यवधानाभावेन णत्वं न।

अलः परस्य विधौ यथा – ' द्यौः ' इत्यत्र वकारस्थानिकस्य औकारस्य स्थानिवत्त्वेन हल्त्वात् ततः परस्य सोः " हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् "[1428] इति सूत्रेण लोपः प्राप्तः, अलः परस्य विधौ न स्थानिवदिति निषेधान्न भवति।

अलः स्थाने विधौ यथा – ' द्युकामः ' ' दिवं कामयते ' इत्यर्थे " कर्मण्यण् "[1429] इति सूत्रेण अण्प्रत्ययः। " दिव उत् "[1430] इति सूत्रेण वकारस्य उकारादेशे स्थानिवद्भावेन वत्वमादाय " लोपो व्योर्वलि "[1431] इति सूत्रेण वलोपः प्राप्तोऽलो वकारस्य स्थाने लोपस्य विधित्वेन स्थानिवत्त्वनिषेधान्न भवति।

अलि परे विधौ यथा – ' क इष्टः ' इत्यत्र यजेः क्ते " वचिस्वपियजादीनां किति "[1432] इति सूत्रेण यकारस्य इकारे सम्प्रसारणे तत्र स्थानिवत्त्वेन हश्त्वबुद्ध्या कशब्दोत्तररोः " हशि च "[1433] इति सूत्रेण उत्वे प्राप्ते हश् रूपे अलि परे विधित्वात् स्थानिवत्त्वनिषेधान्नोक्तम्।

भाष्ये तु विधिग्रहणाभावेऽपि ' अनल् ' इति शब्दसाधुत्वार्थकप्रथमान्तपदोच्चारणेऽपि तदर्थस्यानाश्रयणात् सर्वविभक्त्यन्तार्थलाभे जाते नोपर्युक्तप्रयोजनानि विधिग्रहणस्यानन्यसिद्धानि सन्ति – इत्युक्तम्। तथा हि – ' नैतदस्ति प्रयोजनम्, प्रातिपदिकनिर्देशोऽयम्। प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति, न काञ्चित् प्राधान्येन विभक्तिमाश्रयन्ति। तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते, सा सा आश्रयितव्या '[1434] इति। एवं विधिग्रहणानर्थ्यक्यमाशङ्क्य पुनर् उत्तरपदलोपि-समासविज्ञानद्वारा प्राधान्येन विशिषणत्वेन वा अलाश्रयणे सर्वत्र विधौ स्थानिवत्त्वनिषेधाय विधिग्रहणमावश्यकमिति प्रतिपादयाम्बभूव। तथा हि – ' अनल् ' इत्युच्यमाने यत्र प्राधान्येनालाश्रीयते तत्रैव निषेधः स्यात् ' क इष्टः ' इत्यादौ, ' प्रदीव्य ' इत्यादौ इटः प्रतिषेधो न स्यात्। तत्र वलादेरित्यन्य-पदार्थस्य प्राधान्यात् वल्रूपालो विशेषणत्वेनाश्रयणात्। उत्तरपदलोपिसमासविज्ञानार्थविधिग्रहणे तु

1428 अष्टाध्यायी – (6-1-67)

1429 अष्टाध्यायी – (3-2-1)

1430 अष्टाध्यायी – (6-1-129)

1431 अष्टाध्यायी – (6-1-66)

1432 अष्टाध्यायी – (6-1-15)

1433 अष्टाध्यायी – (6-1-112)

1434 भाष्यम् - प्रकृतसूत्रे

इड्विधेरलाश्रयत्वात् प्रतिषेधसिद्धिः । तदुक्तं भाष्ये – ‘ इदं तर्हि प्रयोजनम् - उत्तरपदलोपो यथा विज्ञायेत । अलमाश्रयते अलाश्रयः, अलाश्रयो विधिः अल्विधिरिति । यत्र प्राधान्येनालाश्रीयते तत्रैव प्रतिषेधः स्यात् । यत्र विशेषणत्वेनालाश्रीयते तत्र प्रतिषेधो न स्यात् । किं प्रयोजनम्, प्रदीव्य, प्रसीव्य इति वलादिलक्षण इट् मा भूदिति ’[1435] । भट्टोजिदीक्षितोऽपि जगाद – ‘ आश्रयणं चेह यथाकथञ्चित् न तु प्राधान्येनैवेत्याग्रहः । तेन ‘ प्रपठ्य ’ इत्यत्र वलादिलक्षण इण्न ’[1436] ।

‘ व्यूढोरस्केन ’ इत्यत्र सकारे अल्विशेषोऽडिति तत्कर्तृकसत्ताबुद्धिविषयत्वं विधित्सितं णत्वाय, तदुद्देश्यकविधौ निषेधात् णत्वन्न भवति । इत्थं ‘ द्यौः, पन्थाः ’ इत्यत्राल्विशेषो वकाररूपो नकाररूपो हल्, तत्कर्तृकसत्ताबुद्धिविषयत्वस्यौकारे आकारे च निषेधान्न सुलोपः । ‘ क इष्टः ’ इत्यत्र च अल्विशेषो हशिति तत्कर्तृकसत्ताबुद्धिविषयत्वस्यानिषेधाद् उत्वं न भवति । ‘ प्रपठ्य ’ इत्यत्र स्थान्यवयवोऽल् विशेषः, तकाररूपो वल् तत्कर्तृकसत्ताबुद्धिविषयत्वस्य ‘ य ’ इत्यत्र निषेधात् नागृहीतविशेषणन्यायेन वलादित्वस्यापि सुतरां निषिद्धत्वेन इडागमो निषिद्धः । इत्थं सामञ्जस्ये सम्भवति स्थान्यवयवाल्वृत्त्यल्मात्रवृत्तिधर्मावच्छिन्नोद्देश्यताके विधौ न स्थानिवदिति धर्मघटितनिषेधवाक्यार्थो व्याप्यत्वनिवेशसाकाङ्क्षः किमर्थमङ्गीक्रियत इति प्रश्नः समुदेति ।

अत्रेदं बोध्यम् – आदेशः स्थानिवद्भवतीति वाक्येन आदेशकर्तृकसत्तायां स्थानिकर्तृक-सत्तातुल्यत्वं विधीयते । तुल्यत्वञ्च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् । तेन आदेशकर्तृकसत्तायां स्थानिकर्तृकसत्तावृत्तिधर्मबुद्धिर्विधीयते । आदेशकर्तृकसत्तायां स्थान्यवयवाल्विशेषकर्तृकसत्तावृत्ति-धर्मबुद्धिर्न भवति, तदुद्देश्यके विधाविति च निषेधवाक्यार्थः सम्पद्यते । इत्थमर्थे ‘ रामाय ’ इत्यत्र यादेशकर्तृकसत्तायामेकाररूपाल्विशेषकर्तृकसत्तावृत्तिधर्मः सुप्कर्तृकसत्तात्वरूपः, तस्यातिदेशस्य निषेधाद् ‘ य ’ इत्यत्र सुप्त्वाभावेन दीर्घो न स्यात् । अतः स्थान्यवयवाल्कर्तृकसत्तामात्रवृत्ति-धर्मातिदेशस्य निषेध इत्यवश्यं वाच्यम् । सुप्कर्तृकसत्तात्वधर्मस्तु न स्थान्यवयवालेकारसत्तामात्रवृत्ति-धर्मः, भ्यामादिसत्तायामपि तस्य सत्त्वात् । अतो न तन्निषेधः । तदेवं सुप्कर्तृकसत्तात्वातिदेशस्य अप्रतिषिद्धतया ‘ रामाय ’ इत्यत्र दीर्घः सिद्ध्यति ।

अतिदेशसूत्रं च अन्यत्र अन्यधर्मारोपबोधकम् अथवा आरोपवत्त्वमतिदेशत्वम् । अथवा वति-घटितत्वमतिदेशत्वम्। यस्मिन् सूत्रे वत्शब्दस्य वदर्थस्य वाऽनुप्रविष्टो भवति तदतिदेशसूत्रं भवति ।

[1435] भाष्यम् - प्रकृतसूत्रे

[1436] प्रौढमनोरमा - प्रकृतसूत्रे

अतिदेशसूत्रं विधिसंज्ञाप्रभृतिसूत्राणां विषयं कार्यं क्षेत्रं वा विस्तारयति। यदा विधिसूत्रस्य प्रवृत्तये यस्य साधनस्यावश्यकता अस्ति तस्याभावात् सूत्रस्य प्रवृत्तिर्न स्यात्, तदतिदेशसूत्रं तद्वद्भावं करोति। यथा –

' राम + य ' इत्यवस्थायां " सुपि च "[1437] इति सूत्रस्य प्रवृत्तये सुप्त्वस्यावश्यकताऽस्ति। किन्तु सा बाधिता भवति । कुत इति चेत्तर्हि – सूत्रार्थासङ्घटनादिति बोध्यम् । यञादौ सुपि परे सति सूत्रमिदमदन्ताङ्गस्य दीर्घं विधत्ते । अत्र च यञादित्वेऽपि तत्र सुप्त्वाऽभावात्सूत्राप्रवृत्तिः । अतः " स्थानिवदादेशोऽनल्विधौ " इति सूत्रमारब्धम्। तेन च सूत्रेण सुप्त्वव्यतिरेकाद् दीर्घाऽप्रवृत्तिर्निराकृता, यतो हि सुप्त्वाऽभाववत्यपि यकारे ङे स्थानिके ङे वृत्तिसुप्त्वरूपो धर्मो यकारे समारोप्यते। तथा च यन्निमित्तवैकल्यप्रयुक्तवैकल्यवती सूत्रप्रवृत्तिस्तन्निमित्तमतिदेशमहिम्ना लब्धमिति।

अल्वृत्तिधर्मनिमित्तके विधौ न स्थानिवदित्यर्थे कृते ' रामाय ' इत्यत्र दोषः अत्राल्पदेन आदेशावयवो यकारो गृह्यते तद्वृत्तिधर्मः यञ्त्वम्, तन्निमित्तको विधिः दीर्घविधिस्तस्मिन् कर्तव्ये स्थानिवद्भावनिषेधात् सुप्त्वाभावेन दीर्घानुपपत्तेरतोऽल्पदेन स्थान्यवयवोऽल्ग्राह्यस्तथा च स्थान्यवयवाल्वृत्तिधर्मनिमित्तके विधौ न स्थानिवत्, इत्यर्थेन न दोषः।

न च ' अनल्विधौ ' इत्येतत्सन्निहित आदेश एव न स्थानी, सूत्रे " स्थानिवदादेशोऽनल्विधौ " इत्युक्तेः । तथा च आदेशघटकनिमित्तके विधौ स्थानिवद्भावनिषेधाद् दीर्घो न स्यादिति वाच्यम् । ' श्रौतक्रमादार्थक्रमो बलीयान् ' इति हि मीमांसानिर्णीतेन न्यायेन शब्दकृतपौर्वापर्य्याश्रयणे आदेशस्य सन्निहितत्वेऽपि अर्थकृतपौर्वापर्य्ये आदेशः स्थानिवत् स्यात् अनल्विधौ इत्येवंरूपे स्थानिन एव सन्निहितत्वात् । आर्थक्रमस्य बलवत्त्वे बीजन्तु शब्दप्रयोगस्यार्थप्रत्यायनार्थत्वेनार्थस्य प्राधान्यम्, कष्टाय क्रमणे इत्यादयो निर्देशाश्च। अत एव वेदेऽपि ' अग्निहोत्रं जुहोति यवागूं पचति ' इति श्रूयते। पाठक्रमेण पूर्वम् अग्निहोत्रम् पश्चात् यवागूपाकः प्राप्नोति। आर्थक्रमे तु यवागूपाकस्य होत्रे अपेक्षिततया उपयोक्ष्यमाणद्रव्योत्पत्तये पूर्वं पाकः, पश्चाद् अग्निहोत्रहोमः । अत्र किं पूर्वं कर्तव्यमिति संशये आर्थक्रमस्य बलवत्त्वं बोधितम् । अतः पूर्वं यवागूपाकः पश्चात् अग्निहोत्रहोमः । अत एव च यवागूपाकस्य सार्थक्यमपि जातम्। स्थानिरूपो योऽल् तद्वृत्तिर्यो धर्मः तं धर्ममाश्रित्य जायमाने विधौ स्थानिवद्भावो न भवतीति अनल्विधावित्यस्यार्थो निष्पन्नात् ' रामाय ' इत्यत्र दीर्घो भवति स्थानिसुप्त्वधर्मो न अल्विधिः।

न च ' तत्स्थानापन्नस्तद्धर्मं लभते ' इति लोकन्यायेन यो यस्य स्थाने नियुज्यते स तस्य कार्यं करोति, यथा गुरोः स्थाने नियुक्तः शिष्यः तस्य कार्यं करोति, स्वरूपेण गुरु-शिष्ययोः परस्परं भेदेऽपि

[1437] अष्टाध्यायी – (7-3-102)

अग्रासनादिकं लभते। वैदिकयागेऽपि विकृतौ ‘ दर्भाणां स्थाने शरैः प्रस्तरितव्यम् ’ इति श्रुत्या कुशानां स्थाने शराः प्रस्तीर्यन्ते। तद्वदत्रापि “ अस्तेर्भूः ”[1438] इत्यादीना अस्धातोः स्थाने ‘ भू ’ आदेशे जाते अस्तेः ये धर्मा अर्थबोधनधातुत्वादयो भवतेरपि लोकदृष्टान्तेन स्युरेवेति नार्थोऽनेन सूत्रेण, तथापि “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ”[1439] इति सूत्रेण व्याकरणशास्त्रीयसञ्ज्ञातो भिन्नशब्दानां स्वस्वरूपस्य = आनुपूर्वीरूपस्य बोधकत्वं न तु तद्भिन्नस्वरूपस्येति बोधितम्। तथा च “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ” इति सूत्रारम्भबलात् लोकन्यायाप्रवृत्तेः स्थानिकार्यमादेशे न प्राप्नोतीति स्थानिवत्सूत्रारम्भः सार्थकः। तेन “ आङो यमहनः ”[1440] इति सूत्रेण आत्मनेपदं वधादेशे न स्यात्। किञ्च गुरुः शिष्येण यज्ञार्थमुपनिमन्त्रितोऽपि कार्यान्तरव्यासङ्गात् स्वयं न गतः किन्तु स्वशिष्यः प्रेषितः। तदा स शिष्यस्तत्स्थानापन्नतया अग्रासनादीन् लभते। परन्तु गुरुः अयं न व्यवह्रियते। तद्वद् असः स्थाने भूशब्दः, हनः स्थाने वधशब्दः, अस्धातुः भूशब्दः, हन्धातुः वधशब्दः इति व्यवहारो न स्यादिति तद्व्यवहारोऽपि भवत्वित्यतः स्थानिवत्सूत्रम्।

केचित्तु लोकस्थान्यादेशभावापेक्षया शास्त्रीयस्थान्यादेशयोर्भेदाद् इत्यर्थाभ्युपगमेनापि लोकन्यायेन असिद्धौ हेतुतायाः प्रदर्शनं सम्भवतीति मन्यन्ते। लोके गुरुस्थानापन्नः शिष्यो यदर्थं नियुक्तस्तन्मात्रकार्यं करोति, न तु उच्छिष्टभोजनं पादोपसंग्रहणं शिष्यस्य भवति। शास्त्रे तु अर्थ-प्रत्यायनार्थमुपदिशन् आदेशोऽर्थं प्रत्याय्य न तूष्णीभावमालम्बते, किन्तु अर्थप्रत्यायनानन्तरं स्थानिकार्यस्यापि सम्पादनमिष्टम्। अतो लौकिकस्थान्यादेशापेक्षया शास्त्रे तयोर्वैलक्षण्यमिति वदन्ति।

- **वतिग्रहणप्रयोजनम्**

अत्र वतिकरणं किमर्थम्? विनाऽपि वतिना तदर्थलाभात्। यथा ङित् – कित् इत्यादौ, इति प्रश्नमुत्थाप्य समाहितं भाष्यकृता – वतिं विना “ स्थान्यादेशोऽनल्विधौ ” इतीयत्युच्यमाने सञ्ज्ञाप्रस्तावात् स्थानी आदेशस्य सञ्ज्ञा स्यात्। तथा च “ आङो यमहनः ” इत्यात्मनेपदं सञ्ज्ञाभूतेन स्थानिना हन्तिना प्रतिबोधितस्य सञ्ज्ञिन आदेशस्य वधेरेव स्यात्, हन्तेस्तु न स्यात्। अतो वत्करणमावश्यकम्[1441]।

- **आदेशग्रहणप्रयोजनम्**

[1438] अष्टाध्यायी – (2-4-52)

[1439] अष्टाध्यायी – (1-1-68)

[1440] अष्टाध्यायी – (1-3-28)

[1441] भाषावृत्तेःसमीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

ननु ‘ पितृवदधीते ’ इत्यादौ यथा पितृशब्दस्य सम्बन्धिशब्दत्वात् तस्यापरः सम्बन्धी ‘ पुत्रः ’ इति लभ्यते, एवमत्रापि ‘ स्थानिवत् ’ इत्युक्ते स्थानिशब्दस्यापि सम्बन्धिशब्दत्वात् तन्महिम्नैव आदेशः इति तस्यापरः सम्बन्धी लप्स्यत एव, पुनर् आदेशग्रहणं व्यर्थमिति चेन्न, आदेशो द्विविधः – श्रौतः आनुमानिकश्च । तत्र श्रौतः सूत्रेषु पठितः “ जराया जरसन्यतरस्याम् ”[1442] इत्यादिः । आनुमानिकश्च यथा – “ एरुः ”[1443] इत्यादिना इकारादिवर्णमात्रस्य उकारादिवर्णविधाने ‘ शब्दाः नित्याः ’ इति वैयाकरण-सिद्धान्तभङ्गभिया नित्येषु शब्देषु स्थानिनिवृत्तेः, आदेशस्य चानुपपत्त्या लोट्स्थानिकस्य इकारान्तस्य उच्चारणप्रसङ्गे उकारान्त उच्चारणीयः । इकारान्तबुद्धिप्रसङ्गे उकारान्तबुद्धिः कर्तव्या इत्यर्थे वानुमिते तेरित्यस्य प्रसङ्गे तुरित्यादेशः इति फलति । तथा च श्रौतस्य स्थान्यादेशभावस्य श्रावणप्रत्यक्षविषयतया प्रत्यासत्त्या तत्रैव स्थानिवत्सूत्रं प्रवर्तेत, नानुमानिके । एवञ्च भवतु इत्यादेस्तिङ्त्वाभावेन पदत्वं न स्यात् । आनुमानिकेऽपि स्थानिवद्भावे तु तेस्तिङ्त्वं तु शब्दे स्थानिवत्त्वेनादाय पदत्वं सिद्ध्यति । आदेशग्रहणसामार्थ्यात्प्रत्यासत्तिन्यायबाधेन आनुमानिकस्यापि ग्रहणं सिद्ध्यति । अर्थप्रत्यायनार्थमेव शब्दप्रयोगात् अर्थवत एव उच्चारणस्य बुद्धेश्च प्रसक्तौ अर्थवत्सु एव स्थान्यादेशकल्पना । तद्वक्ष्यते – “ युष्मदस्मद्भ्यां ङसोऽश् ”[1444] इति सूत्रे

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।

एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥

ननु छिन्नपुच्छे शुनि = पुच्छरहिते कुक्करेऽपि कुक्करत्वव्यवहारो भवति नाश्वत्वादिव्यवहारः इति लोकव्यवहारसिद्धेन ‘ एकदेशविकृतमनन्यवत् ’ इति न्यायेन ‘ पचतु ’ इत्यादौ तोस्तित्वमतिदिश्य तिङन्तत्वात् पदत्वसिद्ध्या स्थानिवत्सूत्रे आनुमानिकस्थान्यादेशभावस्य ग्रहणे फलाभावः । भाष्यकारेण चायं न्यायः “ प्राग्दीव्यतोऽण् ”[1445] इति सूत्रे आश्रितः । तथा हि “ प्राग्दीव्यतोऽण् ” इत्यत्र ‘ दीव्यत् ’ इति “ तेन दीव्यति खनति जयति जितम् ”[1446] इति सूत्रस्य दीव्यतिशब्दैकदेशदीव्यत् – इत्यस्यानुकरणम् । एकदेशस्य विकृतस्य निर्देशः किमर्थं क्रियते । एतदेव – लोकसिद्धाश्रयणमेव परिभाषारूपं, आचार्यः पाणिनिः ज्ञापयति – एकदेशविकृतमनन्यवदिति । अनेन न्यायेनैव सिद्धे ‘ पचतु ’ इत्याद्यर्थं स्थानिवत्सूत्रस्य नोपयोगः इति चेन्न, अल्पावयवविकारे सति अधिकावयवस्य अविकृतस्य

1442 अष्टाध्यायी – (7-2-101)

1443 अष्टाध्यायी – (3-4-86)

1444 अष्टाध्यायी – (7-1-27)

1445 अष्टाध्यायी – (4-1-83)

1446 अष्टाध्यायी – (4-4-2)

दर्शनेन एतज्जातीयोऽयमिति ज्ञातुं शक्यते । यत्र तु अर्धं तदधिकं वा विकृतं तत्र जातीयव्यञ्जकस्य अधिकावयवदर्शनस्यासत्त्वेन किञ्जातीयः को वेति न स्फुटं ज्ञायते । एतन्मूलक एव ' अर्धविकारे अर्धाधिकविकारे ' न्यायो न प्रवर्तते इति नियमः । प्रकृते तिशब्दे अर्धाधिकस्य इकारस्य विकृतत्वेन उक्तन्यायाप्रवृत्तौ स्थानिवद्भाव आवश्यकः ।

अपि च – परिच्छिन्नपरिमाणे नास्य न्यायस्य प्रवृत्तिः । अत एव शतात् न्यूने शतमिति न प्रयुज्यते । एवञ्च " आदिरन्त्येन सहेता "[1447] इति सूत्रेण बोधिता " तिप्तस्झि........ "[1448] इति सूत्रस्थतिशब्दादारभ्य महिङो ङकारपर्यन्तं तिबादिषु तिङ्सञ्ज्ञा नियताक्षरेषु वर्तमाना परिच्छिन्नपरिमाणतया विकृतेषु तिङ्व्यवहारासम्भवेन स्थानिवद्भावः तत्रावश्यकः । परिच्छिन्नपरिमाणत्वञ्च यद्धर्मावच्छिन्नज्ञानोत्तरं संख्यात्वव्याप्यधर्मप्रकारकः परिमाणत्वव्याप्यधर्मप्रकारको वा संशयो नोदेतीति तत्त्वम् । यथा – संख्यात्वव्याप्यो धर्मः द्वित्वत्वत्रित्वत्वादिरूपः, तद्धर्मावच्छिन्ना त्रित्वत्वावच्छिन्ना वा या द्वित्वत्रित्वादिनिष्ठा विषयता तद्विषयकज्ञानोत्तरं द्वौ वा त्रयो वा इति ज्ञानोत्तरं संख्यात्वव्याप्यद्वित्वत्रित्वादिसंख्याप्रकारकः संशयो न जायते, द्विसंख्यानिश्चयस्य द्वित्वसंख्याप्रकारकसंशयस्य प्रतिबन्धकत्वात् । एवं तिङ्त्वमपि परिमाणिताक्षरेषु सत्त्वात् परिच्छिन्नपरिमाणत्वं बोध्यम् । तथा च नियताक्षरारब्धसमुदायवृत्तिधर्माणां अर्धस्य अर्धाधिकस्य वा विकारेण न्यूनतायां आधिक्ये, वैरूप्ये वा शास्त्रव्यापारं विना विरहात् न तत्प्रयुक्तानि कार्याणि प्राप्नुवन्तीति निष्कर्षः ।

एवं हि भाष्यम् – या एताः सर्वाद्युपादानेन परिच्छिन्नपरिमाणाः सञ्ज्ञाः कृताः ताः कथमकजादिविशिष्टा भविष्यन्ति । यथा लोके वा शतादिव्यवहारो द्रोणादिसञ्ज्ञाव्यवहारो वा न भवति । परिच्छिन्नपरिमाणे न्यायाप्रवृत्तिरनेन सूचिता[1449] ।

गुरुवर्याः महावैयाकरणाः भोलेझाः ' भाषावृत्तेः समीक्षात्मकमध्ययनम् ' इति नामके ग्रन्थे स्वमतं प्राहुः – ' पचेर्लोटि तिपि शपि ' पचति ' इत्यस्य तिङन्तत्वेन पदत्वे जाते पश्चात् " एरुः " इत्युकारे अन्तादेशे पचतीतिपदावयवेकारस्यादेशे अर्धस्य तदधिकस्य वा विकारस्याभावात् एतन्न्यायाप्रवृत्तिकथनावसराभावात् न्यायेनैव पदत्वे लब्धे सति कृतेनात्र सूत्रे आदेशग्रहणेन न्यायानाश्रयणलाघवम् । अत उक्तं भाष्यकृता – एकदेशविकृतस्योपसंख्यानं चोदयिष्यति, तन्न वक्तव्यं भवति ' ।

[1447] अष्टाध्यायी – (1-1-71)

[1448] अष्टाध्यायी – (3-4-78)

[1449] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे

अत्र च स्थानिसदृश आदेश इत्येव बोध्यते, सादृश्यमूलकाश्च तत्तद्धर्मारोपा ऊह्याः । स आरोपः शाब्दिक आर्थिकश्च भेदाद् द्विविधः । यथा –

1. " स्थानिवदादेशोऽनल्विधौ "[1450] इति सूत्रे अतस्मिन् तद्बुद्धिः इत्यस्यारोपो भवति । स वद्घटितपदेन भवति । अतस्मिन्नारोपे वत्शब्दस्य श्रुतत्वात् शब्दाऽतिदेश इत्युच्यते ।

2. " असंयोगाल्लिट् कित् "[1451] इति सूत्रे वत्पदं नास्ति । अतः इदमतिदेशसूत्रं भवति अर्थाऽतिदेशः । यतो हि अपित् लिट् तु कित् न भवति । अतस्तस्याऽर्थः किद्वत् स्वीक्रियते । वत् शब्दमन्तरेणापि वत् इत्यर्थस्य प्रतीतेस्तादृशोऽतिदेश अर्थाऽतिदेश उच्यते । तदुक्तं भगवता भाष्यकारेण " बहुगणवतुडति संख्या "[1452] इति संख्यासञ्ज्ञासूत्रे – अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा – ' एष ब्रह्मदत्तः, अब्रह्मदत्तं ब्रह्मदत्त इत्याह, ते मन्यामहे ब्रह्मदत्तवदयं भवति इति । एवमिहापि असंख्यां संख्यामित्याह, संख्यावदिति गम्यते '[1453] ।

अतिदेशः त्रिविधो भवति । यथा –

1. संज्ञाऽतिदेशः – " सार्वधातुकमपित् "[1454] इति सूत्रेण ङिद्वद् अतिदेश इत्यादौ ।

2. स्थान्यतिदेशः – " स्थानिवदादेशोऽनल्विधौ "[1455] इति सूत्रेण स्थानिवदादेशः इत्यादौ ।

3. युक्ताऽतिदेशः – " लुपि युक्तवद् व्यक्तिवचने "[1456] इत्यादौ ।

कार्यदृष्ट्याऽतिदेशं चतुर्विधो विभक्तुं शक्यते । यथा –

1. शास्त्राऽतिदेशः – " स्थानिवदादेशोऽनल्विधौ "[1457] शास्त्राऽतिदेशस्योदाहरणं भवति ।

2. कार्याऽतिदेशः – " प्रत्ययलोपे प्रत्ययलक्षणम् "[1458] कार्याऽतिदेशस्योदाहरणं भवति ।

3. व्यपदेशाऽतिदेशः – " आद्यन्तवदेकस्मिन् "[1459] व्यपदेशाऽतिदेशस्योदाहरणं भवति ।

[1450] अष्टाध्यायी – (1-1-56)
[1451] अष्टाध्यायी – (1-2-5)
[1452] अष्टाध्यायी – (1-1-23)
[1453] महाभाष्यम् – प्रकृतसूत्रे
[1454] अष्टाध्यायी – (1-2-4)
[1455] अष्टाध्यायी – (1-1-56)
[1456] अष्टाध्यायी – (1-2-51)
[1457] अष्टाध्यायी – (1-1-56)
[1458] अष्टाध्यायी – (1-1-62)
[1459] अष्टाध्यायी – (1-1-21)

4. रूपाऽतिदेशः – पतञ्जलिजयादित्यवामनादीनां मते “ द्विर्वचनेऽचि ”[1460] सूत्रमिदं रूपाऽतिदेशस्योदाहरणं भवति[1461] ।

बालमनोरमाकारेण श्रीवासुदेवदीक्षितेन “ तृज्वत्क्रोष्टुः ”[1462] इति सूत्रव्याख्यानप्रसङ्गे सिद्धान्तकौमुद्या बालमनोरमाटीकायाम्, अतिदेशस्य सप्तभेदाः प्रतिपादिताः । उक्तञ्च –

कार्यरूपनिमित्तार्थशास्त्रतादात्म्यशब्दिताः ।

व्यपदेशश्च सप्तैतान्नतिदेशान् प्रचक्षते ।।

1. कार्यातिदेशः, 2. रूपातिदेशः, 3. निमित्तातिदेशः, 4. अर्थातिदेशश्चेति, 5. शास्त्रातिदेशः, 6. तादात्म्यातिदेशः, 7. व्यपदेशातिदेशः ।

1. कार्यातिदेशः

कार्यस्य अतिदेशः इति कार्यातिदेशः । प्रत्ययेषु लुप्तेष्वपि लुप्तप्रत्ययनिमित्तङ्कार्यं कार्यातिदेशेन सिद्धं भवति । “ प्रत्ययलोपे प्रत्ययलक्षणम् ”[1463] सूत्रमिदं कार्यातिदेशस्योदाहरणम् । तद्यथा – ‘ अग्निचित्, सोमसुत् ’ इत्यत्र क्विप्प्रत्ययस्य लोपेऽपि क्विप्प्रत्ययाश्रितं यत्कार्यं “ ह्रस्वस्य पिति कृति तुक् ”[1464] इति सूत्रेण तुक् भवत्येव । क्विप्प्रत्ययो यथा पित् कृत् च वर्तते । तमेवाश्रित्य तुक् भवति कार्यातिदेशमाध्यमेन । नो चेत् लुप्ते प्रत्यये कथं कार्यं स्यादिति जिज्ञासायामेव मन्ये वैयाकरणैः कार्यातिदेशस्य युक्तियुक्ता कल्पना स्वीकृता ।

उदाहरणानि च - “ गोतो णित् ”[1465] इति सूत्रेण णिति वृद्धिरूपं यत्कार्यं तदतिदिश्यते । तेनायमर्थः – अणितः सर्वनामस्थानस्य स्थाने णित्सर्वनामस्थानमादेशो भवति । गोशब्दस्य सर्वनाम-स्थाने णितीति कार्यं भवतीति भावः । तेन ‘ गौः, गावौ ’ इत्यादीनि रूपाणि सिद्ध्यन्ति । यद्वा “ कर्मवत् कर्मणा तुल्यक्रियः ”[1466] इति सूत्रेण कर्मणि लकारे यत् कार्यं तत् कर्मणा तुल्यं कर्तरि अतिदिश्यते । तेन कर्मकर्तरि ‘ अनुक्रियते, पराक्रियते ’ इत्यत्र “ अनुपराभ्यां कृञः ”[1467] इति सूत्रं बाधित्वा परत्वात् “

[1460] अष्टाध्यायी – (1-1-59)
[1461] पाणिनिसूत्रार्थतत्त्वालोकः – (पृ. – 93)
[1462] अष्टाध्यायी – (7-1-95)
[1463] अष्टाध्यायी – (1-1-62)
[1464] अष्टाध्यायी – (6-1-70)
[1465] अष्टाध्यायी – (7-1-90)
[1466] अष्टाध्यायी – (3-1-87)
[1467] अष्टाध्यायी – (1-3-79)

कर्मवत्कर्मणा तुल्यक्रियः " इति सूत्रेण आत्मनेपदमेव भवति । शास्त्रातिदेशे तु " भावकर्मणोः "[1468] इति सूत्रं बाधित्वा परत्वाद् " अनुपराभ्यां कृञः " इति सूत्रेण परस्मैपदापत्तिः ।

2. रूपातिदेशः

अस्य तु नाम्नैव स्पष्टमेतत् । यत् रूपस्यात्र अतिदेशो भवति । तद्यथा क्रोष्टुः शब्दः ह्रस्व उकारान्तस्स्यात्तस्य ऋकारान्तत्वमत्र भवति । एतस्योदाहरणम् - " तृज्वत्क्रोष्टुः "[1469] इति सूत्रम् । तत्र तृज्वद् भवति इत्युक्ते तृच्छब्दस्य यद्रूपं तदतिदिश्यत इति कस्यचिद् भ्रान्तिः स्यात्, अतः तां निराकर्तुमेव मन्ये काशिकाकारेणोक्तम् – तृजन्तस्य यद्रूपमिति । तृजन्तस्य यद्रूपमिति काशिकाकारस्य कथनेन तृजन्तस्य यद्रूपं तद् क्रोष्टुशब्दस्यातिदिश्यते तदा यत्किञ्चिदेव तृजन्तस्य रूपम् – ' वक्तृ पक्तृ ' इत्येवमाद्यपि प्राप्नोति । न चैवं भवति । महाभाष्यकारेण " तृज्वत् क्रोष्टुः " इति सूत्रे रूपातिदेशं स्वीकृतवता क्रोष्टुशब्दस्य स्थाने आन्तरतम्यात् (अर्थेन रूपेण) च यस्यान्तर्यं तदेव रूपमतिदिश्यते न पुनः ' पक्तृ, वक्तृ' इति यस्य कस्यचिदपि तृजन्तस्य रूपस्यातिदेशः । अर्थेन रूपेण च सादृश्यं क्रोष्टोर्यदन्तरतमं तदतिदिश्यते । तच्च पुनः क्रुशेर्यस्तृज्विहितस्तदन्तम् । क्रोष्टुशब्दरूपस्य स्थाने ' क्रोष्टृ ' इत्येतद् भवतीति । यतो ह्यत्र रूपस्य प्राधान्यं भवत्येव । कृते च रूपातिदेशे क्रोष्टृशब्दः ऋकारान्तः, तस्माद् " ऋदुशनस्पुरुदंसोऽनेहसां च "[1470] तान्यपि कासुचित् विभक्तिषु एव न सर्वत्र । ' क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टून् । क्रोष्ट्रा क्रोष्टुना, क्रोष्टुभ्यां क्रोष्टुभिः ' । ' क्रोष्ट्रे क्रोष्टवे, क्रोष्टुः क्रोष्टोः ' इत्यनङादेशे कृते " सर्वनामस्थाने चासम्बुद्धौ "[1471] इति दीर्धत्वे च ' क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टारौ क्रोष्टून् ' इति सिद्ध्यन्ति ।

मन्ये पाणिनिना इदमेवाभीष्टं स्याद् यत् क्रोष्टुशब्दस्य तृचि एव रूपाणि यथा भवेयुरिति । यद्येवं न स्यात्तर्हि पाणिनिविरचितानाम् " तृज्वत् क्रोष्टुः ", " स्त्रियां च "[1472], " विभाषा तृतीयादिष्वचि "[1473] इत्यादीनां सूत्राणां किम्प्रयोजनम् । तस्मात् क्रोष्टुशब्दस्य ' क्रोष्टृ ' इत्येव रूपं स्यात् । तदर्थं रूपातिदेशः अङ्गीकृतः । तद्येवं न स्यात्तर्हि सूत्राणां प्रयोजनमपि नासीत् किमपि ।

[1468] अष्टाध्यायी – (1-3-13)
[1469] अष्टाध्यायी – (7-1-95)
[1470] अष्टाध्यायी – (7-1-94)
[1471] अष्टाध्यायी – (6-4-8)
[1472] अष्टाध्यायी – (7-1-96)
[1473] अष्टाध्यायी – (7-1-97)

एवमेव " द्विर्वचनेऽचि "[1474] अस्य सूत्रस्य काशिकायामुल्लिखितं यद् – ' रूपातिदेशश्चायं नियतकालः, तेन कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते ' । कानिचित् उदाहरणानि सन्ति – ' पपतुः पपुः, जग्मतुः जग्मुः ' । अत्र ' पा + अतुस्, पा + उस् ' " लिटि धातोरनभ्यासस्य "[1475] इति सूत्रेण द्वित्वमस्यापेक्षया च परत्वाद् " आतो लोप इटि च "[1476] इत्यनेन पूर्वं द्वित्वात् आकारलोपप्राप्तिः । यदि पूर्वमाकारस्य लोपः स्यात्तर्हि अनच्कत्वाद् द्वित्वमपि नैव भवितुं शक्यते ।

अस्यां स्थितौ अत्र पक्षद्वयं भवति । लघुसिद्धान्तकौमुद्याम् – ' अस्य वृत्तौ उल्लिखितं यद् – द्वित्वनिमित्तेऽचि अचः आदेशो न स्याद् द्वित्वे कर्तव्ये ' । इति नियमेन आकारलोपात् पूर्वमेव द्वित्वं भवति । कृते च द्वित्वे, आकारलोपे सति ' पपतुः, पपुः ' इत्येतत् सिद्धम् । अतोऽस्मिन् पक्षे रूपातिदेशस्य नास्त्यावश्यकता ।

वस्तुतः सूक्ष्मेक्षिकया यद्यत्र पश्यामः तर्हि ' पा + अतुस्, पा + उस् ' इत्यवस्थायां द्वित्वमपि प्राप्नोति अथ च " असंयोगाल्लिट् कित् "[1477] इति नियमात् " आतो लोप इटि च "[1478] इत्यनेन आकारलोपप्राप्तिरपि । किञ्च तुल्यबलविरोधे सति विप्रतिषेधो भवति । सति चात्र " विप्रतिषेधे परं कार्यम् "[1479] इति सूत्रेण नियमोऽत्र कथं न स्याद् । अर्थात् स्यादेव । परं कार्यन्तु आकारलोप एव । कृते चाकारलोपे ' प् + अतुस् ' इत्यनच्कत्वात् कथं द्वित्वप्राप्तिः स्याद् । अतः काशिकाकृता योऽर्थः कृता अस्य सूत्रस्य स एवार्थो युक्ततरः पूर्वपक्षात् । एनमर्थमाधारीकृत्य ' पा + अतुस् ' अत्र पूर्वं परत्वात् " आतो लोप इटि च " इति सूत्रेण आकारलोपे कृते ' प् + अतुस् ' इति स्थितौ अच्त्वाभावे द्वित्वाभाव-प्राप्तिरत " द्विर्वचनेऽचि " इत्यनेन रूपातिदेशः कृतः । अर्थात् स्थानिनः ' पा ' इत्यस्य यथारूपं तथैव स्यादित्यर्थः । मन्येऽत एव रूपातिदेशस्यावश्यकता जाता । येन च इष्टसिद्धिर्यथा भवेत् । महाभाष्य-कारेणापि अयमेव पक्षः सिद्धान्तपक्षरूपेणोपस्थापितः यथा – ' पपतुः, पपुः । तस्थतुः, तस्थुः । जग्मतुः, जग्मुः । आटिटत्, आशिशत् । चक्रतुः, चक्रुः ' इति । आल्लोपोपधालोपणिलोपयणादेशेषु कृत्वेष्वनच्कत्वाद् द्विवचनं न प्राप्नोति । स्थानिवद्भावाद् भवति । तस्मात्स्थानिवदित्येष एव पक्षो

[1474] अष्टाध्यायी – (1-1-59)

[1475] अष्टाध्यायी –(6-1-8)

[1476] अष्टाध्यायी – (6-4-64)

[1477] अष्टाध्यायी – (1-2-5)

[1478] अष्टाध्यायी – (6-4-64)

[1479] अष्टाध्यायी – (1-4-2)

ज्यायान् '[1480] । पक्षद्वयेऽपि फले नास्ति कश्चनान्तरः केवलं प्रक्रियाभेद एव । परमपि रूपातिदेशाङ्गीकरणेन परत्वादाकारस्य लोपेऽपि नास्ति काऽपि बाधा ।

3. निमित्तातिदेशः

अस्मिन् अतिदेशे निमित्तस्य कारणस्य हेतोर्वा महन्महत्त्वं भवति तदर्थमुच्यते निमित्तातिदेशः । अस्यातिदिशस्य प्रयोजनं " पूर्ववत्सनः "[1481] इत्यत्र भवति । सनः पूर्वो यो धातुः आत्मनेपदी तद्वत्सन्नन्तादात्मनेपदं भवति । येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते तेनैव सन्नन्तादपि भवति । इत्थञ्चानेन पूर्ववत्सनः सूत्रेण प्रकृतिगतमेव अनुदात्तेत्वं, ङित्त्वं, ञित्त्वं वा सन्नन्तेऽतिदिश्यते, तेन ' एदिधिषते ' इत्यादावात्मने पदं सिद्ध्यति ।

यद्ययं कार्यातिदेशः – यथा पूर्वस्माद् आत्मनेपदं विधीयते तथा सन्नन्तादपीति । कार्यातिदेशस्वीकरणपक्षे ' शीयते ' इत्यत्र यथा आत्मनेपदं तद्वत् सन्नन्तादपि स्याद् आत्मनेपदम् । ' शिशत्सते ' इत्यनेन भाव्यम् । यावतात्र शित्वं नास्ति । अत एवात्र निमित्तातिदेशो गृह्यते । तेन च पूर्वस्य यन्निमित्तं ङित्त्वादि, अनुदात्तेत्वं शित्त्वं वा तत्सन्नन्तस्याप्यतिदिश्यते ।

निमित्ते चातिदिष्टे तत्प्रयुक्तत्वादेव कार्यं भवति । किञ्चात्र ' शिशत्सति ' इत्यत्र सनः पूर्वः शित्त्वं नास्ति । अतो न भविष्यति आत्मनेपदम् । परस्मैपदमेवात्र बोध्यम् । तस्मादत्र निमित्तातिदेशस्य कल्पनं समुचितमेव । अत एवाह पदमञ्जरीकारः – ' यद्ययं कार्यातिदेशः शास्त्रातिदेशो वा विज्ञायेत, तदा सन्प्रकृतौ प्रयोगान्तरे दृष्टमित्येव निमित्तनिरपेक्षं कार्यं शास्त्रं वातिदिश्यमानमिहाप्यतिदिश्येत – ' शिशत्सति, मुमूर्षति, शीयते, म्रियते ' इत्यत्र दृष्टत्वादिति मतेऽनयोः पक्षयोर्दोषं दृष्ट्वा निमित्तातिदेशमाश्रीयते इत्यर्थः '[1482] ।

4. अर्थातिदेशः

" जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् "[1483] इति सूत्रेण एकत्वविशिष्टेऽर्थे बहुत्वरूपार्थातिदेशः । तेन ' ब्राह्मणाः पूज्याः ' इत्यत्र विशेषणादपि बहुवचनं सिद्ध्यति, यदि तु एकवचनस्य स्थाने बहुवचनप्रत्ययः स्यात् तदा व्रीहिभ्यः आगतः इत्यत्र " जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् " इति सूत्रेण ङसेः स्थाने बहुवचने " घेर्ङिति "[1484] इति सूत्रेण गुणः प्रसज्यते ।

[1480] भाष्यम् – (1-1-59)

[1481] अष्टाध्यायी – (1-3-62)

[1482] काशिका – पदमञ्जरीटीका – (1-3-62)

[1483] अष्टाध्यायी – (1-2-58)

[1484] अष्टाध्यायी – (7-3-111)

एकवचनं बाधित्वा बहुवचनमित्यर्थे तु जातिवाचकादेव बहुवचनं स्यान्न तु तद्विशेषणात्। अर्थातिदेशे तु विशेषणानां विशेष्यार्थगतसंख्याबोधकत्वात्ततोऽपि बहुवचनम्[1485]।

5. शास्त्रातिदेशः –

‘ परिवीः ’ व्येञ्धातोः क्विपि तस्य लोपे सम्प्रसारणे च शास्त्रातिदेशेन “ ह्रस्वस्य पिति कृति तुक् ” इति सूत्रेण कृतं तुकं बाधित्वा “ हलः ” इति सूत्रेण परत्वाद् दीर्घः।

6. तादात्म्यातिदेशः – (तादात्म्यं तदङ्गता) – ‘ द्रवत्पाणि शुभस्पती ’ इत्यत्र “ सुबामन्त्रिते पराङ्गवत्स्वरे ” इति सूत्रेण शुभ इति षष्ठ्यन्तस्य पतिशब्दतादात्म्यमतिदिश्यते। तेन “ आमन्त्रितस्य च ” इति सूत्रेण ‘ शुभस्पती ’ इति समुदायस्यामन्त्रितत्वात् शकारोकारस्याद्युदात्तत्वं सिद्ध्यति।

7. व्यपदेशातिदेशः

अमुख्ये मुख्यव्यवहारो व्यपदेशः। अस्य व्यपदेशस्य स्वीकरणपक्षे अयं लाभो भवति। यथा “ अत इञ् ”[1486] इति सूत्रेण अदन्तात् प्रातिपदिकाद् इञ्प्रत्ययो भवति। इति स्वीकृते सति वासुदेव-वाचकाद् अशब्दाद् अस्यापत्यमित्यर्थे इञ् न स्यात्। अतः व्यपदेशातिदेशे स्वीकृते सति ‘ आभ्याम् ’ इत्यत्र अरूपेऽङ्गे “ आद्यन्तवदेकस्मिन् ” इति सूत्रेण अदन्ताङ्गत्वातिदेशः।

तत्र न तावदत्र निमित्तातिदेशः, वचनशतेनापि ‘ ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम् ’ इत्यादौ ब्राह्मणशब्दप्रवृत्तिनिमित्तम् इवातिदेष्टुमशक्यत्वात्। नापि व्यपदेशातिदेशः, सञ्ज्ञासञ्ज्ञि-सम्बन्धादभिन्नत्वात्। सञ्ज्ञासञ्ज्ञिसम्बन्धे वत्करणानर्थक्यात्। अप्रधानत्वाच्च नात्र शास्त्रातिदेशोऽपि। रूपातिदेशोऽपि न, आदेशविधानवैयर्थ्यप्रसङ्गात्। तादात्म्यातिदेशोऽपि न, असम्भवात्, द्वयोः सहावस्थितयोरेव तादात्म्यातिदेशसम्भवात्। ‘ अनल्विधौ ’ इति निषेधाच्च नात्रार्थातिदेशोऽपि। अत्र आदेशेन स्थानिनो निवर्तितत्वात्। अतः पारिशेष्यात् प्राधान्याच्च कार्यातिदेशोऽयम्। उक्तञ्च काशिकाकृता – ‘ स्थानिवदादेशो भवति, स्थान्याश्रयेषु कार्येषु अनलाश्रयेषु, स्थान्यलाश्रयाणि कार्याणि वर्जयित्वा ’[1487]। स्थानिवत्सूत्रेण शास्त्रस्यातिदेशेऽपि कार्यस्यैव लक्ष्ये विधीयमानत्वेन उद्देश्यतया प्राधान्यात् कार्यस्यैवातिदेशः स्वीकर्तव्यः। शास्त्रातिदेशस्य कार्यातिदेशस्य च समानफलत्वाद्

[1485] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1486] अष्टाध्यायी – (4-1-95)

[1487] काशिका – प्रकृतसूत्रे

अभिन्नरूपता तयोः । अत नागेशोऽपि आह – प्राधान्यात् कार्यातिदेशोऽयम् । शास्त्रातिदेशस्तु कार्यातिदेशादभिन्नरूपः । तस्यापि कार्यफलकत्वादिति तृज्वत्सूत्रे कैयटः[1488] ।

यद्यपि “ स्थानिवदादेशोऽनल्विधौ ” इति सूत्रं भाष्ये प्रत्याख्यातम् । तथा हि – आचार्यप्रवृत्तिर्ज्ञापयति – स्थानिवदादेशो भवतीति । यदयं “ युष्मदस्मदोरनादेशे ”[1489] इति आदेशे प्रतिषेधं शास्ति इति । अयम्भावः – विभक्तौ परतः युष्मदस्मदोरादेशा विधीयन्ते । सुप्तिङोर्विभक्तित्वादादेशस्य विभक्तित्वाभावादेव “ युष्मदस्मदोरनादेशे ” इत्यात्वाप्राप्त्या अनादेशग्रहमं व्यर्थीभूय कल्पयति – आदेशः स्थानिवद् भवति इत्यादेशेऽपि स्थानिवत्त्वेन विभक्तित्वादाकारादेशे प्राप्ते तद्वारणाय ‘ अनादेशे ’ इति चरितार्थम् । फलञ्च तत्र तत्र स्थानिवद्भावसिद्धिः । न चाल्विधौ स्थानिवद्भावनिषेधार्थं सूत्रम्, अल्विधावपि ज्ञापकेनैव स्थानिवद्भावाभावसिद्धेः । तथा हि – यदि सर्वत्रैव आदेशः स्थानिवत्स्यात्तदा “ अदो जग्धिर्ल्यप्ति किति ”[1490] इति सूत्रे ल्यप्ग्रहणं व्यर्थमेव स्यात्, ‘ प्रजग्ध्य ’ इत्यादौ क्त्वागतं तादित्वं स्थानिवद्भावेन ल्यबादेशे आदाय जग्ध्यादेशसिद्धेस्तद् व्यर्थं सञ्ज्ञापयति – अल्विधिः स्थानिवन्नेति । तथा च तत्त्वस्याल्मात्रवृत्तिधर्मत्वेन तादित्वस्य तद्घटितत्वेन स्थानिवन्न स्यादतः तिग्रहणं चरितार्थम् । तस्य फलम् – ‘ प्रपठ्य ’ इत्यत्र नेट् । इति प्रत्याख्यानपक्षस्तु न युक्तः, उत्तरसूत्रस्य “ अचः परस्मिन्पूर्वविधौ ”[1491] इत्यस्यावश्यकत्वे तत्र स्थानिवदादेशः इत्यस्यावश्यं वक्तव्यत्वे ज्ञापकरूपार्थापत्त्या वचनकल्पने ज्ञानगौरवेण प्रत्यक्षसूत्रकरणे एव लाघवात्[1492] ।

- **अचः परस्मिन् पूर्वविधौ – (1-1-56)**

सूत्रार्थः - पूर्वस्य विधिः इति पूर्वविधिः, तस्मिन् पूर्वविधौ, षष्ठीतत्पुरुषः । विधानं विधिः । “ स्थानिवदादेशोऽनल्विधौ ” इति पूर्वसूत्रात् ‘ स्थानिवद् ’, ‘ आदेशः ’ इति पदद्वयमनुवर्तते । ‘ अचः ’ इति षष्ठ्यन्तं पदं सम्बध्यतेऽनुवृत्तेन ‘ आदेशः ’ इत्यनेन । अत एवानुवादे परिभाषाऽप्रवृत्तावपि आदेशपदसम्बन्धेन अचः स्थानित्वनिर्णयेन ‘ अचः ’ इति षष्ठ्याः स्थानार्थकत्वं सम्पद्यते । परस्मिन्निति सप्तमी निमित्तार्थिका । पूर्वविधाविति विषयसप्तमी । परनिमित्तकोऽजादेशः पूर्वविधौ कर्तव्ये स्थानिवद्

[1488] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

[1489] अष्टाध्यायी – (7-2-86)

[1490] अष्टाध्यायी – (2-4-36)

[1491] अष्टाध्यायी – (1-1-57)

[1492] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

भवति। स्थान्यजपेक्षयात्र पूर्वत्वमभिप्रेतम्। पूर्वेण सूत्रेणाल् विधौ स्थानिवद्भावस्य निषेधः प्राप्नोति, अनेन सूत्रेण पुनः प्रतिप्रसूयते। उदाहरणञ्च – ‘ पटयति, अवधीत्, बहुखटवकः ’ इति।

‘ वव्रश्च ’ इत्यादौ “ न सम्प्रसारणे सम्प्रसारणम् ”[1493] इत्यस्य सम्प्रसारणत्वरूपाल्मात्रवृत्तिधर्म-निमित्तकत्वेऽपि स्थानिवद्भावार्थकत्वादित्याह महावैयाकरणः भट्टोजीदीक्षितः वैयाकरण-सिद्धान्तकौमुद्याम् – ‘ अल्विध्यर्थमिदम् ’। अल्विधित्वेऽपि स्थानिवद्भावार्थमित्यर्थः। यथा – व्रश्चधातोर्लिटि तिपि णलि द्वित्वे “ लिट्यभ्यासस्योभयेषाम् ”[1494] इति सूत्रेण अभ्यासरेफस्य सम्प्रसारणे “ सम्प्रसारणाच्च ”[1495] इति सूत्रेण पूर्वरूपे ‘ वृश्च वृश्च ’ इति जाते ऋकारस्य “ उरत् ”[1496] इति सूत्रेण अत्वे रपरत्वे सति “ हलादिः शेषः ”[1497] इति सूत्रेण आदिहल्शेषे ‘ वव्रश्च ’ इति दशायां पुनः “ लिट्यभ्यासस्योभयेषाम् ” इति सूत्रेण वस्य सम्प्रसारणे प्राप्ते “ अचः परस्मिन् पूर्वविधौ ” इति सूत्रेण ऋवृत्तिसम्प्रसारणत्वस्याल्मात्रवृत्तित्वेऽपि स्थानिवद्भावेनाकारस्य सम्प्रसारणतया “ न सम्प्रसारणे सम्प्रसारणम् ”[1498] इति सूत्रेण सम्प्रसारणत्वनिषेधे ‘ वव्रश्च ’ इति सिध्यति। “ स्थानिवदादेशोऽनल्विधौ ” इति सूत्रेण तु स्थानिवत्त्वं न स्यात् “ न सम्प्रसारणे सम्प्रसारणम् ” इति सूत्रेण कृतनिषेधस्याल्विधित्वात्। अकारादेशस्य स्थानी ऋकारस्तदवयव ऋकार एव तद्वृत्त्यल्त्वव्याप्यो धर्मः सम्प्रसारणत्वं तन्निमिकत्वं तस्येत्यल्विधित्वम्। किञ्च अत्र सूत्रे ‘ अनल्विधौ ’ इत्यस्यानुवृत्तौ प्रमाणाभावादल्विधौ प्रवृत्तौ बाधकाभावः।

अत एव “ न पदान्तद्विर्वचनवरेयलोप...... ”[1499] इति सूत्रे वरेग्रहणं चरितार्थम्। अन्यथा “ अतो लोपः ”[1500] इति सूत्रेण कृतलोपस्याकारस्य स्थानिघटकाज्निमित्तकत्वेनाल्विधित्वात्स्थानिवद्भावाप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव। “ अचः परस्मिन् पूर्वविधौ ” अत्र स्थानिवदादेशः इत्यनुवर्तते। ‘ अचः ’ इति स्थानषष्ठी, ‘ आदेशः ’ इत्यनेन सम्बन्धात्। तेनान्वये मानञ्च ‘ आगत्य ’ इत्यादौ अनुनासिकस्य हलो लोपे ‘ अचः ’ इत्युक्त्या स्थानिवत्त्वाभावेन तुक्साधनपरं भाष्यमेव। ‘ अचः ’ इत्यस्य पञ्चम्यन्तत्वे तु तद्भाष्यासङ्गतिः।

1493 अष्टाध्यायी – (6-1-37)

1494 अष्टाध्यायी – (6-1-17)

1495 अष्टाध्यायी – (6-1-106)

1496 अष्टाध्यायी – (7-4-66)

1497 अष्टाध्यायी – (7-4-60)

1498 अष्टाध्यायी – (6-1-37)

1499 अष्टाध्यायी – (1-1-58)

1500 अष्टाध्यायी – (6-4-48)

अत्र अजादेशपदेन अच एवादेशो ग्राह्यो न हलचोरादेशः । अत्र मानन्तु ‘ अचः ’ इति ग्रहणमेव । ‘ अचः ’ इत्यस्याभावे हलादेशस्य तु न स्थानिवत्त्वम् “ न सम्प्रसारणे सम्प्रसारणम् ” इत्यनेन हलादेशो न स्थानिवदिति ज्ञापनात् । यदि हलादेशोऽपि स्थानिवत्स्यात्तदा अन्त्यस्य यणः सम्प्रसारणत्वे ज्ञापितेऽपि वकारादेशे सम्प्रसारणे स्थानवत्त्वेन स्थानिनि सति यन्न भवति तस्मिन्सति यद्भवतीत्यर्थेन प्रकृतेऽभावातिदेशेन “ न सम्प्रसारणे सम्प्रसारणम् ” इकि सूत्रेण निषेधाप्राप्त्या पूर्वयणोऽपि सम्प्रसारणे यद्वैयर्थ्येन हलादेशो न स्थानिवदिति ज्ञापनात् ।

न च ‘ परस्मिन् ’ इति च निमित्तसप्तमी । औपश्लेषिकसप्तमीस्वीकारे सप्तम्यन्तार्थाव्यवहित-पूर्वस्याच आदेशे एवास्य प्रवृत्त्या घसधातोर्लिटि ‘ जक्षतुः ’ इत्यत्र तादृशाचः स्थाने आदेशाभावेन स्थानिवद्भावाप्राप्त्या “ न पदान्तद्विर्वचनवरेयलोप...... ” इति सूत्रे तन्निषेधाय कृतस्य चर्ग्रहणस्य वैयर्थ्यापत्तिः । निमित्तसप्तम्यां तु न दोषः, “ तस्मिन्निनि निर्दिष्टे पूर्वस्य ”[1501] इति परिभाषाया निमित्त-सप्तम्यामप्रवृत्त्या व्यवहिताव्यवहितस्याच आदेशमात्रे स्थानिवद्भावप्राप्त्या तन्निषेधार्थं चर्ग्रहणस्य चारितार्थ्यात् ।

‘ पूर्वविधौ ’ इत्यत्र पूर्वशब्दस्य व्यवस्थावाचितया नियमेनावधिसापेक्षतया, सन्निहितस्यैव चावधित्वस्य समुचितत्वेन, अत्र स्थानी, आदेशः, परनिमित्तञ्चावधित्वेन सन्निधत्ते । तत्र स्थानि-रूपाजपेक्षया एव पूर्वत्वं ग्राह्यम् । यतो हि आदेशापेक्षया निमित्तापेक्षतया वा पूर्वत्वं ग्रहीष्यते चेत्, तर्हि ‘ वैयाकरणः, सौवश्वः ’ इत्यादौ ऐच आयाद्यादेशापत्तिः । तथा हि ‘ वैयाकरणः ’ इत्यत्र यणः (यकाररूपादेशस्य) अपेक्षया पूर्व ऐकारः, तस्यायादेशे कर्तव्ये यणः स्थानिवत्त्वेनाच्त्वमाश्रित्य आयादेशापत्तिः । एवं यणादेशे निमित्तभूतो योऽच् आकारः, तदपेक्षयाऽपि पूर्व ऐच् ऐकारः (पूर्वशब्दस्य व्यवहिताव्यवहितसाधारणत्वात्) तस्यायादेशे कर्तव्ये स्थानिवत्त्वेन यणोऽच्त्वमाश्रित्यायादेश-प्रसङ्गात् “ वैयाकरणाख्यायां चतुर्थ्याः परस्य च ”[1502] इत्यादिनिर्देशासङ्गत्यापत्तिः स्यात्, यतो हि स्थानिभूतादचः पूर्वत्वस्य ग्रहणे तु विघटकेकारक्षणे ऐकारो नासीत्, यणादेशोत्तरं व्याकरणशब्दाद् अणि “ न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ”[1503] इति सूत्रेण ऐजादेशे ऐकारः प्रादुर्भवति, तदानीं यणादेशस्य स्थानी इकारो नास्तीति स्थानिभूतादचः पूर्वत्वाभावेन न स्थानिवद्भावः । अत आदेशापेक्षया निमित्तापेक्षया वा पूर्वत्वे गृह्यमाणे दोषसद्भावात् स्थान्यजपेक्षयैव पूर्वत्वं ग्राह्यम् । अत एवोक्तम्

[1501] अष्टाध्यायी – (1-1-66)

[1502] अष्टाध्यायी – (6-3-7)

[1503] अष्टाध्यायी – (7-3-3)

अष्टाध्यायीभाष्यप्रथमावृत्तौ – ‘ स्थान्यजपेक्षयात्र पूर्वत्वमभिप्रेतम् ’ इति । अत एवाह भाष्यकारः – ‘ अचः पूर्वत्वविज्ञानादैचोः सिद्धम् ’[1504] ।

किन्तु अत्रापि पक्षेऽयं दोषः, यत् पौर्वापर्यं विद्यमानेनैव सम्भवति । स्थानिरूपाचस्तु आदेशेनापहाराद् अविद्यमानतया कथं पूर्वत्वं प्रत्यवधित्वं सम्भवति ? ।

‘ साम्प्रतिकाभावे भूतपूर्वगतिराश्रीयते ’ इति न्यायेन आदेशात्पूर्वं स्थानिनिरूपित-पूर्वत्वस्यापेक्षितत्वात् । अर्थात् आदेशात्प्राक् स्थानिभूताजवधिकपूर्वत्वप्रकारकज्ञानविशेष्यमात्रस्य कार्ये कर्तव्ये परनिमित्तोऽजादेशः स्थानिवदित्यर्थः ।

यद्वा सोऽयं दोषः परिहृतः पूर्वत्वस्योपलक्षणत्वं स्वीकृत्य । अविद्यमानं सद् व्यावर्तकमुपलक्षणम् । यथा – ‘ काकवन्तो देवदत्तस्य गृहाः ’ इत्यत्र देवदत्तगृहे सर्वदा काकस्यासत्त्वेऽपि कदाचित् काकस्य सत्तादर्शनेन काक उपलक्षणतया देवदत्तगृहपरिचायकः । विशेषणं तु विद्यमानं सद् व्यावर्तकम्, यथा – ‘ रूपवान् घटः ’ इत्यत्र रूपम् । एवञ्च पूर्वत्वस्योपलक्षणत्वेन स्थानि-भूताज्निरूपितस्यैव पूर्वत्वस्य ग्रहणेन ‘ वैयाकरणः ’ इत्यादौ स्थानिभूताज्निरूपित-पूर्वत्वस्याभावेन ऐचोरायाद्यादेशे कर्तव्ये न स्थानिवदिति अत्र पक्षे न दोषः । परमत्रापि पक्षे ‘ तन्वन्ति ’ इत्यत्र स्थानिभूतो योऽच् उकारः, तदपेक्षया पूर्वः ‘ तन् ’ इति, तस्य कार्याभावात् स्थानिवत्त्वाभावे इडागमापत्तिमाशङ्क्य विधिशब्दस्य भावसाधनत्वमाश्रित्य ‘ पूर्वस्मात् विधिः ’ इति पञ्चमीसमास-पक्षमाश्रित्य वा समाहितं न्यासकृता[1505] ।

सूत्रे ‘ अचः ’ इत्यनुक्तौ हलोऽपि आदेशः परनिमित्तकश्चेत् पूर्वविधौ कर्तव्ये स्थानिवत्स्यात् । तथा सति ‘ आगत्य ’ इत्यादौ मलोपस्य स्थानिवत्त्वात् ह्रस्वाभावत्वेन “ ह्रस्वस्य पिति कृति तुक् ”[1506] इति सूत्रेण तुक् न स्यात् । ‘ अचः ’ इत्युक्तौ तु अजादेशभावान्न स्थानिवद् भवति । यदि तु “ न सम्प्रसारणे सम्प्रसारणम् ” इत्यादिज्ञापनेन हलादेशो न स्थानिवदित्युच्यते तदा अज्ग्रहणमज्झलादेशे स्थानिवत्त्ववारणाय पर्याप्त्या अचः स्थानित्वबोधनद्वारा स्पष्टार्थमेव । तेन ‘ मरुतमाचष्टे मारयति ’, ‘ पय आचष्टे पाययति ’ इत्यादावज्झलादेशस्य स्थानिवत्त्वेन वृद्ध्यभावो न, एवम् “ धिन्विकृण्व्योर च

1504 भाष्यम् – प्रकृतसूत्रे

1505 काशिका – न्यासः – प्रकृतसूत्रे

1506 अष्टाध्यायी – (6-1-70)

”[1507] इत्यविधानेन “ न धातुलोप आर्धधातुके ”[1508] इति सूत्रवैयर्थ्येन हलादेशो न स्थानिवदिति संसाध्य अज्ग्रहणमेव अच एवादेश इत्यर्थे मानं बोध्यम्[1509] ।

परस्मिन्निति किमर्थम् ? परस्मिन् इत्यस्यादेशविशेषणाभावे ‘ युवतिर्जाया यस्य ’ इति विग्रहे बहुव्रीहिसमासे “ जायाया निङ् ”[1510] इति सूत्रेण आकारस्य निङादेशे यकारस्य लोपे ‘ युवजानिः ’ इति सिध्यति । अत्र निङादेशस्थानिन आकारस्य स्थानिवद्भावेन “ लोपो व्योर्वलि ”[1511] इति वल्परत्वाभावात् न प्रवर्तेत । परस्मिन्निति विशेषणे निङादेशस्य परनिमित्तकत्वाभावेन “ अचः परस्मिन् पूर्वविधौ ” इत्यस्याप्रवृत्त्या यलोपः सिद्धः ।

न च “ न पदान्तद्विर्वचनवरेयलोप....... ” इत्यनेन यलोपे स्थानिवद्भावस्य प्रतिषेधात् परस्मिन्नित्यस्याभावेऽपि नास्ति दोषावकाश इति वाच्यम्, लोपाजादेशे एव स्थानिवद्भावस्य प्रतिषेधात् । इह तु निङ्रूपादेशः स च न लोपरूप इति निषेधाप्रवृत्तेः । परस्मिन्नित्यस्याभावे ‘ वैयाघ्रपद्यम् ’ इत्यत्रापि दोषः स्यात् । ‘ व्याघ्रस्य पादाविव पादौ यस्य ’ इति विग्रहे बहुव्रीहिसमासे “ पादस्य लोपोऽहस्त्यादिभ्यः ”[1512] इति सूत्रेण अकारलोपे तस्य अपत्यार्थे “ गर्गादिभ्यो यञ् ”[1513] इति सूत्रेण यञि ऐजागमे च उक्तरूपसिद्धिः । अत्र अल्लोपस्य स्थानिवद्भावाद् “ पादः पत् ”[1514] इति सूत्रेण पद्भावो न स्यात् । हलन्तस्यैव पादः तेन पदादेशस्य विधानात् । एतदर्थं तदुपात्तम्[1515] ।

पूर्वविधाविति किमर्थम् ? पूर्वविधौ कर्तव्ये स्थानिवद्भावस्य विधाने फलमाह भाष्ये भाष्यकारः – ‘ नैधेयः ’ । निपूर्वकात् धाञ्धातोः “ उपसर्गे घोः किः ”[1516] इति सूत्रेण किप्रत्यये, “ आतो लोप इटि च ”[1517] इति सूत्रेण आकारलोपे निष्पन्नाद् विधिशब्दात् “ इतश्चानिञः ”[1518] इति ढकि वृद्धौ ‘ नैधेयः

[1507] अष्टाध्यायी – (3-1-80)
[1508] अष्टाध्यायी – (1-1-4)
[1509] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे
[1510] अष्टाध्यायी – (5-4-134)
[1511] अष्टाध्यायी – (6-1-65)
[1512] अष्टाध्यायी – (5-4-138)
[1513] अष्टाध्यायी – (4-1-105)
[1514] अष्टाध्यायी – (6-4-130)
[1515] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे
[1516] अष्टाध्यायी – (3-3-92)
[1517] अष्टाध्यायी – (6-4-64)
[1518] अष्टाध्यायी – (4-1-122)

' । अत्र आलोपस्य स्थानिवद्भावेन द्व्यच्त्वविरोधि त्र्यच्त्वस्य बुद्धौ " इतश्चानिञः " द्व्यच्कलक्षणो ढक्प्रत्ययो न स्यात् । पूर्वविधौ इत्युक्ते तु ढकः पूर्वविधत्वाभावात् स्थानिवद्भावाभावे न दोषः[1519] ।

नन्वेवमपि विधिग्रहणं मास्तु ' पूर्वस्य ' इति षष्ठ्या कार्ये कर्तव्ये इत्यर्थस्याक्षेप्तुं शक्यत्वादिति चेन्न, ' पूर्वस्य विधिः ', ' पूर्वस्माद् विधिः ' इतिसमासद्वयलाभार्थं विधिग्रहणम् । तदुक्तं भाष्ये – ' विधिग्रहणं किमर्थम् ? सर्वविधविभक्त्यन्तसमासो यथा विज्ञायेत । पूर्वस्य विधिः पूर्वविधिः, पूर्वस्माद् विधिः इति पूर्वविधिरिति । कानि पुनः पूर्वस्माद्विधौ स्थानिवद्भावस्य प्रयोजनानि ? । बेभिदिता चेच्छिदिता । माथितिकः । अपीपचन् '[1520] इति । ' स्थानिभूतादचः पूर्वत्वेन दृष्टाद्वर्णात्परस्य विधौ कर्तव्ये स्थानिवत् ' इत्यर्थः । तथा हि – ' बेभिदिता ' इत्यत्र बेभिद्यशब्दात् तृचि नित्यत्वात् पूर्वमल्लोपयलोपयोः कृतयोः " एकाच उपदेशेऽनुदात्तात् "[1521] इति इण्निषेधः प्राप्नोति, तत्र ' उपदेशे ' इत्यस्य देहलीदीपकन्यायेन उभयान्वयित्वात् उपदेशे एकाच इण्निषेधात् ' बेभिद् ' इत्यस्य च कृतद्विर्वचनस्यानेकाच्त्वेऽपि उपदेशे भिद एकाच्त्वात् । ' पूर्वविधौ ' इत्यत्र पूर्वस्माद्विधिरिति पञ्चमीसमासाश्रयणे तु स्थानिभूतादचोऽकारात् परस्य वलाद्यार्धधातुकस्य तृच इडागमे कर्तव्ये अल्लोपस्य स्थानिवद्भावे तेन व्यवधानान्न निषेधः । षष्ठीसमासपक्षे तु न स्यात् स्थानिवत्त्वं स्थानिभूताकारात् पूर्वस्य विध्यभावात् । एवं ' माथितिकः ' इत्यत्र ' मथितं पण्यमस्य ' इति विग्रहे " तदस्य पण्यम् "[1522] इति सूत्रेण ठकि कृते " यस्येति च "[1523] इति सूत्रेण अल्लोपे कृते स्थानिवत्सूत्रेण स्थानिवद्भावेन इकस्य ठशब्दत्वमाश्रित्य " इसुसुक्तान्तात् कः "[1524] इति सूत्रेण कादेशः प्राप्तो भवति । अनेन पुनः पञ्चमीसमासपक्षे स्थानिभूताकारात्परस्य ठस्य कादेशाभावे कर्तव्ये अलोपस्य स्थानिवद्भावे तान्तात् परत्वाभावे न कादेशापत्तिः । ' अपीपचन् ' इत्यत्र चङकारस्य अन्त्यकारस्य च पररूपे तस्यादिवद्भावेन झित्वमादाय अभ्यस्तात् परस्य तस्य " सिजभ्यस्तविदिभ्यश्च "[1525] इति सूत्रेण जुसादेशे प्राप्ते पञ्चमीसमासपक्षे तु णिलोपस्य पररूपस्य वा पूर्वं यदभ्यस्तम् स्थानिवत्त्वेन तेन व्यवधानान्न जुस् । यद्यपि प्रातिपदिकनिर्देशस्यार्थतन्त्रत्वमाश्रित्य विधिग्रहणं विनाऽप्युभयसमासलाभे सिद्धे पुनर्विधि-

---

[1519] भाष्यम् – प्रदीपः – उद्द्योतः – काशिका – न्यासः – पदमञ्जरी – लघुशब्देन्दुशेखरः – स्वरसन्धिप्रकरणम् – प्रकृतसूत्रे

[1520] भाष्यम् – प्रकृतसूत्रे

[1521] अष्टाध्यायी – (7-2-10)

[1522] अष्टाध्यायी – (4-4-51)

[1523] अष्टाध्यायी – (6-4-148)

[1524] अष्टाध्यायी – (7-3-51)

[1525] अष्टाध्यायी – (3-4-109)

ग्रहणस्य ‘ स्थानिवदेव यथा स्यात्, मा भूत् स्वाश्रयम् ’ इति नियमार्थत्वं साधितं भाष्ये। तद्यथा – इदं तर्हि प्रयोजनम् – विधिमात्रे स्थानिवद्यथा स्यात्। अनाश्रीयमाणायामपि प्रकृतौ। ‘ वाय्वोः, अध्वर्य्वोः ’ “ लोपो व्योर्वलि ” इति यलोपो मा भूदिति[1526]।

‘ अपीपचन्, माथितिकः ’ इत्यादिलक्ष्यानुरोधात् पञ्चमीसमासाश्रयणस्यावश्यकत्वेऽपि तस्यानित्यत्वमप्यवश्यमभ्युपेयम् । अत एव ‘ हे गौः ’ इत्यत्र स्थानिवत्त्वेनौकारे ओकारवृत्त्येङ्त्वातिदेशात् “ एङ्ह्रस्वात्सम्बुद्धेः ”[1527] इति सूत्रेण सोर्लोपो न भवति । यदि तु पूर्वस्मादिति पञ्चमीश्रुत्या “ तस्मादित्युत्तरस्य ”[1528] इति परिभाषोपस्थापनात् स्थानिभूतादचः पूर्वत्वेन दृष्टादव्यवहितपरस्यैव कार्ये कर्तव्येऽतिदेशः । प्रकृते स्थानिभूतौकाररूपादचः पूर्वत्वेन दृष्टाद्गकारादव्यवहितपरं सुर्नास्ति, प्रत्युत ओकारेणौकारेण वा व्यपेतमेवेति स्थानिवद्भावाप्रवृत्त्या ‘ हे गौः ’ इत्यत्र सुलोपाभावो न पञ्चमीसमासानित्यत्वाश्रयप्रयोजनमित्युच्यते। ततः ‘ प्रविगणय्य ’ इति भाष्यप्रयोग एव तत्फलमिति विभावनीयम्। प्रविपूर्वकात् गणधातोः ‘ य ’ इति ल्यबन्ते अल्लोपे सति “ ल्यपि लघुपूर्वात् ”[1529] इति सूत्रेण गकाराकाररूपलघुपूर्वकणकारात्परत्वेन णेरयादेशे ‘ प्रविगणय्य ’ इति सिद्ध्यति । पञ्चमीसमासस्य नित्यत्वे तु स्थानिभूतादचो णकाराकारात्पूर्वत्वेन दृष्टात् णकारात्परस्य णेरयादेशे कर्तव्ये अल्लोपस्य स्थानिवत्त्वात् लघुपूर्वकणकारादव्यवहितपरत्वाभावेन णेरयादेशो न स्यात्।

यत्तु स्थानिवत्त्वेनातिदृष्टोऽकार एव व्यपदेशिवद्भावेन लघुपूर्वः। तथा तस्मात्परत्वाद् णेरयादेशे पूर्वोक्तरूपोपपत्तौ न किञ्चिद् बाधकमित्युच्यते, तदापातरमणीयम्। अतिदिष्टाकारस्य ससहायत्वेन असहाय एव व्यपदेशिवद्भावप्रवृत्त्या तस्य लघुपूर्वत्वमसम्भवि । ससहायत्वञ्चात्र मुख्य-धर्मवत्समभिव्याहृतत्वमेव। मुख्यधर्मोऽत्र लघुपूर्वकत्वम्। तच्च णकारे विद्यते। तद्वत्परत्वेन अकारस्य तत्त्वमिति भावः।

पञ्चमीसमासस्यानित्यत्वे प्रमाणं तु “ निष्ठायां सेटि ”[1530] इति सूत्रे सेड्ग्रहणमेव। तथा हि – तत्र सेड्ग्रहणं हि नानिड्व्यावृत्त्यर्थं ण्यन्तस्यानेकाच्त्वेनेटो निषेधाप्राप्तेः । न च ज्ञपेः सनि “

[1526] भाष्यम् – प्रदीपः – उद्द्योतः – प्रकृतसूत्रे

[1527] अष्टाध्यायी – (6-1-68)

[1528] अष्टाध्यायी – (1-1-67)

[1529] अष्टाध्यायी – (6-4-56)

[1530] अष्टाध्यायी – (6-4-52)

सनीवन्तर्ध...... "[1531] इतीड्विकल्पेन निष्ठायाम् " यस्य विभाषा "[1532] इति ण्यन्तेऽपीण्निषेधादनिटि लोपाभावार्थं तत्, ' दरिद्रितः ' इत्यत्राप्रवृत्तये " यस्य विभाषा " इत्यत्रैकाच् इत्यनुवृत्त्या ण्यन्ते तदप्रवृत्तेः । किन्तु ' कारितम् ' इत्यादाविटि कृते एव णिलोपः, न तु ततः प्रागिति कालावधारणार्थमेव सेड्ग्रहणम् । तथा च यदीटः प्राङ् णिलोपः स्यात्तदा अनुदात्तादेकाचः कृञः परत्वादिटो निषेधः स्यात्तन्मा भूदिति सेड्ग्रहणं चरितार्थम् । पञ्चमीसमासस्य नित्यत्वे तु इटः पूर्वं णिलोपेऽपि णेर्लोपस्य स्थानिवत्त्वेनेण्निषेधाप्राप्त्या सेड्ग्रहणवैयर्थ्यापत्तिः । पञ्चम्या स्थानिवत्त्वस्यानित्यत्वादेव ' प्रविगणय्य ' इत्यत्र " ल्यपि लघुपूर्वात् " इति णेरयादेशेः सिध्यति । तस्मात्सेट्ग्रहणमनित्यतां ज्ञापयतीति स्थितम् । तथा चाष्टमे " अन्तः "[1533] इति सूत्रे हरदत्तः – ' अनित्यः पूर्वस्माद्विधौ स्थानिवद्भावः " निष्ठायां सेटि " इति सेट्ग्रहणात् ' । तथा च " वस्वेकाजाद्घसाम् "[1534] इति सूत्रे कैयटः – पूर्वस्मादपि विधावित्येतदनित्यमिति [1535] । यतो हि ' अपीपचन् ' इत्येतत्सिद्धये च पञ्चमीसमास आश्रयणीयः । ' प्रविगणय्य ' इत्यादावतिप्रसङ्गवारणाय ' पूर्वस्माद्विधौ ' इति पञ्चमीसमासस्य चानित्यता मन्तव्या इति युक्तः पन्थाः[1536] ।

पूर्वस्य विधिः इति पूर्वविधिः इत्यत्र स्थानषष्ठ्या न समासः, किन्तु सम्बन्धसामान्ये षष्ठी, तया समासः । तेन पूर्वसम्बन्धिविधावित्यर्थः । अत एव ' अचः किम् ? आगत्य ' इति प्रत्युदाहरणं भाष्ये सङ्गच्छते । नहि तत्र तुगागमः पूर्वस्य स्थाने विधीयते, किन्तु पूर्वस्थान्यवयवो भवति । यतो हि ' पूर्वविधौ ' इत्यस्य पूर्वसम्बन्धिन्येव विधौ इत्यर्थः । तेन पूर्वपरयोः स्थाने विधौ न स्थानिवत् विधिशब्दे ' विधीयते इति विधिः ' इति व्युत्पत्त्या कर्मणि किप्रत्ययविधानेन शेषषष्ठ्या समासस्यैवौचित्यात् । लक्ष्यानुरोधात् अवधारणपरत्वेन पूर्वसम्बन्धिन्येवेत्येवं व्याख्यातम् । एवम्भूतव्याख्यानस्य फलम् ' आरतुः ' इत्यत्र गुणे द्वित्वे " उरत् "[1537] इति सूत्रेण अभ्यासस्य अत्वे रपरत्वे लोपे च सति " अकः सवर्णे दीर्घः "[1538] इति सूत्रेण दीर्घे कर्तव्ये स्थानिवद्भावेन ऋकारातिदेशे सवर्णाच्त्वाभावाद् दीर्घाप्राप्तौ पूर्वस्यैव विधाविति व्याख्यानेन स्थानिवद्भावाप्रवृत्त्या दीर्घः सिद्ध्यति ।

[1531] अष्टाध्यायी – (7-2-49)

[1532] अष्टाध्यायी – (7-2-15)

[1533] अष्टाध्यायी – (8-4-20)

[1534] अष्टाध्यायी – (7-2-67)

[1535] शब्दकौस्तुभः – काशिका – न्यासः – पदमञ्जरी - वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1536] शब्दकौस्तुभः – काशिका – पदमञ्जरी – प्रकृतसूत्रे

[1537] अष्टाध्यायी – (7-4-66)

[1538] अष्टाध्यायी – (6-1-99)

पूर्वविधिशब्दे सकृदुच्चारितत्वे सति अनेकार्थबोधकत्वरूपतत्त्वाभ्युपगतस्य एकस्य ‘ पूर्वविधौ ’ इत्यस्य विधिशब्दोऽत्र यदि ‘ विधीयते विधिः ’ इति कर्मसाधनस्तदा पूर्वस्य कार्ये कर्तव्ये इत्यर्थः। अपरस्य तु अयमर्थः – अत्र विधिशब्दो भावसाधनः, विधानं विधिः। सम्बन्धसामान्ये षष्ठी, तदन्तस्य समासे पूर्वसम्बन्धिनो विधौ भावे – स्थितौ स्थानिवत् इत्यर्थः।

अत एव एतवर्णविशिष्टस्त्रीवाचकात् एनीशब्दात् ‘ एन्या अपत्यम् ’ इत्यर्थे ‘ ऐनेयः ’ इत्यत्र “ स्त्रीभ्यो ढक् ”[1539] इति सूत्रेण ढकि कृते “ यस्येति च ”[1540] इति सूत्रेण अकारेकारयोर्लोपे ङीष्सन्नियोगेन जातस्य “ वर्णादनुदात्तातोपधातो नः ”[1541] इति सूत्रेण नकारस्य ङीषो निवृत्तौ ‘ सन्नियोगशिष्टानां सहैव प्रवृत्तिः सहैव निवृत्तिः ’ इति न्यायेन निवृत्तिः स्यात्। तथा च ‘ ऐतेयः ’ इति स्यान्न तु ‘ ऐनेयः ’ इति। अतः पूर्वविधिशब्दे ‘ विधानं विधिः ’ इति भावक्रियाप्रत्ययान्तोऽपि स्वीकार्यः। तथा च पूर्वस्य विधौ स्थितौ कर्तव्येऽपि अनादेशस्य स्थानिवत्त्वे ‘ ऐनेयः ’ इत्यत्र नकारस्य स्थितिः सिद्ध्यति। विधीयते विधिः कार्यमिति कर्मसाधनोऽपि तन्त्रेण ग्राह्यः। तेन ‘ निगाल्यते ’ इत्यादौ लकारस्य न निवृत्तिः। अत्र मानन्तु अत्रैव सूत्रे लुकि न स्थानिवत् इति वार्तिकम्। तथा हि – ‘ पञ्चेन्द्राण्यो देवतो अस्य ’ इत्यर्थेऽणि तस्य “ द्विगोर्लुगनपत्ये ”[1542] इति लुकि “ लुक् तद्धितलुकि ”[1543] इति ङीषोऽपि लुकि स्थानिवत्त्वेन ङीषः सत्त्वादानुकः सन्नियोगशिष्टन्यायेन निवृत्तिर्न स्यात्। यदा तु स्थानिवत्त्वनिषेधस्तदा सन्नियोगशिष्टन्यायेनानुको निवृत्तिसिद्ध्यर्थं वार्तिकम्। पूर्वस्याभावं प्रति स्थानिवत्त्वाभावे ‘ लुकि न स्थानिवत् ’ इत्यस्य वैयर्थ्येन भावार्थकविधिशब्दकल्पनम्। ‘ भावसाधनो विज्ञास्यते पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति स्थानिवत् ’ इति भाष्यम्। ‘ निगाल्यते ’ इति भाष्योदाहरणादि कर्मसाधने च मानम्। अत्र रेफस्य भावः स्थितिर्न स्थानिवत्त्वेन चिकीर्षितः, किन्तु लत्वम्। अत एव ‘ भावसाधनो विज्ञास्यते ’ इति भाष्योक्तो अपि शब्दो योजनीयः। तथा च ‘ भावसाधनोऽपि विज्ञास्यते ’ इत्यर्थः।

न्यासकारस्तु विधिशब्दस्योभयसाधनत्वं स्वीकृत्य भावसाधनस्य तस्य कृद्योगलक्षणकर्म-षष्ठ्यन्तेन पूर्वशब्देन समासमाश्रित्य पूर्वस्य विधाने कर्तव्ये – इत्यर्थ वर्णितवान्। तथा हि – ‘ विधिशब्दश्चायं कर्मसाधनः – विधीयते इति विधिः। भावसाधनो वा विधानं विधिरिति। कर्मसाधने ह्येतस्मिन् पूर्वस्येति शेषलक्षणा षष्ठी। पूर्वस्य व्यवस्थितस्य लब्धसत्ताकस्य सम्बन्धिनि कार्ये कर्तव्ये

[1539] अष्टाध्यायी – (4-1-120)

[1540] अष्टाध्यायी – (6-4-148)

[1541] अष्टाध्यायी – (4-1-39)

[1542] अष्टाध्यायी – (4-1-88)

[1543] अष्टाध्यायी – (1-2-49)

इत्यर्थः । भावसाधने तु पूर्वस्येति कृद्योगलक्षणा कर्मणि षष्ठी । पूर्वस्यापरिनिष्पन्नस्य विधाने कर्तव्ये इत्यर्थः । पूर्वस्मिन् विधातव्य इति यावत् ' । हरदत्तोऽपि एवमेवाह – ' भावसाधने हि तस्मिन् पूर्वस्येति कर्मणि षष्ठीविज्ञानात् पूर्वस्मिन् विधातव्ये स्थानिवदित्यर्थः स्यात् ' । एतस्मिन् भावसाधनपक्षे प्रयोजनञ्च न्यासकृता दर्शितम् – ' तन्वन्ति ' इत्यत्र इडभावः । तत्र स्थान्यजपेक्षया पूर्वत्वे गृह्यमाणेऽपि नहि कर्मसाधनपक्षे स्थानिभूतादचः पूर्वस्य ' तन् ' इत्यस्य किञ्चित्कार्यं विधेयमस्तीति स्थानिवत्त्वाप्राप्तौ इट् दुर्वारः स्यात् । भावसाधनपक्षे तु इट एवापरिनिष्पन्नस्य अचः पूर्वस्य विधातव्यतया स्थानिवद्भावः सिद्धौ भवतीत्युक्तम्[1544] ।

' पूर्वविधौ ' इत्यत्र स्थानिभूताद् अचः पूर्वत्वं व्यवहितमव्यवहितञ्चोभयविधं गृह्यते, न तु अव्यवहितमेव, तद्ग्रहणे प्रमाणाभावात् । " न पदान्तद्विर्वचनवरेलोपस्वरसवर्ण....... " इति सूत्रे स्वरग्रहणसामार्थ्याच्च न अव्यवहितपूर्वस्यैव ग्रहणम् । तत्र ' चिकीर्षकः ' इत्यत्र सनोऽकारस्य लोपे ण्वुलो लित्त्वेन " लिति "[1545] इति सूत्रेण प्राप्तः स्वर ईकारस्य न स्यात्, स्थानिवद्भावेनाकारेण व्यवधानात् । स्वरे कर्तव्ये स्थानिवन्निषेधारम्भे तु तन्निषेधाद् ईकारस्य स्वरः सिद्धः । यदि अव्यवहितपूर्वस्यैव विधौ स्थानिवद्भाव इष्टः, तदा स्थानिवद्भावस्याप्राप्ततया तन्निषेधस्य वैयर्थ्यापत्तेः । अत एव च उपधावृद्धिर्व्यवहितस्य स्थाने जायमाना स्थानिवद्भावेन ' पटयति ' इत्यादौ वार्यते ।

अनेन पुनः सूत्रेण भावाभावायोरुभयोरप्यतिदेशो विधीयते । शब्दाधिकाराश्रयणात्, पूर्वसूत्रे स्थानिवत् – पदस्य ' तद्वत्कार्यं लभते ' इत्येतन्मात्रार्थकस्य इहानुवृत्तस्य तु ' तद्वत् कार्यं लभते, न च लभते ' इत्युभयार्थकत्वं स्वीक्रियते । स्थानी न निवृत्तः, आदेशो न जातः इति सम्भावनायां यद् भवति तद् भवतु, यन्न भवति तद् मा भूदिति भावः । तेन ' निगाल्यते ' इत्यत्र णिलोपस्य स्थानिवद्भावेन णिचि सति अच्परत्वाद् लत्वं प्राप्नोति, अतः लोपेऽपि तद् भवतीति भावोदाहरणम् । यद् न भवति इत्यस्योदाहरणम् – ' पटयति ' इति । पटुघटकस्य उकारस्य सत्त्वे उपधात्वाभावात् वृद्धिर्न भवतीति उकारलोपे उपधात्वसम्पत्तावपि स्थानिवद्भावात् यद् न भवति तद् मा भूदिति व्याख्यानाद् न वृद्धिरिति ।

किञ्च यथा ' ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम् ' इत्युक्ते यथा ब्राह्मणाश्रयं कार्यं क्षत्रिये प्राप्यते, न तु स्वाश्रयं युद्धादिकं व्यावर्त्यते, एवं स्थानिवत्सूत्रेण स्थानिप्रयुक्तं यत्शास्त्रीयं कार्यं

[1544] काशिका – न्यासः – पदमञ्जरी – भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[1545] अष्टाध्यायी – (6-1-190)

तदेवादेशेऽतिदिश्यते, न तु स्वाश्रयप्रयुक्तं वार्यते। तेन ‘ नायकः ’ इत्यादौ ऐकारस्य स्वाश्रयायादेशसिद्धिः। ‘ रामाय ’ इत्यादावादेशवृत्तियञादित्वमाश्रित्य च दीर्घादिसिद्धिः[1546]।

- **न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु – (1-1-57)**

सूत्रार्थः – पदस्य अन्तः इति पदान्तः, षष्ठीतत्पुरुषः। अथवा पदे अन्तः इति सप्तमीतत्पुरुषः। द्विः = द्विवारम्, वचनम् = उच्चारणम् , वरे परे योऽजादेशः स न स्थानिवत् पूर्वविधौ – इत्यर्थो विवक्षितः। तदुक्तं भाष्ये – ‘ अथवा योगविभागः करिष्यते – वरे लुप्तं न स्थानिवत्। ततो यलोपविधिं प्रति न स्थानिवत् ।’[1547] इति । सहविवक्षाभावेऽपि द्वन्द्वो विभक्त्यलुक् च निपातनाद् भवति । बालमनोरमायामपि – ‘ आर्षो द्वन्द्वः, सप्तम्या अलुक् च ’[1548]। तथा च पदान्तश्च द्विर्वचनञ्च वरे च यलोपश्च स्वरश्च सवर्णश्च अनुस्वारश्च दीर्घश्च जश् च चर् च इति पदान्तद्विर्वचनवरेयलोपस्वर-सवर्णानुस्वारदीर्घजश्चरः, एतेषां विधयः, तेषु पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु, द्वन्द्वगर्भः षष्ठीतत्पुरुषः। अत्र सूत्रे विधिशब्दो भावसाधनः, विधानं विधिरिति विग्रहे विपूर्वकाद् धाधातोः “ उपसर्गे घोः किः ”[1549] इति सूत्रेण भावे किप्रत्यये सति “ आतो लोप इटि च ”[1550] इति सूत्रेण आकारलोपे कृते रूपमिदं सिद्धम्, तद्योगे पदान्त..............चरामिति कर्मणि षष्ठी । तेन षष्ठ्यन्तेन विधिशब्दस्य समासे द्वन्द्वान्ते श्रूयमाणतया विधिशब्दस्य प्रत्येकं योगे पदान्तविधौ द्विर्वचनविधौ वरेविधौ यलोपविधौ – इत्यादिक्रमेणार्थः । पूर्वसूत्राभ्याम् ‘ अचः ’, ‘ परस्मिन् ’, ‘ स्थानिवद् ’, ‘ आदेशः ’ इति पदचतुष्टयमनुवर्तते। ततश्च परनिमित्तको योऽजादेशः पूर्वविधौ स्थानिवत् प्राप्तः पूर्वसूत्रेण, स पदान्त-द्विर्वचन-वरे-यलोप-स्वर-सवर्ण-अनुस्वार-दीर्घ-जश्-चर् इत्येतेषां विधिषु स्थानिवद् न भवतीति वाक्यार्थः।

‘ पदान्तः ’ इत्यत्र अन्तशब्दः अन्तावयववाची। एतस्य “ कर्तृकर्मणोः कृति ”[1551] इति विहित-कर्मषष्ठ्यन्तस्य विधिशब्देन समासः। तथा च ‘ पदचरमावयवकर्मके विधौ न स्थानिवद्भावः ’ इत्यर्थो लब्धः । यत् कार्यं पदचरमावयवरूपतया तत्र निविशते तदेव कार्यं पदचरमावयवपदेन सूत्रे गृह्यते ।

[1546] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[1547] भाष्यम् – प्रकृतसूत्रे

[1548] वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

[1549] अष्टाध्यायी – (3-3-92)

[1550] अष्टाध्यायी – (6-4-64)

[1551] अष्टाध्यायी – (2-3-65)

एवञ्च ‘ एषो यन् हसति ’ इत्यत्र इण्धातोः शतृप्रत्यये यणि च कृते निष्पन्नस्य ‘ यन् ’ इति प्रयोगे यणः स्थानिवत्त्वेन हल्परत्वाभावात् “ एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ”[1552] इति सूत्रेण सुलोपो न स्यात् । सुलोपरूपकार्यस्य अभावरूपत्वेन कस्यचिदपि अवयवत्वासम्भावात् पदस्यापि अन्त्यावयवतायाः लोपे दुर्लभत्वात् । यदि तु ‘ विधीयते इति विधिः ’ कर्मणि किः, कर्म च पदचरमावयवादयः । तदा कर्मण उक्तत्वात् शेषे षष्ठी । शेषष्ठ्या समासे तु एषस् – घटकसकारस्य पदचरमावयवत्वेन तत्सम्बन्धिलोपस्य अवयवत्वेन अनवयवत्वेन वाऽनपेक्षितस्य विधाने प्राप्ते न पदान्त इति प्रतिषेधेन हल्परत्वात् सकारलोपः स्यात् । अतः कर्मषष्ठ्यन्तेन समास एव उचितः । तत्र उत्वविधौ कर्तव्ये स्थानिवद्भावस्य प्रतिषेधो भवति, उत्वस्य विधेः पदचरमावयवकर्मकत्वात् ।

न च पदसंस्कारपक्षे स्थानिभूताद् इकारात् पूर्वत्वेन दृष्टत्वम् ‘ एषस् ’ इत्येतद्घटकस्य सकारस्य नास्तीति कथं स्थानिवद्भावस्य प्रवृत्तिरिति वाच्यम्, ‘ वाक्याद् निस्सार्य पदानि संस्क्रियन्ते ’ इति वाक्यसंस्कारपक्षे स्थानिवद्भावप्रवृत्तेरुपपत्तेः । ‘ पदान्तरनिरपेक्षमेव पदानां संस्कारः ’ इति नैषः नियमः । “ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ”[1553] इति सूत्रेण युष्मत्समानाधिकरणे धातोर्मध्यमपुरुषविधानस्य दर्शनात् । अन्यथा सूत्रस्यासङ्गतिरेव स्यात् । एवञ्च “ स्पृहेरीप्सितः ”[1554] इति सूत्रस्याप्यसङ्गतिः स्यात् ।

न च तादृशशास्त्रबलात्तत्र वाक्यसंस्कारस्य सत्त्वेऽप्यन्यत्र तत्सत्त्वे मानाभाव इति वाच्यम्, अर्द्धजरतीयस्यानौचित्यात् । किञ्च वाक्यसंस्कारस्यात्राभावे उत्वघटितप्रयोगानापत्तिः । न च अकृत-व्यूहेति परिभाषया विसर्गो न स्यात्, तस्या अभावादनित्यत्वाच्च ।

वस्तुतस्तु शेषषष्ठ्या समासे ‘ षडिकः ’ इत्यासिद्धिः । तथा हि षडङ्गुलिशब्दात् ठचि “ ठाजादावूर्द्ध्वं द्वितीयादचः ”[1555] इति सूत्रेण ङ्गुलिशब्दस्य लोपे “ यस्येति च ”[1556] इति सूत्रेण अकार-लोपे ‘ षष् ’ इत्यस्यान्तर्वर्त्तिविभक्त्या पदत्वे पदान्तस्य षस्य जश्त्वे कर्तव्ये अल्लोपस्य स्थानिवत्त्व-निषेधात् इक्प्रत्ययनिमित्तकभसञ्ज्ञया पदसञ्ज्ञाया बाधाज्जश्त्वासिद्धिः ।

न च ठचः पूर्वमेव जश्त्वे रूपसिद्धिः । जश्त्वस्य त्रिपादीस्थतया असिद्धत्वेन ठजादीनामेव पूर्वं प्रवृत्तेः । न च भत्वे अल्लोपस्य स्थानिवत्त्वेन समानावधिकत्वाभावान्न भत्वेन पदत्वबाध इति वाच्यम्,

---

[1552] अष्टाध्यायी – (6-1-130)

[1553] अष्टाध्यायी – (1-4-105)

[1554] अष्टाध्यायी – (1-4-36)

[1555] अष्टाध्यायी – (5-3-83)

[1556] अष्टाध्यायी – (6-4-138)

अकारान्ते भत्वस्य षान्ते पदत्वस्याबाधकत्वेन परम्परया पदान्तविधत्वेन भत्वेऽपि स्थानिवत्त्वनिषेधात् । कर्मषष्ठ्या समासे तु पदान्तत्वस्य यत्र विधानं तत्रैव स्थानिवत्त्वनिषेधेन प्रकृतेऽन्तर्वर्त्तिविभक्त्या पदत्वस्य सिद्धतया भत्वेन पदान्ततया अविधानान्न स्थानिवत्त्वनिषेधः ।

किञ्च ' एषो यन् ' इति असाधुः, परत्वान्नित्यत्वात्प्रतिपदोक्तत्वाच्च सुलोपस्य न्याय्यत्वात् । न च स्थानिवद्भावः, " पादस्य लोपोऽहस्त्यादिभ्यः "[1557] इति लोपस्येव लोपस्यापि स्थानिद्वारा पदचरमावयवत्वात् तच्चोक्तम् – कौमुद्याम् ' स्थानिद्वारेणायं समासान्तः ' इति लक्ष्यानुरोधेन पदसंस्कारपक्षस्यैवाश्रयणाच्च । अत एव ' स एवास्मि स सन् यज ' इति श्रौतप्रयोगः, ' एष यन् ' इति छान्दोग्यप्रयोगश्च संगच्छते । लोकेऽपि ' स सन् ' इत्येव प्रयुज्यते, न तु ' सः सन् ' इति इत्याहुः[1558] ।

ननु वेतसशब्दात् " कुमुदनडवेतसेभ्यो ड्मतुप् "[1559] इति सूत्रेण ड्मतुप्प्रत्यये, डित्वाट्टिलोपे ' वेतस्वान् ' इत्यस्य सिद्धिः । अत्र सुबन्तात्तद्धितोत्पत्तिस्वीकारेण अन्तर्वर्त्तिनीं विभक्तिमादाय पदसञ्ज्ञायां सकारस्य पदान्तत्वाद् रूत्वं स्यादिति चेन्न, " तसौ मत्वर्थे "[1560] इति भत्वेन पदत्वबाधान्न दोषः । ननु भत्वस्य पदचरमावयवसाधकत्वाभावेन तस्मिन् कर्तव्ये स्थानिवत्त्वे अकारान्तस्य भसञ्ज्ञा, सान्तस्य पदसञ्ज्ञेति समानविषयकत्वाभावात् न भत्वेन पदत्वबाधः इति वाच्यम्, अस्य समाधानं भाष्यकारः प्रोक्तवान् भाष्ये यथा – ' नैवं विज्ञायते – पदस्यान्तः पदान्तः, पदान्तस्य विधिः पदान्तविधिः, पदान्तविधिं प्रतीति । कथं तर्हि ? पदे अन्तः पदान्तः, पदान्तस्य विधिः पदान्तविधिः, पदान्तविधिं प्रतीति '[1561] ।

अस्यायं भावः – एतत्सूत्रघटकपदान्तशब्दे पदे अन्तः इत्येवं सप्तमीसमासो बोध्यः । तथा च पदे परतः अन्तस्य अर्थात् पदे परतः चरमावयवकर्मके विधौ प्रतिषेधस्य करणात् प्रकृते ड्मतुपः परत्वाभावेन वेतसः पदत्वेऽपि पदे परतः चरमावयवकार्यस्य विधानाभावान्न स्थानिवत्त्वप्रतिषेधः । अतः स्थानिवद्भावेन अकारान्तस्य पदत्वाद् रेफस्य पदान्तत्वविरहान्न रुत्वप्रसङ्गः । पदे परतः इत्येवं व्याख्यानेन आदेशस्य परपदस्थत्वं स्वतो लभ्यते । पदे इत्यत्र परपदस्योपस्थितत्वात् प्रत्यासत्त्या परपदस्थ एव अजादेशो गृह्यते इति तात्पर्यम् ।

[1557] अष्टाध्यायी – (5-4-148)

[1558] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1559] अष्टाध्यायी – (4-2-87)

[1560] अष्टाध्यायी – (1-4-19)

[1561] भाष्यम् – प्रकृतसूत्रे

न च ' पूर्वत्रासिद्धीये न स्थानिवत् ' इत्यनेन प्रतिषेधात् स्थानिवद्भावाभावे पदत्वसत्त्वाद् रुत्वापत्तिरिति वाच्यम्, सप्तमीसमासाश्रयणेन तन्निषेधव्यावृत्तिं कुर्वतो भाष्यकृतः तादृशप्रयास-वैयार्थ्यापत्त्या पदचरमावयववाधायकातिरिक्तस्य त्रैपादिकसूत्रस्य पूर्वत्रासिद्धीये इति वार्त्तिके ग्रहणेन अनुपपत्तेरभावात्।

' महिष्मान् ' इत्यत्र अकारस्य स्थानिवद्भावेन षकारस्य पदान्तत्वविरहान्न जश्त्वम्। अन्यथा ' पूर्वत्रासिद्धीये ' इत्यनेन प्रतिषेधात् स्थानिवद्भावाप्राप्तौ जश्त्वं दुर्वारं स्यात् । न च न पदान्तसूत्रे जश्शब्दस्य स्वरूपेणैवोपादानात् तत्र कर्तव्ये स्थानिवद्भावनिषेधः पुनरपि दुर्वार इति वाच्यम्, चर्-साहचर्यात् तत्सन्निहितस्य " झलां जश् झशि "[1562] इति विहितस्यैव जशो ग्रहणेन प्रकृते " झलां जशोऽन्ते "[1563] इति प्राप्तस्य निषेधस्याप्राप्तेरित्याशयात्। नवीनैः यथोद्देशे कार्यकाले उभयस्मिन्नपि पक्षे अन्तरङ्गपरिभाषायाः त्रिपाद्यामप्रवृत्तिरभ्युगता । अतः अन्तरङ्गपरिभाषयापि ' वेतस्वान् ', ' महिष्मान् ' इत्यादेः सिद्धिसम्भावना न।

न च गामञ्चतीति विग्रहे गोपूर्वकाद् अञ्चधातोः क्विपि टाविभक्तौ इत्यकारस्य लोपे ' गोचा ' इति सिद्धम् । ' गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ' इति परिभाषया विभक्त्युत्पत्तेः प्रागेव " उपपदमतिङ् "[1564] इति समासे ' अच् ' इति शब्देन विहिताया विभक्तेरभावात् तन्मात्रस्य पदत्वाभावेन पदे परतः चरमावयवस्य कार्यस्य विधानाभावात् निषेधाप्रवृत्तौ स्थानिवद्भावे अवङादेशः स्यादिति वाच्यम्, ' गतिकारकोपपदानाम् ' इत्यस्यानित्यत्वेन सुबुत्पत्त्यनन्तरमेव समासे प्रत्ययलक्षणेन सुप्त्वबुद्ध्या सुबन्तत्वेन पदत्वसत्त्वात् पदेऽन्त इति सप्तमीसमासेऽपि उत्तरस्य पदत्वात् निषेधप्रवृत्तेः सम्भवात्।

न च प्रत्ययलक्षणस्य ' उत्तरपदत्वे चापदादिविधौ प्रतिषेधः ' इति वार्त्तिकेन प्रतिषेधे पुनरपि पदत्वाभावात् स्थानिवद्भावप्रतिषेधो न स्यादिति वाच्यम्, तत्र कार्यित्वप्रवेशेन उत्तरपदस्य पदत्वप्रयुक्त-कार्ये कर्तव्ये तेन प्रत्ययलक्षणस्य प्रतिषेधात् । प्रकृते उत्तरपदस्य गोचेत्यत्र ' अचः ' इत्यस्य न किञ्चित्कार्यं विधित्सितम्, अपितु गोशब्दघटकस्य ओकारस्य, न तत् उत्तरपदस्थमिति न प्रत्ययलक्षण-प्रतिषेधः प्राप्नोतीति । कार्यित्वनिवेशफलं " ङमो ह्रस्वादचि ङमुण् नित्यम् "[1565] इति सूत्रे

[1562] अष्टाध्यायी – (8-4-53)

[1563] अष्टाध्यायी – (8-2-39)

[1564] अष्टाध्यायी – (2-2-19)

[1565] अष्टाध्यायी – (8-3-32)

स्फुटीभविष्यति। अथवा पदशब्देन पदसञ्ज्ञकस्य न ग्रहणम्, किन्तु पदत्वयोग्यता विवक्ष्यते। इहापि योग्यता अस्ति – यदि सुबुत्पत्तिः स्यात् तदा पदसञ्ज्ञा स्यात् – इत्येवंरूपा। पदे परतः इत्येवं सप्तमीसमासाश्रयणमपि भगवतो भाष्यकारस्य पदत्वयोग्यतायाः ग्रहणे मानं बोध्यम्। अन्यथा ' गोचा ' इत्यादौ दोषात् कथं तथाविधोऽर्थः कल्पितो भगवता !

अत्रेदमवधेयम् – स्थानिवद्भावः चतुर्विधः प्राप्तः। तथा हि –

1. साक्षात् पदचरमावयवसाधकः, 2. साक्षात्पदचरमावयवप्रतिबन्धकः, 3. परम्परया पदचरमावयवसाधकः 4. परम्परया पदचरमावयवप्रतिबन्धकश्च। तत्र परम्परया पदचरमावयवसाधकः स्थानिवद्भावो नानेन प्रतिषिध्यते, किन्तु अन्यस्य त्रिविधस्य प्रतिषेधः।

1. तत्र साक्षात् पदचरमावयवसाधकस्थानिवत्त्वनिषेधे ' कानि सन्ति ' इत्युदाहरणम्। अत्र हि वाक्यसंस्कारपक्षे अस्धातुघटकाकारस्य " श्नसोरल्लोपः "[1566] इति सूत्रेण अकारलुप्तस्य स्थानिवद्भावाद् अकारबुद्ध्या प्राप्तो यणादेशः पदचरमावयवत्वेन सम्भाव्यमानः, अतः तत्प्रापकः स्थानिवद्भावो भवति साक्षात् पदचरमावयवयण्साधकः।

2. साक्षात् पदचमावयवप्रतिबन्धकस्थानिवत्त्वनिषेधस्य फलम् – ' एषो यन् हसति ' इति। अत्र इण्धातोः शतृप्रत्यये " इणो यण् "[1567] इति सूत्रेण यणादेशे प्रथमैकवचने ' यन् ' इति रूपसिद्धिः। यणः स्थानिवत्त्वेन इकारबुद्धौ हश्परत्वात् " हशि च "[1568] इति सूत्रेण एष इत्यत्र रोरुत्वं न स्यात्। उत्वं च पदचरमावयवत्वेन सम्भाव्यमानं प्राप्तं स्थानिवद्भावेन विवर्त्यते। तस्मादयं स्थानिवद्भावः साक्षादेव पदचरमावयवोत्वप्रतिबन्धकः।

3. परम्परया पदचरमावयवसाधकस्य नानेन प्रतिषेधः। यथा ' षडिकः ' इत्यस्य षडङ्गुलिदत्तशब्दात् " बह्वचो मनुष्यनाम्नष्ठज्वा "[1569] इति सूत्रेण ठचि प्रत्यये " ठाजादावूर्ध्वं द्वितीयादचः "[1570] इति सूत्रेण ङ्गुलिदत्तशब्दस्य लोपे कृते " ठस्येकः "[1571] इति सूत्रेण इकादेशे ' षष् अ इक ' इत्यवस्थायाम् अकारस्य " यस्येति च "[1572] इति सूत्रेण लोपे जश्त्वे च कृते सिद्धिः। अत्र

[1566] अष्टाध्यायी – (6-4-111)
[1567] अष्टाध्यायी – (6-4-81)
[1568] अष्टाध्यायी – (6-1-112)
[1569] अष्टाध्यायी – (5-3-78)
[1570] अष्टाध्यायी – (5-3-83)
[1571] अष्टाध्यायी – (7-3-50)
[1572] अष्टाध्यायी – (6-4-148)

स्थानिवद्भावेन अकारस्यातिदेशे अकारान्तस्य भत्वेऽपि समानावधिकत्वाभावात् षान्ते पदत्वसञ्ज्ञायाः भसञ्ज्ञया बाधाभावेन पदान्तत्वाद् जश्त्वं सिद्ध्यति। अत्रापि निषेधे षान्तस्यैव भपदसञ्ज्ञयोः प्राप्तत्वेन समानावधिकत्वाद् भसञ्ज्ञया पदसञ्ज्ञाया बाधात् पदचरमावयवस्य जश्त्वस्य प्रतिबन्धः स्यात्। अतः पदसञ्ज्ञासम्पादनद्वारा जश्त्वसाधकस्य स्थानिवद्भावस्य नानेन प्रतिषेधः – इति कल्पनीयं भाष्यप्रयोग-सिद्धये। अन्यथा स्थानिवद्भावनिषेधे भत्वेन पदत्वस्य बाधाद् जश्त्वं न स्यादिति भावः।

‘ वाचिकः ’ इत्यस्य ‘ एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः’ इति वचनेन वागाशीर्दत्तशब्दे उत्तरपदस्य आशीर्दत्तशब्दस्य लोपे अज्मात्रस्थानिकादेशस्य विरहेण स्थानिवद्भावस्य शङ्कैव नास्तीति भत्वेन पदत्वस्य बाधात् पदान्तत्वाभावाद् जश्त्वं कुत्वं नेति विभावनीयम्। ‘ षडिकः ’ इत्यत्र तु ‘ षषष्ठाजादिवचनात् सिद्धम् ’ इति वार्त्तिकात् “ ठाजादावूर्ध्वं द्वितीयादचः ” इति सूत्रानुसारेण द्वितीयादचः परस्य ङ्गुलिदत्तशब्दस्य लोपः। ‘ वाचिकः ’ इत्यत्र तु ‘ एकाक्षरपूर्वपदानाम् ’ इत्युक्त्यनुसारेण आशीर्दत्तशब्दस्य लोप इति व्यवस्था। ‘ पूर्वत्रासिद्धीये ’ इत्यस्य न प्रवृत्तिः, तत्र पदचरमावयव-विधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणात्।

4. परम्परया परचरमावयवप्रतिबन्धकस्थानिवत्त्वनिषेधस्य फलम् – ‘ दध्यारः ’, ‘ दध्यर्चः ’ इति। अत्र ऋधातोर्ऋच्धातोश्च “ कर्मण्यण् ”[1573] इत्यण्निमित्तकवृद्धिगुणयोः स्थानिवद्भावः “ ऋत्यकः ”[1574] इति प्रकृतिभावसम्पादनद्वारा यण्प्रतिबन्धकः।

‘ पूर्वत्रासिद्धीये न स्थानिवत् ’ इति वचनं स्वीकृत्य वरेयलोपस्वरदीर्घग्रहणं विहाय द्विर्वचनादि-ग्रहणं सूत्रे प्रत्याख्यातं भाष्यकृता। वरेयलोपस्वरविधेः प्रत्याख्याने वर्जनं “ न पदान्त…….. ” सूत्रे भाष्ये स्पष्टम्। दीर्घांशस्य वर्जनं “ कमेर्णिङ् ”[1575] इति भाष्ये स्फुटम्। तथाहि णिङ्प्रत्यये णकारस्य “ णेरनिटि ”[1576] इत्यत्र णिपदेन णिङोऽपि ग्रहणं यथा स्यात् तदर्थं चारितार्थ्यात्, ङित्करणस्य च आत्मनेपदस्य विधानार्थतया सावकाशत्वाद् इत्येवमुभयोः सावकाशत्वेन प्रतिषेधस्य बलवत्त्वाद् वृद्धिप्रतिषेधः प्राप्नोति। एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति - न कमेः वृद्धिप्रतिषेधो भवति, यदयं ‘ न कम्यमिचमाम् ’ इति मित्सञ्ज्ञायाः प्रतिषेधं शास्ति।

[1573] अष्टाध्यायी – (3-2-1)

[1574] अष्टाध्यायी – (6-1-126)

[1575] अष्टाध्यायी – (3-1-30)

[1576] अष्टाध्यायी – (6-4-51)

मित्प्रतिषेधस्य अर्थवत्त्वात् वृद्धिप्रतिषेधः प्राप्नोति । अर्थवान् मित्प्रतिषेधः । कोऽर्थः ? णिङन्तस्य णिचि या वृद्धिः तस्याः ह्रस्वत्वं मा भूत् । अयं भावः - कम्धातोर्णिङ्प्रत्यये ततो णिचि णिन्निमित्तकवृद्धेः " क्ङिति च "[1577] इत्यनेन प्रतिषेधो न सम्भवति । क्ङिन्निमित्तकवृद्धेरेव तेन प्रतिषेधाद् णिचश्चाकित्त्वात् वृद्धेः सौलभ्यात् । तत्र मितां ह्रस्ववारणाय ' न कम्यमिचामाम् ' इत्यस्यारम्भः सप्रयोजनः - इति न तज्ज्ञापकम् । अतः परं स्थानिवद्भावेन णिङ्व्यवधानात् णिन्निमित्तिका वृद्धिर्न प्राप्नोति । तस्मात् पूर्वोक्तं ज्ञापनं युक्तमित्याशयः ।

ततो णिचं निमित्तीकृत्य जायमानाया वृद्धेर्णिङनिमित्तको ह्रस्वो मा भूदित्येवमर्थो मित्प्रतिषेध इति कल्प्यते । तथा च पूर्वोक्तार्थज्ञापनासम्भवमुक्त्वा, ' असिद्धं बहिरङ्गमन्तरङ्गे ' इति परिभाषया णिङ्निमित्तकत्वेन अन्तरङ्गत्वात् ह्रस्वदृष्ट्या बहिरङ्गभूतायाः बहिर्भूतणिज्निमित्तकवृद्धेरसिद्धत्वाद् ह्रस्वस्य ह्रस्वत्वे फलाभावात् " मितां ह्रस्वः "[1578] इत्यस्याप्रवृत्तौ ' न कम्यमिचमाम् ' इत्यस्य वैयर्थ्येन पूर्वोक्तज्ञापकताया युक्तत्वात् । तथा च णिङन्तात् णिचि प्रयोजनं मत्वा पुनः पूर्वोक्तयुक्त्या स्थानिवद्भावेन व्यवधानमाश्रित्य तन्निराकृतम् । अतः परं मित्सञ्ज्ञाप्रतिषेधस्य " चिण्णमुलोर्दीर्घोऽन्यतरस्याम् "[1579] इति दीर्घत्वं शास्ति तत् कमेर्णिङि मा भूत् ।

ततः पुनराशङ्कितम् – किं पुनः कारणं तत्र ' दीर्घोऽन्यतरस्याम् ' इत्युच्यते, न ' ह्रस्वोऽन्यतरस्याम् ' इत्येव । यथाप्राप्तं कमेर्ह्रस्वत्वमेव । तत्रायमर्थः (प्रयोजनम्) ह्रस्वग्रहणं न कर्तव्यं भवति । प्रकृतमनुवर्तते । क्व प्रकृतम् ? मितां ह्रस्वः । का रूपसिद्धिः ? अशमि अशामि , शमं शमम्, शामं शामम् । वृद्ध्या सिद्धम् । न सिद्ध्यति, " नोदात्तोपदेशस्य मान्तस्यानाचमेः "[1580] इति वृद्धिप्रतिषेधः प्राप्नोति । नैष दोषः । चिण्कृतोः स वृद्धिप्रतिषेधो न णिचि । इदं तर्हि प्रयोजनम् – अजनि अजानि ? " जनिवध्योश्च "[1581] इति वृद्धिप्रतिषेधः । सोऽपि चिण्कृतोरेव न णिचि । णिज्व्यवहिते यङ्लोपे चोपसंख्यानं कर्तव्यं स्यात् शम्यन्तं प्रयोजितवान् अशमि अशामि शमं शमम् शामं शामम् शंशमयतेः अशंशमि अशंशामि इत्यादि । किं पुनः कारणं न सिद्ध्यति ? चिण्णमुल्परे णौ मितामङ्गानां ह्रस्वो भवतीत्युच्यते, यश्चात्र णिः चिण्णमुल्परो न तस्मिन् इदमङ्गम् । यस्मिंश्चेदमङ्गं नासौ चिण्णमुल्परः । स्थानिवद्भावात् न चिण्णमुल्परः । णिलोपे कृते चिण्णमुल्परः । स्थानिवद्भावाद् न

[1577] अष्टाध्यायी – (1-1-5)

[1578] अष्टाध्यायी – (6-4-92)

[1579] अष्टाध्यायी – (6-4-93)

[1580] अष्टाध्यायी – (7-3-34)

[1581] अष्टाध्यायी –(7-3-35)

चिण्णमुल्परः – एतावता भाष्यसन्दर्भेण ह्रस्वविधानन्यासे णिज्व्यवहिते इत्यादि पूर्वोक्तं वचनं कर्तव्यं स्यात् । अत उत्तरं दीर्घटिते " चिण्णमुलोर्दीर्घोऽन्यतरस्याम् " इति सूत्रे कृते तु वचनस्यानावश्यकतां वदन्ति भाष्यकाराः । अयम् ' दीर्घोऽन्यतरस्याम् ' इत्युच्यमाने कथमेतावता सिद्ध्यति । एतदिदानीं दीर्घग्रहणस्य प्रयोजनम् – दीर्घविधौ अजादेशो न स्थानिवद्भवतीति स्थानिवन्निषेधः सिद्धो भवति ।

एतेन भाष्येण न पदान्तसूत्रे दीर्घग्रहणमावश्यकमिति प्रतीयते । अन्यथा ' चिण्णमुलोः ' इत्यस्य सापादिकत्वेन ' पूर्वत्रासिद्धीये ' इत्यनेनानिर्वाहात् स्थानिवद्भावप्रतिषेधप्रतिपादनं भाष्यकृतो विपरीतं स्यात्[1582] ।

- **अत्र क्रमेणोदाहरणानि यथा** –

1. पदान्तविधौ कर्तव्ये न स्थानिवत् – ' कानि सन्ति ', ' कौ स्तः ' ।

अत्र " श्नसोरल्लोपः "[1583] इति सूत्रविहितस्य अकारलोपस्य " अचः परस्मिन् पूर्वविधौ "[1584] इति सूत्रेण स्थानिवद्भावे प्राप्ते सति अच्परत्वमाश्रित्य इकारौकारयोः यणावादेशौ पदचरमावयवौ प्राप्नुतः । प्रकृतसूत्रेण पदान्तकार्ये स्थानिवत्त्वनिषेधे पूर्वोक्तं कार्यद्वयं वार्यते । अत्र यणावादेशौ हि पदान्तकार्ये । वाक्यसंस्कारपक्षे इकारौकारयोः स्थानिभूताचः पूर्वत्वेनास्ति दृष्टत्वम् । पदसंस्कारपक्षे तु प्रतीचः इत्याद्युदाहरणम् । " अचः "[1585] इति सूत्रेणाल्लोपस्य स्थानिवत्त्वे पदचरमावयवे यणि प्राप्तेऽनेन निषेधात् ।

2. द्विर्वचने कर्तव्ये न स्थानिवत् – ' सुध्युपास्यः ' ।

अत्र " इको यणचि "[1586] इति सूत्रेण यणादेशोत्तरं " अचः परस्मिन् पूर्वविधौ " इति सूत्रेण स्थानिवद्भावेऽच्परत्वमादाय " अनचि च "[1587] इति सूत्रेण द्वित्वं न स्यात् । अतः द्वित्वे कर्तव्ये स्थानिवद्भावो निषिध्यते । अत्र ' असिद्धं बहिरङ्गमन्तरङ्गे ' इति परिभाषया अन्तरङ्गे द्वित्वे कर्तव्ये बहिरङ्गस्य यणादेशस्यासिद्धत्वं तु न । द्वित्वे कर्तव्ये स्थानिवत्त्वनिषेधसामर्थ्यात् ।

[1582] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे
[1583] अष्टाध्यायी – (6-4-111)
[1584] अष्टाध्यायी – (1-1-57)
[1585] अष्टाध्यायी – (6-4-138)
[1586] अष्टाध्यायी – (6-1-76)
[1587] अष्टाध्यायी – (8-4-47)

अत्र " अनचि च " इत्यत्र ' च ' इति विभक्तयोगेन धस्य द्वित्वे कर्तव्ये यणादेशस्य स्थानिवद्भावः प्राप्तो निषिध्यते । तेन द्वित्वं सिध्यति । अन्यथा " अनचि " इत्येवं सूत्रं कृतम्, तेन निषेधात् द्वित्वं न स्यात् ।

3. वरे परतः योऽजादेशः स न स्थानिवत् – ' यायावरः ' ।

अत्र यङन्ताद् यायायधातोः " यश्च यङः "[1588] इति वरच्प्रत्यये कृते सति ' यायाय + वर ' इति दशायाम् " अतो लोपः "[1589] इति यङोऽकारस्य लोपे " अचः परस्मिन् पूर्वविधौ " इति सूत्रेण तस्य स्थानिवद्भावेनाच्परत्वमादाय " आतो लोप इटि च "[1590] इति सूत्रेण आकारलोपः प्राप्तः वरच्प्रत्यये परेऽजादेशस्य अल्लोपस्य स्थानिवत्त्वनिषेधेन अजादिक्ङिति परत्वाभावान्न भवति ।

न च ' यायावरः ' इत्यत्र पूर्वमलोपे ततो यलोप इति क्रमसत्त्वेन ' यः शिष्यते स लुप्यमानार्थाभिधायी ' इति न्यायेन ' य ' इत्यत्रार्धधातुकत्वप्रत्ययत्वसत्त्वेऽपि लुप्यमानाकारस्य प्रत्ययत्वाभावेन अजाद्यार्धधातुकपरत्वाभावान्न आल्लोपप्राप्तिरिति वरेऽजादेशो न स्थानिवदिति निषेधो व्यर्थमिति वाच्यम्, अत एव निषेधसामर्थ्येन यत्रार्धधातुकत्वसम्भावना तस्मिन्नपि " आतो लोप इटि च " इत्यस्य प्रवृत्तिज्ञापनात् । अस्ति चात्र सम्भावना – यदि पूर्वं यलोपः स्यात्तदा ' यः शिष्यते ' इति न्यायेन अकारे आर्धधातुकत्वादिकं स्यादिति सम्भावना । तथा च ' यायावरः ' इत्यत्र साम्भावनिकार्धधातुकत्वादिकमादाय आलोपः स्थानिवद्भावेन प्राप्नोति, तद्वारणाय वरे अजादेशस्य स्थानिवत्त्वनिषेधः ।

अत एव यातेर्यङन्तात् क्तिचि अतो लोपे यलोपे स्थानिवत्त्वनिषेधेन " लोपो व्योर्वलि "[1591] इति यलोपे अलोपस्य स्थानिवत्त्वेन आलोपे पुनर्यलोपे ' यातिः ' इति भाष्यप्रयोगः सिध्यति । पुनरालोपस्तु न, आलोपस्यापि स्थानिवत्त्वेनार्धधातुकपरत्वाभावात् । न च " अभ्यासस्यासवर्णे "[1592] इत्यत्रासवर्ण-ग्रहणेन अभ्यासकार्ये तदुत्तरखण्डादेशस्य अभ्यासकार्यप्रतिबन्धकीभूतस्थानिवत्त्वं नेति ज्ञाप्यते । अत एव यङ्लुगन्ताद् ऋधातोर्लिटि झौ अदादेशे रुकि यणादेशे रेफस्य लोपे " ढ्रलोपे पूर्वस्य दीर्घोऽणः "[1593]

[1588] अष्टाध्यायी – (3-2-176)

[1589] अष्टाध्यायी – (6-4-48)

[1590] अष्टाध्यायी – (6-4-64)

[1591] अष्टाध्यायी – (6-1-65)

[1592] अष्टाध्यायी – (6-4-78)

[1593] अष्टाध्यायी – (6-3-111)

इति सूत्रेण दीर्घे ‘ आरति ’ इति सिध्यतीति वाच्यम्, अभ्यासत्वपर्याप्त्यधिकरणस्य स्थाने आदेशे एव तन्निषेधप्रवृत्तेः[1594]।

4. यलोपविधौ न स्थानिवत् – ‘ यातिः ’ इत्युदाहरणं बोध्यम्। भाष्यकृता तु कण्डूयधातोः क्तिचि ‘ कण्डूतिः ’ इत्युदाहृतम्।

अत्र यङन्तात् याधातोः “ क्तिच्क्तौ च सञ्ज्ञायाम् ”[1595] इति सूत्रेण क्तिचि अतो लोपे अल्लोपस्य स्थानिवत्त्वनिषेधाद् वल्निमित्तकयलोपे पुनरल्लोपस्य स्थानिवत्त्वेन सम्भावनामाश्रित्य अजाद्यार्धधातुकङित्त्वात् “ आतो लोप इटि च ” इति सूत्रेण आलोपे पुनरल्लोपस्य स्थानिवत्त्वनिषेधाद् यलोपे ‘ यातिः ’ इति रूपम्।

‘ कण्डू ’ इत्यस्मात् प्रातिपदिकात् “ कण्ड्वादिभ्यो यक् ”[1596] इति सूत्रेण यक्प्रत्यये ततः “ क्तिच्क्तौ च सञ्ज्ञायाम् ” इति सूत्रेण क्तिच्प्रत्यये ‘ कण्डूय + ति ’ इति दशायाम् “ अतो लोपः ” इति सूत्रेण अकारलोपे तस्य स्थानिवद्भावे “ लोपो व्योर्वलि ” इति सूत्रेण यकारलोपो न स्यात्। अतः यलोपे कर्तव्ये स्थानिवद्भावो निषिध्यते।

5. स्वरविधौ न स्थानिवत् – ‘ चिकीर्षकः ’।

अत्र ‘ चिकीर्ष ’ इति सन्नन्ताद्धातोर्ण्वुलि अकादेशे “ अतो लोपः ” इति सूत्रेण सनोऽकारस्य लोपे “ लिति ”[1597] इति सूत्रेण ईकारस्य उदात्तत्वे कर्तव्ये अल्लोपो न स्थानिवत्। स्थानिवत्त्वे तु तेन व्यवधानाद् ईकार उदात्तो न स्यात्। यद्यपि अत्र अल्लोपस्थानिभूतादकाराद् ईकारो नाव्यवहितपूर्व इति स्थानिवत्त्वमेव कथं प्राप्तमित्याशङ्कितुं शक्यते, तथापि अस्मादेव ज्ञापकात् पूर्वविधौ इत्यत्र पूर्वत्वं व्यवहिताव्यहितसाधारणं गृह्यते। तत्फलञ्च ‘ पटयति ’ इत्यादिसिद्धिः[1598]।

अत्र “ लिति ” इति सूत्रारम्भसामर्थ्यात् स्वरः सिध्यतीति तु न वक्तुं शक्यम्। ‘ कारकः ’ इत्यादौ सूत्रस्य चरितार्थत्वात्।

6. सवर्णविधौ न स्थानिवत् – ‘ शिण्ढि ’।

अत्र शिष्धातोः लोटि मध्यमपुरुषैकवचने सिपि हित्वे धित्वे धस्य ष्टुत्वे श्नमि ‘ शिनष् + ढि ’ इति दशायाम् “ श्नसोरल्लोपः ” इति सूत्रेण अकारलोपे षकारस्य स्थाने जश्त्वेन डकारादेशे “ झरो झरि

[1594] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1595] अष्टाध्यायी – (3-3-174)

[1596] अष्टाध्यायी – (3-1-27)

[1597] अष्टाध्यायी – (6-1-190)

[1598] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

सवर्णे "[1599] इति सूत्रेण डकारलोपे " नश्चापदान्तस्य झलि "[1600] इति सूत्रेण नकारस्य स्थाने अनुस्वारे " अनुस्वारस्य ययि परसवर्णः "[1601] इति सूत्रेण परसवर्णे णकारे च ' शिण्ढि ' इति रूपं सिध्यति । अत्र परसवर्णे कर्तव्ये " श्नसोरल्लोपः " इति सूत्रेण अल्लोपस्य स्थानिवत्त्वेन व्यवधानाद् यय्परत्वाभावेन परसवर्णानापत्तिः । अतः सवर्णे कर्तव्ये स्थानिवत्त्वनिषेधः प्रकृतसूत्रेण सिध्यति ।

' वस्तुतस्तु अनुस्वारविधौ न स्थानिवत् इत्यस्यैव इदमुदाहरणं सम्भवति, न तु सवर्णविधौ इत्यस्यापि । यतोहि अनादिष्टो योऽच् श्नमकारः, ततः पूर्वत्वेन दृष्टत्वमेव नास्ति अनुस्वारस्य, अकारलोपानन्तरमेव तस्य स्थानिवत्त्वनिषेधद्वारा नकारस्यानुस्वारप्रसक्तेः । अतोऽनादिष्टो योऽच् – अकारः, तस्मात् पूर्वत्वेन दृष्टस्य नकारस्यानुस्वारे कर्तव्ये प्राप्तस्थानिवत्त्वस्यानेन निषेधेऽपि, तस्मात् स्थानिभूताचः पूर्वत्वेन दृष्टत्वाभावात् अनुस्वारस्य परसवर्णे कर्तव्ये स्थानिवत्त्वस्य प्रसक्तेरेवाभावात् कथं तन्निषेधस्येदमुदाहरणं भवितुमर्हति ? " स्थानिवदादेशोऽनल्विधौ "[1602] इति नकारवृत्तियदनादिष्टाद् अचः पूर्वत्वन्तत् तदादेशेऽनुस्वारे अतिदेक्ष्यते – इति तु न वक्तुं शक्यम्, तद्घटितसन्निवेशापेक्षस्य ततः पूर्वत्वस्यातिदेशसहस्रेणापि अतिदेष्टुमशक्यत्वात्, रूपातिदेशास्वीकारात् ।

अत्र तत्त्वबोधिन्यामुक्तम् – ' अनुस्वारस्य स्थानिभूतो नकारः श्नमकारात् पूर्वत्वेन दृष्ट इति तत्स्थानिकानुस्वारस्यापि तत्पूर्वत्वेन दृष्टत्वम्, स्थानिद्वारापि पूर्वत्वाभ्युपगमात् '[1603] । इति । एतत्खण्डयन् बालमनोरमाकारः प्राह – ' एवं सति ' तितउमाचष्टे तितापयति ' इत्यत्र पुगागमो न स्यात् । तितउशब्दात् ' तत्करोति तदाचष्टे ' इति णिचि इष्ठवद्भावाद् उकारस्य " टेः "[1604] इति लोपे " अचो ञ्णिति "[1605] इति तकारादकारस्य वृद्धौ आकारे पुगागमे लटि तिपि शपि गुणे अयादेशे ' तितापयति ' इति रूपम् । अत्र " अचो ञ्णिति " इति वृद्धिलब्धस्य आकारस्य पुगागमे कर्तव्ये उकारलोपस्य स्थानिवद्भावे सति उकारेण व्यवधानेन णित्परकत्वाभावात् पुगागमो न स्यात् । आकारस्य लोपस्थानि-भूतादुकारात् पूर्वत्वस्य स्वतोऽभावेऽपि स्थानिद्वारा सत्त्वात् – इति सिद्धान्तरत्नाकरे दूषितम् '[1606] ।

[1599] अष्टाध्यायी – (8-4-65)

[1600] अष्टाध्यायी – (8-3-24)

[1601] अष्टाध्यायी – (8-4-58)

[1602] अष्टाध्यायी – (1-1-56)

[1603] वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे

[1604] अष्टाध्यायी – (6-4-155)

[1605] अष्टाध्यायी – (7-2-115)

[1606] वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

वस्तुतस्तु भाष्ये सूत्रव्याख्याक्रमदर्शनेन “ अनुस्वारस्य ययि परसवर्णः ”[1607] इत्यतः परं “ झलां जश् झशि ”[1608], “ झरो झरि सवर्णे ”[1609] इत्यनयोः पाठदर्शनेन परसवर्णदृष्ट्या जश्त्वस्यासिद्धत्वेन षकारस्य च सवर्णाभावेन अत्र परसवर्णो नैव भवति ‘ शिंढि ’ इति, लोपाभावे ‘ शिंड्ढि ’ इति वा रूपम् इति शब्दरत्नकारः ।

अत्र अनुस्वारस्य स्थानीभूतादचः पूर्वत्वेन दृष्टत्वाभावस्तु नाशङ्कनीयः, स्थानिवत्त्वेन वकारगतं स्थानीभूतादचः पूर्वत्वेन दृष्टत्वं तस्यानुस्वारे आनयनसम्भवात् । भाष्ये ‘ पूर्वत्रासिद्धीये न स्थानिवत् ’ इत्याश्रित्य त्रिपादीस्थानं द्विर्वचनादीनाम् “ न पदान्त......... ” इति सूत्रे प्रत्याख्यानपक्षे तु णत्वे ‘ तस्य संयोगादिलोपलत्वणत्वेषु ’ इति प्रतिषेधात् स्थानिवत्त्वस्य दुर्वारत्वेनात्र परसवर्णो नेष्टः । णत्वे प्रतिपदोक्तपरिभाषा तु न, भाष्ये “ रषाभ्यां नो णः समानपदे ”[1610] इति सूत्रे “ अपदान्तस्य मूर्धन्यः ”[1611] इत्यनुवर्त्यं णग्रहणस्य प्रत्याख्यानेन प्रतिपदोक्तणत्वाभावात्[1612] ।

किञ्च शब्दरत्ने सवर्णविधौ स्थानिवत्त्वनिषेधस्योदाहरणमुक्तम् – पादमाचष्टे पादयति, ततः क्विपि पाद्धसति इति । तत्र “ झयो होऽन्यतरस्याम् ”[1613] इति पूर्वसवर्णे विधातव्ये पञ्चमीसमासपक्षे प्राप्तस्थानिवद्भावनिषेधाय सवर्णग्रहणम् । किञ्च हरितशब्दादाचक्षाणण्यन्ताद् क्विपि ‘ हरिद्धसति ’ इत्यादौ अपि प्राप्तस्थानिवत्त्वप्रतिषेधः फलम् । एवं ‘ हरिन्नमति ’ इत्यादौ अनुनासिकेऽपि तद्व्यावृत्तिः प्रयोजनम् । ‘ हयवरट् ’ सूत्रभाष्यरीत्या तत्र सवर्णग्रहणापकर्षेण तस्यापि सवर्णविधित्वात् ’ [1614] ।

7. अनुस्वारविधौ न स्थानिवत् – ‘ शिंषन्ति ’ ।

अत्र शिष्धातोर्लटि झि आदेशे अन्तादेशे श्नमि ‘ शिनष् + अन्ति ’ इति दशायाम् “ श्नसोरल्लोपः ” इत्यकारलोपे “ नश्चापदान्तस्य झलि ”[1615] इति सूत्रेण नकारस्यानुस्वारे कर्तव्येऽल्लोपस्य स्थानिवद्भावे तेन व्यवधानात् झल्परत्वाभावेनानुस्वारो न स्यात् । अतः अनुस्वारे कर्तव्ये स्थानिवत्त्वं निषिध्यते प्रकृतसूत्रेण । सर्वणभाविनि एवानुस्वारे निषेध इति भ्रमवारणाय पृथग् अनुस्वारग्रहणम् ।

[1607] अष्टाध्यायी – (8-4-58)
[1608] अष्टाध्यायी – (8-4-53)
[1609] अष्टाध्यायी – (8-4-65)
[1610] अष्टाध्यायी – (8-4-1)
[1611] अष्टाध्यायी – (8-3-55)
[1612] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे
[1613] अष्टाध्यायी – (8-4-62)
[1614] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे
[1615] अष्टाध्यायी – (8-3-24)

8. दीर्घविधौ न स्थानिवत् – ‘ प्रतिदीव्नः ’।

अत्र दिवु क्रीडादौ, तस्मात् “ कनिन्युवृषितक्षि.... ”[1616] इत्युणादिसूत्रेण कनिन्प्रत्यये ‘ प्रतिदिवन् ’ इति प्रातिपदिकात् शस्प्रत्यये शकारस्यानुबन्धलोपे “ अल्लोपोऽनः ”[1617] इति सूत्रेण अकारलोपे कृते “ हलि च ”[1618] इति सूत्रेण नकारे परे उपधादीर्घे कर्तव्ये अल्लोपस्य स्थानिवत्त्वेन हल्परत्वाभावाद् दीर्घो न स्यात्। अतः प्रकृतसूत्रेण दीर्घे कर्तव्ये स्थानिवत्त्वं निषिध्यते।

अत्र दीर्घपदेन दीर्घमात्रस्य ग्रहणं न तु त्रैपादिकस्यैवेति।

9. जश्विधौ न स्थानिवत् – ‘ सग्धिः ’।

अत्र अद्धातोः “ स्त्रियां क्तिन् ”[1619] इति सूत्रेण क्तिन्प्रत्यये “ बहुलं छन्दसि ”[1620] इति सूत्रेण धातोः स्थाने घस्लादेशे “ घसिभसोर्हलि च ”[1621] इति सूत्रेण उपधालोपे ‘ घ्स् + ति ’ इति दशायाम् “ झलो झलि ”[1622] इति सूत्रेण सकारलोपे “ झषस्तथोर्धोऽधः ”[1623] इति सूत्रेण तकारस्य स्थाने धकारादेशे “ झलां जश् झशि ”[1624] इति सूत्रेण घकारस्य स्थाने जश्त्वेन गकारादेशे ‘ ग्धिः ’ इति जाते ‘ समाना ग्धिः ’ इत्यर्थे “ समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु ”[1625] इति सूत्रेण समानशब्दस्य स्थाने स आदेशे ‘ सग्धिः ’ इतीष्टं रूपम्। किन्त्वत्र धकारस्य जश्त्वे कर्तव्ये उपधालोपस्य स्थानिवत्त्वेन झशपरत्वाभावात् जश्त्वं न स्यात्। अतः जश्त्वे स्थानिवत्त्वनिषेधः प्रकृतसूत्रेण विधीयते।

‘ सग्धिः स्त्री सहभोजनम् ’ इत्यमरात् “ सहस्य सः सञ्ज्ञायाम् ”[1626] इति सूत्रेण सहस्य सादेशः प्रतीयते। सग्धिशब्दः सहभोजने रूढः स्त्रीलिङ्गः। सहशब्दः सदृशार्थकोऽपि। अत एव सदृशार्थक-सहशब्देन समासे ‘ सदृशः सख्या ससखि ’ इत्यव्ययीभावे कौमुदी। किञ्च समानभोजनार्थकत्वमेव युक्तम्, साहित्यार्थकसहशब्देन कर्मधारयसमासस्य कुत्राप्यदर्शनात्। अतः सह भोजनमित्यस्य

[1616] उणादि – (1-156)
[1617] अष्टाध्यायी – (6-4-134)
[1618] अष्टाध्यायी – (8-2-77)
[1619] अष्टाध्यायी – (3-3-94)
[1620] अष्टाध्यायी – (2-4-39)
[1621] अष्टाध्यायी – (6-4-100)
[1622] अष्टाध्यायी – (8-2-26)
[1623] अष्टाध्यायी – (8-2-40)
[1624] अष्टाध्यायी – (8-4-53)
[1625] अष्टाध्यायी – (6-3-84)
[1626] अष्टाध्यायी – (6-3-78)

समानभोजनमित्येवार्थः। परन्तु रूढ्या वेदभाष्ये ‘ बन्धुभिः सह भोजनं सग्धिः ’ इत्युक्त्या च सम्मिल्य भोजनमेव तत्।

अत्र जश्पदेन “ झलां जश् झशि ” इत्येव गृह्यते, ‘ षडिकः ’ इत्येतत्परकभाष्यपर्यालोचनात्, चरादिसाहचर्याच्च [1627]।

10. चर्विधौ न स्थानिवत् – ‘ जक्षतुः’।

अत्र घस्धातोर्लिटि अतुसि द्वित्वे अभ्यासकार्ये ‘ जघस् + अतुस् ’ इत्यवस्थायाम् “ गमहनजनखनघसां लोपः क्ङित्यनङि ”[1628] इति सूत्रेण उपधालोपे “ खरि च ”[1629] इति सूत्रेण घकारस्य स्थाने चर्त्वेन ककारे “ शासिवसिघसीनाञ्च ”[1630] इति सूत्रेण सकारस्य स्थाने षत्वे च ‘ जक्षतुः ’ इत्यभीष्टं रूपम्। किन्त्वत्र चर्त्वे कर्तव्ये उपधालोपस्य स्थानिवत्त्वेन खर्परकत्वाभावात् चर्त्वं न स्यात्। अतः चर्त्वे स्थानिवत्त्वनिषेधोऽनेन विधीयते।

- **द्विर्वचनेऽचि – (1-1-58)**

“ स्थानिवदादेशोऽनल्विधौ ”, “ अचः परस्मिन् पूर्वविधौ ” इति द्वाभ्यां पूर्वसूत्राभ्याम् ‘ अचः ’, ‘ स्थानिवदादेशः ’ इति पदद्वयमनुवर्तते। द्विर्वचने, अचि इति पदविभागः। द्विपदात्मकं सूत्रमिदम्। द्विवचने, अचि इति समानाधिकरणे सप्तम्यौ। तत्र ‘ अचि ’ इति विशेष्यः, ‘ द्विवचने ’ इति पदन्तु तस्य विशेषणम्। प्रदीपे उक्तम् – ‘ तत्र द्विर्वचननिमित्तत्वात्तद्रूपाऽरोपेणाजेव द्विर्वचनमुच्यते। अथवा अधिकरणे ल्युट्। द्विरुच्यतेऽस्मिन्निति द्विर्वचनम् ’[1631] इति। यतोहि द्विर्वचनशब्दः ‘ आयुर्घृतम् ’ इतिवत् द्विर्वचननिमित्तेऽर्थे लाक्षणिकः। ततश्च द्विर्वचने = द्विर्वचननिमित्ते अचि इति सामानाधिकरण्यम्। अथवा द्विः वचनं यस्मिन्, येन परनिमित्तेन वा तद् द्विर्वचनम्, तस्मिन् द्विवचने। द्विर्वचनं यस्मिन्नचि तद् द्विर्वचनमिति फलितार्थः। अथवा द्विर्वचनमस्ति यस्मिन् तद् द्विर्वचनम्, अर्शआद्यजन्तः। द्विर्वचने इत्यत्र तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणं कर्तव्यं यथा – द्विर्वचनं च द्विर्वचनं च इति द्विर्वचनम्, तस्मिन् द्विर्वचने। सरूपाणामेकशेष एकविभक्तौ इति सूत्रेण एकशेषः।

[1627] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1628] अष्टाध्यायी – (6-4-98)

[1629] अष्टाध्यायी – (8-4-55)

[1630] अष्टाध्यायी – (8-3-60)

[1631] प्रदीपः – प्रकृतसूत्रे

प्रदीपे कैयटेनोक्तम् – ‘ सहविवक्षाभावेऽपि सरूपाणामित्येकशेषः, सञ्ज्ञापरिभाषावद् लक्षणाङ्गत्वात्तस्येति प्रागेवोक्तम् । नन्वेकशेषे द्विवचनापत्तिः स्यादिति चेन्न, विभक्त्यन्तयोश्चैकशेष-विधानादप्रातिपदिकत्वाच्च द्विवचनाभावः । अथवैकशेषेण समानफलत्वात्तन्त्रमावृत्तिर्वा लक्ष्यते ’[1632] । द्विर्वचनशब्दे तन्त्रेण आवृत्त्या एकस्य निमित्तनिमित्तभावेन अचि अन्वयः । द्वितीयन्तु विषयसप्तम्यन्तं द्वित्वे कर्तव्ये इत्यर्थकम् । तेन च स्थानिवत्त्वस्य कालावधारणं क्रियते । एवञ्च द्वित्वनिमित्ते अचि परे, द्वित्वे कर्तव्ये अचः आदेशः, अच्स्थानिकः आदेशः, स्थानिवत्स्यात्, स्थानिवद्रूपं लभते इति सूत्रार्थो सम्पन्नः । यद्यपि परनिमित्तकाजादेशस्य स्थानिवत्त्वम् “ अचः परस्मिन् पूर्वविधौ ” इति सूत्रेणैव सुलभम्, तथापि पूर्वविधौ = अनादिष्टादचः पूर्वत्वेन दृष्टस्य विधौ तत्प्रवर्तते । ‘ चक्रतुः ’ इत्यादौ द्विर्वचनन्तु साच्कस्य भवितुमर्हति, न तु यणाद्यादेशस्थानिभूताचः पूर्वस्येति द्वित्वस्य पूर्वविध्यभावे तत्र कर्तव्ये तेनाप्राप्तं स्थानिवत्त्वमनेन विधीयते । रूपातिदेशोऽयम् । पपतुः, पपुः । जग्मतुः, जग्मुः । चक्रतुः, चक्रुः । निनय, निनाय । लुलव, लुलाव । ‘ आटिटत् ’ इति उदाहरणानि च ।

- **अत्र षट् पक्षाः सम्भवन्ति**

एतस्य सूत्रस्यार्थप्रसङ्गे षट् पक्षाः सम्भवन्ति । तेषु पञ्चसु पक्षेषु दोषदर्शनात् षष्ठ एव पक्ष उक्तार्थरूपः समाश्रीयते – इति पदमञ्जर्यां हरदत्तो व्याचख्यौ । तथा हि – द्विर्वचने इति पदस्यानावृत्तौ द्विर्वचने इत्यत्र विषयसप्तम्याश्रयणात् अचि इत्यस्य आदेशोपलक्षणत्वे स्थानिवत्त्वं प्रति निमित्तत्वे वा स्वीकृते पक्षद्वयम् । द्विर्वचने इत्यस्य अचो विशेषणत्वे उक्तरीत्या पक्षद्वयम् । द्विर्वचने इत्यस्यावृत्तौ एकत्र विषयसप्तमी, अपरत्र अचि इत्यस्य विशेषणतायां समानाधिकरणसप्तमीति विवक्षायां पुनः अचि इत्यस्य स्थानिवत्त्वं प्रति निमित्तत्वे, आदेशोपलक्षणत्वे वा पक्षद्वयम् ।

एवं षट् पक्षाः सम्भवन्ति । ते चैवं सन्ति –

1. अचि योऽजादेशः स द्विर्वचने कर्तव्ये स्थानिवद्भवति ।

2. द्विर्वचने कर्तव्येऽजादेशः स्थानिवद्भवति अचि परे ।

3. द्वित्वनिमित्तेऽचि योऽजादेशः स स्थानिवद्भवति ।

4. अजादेशः स्थानिवद्भवति द्वित्वनिमित्तेऽचि परतः ।

5. द्विवचने कर्तव्येऽजादेशः स्थानिवद्भवति द्विर्वचननिमित्तेऽचि परतः ।

6. द्विर्वचननिमित्तेऽचि योऽजादेशः स स्थानिवद्भवति द्वित्वे कर्तव्ये ।

[1632] प्रदीपः – प्रकृतसूत्रे

एषु **प्रथमे** पक्षे द्विर्वचनेनाच् अविशेषितः, अतो द्विर्वचनस्यानिमित्तेऽपि अचि योऽजादेशः स स्थानिवद्भवेत्। ततश्च ' अचिकीर्तत् ' इत्यत्र द्विर्वचनानिमितेऽपि णिचि योऽजादेशः " उपधायाश्च "[1633] इति इत्वम्, तस्य द्विर्वचने कर्तव्ये स्थानिवद्भावे ' कॄत् ' इत्यस्यैव द्वित्वे ' अचकीर्तत् ' इत्येवानिष्टं रूपमापद्येत। एवं ' दुद्यूषति ' इत्यत्र ऊठि यो यण् तस्य स्थानिवत्त्वे ' दिद्यूषति ' इत्यनिष्टं रूपं प्रसज्येत। एवमेव भवनमिच्छति भवनीयति, भवनीयतेः सनि ' बिभवनीयिषति ' इत्यत्र " सन्यङोः "[1634] इति द्वित्वे कर्तव्ये ल्युटि जातयोर्गुणावादेशयोः स्थानिवद्भावे ' भू ' इत्यस्यैव द्वित्वे ' बुभवनीयिषति ' इत्यनिष्टं रूपं प्रसज्येत।

द्वितीये तु यद्यपि ' अचिकीर्तत् ' इत्यत्र न दोषः, तत्र इत्वस्य तकारेण व्यवहितत्वात्। यतोहि स्थानिवद्भावभाज आदेशस्य स्थानिवद्भावकालेऽचि अनन्तरे सत्येव स्थानिवत्त्वेन भवितव्यम्। तथापि ' दुद्यूषति ' इत्यादौ दोषस्तदवस्थ एव, स्थानिवत्त्वप्रवृत्तिवेलायामजादेशस्य यणोऽनन्तराच्परकत्वात्। किञ्च ' ययौ ' इत्यादौ " आत औ णलः "[1635] इत्यौकारेण आकारस्य वृद्धौ कृतायामादेशादनन्तर-परस्याचोऽभावात् स्थानिवत्त्वाप्रवृत्तौ द्वित्वं न स्यात्। ' जग्मतुः ' इत्यादौ च " गमहनजनखनघसां लोपः क्ङित्यनङि "[1636] इति उपधालोपे तस्याजादेशस्य मकारेण व्यवधानाद् अव्यवहिताच्परकत्वाभावात् स्थानिवत्त्वाभावे द्वित्वं न स्यात्।

तृतीयचतुर्थयोस्तु कालावधारणाभावाद् द्विर्वचनादुत्तरकालमपि स्थानिरूपमेवावतिष्ठेत। चतुर्थे तु ' ययौ, जग्मतुः ' इत्यादौ द्वितीयपक्षवद् अनन्तराच्परकत्वाभावात् स्थानिवत्त्वानापत्तिरित्यपि दोषः।

पञ्चमेऽपि ' ययौ, जग्मतुः ' इत्यादौ स्थानिवत्त्वाप्रवृत्तौ द्वित्वासिद्धिरूपदोषो जागर्ति। एवं पञ्चसु पक्षेषु दोषसद्भावात् **षष्ठो**ऽयं पक्षः आश्रीयते - द्वित्वनिमित्तेऽचि परेऽच आदेशः स्थानिवद्भवति द्वित्वे कर्तव्ये इति। अत्र पक्षे द्विर्वचनेन अचो विशेषणाद् ' अचिकीर्तत्, दुद्यूषति, बिभवनीयिषति ' इत्यादौ न दोषः, अजादेशनिमित्तस्याचो द्वित्वनिमित्तत्वाभावात्। अचि इत्यस्यादेशोपलक्षणत्वाच्च (न तु स्थानिवत्त्वं प्रति अव्यवहितपरतया निमित्तत्वम्) ' ययौ ' इत्यादावपि न दोषः[1637]।

पूर्वोक्तरीत्याऽचो द्वित्वनिमित्तत्वमेवेदं सूत्रं प्रवर्तते इति यद्यङ्गीक्रियते तर्हि ' चक्रतुः ' इत्यादावपि स्थानिवद्भावो न स्यात्। तत्र अतुसो द्वित्वनिमित्तत्वेऽप्यकारस्य तन्निमित्तत्वाभावात्।

[1633] अष्टाध्यायी – (7-1-101)

[1634] अष्टाध्यायी – (6-1-9)

[1635] अष्टाध्यायी – (7-1-34)

[1636] अष्टाध्यायी – (6-4-98)

[1637] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

सूत्रारम्भसामर्थ्यादत्र स्थानिवद्भावः प्रवर्तते इति तु वक्तुं न शक्यम् । ' चक्रे ' इत्यादौ केवलेऽज्निमित्ते सूत्रस्य चरितार्थत्वात् । एवञ्च ' चक्रतुः ' इत्यादावस्त्येव दोष इति चेन्न, अत्र द्वित्वनिमित्तशब्देन साक्षाद्वा समुदायघटकतया वा यद् द्वित्वप्रयोजकं तस्य सर्वस्यापि ग्रहणम् । लक्ष्यानुरोधात् । एतच्च " ठस्येकः "[1638] इति सूत्रे कैयटे स्पष्टम् । अत एव ' ऊर्णुञ् ' धातोः " सनीवन्तर्धभ्रस्जदम्भुश्रि-स्वृयूर्णभरज्ञपिसनाम् "[1639] इति इडागमपक्षे " विभाषोर्णोः "[1640] इति ङित्त्वाभावे ' ऊर्णुनविषति ' इति सिद्ध्यति । सन्नन्तस्य द्वित्वविधानेऽपि सनो द्वित्वप्रयोजकत्वेन तस्मिन् परे प्राप्तयोः गुणावादेशयोः द्वित्वे कर्तव्ये स्थानिवत्त्वनिषेधात् ।

अत एव तद्भावभावितामात्रेणेह निमित्तत्वमित्युक्तम् । तत्र तस्या भावः इति तद्भावः तदीयसत्ता । तद्भावे सति भवति तच्छीलः तद्भावभावी । तस्य भावः तद्भावभाविता इत्यर्थः । एवञ्च द्वित्वनिमित्तघटकतया सन इडागमः, अतुसोऽकारश्च द्वित्वनिमित्तं भवत्येवेति ' चक्रतुः ' इत्यादौ नास्ति कश्चिद्दोषः इति । अन्यथाऽत्र द्वित्वनिमित्तस्यातुसो यण्निमित्तत्वाभावाद्यण्निमित्तस्याकारस्य द्वित्व-निमित्तत्वाभावाच्च यणः स्थानिवद्भावो दुर्लभ एव भवति ।

पूर्वोक्तरीत्यङ्गीकारे ' अरिरिषति ' इति रूपं न सिद्ध्येत् । ऋधातोः सन्प्रत्यये " स्मिपूङ्रञ्ज्वशां सनि "[1641] इति सूत्रेण इडागमे कृते इस्शब्दनिमित्तकस्य गुणस्य " द्विर्वचनेऽचि " इति सूत्रेण स्थानिवद्भावे " अजादेर्द्वितीयस्य "[1642] इति सूत्रानुसारम् ' इस् ' इत्यस्यैव द्वित्वे ' अरिरिषति ' इतीष्टं रूपं न सिध्येदिति चेन्न, ऋधातोः सनि " स्मिपूङ्रञ्ज्वशां सनि " इति सूत्रेण इडागमे गुणे च कृते ' अर् + इस ' इति दशायां " द्विर्वचनेऽचि " इति सूत्रेण द्विर्वचने कर्तव्येऽजादेशः प्रकृतपरिभाषाबलाद् न स्थानिवद् भवति । अत्र हि ' इ ' इत्येतद् अजादेशस्य निमित्तरूपेणाश्रीयते द्विर्वचनरूपं कार्यं कर्तुमपि तस्यैवाश्रयणं क्रियते इति न भवति स्थानिवद्भावः । तथा सति ' रिस् रिस् ' इत्येव द्विरुक्ते ' अरिरिषति ' इत्यभीष्टं रूपं सिद्धं भवतीति विभावनीयं सुधीभिः । कार्यिणोऽपि निमित्तत्वे शीङो ङित्त्वात् " क्ङिति च "[1643] इति

[1638] अष्टाध्यायी – (7-3-50)
[1639] अष्टाध्यायी – (7-2-49)
[1640] अष्टाध्यायी – (1-2-3)
[1641] अष्टाध्यायी – (7-2-74)
[1642] अष्टाध्यायी – (6-1-2)
[1643] अष्टाध्यायी – (1-1-5)

सूत्रेण ङिन्निमित्तकगुणनिषेधे ‘ शयितरि ’ इति प्रयोगासिद्ध्या “ स्थण्डिलाच्छयितरि व्रते ”[1644] इति सूत्रे तन्निर्देशः ‘ नहि कार्यी निमित्ततयाश्रीयते ’ अस्याः परिभाषायाः ज्ञापकः ।

न चैवं कार्यिणो निमित्तत्वानाश्रयणे ऊर्णुधातोः सनि प्रत्यये ‘ ऊर्णु + स ’ इडागमे च कृते ‘ ऊर्णु + इस ’ इति स्थिते द्विर्वचनात् परत्वात् गुणेऽवादेशे च ‘ ऊर्णव् + इस ’ इति जाते ‘ पुनःप्रसङ्गविज्ञानात् सिद्धम् ’ इति परिभाषया “ सन्यङोः ”[1645] इति द्विर्वचने विधातव्ये “ द्विर्वचनेऽचि ” इति स्थानिवद्भावे कर्तव्ये सन्नन्तस्य कार्यित्वात् कार्यिणश्च निमित्तत्वेनाऽनाश्रयणात् स्थानिवद्भावो न स्यात् । ततश्च “ अजादेर्द्वितीयस्य ” इति सूत्रेण ‘ नव् ’ इत्येतस्यैव द्विर्वचनं स्यात्, तथा च सति अभ्यासस्य “ सन्यतः ”[1646] इति सूत्रेण अभ्यासस्याकारस्य इत्त्वे ‘ ऊर्णिनविषति ’ इत्यनिष्टं रूपनापद्येत, इष्यते च स्थानिवद्भावेन ‘ नु ’ इत्येतस्य द्विर्वचनं यथा स्यात् तथा च सति ‘ ऊर्णुनविषति ’ इति इष्टं रूपं सिद्धं भवितुमर्हति ।

अत्रेदमनुसन्धेयम् – एवंविधं दोषप्रसङ्गमवलोक्यैव हि परिभाषायां ‘ कार्यमनुभवन् कार्यी ’ इत्युक्तम् । अर्थात् तदेव कार्यि निमित्तरूपेण नाश्रीयते यत् कार्यमनुभवति । ‘ कार्यमननुभवन् हि तु कार्यी निमित्तत्वेन नाश्रीयते ’ = आश्रयितुं शक्यते इत्यर्थः । एवञ्च ‘ ऊर्णव् + इस ’ इत्यत्र सन्नन्तस्य कार्यित्वेऽपि “ द्विर्वचनेऽचि ” इति प्रवृत्तिवेलायां ‘ इस ’ इत्येतस्य निमित्तताऽऽश्रीयते, तस्माच्च पृथग्भूतस्य नुशब्दस्य द्विर्वचनं कर्तुमिष्यते । एतस्मात् कारणात् एवंविधेषु प्रसङ्गेषु नानया परिभाषया काचित् बाधोपस्थाप्यते । यत्र हि कार्यी निमित्तञ्च एकमेव भवति, तत्रैवाऽस्याः परिभाषायाः स्वीकृतत्वात् [1647] । ‘ कार्यमनुभवत एव कार्यिणोऽनिमित्ततयाऽत्र न दोषः । यतोहि ऊर्णोतेर्नुशब्द एव द्वित्वरूपं कार्यमनुभवति, न तु सन् । अतस्तस्य निमित्तत्वं सम्भवति ’ [1648] ।

- **अज्ग्रहणस्य रूपातिदेशज्ञापकत्वम्**

अत्र सूत्रे अच्ग्रहणं सूत्रस्यास्य स्थानिवद्रूपातिदेशकत्वे ज्ञापकम् । यतोहि द्विर्वचनकार्यातिदेशे अज्ग्रहणं व्यर्थं स्यात् । ‘ जेघ्रीयते ’ इत्यादौ स्थानिवत्त्वनिवारणाय तत्कृतम् । तत्र च ‘ अचि ’ इत्यभावे जातेऽपि स्थानिवत्त्वे साच्कत्वात् द्विर्वचनं स्यात्, असत्यपि स्थानिवत्त्वे साच्कत्वात् स्यादेव द्विर्वचनम् । ततश्च ‘ अचि ’ इति गृहीते स्थानिवत्त्वेऽसति, अगृहीते च तस्मिन् सत्यपि स्थानिवत्त्वे सर्वथा द्विर्वचन-

---

[1644] अष्टाध्यायी – (4-2-15)

[1645] अष्टाध्यायी – (6-1-9)

[1646] अष्टाध्यायी – (7-4-79)

[1647] पारिभाषिकः – परिभाषा – 11. (पृ. – 16)

[1648] तत्त्वबोधिनी – प्रकृतसूत्रे

सिद्ध्या अज्ग्रहणस्य नेदं प्रत्युदाहरणं सम्भवतीति अज्ग्रहणं व्यर्थमेव स्यात्। तथा हि – घ्राधातोः ध्माधातोश्च यङि, " ई घ्राध्मोः "[1649] इति सूत्रेण धातोराकारस्य ईकारादेशे ' घ्री + य, ध्मी + य ' इति जाते इदानीमनज्निमित्तकस्य अजादेशस्य ईकारस्य स्थानिरूपातिदेशे घ्राध्मारूपत्वे लब्धे, ततः द्वित्वे ' जाघ्रायते, दाध्मायते ' इत्यनिष्टं स्यात्। तद्वारणार्थं सूत्रे ' अचि ' इत्युपात्तम्। तथा सति अस्य ईकारादेशस्य अनज्निमित्तकत्वेन स्थानिवद्रूपातिदेशो न भवतीति ' घ्री, ध्मी ' इत्यनयोरेव द्वित्वे ' जेघ्रीयते, देध्मीयते ' इति इष्टरूपं सिध्यतीति सार्थकमज्ग्रहणम्। कार्यातिदेशत्वे तु घ्रीध्मीशब्दयोः स्थानिनः द्वित्वकार्यातिदेशाद् ईकारविशिष्टस्यैव द्वित्वेन इष्टसिद्ध्या अङ्गग्रहणं व्यर्थमेव स्यात्। यथोक्तं भाष्ये – ' अज्ग्रहणन्तु ज्ञापकं रूपस्थानिवद्भावस्य। यदयमज्ग्रहणं करोति, तज्ज्ञापयत्याचार्यः – रूपं स्थानिवद्भवतीति। कथं कृत्वा ज्ञापकम्? अज्ग्रहणस्यैतत् प्रयोजनम् – इह मा भूत् – जेघ्रीयते, देध्मीयते। यदि च रूपं स्थानिवद्भवति, ततोऽज्ग्रहणमर्थवद् भवति। अथ हि कार्यं नार्थोऽज्ग्रहणेन। भवत्येवात्र द्विर्वचनम् '[1650]। इति।

उदाहरणमुखेन रूपातिदेशत्वनिरूपणम्

पपतुः – पाधातोः लिटि, तस्प्रत्यये, तस्य अतुसादेशे ' पा + अतुस् ' इति स्थिते, द्वित्वात् परत्वात् " आतो लोप इटि च "[1651] इति सूत्रेण आल्लोपे, धातोरनच्कत्वात् " एकाचो द्वे प्रथमस्य "[1652] इत्यनुवृत्तिसहितेन " लिटि धातोरनभ्यासस्य "[1653] इति सूत्रेण धातोः द्वित्वं न स्यात्। आल्लोपस्य प्रकृतसूत्रेण स्थानिवद्रूपातिदेशे तु ' पा ' इति रूपस्य प्राप्त्या, तस्य द्वित्वे अभ्यासकार्येषु कृतेषु ' पपा + अतुस् ' इति जाते, अधुना द्वित्वकर्तव्यताया अभावादुत्तरखण्डे आकाररूपं न दृश्यते। ततश्च ' पपतुः ' इति रूपं भवति। यदि स्थानिवत् कार्यं स्यादित्यर्थं स्वीकृत्य स्थानिकार्यमादेशे अतिदिश्यते, तदा ' प् ' इत्यत्र आल्लोपस्यापि द्वित्वं भवति। तथापि ' पपतुः ' इत्यत्र अभ्यासे अच् न श्रूयेत। अतः कार्यातिदेशं परित्यज्य रूपातिदेशः स्वीकृतः।

[1649] अष्टाध्यायी – (7-4-31)

[1650] भाष्यम् – प्रकृतसूत्रे

[1651] अष्टाध्यायी – (6-4-64)

[1652] अष्टाध्यायी – (6-1-1)

[1653] अष्टाध्यायी – (6-1-8)

जग्मतुः – गम्धातोः लिटि, तस्प्रत्यये, तस्य अतुसादेशे, ' गम् + अतुस् ' इति जाते, द्वित्वात्परत्वात् " गमहनजनखनघसां लोपः क्ङित्यनङि "[1654] इति सूत्रेण धातोः उपधाकार्यस्य लोपे, तस्य स्थानिवद्रूपातिदेशादेव ' गम् ' इत्यस्य द्वित्वे ' जग्मतुः ' इतीष्टसिद्धिः । एवं ' जग्मुः ' अपि ।

चक्रतुः – कृधातोः लिटि तस्प्रत्यये, तस्य अतुसादेशे ' कृ + अतुस् ' इति स्थिते, ऋकारस्य यणादेशे रेफे, तस्य स्थानिवद्रूपादेशादेव ' कृ ' इत्यस्य द्वित्वम्, ' चक्रतुः ' इतीष्टसिद्धिः स्यात् । एवं ' चक्रुः ' अपि ।

निनाय, निनय – नीधातोः लिटि, उत्तमपुरुषैकवचने मिपि, तस्य णलादेशे, तस्य " णलुत्तमो वा "[1655] इति विकल्पतया णित्त्वपक्षे, द्वित्वात्परत्वाद् धातोः इकारस्य वृद्धौ आयादेशे ' नाय् + अ ' इति, णित्त्वाभावे गुणे अयादेशे च ' नय् + अ ' इति च जाते ' आय्, अय् ' इत्यादेशयोः स्थानिवद्रूपातिदेशे एव ' नै, ने ' इत्यनयोः द्वित्वम्, ततः अभ्यासह्रस्वे इकारे ' निनाय, निनय ' इति इष्टं सिध्यति ।

लुलाव, लुलव – लूधातोः लिटि, उत्तमपुरुषैकवचने मिपि, तस्य णलादेशे, तस्य " णलुत्तमो वा " इति विकल्पतया णित्त्वपक्षे, द्वित्वात्परत्वाद् वृद्धौ, आवादेशे, ' लाव् + अ ' इति, णित्वाभावे गुणे, अवादेशे, ' लव् + अ ' इति च जाते, स्थानिवद्रूपातिदेशे एव ' लौ, लो ' इत्यनयोः द्वित्वम्, ततः अभ्यासह्रस्वेन उकारे ' लुलाव, लुलव ' इतीष्टसिद्धिः ।

आटिटत् – अट्धातोः णिजन्तात् लुङि, आडागमे " आटश्च "[1656] इति सूत्रेण वृद्धौ चङि, ' आट् + इ + अ + त् ' इति स्थिते, द्वित्वात्परत्वाद् णिलोपे कृते, तस्य स्थानिवद्रूपातिदेशादेव टिशब्दस्य द्वित्वेन ' आटिटत् ' इति अभ्यासे इकारविशिष्टरूपं भवति ।

एवमाल्लोपोपधालोपयणादेशायवायावादेशणिलोपेषु द्वित्वात् परत्वात् कृतेषु स्थानिवद्रूपातिदेशे एव इष्टसिद्धिः । अन्यथा क्वचिद्धातोः अनच्कत्वाद् द्वित्वमेव न स्यात् । क्वचिद् द्वित्वेऽपि अभ्यासे अनिष्टरूपं स्यात् । एवं स्थानिकार्यातिदेशेऽपि अभ्यासेऽनिष्टरूपमनिवार्यं स्यात् । अतः रूपातिदेश एव स्वीकर्तव्यः ।

ननु ' णु स्तुतौ ' इति धातोः णिजन्तात् सनि ' नुनावयिषति ' इति रूपेण भाव्यम् । परन्तु नुधातोः णिचि वृद्धौ आवादेशे ' नावि ' इति जाते, ' नावि ' इति णिजन्तात् सनि, तस्य इडागमे, ' नावयिष ' इति जाते अस्यामवस्थायां द्वित्वे कर्तव्ये ' नाव् ' इत्यस्य स्थानिवद्रूपातिदेशो न भवति । अस्य

1654 अष्टाध्यायी – (6-4-98)

1655 अष्टाध्यायी – (7-1-91)

1656 अष्टाध्यायी – (6-1-89)

द्वित्वनिमित्ताच्परत्वाभावात्, परस्य णिचः इकारो न द्वित्वनिमित्तमिति नात्र तत्सूत्रं प्रवर्तते। अतः ' नाव् ' इत्यस्य द्वित्वे ' निनावयिषति ' इति स्यात्, इष्टं ' नुनावयिषति ' इति रूपं न स्यादिति चेत्, मैवम्। ' णिज्निमित्तकाजादेशः स्थानिवद्रूपं लभते ' इति ज्ञापनेनादोषात् । अत्र प्रमाणन्तु अवर्णपरकपवर्गयण्जकारेषु परेषु अभ्यासोकारस्य इत्वं स्यात् इत्यर्थकम् " ओः पुयण्ज्यपरे "[1657] इति सूत्रम्। उदाहरणानि च – पूङ् - पिपावयिषति, भू - बिभावयिषति, यु - यियावयिषति, रु - रिरावयिषति, लूञ् - लिलावयिषति, जु - जिजावयिषति । एषु द्वित्वं प्रत्यनिमित्ते णिचि स्थानिवत्त्वाप्रवृत्तौ कृतवृद्ध्यावादेशस्य ' पाव् ' इत्यादेर्द्वित्वे अभ्यासह्रस्वे " सन्यतः "[1658] इति सूत्रेण इत्वे ' पिपावयिषति ' इत्यादिरूपसिद्धौ पवर्गयण्जकारग्रहणं व्यर्थम्। पयग्रहणन्तु कर्तव्यमेव। ' पिपावयिषति, यियावयिषति ' इत्यत्र " सन्यतः " इति सूत्रेण इत्वेन सिद्धावपि ' पिपविषते, यियविषति ' इत्यत्र ' पूङ् धातुः यु धातुः ' इत्यनयोरण्यन्तात् सनि अभ्यासे इत्वार्थं तदावश्यकत्वात्। तत्र " इको झल् "[1659] इति सूत्रेण सनः कित्त्वे " श्र्युकः किति "[1660] इति सूत्रेण प्राप्तमिण्निषेधं बाधित्वा " स्मिपूङ्रञ्ज्वशां सनि ", " सनीवन्तर्ध-भ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् " इति द्वाभ्यां सूत्राभ्यां क्रमश इति कृते गुणावादेशयोः कृतयोरिडादेः सनो द्वित्वनिमित्तत्वेन इटोऽपि द्वित्वं प्रति निमित्ततया " द्विर्वचनेऽचि " इत्यस्य प्रवृत्त्या गुणावादेशयोः स्थानिवत्त्वे ' पू, यु ' इत्यनयोर्द्वित्वेऽभ्यासेऽकाराभावात् " सन्यतः " इति सूत्रस्याप्राप्तौ इत्वार्थं ' पययोः ' इत्यस्यावश्यकत्वात् । एवञ्च वर्गप्रत्याहारजकारग्रहणम् ' द्वित्वे कार्ये णावजादेशः स्थानिवत् ' इत्यनाश्रयणे व्यर्थं सदेतज्ज्ञापयति। ज्ञापिते तु एतस्मिन्नर्थे वर्णप्रत्याहारजकारग्रहणमर्थवत्। तथाहि – ' बिभावयिषति ' इत्यादिषु णावजादेशस्य वृद्ध्यावादेशस्य स्थानिवत्त्वे सति उवर्णान्तानां द्वित्वेऽभ्यासेऽकाराभावेन " सन्यतः " इति सूत्रस्य अप्रसक्तौ उकारस्य इत्वार्थमेतदावश्यकम्।

पूर्वोक्तज्ञापकत्वाङ्गीकारे ' कॄत संशब्दने ' इति धातोर्णिचि चङि " उपधायाश्च "[1661] इति सूत्रेण इत्वस्य द्वित्वे कार्ये स्थानिवद्भावे ' कॄत् ' इत्यस्यैव द्वित्वे उरदत्वे हलादिशेषे च ' अचकीर्तत् ' इत्येवानिष्टमापद्येत, अभ्यासस्य लघुपरकत्वाभावात् सन्वत्त्वाभावे " सन्यतः " इति सूत्रेणापि इत्त्वं न स्यात् । अभीष्टं रूपन्तु ' अचिकीर्तत् ' इति। तथा चाभ्यासे इकारो न श्रूयते इति चेन्न, ज्ञापकस्य सजातीयविषयत्वात् । यत्र द्विरुक्तावभ्यासोत्तरखण्डस्याद्योऽच् प्रक्रियायां परिनिष्ठिते रूपे वाऽवर्णो

[1657] अष्टाध्यायी – (7-4-80)

[1658] अष्टाध्यायी – (6-4-79)

[1659] अष्टाध्यायी – (1-2-9)

[1660] अष्टाध्यायी – (7-2-11)

[1661] अष्टाध्यायी – (7-1-101)

लभ्यते, तत्रैवास्य स्थानिवत्त्वस्य प्रवृत्तिस्वीकारात् । यथा ‘ नुनावयिषति ’ इत्यादौ । ‘ अचिकीर्तत् ’ इत्यत्राभ्यासोत्तरखण्डे कदापि आद्याचोऽवर्णस्याभावान्न स्थानिवत्त्वमिति इत्वे रपरत्वे च ‘ किर्त् ’ इत्यस्यैव द्वित्वे ‘ अचिकीर्तत् ’ इति इष्टरूपसिद्धेः । स्पष्टमिदं सर्वं सिद्धान्तकौमुद्याम्[1662] ।

उक्तञ्च भाष्ये – ‘ यद्येतज्ज्ञाप्यते, ‘ अचिकीर्तत् ’ अत्रापि प्राप्नोति । तुल्यजातीयस्य ज्ञापकम् । कश्च तुल्यजातीयः ? यथाजातीयकाः पुयण्जयः । कथञ्जातीयकाश्चैते ? अवर्णपराः ’[1663] । इति ।

यद्यपि परिनिष्ठित एवावर्णपरत्वमित्याशयेन ‘ उवर्णादेश एव स्थानिवत् स्यान्नान्यः ’ इति वदतां बोपदेवादीनां मते ‘ औनिनत्, औजिढत् ’ इत्येव भाव्यम्, अवर्णादेशस्य स्थानिवत्त्वे तु परिनिष्ठितरूपे अवर्णपरत्वालाभात्तथापि ‘ अचिकीर्तत् ’ इत्यादौ स्थानिवत्त्वमाशङ्क्य उत्तरभागे अवर्णाभावादिति भाष्यकारोक्तपरिहारपर्यालोचनया उवर्णादेश एव स्थानिवदिति नियमो नास्तीति ‘ औननत् ’ इति रूपं निर्बाधमेव । किञ्च उवर्णादेश एवेति नियमे “ लोपः पिबतेरीच्चाभ्यासस्य ”[1664] इति सूत्रे ‘ अपीप्यत् ’ इत्यत्र पिबतेर्णौ “ शाच्छासाह्वाव्यावेपां युक् ”[1665] इत्यादिना युकि चङि उपधालोपे तस्य स्थानिवत्त्वात् ‘ पाय् ’ शब्दस्य द्वित्वमिति वृत्तिग्रन्थो विरुध्येत[1666] ।

एवं स्थिते काशिकायाम् “ पूर्वत्रासिद्धम् ”[1667] इति सूत्रव्याख्यानावसरे वहधातोर्निष्ठान्तात् णिचि चङि ‘ औजढत् ’ इति रूपं भवतीत्युक्तम् । णिचि कृतस्य टिलोपस्य स्थानिवद्भावस्तत्र प्रवर्तत इति न्यासकारेण च व्याख्यातम्[1668] ।

‘ शुष्किका शुष्कजङ्घा च क्षामिमानौजढत्तथा ’ इति वैयाघ्रपद्यवार्तिकस्य ‘ औजढत् ’ इति प्रयोगोऽपि विरुध्येत । एतद्धि “ पूर्वत्रासिद्धम् ” इत्यस्य प्रयोजनकथनवार्त्तिकम् । अत्र काशिकायाम् “ पूर्वत्रासिद्धम् ” इति सूत्रे ‘ औजढत् ’ इत्युदाहृत्य ‘ ऊढिमाख्यद् औजिढत् ’ इत्येतत्तु क्तिन्नन्तस्य ऊढिशब्दस्य भवतीत्युक्तम्, एतत्तु विरुद्धमेव । उवर्णादेश एव स्थानिवदिति नियमे णौ कृतस्य टिलोपस्यात्र स्थानिवत्त्वाभावेन ह्-तशब्दस्य ह्-तिशब्दस्य वा द्वित्वासंभवात् । स्पष्टमिदं सर्वं तत्त्वबोधिन्याम्[1669] ।

[1662] सिद्धान्तकौमुदी – चुरादिप्रकरणे ‘ ऊन परिहाणे ’ धातुव्याख्यानावसरे – (पृ. – 409)

[1663] भाष्यम् – प्रकृतसूत्रे

[1664] अष्टाध्यायी – (7-4--4)

[1665] अष्टाध्यायी – (7-3-37)

[1666] तत्त्वबोधिनी – चुरादिप्रकरणे ‘ ऊन परिहाणे ’ धातुव्याख्यानावसरे – (पृ. – 413)

[1667] अष्टाध्यायी – (8-2-1)

[1668] काशिका – न्यासः – पूर्वत्रासिद्धम् – (8-2-1) इति सूत्रे

[1669] तत्त्वबोधिनी – चुरादिप्रकरणे ‘ ऊन परिहाणे ’ धातुव्याख्यानावसरे – (पृ. – 413)

बोपदेवादीनां मते ‘ औनिनत्, औजिढत् ’ इति रूपद्वयं भाष्यविरुद्धत्वान्नादरणीयमेव इति सिद्धान्तकौमुदीकारतत्त्वबोधिनीकारादयोऽनुमन्यन्ते । वामनवचनं वार्तिकदूषणपरभाष्यमतविरुद्धं न भवति । यतः नित्यानित्ययोर्विप्रतिषेधानुपपत्तिरिति ‘ दिदवनीयिषति ’ इत्याद्यसिद्धिरिति दूषणद्वयस्य भाष्येऽनुक्ततया दूषणान्तराणामपि भाष्यमुपलक्षणमिति स्थिते ‘ औजढत् ’ इति अभ्यासे आकारादेशोऽपि विधेयः स्यादिति वार्तिके दूषणान्तरस्यापि सद्भावनात् ।

किञ्च सजातीयविषयव्यापकतया वर्णविरोधोऽपि नास्ति । यत्र द्विरुक्तौ अभ्यासस्योत्तरखण्डस्य आद्योऽज्वर्णः तत्र स्थानिवदिति भाष्यार्थः वक्तव्यः । प्रकृते हतशब्दस्य द्वित्वे प्रक्रियादशायाम् उत्तरखण्डेऽस्त्येव । एवञ्च ‘ औजढत् ’ इत्येव रूपम् । अतो वामनोक्तं समीचीनमेव । बोपदेवेन तन्निराकरणे हेतुस्तु असूयैव केवलमिति दीक्षिताशयः ।

एवञ्च माधवाचार्येणापि बोपदेवमतखण्डनपुरस्सरं वामनमतं समर्थितम् । अत एवोक्तम् –

बोपदेवमहाग्राहग्रस्तो वामनदिग्गजः ।
कीर्तेरेव प्रसङ्गेन माधवेन विमोचितः ।। इति ।

अत्र व्याकरणसिद्धान्तसुधानिधिकृताशयः – यत्तु काशिकायाम् “ पूर्वत्रासिद्धम् ” इति सूत्रे ऊढशब्दात् णिचि चङि ‘ औजढत् ’ इत्युदाहृत्य क्तिन्नन्तस्य तु ‘ औजिढत् ’ इत्युक्तम् । न्यासकृता च णौ कृतस्य टिलोपस्य स्थानिवद्भाव इति व्याख्यातम् । सरस्वतीकण्ठाभरणकारेण च ‘ णिच्यनित् ’ इति सूत्रितम् । तत्सर्वं महाभाष्यविसंवादान्निर्मूलम् । इत्थमेव दुर्गगुप्तेन दुर्गटीकायाम्, त्रिलोचनदासेन कातन्त्रपञ्चिकायाम्, वर्द्धमानमिश्रेण कातन्त्रविस्तरे, हेमसूरिणा हैमव्याकरणे प्रदर्शितम् । एतच्च ज्ञापकमजन्तस्यापवर्गपरस्यावर्ण एवेति वेदितव्यमिति प्रदर्शितम् । अभिनवशाकटायनेन च शब्दानुशासने णिनिमित्तादपि प्राग्भिः तच्चावर्णपरे इति प्रदर्शितम् । तस्मात् ‘ अञ्चिकत्, औजिढत् ’ इत्येव साधीयः । तथैव नन्दिक्षीरस्वाम्यादिभिर्धातुपारायणेषूदाहृतम् – ‘ शुष्किका शुष्कजङ्घा च क्षामिमानौजिढत्तथा ’ । इति

वैयाघ्रपद्यवार्तिके ‘ औजिढत् ’ इति जिशब्दघटितः पाठो लभ्यते, स तु प्रामादिक एव इति कामधेनौ बोपदेवाशयः ।

वस्तुतस्तु - वैयाघ्रपद्यवार्तिकेऽपि इकारपाठ एव साम्प्रदायिकः । श्रोत्रियास्तु प्रमादाज्जिस्थाने जं पठन्ति । क्षेमेन्द्रेणापि जैनेन्द्रन्यासे स्पष्टमेवोक्तमिति । वैयाघ्रपद्यवार्तिकञ्च “ पूर्वत्रासिद्धम् ” इत्यस्य प्रयोजनाभिधानपरम् । तथा हि – ‘ शुष्किका ’ इत्यत्र “ उदीचामातः स्थाने यकपूर्वायाः ”[1670] इति सूत्रेण

[1670] अष्टाध्यायी – (7-3-46)

इत्वविकल्पो न भवति । “ शुषः कः ”[1671] इति निष्ठाकत्वस्यासिद्धतया ककारस्याकारात् पूर्वत्वाभावत् । एवं ‘ शुष्कजङ्घा ’ इत्यत्र “ न कोपधायाः ”[1672] इति पुंवद्भावनिषेधस्य न प्रवृत्तिः । ‘ क्षामिमान् ’ इत्यत्र “ मादुपधायाश्च .... ”[1673] इति वत्वं न भवति, “ क्षायो मः ”[1674] इति मत्वस्यासिद्धतया मकारस्यानुपधात्वात् । ‘ औजिढत् ’ इत्यत्र ढत्वस्यासिद्धत्वात् ह्-ति इत्यस्य द्वित्वम् ।

अत एव “ स्तौतिण्योः .... ”[1675] इति सूत्रे ‘ सिषेचयिषति ’ इत्यत्र सिचेर्हेतुमण्णौ गुणे सनि इटि गुणायादेशयोः कृतयोः गुणस्य स्थानिवद्भावात् सिच्शब्दस्य द्वित्वमिति न्यासकारेणोक्तम् । तत्रोत्तर-खण्डेऽकाराभावेन त्वदुक्तरीत्या ‘ औजढत् ’ इत्यत्र तद्ग्रन्थस्य व्याख्यातुमशक्यत्वात् ।

एतेन सिचो द्वित्वमिति न्यासस्य भाष्यविरोधादुपेक्ष्यत्वमिति परास्तम् । ‘ औजढत् ’ इत्यत्राप्यल्लोपस्थानिवत्त्वस्य भाष्यविरुद्धतया स्वयमेव प्रक्रियादशायामवर्णपरत्वाभिप्रायं कल्पयित्वा वचनानर्हत्वात् । अत एव ‘ औजढत् ’ इत्यादिसिद्ध्ये सामान्यापेक्षं ज्ञापकमुक्त्वा ‘ अचिकीर्तत् ’ इत्याद्यनुरोधेन तदनित्यत्वं सीरदेवेन स्वीकृतम् । तस्मात् सामान्यापेक्षं ज्ञापकमित्येव वामनन्यासकारादीनामभिप्रायः न तु त्वदुक्तः । परन्तु विशेषापेक्षं ज्ञापकमिति भाष्यविरोधादेव तेषामनुपादेत्वमित्यन्यदेतदिति रहस्यम् ।

अत एव अदन्तेषु ‘ ऊन ’ धातोर्माधवीयधातुवृत्तौ, “ नोनयतिध्वनयति....... ”[1676] इति सूत्रे काशिकापदमञ्जर्योश्च ‘ औनिनत् ’ इत्यभ्यासे इकारपाठः सङ्गच्छते । एतेन तत्सर्वं लिपिप्रमादप्रयुक्तमेव । स्थलान्तरस्थवामनमाधवग्रन्थविरुद्धत्वात् इत्यपि निरस्तम् । भाष्यसम्मतार्थ-सम्वादिन इकारपाठस्यैव वामनादितात्पर्यविषयत्वावश्यकत्वेन वैपरीत्यात्[1677] ।

शब्दकौस्तुभे प्रकृतसूत्रे दीक्षितेन प्रोक्तं यत् – अत एव वामनोदाहृतम् ‘ औजढत् ’ इत्येतद्भाष्य-विरुद्धमिति बोपदेवोपष्टम्भेन प्रपञ्चितं प्राक् । वस्तुतस्तु वामनोक्तं सम्यगेव ।

एवञ्च तत्र वैयाघ्रपद्यवार्तिके ‘ औजढत् ’ इति पाठस्य प्रामादिकत्वकल्पनमेव प्रामादिकम् । जिशब्दपाठस्तु क्तिना निर्वाह्यः । यत्त्वदन्तेषूनधातौ मा भवानूनिनत् इत्यभ्यासे इकारश्रवणम्, तदपि

[1671] अष्टाध्यायी – (8-2-51)
[1672] अष्टाध्यायी – (6-3-37)
[1673] अष्टाध्यायी – (8-2-9)
[1674] अष्टाध्यायी – (8-2-53)
[1675] अष्टाध्यायी – (8-3-61)
[1676] अष्टाध्यायी – (3-1-51)
[1677] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

लिपिप्रमादप्रयुक्तम्, अन्यथा ‘ कृत संशब्दने ’ इत्यत्र सुब्धातौ च स्वोक्तेन समं विरोधापत्तेः । तस्माद् ‘ ऊननत् ’ इत्येव धातुवत्तौ साम्प्रदायिकः पाठः । “ नोनयतिध्वनयति...... ” इति सूत्रे काशिका-पदमञ्जर्योरप्येवमेवेत्यवधेयम् । एवञ्च भाष्यकाशिकयोरविरोध एवेति स्थिते सरस्वतीकण्ठाभरणादि-ग्रन्था अपि निर्बाधा एवेत्यवधेयम् ।

व्याकरणसुधानिधिकारेण दीक्षितादिसमर्थितवामनप्रयोगः ‘ औजढत् ’ इति नायमनुमन्यते । तत्सम्यगेव मन्यामहे । तत्र च प्रमाणमुद्योतग्रन्थः – तत्रैव तत्त्वलोकग्रन्थकारः प्राह – महावैयाकरणः भट्टनागेश उद्योते ‘ काशिकाकौस्तुभाद्युक्तिद्वयं क्रमेण खण्डयति ’[1678] । यथा – ‘ एवञ्च ‘ औननत्, औजढत् ’ इत्यादि चिन्त्यमेव । किञ्च यत्र द्विरुक्तौ परभागस्याद्योऽजवर्णस्तत्रेदमिति “ द्विर्वचनेऽचि ” इत्यादौ भाष्यकैयटयोः स्थितमिति माधवोक्तं कथं भाष्यारूढमित्यपि चिन्त्यमेवेत्याहुः ’[1679] । तत्रैव तत्त्वलोकग्रन्थे प्रोक्तम् – ‘ औनिनत् औजिढत् ’ इत्याद्येव ह्युचितमिति नागेशाशयः ’ । छायाग्रन्थेऽपि लिखितम् – ‘ औनिनत् औजिढत् ’ इत्यादिकमेवोचितमिति भावः ’[1680] ।

- **वार्तिककारमते सूत्रप्रत्याख्यानप्रकारः**

एवं स्थिते ‘ द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्यः ’ इति वचनं पठद्भिर्वार्तिककारैः सूत्रमिदं प्रत्याख्यातम् । ‘ चक्रतुः ’ इत्यादौ यणाद्यादेशापेक्षया पूर्वविप्रतिषेधाश्रयणेन द्वित्वमेव प्रवर्तते । अतः “ द्विर्वचनेऽचि ” इति सूत्रं विनाप्यभीष्टार्थसिद्ध्या सूत्रमिदमनावश्यकमिति तदाशयः ।

- **अत्र भाष्यकारमते सूत्रस्वीकारप्रकारः**

भाष्यकारमतरीत्या तु सूत्रमिदमावश्यकमेव । वार्तिककारोक्तरीत्यात्र विप्रतिषेधो न घटते एव । वार्तिककारवचनेऽल्लोपादीनां नित्यत्वेन द्वित्वस्यानित्यत्वेन च तुल्यबलत्वाभावात् । तुल्यबलविरोधे खलु विप्रतिषेधो घटते । किञ्च पूर्वविप्रतिषेधे सर्वत्र वचनस्यारम्भणीयतया वार्तिककारमते लाघवं नास्त्येव । किञ्च यदि तद्वचनम् अन्तरङ्गाणामपि बाधकं स्यात्तर्हि ‘ निनवनीयिषति ’ इत्यादावभ्यासे उकारश्रवणापत्तिः । एतद्दोषवारणाय वचनमिदमन्तरङ्गाणां कार्याणां न बाधकं किन्तु नित्यानामेवेति यद्युच्यते तर्हि ‘ नुनावयिषति ’ इत्यादौ वृद्ध्यवादेशयोः प्रवर्तनात् अभ्यासे इकारश्रवणापत्तिः ।

[1678] भाष्यम् – तत्त्वालोकः – प्रकृतसूत्रे – (पृ. – 470)

[1679] भाष्यम् – उद्योतः प्रकृतसूत्रे

[1680] भाष्यम् – छाया – प्रकृतसूत्रे – (पृ. – 503)

तद्बाधनाय उकारादेशो विधेय इत्यनवस्थाप्रसङ्गादत्यन्तं गौरवग्रस्तं वार्तिककारमतम्। अतो लाघवात् प्रकृतसूत्राभ्युपगम एव ज्यायान्। स्पष्टमिदं भाष्ये।

" द्विर्वचनेऽचि " इति सूत्रम्, तत्प्रत्याख्यानबोधकम् ' द्विर्वचनं यणयवाय...... ' इत्यादि-वार्तिकं वा मास्तु । ' नुनावयिषति ' इत्यादिरूपसिद्ध्यर्थमवश्यमाश्रयणीयेन " ओः पुयण्ज्यपरे " इत्यादिज्ञापकेनैव सर्वत्रापि नित्यमन्तरङ्गञ्च कार्यं बाधित्वा द्वित्वमेव प्रवर्तते। द्वित्वे कृते यथाप्राप्तं यणादिकार्यं प्रवर्तते। एवञ्च प्रकृतसूत्रं वा, तत्प्रत्याख्यानपरवार्तिककारवचनं वा, नावश्यकमेव इति।

अत्र समाधानम् – यदि निरुक्तरीत्या ज्ञापकत्वमेवाश्रीयते, तच्च सामान्यापेक्षं तर्हि ' अचिकीर्तत् ' इत्यादिरूपं न सिद्ध्येदिति पूर्वमुपपादितमेव । यदि च विशेषापेक्षं ज्ञापकं तर्हि ' चक्रतुः ' इति न सिद्ध्येत् । तस्मात् कर्तव्यमेवेदं सूत्रम् । ' नुनावयिषति ' इत्यादिसिद्ध्ये च पूर्वोक्त-ज्ञापकत्वमप्याश्रयणीयमेव। तच्च सजातीयापेक्षमेवेति पूर्वं व्याख्यातमेव इति।

एतत्सूत्रविषये मतद्वयमस्ति । प्रथमन्तु मतमस्ति काशिकादिवृत्तिकाराणाम्, ते मन्यन्ते यदिदं सूत्रम् " अचः परस्मिन् पूर्वविधौ " इति सूत्रेणाप्राप्तस्थानिवद्भावविधायकतयाऽतिदेशसूत्रम्। द्वितीयञ्च मतमस्ति दीक्षितादीनाम्, ये अजादेशनिषेधकमेतत्सूत्रमिति मन्वते। उभयस्मिन्नपि मते तैर्व्याख्यातृभिः भाष्यप्रमाणमपि समुपस्थाप्यते। तयोर्मतयोः कतरद् युक्ततरमिति तु विचारणीयो विषयो वरीवृत्यते।

भट्टोजिदीक्षितादयस्तु अत्र सूत्रे ' स्थानिवत् ' इति पदमननुवर्त्य " न पदान्त..... " इति सूत्राद् न इति चानुवर्त्य एतत्सूत्रस्य अजादेशनिषेधकत्वमेव समर्थयामासुः। द्विर्वचने इति पदावृत्तिः, एकस्य अचि इत्यनेन सामानाधिकरण्यम्, अपरत्र विषयसप्तमी, अचि इत्यस्य आदेशोपलक्षणत्वमित्यादि अन्यत्सर्वं समानम्। एवञ्चैषां मतेनायं सूत्रार्थः – ' द्वित्वनिमित्तेऽचि परे अच आदेशो न स्याद् द्वित्वे कर्तव्ये ' इति । दीक्षितः वैयाकरणसिद्धान्तकौमुद्यामुभयपक्षं स्वीकरोति यथा – सन्नन्तप्रकरणे " दम्भ इच्च "[1681] इति सूत्रानन्तरम् ' ऊर्णुनुविषति ' इति रूपं प्रकृत्य न च परत्वाद् गुणावादेशयोः कृतयोरभ्यासे उकारो न श्रूयेतेति वाच्यम्, इत्याशङ्क्य " द्विर्वचनेऽचि " इति सूत्रेण द्वित्वे कर्तव्ये स्थानिरूपातिदेशाद् आदेशानिषेधाद्वा इति तेनैवोक्तेः।

महावैयाकरणेन भट्टनागेशेनाऽपि स्वकीये उद्द्योतग्रन्थे उभयपक्षस्य विवरणं कृतं यथा – अत्र पञ्चपक्षाः – अचि योऽजादेशः स द्वित्वे स्थानिवदित्येकः, अजादौ प्रत्यये योऽजादेशः स द्वित्वे स्थानिवदिति द्वितीयः, द्विर्वचनशब्दस्याधिकरणल्युडन्तत्वादर्शआद्यजन्तत्वाद्वा द्वित्वनिमित्ते अचीत्यादीति तृतीयः, द्वित्वनिमित्तेऽचि अच आदेशनिषेध इति चतुर्थः, द्वित्वनिमित्तेऽचि योऽजादेशः

[1681] अष्टाध्यायी – (7-4-56)

स स्थानिवत्, न भवति वा, द्वित्वे कार्ये इति पञ्चमः । एवमेतान् पञ्चपक्षानुपस्थाप्य पञ्चमपक्षमेव भाष्यप्रामाण्येन सिद्धान्तत्वेन स्थापयामास । तत्र च पञ्चमे सिद्धान्तपक्षे स्थानिवत्त्व – आदेशनिषेधरूपौ उभावपि पक्षौ सङ्गृहीतौ ।

उभयोः पक्षयोः फलभेदाभावेऽपि, उभयोश्च भाष्योक्तत्वेऽपि तत्त्वबोधिनीकारेण स्वकीयग्रन्थे आदेशनिषेधपक्ष एव स्वीकृतः । यथा – ' यद्यपीह वृत्त्यादौ अजादेशः स्थानिवत्स्यादिति रूपातिदेशपक्षः स्वीकृतः, फलं चोभयत्र तुल्यम्, तथाप्यादेशनिषेधपक्षोऽपि भाष्यारूढ इति स एवात्र स्वीकृतः । किं च आदेशमङ्गीकृत्य पुनः स्थानिरूपाश्रयणापेक्षया निषेधपरतया व्याख्यानमेव लघु । ' प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ' इति न्यायात् । " न पदान्त....... " इति निषेधानन्तरं पाठोऽप्येवं सत्यनुगृहीत इति श्रेयानयं पक्षः '[1682] ।

अन्यैस्तु आदेशनिषेधपक्षे दोष एवंविधः प्रदत्तो यत् – " न पदान्त....... " इति सूत्रात् नेति पदमनुवर्त्य द्वित्वनिमित्तेऽचि परे अच आदेशो न स्यात् द्वित्वे कर्तव्ये इत्यर्थं कृतवन्तः । " ओः पुयण्ज्यपरे " इति सूत्रात् ' णिच्यच आदेशो न स्यात् द्वित्वे कार्ये ' इति ज्ञापितवन्तः । एवं करणे स्थानिवत्पदस्य शब्दाधिकाराश्रयणं न कर्तव्यं भवतीति, न पदान्तेति निषेधानन्तरं एतत्सूत्रकरणस्य सार्थक्यं भवतीति च भट्टोजिदीक्षितादीनामाशयः ।

परन्तु एतन्मते न पदान्तेति सूत्रे ' न ' इति पदस्य अनुवृत्तयेऽपूर्वतया स्वरितत्वं कल्पनीयमित्येको दोषः । तत्सूत्रभाष्ये इतरपक्षान्निरूप्य अन्ते ' स्थानिवद्भाव एव ज्यायान् ' इत्युक्तेऽपि, तमनादृत्य अन्यादृशार्थस्वीकारः इत्यपरो दोषः सम्भवति । अत – भाष्यवृत्तिकारादिसम्मतो रूपातिदेशपक्ष एव साधीयान् ।

उभयोः पक्षयोश्च भाष्योक्तत्वेऽपि रूपातिदेशपक्ष एव श्रेयानिति मन्यामहे ।

दीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां " द्विर्वचनेऽचि " इति सूत्रार्थो व्यलिख्यत यथा – ' द्वित्वनिमित्तेऽचि परे अच आदेशो न स्याद् द्वित्वे कर्तव्ये ' इति । एवञ्चैषां मतेनायं सूत्रार्थः वर्तते ।

दीक्षितादिमतानुसारेण सूत्रार्थकरणे ' जग्मतुः ' इति रूपस्य सिद्धिः न भवति, ' गम् + अतुस् ' इत्यवस्थायाम् " गमहनजनखनघसां लोपः क्ङित्यनङि " इति सूत्रेण लोपो भवति, स लोपः ' अतुस् ' इत्यस्य " तस्मिन्निति निर्दिष्टे पूर्वस्य "[1683] इति परिभाषासूत्रानुसारेण अव्यवहितपरो न भवति ।

[1682] सिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे – (पृ. – 60)

[1683] अष्टाध्यायी – (1-1-66)

अत एव दीक्षितेन कृते सूत्रार्थे दोषं दृष्ट्वा लघुसिद्धान्तकौमुदीकारेण स्वकीये ग्रन्थे ‘ परे ’ इति पदं निष्कास्य सूत्रार्थः कृतः यथा – ‘ द्वित्वनिमित्तेऽचि अच आदेशो न स्याद् द्वित्वे कर्तव्ये ’ इति।

महावैयाकरणेन भट्टनागेशेनापि उद्द्योते पञ्च पक्षानुपस्थाप्य पञ्चमपक्षमेव भाष्यप्रामाण्येन सिद्धान्तत्वेन स्थापयामास। तत्र पञ्चमपक्षे तेनापि ‘ परे ’ इति पदं निष्कास्य सूत्रार्थः कृतः यथा – ‘ द्वित्वनिमित्तेऽचि योऽजादेशः स स्थानिवत्, न भवति वा, द्वित्वे कार्ये इति पञ्चमः ’[1684] इति।

एवञ्च व्याकरणसुधानिधिकारेणापि दीक्षितस्य मतं पञ्चमपक्षे दत्त्वा दीक्षितमतस्य खण्डनं कृतं यथा – ‘ द्वित्वे कर्तव्ये अजादेशः स्थानिवत् द्वित्वनिमित्ते अचि परे इति पञ्चमः। न पञ्चमः, जग्मतुः इत्याद्यनुपपत्तेः। लोपप्रतियोग्यपेक्षयाऽतुसादेः अव्यवहितपरत्वाभावात् ’[1685]।

तथैव श्रीहरदत्तमिश्रेणापि पदमञ्जर्यां दीक्षितस्य मतं पञ्चमपक्षे उपस्थाप्य खण्डनं कृतं यथा – ‘ जग्मतुः इत्यादौ न स्यात्, अत एतेषु पक्षेष्वेवं दोषसम्भवात् ’[1686]।

(ख) लोपादिसञ्ज्ञाप्रकरणम्

- **अदर्शनं लोपः – (1-1-59)**

सूत्रार्थः – न दर्शनम् अदर्शनम्, नञ्तत्पुरुषः। “ स्थानेऽन्तरतमः ”[1687] इति सूत्रात् ‘ स्थाने ’ इति पदमनुवर्तते। इति इत्येतत् पदं “ न वेति विभाषा ” इति सूत्राद् मण्डुकप्लुतगत्यानुवर्तते। यद् भूत्वा न भवति तद् अदर्शनम् = अनुपलब्धिः वर्णविनाशस्तस्य लोप इति सञ्ज्ञा भवति, अर्थात् प्रसक्तस्यादर्शनं लोपसञ्ज्ञकं भवति। उदाहरणानि च ‘ शालीयः, गौधेरः, पचेरन्, जीरदानुः, आस्रेमाणम् ’ इति।

‘ दर्शनम् ’ इत्यत्र दृश्धातुना भावे ल्युटि निष्पन्ने दर्शनपदे दृश्धातुर्ज्ञानसामान्यार्थकः, न तु चाक्षुषज्ञानमात्रपरः। अत एव “ पश्यार्थैश्चानालोचने ”[1688] इति सूत्रे अनालोचनग्रहणस्य सार्थक्यम्। आलोचनम् = चाक्षुषज्ञानम्, तद्भिन्नं ज्ञानम् अनालोचनं तत्रार्थे विद्यमानैः पश्यार्थैः अर्थात् दर्शनार्थैः

1684 उद्द्योतः – प्रकृतसूत्रे

1685 व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

1686 पदमञ्जरी – प्रकृतसूत्रे

1687 अष्टाध्यायी – (1-1-50)

1688 अष्टाध्यायी – (8-1-25)

इति विवक्षितम् । दर्शनम् = ज्ञानमित्यर्थेऽस्मादेव ज्ञापकाद् निपातनाद् “ पाघ्राध्माधेट्दृशः शः ”[1689] इति सूत्रेण दृश्धातोः भावे शप्रत्ययः, “ पाघ्राध्मा..... ”[1690] इति सूत्रेण दृश्धातोः पश्यादेशः । भावार्थकसावर्धातुकपरत्वेऽपि निपातनादेव यगभावोऽपि । यदि तु “ पाघ्राध्माधेट्दृशः शः ” इति सूत्रेण कर्तरि शः स्यात्तदा ‘ द्रष्ट्रर्थैः ’ इत्यर्थः स्यात् । तथा च ‘ अनालोचने ’ इति पर्य्युदासो व्यर्थ एव स्यात् । नह्यालोचनार्था द्रष्ट्रर्था भवन्ति ।

अत्र दर्शनस्याभावोऽदर्शनम्, अर्थाभावेऽव्ययीभावः इति दीक्षिताशयः । नागेशमते तु नञा नाव्ययीभावः, किन्तु तत्पुरुष एव ।

‘ अत्र सूत्रे दृशेः ज्ञानसामान्यवाचकत्वेन प्रकृते शब्दानुशासनप्रस्तावाच्छ्रवणार्थकत्वेऽपि ‘ अदर्शनम् ’ इति पदे यदि नञ्समासोऽङ्गीक्रियते, तदा ‘ अघटः पटः ’ इत्यादिवत् नञर्थाभावस्य अन्यान्याभावरूपतया श्रवणभिन्नेत्येवार्थ लभ्यते । अर्थतश्च उच्चारणभिन्नेत्यस्यापि लाभः सम्भवति । तथा च “ लोपो व्योर्वलि ”[1691] इत्यादौ वकारयकारयोरुच्चारणभिन्नरूपत्वेन सुतरां ज्ञाततया अपूर्वज्ञानविषयत्वाभावेन लोपस्य विधित्वमेव न सम्भवति । किञ्चैतस्य विधेर्व्योर्निवृत्त्यसम्पादकत्वेन लक्ष्यासिद्धिश्च स्यादिति ।

अत्र विचार्यते – ‘ अदर्शनम् ’ इत्यस्य दर्शनस्याभाव इत्यर्थकत्वेन नञर्थाभावस्यात्यन्ताभाव-रूपतया न पूर्वोक्तापत्तिः । एवं नञ उत्तरपदार्थाभावरूपार्थाभाववृत्तितया अव्ययीभावसमासापत्तिरिति तु नाशङ्कनीयम् । अनुपलब्धिरविवाद इत्यादिरीत्या ‘ रक्षोहागमलघ्वसन्देहाः ’[1692] इति भाष्यप्रयोगेण नञ्तत्पुरुषसमासस्यैवात्र प्रवृत्तिः । तदाह कौमुद्याम् – ‘ अर्थाभावेऽव्ययीभावेन सहायं विकल्प्यते ’[1693] इति । अव्ययीभावेन सह विकल्पादत्रात्यन्ताभाववृत्तिनञा तत्पुरुषोऽपि सम्भवति । अत एवाव्ययीभावेऽविघ्नं तत्पुरुषोऽनुपलब्धिरविवाद इत्यादयः प्रयोगाः सिद्ध्यन्ति । तदित्थं श्रावण-प्रत्यक्षाभावस्यादर्शनपदार्थत्वे ज्ञानस्यावर्जनीयत्वेन श्रावणप्रत्यक्षात्मकज्ञानाभावः प्रतीतिविषयो न स्यात्, अपि तु ज्ञानमेव प्रकाशितं तिष्ठेत् । अतः श्रावणप्रत्यक्षात्मकज्ञानाभावकारणीभूतोच्चारणाभावः अदर्शनपदार्थ उचित इति मन्तव्यम् । उच्चारणाभावोऽप्यत्र पुरुषसामान्यकर्तृकोच्चारणाभावस्वरूपः अवसेयः ।

[1689] अष्टाध्यायी – (3-1-137)

[1690] अष्टाध्यायी – (7-3-78)

[1691] अष्टाध्यायी – (6-1-65)

[1692] भाष्यम् – प्रथमाह्निके

[1693] वैयाकरणसिद्धान्तकौमुदी – तत्पुरुषसमासप्रकरणे – तस्मान्नुडचि इति सूत्रे – (पृ. – 88)

अत एव ‘ यायावरः ’ इत्यत्र यङ्घटकयकारस्योच्चारणसामान्याभावकृतसाधुता निष्पद्यते। एवमपि ‘ ऐऔच् ’ इत्यत्र चकारस्येत्सञ्ज्ञायां तस्य लोपे च सति शाब्दबोधविषयत्वं तिष्ठत्येव। लोपस्य शाब्दबोधविषयत्वाभावरूपत्वे इत्पदग्राह्यता ‘ ऐऔच् ’ घटकचकारस्य न स्यात्। इत्सञ्ज्ञकवर्णस्य लोपप्रयुक्तोच्चारणाभावः “ आदिरन्त्येन सहेता ”[1694] इति वाक्यजन्यशक्तिग्रहकाल एव। तेन अच्पदनिष्ठशक्तिग्रहकाले णकाराद्यनुबन्धानामुच्चारणविषयत्वाभावेन अच्प्रत्याहारजन्यबोध-विषयत्वाभावः सिद्ध्यति। एतदेव मनसिकृत्य भगवान् भाष्यकार आह –

प्रत्याहारऽनुबन्धानां कथमज्ग्रहणेषु न।

आचारादप्रधानत्वाल्लोपश्च बलवत्तरः॥[1695]

लोपेऽपि शाब्दबोधविषयत्वस्याक्षतत्वादेव आद्यन्ताक्षिप्तसमुदायघटकत्वेन अनुबन्धानां प्रत्याहारे ग्रहणमाशङ्क्य शब्दरत्नकृता ज्ञापकबलाद् ग्रहणं वारितम्। मनोरमाकारोऽपि सञ्ज्ञास्वरूपान्तर्भावेण सञ्ज्ञिताया वारणं कृतवान्। यद्यपि सञ्ज्ञास्वरूपघटकयोर्नाद्यन्ताक्षिप्तसमुदाय-घटकत्वं सम्भवति। तयोरष्टाध्यायीसूत्रघटकाजादिपदघटकत्वात्, तथापि बोधकावयवेषु वर्णसमाम्नायघटकवर्णवृत्तिबोध्यत्वारोपेण मनोरमाग्रन्थो लापनीयः ’[1696]।

शब्दसत्त्वे श्रावणज्ञानस्यावर्जनीयत्वेन ज्ञानसामग्र्यन्तर्गतोच्चारणकृतसत्ताभावस्यैवादर्शनपदेन ग्रहणं लक्षणया। तथा च शब्दानुशासनप्रकरणात् शब्दोच्चारणाभाव एव लोपसञ्ज्ञकः।

ननु “ अदर्शनं लोपः ” इत्यस्मिन्सूत्रे शब्दस्य सञ्ज्ञा उच्यते, अर्थस्य वेति। कुतोऽयं प्रश्नः ? “ स्वं रूपं शब्दस्याऽशब्दसञ्ज्ञा ” इति सूत्रानुसारेण शब्दस्यैव सञ्ज्ञा प्राप्ता नार्थस्येति। शब्दस्य सञ्ज्ञायां इतरेतराश्रयतादोषो भवति। का इतरेतराश्रयता ? सतोऽदर्शनस्य सञ्ज्ञया भवितव्यम्, सञ्ज्ञया चादर्शनं भाव्यते तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि शास्त्रे न प्रकल्पन्ते। तस्मादयं प्रश्नस्तत्रोक्तं भाष्यकृता – ‘ लोपसञ्ज्ञायामर्थसतोरुक्तम्, किमुक्तम् ? अर्थस्य तावदुक्तम् ‘ इतिकरणाऽर्थनिर्देशार्थः ’ इति ’[1697]। अर्थात् “ न वेति विभाषा ”[1698] इति सूत्रात् ‘ इति ’ शब्दानुवृत्त्या

[1694] अष्टाध्यायी – (1-1-71)

[1695] भाष्यम् – द्वितीयाह्निके – ‘ हयवरट् ’ इति सूत्रे

[1696] बालमनोरमागर्भित-तत्त्वबोधिनी-लघुशब्देन्दुशेखरयोस्तुलनात्मकमध्ययनम् – (पृ. – 49)

[1697] भाष्यम् – प्रकृतसूत्रे

[1698] अष्टाध्यायी – (1-1-44)

। सतोऽप्युक्तम्। ‘ सिद्धन्तु नित्यशब्दत्वात् ’ इति। नित्याः शब्दाः नित्येषु शब्देषु सतोऽदर्शनस्य सञ्ज्ञा क्रियते, न सञ्ज्ञयाऽदर्शनं भाव्यते ’[1699]।

अथवा ‘ लोपः ’ इत्यस्यान्वर्थसञ्ज्ञाश्रयणेन दोषपरिहारा इति। तथा च लोपनं लोपः – नहि अदर्शनशब्दो लोपनक्रियारूपो भवितुमर्हति । “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ”[1700] इति सूत्राप्रत्याख्यानपक्षेऽपि यत्रार्थे कार्यस्य बाधः, तत्र शब्दपरता। यथा कर्मादीनामर्थे बाधाभावाद् अर्थस्य सञ्ज्ञा, न शब्दस्य, तथा अत्रापि अर्थे सञ्ज्ञाया बाधाभावाद् अर्थस्यैव सञ्ज्ञा ।

न चैवम् ‘ सर्वप्रसङ्गस्तु सर्वस्यान्यत्रादृष्टत्वात् ’ अर्थात् सर्वस्यादर्शनस्य लोपसञ्ज्ञा प्राप्नोति सर्वस्याऽन्यत्रादृष्टत्वात्। सर्वो हि शब्दो यो यस्य प्रयोगविषयः, सः ततोऽन्यत्र न दृश्यते। ततश्च ‘ त्रपु, जतु ’ इत्यादौ अणः “ अदर्शनं लोपः ” इत्यनेन लोपसञ्ज्ञा प्राप्नोति। ततश्च तत्र प्रत्ययलक्षणकार्याणि वृद्ध्यादीनि प्राप्नुवन्ति तेषां प्रतिषेधो वक्तव्यो भवतीति वाच्यम्, अण्निरूपिताङ्गत्वाऽभावेन वृद्ध्यादेरभावासिद्ध्या दोषपरिहारात्।

न च प्रकृतिं विना प्रत्ययस्यानुपपद्यमानतया प्रत्ययेन प्रकृतेराक्षेपात् “ ह्रस्वस्य पिति कृति तुक् ”[1701] इति सूत्रेण क्विपः प्रकृतेरेव तुग्विधानात् ‘ त्रपु ’ इत्यादौ तुगापादनं न युक्तमिति वाच्यम्। ‘ इः इयान् ’ इत्यादौ प्रकृतिं विना प्रत्ययस्य सम्भवेनाक्षेपासम्भवात्।

नन्वेवम् मधुशब्दात् प्रथमैकवचने नपुंसकत्वात् सोर्लुकि निष्पन्ने ‘ मधु ’ इत्यत्र क्विपोऽदर्शनात् तस्य लोपसञ्ज्ञायां “ प्रत्ययलोपे प्रत्ययलक्षणम् ”[1702] इति सूत्रेण क्विपमादाय “ ह्रस्वस्य पिति कृति तुक् ” इति सूत्रेण तुगापत्तिः, न च कृता तदादेराक्षेपात् कृत्प्रत्ययप्रकृतिधात्वादेरेव ह्रस्वान्तस्य तुगिति वाच्यम्।

एवमपि ‘ लिण्मधु ’ इत्यत्र लिट् इत्यनन्तरमिव क्विपोऽदर्शनस्य मधुशब्दादग्रेऽपि सत्त्वेन तस्यापि लोपसञ्ज्ञायां प्रत्ययलक्षणेन मधुशब्दादग्रेऽपि क्विपो बुद्धौ तन्निरूपिततदादित्वस्यापि बुद्धौ तुगाद्यापत्तेर्दुर्वारत्वादिति चेन्न, “ स्थानेऽन्तरतमः ” इति सूत्रात् ‘ स्थाने ’ इति पदमनुवर्तते । शास्त्रतोऽर्थतो वा प्रसङ्गे सत्येव शब्दोच्चारणाभावस्य लोपसञ्ज्ञकत्वेन ‘ लिण्मधु ’ इत्यादौ

1699 भाष्यम् – प्रकृतसूत्रे

1700 अष्टाध्यायी – (1-1-68)

1701 अष्टाध्यायी – (6-1-70)

1702 अष्टाध्यायी – (1-1-62)

मधुपदोत्तरं शब्दतोऽर्थतो वा क्विपः प्रसङ्गाभावेन तत्र तदभावस्य लोपसञ्ज्ञाया अभावेन तुगाद्यापत्तेरभावात्। तथा च भाष्यम् – ' सिद्धं तु प्रसक्तादर्शनस्य लोपसञ्ज्ञित्वात् '[1703] इति।

यदि " कृदतिङ् "[1704] सूत्रभाष्योक्तरीत्या तुग्विधौ धातोरनुवृत्त्या तुग्वारणे तु ' सोमसुत् पुत्रीयति ' इत्युदाहार्यम्।

तदुक्तं भाष्ये – ' सिद्धन्तु प्रसक्तादर्शनस्य लोपसञ्ज्ञित्वात् ' अर्थात् शास्त्रात् अर्थाद्वा प्रसक्तस्य यददर्शनं तल्लोपसञ्ज्ञं भवतीत्यर्थविज्ञानेन दोषपरिहारात्।

शास्त्रतः प्रसक्तिः – यथा ' राजा, दधि ' इत्यादौ शास्त्रेण सोः " स्वौजसमौट् ......"[1705] इति सूत्रेण प्राप्तिरस्ति तत्र सोरुच्चारणाभावोऽपि लोपसञ्ज्ञकः, यथा वा प्रत्ययादिघटकानुबन्धानाम्

अर्थतः प्रसक्तिः – ' ल्यब्लोपे कर्मण्यधिकरणे च ' अर्थात् ' ल्यबन्तस्य लोपे अदर्शने – अप्रयोगे सति गम्यमानतदर्थं प्रति कर्मणि अधिकरणे च पञ्चमी वाच्येत्यर्थः '[1706]। यत्र अर्थवान् शब्दोऽर्थबोधनाय उच्चारणीयो न चोच्चार्य्यते तत्रार्थतस्तदभावः। यथा ' प्रासादात् प्रेक्षते ' इत्यत्र ' आरुह्य ' इत्यस्य अर्थतः प्रसक्तिः। तल्ल्यबर्थः प्रतीयते, न चोच्चार्य्यते इति तादृशोच्चारणाभावस्यापि लोपसञ्ज्ञा।

' ननु वार्तिकमते तत्सूत्रस्य विध्यर्थत्वादस्त्वेवम्। भाष्यमते तु तन्नियमार्थं स्थानिवत्सूत्रेणैव कार्यप्रवृत्तिरिति वक्ष्यते। न चात्र तुकस्तेन प्रसक्तिः। षष्ठीग्रहणस्य तत्रानुवर्तितत्वात्। अत एव ' ग्रामणीः ' इत्यादौ अर्थोपपदधातुसन्निधानाद् अर्थतः शास्त्रतश्च अण्प्रसङ्गे क्विपो विधानेऽपि वृद्ध्यादिकं न भवति। तस्मादिदं सूत्रं निरर्थकमिति चेन्मैवम्, " चाहलोप एवेत्यवधारणम् "[1707], " चादिलोपे विभाषा "[1708] इति सूत्रयोश्चादीनामप्रयोगस्यैव लोपपदार्थत्वात् षष्ठीनिर्देशेन लोपविध्यभावाल्लोपसञ्ज्ञा अनुपपत्तौ ' अयमेवारण्यं गच्छतु ', ' अयमेव ग्रामं गच्छतु ' इत्यादि तिङन्तनिघातनिषेधस्य ' शुक्ला व्रीहयो भवन्ति ', ' श्वेता गा आज्याय दुहन्ति ' इत्यादौ निघातनिषेधविकल्पस्य चानुपपत्तेः। सूत्रारम्भे तु तत्र शास्त्रतो लोकतो वा तदप्रसक्तेर्न दोषः '[1709]।

[1703] भाष्यम् – प्रकृतसूत्रे

[1704] अष्टाध्यायी – (3-1-93)

[1705] अष्टाध्यायी – (4-1-2)

[1706] वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतवार्तिके – (पृ. – 663)

[1707] अष्टाध्यायी – (8-1-62)

[1708] अष्टाध्यायी – (8-1-63)

[1709] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

न च वार्तिकमते प्रसक्तस्य अदर्शनस्य लोपसञ्ज्ञायां ‘ ग्रामणीः, सेनानीः ’ इत्यादौ कर्तृलक्षणात् “ कर्मण्यण् ”[1710] इत्यतः अण्प्रसङ्गे क्विपो विधानेनाऽणो लोपसञ्ज्ञायां प्रत्ययलक्षणेन वृद्ध्यापत्तिरिति वाच्यम्, वासरूपन्यायेन पक्षेऽणः सम्भवेऽपि अण्प्रसङ्गस्य क्विपा बाधेन सकलेष्टसिद्धेः । अर्थात् विशेषशास्त्रनिर्मुक्ते एव सामान्यशास्त्रस्य प्रवृत्तेः । “ सत्सूद्विषद्रुहदुहयुजविद-भिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् ”[1711] इति सूत्रेण कृतस्य क्विपो विषये “ कर्मण्यण् ” इति सूत्रस्य प्रसक्तेरेवाभावात् ।

- **लोपसञ्ज्ञाप्रदेशाः**

1 न धातुलोपः आर्धधातुके – (1-1-4)

2. न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु – (1-1-58)

3. चाहलोप एव इति अवधारणम् – (8-1-62)

4. प्रत्ययलोपे प्रत्ययलक्षणम् – (1-1-62)

5. न लुमता अङ्गस्य – (1-1-63)

6. तस्य लोपः – (1-3-9)

7. कर्तुः क्यङ् स लोपः च – (3-1-11)

8. भृशादिभ्यः भुवि अच्वेः लोपः च हलः – (3-1-12)

9. वर्षप्रमाणे ऊलोपः च अस्य अन्यतरस्याम् – (3-4-32)

10. इतः च लोपः परस्मैपदेषु – (3-4-97)

11. सः उत्तमस्य – (3-4-98)

12. नित्यं ङितः – (3-4-99)

13. इतः च – (3-4-100)

14. ढकि लोपः – (4-1-133)

15. मातृष्वसुः च – (4-1-134)

16. सर्वत्र अण् च तलोपः च – (4-3-22)

17. आथर्वणिकस्य एकलोपः च – (4-3-133)

18. स्तेनात् यत् नलोपः च – (5-1-125)

[1710] अष्टाध्यायी – (3-2-1)

[1711] अष्टाध्यायी – (3-2-61)

19. अजिनान्तस्य उत्तरपदलोपः च – (5-3-82)

20. ठाजादौ ऊर्ध्वं द्वितीयात् अचः – (5-3-83)

21. शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् – (5-3-84)

22. अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपः च – (5-4-51)

23. पादस्य लोपः अहस्त्यादिभ्यः – (5-4-138)

24. ककुदस्य अवस्थायां लोपः – (5-4-146)

25. त्रिककुत् पर्वते – (5-4-147)

26. उद्विभ्यां काकुदस्य – (5-4-148)

27. पूर्णात् विभाषा – (5-4-149)

28. सुहृद्दुर्हृदौ मित्रामित्रयोः – (5-4-150)

29. लोपः व्योः वलि – (6-1-66)

30. वेः अपृक्तस्य – (6-1-67)

31. हल्ङ्याब्भ्यः दीर्घात् सुतिसि अपृक्तं हल् – (6-1-68)

32. एङ्ह्रस्वात् सम्बुद्धेः – (6-1-69)

33. शेः छन्दसि बहुलम् – (6-1-70)

34. एतत्तदोः सुलोपः अकः अनञ् समासे हलि – (6-1-132)

35. स्यः छन्दसि बहुलम् – (6-1-133)

36. सः अचि लोपे चेत् पादपूरणम् – (6-1-134)

37. अनुदात्तस्य च यत्र उदात्तलोपः – (6-1-161)

38. नलोपः नञः – (6-3-73)

39. तिरसः तिरि अलोपे – (6-3-94)

40. ढ्रलोपे पूर्वस्य दीर्घः अणः – (6-3-111)

41. सहिवहोः ओत् अवर्णस्य – (6-3-112)

42. रात् लोपः – (6-4-21)

43. श्नात् नलोपः – (6-4-23)

44. अनिदितां हलः उपधायाः क्ङिति – (6-4-24)

45. दंशसञ्जस्वञ्जां शपि – (6-4-25)

46. रञ्जेः च – (6-4-26)

47. घञि च भावकरणयोः – (6-4-27)

48. स्यदः जवे – (6-4-28)

49. अवोदैधौद्मप्रश्रथहिमश्रथाः – (6-4-29)

50. न अञ्चेः पूजायाम् – (6-4-30)

51. क्त्वि स्कन्दिस्यन्दोः – (6-4-31)

52. जान्तनशां विभाषा – (6-4-32)

53. भञ्जेः च चिणि – (6-4-33)

54. शासः इत् अङ्हलोः – (6-4-34)

55. शा हौ – (6-4-35)

56. हन्तेः जः – (6-4-36)

57. अनुदात्तोपदेशवनतितनोत्यादीनाम् अनुनसिकलोपः झलि क्ङिति – (6-4-37)

58. वा ल्यपि – (6-4-38)

59. न क्तिचि दीर्घः च - (6-4-39)

60. गमः क्वौ – (6-4-40)

61. विड्वनोः अनुनासिकस्य आत् – (6-4-41)

62. जनसनखनां सञ्झलोः – (6-4-42)

63. ये विभाषा – (6-4-43)

64. तनोतेः यकि – (6-4-44)

65. सनः क्तिचि लोपः च अस्य अन्यतरस्याम् – (6-4-45)

66. आर्धधातुके – (6-4-46)

67. भ्रस्जः रोपधयोः रम् अन्यतरस्याम् – (6-4-47)

68. अतः लोपः – (6-4-48)

69. यस्य हलः – (6-4-49)

70. क्यस्य विभाषा – (6-4-50)

71. णेः अनिटि – (6-4-51)

72. निष्ठायां सेटि – (6-4-52)

73. जनिता मन्त्रे – (6-4-53)

74. शमिता यज्ञे – (6-4-54)

75. अय आमन्तआलुआय्यित्न्वष्णुषु – (6-4-55)

76. आतः लोपः इटि च – (6-4-64)

77. गमहनजनखनघसां लोपः क्ङिति अनङि – (6-4-98)

78. तनि पत्योः छन्दसि – (6-4-99)

79. घसि भसोः हलि च – (6-4-100)

80. लोपः च अस्य अन्यतरस्यां म्वोः – (6-4-107)

81. नित्यं करोतेः – (6-4-108)

82. ये च – (6-4-109)

83. श्न असोः अट् लोपः – (6-4-111)

84. श्नाभ्यस्तयोः आतः – (6-4-112)

85. लोपः यि – (6-4-118)

86. घ्वसोः एत् हौ अभ्यासलोपः च – (6-4-119)

87. अतः एक हल् मध्ये अनादेशादेः लिटि – (6-4-120)

88. थलि च सेटि – (6-4-121)

89. तृफलभजत्रपः च – (6-4-122)

90. राधः हिंसायाम् – (6-4-123)

91. वा जृभ्रमुत्रसाम् – (6-4-124)

92. फणां च सप्तानाम् – (6-4-125)

93. न शसददवादिगुणानाम् – (6-4-126)

94. अल् लोपः अनः – (6-4-134)

95. षपूर्वहन्धृतराज्ञाम् अणि – (6-4-135)

96. विभाषा ङि श्योः – (6-4-136)

97. न संयोगात् वमन्तात् – (6-4-137)

98. ढे लोपः अकद्र्वाः – (6-4-147)

99. यस्य ईति च – (6-4-148)

100. सूर्यतिष्यागस्त्यमत्स्यानां यः उपधायाः – (6-4-149)

102. हलः तद्धितस्य – (6-4-150)

103. आपत्यस्य च तद्धिते अनाति – (6-4-151)

104. क्य च्व्योः च – (6-4-152)

105. बिल्वकादिभ्यः छस्य लुक् – (6-4-153)

106. तुः इष्ठेमेयस्सु – (6-4-154)

107. टेः – (6-4-155)

108. बहोः लोपः भू च बहोः – (6-4-158)

109. लोपः तः आत्मनेपदेषु – (7-1-41)

110. भस्य टेः लोपः – (7-1-88)

111. लिङः सलोपः अनन्त्यस्य – (7-2-79)

112. शेषे लोपः – (7-2-90)

113. अदसः औ सुलोपः च – (7-2-107)

114. हलि लोपः – (7-2-113)

115. घोः लोपः लेटि वा – (7-3-70)

116. ओतः श्यनि – (7-3-71)

117. क्सस्य अचि – (7-3-72)

118. लोपः पिबतेः इत् च अभ्यासस्य – (7-4-4)

119. कव्यध्वरपृतनस्य ऋचि लोपः – (7-4-39)

120. तासस्त्योः लोपः – (7-4-50)

121. रि च – (7-4-51)

122. हः एति – (7-4-52)

123. यीवर्णयोः दीधीवेव्योः – (7-4-53)

124. अत्र लोपः अभ्यासस्य – (7-4-58)

125. हलादिः शेषः – (7-4-60)

126. लोपे विभाषा – (8-1-45)

127. चादिलोपे विभाषा – (8-1-63)

128. नलोपः सुप्स्वरसञ्ज्ञातुग्विधिषु कृति – (8-2-2)

129. नलोपः प्रातिपदिकान्तस्य – (8-2-7)

130. ङिसम्बुद्ध्योः – (8-2-8 न)

131. संयोगान्तस्य लोपः – (8-2-23)

132. रात् सस्य – (8-2-24)

133. धि च – (8-2-25)

134. झलः झलि – (8-2-26)

135. ह्रस्वात् अङ्गात् – (8-2-27)

136. इटः ईटि – (8-2-28)

137. स्कोः संयोगाद्योः अन्ते च – (8-2-29)

138. ढः ढे लोपः – (8-3-13)

139. रः रि – (8-3-14)

140. लोपः शाकल्यस्य – (8-3-19)

141. ओतः गार्ग्यस्य – (8-3-20)

142. उञि च पदे – (8-3-21)

143. हलि सर्वेषाम् – (8-3-22)

144. हलः यमां यमि लोपः – (8-4-64)

145. झरः झरि सवर्णे – (8-4-65)

- **प्रत्ययस्य लुक्श्लुलुपः – (1-1-60)**

सूत्रार्थः – लुक् च श्लुश्च लुप् च इति लुक्श्लुलुपः, इतरेतरयोगद्वन्द्वः । “ अदर्शनं लोपः ” इति सूत्रात् ‘ अदर्शनम् ’ इति पदमनुवर्तते । प्रत्ययस्य अदर्शनस्य लुक्-श्लु-लुप् इत्येताः सञ्ज्ञाः भवन्ति । उदाहरणानि च लुक् – विशाखः, स्तौति । श्लु – जुहोति । लुप् – वरणाः, पञ्चालाः ।

सूत्रस्यास्य प्रत्ययस्यादर्शनं लुक्श्लुलुप्सञ्ज्ञकं स्यादित्यर्थो लभ्येत तर्हि सत्येकस्य प्रत्ययस्यादर्शनस्य लुगादिसञ्ज्ञात्रयलाभेन लोपस्थलेऽपि लुगादिप्रयुक्तकार्यापत्तिः । एवं

लुगादिसञ्ज्ञानां परस्परं साङ्कर्यप्रसङ्ग इति ‘ हन्ति ’ इत्यत्र शपो लुकि “ श्लौ ”[1712] इति सूत्रेण द्वित्वं स्यात्, ‘ जुहोति ’ इत्यत्र श्लौ सति “ उतो वृद्धिर्लुकि हलि ”[1713] इति सूत्रेण वृद्धिः स्यात्।

न च “ नाभ्यस्तस्याचि पिति सार्वधातुके ”[1714] इति सूत्रात् नाभ्यस्तस्य इति पदम् “ उतो वृद्धिर्लुकि हलि ” इति सूत्रेऽनुवर्त्य अभ्यस्तस्य न वृद्धिरित्यर्थेन न दोष इति वाच्यम्, प्रत्ययादर्शनस्य सञ्ज्ञाचतुष्टये सर्वत्रैव श्लोः सत्त्वेन सर्वत्र द्वित्वेऽभ्यस्तसञ्ज्ञायाञ्च “ उतो वृद्धिर्लुकि हलि ” इति सूत्रस्य निर्विषयत्वापत्तेः। तस्मान्नैकस्यानेकसञ्ज्ञाः, ‘ लघ्वर्थं हि सञ्ज्ञाकरणम् ’ इति भाष्याद् एकस्यानेकसञ्ज्ञाकरणं व्यर्थं स्यात्। एकामेव सञ्ज्ञां कृत्वा तयैव सर्वकार्यसिद्धेः। एकस्यानेकसञ्ज्ञाविधानसामर्थ्यादत्रानेकसञ्ज्ञिलाभाय ‘ लुक्श्लुलुपः ’ इत्यावर्तते। तृतीयान्तविभक्तिविपरिणामेनान्वयः। यथासंख्यपरिभाषया क्रमाल्लुगादिसञ्ज्ञं स्यात्। यथा – लुक्शब्देन विहितस्य प्रत्ययस्यादर्शनं लुक्सञ्ज्ञम्, श्लुशब्देन विहितस्य प्रत्ययस्यादर्शनं श्लुसञ्ज्ञम्, लुप्शब्देन विहितस्य प्रत्ययस्यादर्शनं लुप्सञ्ज्ञमिति प्रत्येकसञ्ज्ञाया भिन्नं भिन्नं सञ्ज्ञीति न दोषः[1715]। अर्थात् – लुक्श्लुलुप्शब्दैर्विहितं प्रत्ययादर्शनं यथासंख्यपरिभाषया क्रमाल्लुगादिसञ्ज्ञं स्यादिति सूत्रार्थलाभेन न परस्परः साङ्कर्यप्रसङ्गः।

एवं तर्हि सिद्धस्यैव सञ्ज्ञाविधानाद् इतरेतराश्रयदोषः प्राप्नोति। यदा लुक्शब्देन प्रत्ययादर्शनं तदा लुक् सञ्ज्ञा। यदा सञ्ज्ञा तदा लुक्शब्देन प्रत्ययादर्शनं स्यात्। अर्थात् – सञ्ज्ञया विशिष्टमदर्शनं भाव्यम्, सति च तस्मिन् प्रत्ययादर्शने सञ्ज्ञया भाव्यमिति चेन्न, भाविसञ्ज्ञाश्रयणेनादोषात्। यथा – अदिप्रभृतिभ्यः परस्य शपस्तद्भवति, यस्य भूतस्य लुक्सञ्ज्ञा भविष्यतीत्येवं भाविन्याः सञ्ज्ञाया विज्ञानान्न भवति इतरेतराश्रयत्वदोषः[1716]। अत एवाह शब्दकौस्तुभे महावैयाकरणः दीक्षितः – ‘ अनेकसञ्ज्ञाकरणसामार्थ्यात्तन्त्रावृत्त्याद्याश्रित्य तद्भावितसञ्ज्ञा इह विज्ञायते, विधिप्रदेशेषु भाविसञ्ज्ञाविज्ञानान्नान्योऽन्याश्रयः ’[1717]। लोपसञ्ज्ञायाश्च नैताभिर्बाधः। एकसञ्ज्ञाधिकारादन्यत्र सञ्ज्ञानां समावेशदर्शनात्। अत एव “ न लुमताङ्गस्य ”[1718] इति निषेधः सङ्गच्छते अन्यथा “

[1712] अष्टाध्यायी – (6-1-10)

[1713] अष्टाध्यायी – (7-3-89)

[1714] अष्टाध्यायी – (7-3-87)

[1715] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[1716] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[1717] शब्दकौस्तुभः – प्रकृतसूत्रे

[1718] अष्टाध्यायी – (1-1-63)

प्रत्ययलोपे प्रत्ययलक्षणम् "[1719] इति सूत्रस्य लुगादिविषये प्रसक्तेरेवाभावात्[1720] । ' विशेषविहिता अप्येताः सञ्ज्ञा लोपसञ्ज्ञां न बाधन्ते । एकसञ्ज्ञाधिकारादन्यत्र सञ्ज्ञानां बाध्यबाधकभावो नास्तीति " आकडारादेका सञ्ज्ञा "[1721] इति सूत्रे वक्ष्यमाणत्वत् '[1722] इति शब्दकौस्तुभः ।

ननु " विरामोऽवसानम् "[1723] इति सञ्ज्ञासूत्रे प्रत्ययाभावस्यैवेमाः सञ्ज्ञा इति भाष्याभिप्रायात् " प्रत्ययस्य लुक्श्लुलुपः " इत्यस्मिन् सूत्रे प्रत्ययग्रहणं किमर्थम् ? । " प्रत्ययलोपे प्रत्ययलक्षणम् " इति सूत्रे प्रत्ययस्य इत्यनुवृत्त्यैव सिद्धे आद्यप्रत्ययग्रहणमवयवलोपे मा भूदिति ज्ञापनार्थम्, द्वितीय-ग्रहणमुत्तरार्थम् । तेन समस्तप्रत्ययलोपे एव प्रत्ययलक्षणं न त्वेकदेशलोपे । अन्यथा ' आघ्नीत ', ' संरायस्पोषेण संग्मीय ' इत्यत्र परत्वादुपधालोपे पुनः प्रसङ्गविज्ञानादनुनासिकलोपः स्यात् । अर्थात् आङुपसर्गपूर्वकाद् हन्धातोर्विधिलिङि तप्रत्यये सीयुटि " लिङः सलोपोऽनन्त्यस्य "[1724] इति सूत्रेण सलोपे " लोपो व्योर्वलि "[1725] इति सूत्रेण यकारस्य लोपे कृते " गमहनजनखनघसां लोपः क्ङित्यनङि "[1726] इति सूत्रेण उपधालोपे " हो हन्तेर्ञ्णिन्नेषु "[1727] इति सूत्रेण कुत्वे ' आघ्नीत ' इति रूपम्, गमेर्विधिलिङि " समो गम्यृच्छिभ्याम् "[1728] इति सूत्रेण आत्मनेपदे इट्प्रत्यये सीयुटि शपे " बहुलं छन्दसि "[1729] इति सूत्रेण शब्लुकि " लिङः सलोपोऽनन्तस्य " इति सूत्रेण सलोपे " इटोऽत् "[1730] इति सूत्रेण इटोऽति " गमहनजनखनघसां लोपः क्ङित्यनङि " इति सूत्रेण उपधालोपे ' संग्मीय ' इति रूपञ्च इत्यत्र " प्रत्ययलोपे प्रत्ययलक्षणम् " इति सूत्रे द्वितीयप्रत्ययपदानुवृत्त्या समस्तप्रत्ययलोपे एव प्रत्ययलक्षणम्, न तु तदेकदेशलोपे इति लाभे तु प्रकृते सीयुटस्सकारस्य प्रत्ययावयवस्यैव लोपेन समस्त-प्रत्ययस्य लोपाभावात् तस्य प्रत्ययलक्षणाभावेन झलादिङित्परत्वाभावान्नानुनासिकलोपः स्यात् । अत

[1719] अष्टाध्यायी – (1-1-62)
[1720] व्याकरणसिद्धान्तसुधानिधि – प्रकृतसूत्रे
[1721] अष्टाध्यायी – (1-4-1)
[1722] शब्दकौस्तुभः – प्रकृतसूत्रे
[1723] अष्टाध्यायी – (1-4-110)
[1724] अष्टाध्यायी – (7-2-79)
[1725] अष्टाध्यायी – (6-1-65)
[1726] अष्टाध्यायी – (6-4-98)
[1727] अष्टाध्यायी – (7-3-54)
[1728] अष्टाध्यायी – (1-3-29)
[1729] अष्टाध्यायी – (2-4-73)
[1730] अष्टाध्यायी – (3-4-106)

एव भाष्ये भाष्यकृतस्तु प्राहुः – ‘ द्वितीयं कर्तव्यम् । कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात्, एकदेशलोपे मा भूदिति ‘ आघ्नीत ’, ‘ संरायस्पोषेण ग्मीय ’ इति ’[1731] ।

- **लुक्सञ्ज्ञाप्रदेशाः**

1. लुक् तद्धितलुकि – (1-2-49)
2. इत् गोण्याः – (1-2-50)
3. ण्यक्षत्रियार्षञितः यूनि लुग् अण् इञोः – (2-4-58)
4. पैलादिभ्यः च – (2-4-59)
5. इञः प्राचाम् – (2-4-60)
6. न तौल्वलिभ्यः – (2-4-61)
7.तद्राजस्यबहुषु तेन एव अस्त्रियाम् – (2-4-62)
8. यस्कादिभ्यः गोत्रे – (2-4-63)
9. यञञोः च – (2-4-64)
10. अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यः च – (2-4-65)
11. बह्वचः इञः प्राच्यभरतेषु – (2-4-66)
12. न गोपवनादिभ्यः – (2-4-67)
13. तिककितवादिभ्यः द्वन्द्वे – (2-4-68)
14. उपकादिभ्यः अन्यतरस्याम् अद्वन्द्वे – (2-4-69)
15. आगस्त्यकौण्डिन्ययोः अगस्तिकुण्डिनच् – (2-4-70)
16. सुपः धातुप्रातिपदिकयोः – (2-4-71)
17. अदिप्रभृतिभ्यः शपः – (2-4-72)
18. बहुलं छन्दसि – (2-4-73)
19. यङः अचि च – (2-4-74)
20. जुहोत्यादिभ्यः श्लुः – (2-4-75)
21. बहुलं छन्दसि – (2-4-76)

[1731] भाष्यम् - प्रकृतसूत्रे

22. गातिस्थागुपाभूभ्यः सिचः परस्मैपदेषु – (2-4-77)

23. विभाषा घ्राधेट्शाच्छासः – (2-4-78)

24. तनादिभ्यः तथासोः – (2-4-79)

25. मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः – (2-4-80)

26. आमः – (2-4-81)

27. अव्ययात् आप्सुपः – (2-4-82)

28. अपरिमाणबिस्ताचितकम्बल्येभ्यः न तद्धितलुकि – (4-1-22)

29. काण्डान्तात् क्षेत्रे – (4-1-23)

30. पुरुषात् प्रमाणे अन्यतरस्याम् – (4-1-24)

31. द्विगोः लुक् अनपत्ये – (4-1-88)

32. गोत्रे अलुक् अचि – (4-1-89)

33. यूनि लुक् – (4-1-90)

34. फक्फिञोः अन्यतरस्याम् – (4-1-91)

35. लुक् स्त्रियाम् – (4-1-109)

36. कम्बोजात् लुक् – (4-1-175)

37. स्त्रियाम् अवन्तिकुन्तिकुरुभ्यः च – (4-1-176)

38. प्रोक्तत् लुक् – (4-2-64)

39. सूत्रात् च कोपधात् – (4-2-65)

40. श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलात् लुक् – (4-3-34)

41. स्थानान्तगोशालखरशालात् च – (4-3-35)

42. वत्सशालाभिजिदश्वयुक्शतभिषजः वा – (4-3-36)

43. नक्षत्रेभ्यः बहुलम् – (4-3-37)

44. कठचरकात् लुक् – (4-3-107)

45. फले लुक् – (4-3-163)

46. कंसीयपरशव्ययोः यञञौ लुक् च – (4-3-168)

47. लवणात् लुक् – (4-4-24)

48. एकधुरात् लुक् च – (4-4-79)

49. तद्वान् आसाम् उपधानः मन्त्रः इति इष्टकासु लुक् च मतोः – (4-4-125)

50. अश्विमान् अण् – (4-4-126)

51. अध्यर्धपूर्वद्विगोः लुक् असञ्ज्ञायाम् – (5-1-28)

52. विभाषा कार्षापणसहस्राभ्याम् – (5-1-29)

53. द्वित्रिपूर्वात् निष्कात् – (5-1-30)

54. बिस्तात् च – (5-1-31)

55. वर्षात् लुक् च – (5-1-88)

56. अध्यायानुवाकयोः लुक् – (5-2-60)

57. तावतिथं ग्रहणम् इति लुक् वा – (5-2-77)

58. अञ्चेः लुक् – (5-3-30)

59. विन्मतोः लुक् – (5-3-65)

60. गोः अतद्धितलुकि – (5-4-92)

61. चिणः लुक् – (6-4-104)

62. अतः हेः – (6-4-105)

63. उतः च प्रत्ययात् असंयोगपूर्वात् – (6-4-106)

64. बिल्वकादिभ्यः छस्य लुक् – (6-4-153)

65. षड्भ्यः लुक् – (7-1-22)

66. स्वमोः नपुंसकात् – (7-1-23)

67. लुक् वा दुहदिहलिहगुहाम् आत्मनेपदे दन्त्ये – (7-3-73)

68. उतः वृद्धिः लुकि हलि – (7-3-89)

69. रुग्रिकौ च लुकि – (7-4-91)

70. ऋतः च – (7-4-92)

- **श्लुसञ्ज्ञाप्रदेशाः**

1. जुहोत्यादिभ्यः श्लुः – (2-4-75)

2. श्लौ – (6-1-10)

3. निजां त्रयाणां गुणः श्लौ – (7-4-75)

4. भृञाम् इत् – (7-4-76)

5. अर्तिपिपर्त्योः च – (7-4-77)

6. बहुलं छन्दसि – (7-4-78)

- **लुप्सञ्ज्ञाप्रदेशाः**

1. लुपि युक्तवत् व्यक्तिवचने – (1-2-51)
2. विशेषणानां च अजातेः – (1-2-52)
3. लुप् योगाप्रख्यानात् – (1-2-54)
4. नक्षत्रे च लुपि – (2-3-45)
5. लुप् अविशेषे – (4-2-4)
6. सञ्ज्ञायां श्रवणाश्वत्थाभ्याम् – (4-2-5)
7. जनपदे लुप् – (4-2-81)
8. वरणादिभ्यः च – (4-2-82)
9. शर्करायाः वा – (4-2-83)
10. लुप् च – (4-3-166)
11. हरीतक्यादिभ्यः च – (4-3-167)
12. लुप् मनुष्ये – (5-3-98)
13. जीविकार्थे च अपण्ये – (5-3-99)
14. देवपथादिभ्यः च – (5-3-100)

- **प्रत्ययलोपे प्रत्ययलक्षणम् – (1-1-61)**

प्रत्ययस्य लोपः इति प्रत्ययलोपः, तस्मिन् प्रत्ययलोपे, षष्ठीतत्पुरुषः । प्रत्ययो लक्षणं निमित्तं यस्य कार्यस्य तत् प्रत्ययलक्षणम्, बहुव्रीहिः । प्रत्ययस्य लोपे सति प्रत्ययनिमित्तकं (प्रत्ययहेतुकम्) कार्यं स्यादिति सूत्रार्थो निष्पन्नः । उदाहरणानि च – अग्निचित्, सोमसुत्, अघोक् ।

प्रत्ययलक्षणसूत्रं विध्यर्थमिति वार्त्तिककृन्मतम् । नियमार्थमिति भाष्यकारमतम् । तथाहि – तृहधातोः कर्तरि लङि अडागमे लङस्तिबादेशे इतश्च इति सूत्रेण इकारलोपे रुदादित्वात् श्नम् । स च मित्त्वाद् अन्त्यादचः परः । नस्य णत्वे ‘ अतृणह् + त् ’ इति जातेऽपृक्तलोपे ‘ अतृणह् ’ इति जाते “

तृणह इम् ”[1732] इति सूत्रेण इमागमः प्रवर्तनीयः। स च हलादिपित्सार्वधातुकनिमित्तकः। तच्च प्रकृते ‘ त् ’ इति, तच्च लुप्तम्। स्थानिवत्सूत्रेण तु हलादिपित्सार्वधातुकत्वं नातिदिश्यते। अनल्विधाविति निषेधात्। अतः प्रत्ययलक्षणसूत्रेण लुप्तहलादिपित्सार्वधातुकनिमित्तकः इमागमः सम्पादनीयः। अतः एतदर्थं प्रत्ययलक्षणसूत्रं विध्यर्थम्। एवं ‘ मात्राणि शास्तीति मित्रशीः ’ इत्यादौ “ शास इदङ्हलोः ”[1733] इति इत्वस्याल्विधित्वेन स्थानिवद्भावो न प्रवर्तते इति तदर्थं प्रत्ययलक्षणसूत्रं विध्यर्थमिति वार्तिककारस्याशयः।

न च प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वे ‘ गवे हितं गोहितम् ’ इत्यादावपि तत्प्रवृत्त्या लुप्तस्य ङेप्रत्ययस्य प्रत्ययलक्षणेन अवाद्यादेशापत्तिरिति वाच्यम्। प्रत्ययलोपे तल्लक्षणमित्येव सिद्धे प्रत्ययग्रहणेन यत्र प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव प्रत्ययलक्षणप्रवृत्त्या “ एचोऽयवायावः ”[1734] इत्यत्राच्त्वस्य प्रत्ययासाधारणधर्मत्वाभावेनादोषात्। प्रत्ययलक्षणसूत्रे भाष्ये ‘ किमर्थं पुनरिदमुच्यते ? ’ इत्याशङ्क्य प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य इति समाहितं वार्तिककृता। शास्त्रेण करणेनाचार्यः स्मर्ता सद् विद्यमानं वस्तु निमित्तत्वेनान्वाचष्टे। ततश्च उगिदचामिति ‘ गौमन्तौ, यवमन्तौ ’ इत्यत्रैव स्यात्। ‘ गोमान्, यवमान् ’ इत्यत्र न स्यात्। इष्यते च स्यादिति। तच्चान्तरेण यत्नं न सिध्यति। अतः प्रत्ययलक्षणवचनमिति तदभिप्रायः।

न च स्थानिवद्भावेन सिध्यति, ‘ अतृणेड् ’ इत्यादावल्विधित्वादिति कैयटः। तत्रैव भाष्ये ‘ कानि पुनरस्य योगस्य प्रयोजनानि ’ इत्याशङ्क्य अपृक्तलोपे शिलोपे च कृते नुम्, अमामौ, गुणवृद्धी, दीर्घत्वमिम्, अडाटौ, श्नम्विधिरिति प्रयोजनानीति समाधाय तदुत्तरं नैतानि सन्ति प्रयोजनानि स्थानिवद्भावेनाप्येतानि सिद्धानीत्याक्षिप्य ‘ यत्र तर्हि स्थानवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः ’ इति प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वं दर्शितम्। अत्र मते प्रत्ययस्य यत्र प्राधान्येनाश्रयणं तत्रैव प्रत्ययलक्षणसूत्रप्रवृत्त्या ‘ चित्रायां जाता चित्र ’ इत्यत्र न ङीबापत्तिः। “ तृणह इम् ” इत्यत्र प्रत्ययस्य प्राधान्येनाश्रयणात् ‘ अतृणेड् ’ इत्यत्र प्रत्ययलक्षणं भवत्येवेति तस्याशयः।

स्थानिवत्सूत्रेणैव निर्वाहे प्रत्ययलक्षणसूत्रं नियमार्थमिति भाष्यकारमतम्। न चानल्विधाविति निषेधेनाल्विध्यर्थमिदमावश्यकमिति वाच्यम्। ‘ वर्णाश्रये नास्ति प्रत्ययलक्षणम् ’ इति निषेधेनाल्विधौ प्रत्ययलक्षणप्रवृत्तेरनिष्टत्वात्।

[1732] अष्टाध्यायी – (7-3-92)

[1733] अष्टाध्यायी – (6-4-34)

[1734] अष्टाध्यायी – (6-1-77)

न च “ अचः परस्मिन् पूर्वविधौ ” इत्यत्रेवात्रापि स्थानिवदित्यनुवृत्त्या प्रत्ययलोपे स्थानिवद्भवतीत्यर्थेनैवेष्टसिद्धौ प्रत्ययलक्षणग्रहणसामर्थ्याद्यत्र प्रत्ययत्वतद्व्याप्यान्यतरधर्मपुरस्कारेण प्रत्ययस्य प्राधान्येन निमित्ततयाश्रयणमलश्चाप्राधान्येन तत्कार्यं प्रत्ययलोपे सति भवतीत्यर्थो लभ्यते । अनेन वर्णाश्रयपरिभाषाया वर्णप्राधान्यविषयत्वं सिद्धम् । एवञ्चाप्राधान्येनालाश्रयणे प्रत्ययलक्षणनिषेधाप्रवृत्त्या तत्र विध्यर्थमिदं सूत्रमावश्यकम् । अत एव ‘ अतृणेड् ’ इत्यत्रेमागमस्य, ‘ मित्रशीः ’ इत्यत्रेत्वस्य च सिद्धिरिति वाच्यम् । “ तृणह इम् ” इत्यत्र हलीत्यस्यानुवृत्तिर्न क्रियते । किन्तु “ नाभ्यस्तस्याचि पिति सार्वधातुके ”[1735] इति सूत्रात् ‘ न ’ इति ‘ अचि ’ इति चानुवर्त्याजादौ नेति व्याख्यानेनाल्विधित्वाभावात् स्थानिवत्त्वेनैवेष्टसिद्धिः ।

न च ‘ मित्रं शास्तीति मित्रशीः ’ इत्यत्र “ शास इदङ्हलोः ” इति सूत्रेण इत्वानापत्तिरल्विधित्वादिति वाच्यम्, तत्र हल्ग्रहणाभावेऽपि योगविभागेन सिद्धेः । तथाहि “ शास इत् ” इत्येकं सामान्यसूत्रम् । ततः “ अङि ” इत्यपरं सूत्रं नियमार्थम्, पूर्वेणैव सिद्धेऽङीति सूत्रस्य शासाजादौ क्ङिति यदि इत्वं चेदङ्येव ।

न च ‘ आशास्ते ’ इत्यत्रेत्वापत्तिवारणाय “ शास इत् ” इतीत्वम् अङ्साहचर्यात् हलादौ परस्मैपदे एवेत्यर्थलाभाय एकसूत्रस्यावश्यकतेति वाच्यम्, ‘ आशासः क्वावुपसंख्यानम् ’ इत्यस्य आङ्पूर्वं शासश्चेत्त्वम् क्वावेवेति नियमार्थतया दोषवारणात् ।

अत एव नियमार्थत्वाश्रयणेन पूर्वयोगे हलीत्यस्याकरणाद् अल्विधित्वाभावेन ‘ मित्रशीः ’ इत्यत्रापि स्थानिवत्त्वेनैवेष्टसिद्धिरिति प्रत्ययलक्षणसूत्रं नियमार्थम् । नियमस्वरूपञ्च – प्रत्ययस्य यत्रासाधारणं रूपं यत्र प्रयोजकम्, तदेव कार्यं प्रत्ययलोपे सति भवति, न तु प्रत्ययाप्रत्यय-साधारणमिति[1736] । नियमस्यैवं स्वरूपत्वे मानन्तु अत्रत्यं द्वितीयप्रत्ययग्रहणमेव ।

अत्रायं निष्कर्षः – स्थानिवत्सूत्रेणैव सिद्धे “ प्रत्ययलोपे प्रत्ययलक्षणम् ” इति सूत्रं नियमार्थम् – प्रत्ययपर्याप्तस्थानिताकलोपे सति प्रत्ययलक्षणमेव न तु स्थानिवद्भावः । द्वितीयप्रत्ययग्रहणसामर्थ्याच्च प्रत्ययलक्षणमित्यस्य प्रत्ययत्वव्याप्यधर्मावच्छिन्ननिमित्ताकमित्यर्थः । तत्फलं तु ‘ शोभना दृषदोऽस्य सुदृषत्प्रासादः ’ इत्यत्रान्तर्वर्तिजसः प्रत्ययलक्षणेन ‘ दृषद् ’ इत्यस्यासन्तत्वेन “ अत्वसन्तस्य चाधातोः

[1735] अष्टाध्यायी – (7-3-87)

[1736] प्रौढमनोरमा – प्रकृतसूत्रे

"[1737] इति सूत्रेण दीर्घो न भवति । अस्त्वस्य धातावपि सत्त्वेन प्रत्ययत्वव्याप्यत्वाभावाद् असन्तत्व-निमित्तकदीर्घस्य प्रत्ययत्वव्याप्यधर्मावच्छिन्ननिमित्ताककार्याभावात् ।

न च " अत्वसन्तस्य चाधातोः " इति सूत्रे अतुसाहचर्यात् सकारप्रश्लेषाद्वा असन्तमपि श्रूयमाणासन्तमेव गृह्यते इत्यतः ' सुदृषत्प्रासादः ' इत्यत्र श्रूयमाणस्यासोऽभावाद् दीर्घाप्राप्त्या न तन्नियमव्यावर्त्यमिति वाच्यम्, ' यवमत् ' शब्दाद् णिजन्तात् क्विपि णिलोप-टिलोपयोः ततः सौ, तत्र अतोरपि अश्रूयमाणस्य सम्भवेन श्रूयमाणत्वेनातुसाहचर्यस्य ग्रहीतुमशक्यत्वात् । अनेन सूत्रेण साहचर्य-परिभाषाया अप्यनित्यज्ञापनात् ' सुदृषद् ' इत्यत्र दीर्घनिवृत्तिः फलमुचितमेव ।

न च ' सुदृषत्प्रसादः ' इत्यत्र जसो लुका लुप्तत्वाद् " न लुमताङ्गस्य "[1738] इति सूत्रेण निषेधादेव दीर्घो न भविष्यतीति वाच्यम्, दीर्घस्यासन्तकार्यत्वेन जसि परे अङ्गकार्यत्वाभावाद्[1739] ।

किञ्च साहचर्याश्रयेण दीर्घस्य वारणसम्भवेऽपि सुदृषच्छब्दाद्यथोक्तदिशाऽसन्तत्वमादाय " अस्मायामेधास्रजो विनिः "[1740] इति विनेरापत्तेर्दुर्निर्वारत्वात् । सति नियमे तु प्रत्ययलोपे स्थानिवत्त्वाप्रवृत्त्या विनिप्रत्ययकार्यस्य प्रत्ययत्वव्याप्यधर्माच्छिन्नोद्देश्यताकत्वाभावेन प्रत्यय-लक्षणस्याप्यप्रवृत्त्या च न दोषः । एतेन सोः परं लोमौषसी वर्जयित्वा मन्नन्तमसन्तञ्चाद्युदात्तं स्यादित्यर्थके " सोर्मनसी अलोमोषसी "[1741] इति सूत्रे पर्युदासेन श्रूयमाणासन्तस्यैव ग्रहणमिति न ' सुदृषत्प्रसादः ' इत्यत्र स्वरस्य प्राप्तिरिति नियमो व्यर्थ एवेत्यपास्तम् । ' यथोत्तरं मुनीनां प्रामाण्यम् ' इति वचनाच्च नियमार्थत्वमेवास्थेयम् । उक्तञ्च दीक्षितेन – ' यद्वेत्यादिनोक्तो वार्त्तिककृतसम्मतः पक्षः, तत्फलानामन्यथासिद्ध्या भाष्यकृता दूषयित्वा नियमार्थत्वपक्ष उक्त इति दिक् '[1742] इति शब्दरत्नः । उद्योते प्रत्ययलक्षणसूत्रस्य नियमार्थत्वं भाष्यसम्मतं स्पष्टीकृतं नागेशभट्टेन । यङ्लुगन्तशेखरेऽपि ' तस्य सूत्रस्य नियमार्थत्वमेव सिद्धान्ते ' इति भावः । अत एव सर्वैरपि परवर्त्तिव्याख्यातृभिरस्य सूत्रस्य नियमार्थत्वमेव स्थापितम् ।

' लोपे प्रत्ययलक्षणम् ' इत्येतावदेव भवतु सूत्रम् । आद्यप्रत्ययग्रहणं मास्तु । लक्षणशब्दो निमित्तार्थकः । प्रत्ययनिमित्तं कार्यं लोपे भवतीत्युक्ते प्रत्यासत्त्या प्रत्ययस्यैव लोप इति विज्ञास्यते ।

[1737] अष्टाध्यायी – (6-4-14)

[1738] अष्टाध्यायी – (1-1-63)

[1739] शब्देन्दुशेखरः – बालबोधिनीटीका – प्रकृतसूत्रे

[1740] अष्टाध्यायी – (5-2-121)

[1741] अष्टाध्यायी – (6-2-117)

[1742] शब्दरत्नः – प्रकृतसूत्रे

क्रियमाणेऽपि प्रत्ययग्रहणेऽन्यप्रत्ययलोपे अन्यप्रत्ययनिमित्तकार्यवारणाय प्रत्यासत्तिराश्रयणीया। अत एव आद्यं प्रत्ययग्रहणन्तु कृत्स्नप्रत्ययलोपे यथा स्यादवयवलोपे मा भूदित्येवमर्थम्। तेन ‘ आघ्नीय, सङ्गमीय ’ इत्यादौ “ लिङः सलोपोऽनन्त्यस्य ”[1743] इति सीयुटः सकारलोपे प्रत्ययैकदेशलोपे प्रत्ययलक्षणाभावाद् झल्परकत्वाभावे “ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ”[1744] इति सूत्रेण अनुनासिकलोपो न भवति। अत एव आद्यं प्रत्ययग्रहणन्तु कृत्स्नप्रत्ययलोपे यथा स्यादवयवलोपे मा भूदित्येवमर्थम्। “ प्रत्ययस्य लुक्श्लुलुपः ”[1745] इत्येतत्सूत्रस्थप्रत्ययपदानुवृत्तौ तु तेनैव सिद्ध्याऽन्यतरच्छक्यमकर्तुमिति भाष्यकृता प्रत्यपादि। इदमेव च प्रत्ययग्रहणं ज्ञापकमवयवेऽपि प्रत्ययत्वप्रयुक्तं कार्यं भवतीत्यस्य। तेन “ आदेशप्रत्यययोः ”[1746], “ इदुदुपधस्य चाप्रत्ययस्य ”[1747] इत्यादौ प्रत्ययपदस्य तदवयवे लक्षणां विनैव निर्वाहो भवति। अर्थात् - इदमेव प्रत्ययग्रहणं प्रत्ययावयवेऽपि प्रत्ययत्वव्यवहारं ज्ञापयति। तेन “ आदेशप्रत्यययोः ” इत्यत्र उभयोरपि सकारेऽभेदेनैवान्वयसत्त्वेन सहविवक्षोपपत्त्या निर्देशसङ्गतिः। अन्यथा आदेशपदार्थस्य अभेदेन प्रत्ययस्य च अवयवावयविभावेनान्वय इति सहविवक्षाया अभावे द्वन्द्वानुपपत्तिः स्यात्। यदि प्रत्ययावयवस्य प्रत्ययत्वेन व्यवहारो न स्यात्तर्हि सातेस्सकारस्य प्रत्ययत्वाभावेन षत्वाप्राप्त्या “ सात्पदाद्योः ”[1748] इति सूत्रेण षत्वनिषेधार्थं साद्ग्रहणं कृतं व्यर्थं स्यात्।

“ प्रत्ययलोपे प्रत्ययलक्षणम् ” इत्यत्राचार्यो यत् द्वितीयप्रत्ययग्रहणं करोति, तेन ‘ वर्णाश्रये नास्ति प्रत्ययलक्षणम् ’ इति ज्ञापितैषा परिभाषा इति ज्ञेयम्। तत् कथम्? पुनः प्रत्ययग्रहणं न कृत्वा प्रत्ययलोपे तल्लक्षणम् इत्युच्यमाने सर्वनाम्नो वस्तुमात्रपरामर्शितत्वाद् यत्र कुत्रचित् कार्यविधाने प्रत्ययस्य निमित्तभावः, तत्र प्रत्ययस्वरूपाश्रयेण वा वर्णरूपताश्रयेण वा सर्वं कार्यं भविष्यति। प्रत्ययग्रहणे सति प्रत्ययस्वरूपाश्रितम् (प्रत्ययनिमित्तम्) एव कार्यं प्रत्ययलक्षणेन भविष्यति, न तु वर्णरूपताश्रयम् (वर्णरूपतानिमित्तम्) एवं सिद्धं यद् ‘ वर्णाश्रये वर्णनिमित्ते प्रत्ययलक्षणं नास्तीति। अत एव अस्याः परिभाषायाश्च वर्णप्राधान्यविषयकत्वे चाप्येतदेव मानम्। तेन ‘ गवे हितम् गोहितम् ’ इत्यस्य अलौकिके

[1743] अष्टाध्यायी – (7-2-79)
[1744] अष्टाध्यायी – (6-4-37)
[1745] अष्टाध्यायी – (1-1-61)
[1746] अष्टाध्यायी – (8-3-59)
[1747] अष्टाध्यायी – (8-3-41)
[1748] अष्टाध्यायी – (8-3-111)

विग्रहवाक्ये ‘ गो + ए हित + सु ’ इत्यत्र “ सुपो धातुप्रातिपदिकयोः ”[1749] इति सूत्रेण अन्तर्वर्त्तिन्या विभक्तेश्चतुर्थ्येकवचनस्य लुकि सति प्रत्ययलोपे प्रत्ययलक्षणम् इति प्रत्ययलक्षणेन गोशब्दस्य ओकारस्य “ एचोऽयवायावः ” इति सूत्रेण अवादेशः प्राप्नोति । ‘ वर्णाश्रये नास्ति प्रत्ययलक्षणम् ’ अनया परिभाषया “ एचोऽयवायावः ” इत्यादौ अजादिवर्णे इतराविशेषणत्वरूपप्राधान्यस्य सत्त्वात् तत्र कर्तव्ये प्रत्ययलक्षणाभावाद् अजादिपरकत्वाभावेन अवादेशो न भवति । तस्माद्वर्णप्राधान्ये प्रत्ययलक्षणं नास्ति, प्रत्ययप्राधान्ये त्वस्ति इति विवेकः । अत्र भाष्यम् – ‘ अथ द्वितीयं प्रत्ययग्रहणं किमर्थम् प्रत्यय-लक्षणं यथा स्याद्वर्णलक्षणं मा भूदिति । ‘ गवे हितम् गोहितम्, रायः कुलम् रैकुलम् ’ इति ’[1750] ।

न च ‘ गोहितम् ’ इत्यत्र “ न लुमताङ्गस्य ” इति सूत्रेण निषेधान्नाऽवः प्राप्तिरिति वाच्यम्, लुप्तप्रत्ययनिमित्ताऽङ्गोद्देश्यककार्ये एव तन्निषेधात् । प्रकृते चाऽवादेशो वर्णमात्रोद्देश्यको नाङ्गोद्देश्यक इति न कश्चिद्दोषः ।

“ प्रत्ययलोपे प्रत्ययवत् ” इत्येव सिद्धे लक्षणग्रहणं प्रत्ययनिमित्तकमेव कार्यं भवति, न तु प्रत्ययस्थानिकमपि इत्यर्थलाभार्थम् । तेन ‘ नखैर्भिन्नो नखभिन्नः ’ इत्यत्रान्तर्वर्त्तिभिसः प्रत्ययलक्षणेन तत्स्थानिक ऐसादेशो न इति दीक्षितादीनामाशयः । अतिदेशेनाऽऽहार्यतद्बुद्धिसम्पादनेऽप्युच्चारण-प्रसङ्गरूपषष्ठ्यर्थाभावान्नैसादीति तद्व्यर्थमित्यपरे (सिद्धान्तिनः)

- **न लुमताङ्गस्य – (1-1-62)**

लु अस्मिनस्ति इति लुमान्, तेन लुमता, “ तदस्यास्त्यस्मिन्निति मतुप् ”[1751] इति सूत्रेण मतुप्प्रत्ययः । प्रत्ययलोपे प्रत्ययलक्षणम् इति सम्पूर्णं सूत्रमनुवर्तते । लुमता शब्देन प्रत्ययस्य लोपे (अदर्शने) सति तस्मिन् परतो यदङ्गं तस्य यत् प्रत्ययलक्षणं कार्यं तन्न भवति । उदाहरणञ्च – गर्गाः, मृष्टः, जुहुतः, वरणाः ।

अत्र सूत्रपदार्थविचारो विधीयते । न, लुमता, अङ्गस्य इति पदविभागः । लु इत्येकदेशोऽस्यास्तीति लुमान्, “ तदस्यास्त्यस्मिन्निति मतुप् ” इति सूत्रेण लुशब्दात् मतुप् । लुशब्दयुक्त इत्यर्थः । तेन लुमता । यद्यपि ‘ लु ’ इति एकदेशघटिता बहवः शब्दा लोके भवितुमर्हन्ति ‘ कृपालुः, लुलावः, दयालुः ’ इत्येवमादयः, तथापि न तेऽत्र विवक्षिताः, किन्तु ‘ लुमता ’ इत्यस्य ‘ प्रत्ययलोपे ’

[1749] अष्टाध्यायी – (2-4-71)

[1750] भाष्यम् – प्रकृतसूत्रे

[1751] अष्टाध्यायी – (5-2-94)

इत्यनेन सह अन्वयाद्धेतोः यया ' लु ' शब्दघटितया सञ्ज्ञया प्रत्यया लोप्यन्ते ताः सञ्ज्ञा अत्र लुमच्छब्देन ग्राह्याः । ते च सञ्ज्ञाशब्दाः सन्ति ' लुक्, श्लु, लुप् ' इत्येते त्रयः । " प्रत्ययस्य लुक्श्लुलुपः " इति सूत्रेण प्रत्ययादर्शनस्य एतत्त्रितयसञ्ज्ञाविधानात् । ' लुमता ' इति लोपक्रियानिरूपिता करणे तृतीया । प्रोक्तवाञ्च न्यासकारः – ' करणे चेयं तृतीया, हेतौ वा इत्थम्भूतलक्षणे वा लुमता करणे लुप्ते प्रत्यये, तेन हेतुना वा, तदुपलक्षितेन वेत्यर्थः '[1752] ।

एवं पदमञ्जरीकारोऽपि – ' करणे च तृतीया, लोपे च करणत्वम् '[1753] इति । त्रिपदात्मके सूत्रेऽस्मिन् " प्रत्ययलोपे प्रत्ययलक्षणम् " इति सूत्रं सम्पूर्णमनुवर्त्यते । उभयोश्चैकवाक्यतयाऽन्वये क्रियमाणे वाक्यमेवंविधं सम्भवति – लुमता प्रत्ययलोपे अङ्गस्य प्रत्ययलक्षणं न इति । अत एव सुष्ठूक्तं प्रथमावृत्तौ – ' लुमता शब्देन प्रत्ययस्य लोपे (अदर्शने) सति तस्मिन् परतो यदङ्गं तस्य यत् प्रत्यय-लक्षणं कार्यं तन्न भवति ' ।

इदं सूत्रं पूर्वसूत्रप्राप्तप्रत्ययलक्षणस्य निषेधकं सिध्यति । यथा चोच्यते काशिकायां वृत्तौ – ' पूर्वेणातिप्रसक्तं प्रत्ययलक्षणमिति विशेषे प्रतिषेध उच्यते । लुमता शब्देन लुप्ते प्रत्यये यदङ्गं तस्य प्रत्ययलक्षणं कार्यं न भवति । गर्गाः। मृष्टः। जुहुतः । यञ्शपोर्लुमता लुप्तयोरङ्गस्य गुणवृद्धी न भवतः ।'[1754]

यथोक्तं शब्देन्दुशेखरे महावैयाकरणेन नागेशेनापि – ' लुप्तप्रत्यये परतो यः पूर्वस्तत्प्रकृतिभूतो लब्धाङ्गसञ्ज्ञकस्तदुद्देश्यकं यत्कार्यमाङ्गमनाङ्गं वेत्यर्थः ।'[1755] लुप्तप्रत्ययाव्यवहितपूर्वत्वेन साक्षादवच्छिन्ना लुप्तप्रत्ययाङ्गसञ्ज्ञावत्पर्याप्तधर्मेण साक्षात् परम्परया वा अवच्छिन्ना च या उद्देश्यता तादृशोद्देश्यताके कार्ये कर्तव्ये प्रत्ययलक्षणं न भवतीति " न लुमताङ्गस्य " इति सूत्रार्थः सम्पन्नः ।[1756]

प्रत्ययलक्षणसूत्रं विध्यर्थमिति वार्तिकमतेनैतत्सूत्रस्योदाहरणमाह शब्देन्दुशेखरे नागेशः ' राजपुरुषादौ ' इति । अत्र प्रत्ययलक्षणेनाजादिस्वादिपरत्वमाश्रित्य भसञ्ज्ञायां " न लुमताङ्गस्य " इति सूत्रेण प्रत्ययलक्षणनिषेधः । " सुप्तिङन्तं पदम् "[1757] इति सूत्रेण विहितायाः पदसञ्ज्ञायाः प्रकृतिप्रत्यय-समुदायोपाधित्वेन लुप्तप्रत्ययाव्यवहितपूर्वत्वावच्छिन्नोद्देश्यताकत्वाभावेन निषेधाप्रवृत्तिः । भसञ्ज्ञायाः

[1752] काशिका – न्यासटीका – प्रकृतसूत्रे

[1753] काशिका – पदमञ्जरीटीका – प्रकृतसूत्रे

[1754] काशिका – प्रकृतसूत्रे

[1755] शब्देन्दुशेखरः – प्रकृतसूत्रे

[1756] शब्देन्दुशेखरः – बालबोधिनीटीका –प्रकृतसूत्रे

[1757] अष्टाध्यायी – (1-4-14)

तु निरुक्तोपाधिकार्यत्वान्निषेधप्रवृत्तिः स्यात्। अर्थात् ‘ राजपुरुषः ’ इत्यत्र ‘ राज ’ इत्यस्य सुबन्त-निमित्तकं सुप्तिङन्तमिति पदत्वेन नलोपो भवति, अजादौ स्वादौ परतः पूर्वस्य ‘ राज ’ इत्यस्य भत्वे प्रत्ययलक्षणनिषेधेन भत्वाभावात् । भाष्यमते तु स्थानिवत्सूत्रेणैव सिद्धे प्रत्ययलक्षणसूत्रस्य नियामकत्वेन स्थानिवत्त्वेन जातप्रत्ययत्वातिदेशे ‘ अनल्विधौ ’ इति निषेधेन प्रत्ययत्वानतिदेशात् ‘ राजपुरुषादौ ’ न भसञ्ज्ञाया अवकाश इति ध्येयम्।

उक्तं न्यासेऽपि – ‘ राज्ञः पुरुषो राजपुरुषः इति श्रूयमाणे प्रत्यये यथा भसञ्ज्ञा भवति, एवं लुप्तेऽपि भसञ्ज्ञा स्यात्। ततश्च भसञ्ज्ञया पदसञ्ज्ञाया बाधितत्वात् नलोपो न स्यात्। ननु च द्वेऽत्र पदसञ्ज्ञे “ स्वादिष्वसर्वनामस्थाने ”[1758] इति सूत्रेण स्वादाविति च, “ सुप्तिङन्तं पदम् ” इति सूत्रेण सुबन्तं तिङन्तमिति च। तत्र या स्वादौ पदमिति पदसञ्ज्ञा, साऽपवादभूतया बाध्यते, या तु “ सुप्तिङन्तं पदम् ” इति सूत्रेण विहिता पदसञ्ज्ञा, सा न बाधनीया, यथा – श्रूयमाणे प्रत्यये ‘ राज्ञः ’ इति समुदायस्य ? नैतदेवम्, श्रूयमाणे प्रत्यये ततः पूर्वस्य भागस्य भसञ्ज्ञा, समुदायस्य तु विसर्जनीयान्तस्य पदसञ्ज्ञेति युक्तम् – विभिन्नावधिकतया भसञ्ज्ञया पदसञ्ज्ञा न बाध्यत इति। लुप्ते तु प्रत्यये यस्यैवावधेः स्वादौ पदमिति पदसञ्ज्ञा, सुबन्तं पदमित्यपि तस्यैवावधेः पदसञ्ज्ञा । तत्रैवावधौ भसञ्ज्ञा भवन्ती यथाऽपवादत्वात् स्वादिलक्षणां पदसञ्ज्ञां बाधते, तथा सुबन्तलक्षणामपि परत्वाद्बाधते।

एवं तर्हि न लुमताङ्गस्य इति प्रतिषेधाद् भसञ्ज्ञा न भविष्यति, यचीति सप्तमीनिर्देशात्। ततः पूर्वस्य भागस्य वस्तुतोऽस्य प्रवर्तमाना भसञ्ज्ञाप्यङ्गकार्यमेव। एवं च बुद्ध्वा “ न ङिसम्बुद्ध्योः ”[1759] इत्यत्र ङौ नलोपः प्रतिषिध्यते, यदि प्रत्ययलक्षणेन भसञ्ज्ञा स्यात्, अपवादत्वादेव ‘ आर्द्रे चर्मन् ’ इत्यत्र नलोपो न भविष्यतीति किं तेन प्रतिषेधेन ? ’[1760]।

- **सूत्रे लुमता इति पदप्रयोजनविचारः**

अस्मिन् सूत्रे ‘ लुमता ’ इति कथनेन ‘ कार्यते ’ इत्यादौ अयं निषेधो न प्रवर्तते। तत्र णिचः “ णेरनिटि ”[1761] इति सूत्रेण लोपो विधीयते। एवञ्च तस्य लुमता लुप्तत्वाभावेन प्रत्ययलक्षणसत्त्वेन “ अचो ञ्णिति ”[1762] इति सूत्रेण वृद्धिः प्रवर्तत एव। ‘ अमार्ट् ’ इत्यत्र नित्यत्वाद्धल्ङ्यादिलोपेऽपि मृजेर्वृद्धिश्च यथा स्यात्।

[1758] अष्टाध्यायी – (1-4-17)

[1759] अष्टाध्यायी – (8-2-8)

[1760] काशिका – न्यासटीका – प्रकृतसूत्रे

[1761] अष्टाध्यायी – (6-4-51)

[1762] अष्टाध्यायी – (7-2-115)

- **सूत्रेऽङ्गस्येति पदप्रयोजनविचारः**

" अङ्गस्य "[1763] इत्युक्तत्वेन ' पञ्च, सप्त ' इत्यादौ जस्प्रत्ययस्य " षड्भ्यो लुक् "[1764] इति लुका लुप्तत्वेऽपि प्रत्ययलक्षणेन सुबन्ततामाश्रित्य पदसञ्ज्ञा सिध्यत्येव । तस्याः अङ्गसञ्ज्ञा-निमित्तकत्वाभावात् । अर्थात् - ' पञ्च ' इत्यत्र प्रत्ययलक्षणेन सुबन्तत्वमाश्रित्य " सुप्तिङन्तं पदम् " इति सूत्रेण प्रकृतिप्रत्ययसमुदायस्य पदसञ्ज्ञा क्रियते । लुप्तप्रत्यये परतो यः पूर्वः प्रकृतिभूतः तदुद्देश्यक-कार्यत्वाभावात् पदसञ्ज्ञायां कर्तव्यायां न लुमतेति निषेधाप्रवृतिः ।

वार्तिककाराशयः – अस्मिन् सूत्रे " अङ्गस्य " इत्यत्र " स्वरितेनाधिकारः "[1765] इति वचनाद् अङ्गाधिकारस्थे कार्ये कर्तव्ये एवास्य सूत्रस्य प्रवृत्तिरिति वार्तिककाराशयः । स्पष्टमिदं प्रकृतसूत्र-व्याख्यावसरे कैयटे ।

वार्तिककारमतस्य खण्डनपुरस्सरं भाष्यकाराशयः – भाष्यकारमते तु अत्र स्वरितत्वाभावेन वार्तिककारोक्तार्थो न स्वीक्रियते । किन्तु लुमता लुप्ते प्रत्यये यदङ्गं तस्याङ्गाधिकारीये तद्भिन्ने वा कार्ये कर्तव्ये प्रत्ययलक्षणं नास्तीत्येव सूत्रार्थः । अत एव ' उत्क्राम ' इत्यत्र लोण्मध्यमपुरुषैकवचने " अतो हेः "[1766] इति सूत्रेण हेर्लुकि कृते प्रत्ययलक्षणेन " क्रमः परस्मैपदेषु "[1767] इति सूत्रेण दीर्घः सिध्यति । वार्तिककारमते तु अस्य सूत्रास्याङ्गाधिकारस्थत्वेन प्रकृतनिषेधस्य प्रवृत्तौ प्रत्ययलक्षणाभावेन दीर्घानापत्तिः । एवं लोण्मध्यमपुरुषैकवचने ' जिगमिष ' इत्यस्माद्धातोः परस्य हेर्लुकि प्रत्ययलक्षणेन " गमेरिट् परस्मैपदेषु "[1768] इति सूत्रेण इडागमो न स्यात् । अतः भाष्यकारोक्त एवार्थः युज्यतेतराम् । भाष्यकारमतेऽपि पूर्वोक्तस्थलेऽङ्गसम्बन्धिकार्यत्वेन दोषस्तदवस्थ एवेति तु न शङ्कनीयम् । ' उत्क्राम ' इत्यत्र परस्मैपदं लुप्तं तदपेक्षया यदङ्गं शबन्तं तस्य दीर्घो न विधीयते, किन्तु ' क्रम् ' इत्यस्यैव । स तु शबपेक्षया अङ्गम्, न तु लुप्तपरस्मैपदापेक्षयेति प्रकृतनिषेधस्याप्रवृत्तौ प्रत्ययलक्षणेन दीर्घः सिध्यत्येव । एवं ' जिगमिष ' इत्यत्रापि लुमता लुप्ते परस्मैपदे यदङ्गं सन्नन्तं न तस्येडागमः क्रियते किन्तु सकारादेः प्रत्ययस्य । स च प्रत्ययोऽङ्गं न भवतीति न दोषः ।

[1763] अष्टाध्यायी – (6-4-1)

[1764] अष्टाध्यायी – (7-1-22)

[1765] अष्टाध्यायी – (1-3-11)

[1766] अष्टाध्यायी – (6-4-105)

[1767] अष्टाध्यायी – (7-3-76)

[1768] अष्टाध्यायी – (7-2-58)

अत एव काशिकावृत्तौ ‘ लुप्ते प्रत्यये यदङ्गम् ’ इत्यत्र ‘ प्रत्यये ’ इति निमित्तसप्तम्याश्रयणात् लुमच्छब्दकरणकलोपविषयप्रत्ययनिमित्तकं यदङ्गमित्यर्थाश्रयणादपि सुलभा ।

यथोक्तं पदमञ्जर्यां हरदत्तेन – ‘ तत्र च प्रत्यासत्तेर्लुप्तप्रत्ययापेक्षया येनाङ्गसञ्ज्ञा प्रतिलब्धा तस्य तन्निमित्तं कार्यं न भवतीत्यर्थः । एतदेव वस्तुतो दर्शयति – लुमता लुप्ते प्रत्यये यदङ्गमिति । तेन ‘ उत्क्राम ’ इत्यत्र “ अतो हेः ” इति लुकि कृते परस्मैपदापेक्षया यदङ्गं शबन्तं न तस्य दीर्घत्वम्, यस्य च दीर्घत्वं न तत्परस्मैपदापेक्षयाङ्गम्, किं तर्हि ? शबपेक्षयेति निषेधाभावात् प्रत्ययलक्षणेन “ क्रमः परस्मैपदेषु ” इति सूत्रेण दीर्घो भवति, तथा “ गमेरिट् परस्मैपदेषु ”, “ न वृद्भ्यश्चतुर्भ्यः ”[1769] इटो विधिप्रतिषेधौ ‘ जिगमिष, विवृत्स ’ इति परस्मैपदलुक्यपि भवतः । लुमता लुप्ते परस्मैपदे यदङ्गं सन्नन्तं न तस्येटो विधिनिषेधौ, किं तर्हि ? सकारादेः प्रत्ययस्येति ’[1770] ।

शब्दकौस्तुभेऽपि दीक्षितेनोक्तम् – ‘ न चैवमुक्तदोषतादवस्थ्यमिति वाच्यम्, ‘ उत्क्राम ’ इत्यत्र लुप्तं परस्मैपदम् । तदपेक्षया यदङ्गं शबन्तं न तस्य दीर्घो विधीयते, किन्तु क्रमेः । स तु शपं प्रत्यङ्गं न तु लुप्तं प्रतीति निषेधाप्रवृत्तौ प्रत्ययलक्षणेन दीर्घप्रवृत्तेः । एवं जिगमिष, विवृत्स इत्यत्रापि इटो विधिप्रतिषेधौ भवत एव । तौ हि लुमता लुप्ते परस्मैपदे यदङ्गं सन्नन्तं तस्य न क्रियते, किन्तु सकारादेः प्रत्ययस्य । स चाङ्गं नेति स्पष्टमेव ’[1771] ।

पक्षद्वयेऽपि शङ्काप्रदर्शनम् – अत्र शङ्का – पूर्वोक्तोदाहरणेषु वार्तिककारमते दोषसद्भावेन भाष्यकारमतमेव ज्याय इति सिद्धान्तितम्, किन्तु पक्षद्वयेऽपि केचन दोषा आयान्ति । तद्यथा –

“ ञ्नित्यादिर्नित्यम् ”[1772], “ कितः ”[1773], “ पथिमथोः सर्वनामस्थाने ”[1774] इति त्रिभिः सूत्रैः विधीयमानाः स्वराः लुकि कृतेऽपि प्राप्नुवन्ति । तथा हि ‘ गर्गाः, बिदाः ’ इत्यादौ “ यञिञोश्च ”[1775] इति यञ्प्रत्ययस्य इञ्प्रत्ययस्य च लुकि प्रत्ययलक्षणेन ञिदन्तमादाय “ ञ्नित्यादिर्नित्यम् ” इति सूत्रेण आद्युदात्तस्वरः प्राप्नोति । एवं ‘ उष्ट्रग्रीव इव प्रतिकृतिः ’ इत्यर्थे “ इवे प्रतिकृतौ ”[1776] इति सूत्रेण

[1769] अष्टाध्यायी – (7-2-59)

[1770] काशिका – पदमञ्जरीटीका – प्रकृतसूत्रे

[1771] शब्दकौस्तुभः – प्रकृतसूत्रे

[1772] अष्टाध्यायी – (6-1-194)

[1773] अष्टाध्यायी – (6-1-162)

[1774] अष्टाध्यायी – (6-1-196)

[1775] अष्टाध्यायी – (4-1-101)

[1776] अष्टाध्यायी – (5-3-96)

कन्प्रत्यये " देवपथादिभ्यश्च "[1777] इति सूत्रेण तस्य लुपि प्रत्यलक्षणेन ञिदन्तमादाय " ञ्नित्यादिर्नित्यम् " इति सूत्रेण आद्युदात्तः प्राप्नोति ।

अत्रेः अपत्यानि इत्यर्थे अत्रिशब्दात् " इतश्चानिञः "[1778] इति सूत्रेण विहितस्य ढक्प्रत्ययस्य " अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च "[1779] इति सूत्रेण लुकि प्रत्ययलक्षणेन किदन्तमादाय " कितः " इति सूत्रेण अन्तोदात्तस्वरः प्राप्नोति ।

' पन्थाः प्रियः यस्य सः ' इति बहुव्रीहौ ' पथिप्रियः ' इत्यत्र " सुपो धातुप्रातिपदिकयोः "[1780] इति सूत्रेण सुब्लुकि " पथिमथोः सर्वनामस्थाने " इति सूत्रेण आद्युदात्तस्वरः प्राप्नोति इति ।

अत्र समाधानम् – वार्तिककारमतेऽङ्गाधिकारनिर्देशपक्षे पूर्वोक्तदोषत्रयवारणाय वार्तिककारैः कानिचन वार्तिकानि कल्पितानि । यथा – ' लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानम् ' (सर्वामन्त्रित-सिज् लुक्स्वरवर्जम्), ' प्रयोजनं ञिनिकिल्लुकिस्वराम् ', ' पथिमथोः सर्वनामस्थाने लुकि ' इति । एवञ्च एभिर्वचनैः पूर्वोक्तेषु सर्वत्र दोषाः वार्यन्ते इति ।

न ह्येषा त्रिसूत्री, अङ्गाधिकारस्था, येन न लुमताङ्गस्य इति निषेधः प्रवर्तते । नाप्येतद्वस्तुतः अङ्गस्य कार्यम् " सुप्तिङन्तं पदम् "[1781] इति पदसञ्ज्ञावदुक्तस्वराणां प्रत्ययान्तकार्यत्वात् । नन्वस्तु " कितः " इति तथा, इतरत्तु द्वयं " ञ्नित्यादिर्नित्यम् " इति सूत्रे ' ञ्निति ' इति " पथिमथोः सर्वनामस्थाने " इति सूत्रे ' सर्वनामस्थाने ' इति सप्तमीनिर्देशाद्वस्तुतोऽङ्गस्य कार्यं भवत्येवेति चेत् ? न, ञ्निदन्तस्यादेरित्यादिक्रमेण प्रत्ययान्तस्यैव तद्विधानात् ' सौवर्य्यः सप्तम्यस्तदन्तसप्तम्यः ' इति सिद्धान्तात् । एतच्च " भीह्रीभृहूमदजनधनदरिद्रजागरां प्रत्ययात्पूर्वं पिति "[1782] इति पूर्वग्रहणेन ज्ञाप्यते, इति तत्रैव भाष्ये स्पष्टम् ।

वस्तुतस्तु ' गर्गाः, बिदाः ' इत्यादौ दोषवारणाय ' लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानम् ', ' प्रयोजनं ञिनिकिल्लुकिस्वराम् ' इति च वचनमनावश्यकमेव । ज्ञापकबलेनैव दोषवारणसम्भवात् । तथाहि – " सञ्ज्ञायामुपमानम् "[1783] इति सूत्रे उपमानस्याद्युदात्तस्य वचनं ज्ञापकमनुबन्धलक्षणे स्वरे

[1777] अष्टाध्यायी – (5-3-100)

[1778] अष्टाध्यायी – (4-1-122)

[1779] अष्टाध्यायी – (2-4-65)

[1780] अष्टाध्यायी – (2-4-71)

[1781] अष्टाध्यायी – (1-4-14)

[1782] अष्टाध्यायी – (6-1-89)

[1783] अष्टाध्यायी – (6-1-201)

प्रत्ययप्रतिषेधस्य इति वार्तिकं दृश्यते । अनेन च वार्तिकेन पूर्वोक्तेषूदाहरणेषु प्रत्ययलक्षणं नास्तीति बोध्यते । तेन तत्र आपदितः स्वरो वार्यते । ‘ पथिप्रियः ’ इत्यादौ दोषवारणाय तु ‘ पथिमथोः सर्वनाम-स्थाने लुकि ’ इति पूर्वमुक्तं वचनं कर्तव्यमेव । इदञ्च समाधानम् अङ्गाधिकारो निर्दिश्यते इति वार्तिक-कारमते इवाङ्गस्य यत्कार्यमिति भाष्यकारमतेऽपि युज्यते एव । अत एव “ सञ्ज्ञायामुपमानम् ” इति सूत्रे भाष्यकारैः पक्षद्वयसाधारण्येनैव उक्तज्ञापनवार्तिकं योजितम् । एवञ्च “ सञ्ज्ञायामुपमानम् ” इत्यत्र भाष्यं कैयटग्रन्थश्च सामान्यापेक्षं ज्ञापकमाश्रित्य योजनीयम् ।

‘ अत्रयः ’ इत्यत्र “ कितः ” इति सूत्रेणान्तोदात्तस्वरः प्राप्नोतीति दोषस्तु न । तत्र ढक्प्रत्ययस्य “ अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ” इति सूत्रेण लुकि कृते कार्यिणोऽभावात् । प्रत्ययलक्षणं हि यदस्य कार्यं तत्प्रत्ययलोपेऽपि भवति, न तु प्रत्ययस्य यत्कार्यं तत्रापि । अत एवोक्तं भाष्ये भगवता भाष्यकारेण – ‘ न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते । किं तर्हि योऽसौ लुमता लुप्यते तस्मिन् यदङ्गं तस्य यत्कार्यं तन्न भवति ।’[1784] इति ।

पदमञ्जर्यां हरदत्तेन तदेतत्सर्वं साधु सङ्गृह्योक्तम् – ‘ इदं चान्यदस्मिन् ग्रन्थे दर्शितम् – नाङ्गस्येत्यनेनाङ्गाधिकारः प्रतिनिर्दिश्यते ‘ न लुमता लुप्ते प्रत्यये आङ्गं भवति ’ इति, किं तर्हि ? लुमता लुप्ते प्रत्यये यदङ्गं तस्याङ्गमनाङ्गं च सर्वं प्रतिषिध्यते इति । तेन ‘ गर्गाः, बिदाः ’ – यञञोर्लुक् , ‘ उष्ट्रग्रीवः ’ – “ इवे प्रतिकृतौ ” इति कन् “ देवपथादिभ्यश्च ” इति लुप्, ‘ पन्थाः प्रियो अस्य पथिप्रियः ’ – “ सुपो धातुप्रातिपदिकयोः ” इति सर्वनामस्थानस्य लुक् । अत्र “ ञ्नित्यादिर्नित्यम् ”, “ पथिमथोः सर्वनामस्थाने ” इति चाद्युदात्तस्यानाङ्गस्यापि निषेधो भवति । सप्तमीनिर्देशाद्ध्येतद् वस्तुतोऽङ्गस्य कार्यम् । तथा ‘ अहर्ददाति ’ – “ रोऽसुपि ”[1785] इति रत्वप्रतिषेधो न भवति ’[1786] । एतेनेदं स्पष्टं यत् लुप्तप्रत्ययनिमित्ताङ्गस्य तत्प्रत्ययनिमित्तकमेव यत्कार्यम् – तदाङ्गं वा भवतु अनाङ्गं वा, लुमता शब्देन लुप्ते सति प्रत्यये तन्न भवति ।

अत्रायं निष्कर्षः – “ न लुमताङ्गस्य ” इति सूत्रे “ अङ्गस्य ” इति अङ्गाधिकारनिर्देशात् ञ्निति कित्स्वरस्य चानाङ्गत्वात् निषेधो न प्राप्नोतीति तद्वक्तुमित्युक्तं वार्तिककृता । ‘ लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानम् ’ इति तद्वार्तिकम् । लुमति प्रतिषेधे एकपदाश्रयो यः स्वरः तस्य प्रत्ययलक्षण-प्रतिषेधो वक्तव्य इति तदर्थः । ञ्नित्कितां प्रत्ययानां लुकि कृते प्रत्ययलक्षणेन तत्प्रयुक्तस्वराणां प्राप्तौ

[1784] भाष्यम् – प्रकृतसूत्रे

[1785] अष्टाध्यायी – (8-2-69)

[1786] काशिका – पदमञ्जरी – प्रकृतसूत्रे

प्रत्ययलक्षणप्रतिषेधेन तन्निवृत्तिः फलम् । ‘ गर्गाः ’ इत्यादौ यञादेर्लुकि प्रत्ययलक्षणेन “ ञ्नित्यादिर्नित्यम् ” इति सूत्रेण आद्युदात्तत्वं न भवति । अत्रिशब्दात् “ इतश्चानिञः ” इति सूत्रेण ढकि तस्य “ अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ” इति सूत्रेण लुकि प्रत्ययलक्षणेन किदन्तमादाय “ कितः ” इति सूत्रेण अन्तोदात्तस्वरः न भवति । तत्सन्दर्भे ‘ न लुमता तस्मिन् ’ इति न्यासान्तरं दर्शितं वार्तिककारेण । लुमता यो लुप्तः प्रत्ययः तस्मिन् परतस्तन्निमित्तकं तत्प्रकृतिभूतस्य यत्कार्यमाङ्गमनाङ्गं वा तन्न भवतीति तदर्थः । ‘ अत्रयः ’ इत्यत्र “ कितः ” इति सूत्रेणान्तोदात्तो न भवति । तद्धितस्यैव कितोऽन्तोदात्तत्वं स्यात् । प्रत्ययग्रहणपरिभाषया तद्धितान्तस्य तद्विधानात् । ‘ राशदिभ्यां त्रिप् ’ ‘ अदेस्त्रिर्निच्चेति ’ इत्युणादिसूत्रेण ह्यदेश्चकारानुकृष्टे त्रिप्रत्यये तस्य पित्त्वेनानुदात्तत्वादाध्युदात्तोऽत्रिशब्दः ’[1787] ।

अत्र न्यासेऽपि निरुक्तरीत्याऽङ्गसञ्ज्ञाविषयेऽपि प्रत्ययलक्षणनिषेधः । अत एव भाष्ये ‘ न लुमताङ्गस्य इत्येव सिद्धम् । कथम् ? न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते । किं तर्हि ? योऽसौ लुमता लुप्यते तस्मिन् यदङ्गं तस्य यत्कार्यं तन्न भवति ’ इत्युक्त्वा वार्तिककृदुक्तन्यासं निरस्तवान् भाष्यकारः । अङ्गस्य इत्यस्य स्वरितत्वाप्रतिज्ञानात्तत्र लुप्तप्रत्ययनिरूपिताङ्गसञ्ज्ञकस्य यत्कार्यं प्रत्ययनिमित्तमाङ्गमनाङ्गं वा तन्न भवतीत्यर्थः । तदयं निर्गलितोऽर्थः – त्रिसूत्र्यां शङ्कितस्यातिव्याप्तिदोषस्य वचनेनोद्धारमापातत उक्त्वा ज्ञापकेनैवेष्टसिद्धिरिति निष्कर्षोऽग्रे कृत इति ।

अयमत्राक्षेपः – ‘ परमवाचा, परमगोदुहा, परमलिहा, परमदण्डिना, परमदिवा, परमकुमार्या ’ इत्यादौ अन्तर्वर्तिनीं विभक्तिमाश्रित्य उत्तरखण्डस्य पदसञ्ज्ञायां यथाक्रमम् “ चोः कुः ”[1788] इति सूत्रेण कुत्वम्, “ दादेर्धातोर्घः ”[1789] इति सूत्रेण घत्वम्, “ हो ढः ”[1790] इति सूत्रेण ढत्वम्, “ न लोपः प्रातिपदिकान्तस्य ”[1791] इति सूत्रेण नकारलोपः, “ दिव उत् ”[1792] इति सूत्रेण उत्त्वम्, “ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ”[1793] इति सूत्रेण ह्रस्वः इत्येतानि कार्याणि कुतो न प्रवर्तन्ते ? अत्र भसञ्ज्ञया

[1787] शब्दकौस्तुभः – प्रकृतसूत्रे
[1788] अष्टाध्यायी – (8-2-30)
[1789] अष्टाध्यायी – (8-2-32)
[1790] अष्टाध्यायी – (8-2-31)
[1791] अष्टाध्यायी – (8-2-7)
[1792] अष्टाध्यायी – (6-1-129)
[1793] अष्टाध्यायी – (6-1-125)

पदसञ्ज्ञायाः बाधस्तु नास्ति । भिन्नावधिकत्वात् । भसञ्ज्ञा हि समुदायस्य भवति । पदसञ्ज्ञा तु उत्तरखण्डस्येति अवधिभेदात् । एवञ्च पूर्वोक्तेषूदाहरणेषु सर्वत्र दोषा आयान्त्येव इति ।

अत्र भाष्यकृत्समाधानम् – " यचि भम् "[1794] इति सूत्रे " सुप्तिङन्तं पदम् " इत्यतः सुबन्तमित्यनुवर्तनीयम् । तथा च यजादौ असर्वनामस्थाने परे यस्मात् प्रत्ययविधिस्तथा भूतः पूर्वः समुदायो भसञ्ज्ञो भवति तदवयवभूतं सुबन्तं यद्यस्ति तर्हि तदपि भसञ्ज्ञं भवति यजादौ परे इति सूत्रार्थः । एवञ्चात्र भसञ्ज्ञायाः सत्त्वेन पदसञ्ज्ञायाः अभावात् पूर्वोक्ता दोषाः वार्यन्ते । स्पष्टेयं रीतिः विस्तरेण प्रकृतसूत्रभाष्ये । इह च समुदायस्य भसञ्ज्ञा प्रधानशिष्टा, अवयवस्य त्वन्वाचयशिष्टा " कर्तुः क्यङ् सलोपश्च "[1795] इति हंसायते इत्यादाविव । तेन ' राज्ञः ' इत्यादौ सुबन्तावयवाभावेऽपि भवति, सुबन्तावयवसत्त्वे तु तस्य समुदायस्य चेत्युभयोरपि भवतीति विवेकः । नन्वेवमपि ' परमवाचौ, परमवाचः ' इत्यादौ भत्वाभावात् पदकार्यं स्यादेवेति चेत् ? न, तत्र भत्वाभावेऽपि असर्वनामस्थाने इति पदसञ्ज्ञानिषेधात् । " स्वादिष्वसर्वनामस्थाने " इत्यत्रापि हि सुबन्तमित्यनुवर्तते । प्रसज्यप्रतिषेधश्चायम् । तत्सामर्थ्यादनन्तरस्य विधिर्वेति न्यायो नाश्रीयते । तदयमर्थः – सर्वनामस्थाने परतः पूर्वः समुदायस्य " स्वादिष्वसर्वनामस्थाने " इति प्राप्ता, अवयवस्य तु " सुप्तिङन्तं पदम् " इति सूत्रेण प्राप्ता पदसञ्ज्ञाऽनेन निषिद्धेति ' परमवाचौ ' इत्यादि सिद्धम् । नन्वेवं ' सुवाक्, सुराजा ' इत्यादौ कुत्वादि न स्यात्, सावपि समुदायस्यावयवस्य च प्राप्तयोर्द्वयोरपि पदसञ्ज्ञयोर्निषेधादिति चेत् ? न, ' असर्वनामस्थाने ' इत्यत्रोत्तर-सूत्राद् ' यचि ' इत्यपकृष्य यजादौ सर्वनामस्थाने उभयविधपदसञ्ज्ञानिषेधात् । सौ तु द्विविधापि पदसञ्ज्ञा भवत्येवेति शब्दकौस्तुभे दीक्षितस्याशयः ।

नन्वेवं ' दूरान्मुक्तः ' इत्यादावलुक् न स्यात् ' होतापोतारौ ' इत्यादावनङ् च न स्यात्, उत्तरपदे तद्विधानादिति चेत् ? न, उत्तरपदशब्दस्य समासचरमावयवे रूढतया तत्र पदसञ्ज्ञाविरहेऽपि तत्प्रवृत्तेः । न चैवमपि ' दधिसेचौ, दधिसेचः ' इत्यत्र " सात्पदाद्योः "[1796] इति सूत्रेण षत्वनिषेधो न स्यादिति चेत् ? न, " सात्पदाद्योः " इत्यत्र ' पदादादिः पदादिः ' इति पञ्चमीसमासः आदिशब्द आद्यवयवबोधकः पदाव्यवहितपूर्वो यः समुदायः तदवयवस्य सस्य षत्वं न इत्यर्थकरणेन पदत्वस्य ' सेच् ' इति समुदायपर्याप्तत्वात् तदव्यवहितसमुदायघटकपूर्वसकारस्याभावेन न दोषः । पदोत्तरत्वे सति शब्दान्तरस्यादिरिति यावत् । न च ' रामेषु ' इत्यादावपि निषेधापत्तिः । " स्वादिष्वसर्वनामस्थाने " इति

[1794] अष्टाध्यायी – (1-4-18)

[1795] अष्टाध्यायी – (3-1-11)

[1796] अष्टाध्यायी – (8-3-111)

या पदसञ्ज्ञा तामादायोक्तनिषेधस्याप्रवृत्तेः। तत्र च सातिग्रहणस्यैव ज्ञापकत्वात्। उक्तञ्च पदादादेर्नेत्येव व्याख्यानं न तु पदस्यादेरिति। पदस्यादिरिति व्याख्याने ‘ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ’ इति सुबुत्पत्तेः प्रागेव समासे ‘ दधिसेक् ’ इत्यादौ षत्वस्य दुर्वारत्वात्। नन्वेवमपि ‘ बहुसेचौ, बहुसेचः ’ इत्यादौ षत्वं स्यादेव बहुचोऽपदत्वेन षत्वप्रतिषेधाप्राप्तेरिति चेत् ? सत्यम्, वचनमेवेह कर्तव्यम् – ‘ बहुच्पूर्वस्य न ’ इति। अत्रायं सूत्रन्यासः – ‘ सातेः ’ सः षत्वं न स्यात्। ततः ‘ बहुच्पदाभ्याम् ’ आभ्यामुत्तरस्य सस्य षत्वं न स्यात्। आदिग्रहणं न कर्तव्यम् “ तस्मादित्युत्तरस्य ” इत्येव सिद्धेः। तथा हि – पदादित्येव वाच्यम्। पदात् परस्य सस्य षत्वं न स्यादित्यर्थः। आदिपद-स्थाने च बहुच् प्रक्षेप्यः बहुचः परस्य सस्य न षत्वमिति।

वार्तिककृता तु ‘ परमवाचा ’ इत्यादिसाधनाय बहुवचनमेवारब्धम्। तदाह – ‘ उत्तरपदत्वे चापदादिविधौ ’ इति। उत्तरेत्यनेनोत्तरपदं गृह्यते। तस्य पदत्वे इति समासः। समासचरमावयवस्य पदसञ्ज्ञायां कर्तव्यायां लुमता लुप्ते प्रत्ययलक्षणं न भवति। ‘ दधिसेचौ ’ इत्यादावपि पदसञ्ज्ञानिषेध-वारणाय अपदादिविधाविति। पदादिविधौ तु कर्तव्ये भवत्येव प्रत्ययलक्षणमित्यर्थः। एवञ्च प्राक् सुबुत्पत्तेः समासोऽत्र नाभिधेयः। ‘ धनक्रीता ’ इत्यादिसिध्ये तदनित्यत्वस्वीकारात्।

कैयटस्त्वाह – ‘ दध्नः सेचौ ’ इति विग्रहे “ षष्ठी ”[1797] इति सूत्रेण षष्ठीसमासः नायमुपपदसमासः। अनभिधानाच्च सोपपदान्न विच्। अतो ‘ दधिषेचौ ’ इत्यादि न भवत्येव। अस्मिन्नपि पक्षे ‘ बहुच्पूर्वस्य च ’ इति वचनं कार्यमेव, बहुचि कृते विशिष्टस्यार्थवत्त्वेन प्रातिपदिकत्वे सुपो लुकि च कृते पुनर्विशिष्टात् सुबन्तरमुत्पद्यते इत्यर्थवत्सूत्रे वक्ष्यमाणत्वात्। तत्रान्तर्वर्तिविभक्त्या पदसञ्ज्ञामाश्रित्य प्राप्तं पदत्वम्, तत्कुत्वादौ कर्तव्ये मा भूत्, षत्वनिषेध एव यथा स्यादिति।

अत्रायं निष्कर्षः – “ प्रत्ययलोपे प्रत्ययलक्षणम् ” इति सूत्र एव ‘ उत्तरपदत्वे च पदादिविधौ ’, बहुच्पूर्वस्य च इति पठनीयम्। पदादिविधावेव प्रत्ययलक्षणं न तु पदान्तविधौ इति नियमार्थं चेदं वाक्यद्वयमिति व्याख्येयम्। एवञ्च नञ् न कर्तव्य इति लाघवम्। अस्मिन्पक्षे सौ पदत्वमपि नास्ति। पूर्वोक्तप्रकारस्यानादरणात्। तदेतत्पक्षद्वयमभिप्रेत्य हल्ङ्यादिसूत्रे भाष्यकारैरुक्तम् – अथ सावपि पदं भवति।

[1797] अष्टाध्यायी – (2-2-8)

अथ “ चिणो लुक् ”[1798] इति सूत्रेण तलोपे कृते ‘ अवधि भवता दस्युः ’, ‘ अगायि भवता ग्रामः ’, ‘ अध्यगायि भवता अनुवाकः ’ इत्यादौ “ हनो वध लिङि ”[1799], “ लुङि च ”[1800], “ इणो गा लुङि ”[1801], “ इङश्च ”[1802], “ विभाषा लुङ्लृङोः ”[1803] इति हनि णिङादेशा न स्युरिति चेन्न, लुङि, यदार्धधातुकं तस्मिन् विषये तेषां विधानाद् लादेशात् प्रागेव तेषां प्रवृत्तेः, तस्माद् वस्तुतोऽङ्गस्य कार्यं न भवतीति सिद्धान्तः[1804]।

अस्यायं भावः – ‘ अत्र वधाद्यादेशा हि वस्तुतो लुङि परे न विधीयन्ते, किन्तु लुङ्परं यदार्धधातुकं तस्मिन् परे हि ते विधीयन्ते। एवञ्च यस्मिन् परे विधीयन्ते आर्धधातुके न तल्लुप्तम्, यश्च लुमता लुप्तः प्रत्ययो लुङ्, न तस्मिन् परे विधीयन्ते – इति नास्ति दोषः। किञ्च लुप्तप्रत्ययनिमित्तकाङ्ग-सम्बन्धिकार्यस्य प्रत्यासत्त्या निषेधादपि नास्त्यत्र कश्चन दोषः। तथा हि – लुमता लुप्तो यः प्रत्ययः – लुङ्, तस्मिन् यदङ्गं चिणन्तं न तस्य कार्यम् (वधाद्यादेशाः), यस्य चाङ्गस्य हनादेस्तत्कार्यम्, न तत् लुप्तप्रत्ययनिमित्तकाङ्गम् – इति नास्ति निषेधावसरः ’[1805]। भाष्येऽपि प्रोक्तम् – ‘ नैष दोषः। न लुङीति हनिणिङादेशा उच्यन्ते। किं तर्हि ? आर्धधातुक इति। तद्विशेषणं लुङ् ग्रहणम्।’[1806] सर्वमेतत् सङ्गृह्योक्तं हरदत्तेन पदमञ्जर्याम् – ‘ यद्यनाङ्गमपि प्रतिषिध्यते, ‘ अवधि भवता दस्युः ’, ‘ अगायि भवता ग्रामः ’, ‘ अध्यगायि भवता अनुवाकः ’ लुङि परतोऽङ्गस्य विधीयमाना हनिणिङादेशाः “ चिणो लुक् ” इति लुङो लुकि न स्युः। न लुङि हनिणिङादेशाः विधीयन्ते, किं तर्हि ? लुङि यदार्धधातुकं तत्र। ततश्च लुङि यदङ्गं चिणन्तं न तस्य हनिणिङादेशाः, यस्य च ते, न तल्लुक्यङ्गमिति निषेधाभावः ’[1807]।

- **अचोऽन्त्यादि टि – (1-1-63)**

[1798] अष्टाध्यायी – (6-4-104)
[1799] अष्टाध्यायी – (2-4-42)
[1800] अष्टाध्यायी – (2-4-43)
[1801] अष्टाध्यायी – (2-4-45)
[1802] अष्टाध्यायी – (2-4-48)
[1803] अष्टाध्यायी – (2-4-50)
[1804] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे
[1805] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे
[1806] भाष्यम् – प्रकृतसूत्रे
[1807] काशिका – पदमञ्जरी – प्रकृतसूत्रे

सूत्रार्थः – अन्ते भवः इति अन्त्यः, “ दिगादिभ्यो यत् ”[1808] इति सूत्रेण यत्प्रत्ययः । अन्त्य आदिः यस्य तद् अन्त्यादि, बहुव्रीहिः । अचां मध्ये योऽन्त्योऽच्, स आदिर्यस्य समुदायस्य, स टिसञ्ज्ञको भवति । उदाहरणञ्च – ‘ अग्निचित्, सोमसुत् ’ इत्यत्र इत्-उत् शब्दौ । पचेते, पचेथे ।

अत्र ‘ अचः ’ इति न पञ्चम्यन्तम्, किन्तु “ यतश्च निर्धारणम् ”[1809] इति विहितषष्ठ्यन्तम् । यद्यपि ‘ तिरोहितावयवभेदविवक्षया निर्धारणविषये एकवचनं त्वसाध्विति ’ “ कारके ”[1810] इति सूत्रे भाष्ये स्पष्टम् । तत्र हि ‘ निर्धारणे कारकेष्विति ब्रूयादित्युक्तम् ’ इति वक्ष्यमाणत्वेन निर्धारणस्य अनेकापेक्षत्वात् ‘ अचः ’ इत्येकवचनानुपपत्तिरिति चेन्न, बहुवचनस्यौचित्येऽपि सौत्रत्वादेकवचनं जातिगतैकत्वविवक्षणाद्वा ।

ननु चान्त्यशब्दस्य अन्त्यावयववाचकत्वेन ‘ अचः ’ इति अवयविनि साकाङ्क्षतया साकाङ्क्षमसमर्थमिति रीत्या असमर्थत्वात् ‘ अन्त्य आदिर्यस्य ’ इति बहुव्रीहिसमास आदिशब्देन सह न प्राप्नोति, नैष दोषः, ‘ गुरोः कुलं गुरुकुलम् ’ इत्यत्र यथा गुरुत्वस्य यत्किञ्चिन्निरूपितत्वेन नित्यसाकाङ्क्षतया ‘ देवदत्तस्य गुरुकुलम् ’ अत्र समस्तैकदेशपदार्थेऽपि देवदत्तस्यान्वयो भवति, तथैव इहापि अवयवत्वस्य यत्किञ्चिन्निरूपितस्यैव सम्भवेन नित्यसाकाङ्क्षस्यापि समासः । ‘ सविशेषणानां वृत्तिर्न ’, ‘ पदार्थः पदार्थेनान्वेति ’ इति नियमो नित्यसाकाङ्क्षेतरविषयकः । ‘ कथं पुनरजित्येष विशेषो लभ्यते, यावता नेह द्वितीयमज्ग्रहणम्, नापि प्रकृतम् ? एवं मन्यते – समानजातीयस्यैव लोके निर्धारणं प्रसिद्धम् । तथा हि, कृष्णा गवां सम्पन्नक्षीरतमा इति द्वितीयं गोशब्दमन्तरेणापि गौरेव प्रतीयते । तस्मादिहापि यद्यपि द्वितीयमज्ग्रहणं नास्ति, तथापि समानजातीयोऽजेव निर्धार्यमाणोऽवसीयते इति ’[1811] । अत एव अचां मध्ये योऽन्त्योऽच्, स आदिर्यस्य समुदायस्य, स टिसञ्ज्ञको भवतीति सूत्रार्थः निष्पन्नः । यत्र तु हलन्तस्तत्र तद्विशिष्टस्यैव सञ्ज्ञा । तेन ‘ पचते ’ इत्यत्र अकारस्य, ‘ पचेते ’ इत्यत्र च आकारमकारयोरेत्वम् ।

- **टिसञ्ज्ञाप्रदेशाः**

1. टित आत्मनेपदानां टेरे – (3-4-79)

टितो लस्यात्मनेपदानां टेरेत्वं स्यात् । उदाहरणम् – एधते, एधेते, एधन्ते ।

[1808] अष्टाध्यायी – (4-3-54)

[1809] अष्टाध्यायी – (2-3-41)

[1810] अष्टाध्यायी – (1-4-23)

[1811] काशिका – न्यासः – प्रकृतसूत्रे

2. तुन्दिवलिवटेर्भः – (5-2-139)

एतेभ्यो मत्वर्थे भप्रत्ययः प्रत्ययः स्यात् । उदाहरणम् – तुन्दिभः, वलिभः, वटिभः ।

3. अव्ययसर्वनाम्नामकच् प्राक् टेः – (5-3-71)

अव्ययसर्वनाम्नां तिङन्तानां च टेः प्रागकच् स्यात्, न तु कः । उदाहरणम् – उच्चकैः, सर्वके, पचतकि ।

4. विष्वग्देवयोश्चच टेरद्र्यञ्चतौ वप्रत्यये – (6-3-92)

अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यादप्रत्ययान्तेऽञ्चतौ परे । उदाहरणम् – विष्वद्र्यङ्, देवद्र्यङ, तद्र्यङ, अमुमुयङ् ।

5. टेः – (6-4-143)

डिति परे भस्य टेर्लोपः । उदाहरणम् – अदूरत्रिंशाः, अधिकचत्वारिंशाः ।

6. नस्तद्धिते – (6-4-144)

नान्तस्य भस्य टेर्लोपः तद्धिते । उदाहरणम् – उपराजम्, अध्यात्मम् ।

7. अह्नष्टखोरेव – (6-4-145)

एतयोरेव परतोऽह्नष्टिलोपः । उदाहरणम् – उत्तमाहः, द्व्यहीनः ।

8. टेः – (6-4-155)

भस्य टेर्लोपः स्यादिष्ठेमेयस्सु । उदाहरणम् – पटिष्ठः, पटिमा, पटीयान् ।

9. भस्य टेर्लोपः – (7-1-88)

भसञ्ज्ञकस्य पथ्यादेष्टेर्लोपः स्यात् । उदाहरणम् – पथः, मथः, ऋभुक्षः ।

10. वाक्यस्य टेः प्लुत उदात्तः – (8-2-82)

वाक्यस्य टेः पदावयवस्य प्लुतो भवति, स चोदात्तः । उदाहरणम् – आगच्छ कृष्ण३ अत्र गौश्चरति ।

11. प्रत्यभिवादे अशूद्रे – (8-2-83)

अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात्, स चोदात्तः । उदाहरणम् – आयुष्यमान् भव देवदत्त३ ।

12. दूरात् हूते च – (8-2-84)

दूरात् सम्बोधने यद्वाक्यं तस्य टेः प्लुतः स्यात् । उदाहरणम् – सक्तून् पिब देवदत्त३ ।

13. हैहेप्रयोगे हैहयोः – (8-2-85)

एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात्। उदाहरणम् – है३ राम, राम हे३।

14. गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् – (8-2-86)

दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात्। उदाहरणम् – आयुष्मान् भव दे३वदत्त, देवद३त्त, देवदत्त३।

15. ओमभ्यादाने – (8-2-87)

ओम्शब्दस्य प्लुतः स्यादारम्भे। उदाहरणम् – ओ३म् अग्निमीळे पुरोहितम्।

16. ये यज्ञकर्मणि – (8-2-88)

ये इत्यस्य यज्ञकर्मणि प्लुतः। उदाहरणम् – ये३ यजामहे।

17. प्रणवष्टेः – (8-2-89)

यज्ञकर्मणि टेरोमित्यादेशः स्यात्, स च प्लुतोदात्तः। उदाहरणम् – अपां रेतांसि जिन्वतो३म्।

18. याज्यान्तः – (8-2-90)

ये याज्या मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि। उदाहरणम् – जिह्वामग्ने चकृषे हव्यवाहा३म्
।

19. निगृह्य अनुयोगे च – (8-2-94)

निगृह्यानुयोगे यद्वाक्यं तस्य टेः प्लुतो वा। उदाहरणम् – अनित्यः शब्द इत्यात्थ३, अनित्यः शब्द इत्यात्थ।

20. विचार्यमाणानाम् – (8-2-97)

विचार्यमाणानां वाक्यानां टेः प्लुतः छन्दसि। उदाहरणम् – होतव्यं दीक्षितस्य गृहा३इ, न होतव्य३मिति।

21. प्रतिश्रवणे च – (8-2-99)

वाक्यस्य टेः प्लुतः स्यात्। उदाहरणम् – दत्त३ किमात्थ।

22. चिदिति चोपमार्थे प्रयुज्यमाने – (8-2-101)

चिदित्येतन्निपाते उपमानेऽर्थे प्रयुज्यमाने वाक्यस्य टेरनुदात्तः प्लुतः। उदाहरणम् – अग्निचिद्भाया३त्।

23. उपरिस्विदासीदिति च – (8-2-102)

टेः प्लुतोऽनुदात्तः। उदाहरणम् – अधः स्विदासी३दुपरि स्विदासी३त्।

- **अलोऽन्त्यात् पूर्व उपधा – (1-1-64)**

सूत्रार्थः – अन्त्याद् अलः पूर्वो योऽल्, स उपधा सञ्ज्ञको भवति। उदाहरणञ्च – भेत्ता, छेत्ता।

सूत्रमिदमुपधासञ्ज्ञाविधायकं भवति। ‘ अलः, अन्त्यात्, पूर्वः, उपधा ’ इति पदविभागः। ‘ अलः ’ इति, पञ्चम्यन्तम् ‘ अन्त्यात् ’ इति पञ्चम्यन्तविशेषणात्। ‘ अल्ग्रहणस्यान्त्यविशेषणत्वे एव ‘ अलोऽन्त्यात्पूर्व ’ इति निर्देशो युज्येत, पूर्वविशेषणत्वे त्वसन्देहाय ‘ अन्त्यात्पूर्वोऽलः ’ इत्येव निर्दिशेदित्याशयः ’[1812]। ‘ अल् ’ इति वर्णपर्यायः।

सूत्रेऽस्मिन् पूर्वस्याविशेषितत्वात् शास्धातौ ‘ शा ’ इति समुदायस्योपधासञ्ज्ञापत्तिः। तथा च “ शास इदङ्गहलोः ”[1813] इति सूत्रेण विधायमानमित्वं ‘ शा ’ इति समुदायस्य स्यादिति चेन्न, समुदायस्योपधात्वेऽपि “ अलोऽन्त्यस्य ”[1814] इति सूत्रेणाकारस्यैव स्थाने इत्वस्य प्रवृत्त्या दोषाभावात्। अत्र च ‘ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ’ इति परिभाषया “ अलोऽन्त्यस्य ” इति सूत्रं बाध्यते। तेन अनर्थके ‘ शा ’ इति समुदाये “ अलोऽन्त्यस्य ” इति सूत्रस्य कथं वा प्रवृत्तिरिति तु न शङ्कनीयम्। “ आदिर्ञिटुडवः ”[1815] इति सूत्रेण ञिटुडूनामित्वे “ तस्य लोपः ” इति सूत्रेण सर्वलोपसिद्ध्यर्थम् ‘ तस्य ’ ग्रहणस्यावश्यकत्वेन सूत्रकारमते ‘ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ’ इति परिभाषाया अप्रवृत्तेः। भाष्यकारमतेऽपि चैतत्परिभाषाप्रयोजनानामन्यथासिद्धत्वादस्य अनावश्यकतोक्ता। तथा चोक्तं सर्वमिदं विस्तरेण प्रकृतसूत्रभाष्ये – ‘ तस्मान्नार्थोऽनया परिभाषया ’[1816] इति। अत एव ‘ शा ’ इत्यनर्थकेऽपि “ अलोऽन्त्यस्य ” इति सूत्रं प्रवर्तत एव।

ननु यदि पूर्वोक्तरीत्या सूत्रकारमते भाष्यकारमते च ‘ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ’ इति परिभाषायाः अनावश्यकत्वमुच्यते तर्हि ‘ विभाषा भवद्भगवदघवतामोच्चावस्य ’ इति वार्तिकविषये दोष आयाति। तथाहि – वार्तिकमिदं “ मतुवसोरुसम्बद्धौ छन्दसि ”[1817] इति सूत्रभाष्ये विद्यते। छन्दसि भाषायाञ्च ‘ भवत्, भगवत्, अघवत् ’ इत्येतेषां विभाषा रुर्वक्तव्यः ओकारादेशश्च अवस्य वक्तव्यः इति तद्वार्तिकार्थः। उदाहरणञ्च ‘ भोः, भवन्, भगोः, भगवन्, अघोः, अघवन् ’ इति। एवञ्च पूर्वोक्त-परिभाषाया अभावे प्रकृतवार्तिकेन विधीयमान ओकारादेशः “ अलोऽन्त्यस्य ” इति सूत्रेणान्त्यस्य

[1812] भाष्यम् – उद्द्योतः – प्रकृतसूत्रे

[1813] अष्टाध्यायी – (6-4-34)

[1814] अष्टाध्यायी – (1-1-52)

[1815] अष्टाध्यायी – (1-3-5)

[1816] भाष्यम् – प्रकृतसूत्रे

[1817] अष्टाध्यायी – (8-3-1)

स्थाने स्यात् । तथा चाभीष्टं रूपं न सिध्येदिति चेन्न, वार्तिके ' वस्य ' इत्येव सिद्धे ' अवस्य ' इति गुरुभूतनिर्देशसामर्थ्यात्सर्वादेशसिद्धेः । तस्मान्नानर्थक इति परिभाषा निष्फला सूत्रभाष्यसम्मता चेति स्थितम् ।

किञ्चान्त्यवर्णात् पूर्वस्याविशेषितत्वेन समुदायस्य सञ्ज्ञा प्राप्नोतीति दोषः प्रकारान्तरेणापि वारयितुं शक्यः । यथा – अवध्यवधिमद्भावः सजातीयानामेव भवति । अन्त्यस्यालोऽवधित्वेनावधिमान् पूर्वोऽपि अल एवेति भावः । लौकिकोऽयं दृष्टान्तो यथा – ' अमीषां ब्राह्मणानान्त्यात्पूर्वमानय ' इत्युक्तेऽन्त्यादव्यवहितपूर्वः एक एवानीयते, न तु समुदायः । तद्वत् इहापि शास्त्रेऽन्त्यादलः पूर्व इत्युक्तेऽव्यवहितपूर्वोऽलेव सञ्ज्ञी न तु व्यवहितोऽल्, नापि समुदायः । अतो न दोषः । संयोगोपधाव्यवहारस्तु भाक्तः, अवयवधर्मस्य समुदाये उपचारात् । एवं स्थितेऽल इति जसन्तमपि सुवचनम् । " जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्ययाम् "[1818] इति सूत्रेण बहुवचनम् । पूर्व इत्यपि जसन्तम् । अन्त्योऽप्यलेव साजात्याल्लभ्यते ।

यद्वा ' अलः ' इति निर्धारणे षष्ठी । जातौ चैकवचनम् । अलां मध्येऽन्त्यात्पूर्व इत्युक्तेऽलेव भवतीत्यपि वक्तुं शक्यत्वान्न पूर्वोक्तदोषावसरः । तथा चेहाल इति जस्ङसिर्ङस् वेति पक्षत्रयमपि स्थितमिति शब्दकौस्तुभे प्रोक्तवान् दीक्षितः ।

- **उपधासञ्ज्ञाप्रदेशाः**

1. उत् उपधात् भावादिकर्मणोः अन्यतरस्याम् – (1-2-21)
2. न उपधात् थफान्तात् वा – (1-2-23)
3. तद्वान् आसाम् उपधानः मन्त्रः इति इष्टकासु लुक् च मतोः – (4-4-125)
4. अश्विमान् अण् – (4-4-126)
5. न उपधायाः – (6-4-7)
6. सर्वनामस्थाने च असम्बुद्धौ – (6-4-8)
7. वा ष पूर्वस्य निगमे – (6-4-9)
8. सान्त महतः संयोगस्य – (6-4-10)
9. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् – (6-4-11)
10. इन्हन्पूषार्यम्णां शौ – (6-4-12)

[1818] अष्टाध्यायी – (1-2-58)

11. सौ च – (6-4-13)

12. अतु असन्तस्य च अधातोः – (6-4-14)

13. अनुनासिकस्य क्वि झलोः क्ङिति – (6-4-15)

14. अच् हन् गमां सनि – (6-4-16)

15. तनोतेः विभाषा – (6-4-17)

16. क्रमः च क्त्वि – (6-4-18)

17. अनिदितां हलः उपधायाः क्ङिति – (6-4-24)

18. दंशसञ्जस्वञ्जां शपि – (6-4-25)

19. रञ्जेः च – (6-4-26)

20. घञि च भावकरणयोः – (6-4-27)

21. स्यदः जवे – (6-4-28)

22. अवोदैधौद्मप्रश्रथहिमश्रथाः – (6-4-29)

23. न अञ्चेः पूजायाम् – (6-4-30)

24. क्त्वि स्कन्दिस्यन्दोः – (6-4-31)

25. जान्तनशां विभाषा – (6-4-32)

26. भञ्जेः च चिणि – (6-4-33)

27. शासः इत् अङ्हलोः – (6-4-34)

28. ऊत् उपधायाः गोहः – (6-4-89)

29. दोषः णौ – (6-4-90)

30. वा चित्तविरागे – (6-4-91)

31. मितां ह्रस्वः – (6-4-92)

32. चिण् णमुलोः दीर्घः अन्यतरस्याम् – (6-4-93)

33. खचि ह्रस्वः – (6-4-94)

34. ह्लादेः निष्ठायाम् – (6-4-95)

35. छादेः घेः अद्व्युपसर्गस्य – (6-4-96)

36. इस् मन्त्रन्क्विषु च – (6-4-97)

37. गमहनजनखनघसां लोपः क्ङिति अनङि – (6-4-98)

38. तनि पत्योः छन्दसि – (6-4-99)

39. घसि भसोः हलि च – (6-4-100)

40. सूर्यतिष्यागस्त्यमत्स्यानां यः उपधायाः – (6-4-149)

41. हलः तद्धितस्य – (6-4-150)

42. उपधायाः च – (7-1-101)

43. अतः उपधायाः – (7-2-116)

44. णौ चङि उपधायाः ह्रस्वः – (7-4-1)

45. न अग्लोपिशास्वृदिताम् – (7-4-2)

46. भ्राजभासभाषदीपजीवमीलपीडाम् अन्यतरस्याम् – (7-4-3)

47. लोपः पिबतेः इत् च अभ्यासस्य – (7-4-4)

48. तिष्ठतेः इत् – (7-4-5)

49. जिघ्रतेः वा – (7-4-6)

50. उः ऋत् – (7-4-7)

51. नित्यं छन्दसि – (7-4-8)

52. मात् उपधायाः च मतोः वः अयवादिभ्यः – (8-2-9)

- **तस्मिन्निति निर्दिष्टे पूर्वस्य – (1-1- 65)**

सूत्रार्थः – तस्मिन्निति = सप्तम्या विभक्त्या निर्दिष्टे सति पूर्वस्यैव कार्यं भवति । इहापि इति करणोऽर्थनिर्देशार्थः । तेन तस्मिन् इति पदेन सप्तम्यर्थो गृह्यते, न तु तस्मिन् इति शब्दः । उदाहरणानि च – दध्युदकम्, मध्विदम्, पचत्योदनम् ।

सूत्रेऽस्मिन् तस्मिन्, इति, निर्दिष्टे, पूर्वस्य – इत्येवं चत्वारि पदानि सन्ति । अत्र सूत्रे तच्छब्दस्य स्वतन्त्रस्य निर्देशो न तु अनुकरणस्य तस्य । तथा चोक्तं पदमञ्जर्याम् – ‘ स्वतन्त्रस्य सर्वनाम्नोऽयं निर्देशः.......न त्वनुकरणम् ’[1819] इति । परन्तु दीक्षितेनोक्तं प्रौढमनोरमायाम् – ‘ तस्मिन्निति सप्तम्यन्तानामनुकरणम् ’[1820] इति । अनुकरणं प्रायेण इति - पदप्रयोगापेक्षणेन परतन्त्रम् । ननु सूत्रे

[1819] काशिकाव्याख्या – पदमञ्जरी – प्रकृतसूत्रे

[1820] प्रौढमनोरमा – प्रकृतसूत्रे

इतिकरणेन ‘ तस्मिन् ’ इत्यस्यानुकरणमेव स्यात्तर्हि अनुकरणमनुकार्यगतवर्णसमानानुपूर्वीकस्यैवात्र शास्त्रे प्रायशो दर्शनेन तु ‘ तस्मिन् ’ इत्यानुपूर्वी यत्र तत्रेदं परिभाषासूत्रं प्रवर्तेत। ततश्च “ तस्मिन्नणि च युष्माकास्माकौ ”[1821] इत्यादावेव तदानुपूर्व्याः श्रवणेन अत्रैवास्य सूत्रस्य प्रवृत्तिः स्यात्, न तु “ इको यणचि ”[1822] इत्यादौ, तत्र तादृशानुपूर्वीरूपस्य श्रवणाभावात्। एवं सति ‘ हे यौष्माकीण अस्मभ्यं देहि ’ इत्यत्र खञः परस्य अस्मच्छब्दस्य अस्माकादेशस्य व्यावृत्तिः सूत्रोपस्थितेः फलं स्यात्, नान्यत्र किञ्चित् फलमिति । अतश्चास्मिन् सूत्रे तदिति स्वतन्त्रः सर्वनामशब्दः न तु तस्यानुकरणत्वम् । तस्मिन्नितीति सूत्रे तच्छब्देन ‘ अचि ’ इत्यादीनि सप्तम्यन्तपदानि परामृश्यन्ते । ततश्च शब्दपदार्थकत्वेनानुकरणसाम्यात् मनोरमायां भट्टोजिदीक्षितेन सप्तम्यन्तानामनुकरणमित्युक्तं तदापाततः रमणीयम्।

स्वतन्त्रस्तच्छब्दस्तु बुद्धिस्थमर्थं परामृशति, बुद्धिविषयतावच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्ने तत्पदस्य शक्तेः स्वीकारात्। प्रकृते सप्तम्यन्तं बुद्धिस्थतया तदुपलक्षितं सप्तम्यन्तं पदमर्थः। ईदृशस्यैवात्र सूत्रे तत्पदेनाभिधानमिति बोधयितुं सप्तमीविभक्त्या निर्देशः कृतः[1823] । ‘ इतिकरणः क्रियते सोऽर्थनिर्देशार्थो भविष्यति ’[1824] इति। वाक्यमिदं महाभाष्ये “ नवेति विभाषा ”[1825] इति सूत्रे प्रयुक्तम्। तथा चोक्तं तत्त्वबोधिनीकारेण “ नवेति विभाषा ” इति सूत्रस्य व्याख्यावसरे – ‘ तथाहि - लोके ह्यर्थप्रधानः शब्दः, ‘ गौरित्याह ’ इत्यादौ तु शब्दस्वरूपपरः संपद्यते।

व्याकरणे तु “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ”[1826] इति परिभाषणात्स्वरूपपरत्वमौत्सर्गिकम्। इतिशब्दसमभिव्याहारे त्वर्थपरतेति विशेषः। इदमेवेतिशब्दस्य पदार्थविपर्यासकत्वं नाम ’[1827]। अर्थात् – तत्र लोके शब्दस्यार्थप्रत्यायनार्थं प्रयुक्तत्वादितिशब्दप्रयोग आनुपूर्वीविशिष्टं शब्दस्वरूपमेव प्रत्याययति। व्याकरणशास्त्रे तु “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ” इति सूत्रप्रामाण्यादानुपूर्वीविशिष्टं शब्दस्वरूपं विशेष्यम् । अतो विवक्षावशात् शब्दस्य कदाचिद्विशेषणतया कदाचिच्च विशेष्यतयाप्युपस्थितिः। यदा ‘ गामानय ’ इत्यादौ शब्दस्य विशेषणतयोपस्थितिस्तदा क्रियान्वयं न

[1821] अष्टाध्यायी – (4-3-2)

[1822] अष्टाध्यायी – (6-1-76)

[1823] लघुशब्देन्दुशेखरः – राधिकाटीका – प्रकृतसूत्रे

[1824] भाष्यम् – नवेति विभाषा – (1-1-44) इति सूत्रे

[1825] अष्टाध्यायी – (1-1-44)

[1826] अष्टाध्यायी – (1-1-68)

[1827] तत्त्वबोधिनी – नवेति विभाषा – (1-1-44) इति सूत्रे

लभते । यदा तु ‘ शब्दं शृणु ’, ‘ विष्णुमुच्चारय ’ इत्यादौ शब्दस्य विशेष्यतयोपस्थितिस्तदा शब्दः क्रियान्वयं लभते । लोके तावद् विवक्षावशादुभयथा व्यवस्था । व्याकरणशास्त्रे तु “ अग्नेर्ढक् ”[1828] इत्यादौ “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ” इति सूत्रानुसारेण सर्वत्र शब्दस्य विशेष्यतयैवोपस्थितिः, अर्थस्य विशेषणतयेति विवेकः । तत्र लोकेऽर्थो विशेष्यः, शब्दे कार्यस्यानन्वयात्, व्याकरणशास्त्रे तु शब्दो विशेष्यः, अर्थे कार्यस्य बाधादिति भावः । परञ्च तत्र इतिशब्दप्रयोगेण विपर्यासादर्थस्य बोध इति ‘ इति ’ शब्दस्यार्थविपर्यासकत्वम् ।

तच्छब्देन “ इको यणचि ” इत्यत्र सप्तम्यन्तं पदम् ‘ अचि ’ इति बोध्यते । इतिकरणेन विपर्यासात्सप्तम्यन्तपदस्यार्थः, अकारादयः स्वराः गृह्यन्ते । इतिकरणेन तच्छब्दस्य बुद्धिस्थ-परामर्शकत्वात् सप्तम्यन्तपदमेवार्थः । इतिशब्दाभावे शब्दशास्त्रे शब्दस्यैव प्राधान्यात् सप्तम्यन्तात्मक-शब्दपरामर्शकतैव स्यात् । तथा सति “ डः सि धुट् ”[1829], “ नेड् वशि कृति ”[1830] इत्यादौ आपद्येत । पदार्थविपर्यासग्राहकेतिशब्दसत्त्वे तु तत्पदबोध्यं यत् ‘ अचि ’ इत्यादिसप्तम्यन्तं पदं तदर्थः सिद्ध्यति अतो न दोषः ।

अत्रैव सूत्रे प्रौढमनोरमाव्याख्यारत्नप्रकाशिकायां महामहोपाध्यायभैरवमिश्रोऽप्याह – ‘ तस्मिन्निति प्रकृतसूत्रस्थतच्छब्दो बुद्धिस्थपरामर्शकः । सर्वनाम्ना प्रक्रान्तार्थपरामर्शकत्वमेवेति न नियमः । तथा च यत्र सप्तम्यर्थबोधस्तत्रैवास्योपस्थितिः । यत्र सूत्रे सप्तम्यन्तपदोपादानन्तत्रास्य सूत्रस्य प्रवृत्तिरिति तु न, “ नेड् वशि कृति ”, “ डः सि धुट् ”, “ तस्मान्नुडचि ”[1831] इत्यादावस्य प्रवृत्त्यदर्शनात् । एतेन यत्रास्य प्रवृत्तिरभिप्रेता, तेषां सङ्ग्रहाय सप्तमी निर्दिष्टा इत्येवास्त्विति निरस्तम् ।

एवञ्च सप्तम्यन्तार्थेऽव्यवहितोच्चारिते पूर्वस्य कार्यमिति वाच्योऽर्थः । तथा च सप्तम्यन्तपञ्चम्यन्त-पदयोरर्थोपस्थितिर्यत्र तत्र तद्रूपलिङ्गतद्भावात् तस्मिन्नित्यादिपरिभाषाद्वयस्य यथायथमुस्थितिरिति सिद्धम् ’[1832] ।

[1828] अष्टाध्यायी – (4-2-33)

[1829] अष्टाध्यायी – (8-3-29)

[1830] अष्टाध्यायी – (7-2-8)

[1831] अष्टाध्यायी – (6-3-74)

[1832] प्रौढमनोरमा – रत्नप्रकाशिका – प्रकृतसूत्रे

‘ सप्तम्यन्तपदार्थोच्चारणेन विधियमानं कार्यमित्युक्त्या यत्र सप्तम्यन्तपदार्थः शब्दभिन्नस्तत्र नास्या उपस्थितिः, शब्दभिन्नस्य अर्थस्य उच्चारणासम्भवात् । तेन “ जनपदे लुप् ”[1833], “ हरतेर्दृतिनाथयोः पशौ ”[1834] इत्यादौ नास्योपस्थितिः, सप्तम्यन्तार्थस्य शब्दभिन्नत्वात् ’[1835] ।

शब्दस्य द्वौ अर्थौ एकः स्वरूपमानुपूर्वीविशिष्टम्, अपरश्च अर्थक्रियाकारित्वविशिष्टो घटपटादिः । शब्दो हि शक्त्याद्यन्यतमया वृत्त्या अर्थस्य बोधको भवति, अत एव शब्दे वृत्तिमत्त्वं नाम अर्थवत्त्वं विद्यत इति शास्त्रज्ञा ब्रुवते । परं न केवलं शब्देन गवादिरूपेण सास्नालाङ्गूलककुदखुरविषाणिरूपपशु-विशेषात्मकपिण्डरूपोऽर्थ एव प्रत्याय्यते, किन्तु शब्देन आत्म (वर्णानुपूर्वीविशेषात्मकशब्दस्वरूपम्) अपि प्रत्याय्यते । तत्र लोके प्रायः ‘ गामानय ’ इत्यादिव्यवहारे गवादिपदार्थस्य सास्नादिमत्पिण्डरूप-पदार्थस्यैवानयनादिक्रियायामन्वयसम्भवात् शब्दस्वरूपस्य च तदसम्भवाद् अर्थो विशेष्यो भवति, शब्दश्च तस्य विशेषणरूपेण तिष्ठति, शब्दविशिष्टस्यार्थस्य शब्देनोपस्थितिरिति यावत् । क्वचित्तु ‘ विष्णुमुच्चारय ’ इत्यादौ विष्णुपदवाच्यस्य शङ्खचक्रपद्मादिधररूपदेवविशेष्यस्योच्चारणासम्भवात् शब्दस्वरूपस्य च तत्सम्भवात् शब्द एव विशेष्योऽर्थ एव च विशेषणम्, अतश्च तत्रार्थविशिष्टशब्दस्य शब्देनोपस्थितिरिति मन्तव्यम् ।

एवञ्च शब्दात् क्वचित् शब्दविशिष्टार्थोपस्थितिः, क्वचिच्चार्थविशिष्टशब्दोपस्थितिरिति शब्दजन्योपस्थितेर्द्वैविध्यं सिद्धम् । शब्दात् परः प्रयुज्यमान इतिशब्दश्चास्ति अर्थविपर्यासकृत् । तथाहि – यत्र इतिना विना शब्दविशिष्टार्थोपस्थितिस्तत्र इतिशब्दप्रयोगे विपर्यासेनार्थविशिष्ट-शब्दोपस्थितिर्जायते, यथा – ‘ गवित्ययमाह ’ इत्यादौ । तत्र इतिशब्दपरेण गोशब्देन विशेष्यतया स्वरूपमेव प्रत्याय्यते । अस्मिन् व्याकरणशास्त्रे तु शास्त्रविहितानि यानि प्रकृतिप्रत्ययविकारागमादि-रूपाणि कार्याणि, तेषामर्थेऽसम्भवात् शब्दस्वरूपमेव शब्देन विशेष्यतया प्रत्याय्यते, अर्थस्तु तत्र विशेषणतयोपतिष्ठते, तस्य विशेषणतया शब्देऽन्वयसम्भवात् सर्वथा परित्यागे मानाभावात् । अत एव परिभाषाऽप्यस्ति – ‘ अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ’ इति । यथा – “ अग्नेर्ढक् ” इत्यनेन विहितो ढक्प्रत्ययः अग्निपदवाच्यादर्थाद् ज्वालामालारूपात्परो भवितुं नार्हति, प्रत्ययस्यार्थेन पौर्वापर्यासम्भवात् लक्ष्यासिद्धेश्च, किन्तु ‘ अग्नि ’ इति स्वरूपात् पर एव स भवितुमर्हति योग्यतया, ‘ आग्नेय ’ इति लक्ष्यसिद्धेश्च । एवं स्थिते व्याकरणशास्त्रे शब्देनार्थविशिष्टस्वरूपोपस्थितिरिति सिद्धम् ।

[1833] अष्टाध्यायी – (4-2-81)

[1834] अष्टाध्यायी – (3-2-25)

[1835] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटाका – प्रकृतसूत्रे

तथा चैतदर्थावबोधकं पाणिनीयं सूत्रमप्यस्ति – " स्वं रूपं शब्दस्याशब्दसञ्ज्ञा " इति व्याकरणशास्त्रे विहिता या वृद्ध्यादिसञ्ज्ञाः, ता विहाय शब्दस्य स्वं रूपमेव सञ्ज्ञि इति हि सूत्रार्थः । अत्र सूत्रे स्वशब्देनात्मीयवाचिनाऽर्थो गृह्यते, रूपशब्देन च शब्दस्वरूपम्, तत्रोक्तयुक्तेरर्थस्य विशेष्यत्वाभावे शब्दविशेषणं सः । अतोऽनेनैव ' अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ' इति परिभाषाऽपि सिद्धा[1836] ।

आह च महामहोपाध्यायो नागेशभट्टः – राज्ञो यत् इत्यादौ लोकिकव्युत्पत्त्युपस्थितार्थस्य प्रत्ययेन पौर्वापर्यासम्भावात् प्रातिपदिकादित्यनेनान्वयासम्भवाच्च तदर्थकशब्दमात्रग्रहणापत्तौ नियमार्थं सूत्रम् । तत्र स्वशब्द आत्मीयत्वेनार्थमाह । रूपशब्देन शब्दस्वरूपम्, एतदुभयं सञ्ज्ञीत्यर्थः । तत्रार्थो न विशेष्य उक्तयुक्तेः, किन्तु शब्दविशेषणम् । एवञ्चार्थविशिष्टः शब्दः सञ्ज्ञीत्यर्थवद्ग्रहणपरिभाषा सिद्धा '[1837] ।

एवञ्चात्र शास्त्रे शब्दस्यार्थविशिष्टस्वरूपोपस्थापकत्वे सिद्धे सति परः प्रयुक्त इतिशब्दोऽर्थविपर्यासकृत् तस्य शब्दविशिष्टार्थोपस्थापकत्वं साधयति । एवं स्थिते " तस्मिन्निति निर्दिष्टे पूर्वस्य " इत्यत्र यदि इतिशब्दः परः प्रयुक्तो न स्यात्, तर्हि " स्वं रूपं शब्दस्याशब्दसञ्ज्ञा " इति नियमात् ' तस्मिन् ' इत्यनेन स्वरूपे गृह्यमाणे यत्र सूत्रे ' तस्मिन् ' इति शब्दस्वरूपमुच्चारितं तत्र " तस्मिन्नणि च युष्माकास्माकौ " इत्यत्रैवेयं परिभाषा प्रवर्तेत, नान्यत्र कुत्रापि इति बहुलक्ष्यासङ्ग्रहाद् " इको यणचि " इत्यादावव्याप्तेरनिष्टापत्तिः स्यात् । तामिमामव्याप्तिं वारयितुमितिपरमुच्चारितं ' तस्मिन्निति ' इति । तेन च ' तस्मिन् ' इति न शब्दस्वरूपं गृह्यते, किन्तु तदर्थो गृह्यते । यदि ' तस्मिन्निति ' अस्य शब्दस्वरूपपरत्वे " तस्मिन्नणि च युष्माकास्माकौ " इत्येकमेव ' तस्मिन् ' इत्येतत्पदघटितं सूत्रम्, अतोऽत्रैव " तस्मिन्निति निर्दिष्टे पूर्वस्य " इति परिभाषासूत्रस्य उपस्थितेः सम्भवेन लाघवात्तत्रैव " तस्मिन् निर्दिष्टपूर्वयोः युष्माकास्माकमणि च " इत्येकस्मिन् लघुशरीरे सूत्रे कर्तव्ये पृथक्सूत्रारम्भरूप-व्याख्यानात् ' तस्मिन् ' इति पदं न स्वरूपपरम्, किन्तु तदर्थपरमेव इति सिद्धम् ।

तथा चोक्तं पदमञ्जरीकारेण – ' इतिकरणस्य ' गौरित्ययमाह ' इत्यादौ स्वरूपपदार्थकत्वेन व्यवस्थापकत्वदर्शनात् ' तस्मिन्नणि च ' इत्युपात्तस्येदमनुकरणम्, ततश्च तत्रैवास्य प्रवृत्तिः स्याद् । अस्ति च तत्र व्यवच्छेद्यं ' हे यौष्माकीणमस्मभ्यं देहि ', ' आस्माकीनं युष्मभ्यं ददामि ' इति परनिवृत्तिः, तामिमां भ्रान्तिमपाकरोति – ' तस्मिन्निति ' सप्तम्यर्थनिर्देश इति । तेन " तस्यापत्यम् ", " तत्र भव " इत्यावत् स्वन्तत्रस्य सर्वनाम्नोऽयं निर्देशः,तद्वदेव ' तस्मिन्निति ' सामान्यविशेषणमचि, हलीत्यादीनामुपलक्षणम्, न त्वनुकरणमिति दर्शयति । एतच्चेति करणाल्लभ्यते । स हि

[1836] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[1837] शब्देन्दुशेखरः – सञ्ज्ञाप्रकरणम् – स्वं रूपं शब्दस्याशब्दसञ्ज्ञा इति सूत्रे

पदार्थविपर्यासकृत् । शास्त्रे च स्वरूपपदार्थः, तस्य विपर्यासोऽर्थपदार्थता । यदि च ' तस्मिन्नणि च ' इत्यत्रैवैतदुपस्थास्यत तत्रैव पूर्वग्रहणमकरिष्यतेति भावः '[1838] ।

' निर्दिष्टे ' इत्यत्र निरिति नैरन्तर्यस्य बोधकं दिशधातुरुच्चारणार्थकः । एवं सति सप्तम्यन्तपद-बोध्ये अव्यवहिते उच्चारिते यत् कार्यं तत् पूर्वस्य भवतीत्यर्थः । पूर्वापेक्षया अव्यवहिते उच्चारिते परस्मिन्, परापेक्षया पूर्वोऽव्यवहित एव भवितुमर्हतीति अव्यवहितस्येति सूत्रार्थे फलितार्थकथनमेव । सप्तम्यन्तं पदम् " इको यणचि " इत्यत्र अच्पदं तत्पदबोध्यार्थः अकारादिः, तस्मिन् अव्यवहिते उच्चारिते यत् कार्यं तत् पूर्वस्य ' दध्यत्र ' इत्यत्र दधिघटकेकारस्य जायते । इकारापेक्षया अव्यवहितत्वमकारस्य यद्यस्ति, तदा अकारापेक्षया अव्यवहितत्वमिकारस्यापि निर्बाधमस्ति ।

" इको यणचि " इति सूत्रे ' अचि ' इति सत्सप्तमीति स्वीकृतवान् बालमनोरमाकारः । यथा – ' इको यणचीत्यत्र अचि इकः यण् स्यादित्यवगतम् । तत्र अचो वर्णान्तराधिकरणत्वं न सम्भवतीति सतिसप्तम्याश्रयणीया । अचि सति इको यण् स्यादिति ' । दीक्षितः " इको यणचि " इत्यत्र सत्सप्तमीति स्वीकृत्य अनन्तरं सत्सप्तमीपक्षे दोषाणां सत्त्वाद् यद्वा गङ्गायां घोषः इतिवदौपश्लेषिकेऽधिकरणे सप्तमी इति पक्षान्तरमपि अभ्युपागच्छत् ।

वस्तुतस्तु भाष्यविरुद्धत्वादत्र औपश्लेषिकसप्तमी एव, न तु सत्सप्तमी । तत्र चेत्थं प्रमाणानि - सूत्रेऽस्मिनुपश्लिष्टपदाध्याहारेण ' निर्दिष्टे ' इति सप्तमी औपश्लेषिकाधिकरणे एव । उपपदविभक्तेः कारकविभक्तेरेव बलीयस्त्वात् । स्पष्टमिदं " तत्र च दीयते कार्यं भववत् "[1839] इति सूत्रभाष्ये – ' मासेऽतिक्रान्ते यद्दीयते तस्य मास औपश्लेषिकमधिकरणम् ' इत्युक्तम् । " इको यणचि " इत्यत्र औपश्लेषिकाधिकरणे सप्तमीत्यत्र " संहितायाम् " [1840] इति सूत्रभाष्यमपि प्रमाणम् । तथा हि – " संहितायाम् " इत्यधिकारसूत्रम् । संहिता च " परः सन्निकर्षः संहिता "[1841] इति सूत्रपरिभाषिता । वर्णानामतिशयितः सन्निधिः संहितासञ्ज्ञः स्यात् । तेन संहिताधिकारे विहितानां कार्याणां नान्तरीकतया कालव्यवधाने एव प्रवृत्त्या तदधिककालव्यवधाने संहिताकार्याणामप्रवृत्तिरिति फलम् ।

भाष्यकारेण संहिताधिकारप्रत्याचख्यानाय ' अचि ' इत्यादीनामौश्लेषिकाधिकरणत्वमुक्तम् । तथा हि – ' तत्र भाष्ये अयं योगः शक्योऽवक्तुम् । कथम् ? अधिकरणं नाम त्रिप्रकारकम् । अभिव्यापकम्,

[1838] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[1839] अष्टाध्यायी – (5-1-96)

[1840] अष्टाध्यायी – (6-1-71)

[1841] अष्टाध्यायी – (1-4-109)

औपश्लेषिकम्, वैषयिकम् । शब्दस्य च शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हति, अन्यदतः उपश्लेषात् । इको यणचि अजुपश्लेष्टस्येति । तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यति '[1842] इत्युक्तम् । ' उप – समीपे श्लेषः – सम्बन्धः उपश्लेषः, तत्कृतमधिकरणमौश्लेषिकम् सामीपिकमिति यावत् । एवञ्च अच्समीपवर्तिन इक इति फलति । सामिप्यञ्च कालतो वर्णतश्च व्यवधानाभावः । एवञ्च असंहितायामुक्तसामीप्याभावादेव यणभावसिद्धेः संहिताधिकारो न कर्तव्य इति भाष्यार्थः '[1843] । अनेनापि भाष्येण " इको यणचि " इत्यादावौपश्लेषिकाधिकरणसप्तमी एव नान्या इति स्पष्टं प्रतीयते ।

तथा चोक्तं भाष्यव्याख्याकारेण कैयटेनापि प्रदीपे – ' अच्युपश्लिष्टस्येको यणा भाव्यम् । यथा च परस्मिन् पूर्व उपश्लेष्टः, एवं पूर्वस्मिन्नपि परः । ....अचीति सत्सप्तमीपक्षेऽप्यनियमप्रसङ्गः । '[1844] इति । तथा चोद्द्योते प्रोक्तं नागेशेनापि – ' अच्युपश्लिष्टस्येति । औपश्लेषिकेऽधिकरणे सप्तमीति भावः '[1845] ।

एवञ्च तेनैवोक्तं शब्देन्दुशेखरेऽपि – ' अत्र सूत्रे उपश्लिष्टपदाध्याहारेण निर्दिष्टे इति औपश्लेषिकेऽधिकरणे सप्तम्येवोचिता ' उपपदविभक्तेः ' इति न्यायात् न तु सतिसप्तमीति ' तत्र च दीयते ' इति सूत्रे कैयटे स्पष्टम् । " स्नुक्रमोरनात्मनेपदनिमित्ते "[1846] इति सूत्रे च कैयट आह ' तस्मिन्निति परिभाषायां सत्यां सत्सप्तम्याश्रयणमशक्यम् ' इति '[1847] ।

अस्यायं निष्कर्षः – विशेषणविशेष्ययोः समानविभक्तिकत्वनियमेन ' निर्दिष्टे ' इत्यस्य सप्तम्यन्तत्वेन तेन साकं सामानाधिकरण्येनान्वयाय तत्पदेऽपि सप्तमीविभक्तिरुचिता । एवञ्च तत्पदबोध्याचीत्यादेरर्थस्य निर्दिष्टपदार्थेन साकं सामानाधिकरण्येनान्वयस्सिद्ध्यति । अन्यथा भिन्नविभक्तित्वात्तन्न स्यादिति ।

तथा चोक्तं सरलाटीकायाम् – ' प्रकृतसूत्रे औपश्लेषिकसप्तम्यन्तानामेव तत्पदेन ग्रहणात् । अन्यथान्यसप्तमीस्थलेऽपि एतत्परिभाषाप्रवृत्तौ " उभयप्राप्तौ कर्मणि " इति सूत्रं व्यर्थं स्यात् " कर्तृकर्मणोः कृति "[1848] इत्यत्र प्रकृतपरिभाषाप्रवृत्तौ युगपत्कर्तृवाचकस्य कर्मवाचकस्य च

[1842] भाष्यम् – इको यणचि (6-1-77) इति सूत्रे

[1843] बालमनोरमा – इको यणचि (6-1-77) इति सूत्रे

[1844] भाष्यम् – प्रदीपः – इको यणचि – (6-1-77) इति सूत्रे

[1845] भाष्यम् – उद्द्योतः – इको यणचि – (6-1-77) इति सूत्रे

[1846] अष्टाध्यायी – (7-2-36)

[1847] शब्देन्दुशेखरः – प्रकृतसूत्रे

[1848] अष्टाध्यायी – (2-3-65)

तत्कृदन्ताव्यवहितपूर्वत्वासम्भवेन उभयप्राप्तेरेवासम्भवात्। तथा चौपश्लेषिकाधिकरणबोधकसप्तम्यन्त-पदघटिते शास्त्रे निर्दिष्टे पूर्वस्य इत्युपतिष्ठत इत्यर्थः फलति '[1849]। तथा चाह भावप्रकाशकारः – ' अत एव वर्णानां भाष्यादिमते द्रव्यत्वात्संयोगवत् पूर्वपरयोर्बौद्धाधारत्वस्याप्युपश्लेषनिरूपितस्य स्वीकारेण " इको यणचि " इत्यादावियं सप्तमीति " संहितायाम् " इति सूत्रभाष्यं सङ्गच्छते। एतेनार्धमात्राधिक-कालेन वर्णान्तरेण वा व्यवधाने उपश्लेष एव नेति चेत्तर्हि निर्दिष्टपदं संहिताधिकारश्च विफल इत्यपि ध्वनितम्, दीक्षितादीनां तु प्रमाद एवेत्यन्यत्र विस्तरः '[1850]।

एवन्तर्हि स्पष्टीभूतेऽपि सिद्धान्ते कुतो दीक्षितेन " इको यणचि " इत्यत्र सत्सप्तमी मन्यते इत्यत्र तु तत्सुधिभिः विचारणीयम्।

अस्तु एवमपि सत्सप्तमीस्वीकारे के दोषाः, औपश्लेषिक्यां तु को लाभः इति किञ्चिदवलोकयामः। तथा हि –

" इको यणचि " इत्यत्र सत्सप्तमी यद्याश्रीयते तर्हि ' सुध्युपास्यः ' इत्यादावीकारस्यैव सकारोत्तरवर्तिनः उकारस्यापि यणादेशापत्तिः। तथा च व्यवहिताव्यवहितसाधारण्येन यणादेशप्रसङ्ग इति। " तस्मिन्निति निर्दिष्टे पूर्वस्य " इति परिभाषया तु व्यवहिते दोषो वारयितुं न शक्यते। यस्यां क्रियायां तस्यान्वयस्तत्क्रियाकर्तुर्विधेयतया तेन सूत्रेण पौर्वापर्यासम्भवात्। पूर्वस्येति षष्ठ्यन्वयाच्च। तस्यान्यत्रान्वयः, अन्यत्र तन्निरूपितपूर्वत्वान्वय इत्यस्य व्युत्पत्तिविरुद्धत्वाच्च।

औपश्लेषिक्यां तु नायं दोषः। यत औपश्लेषिकाधिकरणसप्तम्यन्तत्वे " तस्मिन्निति निर्दिष्टे पूर्वस्य " इति परिभाषालिङ्गम्। तादृशलिङ्गस्य " इको यणचि " इत्यादौ सत्त्वे तत्परिभाषायाः प्रवृत्त्या अचि अजुपश्लिष्टस्य वर्णान्तरेणाव्यवहितपूर्वस्य यणादेः प्रवृत्तेः। एवञ्च " इको यणचि " इत्यादौ न सत्सप्तमी अपि तु औपश्लेषिकी एव। स्पष्टमिदं सर्वं " संहितायाम् " इति सूत्रे भाष्ये कैयटे उद्द्योते च।

ननु अचो वर्णस्य वर्णान्तराधिकरणत्वासम्भवाद् नहि यथा स्थाल्यामोदनं पचतीत्यादौ स्थाली ओदनस्य आधारस्तथा अचि इको यण् इत्यत्र अच् इक आधारो भवितुमर्हति तर्हि कथमत्र वर्णा वर्णान्तरस्याधारा भवेयुरिति चेत् ? मैवम्, ' वर्णानां भाष्यादिमते द्रव्यत्वात्संयोगवत् पूर्वपरयोः बौद्धाधारत्वस्याप्युपश्लेषनिरूपितस्य स्वीकारेण " इको यणचि " इत्यादावियं सप्तमीति " संहितायाम् " इति सूत्रभाष्यं सङ्गच्छते '[1851]।

[1849] प्रौढमनोरमा – सरलाटीका – प्रकृतसूत्रे

[1850] प्रौढमनोरमा – भावप्रकाशटीका – प्रकृतसूत्रे

[1851] प्रौढमनोरमा – भावप्रकाशटीका – प्रकृतसूत्रे

तथा चोक्तं लक्ष्मीटीकाकृता – ‘ अत्र व्याकरणे सूत्रेषु यावन्ति सप्तम्यन्तानि पदानि सन्ति तेषु “ सप्तम्यधिकरणे च ”[1852] इति सप्तमी वक्तव्या। अधिकरणञ्चाधेयसापेक्षम्। यथा – ‘ भूतले घटः ’ इत्यत्र भूतलं संयोगसम्बन्धेन घटाधारः, घटश्चाधेयः, तथा “ इको यणचि ”, “ बहुवचने झल्येत् ”[1853] इत्यादावाधेयः क इत्याकाङ्क्षायाम् अजव्यवहितपूर्वस्य च यस्य कार्यं तदाधेयः। यथा – ‘ वटे गावः ’ इत्यत्र वट आधारः, गौश्चाधेयः। अत्र यद्यपि गोवटयोर्नहि संयोगस्तथापि गवाधिकरणीभूतो यो देशः, वटाधिकरणीभूतश्च तयोः सामीप्याद् वटेऽपि देशकृतसामीप्यारोपेण सामीप्यसम्बन्धकृताधारत्वारोप इत्यधिकरणवाचकाद् वटशब्दात् सप्तमी। तथा अजव्यवहितपूर्वस्य इकः, बहुवचनाव्यवहितपूर्वस्य अदन्ताङ्गस्य कार्यं विधीयते, इति इक् अदन्ताङ्गञ्चाधेयः। अत्राजधिकरणीभूतः, बहुवचनाधिकरणीभूतश्च यः कालः, तयोः सामीप्याद् इकि, अदान्ताङ्गे च सामीप्यारोप इति कालकृत-सामीप्यारोपेण इकि, अदन्ताङ्गे च सामीप्यमूलकाधेयत्वविवक्षायाम् अचि बहुवचने चाधिकरणत्व-विवक्षायां सप्तमी। यद्यपि सप्तमी द्विधा अधिकरणे सप्तमी, सति सदर्थे सप्तमी च। यथा ‘ छात्रेषु अधीयानेषु गतः ’ इत्यत्र सदर्थे सप्तमी। परन्तु असति बाधके ‘ उपपदविभक्तेः कारकविभक्तिर्बलीयसी ’ इति न्यायात् औपश्लेषिकाधिकरणे एव सप्तमी। सति बाधके सदर्थे सप्तमी उपपदविभक्तिः, यथा – “ कर्तृकर्मणोः कृति ” इत्यत्र।

अचि इति ‘ वटे गावः ’ इतिवद् औपश्लेषिकाधिकरणे सप्तमी, स्थितिक्रियाद्वारा इक् आधेयः। एतेन नहि वर्णा वर्णान्तरस्याधारा भवन्तीति परास्तम्, बौद्धसामीप्याधारत्वे बाधकाभावात्। तदुक्तं भाष्ये “ इको यणचि ” अचि उपश्लिष्टस्येति इति। तथा च ‘ सुधी + उपास्यः ’ इत्यत्र यदि अच्पदेन धकारोत्तर ईकारो गृह्यते तदा तत्समीपस्य सकारोकारस्य धकारेण व्यवहितस्यापि यण् प्रायो व्यवधानेऽपि सामीप्यव्यवहारात्। उपास्योकारस्यापि समीपस्थत्वाद् यण् प्राप्तः। परन्तु तस्मिन्निति परिभाषया सप्तम्यन्ताच् पदार्थाव्यवहितपूर्वस्यैव इको यणिति नियम्यते।

तेन अच् समीपेऽपि व्यवहितस्य परस्य चेको यण् न। यदि तु ‘ छात्रेषु अधीयानेषु गतः ’ इतिवद् लक्ष्यलक्षणभावे सति सप्तमी स्यात्तदा ‘ जगतः कृष्णः कर्ता ’ इतिवद् व्यवधानेऽपीको यण् स्यात्। सत्यां सप्तम्यां तु तस्मिन्निति न प्रवर्तते।[1854] ’

[1852] अष्टाध्यायी – (2-3-36)

[1853] अष्टाध्यायी – (7-3-103)

[1854] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

तथा च औपश्लेषिकाधिकरणबोधकसप्तम्यन्तपदबोध्यार्थे लिङ्गमस्याः परिभाषाया इति निष्कर्षः । अत एव " कर्तृकर्मणोः कृतिः " इत्यत्र नास्याः प्रवृत्तिः, तत्र सत्सप्तम्याः स्वीकारात् । प्रवृत्तौ तु कृदव्यवहितपूर्वयोरेव कर्तृकर्मणोः षष्ठी स्यात् । तथा च ' कृतिः कृष्णस्य ' इत्यत्र कृदन्तात् परस्य कर्तुः कृष्णस्य ' जगतः कृष्णः कर्ता ' इत्यत्र व्यवहिते जगद्रूपे कर्मणि च षष्ठी न स्यात् ।

अत्रेदमवधेयम् – ' भवतु नाम अचीत्यादिसप्तम्यर्थविषये आचार्याणां विरोधः, औपश्लेष्काधिकरणे इति केचित् । वर्णस्य वर्णान्तराधिकरणत्वासम्भवात् सत्सप्तम्येवेत्यन्ये । उपश्लेषः = समीपवृत्तित्वम्, स च वर्णस्य वर्णान्तरेण सम्भवत्येवेति ' उपपदविभक्तेः कारकविभक्तिर्बलीयसी ' इति परिभाषया सत्सप्तमीं बाधित्वा औपश्लिषिकाधिकरणे एव सप्तमीति परे, इत्येवंरूपः । किन्तु इदन्तु सुनिश्चितं यद् अधिकरणसप्तमी वास्तु, सतिसप्तमी वा भवतु, उभयत्रापि पक्षे " इको यणचि " इत्यादावनियमो भवति । उपश्लेषस्य सत्त्वस्य च पूर्वापरसाधारणत्वात्, व्यवहिताव्यवहित-साधारणत्वाच्च । तथा च अजुपश्लिष्टस्य पूर्वस्य परस्य च व्यवहितस्याव्यवहितस्य चेको यण् प्राप्तः, तथाचि सति पूर्वस्य परस्य चाव्यवहितस्य व्यवहितस्य च यण् प्राप्तः । तमिममनियमं वारयितुं पूर्वस्यैव न परस्य इति, अव्यवहितस्यैव न व्यवहितस्य इति नियममुभयविधं विधातुं च सूत्रमिदमारब्धम् '[1855] ।

तदेतदाह काशिकाव्याख्यायां पदमञ्जर्यां हरदत्तः – ' किमर्थं पुनरिदमारभ्यते ? " इको यणचि " इत्यादौ सन्देहः – किं सत्सप्तमी ? किं वा ' गङ्गायां घोषः ' इतिवदौपश्लेषिकाधिकरणे सप्तमी ? इति । तत्र सत्त्वं परस्य च पूर्वस्य च सम्भवति, एवमुपश्लेषोऽपि । तत्र पूर्वस्य परस्य च व्यवहितानन्तरस्य यण् प्राप्तः, दध्युदकादिषु तु युगपदेकस्य कार्यित्वनिमित्तत्वायोगात् पर्यायेण यण् प्राप्तः, इष्यते च पूर्वस्यैव स्यादनन्तरस्यैवेति । " इको यणचि " इत्यादेश्च सकृत्प्रवृत्तिः । सा चैवं विशेषितेति न क्वाप्यनिष्टशङ्का । तेन ' दध्युदकम् ' इत्यत्र उकाररूपाजव्यवहितपूर्वस्य इक इकारस्यैव यण् नोकारस्य । एवं ' मध्विदम् ' इत्यत्र इकाररूपाजव्यवहितपूर्वस्येको यण् उकारस्य, नेकारस्येति दिक् ' ।

अनया रीत्याऽत्र सूत्रे प्रतिपादितांशे ' सत्सप्तमी ' इत्यत्र दीक्षितादयो भाष्यविरुद्धमेव व्याचक्षन्ते इत्यायातम् । तथापि एवमुपश्लेषोऽपि इति पक्षान्तरं स्वीकुर्वन् न दोषभाज इति वक्तुं शक्यते । पूर्वोक्तदोषान् मनसि निधाय पक्षान्तरश्रवणस्य औचित्यादिति मे मतिः ।

- **तस्मादित्युत्तरस्य – (1-1-66)**

[1855] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

सूत्रार्थः – पूर्वसूत्रात् ‘ निर्दिष्टे ’ इति पदमनुवर्तते । पञ्चम्या विभक्त्या निर्दिष्टे सति उत्तरस्यैव कार्यं भवति । उदाहरणञ्च – आसीनः, द्वीपम्, अन्तरीपम्, समीपम् ।

अत्र तच्छब्दार्थः पञ्चम्यन्तपदम् । इतिशब्दसम्बन्धात् पञ्चम्यन्तपदबोध्यार्थपरस्तच्छब्दः । न तु ‘ तस्मात् ’ इत्यनुकरणम् । “ तिङ्ङतिङः ”[1856] इति सूत्रेषु भाष्यकृता प्रवर्तितत्वात् ।

अत एवाह न्यासकारः – ‘ इहापि इतिकरणोऽर्थनिर्देशार्थः क्रियते । तेन पञ्चम्यर्थग्रहणं भवति, न तु शब्दस्वरूपस्य ’ । पूर्वसूत्रादनुवर्तमानं ‘ निर्दिष्टे ’ इति पदं तस्मादित्यस्य समभिव्याहारात् पञ्चम्यन्ततया विपरिणामेन निर्दिष्टादित्यर्थकं पर्यवसन्नम् । विशेषणविशेष्ययोः समानविभक्तिकत्व-नियमेन ‘ तस्माद् ’ इत्यस्य पञ्चम्यन्तत्वेन तेन साकं सामानाधिकरण्येनान्वयाय निर्दिष्टपदेऽपि पञ्चमीविभक्तिरिति भावः । तथा च अव्यवहितोच्चारितात्पञ्चम्यन्तपदार्थात् परस्य कार्यं भवतीति सूत्रार्थः निष्पन्नः । उत्तरपदस्य श्रवणादस्य सूत्रस्य दिग्योगलक्षणपञ्चम्यामेव प्रवृत्तिः ज्ञेया । तेन “ अनुनासिकात् परोऽनुस्वारः ”[1857] इत्यत्र नास्य प्रवृत्तिः, तत्र ल्यब्लोपे पञ्चमीस्वीकारेण दिग्योगलक्षण-पञ्चमीविरहात् । ‘ पञ्चमी तु “ अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते ”[1858] इति सूत्रेण दिग्योगेऽवधित्वार्थिका । न च ‘ उपपदविभक्तेः कारकविभक्तिर्बलीयसी ’ इति न्यायादपादाने पञ्चमी स्यादिति चेन्न, पञ्चम्यन्तपदघटितसूत्रविषयेऽपादानार्थकविभक्तेरसम्भवात् । नापि ल्यब्लोपे पञ्चमी, अत्रैव भाष्ये अतिङः पूर्वस्य अतिङः परस्येति सन्देहः इति दिग्योगलक्षणपञ्चम्या एव सन्देहप्रदर्शनेन दिग्योगे पञ्चम्या एव तदभिमतत्वात्, बहुलक्ष्यसंस्कारानुरोधाच्च ’ ।

तदेतदाह काशिकाव्याख्यायां जिनेन्द्रबुद्धिः – ‘ किमर्थमिदम् ? “ तिङ्ङतिङः ” इति यत्र पञ्चमी सा तु न कारकविभक्तिः, किं तर्हि ? ‘ दिक्शब्दाञ्चूत्तरपद ’ इति दिग्योगलक्षणा । दिक्शब्दस्त्वध्याहार्यः, तत्र किं पूर्वशब्दमध्याहृत्यातिङः पूर्वस्य निघातः क्रियते ? उत परशब्दमध्याहृत्य परस्य ? इति सन्देहे सति परिभाषेयं नियमार्थाऽऽरभ्यते ’[1859] । तथैवाह परमञ्जर्यां हरदत्तोऽपि ।

“ तस्मिन्निति निर्दिष्टे पूर्वस्य ” इति सूत्रे सप्तम्यन्तपदस्य पूर्वस्य चोपस्थितिरत्र सूत्रे पञ्चम्यन्तपदस्य परस्य चैतावानेव विशेषः । शेषं पूर्ववदूह्यं सर्वम् ।

[1856] अष्टाध्यायी – (8-1-28)

[1857] अष्टाध्यायी – (8-3-4)

[1858] अष्टाध्यायी – (2-4-29)

[1859] काशिका – न्यासः – प्रकृतसूत्रे

दिग्योगलक्षणपञ्चम्याः प्रदेशस्थले उपपत्तये दिग्वाचकशब्दस्य यस्य कस्यचिदनियतस्य अध्याहारे प्रसक्ते उत्तरशब्दाध्याहारेणैव पञ्चमी उपपादनीया नान्यदिग्वाचकपदाध्याहारेणेति नियमबोधनाय तस्मादिति सूत्रमिति अनियमे नियमकारिणीत्वमपि अस्या उपपन्नम् । अत एव च परिभाषासूत्रमिदं सिद्धम् ।

" ङमो ह्रस्वादचि ङमुण् नित्यम् "[1860] इत्यादौ सप्तमीश्रुत्याऽव्यवहितपूर्वस्योपस्थितिः, पञ्चमीश्रुत्या चाव्यवहितपरस्योपस्थितिः, तत्र पूर्वस्य कार्यं परस्य वेति संशये विप्रतिषेधाद् अनवकाशत्वाच्च पञ्चमीनिर्देशस्य बलीयस्त्वात् परस्येव कार्यं बोध्यम् । तथा च भाष्यम् – ' उभयनिर्देशे विप्रतिषेधात् पञ्चमीनिर्देशो भविष्यति '[1861] । इति ।

अथवा भाष्ये तु " तस्मिन्निति निर्दिष्टे पूर्वस्य ", " तस्मादित्युत्तरस्य " इति द्वयोः सूत्रयोः षष्ठीप्रकल्पकत्वमपि प्रोक्तम् । तथा हि " षष्ठी स्थानेयोगा "[1862] इत्यतः ' षष्ठी ' इत्यनुवर्तते सप्तम्यन्तार्थनिर्देशे तदनन्तरस्य पूर्वस्य षष्ठी । यत्र षष्ठी तस्य कार्यम् । पञ्चम्यन्तार्थनिर्देशे तदनन्तरस्थोत्तरस्य षष्ठी । यत्र षष्ठी तस्य कार्यम् । एतत्फलितार्थमेव सप्तमी स्वस्मात्पूर्वां षष्ठीं कल्पयति, पञ्चमी स्वस्मात्परां षष्ठीं कल्पयतीति । यत्रोभयनिर्देशस्तत्र पञ्चम्या एव प्रकल्पकत्वं परत्वात् । तथा च भाष्यम् – ' तस्मिन्निति निर्दिष्टे पूर्वस्य षष्ठी, तस्मादित्युत्तरस्य षष्ठीति । तत्तर्हि षष्ठीग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् ? " षष्ठी स्थानेयोगा " इति '[1863] ।

' तस्मिन्निति ' इति परिभाषायाः पूर्वत्वम्, अव्यवहितत्वम्, षष्ठ्यंशश्चैतद् अंशत्रयम्, ' तस्मात् ' इत्यस्याः परिभाषायाः परत्वम्, अव्यवहितत्वम्, षष्ठ्यंशश्चेति अंशत्रयमुपस्थाप्यते । यत्र तु योंऽशः सिद्धो बाधितो वा तमंशं त्यक्त्वा शेषांश एवोपतिष्ठते । अत एवोक्तं शब्देन्दुशेखरे श्रीमता नागेशेन – ' " व्यवहिताश्च "[1864] इति सूत्रं सार्थकमिति '[1865] । अन्यथा " ते प्राग्धातोः "[1866] इत्यत्र प्राक्पदसत्त्वेन उत्तरत्वांशानुपस्थितौ ' सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ' इति न्यायेन अव्यवहितत्वस्य षष्ठ्यंशस्य चाप्यनुपस्थितौ व्यवहितप्रयोगः सिद्ध एवेति तद्वैयर्थ्यं स्पष्टमेव । अत एव

[1860] अष्टाध्यायी – (8-3-32)

[1861] भाष्यम् – प्रकृतसूत्रे

[1862] अष्टाध्यायी – (1-1-49)

[1863] भाष्यम् – प्रकृतसूत्रे

[1864] अष्टाध्यायी – (1-4-82)

[1865] शब्देन्दुशेखरः – प्रकृतसूत्रे

[1866] अष्टाध्यायी – (1-4-80)

‘ तस्मिन्निति ’, ‘ तस्मादिति ’ परिभाषाद्वयस्याप्यव्यवहितत्वम्, पूर्वत्वम्, षष्ठ्यर्थश्च, अव्यवहितत्वम्, उत्तरत्वम्, तादृशः षष्ठ्यर्थश्चेति प्रत्येकमंशत्रयं विधेयम्। तत्र “ शि तुक् ”[1867], “ पदान्ताद्वा ”[1868] इत्यादौ तस्मिन्निति परिभाषया अंशत्रयस्योपस्थितिः । “ ङः सि धुट् ”[1869] इत्यत्र तस्मादिति परिभाषया अंशत्रयमुपस्थितिः। “ इको यणचि ”[1870], “ उदः स्थास्तम्भोः पूर्वस्य ”[1871] इत्यत्र च षष्ठ्यंशस्य ‘ इकः ’, ‘ स्थास्तम्भोः ’ इत्याभ्यामेव निर्देशात् तदंशं विहाय उक्तपरिभाषाद्वयी यथायथमंशद्वयमुपस्थापयति। प्रत्ययाधिकारे षष्ठ्यंशस्य बाधितत्वादुत्तरांशस्य सिद्धत्वात्केवलाव्यवहितांशोपस्थितिः ज्ञेया।

परिभाषाद्वयोपस्थितायाः षष्ठ्या न स्थाननिरूपितसम्बन्धमात्रार्थबोधकत्वम्, किन्तु विधेयान्वयि सम्बन्धमात्रम् । इष्टानुरोधेन तत्र सम्बन्धविशेषस्य निर्णयः । आगमविधावपि अनयोः परिभाषयोः उपस्थितिः। तत्र स्थाननिरूपितसम्बन्धस्य अन्वयासम्भवेन षष्ठ्या वक्तुमशक्यतया अवयवावयविभाव एवार्थः।

- **स्वं रूपं शब्दस्याशब्दसञ्ज्ञा – (1-1-67)**

अस्य सूत्रस्य प्रथमावृत्तौ तावदेतादृशोऽर्थः दृश्यते - ‘ शब्दस्य सञ्ज्ञा इति शब्दसञ्ज्ञा, षष्ठीतत्पुरुषः, न शब्दसञ्ज्ञा इति अशब्दसञ्ज्ञा, नञ्तत्पुरुषः। इह व्याकरणे यस्य शब्दस्य कार्यमुच्च्यते, तस्य स्वं रूपं ग्राह्यम्, न तु शब्दार्थः, न च पर्यायवाची शब्दः, शब्दसञ्ज्ञां वर्जयित्वा। उदाहरणञ्च – आग्नेयः। ’

सूत्रेऽस्मिन् स्वम्, रूपम्, शब्दस्य, अशब्दसञ्ज्ञा इत्येवं चत्वारि पदानि सन्ति। शब्दे सञ्ज्ञा इति सप्तमीतत्पुरुषसमासः न शब्दसञ्ज्ञा अशब्दसञ्ज्ञा इति नञ्तत्पुरुषः । शब्दस्य सञ्ज्ञा शब्दसञ्ज्ञा, न शब्दसञ्ज्ञा अशब्दसञ्ज्ञा इति षष्ठीतत्पुरुषगर्भनञ्तत्पुरुषसमासस्वीकारे गुण-वृद्धि-घ-घु-टीत्यादिषु शब्दस्य सञ्ज्ञासु ‘ स्वं रूपम् ’ इति सूत्राप्रवृत्त्या सञ्ज्ञिनः, अदेङादेरर्थस्य ग्रहणे “ कर्तुरीप्सिततमं कर्म ”[1872] इत्यादिना विहिता कर्मसञ्ज्ञा संयोगादिरूपफलाश्रयस्य अर्थस्य भवति, न तु शब्दस्य तत्र

[1867] अष्टाध्यायी – (8-3-31)
[1868] अष्टाध्यायी – (6-1-75)
[1869] अष्टाध्यायी – (8-3-29)
[1870] अष्टाध्यायी – (6-1-76)
[1871] अष्टाध्यायी – (8-4-61)
[1872] अष्टाध्यायी – (1-4-49)

संयोगरूपफलाभावात् । तथा च " कर्मण्यण् "[1873] इत्यादौ कर्मसञ्ज्ञायाः शब्दनिष्ठसञ्ज्ञात्वाभावेन ' असञ्ज्ञायाम् ' इत्यनेन व्यावृत्त्यभावे ' स्वं रूपम् ' इति सूत्रस्याप्रवृत्त्या कर्मशब्दस्वरूपस्य ग्रहणापत्तौ ' कुम्भकारः ' इत्यादेरसिद्ध्यापत्तेः । किन्तु शब्दपदं लक्षणया शब्दशास्त्रपरम् । तथा च शब्दे = शब्दशास्त्रे = व्याकरणे या सञ्ज्ञा सा स्वरूपं न गृह्णाति, किन्तु सञ्ज्ञिनमेवेति न दोषः । अत एव प्रथमावृत्तिकारेण स्वीकृतः षष्ठीसमासः विचारणीयो विषयो वर्तते ।

एवञ्च शब्दस्य स्वकीयं रूपं सञ्ज्ञि शब्दशास्त्रे या सञ्ज्ञा तां विना इति दीक्षिताः । तथा चोक्तं कौमुद्याम् – ' शब्दस्य स्वं रूपं सञ्ज्ञि शब्दशास्त्रे या सञ्ज्ञा तां विना ' । अर्थात् शब्दः सञ्ज्ञा, शब्दस्य स्वं रूपं च सञ्ज्ञि । शब्दः स्वस्य रूपस्य सञ्ज्ञा इत्यर्थान्तरम् । व्याकरणसिद्धान्तसुधानिधिकर आह - ' नव्यास्तु इत्यादिना अणुदित्सवर्णस्य इत्यादिषु प्रथमान्तानां सञ्ज्ञासमर्पकत्वेन षष्ठ्यन्तानां सञ्ज्ञि-समर्पकत्वेन दृष्टत्वात् स्वं रूपं शब्दस्य सञ्ज्ञा स्यादित्याहुः । तथा च प्रत्ययलोपे इति सूत्रे भाष्यम् – स्वं रूपं शब्दस्य सञ्ज्ञा भवतीति हन्तेरपि हन्तिः सञ्ज्ञा भविष्यतीति अत्रापि रूपं शब्दस्य सञ्ज्ञेति इत्याह '[1874] । एतद्विपरितमस्य सूत्रस्य सञ्ज्ञासूत्रत्वं कतिभिश्चिद्धेतुभिः प्रत्याख्याय हरदत्तस्तु सूत्रस्यास्य परिभाषात्वमेव स्थापयति पदमञ्जर्याम् – ' स्वरूपस्य पर्यायाणाञ्च ग्रहणे प्राप्ते नियमार्था परिभाषेयम् । शब्दस्येति " कृत्यानां कर्तरि वा "[1875] इति षष्ठी । तेन शब्दः स्वमेव रूपं ग्राहयति = बोधयतीत्यर्थः । सञ्ज्ञापक्षे तु वृत्तावेवशब्दः सञ्ज्ञानुच्चारणं च नोपपद्येत । सूत्रे षष्ठीनिर्देशोऽपि नातीव युक्तः स्यात्, सञ्ज्ञासञ्ज्ञिसम्बन्धे प्रायेण सामानाधिकरण्यदर्शनात् '[1876] । इति । कैयटेन तु भाष्यानुसारमुक्तं सूत्रस्यास्य सञ्ज्ञासूत्रत्वं सुस्पष्टं प्रदीपे – ' स्वरूपस्य पर्यायाणां तद्विशेषाणाञ्च ग्रहणे प्राप्ते नियमार्था परिभाषेयमिति केचिदाहुः । अन्ये तु लिङ्गाभावाद् विध्यन्तरशेषभावाभावाच्च नेयं परिभाषा, अपितु सञ्ज्ञासूत्रमिदमिति प्रतिपन्ना ।[1877] ' इति । तथा च न्यासकारोऽपि ।

इदं सूत्रं न सञ्ज्ञाविधायकं सम्भवति, समानविभक्त्याऽत्र सञ्ज्ञासञ्ज्ञिनोः अनिर्देशात् । न आगमविधायकम्, आगमलिङ्गस्य टित्किदादेरनुपलम्भादिति चेन्न, " वृद्धिरादैच् "[1878] इत्यादाविव सञ्ज्ञासञ्ज्ञिनोः समानविभक्तिकत्वेनानिर्देशादतस्तदुपपत्तये बोध्यमिति अध्याह्रियते । तेन चोभयोः

[1873] अष्टाध्यायी – (3-2-1)

[1874] व्याकरणसिद्धान्तसुधानिधिः – प्रकृतसूत्रे

[1875] अष्टाध्यायी – (2-3-71)

[1876] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[1877] भाष्यम् – प्रदीपः – प्रकृतसूत्रे

[1878] अष्टाध्यायी – (1-1-1)

समानाधिकरण्यमुपपन्नम् । यद्यपि सञ्ज्ञासञ्ज्ञिनोर्वाच्यवाचकभावः सम्बन्ध इति सामानाधिकरण्यं नोपपद्यते । तथापि शब्दार्थयोस्तादात्म्यमादाय पाणिनेः सञ्ज्ञासञ्ज्ञिनोः समानविभक्तिकत्वेन निर्देशः स्वभावसिद्धः । तथा च शब्दस्य स्वरूपनिरूपितशक्तिग्राहकत्वलाभेनास्य सञ्ज्ञासूत्रत्वमिदम् । शब्दस्य इति कर्तरि षष्ठी, " कृत्यानां कर्तरि वा " इति सूत्रात् ' शब्देनार्थावगतेरर्थे कार्यास्यासम्भवात् तद्वाचिनः सञ्ज्ञाप्रतिषेधार्थं स्वरूपवचनम् ' इति भाष्यादपि सञ्ज्ञाशास्त्रमिदम् । तथा च सूत्रवार्तिकयोरुच्चारितस्य शब्दस्य स्वम्, रूपञ्च बोध्यम् । शब्दः सञ्ज्ञा, बोधकत्वात् । स्वं रूपञ्च सञ्ज्ञि, बोध्यत्वात् ।

शब्दस्यार्थादन्य आत्मीयो नास्तीति स्वशब्देनार्थो बोध्यते । ' अस्त्यन्यद्रूपात् स्वं शब्दस्येति किं पुनस्तदर्थः ' इति भाष्यादपि स्वशब्दस्यार्थबोधकत्वं लभ्यते । रूपशब्दः रूप्यते बोध्यते अनेनेति व्युत्पत्त्या रूपशब्देन शब्दस्वरूपमुच्यते । एवञ्च स्वम् = अर्थः रूपम् = शब्दः एतदुभयं सञ्ज्ञीत्यर्थः फलति । यथा " जराया जरसन्यतरस्याम् "[1879] इत्यादौ जराशब्दस्यार्थः । एवम् आनुपूर्वीरूपो यो जराशब्दः इत्युभयं सञ्ज्ञि वाच्यमित्यर्थः । सूत्रस्थजराशब्देन लक्ष्यस्थजराशब्दस्य तदर्थस्य चोपस्थितिः । अर्थे कार्यस्यासम्भवादर्थः शब्दविशेषणम् । तथा चार्थवज्जराशब्दस्य जरसादेश इत्यर्थः सिध्यति । अर्थात् पदपदार्थयोर्मध्ये अर्थस्य न प्राधान्यम्, अर्थस्य उत्पद्यमानप्रत्ययेन सह पौर्वापर्यासम्भवात्, अनुवृत्तप्रातिपदिकपदस्य शब्दात्मकतया अर्थेन सहाभेदान्वयस्य चासम्भवात् । किन्तु शब्दस्य आनुपूर्वीरूपस्य प्राधान्यम् । तथा च अर्थवाचकशब्दस्य ग्रहणे सिद्धे अनर्थकशब्दस्य ग्रहणं व्यावृत्तमिति ' अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ' इत्येषा परिभाषा सूत्रार्थतः फलिता ।

सूत्रप्रत्याख्यानरीतिः – भाष्ये तु ' स्वं रूपम् ' इति सूत्रं प्रत्याख्यातम् । तथा हि ' न वा ' अस्य प्रयोजनं वक्तव्यमिति शेषः । शब्दपूर्वको ह्यर्थप्रत्ययस्तस्मादर्थः निवृत्तिः । अयमर्थः – उपलब्ध एव शब्दोऽर्थं बोधयति । क्वचित् शास्त्रीये कार्येऽर्थस्यायोग्यत्वादुपस्थितत्वादुपात्त एव शब्दो ग्रहीष्यते इत्युच्चारिताद् " अग्नेर्ढक् "[1880] स्यान्न वह्न्यादेः । तथा च भाष्यम् – ' नैतत् समारम्भ्यम् । लोके योग्यतालक्षणेन सम्बन्धेन शब्दोऽर्थं बोधयति । व्याकरणेऽपि पशुरपत्यं देवता प्राञ्च उदञ्चो भरता इत्यादावर्थ एव गृह्यते । " अग्नेर्ढक् " इत्यादौ त्वर्थेन सह प्रत्ययस्य पौर्वापर्यासम्भवात् शब्दस्यैव ग्रहणम् । " ङ्याप्प्रातिपदिकात् " [1881] इत्यधिकाराच्च '[1882] ।

[1879] अष्टाध्यायी – (7-2-101)

[1880] अष्टाध्यायी – (4-2-33)

[1881] अष्टाध्यायी – (4-1-1)

[1882] भाष्यम् – प्रकृतसूत्रे

अस्यायं भावः – शब्दस्य स्वरूपेऽर्थे च शक्तिः। तदुक्तम् –

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥ इति।

तथा च शब्देन अर्थस्य इव शब्दस्य स्वस्वरूपात्मकस्यापि उपस्थितौ ज्ञातायाम्, अर्थेषु शब्दवाच्ये लौकिके शास्त्रीये च शास्त्रीयकार्यस्यासम्भवेन बोधात् शब्दे अर्थे च खण्डशः शक्तिस्वीकारेण प्रकारतया भासमानस्य " राजश्वसुराद्यत् "[1883] इत्यत्र राजरूपस्य शब्दस्य ग्रहणं सिध्यति। अर्थस्य विशेष्यतया अन्वयासम्भवेन सर्वथा अर्थस्य परित्यागापेक्षया सति सम्भवे विशेषणताया अन्वयस्य न्याय्यत्वेन अर्थवाचकः शब्दो गृहीतः – इति ' अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ' इति परिभाषाऽपि सूत्रं विनापि सिध्यति। ज्ञापकाच्च सञ्ज्ञापदं स्वरूपग्राहकं न स्यादिति व्यर्थं सूत्रमिति।

शब्दानां अर्थे च खण्डशः शक्तिस्वीकारेण तयोः प्रकारतया विशेष्यतया च भानं इष्टानुरोधेन। प्रकृते शास्त्रे अर्थे कार्यस्यासम्भवात् उपस्थितमर्थं विशेषणतया बोधविषयीकृत्य अर्थवाचकशब्देभ्यः कार्योत्पादसम्भवात् सूत्रं निष्फलमिति तात्पर्यम्।

न च अशब्दसञ्ज्ञा इत्येतदर्थमारम्भः। अर्थात् – ' स्वं रूपं शब्दस्य ' इत्येतावन्मात्रे सूत्रे विहिते सति यथा " अग्नेर्ढक् " इत्यादौ अग्न्यादयः शब्दाः स्वरूपं ग्राहयति, तद्वदेव " वृद्धिरैचि "[1884] इत्यादावपि वृद्ध्यादयशब्दा अपि स्वरूपमेव ग्राहयेयुः, तथा च ' गङ्गौघः ' इत्यादौ ' वृद्धि ' इत्याकारक आदेशः प्रसज्यते। तथा " उपसर्गे घोः किः "[1885] इति सूत्रेण ' घु ' इति शब्दार्थात् (घुङ् शब्दे) भौवादिकाद् धातोरेव किप्रत्ययः स्यात्, यतो नेष्टः, यतश्चेष्टः घुसञ्ज्ञकाद् दारूपाद् धारूपाच्च धातोस्तत एव न स्यात् – इत्येवमव्याप्त्यतिव्याप्ती स्याताम्।

अतस्तन्निराकरणायाह तत्रभवान् सूत्रकारः – अशब्दसञ्ज्ञेति। अत्र ' शब्द ' शब्दश्चात्र शब्दशास्त्रमुपलक्षयति। ततश्चात्र व्याकरणशास्त्रे या सञ्ज्ञा सा तु न स्वरूपबोधिका किन्तु स्वशक्यार्थबोधिकैवेत्यर्थः। तेन " वृद्धिरैचि " इत्यादौ वृद्धिशब्देन तत्पदवाच्या आदैच एवादेशा भवन्ति। एवम् " उपसर्गे घोः किः " इत्यत्र घुशब्देन न शब्दार्थको घुधातुर्गृह्यते, किन्तु घुसञ्ज्ञाशक्याः दारूपा धारूपाश्च धातवो गृह्यन्ते, तेभ्यः किप्रत्यये आधिः, उपाधिः, आदिः – इत्येवंविधा इष्टप्रयोगाः सिध्यन्ति।

1883 अष्टाध्यायी – (4-1-137)

1884 अष्टाध्यायी – (6-1-87)

1885 अष्टाध्यायी – (3-3-92)

यद्यपि अत्र वक्तुं शक्यते यत् सञ्ज्ञाविधानसामर्थ्यादेव सञ्ज्ञया स्वरूपग्रहणं न भविष्यति, किन्तु सञ्ज्ञिग्रहणमेव । यदि सञ्ज्ञाशब्देनापि स्वरूपग्रहणं स्यात्तर्हि सञ्ज्ञाविधानमेवानर्थकं स्यात् । न च सञ्ज्ञाशब्देन स्वरूपग्रहणे क्रियमाणेऽपि सञ्ज्ञाकरणं नानर्थकम्, किन्तु यत्र स्वरूपग्रहणमसम्भवि, तत्र सञ्ज्ञिप्रत्यायनार्थं तदिति वाच्यम्, यथा " ई हल्यघोः "[1886] इत्यत्र घुशब्देन स्वरूपग्रहणमसम्भवि, घुधातोरादन्तत्वाभावादेव तस्य ईत्वाप्रसक्त्या ' अघोः ' इति निषेधवैयर्थ्यापातात् । अतस्तत्र घुशब्देन दाधारूपसञ्ज्ञिप्रत्यायनद्वारा सञ्ज्ञाकरणं सार्थकम् । क्वचित् कस्याश्चित् सञ्ज्ञायास्तथा सार्थक्ये साध्यमानेऽपि सर्वासां सञ्ज्ञानां तथा सार्थक्यप्रतिपादनासम्भवात् । तथापि सञ्ज्ञाविधानसामर्थ्यात् सञ्ज्ञा सञ्ज्ञिनमपि प्रत्याययेत्, ' स्वं रूपं शब्दस्य ' इति परिभाषा (नियमफलकसञ्ज्ञा) विधान-सामर्थ्याच्च स्वरूपमपि ग्राह्येत् । इष्यते तु सञ्ज्ञिनामेव ग्रहणं न स्वरूपस्य । अतस्तदर्थं ' अशब्दसञ्ज्ञा ' इति वचनं कर्तव्यम् ।

वस्तुतस्तु ' अशब्दसञ्ज्ञा ' इति निषेधाभावेऽपि " ष्णान्ता षट् "[1887] इति ज्ञापकात् सञ्ज्ञाशब्दः स्वरूपप्रत्यायको न भविष्यति । तथाहि सञ्ज्ञाशब्दो यदि स्वरूपमपि प्रत्याययेत्, तर्हि " ष्णान्ता षट् " इत्यनेन षान्तसङ्ख्यावाचि – ' षष् ' प्रातिपदिकस्य षट्सञ्ज्ञा न विदध्यात् । " षड्भ्यो लुक् "[1888], " षट्चतुर्भ्यश्च "[1889] इत्यादिप्रदेशेषु च ' षष् ' इत्याकारकसञ्ज्ञया (षट्सञ्ज्ञया) स्वरूपग्रहणाद् हेतोरेव सङ्ख्यावाचिषान्तप्रातिपदिकस्य षषोऽपि ग्रहणं भविष्यत्येवेति कृतं षषोऽपि षट्सञ्ज्ञया । तस्मात् षषोऽपि विहिता षट्सञ्ज्ञा व्यर्था सती ' शब्दशास्त्रीयसञ्ज्ञाशब्दाः स्वरूपस्य ग्राहका न भवति ' इत्येवं ज्ञापयिष्यति । ततश्च ' अशब्दसञ्ज्ञा ' इति निषेधो नातीवोपयुज्यते इति मत्वा भाष्यकृता सूत्रप्रत्याख्यानपूर्वकम् ' अशब्दसञ्ज्ञा ' इति निषेधवचोऽपि प्रत्याख्यातम् ।

तथा च भाष्यम् – ' न वा शब्दपूर्वको ह्यर्थे सम्प्रत्ययस्तस्मादर्थनिवृत्तिः (वा) । न वा एतत्प्रयोजनमस्ति । किं कारणम् ? शब्दपूर्वको ह्यर्थे सम्प्रत्ययः । आतश्च शब्दपूर्वकः, योऽपि ह्यसावाहूयते नाम्ना । नाम च यदाऽनेन नोपलब्धं भवति, तदा पृच्छति – ' किं भवानाह ' इति । शब्दपूर्वकश्चास्य सम्प्रत्ययः । इह च व्याकरणे शब्दे कार्यस्य सम्भवः, अर्थेऽसम्भवः । तस्मादर्थनिवृत्तिः । तस्मादर्थस्य निवृत्तिर्भविष्यति । इदं तर्हि प्रयोजनम् । अशब्दसञ्ज्ञेति वक्ष्यामीति । इह मा भूत् – "

[1886] अष्टाध्यायी – (6-4-113)

[1887] अष्टाध्यायी – (1-1-24)

[1888] अष्टाध्यायी – (7-1-22)

[1889] अष्टाध्यायी – (7-1-55)

दाधा घ्वदाप् "[1890], " तरप्तमपौ घः "[1891] इति । शब्दसञ्ज्ञाप्रतिषेधानर्थक्यं वचनप्रामाण्यात् (वा) । शब्दसञ्ज्ञायाः प्रतिषेधोऽनर्थकः । शब्दसञ्ज्ञायां स्वरूपविधिः कस्मान्न भवति ? वचनप्रामाण्यात् । शब्दसञ्ज्ञावचनसामर्थ्यात् । ननु च वचनप्रामाण्यात् सञ्ज्ञिनां सम्प्रत्ययः स्यात्, स्वरूपग्रहणाच्च सञ्ज्ञायाः । एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति – शब्दसञ्ज्ञायां न स्वरूपविधिर्भवतीति । यदयम् – " ष्णान्ता षट् " इति षकारान्तायाः सङ्ख्यायाः षट्सञ्ज्ञा शास्ति । इतरथा हि वचन-प्रामाण्याच्च नकारान्तायाः सङ्ख्यायाः सम्प्रत्ययः स्यात् स्वरूपग्रहणाच्च षकारान्तायाः '[1892] । अर्थात् – ' एवञ्च भाष्यकृता भगवता व्याकरणशास्त्रीयकार्यजातस्यार्थेऽसम्भवात् । प्रथमोपस्थितत्वात् प्रत्यासन्नस्य स्वस्वरूपस्यैव ग्रहणसम्भवे सूत्रवैयर्थ्यम् " ष्णान्ता षट् " इति ज्ञापकात् सञ्ज्ञाशब्देन न स्वरूपग्रहणमिति ज्ञापनञ्चाश्रित्य अशब्दसञ्ज्ञा इत्यस्य च वैयर्थ्यं प्रतिपाद्याविकलमपि सूत्रमिदं प्रत्याख्यातम् । शब्दविशेषोच्चारणे उपस्थितस्यार्थस्य परित्यागे मानाभावाद् अर्थवद्ग्रहणपरिभाषाऽपि न्यायसिद्धा, एतच्च सूत्रं न्यायसिद्धार्थानुवाद एवेति मत्वा खण्डितमिति भावः । '[1893]

न चोत्तरसूत्रचतुष्टये स्वं रूपम् इत्यस्यानुवृत्त्यर्थम् । तां विनाऽपि निर्वाहात् । ग्रहणकसूत्रे स्वस्यापि स्वसावर्ण्याद् ग्रहणसिद्धेः । अन्यथा ' अवात्ताम् ' इत्यादौ " झलो झलि "[1894] इति लोपानुपपत्तेः । व्यक्तिभेदस्यात्रापि सुलभत्वात् । एवं तपरसूत्रेऽपि । " आदिरन्त्येन सहेता "[1895] इत्यत्रादिपदावृत्त्या सिद्धम् । तत्र लिङ्गं " नादिचि "[1896] इति निषेधः । अन्यथा " प्रथमयोः पूर्वसर्वणः "[1897] इत्यत्र " अकः सवर्णे दीर्घे "[1898] इत्यनुवृत्तेरकारस्य सङ्ग्रहणाभावे तदप्रसक्त्या निषेधवैयर्थ्यात् । " येन विधिस्तदन्तस्य "[1899] इत्यत्रापि ' तस्य च ' इति वार्तिककृतैव वाच्यत्वात् । तस्मात् सूत्रमिदं प्रत्याख्यातम् ।

सूत्रारम्भापेक्षया प्रत्याख्यानमेव ज्यायः – ननु " स्वं रूपं शब्दस्याशब्दसञ्ज्ञा " इति सूत्रसत्त्वे तत्तत्सौत्रशब्देन स्वरूपमात्रस्य ग्रहणं स्यात्, न तु तद्विशेषस्य तस्य च पर्यायवचनस्य तेषां

1890 अष्टाध्यायी – (1-1-20)
1891 अष्टाध्यायी – (1-1-22)
1892 भाष्यम् – प्रकृतसूत्रे
1893 भाषावृत्तेः समाक्षात्मकमध्ययनम् – प्रकृतसूत्रे
1894 अष्टाध्यायी – (8-2-26)
1895 अष्टाध्यायी – (1-1-71)
1896 अष्टाध्यायी – (6-1-102)
1897 अष्टाध्यायी – (6-1-100)
1898 अष्टाध्यायी – (6-1-99)
1899 अष्टाध्यायी – (1-1-72)

ग्रहणाय भगवान् भाष्यकारः तत्तद्वार्तिकमारम्भते । यथा - ‘ सित्तद्विशेषाणां वृक्षाद्यर्थं ’(वा) । सिदित्युपलक्षणम् । किञ्चिल्लिङ्गासङ्गेन विशेषाणां सञ्ज्ञेति वक्तव्यम् । तेन “ विभाषा वृक्षमृग..... ”[1900] इति सूत्रे वृक्षादिना तद्विशेषाणामेव ग्रहणमिष्टम्, न तु स्वरूपस्य तदर्थं सिन्निर्देशः कर्तव्य इति भाष्यम् । यथा – ‘ वृक्षस्, मृगस् ’ इत्यादि पाठ्यम् । विशेषाणामेव द्वन्द्व एकवत् । प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः । इदञ्च न्यायसिद्धम् । पर्यायाणां सहप्रयोगाभावात् सामान्यविशेषाणां चार्थाभावात् सामान्येन विशेषाणामाक्षेपाद् द्वन्द्वस्यैवानुपपत्तेः ।

‘ पित्पर्यायवचनस्य च स्वाद्यर्थम् ’(वा) । चकारात् स्वरूपस्य विशेषाणाञ्च ग्रहणम् । अर्थात् – यत्र पर्यायाणां तद्विशेषाणां स्वरूपस्य च ग्रहणमिष्टं , तत्र पिन्निर्देशः कर्तव्यः । यथा - “ स्वे पुषः ”[1901] इति सूत्रे स्वरूपस्य ‘ स्वपोषं पुष्टः ’ इति, पर्यायाणाम् - रैपोषम्, धनपोषम् । तद्विशेषाणाञ्च - अश्वपोषम्, गोपोषम्, ग्रहणमिष्टम् । इदं वाचनिकमेव ।

‘ जित्पर्यायस्यैव राजाद्यर्थम् ’(वा) । अर्थात् – “ सभा राजामनुष्यपूर्वा ”[1902] इति सूत्रे पर्यायस्यैव ग्रहणमिष्टं न स्वरूपस्य, नापि तद्विशेषाणाम् । यथा - इनसभम्, ईश्वरसभम् । नेह – राजसभा, हरिश्चन्द्रसभा । इदमपि न्यायसिद्धम् । नञ्प्रश्लेषेण अराजेति पर्युदासाश्रयणात् राजसदृशानां तत्पर्यायाणामेव ग्रहणात् । न च स्वस्यापि स्वपर्यायत्वम् । स्वभिन्नत्वे सत्यभिन्नप्रवृत्तिनिमित्तकत्वं पर्यायत्वमिति स्वीकारात् । विशेषणेन स्वस्य, विशेष्येण च विशेषवाचकपदस्य वारणात् । इनशब्दो राजशब्दपर्याय इत्यस्य राजशब्दभिन्नत्वे सति राजशब्दशक्यतावच्छेदकधर्मावच्छिन्नशक्यताक इत्यर्थः ।

‘ झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम् ’(वा) । अर्थात् – यत्र स्वरूपस्य च तद्विशेषणाञ्च ग्रहणमभीष्टम्, तत्र झिन्निर्देशः कर्तव्यः । यथा - “ पक्षिमत्स्यमृगान्हन्ति ”[1903] इत्यत्र मत्स्यादिना स्वरूपस्य तद्विशेषणाञ्च ग्रहणं भवति, न तु मीनातिरिक्तविशेषाणाम्, पाक्षिकः, मात्स्यिकः, । तद्विशेषाणाम् – शाकुनिकः, शाफरिकः । न तु पर्यायवचनानां ‘ अनिमिषान् हन्ति ’ । ‘ मिनस्येष्यते ’ इति भाष्यम् । मीनान् हन्तीति मैनिकः । मृगपक्षिणोस्तु पिन्निर्देशः कर्तव्यः । तेन स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणम् इति व्याख्यातारः । इदमपि वाचनिकम् ।

[1900] अष्टाध्यायी – (2-4-12)

[1901] अष्टाध्यायी – (3-4-40)

[1902] अष्टाध्यायी – (2-4-23)

[1903] अष्टाध्यायी – (4-4-35)

एवञ्च “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ” इति सूत्राङ्गीकारे यत्र कानिचिदेतादृशानि स्थलानि सन्ति तत्र न स्वरूपस्य ग्रहणमिष्टम्, नापि केवलं वा स्वरूपस्यैव किन्तु क्वचित् पर्यायाणाम्, क्वचित्तद्विशेषाणाम्, क्वचित् स्वरूपस्यापि पर्यायाणामपि अथापि तद्विशेषाणामपि ग्रहणमिष्टम्, तेषां प्राप्तदोषवारणाय इमानि सर्वाणि चतुर्थोपसंहारवार्तिकानि कर्तव्यानि भवन्ति । अतः एतदपेक्षया सूत्रप्रत्याख्यानमेव लाघवायेति भाष्यकृतः सिद्धान्तः ।

- **अणुदित्सवर्णस्य चाप्रत्ययः – (1-1-68)**

सूत्रार्थः – उत् इत् यस्य उदित्, अण् च उदित् च तयोः समाहारः इति अणुदित्, बहुव्रीहिगर्भसमाहारद्वन्द्वः । न प्रत्ययः इति अप्रत्ययः, नञ्तत्पुरुषः । स्वं रूपं शब्दस्याशब्दसञ्ज्ञा इति सूत्रात् ‘ स्वम् ’ इति पदमनुवर्तते । अण्प्रत्याहारः उदिच्च सवर्णस्य ग्राहको भवति स्वस्य च प्रत्ययं वर्जयित्वा । उदाहरणानि च - अस्य च्वौ । अत्र अकारेण सवर्णदीर्घाकारोऽपि गृह्यते, तेन मालीभवति इत्यत्रापि ईत्वं सिद्ध्यति । उदित् – कु (कवर्गः) चु (चवर्गः) टु (टवर्गः) तु (तवर्गः) पु (पवर्गः) ।

- **सञ्ज्ञासूत्रं वा परिभाषासूत्रं वेदम्**

“ तुल्यास्यप्रयत्नं सवर्णम् ”[1904] इति सूत्रेण येषां परस्परं सवर्णसञ्ज्ञा उक्ता तेषां अणुदित् सञ्ज्ञा अतः इदं सञ्ज्ञासूत्रमिति दीक्षिताः । यथा चोक्तं कौमुद्याम् – ‘ अविधीयमानोऽणुदिच्च सवर्णस्य सञ्ज्ञा स्यात् ’ इत्यनेन वाक्येन असन्दिग्धं भवति यत् अणामुदिताञ्च सञ्ज्ञारूपत्वं तत्सवर्णानाञ्च सञ्ज्ञिरूपत्वमिति सञ्ज्ञासञ्ज्ञिभावबोधकतया सूत्रस्यास्य सञ्ज्ञासूत्रत्वं स्वीकृतं दीक्षितेन । अतः तेन सूत्रमिदं सञ्ज्ञाप्रकरणे पठितम् ।

न्यासकारोऽपि अन्याचार्योक्तं स्वं रूपमिति सूत्रस्य परिभाषात्वमनूद्य पुनरनेकैर्हेतुभिः परिभाषासूत्रत्वं खण्डनीकृत्य यथा “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ”[1905] इति सूत्रं सञ्ज्ञासूत्रमेव साधयामास तथैवास्यापि सूत्रस्य सञ्ज्ञासूत्रत्वं स्वीचकार । यथा – ‘ तत्र केचिदाहुः – स्वरूपस्य पर्यायाणाञ्च कार्ये प्रसक्ते श्रूयमाणस्यैव तद् यथा स्यात् पर्यायाणां मा भूदिति नियमार्था परिभाषेयमिति ।

[1904] अष्टाध्यायी – (1-1-9)

[1905] अष्टाध्यायी – (1-1-68)

अन्ये तु – लिङ्गवती परिभाषा भवति । यथा – " इको गुणवृद्धी "[1906] इति गुणवृद्धी लिङ्गम् । विध्यन्तरशेषभूता वा, यथा – " विप्रतिषेधे परं कार्यम् "[1907] इति परस्य विध्यन्तरस्य शेषभावमापद्यते । न चास्या लिङ्गं विध्यन्तरशेषभावो वा विद्यते – इति सञ्ज्ञासूत्रमिदम् इति प्रतिपन्नाः । यद्यपि वृत्तौ सञ्ज्ञाशब्दो नोच्चारितः, तथापि स्वमेव रूपं शब्दस्य ग्राह्यम् इत्येवं ब्रुवता वृत्तिकारेण सञ्ज्ञैवेत्याख्यातं भवति । इति ।

अतोऽस्मिनेव सूत्रे तेनोक्तम् । यथा – सञ्ज्ञासूत्रमिदम्, न परिभाषा । सा हि नियमार्था भवति । न चाणुदितां सवर्णानामन्येषाञ्च ग्रहणं प्राप्तम्, येन सवर्णानामेव ग्रहणं भवतीति नियमः क्रियते ।' इति । पदमञ्जरीकारो हरदत्तस्तु " अणुदित्सवर्णस्य चाप्रत्ययः " इति सूत्रस्यास्य परिभाषासूत्रत्वं प्रत्याख्याय सञ्ज्ञासूत्रत्वं साधयामास । यथा – सञ्ज्ञासूत्रमेतत् न परिभाषा, प्रसिद्धार्थविनियोगात् । इति ।

' परं कौमुद्याः प्रसिद्धटीकाकारा महावैयाकरणा नागेशभट्टास्तु नैतत् सहन्ते । तेषां दृष्ट्या नेदं सञ्ज्ञासूत्रं किन्तु विधिसूत्रमिदम् । अत एव ते ' बोधकः ' इति पदमध्याहृत्य वाक्यं पूरयन्ति । तथा च तद्ग्रन्थपङ्क्तिः – ' अणमुद्दिश्य सवर्णबोधकताऽत्र विधीयते । सवर्णस्येत्यस्य बोधक इति शेषः । ' इति ।

लघुशब्देन्दुशेखरस्य बालबोधिनीटीकाकारोऽस्य सूत्रस्य व्याख्यावसरे आह – ' दीक्षितेन अविधीयमानोऽणुदिच्च सवर्णस्य सञ्ज्ञा स्यादिति सञ्ज्ञासञ्ज्ञिभावपरतयाऽर्थ उल्लिखितः । स च न युज्यते । " अदेङ् गुणः "[1908], " क्तक्तवतू निष्ठा "[1909] इत्यादौ समानविभक्तिकस्थले एव सञ्ज्ञासञ्ज्ञि-भावस्य दृष्टत्वात्, वृद्धिसञ्ज्ञासूत्रे भाष्ये च तथैवोक्तत्वाच्च । प्रकृते उद्देश्यवाचकस्याणः प्रथमान्तत्वम् । विधेयस्य सवर्णस्येत्यस्य षष्ठ्यन्तत्वमिति भिन्नविभक्तिकत्वात् कथं तद्व्यवहार इत्यत आह बोधक इति शेष इति । सवर्णस्येत्यनन्तरं बोधक इत्यध्याहार्यम् । मूलस्थसञ्ज्ञपदमपि तत्परमिति नात्र सञ्ज्ञासञ्ज्ञिभाव इति फलति ' ।[1910] इति ।

' एवञ्च लघुशब्देन्दुशेखरस्य चन्द्रकलाटीकाकर्ता श्रीभैरवमिश्र एतत्पङ्क्तिव्याख्यावसरे व्याख्यत् – यत् सञ्ज्ञात्वेन सञ्ज्ञित्वेन चाभिप्रेतस्यार्थस्य बोधकयोः पदयोः सामानाधिकरण्याभावाद् नेदं सञ्ज्ञासूत्रं भवितुमर्हति – इति शेखरकाराभिप्रायोऽस्ति । तथाहि – ' अस्य सूत्रस्य मूलोक्त-

---

[1906] अष्टाध्यायी – (1-1-3)

[1907] अष्टाध्यायी – (1-4-2)

[1908] अष्टाध्यायी – (1-1-2)

[1909] अष्टाध्यायी – (1-1-26)

[1910] शब्देन्दुशेखरः – बालबोधिनीटीका – प्रकृतसूत्रे

सञ्ज्ञासञ्ज्ञिभावबोधकत्वं सामानाधिकरणपदोपादानाभावादयुक्तम्, अत आह – अणमुद्दिश्य सवर्णबोधकतेति । ' इति । परन्तु यदि समानाधिकरणपदोपादानाभावाद् अस्य सूत्रस्य सञ्ज्ञासूत्रत्वमयुक्तम्, तर्हि तदभावादेव स्वं रूपमिति सूत्रस्यापि सञ्ज्ञासूत्रत्वमयुक्तं स्यात् । तस्य तु सञ्ज्ञासूत्रत्वमेव तत्रभवतोरीकृतम् । तेन यथाऽसामानाधिकरण्येऽपि स्वं रूपमिति सूत्रस्य सञ्ज्ञासूत्रत्वन्तथा अस्यापि सञ्ज्ञासूत्रत्वे को दोषः ? ।

अत एव हरदत्तेन ' सञ्ज्ञासञ्ज्ञिसम्बन्धे प्रायेण सामानाधिकरण्यदर्शनात् ' इति स्ववाक्ये ' प्रायेण ' इति पदं विन्यस्यता तेनापि स्वयमेव एतत्स्वीकाराच्च । तस्माद्यदि अस्य सञ्ज्ञासूत्रत्वमयुक्तं तर्हि पूर्वसूत्रस्यापि अयुक्तमेव तत्स्यात् । यदि तु तस्य युक्तं तदिति मन्यते, तर्हि अस्यापि सञ्ज्ञासूत्रत्वे न कापि अनुपपत्तिः । मन्यन्ते चान्ये प्रायः सर्वेऽप्याचार्यास्तथैव । किञ्च स्वयमेव तत्रभवान्नागेशोऽपि आहोद्द्योते – ' सामानाधिकरण्यमेव सञ्ज्ञासञ्ज्ञिनोरिति तु न नियमः, ' उञ ' इत्यादौ व्यभिचाराद् इत्याशयः । ' इति । तस्मात् सञ्ज्ञासूत्रत्वमेवास्यास्थेयम् । '[1911]

णित् प्रत्याहारविचारः – पाणिनीयव्याकरणस्याष्टाध्याय्याः प्रत्याहारसूत्रे ' अइउण् ', ' लण् ' इत्यत्र सूत्रद्वयेऽपि लोपभावी हल् णकारो द्विः पठितः । अनेन णकारेण ' अण् ' इति ' लण् ' इति च प्रत्याहारद्वयं निर्मीयते । एवञ्च येषु सूत्रेषु अण्प्रत्याहारस्य इण्प्रत्याहारस्य वा निर्देशोऽस्ति, तत्र सन्देहो जायते क्व पूर्वेण णकारेण ' अण् ' वा ' इण् ' वा प्रत्याहारो ग्राह्यः क्व च परेण वेति ? तस्य सन्देहस्य निवारणाय भवत्येषा ज्ञापकसिद्धा परिभाषा ' व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणन् ' इति ।

यत्र सूत्रे वार्त्तिकादौ च क्वचित् सन्देहः स्यात् तत्र आचार्योपदेशपरम्परारूपेण व्याख्यानेन विशेषस्य निश्चयो विधेयः न तु सन्देहमात्रेण सूत्रादिकमेवान्यथा मन्तव्यम् । यतो हि पदार्थानां साधारणधर्मं गृहीत्वा सन्देहो जायते, यदा तु तत्र कस्यचिद् विशेषस्य धर्मस्य निश्चयो भवति तदा सन्देहो निवर्तते । तदेवं सति सन्देहेऽभियुक्तैरुक्तेन षड्विधेन व्याख्यानेन विशेषार्थस्यावधारणं कर्तव्यम् । तद्यथा –

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं भवेत् ॥

1. पदच्छेदः, 2. पदार्थोक्तिः, 3. विग्रहः, 4. वाक्ययोजना (अन्वयः) 5. आक्षेपः (पूर्वपक्षः) 6. समाधानम् (उत्तरपक्षः) इति ।

सूत्रव्याख्यानमेवं कर्तव्यम् । यथा –

[1911] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

1. व्याख्येयसूत्रम् – " ण्वुल्तृचौ "[1912] ।

2. सूत्रसंख्या – (3 -1 -133)

3. सूत्रप्रकारः – विधिसूत्रम् ।

4. प्रकरणम् – कृदन्तप्रकरणम् ।

5. वृत्तिः – धातोरेतौ स्तः ।

6. अनुवृत्तिः – " कर्तरिकृत् "[1913] इति सूत्रात् कर्तरि इत्यस्य चानुवृत्तिः ।

7. अधिकारः – " धातोः " इति सूत्राद् धातोरित्यस्य अधिकारः ।

8. विभक्तिनिर्देशः – " ण्वुल्तृचौ " इत्यत्र प्रथमाद्विवचनम् ।

9. सूत्रार्थः – धातोः कर्त्रर्थे ण्वुल्प्रत्ययः तृच्प्रत्ययश्च भवतः ।

10. उद्देश्यम् – धातोः ।

11. विधेयः – ण्वुल्, तृच् च ।

12. समासः – " ण्वुल्तृचौ " इति सूत्रे ' ण्वुल् च तृच् च ' इति विग्रहे " चार्थे द्वन्द्वः "[1914] इति सूत्रेण द्वन्द्वसमासः ।

13. प्रत्ययार्थः – " कर्तरि कृत् " इति सूत्रेण कर्त्रर्थे ण्वुल्तृचौ प्रत्ययौ ।

14. अनुबन्धः – ' ण्वुल् ' इत्यत्र लकारस्य " हलन्त्यम् "[1915] इति सूत्रेण, णकारस्य " चुटू "[1916] इति सूत्रेण इत्सञ्ज्ञायाम्, " तस्य लोपः "[1917] इति सूत्रेण लोपः ।

15. अनुबन्धफलम् – णिति प्रत्ययपरे " अचो ञ्णिति "[1918] इति सूत्रेण वृद्धिः, लिति प्रत्ययपरे " लिति "[1919] इति सूत्रेण प्रत्ययात्पूर्वं उदात्तम्, चिति प्रत्ययपरे " चितः "[1920] इति सूत्रेण अन्तोदात्तः च इति स्वरकार्यम् ।

16. उदाहरणम् – **'** कारकः, कर्ता ' इत्यादि ।

[1912] अष्टाध्यायी – (3-1-133)

[1913] अष्टाध्यायी – (3-4-67)

[1914] अष्टाध्यायी – (2-2-29)

[1915] अष्टाध्यायी – (1-3-3)

[1916] अष्टाध्यायी – (1-3-7)

[1917] अष्टाध्यायी – (1-3-9)

[1918] अष्टाध्यायी – (7-2-115)

[1919] अष्टाध्यायी – (6-1-190)

[1920] अष्टाध्यायी – (6-1-160)

17. सिद्धिः – ‘ कारकः ’ – ‘ डुकृञ् करणे ’ इत्यस्य क्रियावाचकत्वाद् “ भूवादयो धातवः ”[1921] इति सूत्रेण धातुसञ्ज्ञायाम्, “ आदिर्ञिटुडवः ”[1922] इति सूत्रेण ‘ डु ’ इत्यस्य इत्सञ्ज्ञायाम् “ हलन्त्यम् ” इति सूत्रेण च ञकारस्य इत्सञ्ज्ञायाम् “ तस्य लोपः ” इति सूत्रेण लोपे ‘ कृ ’ इत्यवशिष्यते । तस्मात् कर्तृत्वविवक्षायाम् “ ण्वुल्तृचौ ” इति सूत्रेण ण्वुल्प्रत्यये अनुबन्धलोपे ‘ कृ + वु ’ इति स्थिते “ युवोरनाकौ ”[1923] इति सूत्रेण वुस्थाने अकादेशे, ‘ कृ + अक ’ इति जाते, णिति परे “ अचो ञ्णिति ” इति सूत्रेण ऋकारस्य वृद्धौ, “ उरण रपरः ”[1924] इति सूत्रेण रपरत्वे, वर्णसम्मेलने ‘ कारक ’ इति जाते “ कृत्तद्धितसमासाश्च ”[1925] इति सूत्रेण कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां कर्तुः एकत्वस्य च विवक्षायाम् “ स्वौजसः...... ”[1926] इति सूत्रेण सुविभक्तौ, अनुबन्धलोपे, रुत्वे , विसर्गे च कृते ‘ कारकः ’ इति निष्पद्यते ।[1927]

‘ कर्ता ’ – पूर्ववत् ‘ कृ ’ इत्यस्माद् धातोः “ ण्वुल्तृचौ ” इति सूत्रेण कर्त्रर्थे तृच्प्रत्यये, अनुबन्धलोपे ‘ कृ + तृ ’ इति जाते, प्रत्ययस्य तिङशिद्भिन्नत्वात् धातोर्विहितत्वाच्च “ आर्धधातुकं शेषः ”[1928] इति सूत्रेण आर्धधातुकसञ्ज्ञायाम्, “ सार्वधातुकार्धधातुकयोः ”[1929] इति सूत्रेण ऋकारस्य गुणे, “ उरण् रपरः ” इति रपरत्वे ‘ कर् + तृ ’ इति स्थिते कृदन्तत्वात् प्रातिपदिकत्वे प्रथमैकवचने सुविभक्तौ, अनुबन्धलोपे, “ ऋदुशनस्पुरुदंसोऽनेहसां च ”[1930] इति सूत्रेण ऋकारस्य अनङादेशे, अनुबन्धलोपे ‘ कर्तन् + स् ’ इति जाते, “ अलोऽन्त्यात् पूर्व उपधा ”[1931] इति सूत्रेण उपधासञ्ज्ञायाम्, “ सर्वनामस्थाने चासम्बुद्धौ ”[1932] इत्यनेन नान्तोपधाया दीर्घे, “ हल्ङ्याब्भ्यो दीर्धात् सुतिस्यपृक्तं हल्

[1921] अष्टाध्यायी – (1-3-1)
[1922] अष्टाध्यायी – (1-3-5)
[1923] अष्टाध्यायी – (7-1-1)
[1924] अष्टाध्यायी – (1-1-51)
[1925] अष्टाध्यायी – (1-2-46)
[1926] अष्टाध्यायी – (4-1-2)
[1927] पाणिनीयव्याकरणोदाहरणकोशः – भागः –1 – (पृ. – 146)
[1928] अष्टाध्यायी – (3-4-114)
[1929] अष्टाध्यायी – (7-3-84)
[1930] अष्टाध्यायी – (7-1-94)
[1931] अष्टाध्यायी – (1-1-65)
[1932] अष्टाध्यायी – (6-4-8)

"[1933] इति सूत्रेण सकारलोपे, " नलोपः प्रातिपदिकान्तस्य "[1934] इति सूत्रेण नकारलोपे ' कर्ता ' इति रूपं परिनिष्ठतं भवति।[1935]

18. प्रत्युदाहरणम् – ' कृतिः '।

19. व्यावृत्तिः – धातोः विहितत्वात् सुबन्तात् प्रातिपदिकाद् वा न ण्वुल्तृच्प्रत्ययः। कर्त्रर्थे विहितत्वात् कर्तृभिन्नार्थे ' कृतिः ' इत्यादौ न सः।

20. विशेषः – अनयोः वर्तमानकालादन्यत्र न प्रयोग इति भाष्यम्।

21. विवेचना – " तस्यापत्यम् "[1936] अस्मिन् सूत्रे " समर्थानां प्रथमाद्वा "[1937] इति सूत्रात् पदत्रयमधिक्रियते। तत्र सामर्थ्यं परिनिष्ठितत्वं कृतसन्धिकार्यमिति यावत्। ' प्रथमात् ' इत्यनेन समर्थानां मध्ये सूत्रेषु प्रथमोच्चारितादित्यर्थः। यथा " तस्यापत्यम् " इत्यत्र प्रथमोच्चारितं षष्ठ्यन्तपदम्, तस्मादित्यर्थः। वा शब्दो विकल्पार्थकः। अपत्यमिति अपत्यार्थपरम्। समर्थादित्यस्य " समर्थः पदविधिः "[1938] इति सूत्राल्लाभः। तथा हि समर्थादित्यस्य विशिष्टैकार्थप्रतिपादकादित्यर्थः। सुबन्तात् तद्धितोत्पत्तिरिति सिद्धान्तेन तद्धितविधेः। पदविधित्वात् " समर्थः पदविधिः " इति सूत्रस्यायं विषयः।

22. पदच्छेदः – " तस्यापत्यम् " इति सूत्रे ' तस्य अपत्यम् ' इति पदच्छेदः।

23. सन्धिः – " तस्यापत्यम् " इति सूत्रे " अकः सवर्णे दीर्घः "[1939] इति सूत्रेण पूर्वपरयोः दीर्घैकादेशः।

24. पदार्थोक्तिः – " तस्यापत्यम् " इति सूत्रे ' तस्य ' इति न स्वरूपग्रहणम्। किन्तु षष्ठ्यन्तमात्रोपलक्षणम्। अतः षष्ठ्यन्तादित्यर्थः। पञ्चम्यर्थोऽध्याहारलभ्यः। अनुकरणात् पञ्चम्याः सौत्रो लुग्वा। ' तत् ' इति शब्दः सर्वनामतया बुद्धिस्थपरामर्शित्वाद् ' उपगुः, गर्गः ' इत्यादिसर्वविशेष-बोधकः। ' अपत्यम् ' इति शब्दोऽत्र कोशानुरोधाद् नात्मजपर्यायः, किन्तु पुत्रपौत्रादिसन्ततिपर्यायः, न पतन्ति नरके पितरो येन तदपत्यमिति " पङ्क्तिविंशति ...... "[1940] इति सूत्रभाष्ये व्युत्पादितत्वात्।

[1933] अष्टाध्यायी – (6-1-67)

[1934] अष्टाध्यायी – (8-2-7)

[1935] पाणिनीयव्याकरणोदाहरणकोशः – भागः – 1 – (पृ. – 140)

[1936] अष्टाध्यायी – (4-1-92)

[1937] अष्टाध्यायी – (4-1-82)

[1938] अष्टाध्यायी – (2-1-1)

[1939] अष्टाध्यायी – (6-1-99)

[1940] अष्टाध्यायी – (5-1-59)

25. निमित्तः – " इको यणचि "[1941] इति सूत्रे ' अचि ' इति निमित्तः ।

26. विग्रहः – ' गार्ग्यः ' इत्यत्र ' गर्गस्य गोत्रापत्यम् ' इति विग्रहः ।

27. सूत्रयोगविभागः – " आतो धातोः "[1942] इति सूत्रे धातोः इति पदस्य योगविभागः कृतः भाष्ये ।

28. सूत्रसन्देहः – " अणुदित् सवर्णस्य चाप्रत्ययः " इत्येतस्मिन् सूत्रे अण्प्रत्याहारः पूर्वेण वा णकारेण परेण वा इति सन्देहः ।

29. सूत्रज्ञापितपरिभाषा – ' लण् ' इति सूत्रे भाष्यकारेणोक्तम् – अयं णकारो द्विरनुबध्यते पूर्वश्चैव परश्च । तत्राण्ग्रहणेषु इण्ग्रहणेषु च सन्देहो भवति – पूर्वेण वा स्युः परेण वेति । कतमस्मिंस्तावदण्ग्रहणे सन्देहः ? " ढ्रलोपे पूर्वस्य दीर्घोऽणः "[1943] इति । असन्दिग्धम् (वा) असन्दिग्धम् – पूर्वेण, न परेण । .... अस्मिंस्तर्ह्यण्ग्रहणे सन्देहः – " अणुदित् सवर्णस्य चाप्रत्ययः " इति । असन्दिग्धं परेण, न पूर्वेण । कुत एतत् ? सवर्णेऽण् तपरं ह्युरॄत् (वा) । यदयं " उरॄत् "[1944] इत्यृकारे तपरकरणं करोति, तज्ज्ञापयत्याचार्यः – परेण, न पूर्वेणेति । पुनश्चात्रैव सूत्रेऽग्रे आह भगवान् भाष्यकारः – किं पुनर्वर्णोत्सत्ताविवायं णकारो द्विरनुबध्यते ? व्याख्यानाच्च द्विरुक्तिः (वा) । एतज्ज्ञापयत्याचार्यः – भवत्येषा परिभाषा – ' व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् ' इति । अणुदित् सवर्णस्य इत्येतत् सूत्रं परिहाय पूर्वेणाण्ग्रहणम् । परेणेण्ग्रहणमिति व्याख्यास्यामः '[1945] । इति भाष्यम् ।

30. आक्षेपः – " अणुदित्सवर्णस्य चाप्रत्ययः " इत्यस्मिन् सूत्रे ' अप्रत्ययः इति किमर्थम् ? ' अर्थात् कस्मै प्रयोजनाय इति आक्षेपः ।

31. समाधानम् – " सनाशंसभिक्ष उः "[1946] इति सूत्रविहितेन उप्रत्ययेन सवर्णानां ग्रहणं मा भूदित्यर्थम् ' अप्रत्ययः ' इति पदग्रहणम् ।

[1941] अष्टाध्यायी – (6-1-76)

[1942] अष्टाध्यायी – (6-4-140)

[1943] अष्टाध्यायी – (6-3-111)

[1944] अष्टाध्यायी – (7-4-7)

[1945] भाष्यम् – प्रकृतसूत्रे

[1946] अष्टाध्यायी – (3-2-168)

एवञ्चात्र आचार्योपदेशपरम्परारूपव्याख्यानेन चत्वारि इमानि अण्ग्रहणानि पूर्वेण णकारेण – 1. " उरण् रपरः ", 2. " ढ्रलोपे पूर्वस्य दीर्घोऽणः ", 3. " केऽणः "[1947], 4. " अणोऽप्रगृह्यस्यानुनासिकः "[1948] इति ।

" अणुदित् सवर्णस्य चाप्रत्ययः " इति सूत्रे एकं परेण । इण्ग्रहणानि तु सर्वाण्येव परेणेति ।

तत्र कथं व्याख्यानं कृत्वा विशेषार्थस्य निश्चयः क्रियत इति दिङ्मात्रमधस्तात् प्रस्तूयते । यथा –

" ढ्रलोपे पूर्वस्य दीर्घोऽणः " इत्यत्र ' अण् ' इति प्रत्याहारः पूर्वेण वा णकारेण गृह्यते परेण वेति सन्देहः ?

पूर्वेणैव णकारेणेति निश्चप्रचमेतद् । कुतः ? परेण णकारेण गृहीतः स्याच्चेदत्र ' अणः ' इत्येतस्य ग्रहणमेव व्यर्थं स्यात् । यतो हि " अचश्च "[1949] इति सूत्रेण ह्रस्वो दीर्घः प्लुतश्च अच एव स्थाने भवन्तीति कृत्वा ' अचः ' इत्युपस्थितं स्यादेव, पुनरपि यद् अण्ग्रहणं करोति, तस्य एतदेव प्रयोजनं यद् " ढ्रलोपे पूर्वस्य दीर्घोऽणः " इत्येवमादिकेषु सूत्रेषु पूर्वेणैव णकारेण प्रत्याहारोऽयं ग्रहीतव्य इति ।

" अणुदित् सवर्णस्य चाप्रत्ययः " इत्येतस्मिन् सूत्रे अण्प्रत्याहारः पूर्वेण वा णकारेण परेण वा इति जिज्ञासोदेति ।

एतत्सूत्रस्थोऽयम् अण्प्रत्याहारः परेणैव णकारेणेति नास्ति कश्चित् सन्देहः । कथम् ? सूत्रकारस्य " उरॄत् " इति स्वीयं वचनमेवात्र ज्ञापकम् । तथा हि अस्मिन् सूत्रे ऋकारस्य तपरकरणे एतत् प्रयोजनं यद् ' अचीकृतत् ' इत्येवमादिषु प्रयोगेषु ' कॄत् + णिच् + चङ् + त् ' इति स्थितौ ॠकारस्य स्थाने ह्रस्व एव ऋकारादेशो यथा स्यात् " स्थानेऽन्तरतमः "[1950] इति परिभाषया प्रमाणकृतान्तर्येण " अणुदित् सवर्णस्य चाप्रत्ययः " इति ग्राहकशास्त्रसाहाय्येन दीर्घस्य दीर्घादेशो मा भूदिति । दीर्घस्य दीर्घवचने प्रयोजनं नास्तीति कृत्वा ह्रस्व एव भविष्यति इति चेत्, " ॠत इद्धातोः "[1951] इति इत्ववारणरूप-प्रयोजनस्य सत्त्वात् । एवञ्च दीर्घॠकारस्य स्थाने प्राप्तं दीर्घादेशविधानं वारयितुमेव तपरकरणमिति सिद्धम् । परं यदि पूर्वणकारेणाण्ग्रहणं स्यात् तर्हि पूर्वस्मिन्नणि ऋकारस्यासमावेशाद् ऋकारस्य सवर्ण-ग्रहणं प्राप्तमेव न भवति, तत् किं सवर्णनिवृत्त्यर्थेन ऋकारस्य तपरकरणेन ? कृतन्तु ज्ञापयति यद् " अणुदित् सवर्णस्य चाप्रत्ययः " इत्यस्मिन् सूत्रे परेण णकारेणाण् गृह्यते । तथा तु सति " उरॄत् " इत्यत्र

[1947] अष्टाध्यायी – (7-4-13)

[1948] अष्टाध्यायी – (8-4-57)

[1949] अष्टाध्यायी – (1-2-28)

[1950] अष्टाध्यायी – (1-1-50)

[1951] अष्टाध्यायी – (7-1-100)

ऋकारस्य तपरकरणं सार्थकं भवति, इतरथा हि सवर्णग्राहकतया दीर्घस्थानिनो दीर्घ एवादेशः स्यादिति । एवञ्च " उर्ऋत् " इत्यत्र तपरकरणरूपलिङ्गेन अणुदित्सूत्रस्थस्य अण्प्रत्याहारस्य विशेषार्थस्य निश्चयो जातः ।

" इण्कोः "[1952] इत्यादिषु येषु सूत्रेषु इण्प्रत्याहारः पठ्यते, तत्र पूर्वेण वा णकारेण परेण वा ग्रहणं कार्यम् ? । इह तु सर्वत्रापि असन्दिग्धं परेणैव णकारेण इण्प्रत्याहारो ग्राह्यः । कथम् ? पूर्वेण हि णकारेण इण्ग्रहणे सति ' इ – उ ' इति वर्णद्वयं गृहीतं भवति । आचार्यप्रवृत्तिश्च ज्ञापयति – यत्र क्वचिदनयोर्द्वयोरपि वर्णयोः कार्यं भवति, तत्र ' इ – उ ' इत्येतयोर्विभक्त्या सह सन्धिं विधाय ' य्वोः ' इत्येवं स्वरूपेण निर्दिशति – " अचि श्नुधातुभ्रुवां य्वोरियङुवङौ "[1953] इति यथा ।

' य्वोः ' इति निर्देशापेक्षया ' इणः ' इति निर्देशे मात्रागौरवमपि नास्ति, अपितु अर्धमात्राया लाघवमेवास्ति । तद् यथा ' इणः ' इति ग्रहणे ' इ ' इत्यस्य एका मात्रा, ' ण् ' इत्यस्यार्धमात्रा, एकमात्राणकारोत्तराकारस्य, अर्धमात्रा च विसर्गस्य, सर्वासां योगस्तिस्रो मात्राः । ' य्वोः ' इति ग्रहणे च ' य् ' इत्यस्यार्धमात्रा, ' व् ' इत्यस्याप्यर्धमात्रा, द्वे मात्रे ओकारस्य, अर्धमात्रा च विसर्गस्य, सर्वासां च योगः सार्धत्रिमात्रा इति भवति । एवञ्च ' इ – उ ' इत्येतयोर्निर्देशे कर्तव्ये य्वोरित्येतदपेक्षया ' इणः ' इत्येवं परे निर्देशे लाघवं भवति । पुनरपि ' इ – उ ' इति निर्देश्ये स्थले इण्प्रत्याहारं न पठति, अनेन एतन्निश्चीयते सर्वत्र परेणैव णकारेण इण्प्रत्याहारः साध्यते इति ।

तथा च ' लण् ' इति सूत्रे भाष्यकारेणोक्तम् – ' अयं णकारो द्विरनुबध्यते पूर्वश्चैव परश्च । तत्राण्ग्रहणेषु इण्ग्रहणेषु च सन्देहो भवति – पूर्वेण वा स्युः परेण वेति । कतमस्मिंस्तावदण्ग्रहणे सन्देहः ? " ढ्रलोपे पूर्वस्य दीर्घोऽणः " इति । असन्दिग्धम् (वा) असन्दिग्धम् – पूर्वेण, न परेण । .... अस्मिंस्तर्ह्यण्ग्रहणे सन्देहः – " अणुदित् सवर्णस्य चाप्रत्ययः " इति । असन्दिग्धं परेण, न पूर्वेण । कुत एतत् ? सवर्णेऽण् तपरं ह्युर्ऋत् (वा) । यदयम् " उर्ऋत् " इत्यृकारे तपरकरणं करोति, तज्ज्ञापयत्याचार्यः – परेण, न पूर्वेणेति । पुनश्चात्रैव सूत्रेऽग्रे आह भगवान् भाष्यकारः – किं पुनर्वर्णोत्सत्ताविवायं णकारो द्विरनुबध्यते ? व्याख्यानाच्च द्विरुक्तिः (वा) । एतज्ज्ञापयत्याचार्यः – भवत्येषा परिभाषा – व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् इति । अणुदित् सवर्णस्य इत्येतत् परिहाय पूर्वेणाण्ग्रहणम् । परेणेण्ग्रहणमिति व्याख्यास्यामः ।'[1954] इति ।

[1952] अष्टाध्यायी – (8-3-57)

[1953] अष्टाध्यायी – (6-4-77)

[1954] भाष्यम् – प्रकृतसूत्रे

अस्यायं भावः – अणुदित्सूत्रेऽण्ग्रहणं परेणैव णकारेण न पूर्वेण। तत्फलन्तु " उरण् रपरः " इति सूत्रे अणुदित्सूत्रप्रवृत्त्या ' उः ' इत्यनेन दीर्घस्यापि ऋकारस्य ग्रहणात् " ॠत इद्धातोः " इति विहितस्य दीर्घॠकारस्थानिकस्य इकारस्य ' गीः, पूः ' इत्यादौ रपरत्वं सिध्यति, ऊकालोऽज् इत्यत्रैचि अणुदित्सूत्रप्रवृत्त्या त्रिमात्राणामेचां प्लुतसञ्ज्ञा सिध्यति। तथा च दीर्घ ॠकारस्थाने आन्तरतम्याद् दीर्घऋकार एव स्यात्, स मा भूत् किन्तु दीर्घऋकारस्थानेऽपि ह्रस्व एव भवत्विति तपरकरणं स्वांशे चरितार्थम्। फलञ्च ' गीः, पूः ' इत्यादावपि " उरण् रपरः " इत्यादेः प्रवृत्तिरूपं पूर्वोक्तं बोध्यम्।

तद्भाष्यव्याख्यायां चाह प्रदीपकारः कैयटः – ' सवर्णे इति। अचीकृतदिति ऋकारस्य ऋकार एव यथा स्याद् ॠकारो मा भूदित्येवमर्थं तपरत्वं क्रियते। यदि च पूर्वेण णकारेणाण्ग्रहणं स्यादृकारोऽनण्त्वाद्भिन्नकालस्य ग्राहक एव न भवतीति ॠकारो नैव स्थानी, नाप्यादेशः प्रसजतीति किं तपरत्वेन? कृतं तज्ज्ञापकं परेणाण्ग्रहणस्य।'[1955] इति। तथाहि काशिकायाम् – ' परेण णकारेण प्रत्याहार ग्रहणम् '[1956] इति, कौमुद्याञ्च – ' अत्राण् परेण णकारेण '[1957] इति।

एवञ्चान्यत्रापि यत्र क्वचित् शिष्टवचनेषु सन्देहः स्यात् तत्र व्याख्यानेन विशेषमन्विष्य सत्यविषयो निश्चेतव्यः, किन्तु तद्वचनं व्यर्थमेवेति ज्ञात्वा न हातव्यम्। सन्दिग्धेषु लौकिकव्यवहारेषु चापि विशेषव्याख्यानेनैव निर्णयः क्रियते इति प्रतिदिनमस्माकमनुभव इति।

- **उदित्पदविषयविचारः**

' उदित् ' इत्यंशे ' अप्रत्ययः ' इति न सम्बध्यते। तथा च विधीयमानोऽविधीयमानः सर्वोऽप्युदित्सवर्णग्राहको भवति। " चोः कुः "[1958] इत्यादौ विधीयमानेऽप्युदित्करणसामर्थ्यात् तेन ' वाक्, वाग् ' इत्यादि सिध्यति। अतः उदित्पदम् ' कु चु टु तु पु ' एतेषु पदेषु योगरूढिम्, न तु ' उत् इत् यस्य सोऽयमुदित् ' इति योगमात्रमाश्रियेत। यदि योगमात्रेण ' कुक्, टुक् ' इत्यादीनामपि उदित्त्वात् तत्रापि सवर्णग्रहणं प्रसज्येत। अतो नात्र योगमात्रं किन्तु योगरूढिः। तथा च उदित्पदबोध्यं ' कु ' इत्यादिपदं स्वाद्यकादिवर्णस्य ये सवर्णाः कादयस्तेषां बोधकम्। तथा च ' कु ' इत्यादिसञ्ज्ञा ककारादयो वर्णाः सञ्ज्ञिनः। उदित्पदं स्वसवर्णस्य बोधकम् इति तु न सम्यक् क्वादिसमुदायस्य सवर्णाप्रसिद्धेः।

1955 भाष्यम् – प्रदीपः – प्रकृतसूत्रे

1956 काशिका – प्रकृतसूत्रे

1957 कौमुदी – प्रकृतसूत्रे

1958 अष्टाध्यायी – (8-2-30)

अत एवाह शब्देन्दुशेखरे नागेशः – ‘ ननु चोरित्यादावनुवादे कथमुदित्त्वमिति चेन्न । व्याकरणान्तरे एषामुदित्सञ्ज्ञकत्वेनादोषात् । उपदेशशब्दस्य करणसाधनत्वेन शास्त्रपरत्वेऽस्यापि शास्त्रत्वेनेत्त्वप्रवृत्तेः सुलभत्वाच्च ।’[1959] अर्थात् – व्याकरणान्तरे एषामुदित्सञ्ज्ञा कृता, तामेव सञ्ज्ञामाश्रित्य अत्रापि व्यवाहरत् भगवान् पाणिनिः ।

तथा चोक्तं शब्दकौस्तुभे दीक्षितेन – ‘ उदित् “ कुहोश्चुः ” ‘ चकार, जगाद ’ । ‘ अप्रत्ययः ’ इति निषेधस्तु उगित्सु न प्रवर्तते, उगित्करणसामर्थ्यात् । अत एव ‘ भाव्यमानोऽण् (एव) सवर्णान्न गृह्णाति ’ आहुः ।’[1960] “ अणुदित् सवर्णस्य चाप्रत्ययः ” इति सूत्रे सवर्णस्य ‘ च ’ इति पदानन्तरं विद्यमानः चकारः ‘ उदित् ’ इत्यनन्तरं योजनीयः । स च त्वर्थकः । उदित्तु इत्यर्थलाभः । तेनात्राप्रत्ययः इति न सम्बध्यते इति लभ्यते । अत एव “ चोः कुः ” इत्यादौ विधेयेऽपि सवर्णग्रहणं सिध्यतीति तात्पर्यम् ।

अत एव ‘ उदित् ’ इत्यनेन सह ‘ अप्रत्ययः ’ इत्यस्य सम्बन्धो नास्ति, “ चोः कुः ”[1961], “ स्तोः श्चुना श्चुः ”[1962], “ ष्टुना ष्टुः ”[1963] इत्यादौ सवत्र विधेये उदित्करणसामार्थ्यात् । यदि हि अविधीयमानार्थकस्याप्रत्ययस्य उदिताऽपि सम्बन्धः स्यात्तर्हि विधेये सवर्णग्रहणाप्रसक्त्या तत्रत्यमुदित्करणमेव व्यर्थं स्यात्, अतो विधेये उदिदुच्चारणसामर्थ्यात् ‘ अप्रत्ययः ’ इत्यस्योदिता सह नास्ति सम्बन्धः, किन्तु केवलमणा सहैव । अण् विधीयमानः सवर्णग्राहको न भवति, किन्तु अविधीयमान एव तथा । उदित्तु विधीयमानोऽपि भवत्येव सवर्णग्राहक इति यावत् । अत एव एकादेशानुमत्त्याऽप्रत्ययग्रहणज्ञापिताया “ ज्यादादीयसः ”[1964] इति सूत्रे आदिति दीर्घोच्चारणज्ञापिताया वा अप्रत्ययपदस्य यौगिकत्वे तदर्थरूपाया वा ‘ भाव्यमानेन सवर्णानां ग्रहणं न ’ इत्यस्याः परिभाषायाः स्थाने अण्पदघटिताम् ‘ भाव्यमानोऽण् सवर्णान् न गृह्णाति ’ इत्येवंविधां परिभाषां पठन्ति नव्याः – इति परिभाषेन्दुशेखरे नागेशः ।’[1965]

‘ भाव्यमानोऽप्युकारादेशः सवर्णान् गृह्णाति “ ऋत उत् ”[1966] इति तपरकरणाल्लिङ्गात् । तेन ‘ अमुना, अमूभ्याम् ’ इत्यत्र ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घः सिध्यति । न चैवं “ सनाशंसभिक्ष उः ”

[1959] शब्देन्दुशेखरः – प्रकृतसूत्रे
[1960] शब्दकौस्तुभः – प्रकृतसूत्रे
[1961] अष्टाध्यायी – (8-2-30)
[1962] अष्टाध्यायी – (8-4-40)
[1963] अष्टाध्यायी – (8-4-41)
[1964] अष्टाध्यायी – (6-4-160)
[1965] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे
[1966] अष्टाध्यायी – (6-1-109)

इत्युप्रत्ययोऽपि सवर्णं गृह्णात्विति वाच्यम्, आदेशविषयकस्य ज्ञापकत्वात् '[1967] इति दीक्षितेनोक्तं शब्दकौस्तुभे।

- **अप्रत्ययपदविषयविचारः**

भाष्ये एतत्सूत्रे भाव्यमानेनेतिपरिभाषाज्ञापनाधिकरणे ' अप्रत्यय ' इति ' किमर्थम् ' इति प्रश्नस्य किं यस्य प्रत्ययसञ्ज्ञा विहिता तस्य प्रतिषेधः, उत यः प्रतीयते = विधायते इति यौगिकः प्रत्ययस्तस्यापीति प्रश्नः इत्याशयं वर्णयित्वा तत्रैव सिद्धान्तप्रयोजनभाष्ये एवं तर्हि सिद्धे सति यद् ' अप्रत्ययः ' इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो – भवत्येषा परिभाषा – ' भाव्यमानेन सवर्णानां ग्रहणं न '[1968] इति। इत्यस्याः पङ्क्तेराशयः भाष्यव्याख्याप्रदीपे प्रोक्तः कैयटेन – ' प्रतीयते = विधीयते इति यौगिकस्यात्र प्रत्ययस्य ग्रहणमिति भावः। अत्र प्रदीपाशय इदृशः प्रतीयते विधीयत इति ' प्रत्ययः ' इति यौगिकस्य प्रत्ययशब्दस्यात्र ग्रहणम्। एवञ्च प्रत्ययभिन्न एवाण् सवर्णाद् ग्रहीष्यति, प्रत्ययश्च विधीयमानमात्रं तत्रागमादेशयोरपि संग्रहो भवितुमर्हति। एवञ्च ' भाव्यमानेन सवर्णानां ग्रहणं न ' इत्येषा परिभाषा योगार्थतो ज्ञापितेति भावः '[1969]।

एवञ्च कैयटोक्तव्याख्यानमनुसृत्य हरदत्तेनाऽपि ' अप्रत्ययः ' इति पदस्य यौगिकत्वमेव स्वीकृत्य व्याख्यानं विहितं काशिकाव्याख्यापदमञ्जर्याम् – ' एवं तर्ह्यप्रत्यय इति नेह सञ्ज्ञाकरणम्, किं तर्हि ? अन्वर्थग्रहणम् – प्रतीयते = विधीयते इति प्रत्ययः, भाव्यमानः सवर्णान्न गृह्णातीत्यर्थः। इशादयोऽपि भाव्यन्ते। सञ्ज्ञाप्रत्ययस्य तु नावश्यकः प्रतिषेधः। येनार्थं प्रतियन्ति स प्रत्ययः, न हि दीर्घप्लुतयोरर्थस्याभिधानमस्ति '[1970]।

कैयटाद्युक्तव्याख्यानुकरणं कृतं दीक्षितेन कौमुद्याम् – ' प्रतीयते विधीयते इति प्रत्ययः। अविधीयमानोऽणुदिच्च सवर्णस्य सञ्ज्ञा स्यात् '[1971]। इति। अप्रत्ययस्य यौगिकत्वमेव स्वीकृतं दीक्षितेन।

[1967] शब्दकौस्तुभः – प्रकृतसूत्रे

[1968] भाष्यम् – प्रकृतसूत्रे

[1969] भाष्यम् – प्रदीपः – प्रकृतसूत्रे

[1970] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[1971] कौमुदी – प्रकृतसूत्रे

अस्यायं निष्कर्षः – ' प्रतीयते विधीयते इति प्रत्ययशब्दः योगरूढ्या प्रत्ययसञ्ज्ञकपर एव स्यात्तर्हि आदेशेषु आगमेषु च सवर्णग्रहणनिषेधाभावाद् " इदम इश् "[1972], " अम् सम्बुद्धौ "[1973], " आर्धधातुकस्येड् वलादेः "[1974] इत्यादौ सवर्णग्रहणेन दीर्घानामपि आगमादेशानां प्रसक्तिः स्यात्। केवलं यत्र प्रत्ययसञ्ज्ञकाः प्रत्ययविशेषा विधीयन्ते। तत्रैव " सनाशंसभिक्ष उः ", " अ साम्प्रतिके "[1975] इत्यादौ सवर्णग्रहणं वारितं स्यात्। अत आगमादेशेषु सवर्णग्रहणातिप्रसक्तिवारणाय अप्रत्ययशब्दस्य यौगिकत्वमेवास्थेयम्। ततश्च एतत्सिद्धार्थनिरूपणपरैव ' भाव्यमानेन सवर्णानां ग्रहणं न ' इति परिभाषा भाव्यमानोऽण् सवर्णान्न गृह्णाति इति परिभाषा वाऽस्ति न त्वपूर्वार्थकथनपरेति वर्णयन्ति। तेषां मते ' अप्रत्ययादेशटित्किन्मित इति वक्तव्यम् ' (वा) इति वार्तिकमपि एतदभिप्रायकमेवेत्यभिप्रायः। एतादृशमतस्थापकेषु प्रधाना सन्ति कैयटभट्टोजिदीक्षितहरदत्तभाषावृत्तिकारादयश्च।'[1976] अतः प्रत्यय-पदं प्रतीयते विधीयते इति विग्रहं निष्पन्नं विधीयमानमात्रस्य बोधकम्।

परमत्र विषये कैयटादिभ्यो भिन्नमेव मतं भाष्यव्याख्योद्द्योते स्थापितं नागेशभट्टेन – ' वस्तुत एकदेशानुमतिद्वारा तां परिभाषां ज्ञापयतीति भाष्याक्षरार्थः। विधीयते इत्यर्थे प्रतीयते इत्यस्य प्रयोगादृष्ट्या कैयटोक्तं चिन्त्यम् '[1977]। एवं शब्देन्दुशेखरेऽपि तेनोक्तम् – ' प्रत्ययपदस्य तदर्थत्वन्तु न युक्तं वार्तिककृता टित्किन्मित्सूपसंख्यानोक्तेः। भाष्यकृता चाप्रत्ययग्रहणमेतत्परिभाषा ज्ञापकमित्युक्तेः। " ज्यादादीयसः " इति सूत्रे भाष्ये ध्वनितमिदम्। तत्र हि किमर्थमादित्युच्यते ' ज्याद ' इत्येवोच्यताम्, का रूपसिद्धिः, आन्तर्यतो दीर्घस्य दीर्घो भविष्यति। एवन्तर्हीदमेव ज्ञापयति भवत्येषा परिभाषा भाव्यमानेनेत्यादि। त्वदुक्तव्याख्याने हि पूर्वपक्षसिद्धान्तयोरुभयोरपि निर्दलत्वापत्तिः '[1978]।

अत्रायं निष्कर्षः – ' लोके प्रत्ययपदस्य ज्ञानपरत्वं क्वचिद्धेतुपरत्वं शास्त्रे तु सनादिपरत्वं विधीयमानपरत्वन्तु न कुत्रापि दृष्टमित्यभिप्रायः नागेशस्य। अर्थात् ' कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः ' इति न्यायसञ्चारस्यात्र शास्त्रे आवश्यत्वेन विना प्रमाणं तस्य बाधे मानाभावेन प्रत्ययपदं रूढ्या प्रत्ययपरमिति भावः। अत एव प्रतीयते विधीयते इति व्युत्पत्त्या प्रत्ययपदेन

[1972] अष्टाध्यायी – (5-3-3)

[1973] अष्टाध्यायी – (7-1-99)

[1974] अष्टाध्यायी – (7-2-35)

[1975] अष्टाध्यायी – (4-3-9)

[1976] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[1977] भाष्यम् – उद्द्योतः – प्रकृतसूत्रे

[1978] शब्देन्दुशेखरः – प्रकृतसूत्रे

भाव्यमानमात्रस्य संग्रहो नोचितः। वार्तिककृता ‘ टित्किन्मित्सूपसंख्यानम् ’ इत्युक्तेः। अर्थात् ‘ लविता ’, ‘ बभूव ’, ‘ अनड्वान् ’ इत्यादौ पक्षे ‘ इट्-वुक्-आम् ’ इत्यादयः दीर्घा अपि प्राप्नुवन्ति, कदाचिद् अनुनासिकोऽपि प्राप्नोति। अत एव टित्-कित्-मित्सु सवर्णग्रहणनिषेधस्य ‘ उपसंख्यानं कर्तव्यम् ’ इत्युक्तं वार्तिककारेण। यद्यपि भाष्यतः प्रतीयते – विधीयते इत्यर्थो नोपलभ्यते, किन्तु प्रत्ययपदं प्रत्ययसञ्ज्ञकपरमेव। तत्र “ सनाशंसभिक्ष उः ” इत्यादौ प्रत्ययेऽणि ‘ येनार्थः प्रतीयते स प्रत्ययः ’ इति महासञ्ज्ञयाऽन्वर्थाश्रयणेन दीर्घप्लुताभ्यामर्थाप्रयत्नेन तयोरप्राप्त्या व्यर्थमप्रत्ययग्रहणं स्वीकृत्य भाष्यकारेणापि च तच्चैकादेशानुमत्या ‘ भाव्यमानेन सवर्णानां ग्रहणं न ’ इति परिभाषा ज्ञापनद्वारा तद्दूषणं परिहृतम्। यदि च प्रत्ययपदमुक्तव्युत्पत्त्या विधीयमानमात्रपरं स्यात् तदा टित्किन्मिदादिषु सवर्णग्रहणस्य प्रसक्त्यभावेन वार्तिकारम्भो निर्मूलः स्यात्।

एवं भाष्यस्यापि परिभाषाबोधनद्वारा समाधानासङ्गतेश्च प्रत्ययपदं न विधीयमानपरम्। तथा हि अणुदित्सवर्णस्येति सूत्रेऽप्रत्यय इति योगो विभज्यते। तद्बलादत्राणिति न सम्बध्यते। तत्र च प्रत्ययपदं शास्त्रसंकेतितप्रत्ययमात्रपरम्। न तु विधीयमानार्थकमिति। भाष्यकाराणामपि प्रत्ययपदस्य प्रत्ययमात्र-परम्। तेनैव भाव्यमानेति परिभाषा बोध्यते इति शङ्कायां मानान्तरं दर्शयन्ति “ ज्यादादीयसः ” इति सूत्रे भाष्याकाराः। “ ज्यादादीयसः ” इति सूत्रेण ज्यशब्दादुत्तरस्य ईयसुनः आकारादेशो विधीयते, ‘ ज्यायान् ’ इत्युदाहरणम्। तत्र ज्यादादिति किमर्थम्? ज्याद इति अकार एव विधीयताम्। आन्तर्यत ईयसुन्प्रत्ययसम्बन्धिनो दीर्घेकारस्य दीर्घाकार एव भविष्यतीति तद्विधानं व्यर्थं सद् अप्रत्ययपदमेकदेशे अनुमितिद्वारा ‘ भाव्यमानेन सवर्णानां ग्रहणं न ’ इति परिभाषां ज्ञापयतीति। प्रत्ययपदस्य विधीयमानार्थकत्वे तु अविधीयमानस्यैव सवर्णग्राहकत्वेन ज्याद इत्यत्र अकारस्य विधीयमानत्वेन सवर्णग्रहणप्रसक्तेरभावेन शङ्कासमाधानयोः निर्दलत्वापत्तिरिति भावः ’[1979]। प्रत्ययपदस्य विधीयमानमात्रपरत्वं न युक्तम्। अन्यथा आन्तरतम्येन दीर्घाकारसिद्धेराशङ्का, भाव्यमानपरिभाषा-बोधनद्वारा आकारस्याग्रहणमित्युभयमसङ्गतं स्यादिति भावः।

‘ वस्तुतस्तु विधीयते इत्यर्थे प्रतीयते इत्यस्य कुत्रापि प्रयोगो नास्तीत्यप्रत्ययग्रहणमेकदेशानुमति-द्वारा एनां परिभाषां ज्ञापयतीति भाष्याशयः ज्ञातव्यः, एवञ्च प्रतीयते विधीयते इत्यादिप्रदीपग्रन्थः चिन्त्यः। वस्तुतस्तु योगाद्रूढिर्बलीयसीति दृष्ट्या उद्द्योतग्रन्थस्य समीचीनत्वेऽप्येकदेशानुमतिः परिभाषाज्ञापने साधनत्वेनाश्रयणीया भविष्यति, प्रदीपनये तु यदि रूढिशक्तिः परित्यक्ता स्यात्तदा सर्वांशेऽनुमतिरागच्छेत्, सा चाशङ्क्याऽनुमत्यपेक्षया श्रेयसी प्रतीयते। भाष्यकृताऽप्युपक्रम उक्तः –

[1979] शब्देन्दुशेखरः – बालबोधिनी – प्रकृतसूत्रे

अत्यल्पमिदमुच्यते – अप्रत्यय इति । पुनश्चाल्पतां परिहर्ता भगवतोक्तमयमेव निषेधो भाव्यमानेनेति परिभाषां ज्ञापयति, तेनेदं प्रतीयते यत्प्रत्यये ग्रहणेऽप्यल्पता नास्ति, स चाल्पत्वाभावः योगशक्त्यभिप्रायेणैवेति भावः ’[1980] ।

सूत्रमिदं व्यक्तिपक्षेऽप्राप्तसवर्णग्रहणार्थं न वा, जातिपक्षेऽणिति पदमनावश्यकं न वा –

‘ पदवाच्या जातिरिति, व्यक्तिरेव वा पदवाच्येति मतद्वयम् । तत्र आद्य व्यक्तीनामानन्त्येन तत्र शक्तिकल्पने गौरवाल्लाघवादेकस्यां जातावेव तत्कल्पनम् । गामानय इत्यादौ व्यक्तिबोधस्तु लक्षणया । न चैवं व्यक्तीनामपि प्रत्येकमेकतया एकस्यां व्यक्तौ शक्तिर्व्यक्त्यन्तरबोधो लक्षणयेति नानन्त्यप्रयुक्तं गौरवमिति वाच्यम् । व्यक्तौ शक्तिस्वीकारे व्यक्त्यन्तरलक्षणायां सम्बन्धकल्पने गौरवात् । तथा हि – व्यक्तौ शक्तौ व्यक्त्यन्तरेण स्वसमवेतसमवायित्वं सम्बन्धः, स्वं वाच्या व्यक्तिः, तत्समवेता तद्वृत्तिर्जातिस्तत्समवायित्वं व्यक्त्यन्तरे, जातौ शक्तिस्वीकारे तु स्वाश्रयत्वमेव सम्बन्धः, स्वं वाच्या जातिस्तदाश्रयत्वं व्यक्ताविति । एवञ्च लक्षणायां सम्बन्धे लाघवगौरवयोः सत्त्वेन जातावेव शक्तिकल्पनस्य लाघवेनौचित्यम् । किञ्च व्यक्तौ शक्तिस्वीकारेऽपि जातेर्वाच्यत्वमावश्यकमेव, व्यक्तीनामानन्त्याद् व्यभिचाराच्च तत्र शक्तिग्रहानुपत्तेः । एवञ्चावश्यकत्वात् प्रथमोपस्थिततत्वाद् ‘ नागृहीतविशेषणबुद्धिर्विशेष्यमवगाहते ’ इति न्यायाच्च जातावेव शक्तिर्व्यक्तिबोधो लक्षणयेति पर्यवस्यति । तदुक्तं भट्टैः –

अन्वयव्यतिरेकाभ्यामेकरूपप्रतीतितः ।

आकृतेः प्रथमज्ञानात्तस्या एवाभिधेयता ।। इति ।

द्वितीये तु ‘ गामानय ’ इत्यादिवाक्यश्रवणसमनन्तरं व्यक्त्यानयनव्यवहारस्यानादिसिद्धतया व्यवहारेण शक्तिग्राहकशिरोमणिना व्यक्तावेव पदस्य शक्तिर्ग्राह्यते । न च लाक्षणिकः स इति, अनुपपत्तिज्ञानमन्तरैव व्यवहारप्रवृत्तिर्दर्शनेनानुपपत्तिं विना लक्षणया वक्तुमनशक्यत्वात् । नचानन्त्यं व्यभिचारो वा, शक्यतावच्छेदकजातेरैक्यात् । तदुक्तम् –

आनन्त्येऽपि हि भावनामेकं कृत्वोपलक्षणम् ।

शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति ।।

न चैवं नागृहीतन्यायेन जातौ वाच्यत्वमावश्यकमिति वाच्यम्, अकारणे दण्डत्वादौ कारणतावच्छेदकत्वस्य, अलक्ष्ये तीरत्वादौ लक्षतावच्छेदकत्वस्य स्वीकारेण जातेरवाच्यत्वेऽपि शक्यतावच्छेदकत्वस्वीकारे बाधकाभावात् । अत एव अणुदित्सूत्रस्थमणग्रहणमेकशेषारम्भश्च

[1980] महाभाष्य-समीक्षणम् – (पृ. – 242)

सङ्गच्छेत । जातेर्वाच्यत्वे तद्वैयर्थ्यं स्पष्टमेवेति । तस्माद् व्यक्तिपक्षो जातिपक्षश्चोभावपि शास्त्रसिद्धाविति '[1981] । तथा हि – केचित् शास्त्रकाराः व्यक्तिः पदार्थः इति वदन्तो व्यक्तिपदार्थवादिनः सन्ति । केचित् पुनरन्ये जातिः पदार्थः इति वादिनो जातिपक्षालम्बिन उच्यन्ते । अपरे पुनः जातिव्यक्तिश्च उभावापि पदार्थौ इति ब्रुवन्त उभयवादिन उच्यन्ते । तत्र वैयाकरणाः सन्ति उभयपदार्थवादिनः ।

तथा चोक्तं भाष्ये भाष्यकारेण – ' किं पुनराकृतिः पदार्थः, आहोस्विद् द्रव्यम् ? उभयमित्याह । कथं ज्ञायते ? उभयथा ह्याचार्येण सूत्राणि पठितानि । आकृतिं पदार्थं मत्वा – " जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् "[1982] इत्युच्यते । द्रव्यं पदार्थं मत्वा " सरूपाणामेकशेष एकविभक्तौ "[1983] इत्येकशेष आरभ्यते '[1984] । इति । तत्रैवोक्तं कैयटेन – तत्र जातिवादिन आहुः – ' जातिरेव शब्देन प्रतिपाद्यते, व्यक्तीनामानन्त्यात् सम्बन्धग्रहणासम्भवात् । सा च जातिः सर्वव्यक्तिषु एकाकारप्रत्यय-दर्शनादस्तीत्यवसीयते । तत्र गवादयः शब्दाभिन्नद्रव्यसमवेतां जातिमभिदधति । तस्यां प्रतीतायां तदावेशात्तदवच्छिन्नं द्रव्यं प्रतीयते ।.......... व्यक्तिवादिनस्त्वाहुः – शब्दस्य व्यक्तिरेव वाच्या, जातेस्तूपलक्षणभावेनाश्रयणाद् आनन्त्यादिदोषानवकाशः '[1985] । इति ।

' एवञ्चोभयवादिवैयाकरणमते लक्ष्यानुसारात् क्वचिज्जातिः क्वचिच्च व्यक्तिः पदार्थः – इति स्थिते सवर्णग्राहकसूत्रस्य उक्तेषु त्रिषु भागेषु कतमस्य भागस्य कतरस्मिन् पक्षेऽस्ति प्रयोजनं कुत्र च नेति विचारणीयम् ।

व्यक्तिपदार्थपक्षेऽकारादिव्यक्तिरुच्चारिता चेत् सा स्वरत आनुनासिक्यतः कालतश्च भिन्ना तामकारादिव्यक्तिं नैव बोधयेत् । उदात्तश्चेदकारादिरुच्चारितस्तर्हि उदात्तमेव बोधयिष्यति नानुदात्तं स्वरितं वाकारादिम्, एवमनुदात्तोऽकारादिस्तमेवाकारादिम्, स्वरितश्च पुनः स्वरितमेवाकारादिं बोधयेन्नान्यम् । एवमनुनासिकश्चेदुच्चारितोऽननुनासिकमेव ग्राहयेन्नानुनासिकम् । तथैकमात्रकालो ह्रस्वश्चेदुच्चारितोऽकारादिस्तर्हि तत्कालमेव गृह्णीयान्न भिन्नकालम् । इष्यते च प्रत्याहारसूत्रगतो यो ह्रस्वाकारादिः, दीर्घश्च एकारादिः, ते स्वसवर्णान् सर्वान् गृह्णीयुः । तदर्थमिदं सूत्रम् – अण् सवर्णस्य (सञ्ज्ञेति शेषः) उच्यते – इति व्यक्तिपक्षेऽस्त्यप्राप्तसवर्णग्रहणार्थमिदं सूत्रम् '[1986] ।

[1981] प्रौढमनोरमा – सरलाटीका – इको यणचि इति सूत्रे

[1982] अष्टाध्यायी – (1-2-58)

[1983] अष्टाध्यायी – (1-2-64)

[1984] भाष्यम् – पस्पशाह्निके जातिव्यक्तिपदार्थनिर्णयाधिकरणे

[1985] भाष्यम् – प्रदीपः – पस्पशाह्निके जातिव्यक्तिपदार्थनिर्णयाधिकरणावसरे

[1986] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

उक्तञ्च भाष्ये – ' किमर्थं पुनरिदमुच्यते ? अण् सवर्णस्येति स्वरानुनासिक्यकालभेदात् (वा) । अण् सवर्णस्येत्युच्यते । स्वरभेदादानुनासिक्यभेदात् कालभेदाच्चाण् सवर्णान् न गृह्णीयात् । इष्यते च यत् ग्रहणं स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमिदमुच्यते '[1987] । इति । अत एव व्यक्ति-पदार्थपक्षेऽप्राप्तसवर्णग्रहणाय सूत्रमिदं सिद्धम् ।

ननु ' उच्चारितः शब्दः प्रत्यायको भवति नानुच्चारितः ' इति भाष्याद् इकारादीनामच्पद-बोध्यत्वेऽपि उच्चारितत्वाभावाद् ग्राहकशास्त्राप्रवृत्त्या दीर्घादीनामजादिपदेन ग्रहणमशक्यमिति चेन्न, " ल्वादिभ्यः "[1988] इत्यादिषु दीर्घाणां यणादिदर्शनेन " दीर्घाज्जसि च " इत्यादिज्ञापकाच्च प्रत्याहारेषु स्ववाच्यवाच्ये निरूढलक्षणाया ज्ञापनेनादोषात् । तथा चोक्तं मनोरमायां दीक्षितेन – ' इको यणचि (इति सूत्रे) प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरूढा लक्षणा, " दीर्घाज्जसि च "[1989] इति ज्ञापकात् " ल्वादिभ्यः " इति निर्देशाच्च ' ।

तथा चोक्तं हरदत्तेन पदमञ्जर्याम् – ' ननु च ' अकः ', ' अचि ' इत्यादौ प्रत्याहारग्रहणे कथं मध्यवर्त्तिभिरिकारादिभिस्सवर्णग्रहणम्, उच्चारितो हि सञ्ज्ञाशब्दः सञ्ज्ञिनं प्रत्याययति । न च मध्यवर्त्तिनामुच्चारणमस्ति । ते ह्यगादिसञ्ज्ञाभिः सञ्ज्ञित्वेन प्रत्याय्यन्ते । क्व तर्हि स्यात् ? " अस्य च्वौ "[1990], " यस्येति च " यत्र सञ्ज्ञाया उच्चारणमस्ति । प्रत्याहारे चाद्यो वर्ण उच्चारितत्वात्सवर्णग्राहकः । ....ततश्च तदेव स्थितम् – प्रत्याहारेषु मध्यवर्त्तिभिः सवर्णग्रहणं न स्यादिति । नैष दोषः, उच्चार्यमाणैरेव प्रत्यायकैर्भवितव्यमिति नास्ति नियमः, बुद्ध्युपारूढास्तु प्रत्यायकाः । अस्ति च मध्यवर्त्तिनां बुद्ध्युपारोहः । ततश्च सञ्ज्ञित्वेन प्रत्याय्यमानस्यापि प्रत्यायकत्वं भविष्यति । अत्र ज्ञापकम् – " दीर्घाज्जसि च ", इति प्रतिषेधः । स हि ' कुमार्यौ ' – इत्यादौ " प्रथमयोः पूर्वसवर्णः "[1991] इति दीर्घो मा भूदिति । तत्र चाक इति वर्तते (" अकः सवर्णे दीर्घः "[1992] इति सूत्रात् ' अकः ' इति पदस्यानुवृत्तिः " प्रथणयोः पूर्वसवर्णः " इति सूत्रे वर्तते) ।

' अण् ' इति प्रत्याहारोच्चारणस्थले प्रत्याहारस्थाद्यवर्णेन णकारादिचिह्नेन माहेश्वरसूत्र-स्थोऽयमिति प्रत्यभिज्ञातेन सवर्णग्रहणे जायमानेऽपि यत्र तादृशप्रत्यभिज्ञापकं किमपि नास्ति तत्र " अस्य

[1987] भाष्यम् – प्रकृतसूत्रे

[1988] अष्टाध्यायी – (8-2-44)

[1989] अष्टाध्यायी – (6-1-103)

[1990] अष्टाध्यायी – (7-4-32)

[1991] अष्टाध्यायी – (6-1-100)

[1992] अष्टाध्यायी – (6-1-99)

च्वौ " इत्यादौ सवर्णग्रहणं न सिध्येदिति चेन्न, " अस्य च्वौ " इत्यत्र प्रत्याहारसूत्रस्थत्वप्रत्यभिज्ञापक-चिह्नाभावाद् अनण्त्वाद् अणुदित्सूत्रप्रवृत्त्यसम्भवान्निवारिता शब्दरत्नकृता भाष्यदिशैव । तथाहि – ' ननु अणुदित्सूत्रं व्यर्थम् (स्ववाच्यवाच्यनिरूढालक्षणास्वीकाराद् अणुदित्सूत्रे ' अण् ' इति पदं व्यर्थम्), न च प्रत्याहाराणामाद्यवर्णेषु चरितार्थम्, अन्यसवर्णानामिव तत्सवर्णानामपि लक्षणयैव ग्रहणसिद्धेः । न च " अस्य च्वौ " इत्यादौ चारितार्थ्यम्, व्यक्तिपक्षेऽस्य प्रत्याहारसूत्रस्थतो भेदेन अण्त्वाभावाद् इति स्पष्टम् अणुदित्सूत्रे भाष्ये इति चेत् ? न, लक्ष्यातावच्छेदकज्ञानार्थमेव तच्चारितार्थ्यात् । प्रत्याहारेत्युपलक्षणं तद्वाच्यवाच्येति च, " अस्य च्वौ " इत्यादावपि स्वसदृशवाच्येषु लक्षणावश्यकत्वात् '[1993] ।

" अस्य च्वौ " इत्यत्र णकारानुबन्धनिर्देशाभावेन सवर्णग्रहणं न स्यादिति चेन्न, वार्तिककारस्त्वाह – सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणाद् इति । अर्थात् अकारादिनिर्देशानां जातिपरत्वात्तदवच्छिन्नयावद्व्यक्तिलाभात् अण्ग्रहणं न कार्यम् । अत एव वार्तिककारमते अस्य च्वौ इत्यादौ जातिनिर्देशस्वीकारेणाभीष्टस्य सिद्धत्वात् । एवञ्च ' जातिपक्षाश्रयणेनादोषात् ' इत्युक्तं नागेशेन शब्देन्दुशेखरेऽपि । अर्थात् जातिपक्षे प्रत्याहारसूत्रगताकारादिना " अस्य च्वौ " इत्यादिसूत्र-गताकारादिना च अत्वादिजात्यवच्छिन्नसकलतत्सवर्णग्रहणं स्यात् । अस्मिन् पक्षे अकारादिपदं अत्वादिजात्यवच्छिन्नपरम् । तेन सर्वव्यक्तीनां तत्तज्जात्यवच्छिन्नत्वात् ग्रहणम् । अतो अणुदित्सूत्रेऽण्ग्रहणमस्मिन् पक्षे नावश्यकम् ।

तथा चोक्तं भाष्ये भाष्यकृता – ' तत्रानुवृत्तिविर्देशे सवर्णानां ग्रहणं न प्राप्नोति – " अस्य च्वौ ", " यस्येति च " । किं कारणम् ? अनण्त्वात् । न ह्येतेऽणो येऽनुवृत्तिनिर्देशे । के तर्हि ? येऽक्षरसमाम्नाये उपदिश्यन्ते । एवं तर्ह्यनण्त्वादनुवृत्तौ न, अनुपदेशाच्च प्रत्याहारे न । उच्यते चेदम् – अण् सवर्णान् गृह्णातीति । तत्र वचनाद्भविष्यति । ' वचनाद्यत्र तन्नास्ति ' (वा) नेदं वचनाल्लभ्यम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् ? य एते प्रत्याहाराणामादितो वर्णास्तैः सवर्णानां ग्रहणं यथा स्यात् [1994]' ।

' मनोरमाकृन्मते प्रत्याहारग्रहणेषु लक्ष्यतावच्छेदक – ज्ञानार्थमेतत्सूत्रावश्यकत्वेऽपि भाष्यदर्शितदिशा शब्दरत्नकृच्छेखरकृत्सम्मत्या च व्यक्तिपक्षे वर्णग्रहणेषु प्रत्याहारबोध्यमध्यवर्णेषु च

[1993] प्रौढमनोरमा – शब्दरत्नः – " इको यणचि " इति सूत्रव्याख्याप्रसङ्गे

[1994] भाष्यम् – प्रकृतसूत्रे

क्रमशोऽनण्त्वाद् अनुच्चारितत्वाच्चाणुदित्सूत्राप्रवृत्त्या सवर्णग्रहणानापत्तिदोषवारणाय जातिपक्षः समाश्रयणीयः '[1995] ।

जातिपक्षोऽवश्यमेव स्वीकर्तव्यः । अन्यथा व्यक्तिपक्षे एकस्यैव तकारस्य झल्त्वसिद्ध्या बहूनां तत्त्वाभावेन ' अवात् + स् + ताम् ' इत्यत्र झलः परस्य सकारस्य झल्परत्वाभावेन " झलो झलि "[1996] इति सूत्रेण सकारस्य लोपो न स्यात् । तथा हि – व्यक्तिपक्षे वर्णसमाम्नायगततकारादिव्यक्तीनामेव झलादिप्रत्याहारबोध्यतया, एकस्यैव तकारस्य झल्त्वसिद्ध्या " झलो झलि " इति सूत्रस्य ' अबुद्धः ' इत्यादौ चरितार्थतया झलः, झलि इति पञ्चम्यन्तसप्तम्यन्तपदाभ्यां तकारद्वयस्य बोधनापत्त्या वस् धातोः लुङि चङि " सः स्यार्धधातुके "[1997] इति सूत्रेण सकारस्य तकारादेशे ' अवात् + स् +ताम् ' इत्यत्र सकारस्य लोपो न स्यात् । जातिपक्षाश्रयणे तत्त्वजात्यवच्छिन्नसर्वतकाराणां झल्पदबोध्यतया न दोषः ।

ननु व्यक्तिपक्षे सवर्णग्राहकसूत्रे, प्रत्याहारस्थले च सर्वत्र स्ववाच्यसदृशे लक्षणाङ्गीकारेणैव निर्वाहे जातिपक्षाश्रयणं मास्त्विति चेन्न, जातिपक्षे अणुदित्सूत्रेऽण्ग्रहणं न कार्यमिति लाघवं स्यात् । व्यक्तिपक्षे यत्र सूत्रेऽण्ग्रहणं तत्र तत्र लक्षणाश्रयणरूपगौरवं स्यात् ।

ननु जातिपक्षे अणुदित्सूत्रेऽण्ग्रहणं न कार्यमित्युक्तम् । तन्न युक्तम् । ऋलृवर्णयोः भिन्नजातीयत्वेन परस्परग्रहणाभावेन तदर्थमण्ग्रहणं कर्तव्यमेवेति शङ्कायामाह शब्देन्दुशेखरे नागेशः – ' ऋलृवर्णयोः सावर्ण्यम् इत्यनेन समानजातित्वस्यैवातिदेशेन " उपसर्गादृति धातौ "[1998] इत्यादौ न दोषः ' । अर्थात् ऋलृवर्णयोरिति वार्तिकेन समानजातित्वमतिदिश्यते । वर्णाश्रमाचारा इत्यादौ वर्णशब्दस्य जातौ प्रसिद्धेः वार्तिके वर्णशब्देन जातिरेव बोध्यते । समानजातित्वातिदेशेन ऋकारेण लृकारस्यापि ग्रहणात् ' उपाल्कारीयति ' इत्यादौ " उपसर्गादृति धातौ " इति सूत्रेण वृद्धिः सिध्यति । ' भ्राजृ दीप्तौ ', ' गम्लृ गतौ ' इत्यादौ पृथगनुबन्धकरणेन समानजातित्वातिदेशेऽपि अनुबन्धप्रयुक्तकार्यसाङ्कर्यं नास्ति, अन्यथा तस्य वैयर्थ्यापत्तिः स्यात् । ऋदिति लृकारानुबन्धप्रयुक्तं कार्यम्, लृदिति च ऋकारानुबन्धप्रयुक्तं कार्यं न भवतीति कल्पनया दोषाभावः ।

ननु जातिपक्षे अणुदित्सूत्रेऽण्ग्रहणस्य प्रत्याख्याततत्वेन, उदिदंशेऽन्वयाभावस्य पूर्वमुपपादितत्वेन अप्रत्ययग्रहणं किमर्थमिति शङ्कायामाह नागेशः शब्देन्दुशेखरे – ' अत्र पक्षे ' अइउण् ' सूत्रशेषोक्त-

---

[1995] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[1996] अष्टाध्यायी – (8-2-26)

[1997] अष्टाध्यायी – (7-4-49)

[1998] अष्टाध्यायी – (6-1-90)

भाष्यरीत्या तपरसूत्रस्य जातिग्रहणप्राप्तसवर्णग्रहणनियामकत्ववदप्रत्यय इत्यस्य योगविभागेन तत्प्राप्त-सवर्णग्रहणनिषेधकत्वात् " त्यदादीनामः "[1999] इत्यादौ विधेये न दोषः '[2000]। अर्थात् जातिपक्षे सवर्णानां सर्वेषां ग्रहणसम्भवे यथा तपरसूत्रं तत्कालिकानामेव ग्रहणमिति नियमाय भवति तथा ' अप्रत्ययः' इत्यपि योगविभागेन भाव्यमानेति परिभाषाबोधनद्वारा जातिपक्षप्राप्तसवर्णग्रहणनिषेधकमिति।

अत एव भाष्यकारेण जातिपक्षे अणुदित्सूत्रेऽण्ग्रहणं प्रत्याख्यातम्। जातिपक्षे गुणा अभेदका इति, गुणा भेदका इति पक्षद्वयम्। गुणाभेदकत्वपक्षः सिद्धान्तपक्षः।

- **तपरस्तत्कालस्य – (1-1-69)**

सूत्रार्थः – तः परो यस्मात् सोऽयं तपरः, बहुव्रीहिः, अथवा तात् परः इति तपरः, पञ्चमीतत्पुरुषः। तस्य कालः इति तत्कालः, षष्ठीतत्पुरुषः। तत्कालः इव कालो यस्य सः तत्कालः, उत्तरपदलोपी बहुव्रीहिसमासः। स्वं रूपं शब्दस्याशब्दसञ्ज्ञा अणुदित्सवर्णस्य चाप्रत्ययः इति द्वाभ्यां सूत्राभ्याम् ' स्वम् ', ' रूपम् ', ' सवर्णस्य ' इति पदत्रयमनुवर्तते। तपरो वर्णः तत्कालस्य सवर्णस्य (गुणान्तरयुक्तस्य) स्वस्य च रूपस्य ग्राहको भवति। उदाहरणञ्च – " अतो भिस ऐस् "[2001] – वृक्षैः, प्लक्षैः। " आत औ णलः "[2002] – पपौ, ददौ।

' तपरपदे ' पाणिनिना तन्त्रेण वैकशेषेण वोच्चारणमर्थद्वयमिह विवक्षितम्। तन्त्रञ्च नाम ' सकृदुच्चारितत्वे सति बह्वर्थबोधजनकत्वं तन्त्रत्वम् ', अनेकार्थाभिप्रायेण वक्त्रा सकृदुच्चारितत्वं वा एकानुपूर्वीमच्छब्देनानेकार्थबोधनम् वा। यथा अक्षा भज्यन्ताम्, भुज्यन्ताम्, दीव्यन्ताम् इत्यत्राक्षपदे तन्त्रन्यायेन सकृदुच्चारितेन शकटाङ्गकमलफलदेवनशलाकानामर्थत्रयस्य बोधः। किं वा ' ब्राह्मणाभ्यां कृतं देहि ' इत्यत्र ' ब्राह्मणाभ्याम् ' इति पदे तृतीयान्तचतुर्थ्यन्तार्थयोः तन्त्रेण बोध्यः, ' ब्राह्मणाभ्यां कृतं ब्राह्मणाभ्यां देहि ' इत्यर्थः। एवञ्च सह विवक्षायामसहविवक्षायामुभयत्रापि तन्त्रन्यायः प्रवर्तितुमर्हति। प्रकृते तु तपरशब्दे सहविवक्षायामेव तन्त्रन्यायः प्रवृत्तः, यतो हि द्वयोरपि तपरपदार्थयोरुभयत्वेन रूपेण समकालसवर्णपदार्थे बोधकतारूपशक्तिसम्बन्धेन अन्वयः कृतः वर्तते।

[1999] अष्टाध्यायी – (7-2-102)

[2000] शब्देन्दुशेखरः – प्रकृतसूत्रे

[2001] अष्टाध्यायी – (7-1-9)

[2002] अष्टाध्यायी – (7-1-34)

‘ अत्र प्रदीपकारः एकशेषाश्रयणमपि वैकल्पिकोपायमर्थद्वयबोधने उक्तवान्, तदंशे उद्द्योतकारः चिन्त्यत्वं ब्रूते – तत्र हेतुं ब्रवीति – समाहारद्वन्द्वविषये एकशेषाभावेन एकवचनानुपपत्त्येति। वस्तुतस्तु तपरश्च तपरश्चेति विग्रहे उद्भूतावयवभेदघटितसमुदायविवक्षायामितरेतरयोगद्वन्द्वः केन वारयितुं शक्यः, सुविभक्तिस्तु “ सुपां सुलुक्........ ” इत्यनेन कर्तुं सुशका, अर्थवत्सूत्रे ‘ प्रत्ययः ’ इति पदे यथा। एवञ्च एकशेषाश्रयणमपि सूत्रकृन्मते समादर्तुं शक्यमेव । एकशेषविधायकसूत्राणां प्रत्याख्यानेऽपि शास्त्रीयप्रयोगसिद्ध्यर्थं तत्सत्ता आवश्यिका, बोद्धॄणां कृते बोधस्त्वावृत्त्या एव भवतीति पक्षे न कोऽपि दोषः, नापि सकृदुच्चारितन्यायविरोधः ’[2003]। पाणिनिना एकमेवार्थद्वयबोधकं तपरपदे तन्त्रेण पठितम् । बोद्धुरस्मदादेस्तु आवृत्त्या बोध इति ‘ तपर ’ इत्यावर्तते।

1. अत्र तपरपदे ‘ तः परो यस्मात् ’ इति विग्रहेऽतद्गुणसंविज्ञानबहव्रीहौ तकारपूर्ववर्त्ती वर्णः इत्येकोऽर्थः । अस्मिन्नर्थे उदाहरणम् – “ अतो भिस् ऐस् ” इति सूत्रे तकारो यस्मात् परः सोऽयमकारस्तपरः। अनेन विधीयमानः ऐसादेश ‘ रमाभिः ’ इत्यत्र न प्रवर्तते। तपरकरणेन ह्रस्वस्यैव तत्र ग्रहणात्।

2. किञ्च ‘ तात्परः ’ इति विग्रहे पञ्चमीतत्पुरुषसमासे तकारपरवर्त्ती वर्णस्तपर इति द्वितीयोऽर्थः । अत्रार्थे उदाहरणम् – “ वृद्धिरादैच् ”[2004] इति सूत्रम् । अत्र तकारात् परः ऐच् तपरो वर्तते, न आकारस्तस्य तपरत्वस्य प्रयोजनाभावात्।

बहुव्रीहेरङ्गीकारेण “ अदेङ् गुणः ”[2005] इति सूत्रे दीर्घप्लुतयोरकारयोर्न गुणसञ्ज्ञापत्तिः । तत्पुरुषाङ्गीकारे नैङः प्लुतस्य ग्रहणम् । “ स्थानेऽन्तरतमः ”[2006] इति सूत्रेण “ आद्गुणः ”[2007] इति गुणस्त्रिमात्राकालिको न प्रवर्तते । “ अदेङ् गुणः ” इत्यस्मिन् सूत्रे तपरकरणेन द्विमात्राकालिकस्यैव ग्रहणात्। अत्र च बहुव्रीहिपक्षे ज्ञापकमस्ति “ अतो भिस ऐस् ” इति सूत्रे तकारोच्चारणम्। यदि तपरपदे ‘ तात्परस्तपरः ’ इत्येवं पञ्चमीतत्पुरुषसमास एव विवक्षितः स्यात् तदा “ अतो भिस ऐस् ” इति सूत्रे तात्परस्यैव समकालस्य बोधने तकारात् परस्य भिसः सावर्ण्याभावात् भिन्नकालग्रहणाभावः सिद्ध एव । पुनस्तद्व्यावृत्त्यर्थं क्रियमाणः तपरो व्यर्थ एव स्यात् । अतः सामर्थ्यात् बहुव्रीहिसमासः तपरपदे

[2003] महाभाष्यसमीक्षणम् – पृ. 38

[2004] अष्टाध्यायी – (1-1-1)

[2005] अष्टाध्यायी – (1-1-2)

[2006] अष्टाध्यायी – (1-1-50)

[2007] अष्टाध्यायी – (6-1-86)

कल्प्यते। तथा च तः परो यस्मादित्यर्थप्रतीत्या ‘ अतः ’ इत्यत्र अस्माद् अकारात् परः तकारः स तपर इति भिन्नकालस्य अकारेण ग्रहणं न भवतीति तपरकरणं सार्थकम्।

भट्टोजिदीक्षितमते पञ्चमीतत्पुरुषसमासपक्षे तु प्रमाणमस्ति – “ वृद्धिरादैच् ” इति सूत्रम्। यतो हि तत्र बहुव्रीहिसमासपक्षे आकार एव तपरस्स्यात्, तस्य तपरत्वे प्रयोजनाभावात्। ऐचस्तु तपरत्वं न स्यात्, ततस्तेन त्रिमात्रस्यापि ग्रहणापत्तिः प्रसज्येत। पञ्चमीतत्पुरुषाश्रयणेन तात्परयोः ऐच्पदबोध्ययोः ऐकारौकारयोः तत्कालिकयोरेव ग्रहणलाभात् त्रिमात्रिकस्य व्यावृत्तिः। अत एव ‘ गङ्गौघः ’ इत्यादौ त्रिमात्रव्यावृत्तिः। नागेशभट्टमते ‘ तात्परस्तपरः ’ इत्येवं पञ्चमीतत्पुरुषसमासाश्रयणे प्रमाणम् “ सहिवहोरोदवर्णस्य ”[2008] इति सूत्रे वर्णग्रहणम्। अस्मिन् सूत्रे वर्णग्रहणमकारेण सर्वव्यक्तीनां संग्रहाय क्रियते।

अत एव ‘ उदवोढाम् ’ इत्यत्र उत्पूर्वकवहधातोर्लङि, च्लेस्सिचि, “ वदव्रजहलन्तस्याचः ”[2009] इति सूत्रेण वृद्धौ, सलोपे, ढत्वधत्वष्टुत्वढलोपेषु ‘ उदवोढाम् ’ इत्यवस्थायां “ सहिवहोरोदवर्णस्य ” इति सूत्रे आकारस्यापि संग्रहेण तस्य ओत्वे ‘ उदवोढाम् ’ इति सिध्यति। यदि तपरसूत्रे बहुव्रीहिरेव स्यात्तर्हि अकारस्य तपरत्वाभावेन तपरसूत्राप्रवृत्त्या सर्वासामकारव्यक्तीनां ग्रहणसंभवे तदर्थं कृतं वर्णग्रहणं व्यर्थं स्यात्। कृते तु तद्ग्रहणे तत्सामर्थ्यात् ‘ तपरः ’ इत्यत्र ‘ तात्परस्तपरः ’ इत्यर्थोऽपि लभ्यते। अकारस्य तात्परत्वेन तत्कालिकस्यैव ग्रहणसंभवेऽतत्कालिकानामपि ग्रहणार्थं कृतं वर्णग्रहणं सार्थकम्। अत्र “ पञ्चमी भयेन ”[2010] इत्यत्र योगविभागेन समासो ज्ञेयः, यदि तदनङ्गीकारे सुप्सुपेति वा समासो बोध्यः। एवञ्च समासद्वये प्रमाणञ्च ‘ तः परो यस्मात् ’ इति विग्रहेऽतद्गुणसंविज्ञानबहुव्रीहौ सर्वनाम्नः परशब्दस्य पूर्वनिपाते कर्तव्ये तदकरणेन समासान्तरस्यापि सूत्रकृता सूचितत्वाद्वा अर्थद्वये प्रमाणञ्च तत्र तत्र तपरकरणमपि।

एओङ्सूत्रभाष्याद् वृद्धिसूत्रस्थभाष्याच्च समासद्वयं लभ्यते। न हि तः परो यस्मात् सोऽयं तपरः। किन्तर्हि ? तादपि परस्तपर इति वृद्धिसूत्रस्थं भाष्यम्। एतत्सर्वमुक्तञ्च न्यासग्रन्थे विस्तारेण। तत्र हि ‘ कथं पुनरेतत् समासद्वयं लभ्यते ? यावता एकस्तपरशब्दः। एकस्याप्यावृत्त्या द्विधा भेदो भविष्यत्यदोषः। तत्र हि बहुव्रीहिर्लिङ्गम् – “ अतो भिस ऐस् ” इति तपरकरणम्। नह्यत्र पञ्चमीतत्पुरुषः उपपद्यते। अवर्णो ह्यत्र तपरोऽभिमतो न भिस्। यदि चेह पञ्चमीतत्पुरुषः स्यात्, तर्हि भिस् तपरः स्यात्। यतस्तपरो

[2008] अष्टाध्यायी – (6-3-112)

[2009] अष्टाध्यायी – (7-2-3)

[2010] अष्टाध्यायी – (2-1-37)

वर्ण इहोच्यते, न चासौ वर्णः, किं तर्हि ? तत्समुदायः । पञ्चमीतत्पुरुषे तु लिङ्गम् – " वृद्धिरादैच् " इति तपरकरणम् । नह्यत्र बहुव्रीहिर्युज्यते । यदि बहुव्रीहिः स्यात्, तदाकारस्य तपरत्वं स्यात्, न चाकारार्थं तपरकरणम्, अपित्वैजर्थम् '[2011] ।

तात्परस्तपरः इत्यस्योदाहरणतया " अदेङ्गुणः ", " वृद्धिरादैच् " इत्यादिदत्तम् । किन्तु यदि " अणुदित्सवर्णस्य चाप्रत्ययः "[2012] इति सूत्रे " स्वं रूपं शब्दस्याशब्दसञ्ज्ञा "[2013] इति सूत्राद् ' अशब्दसञ्ज्ञा ' इत्यनुवर्तते, तदा गुणवृद्ध्योः शब्दशास्त्रसञ्ज्ञात्वाद् न तत्र सवर्णग्रहणम् । किञ्च " आद्गुणः ", " वृद्धिरादैच् " इत्यादौ गुणवृद्ध्योर्विधीयमानत्वेन तत्र सवर्णग्रहणप्राप्तेरभावात् तद्वारणार्थं क्रियमाणं तपरकरणमनावश्यकमेव ।

प्रकृतसूत्रे " अणुदित्सवर्णस्य चाप्रत्ययः " इति सूत्राद् यदि अण् ग्रहणमनुवर्तते तर्हि तपरेऽण् तत्कालस्यैवेति नियमार्थमिदं भवति । अस्मिन् पक्षे तत्कालग्रहणमनावश्यकम् । तपरः स्वरूपैवेति नियमेनापीष्टसिद्धेः ।

" इटोऽत् "[2014] इति सूत्रेणात्मनेपदे लिङः उत्तमपुरुषैकवचनस्य इटः स्थाने अत् आदेशो विधीयते । तत्र तकारस्यानुबन्धलोपः । " विभक्तिश्च "[2015] इति सूत्रेण तिङो विभक्तित्वात् । " न विभक्तौ तुस्माः "[2016] इति निषेधेन कथं वात्र तकारस्येत्सञ्ज्ञेति न शङ्क्यम् । " इदमस्थमुः "[2017] इत्यत्र मकारस्येत्सञ्ज्ञापरित्राणार्थमुकारानुबन्धकरणेन " न विभक्तौ तुस्माः " इति निषेधस्यानित्यत्वं ज्ञाप्यते । तेन प्रकृते ' अत् ' इत्यत्र तन्निषेधाभावादित्सञ्ज्ञा प्रवर्तते इति काशिकाकाराशयः ।

काशिकाकारोक्तमयुक्तमेव । तकारस्येत्वे सति " तित्स्वरितम् "[2018] इति स्वरितप्रसङ्गात् । नात्रेष्टापत्तिः । ' भक्षीयतवराधस ' इत्यादावन्तोदात्तश्रवणात् । एवञ्च " औत् "[2019], " अच्च घेः "[2020] इत्यादाविव " इटोऽत् " इत्यत्रापि तकारो मुखसुखार्थ एव । वस्तुतः " दिव औत् "[2021] इत्यत्रापि तकारो

[2011] काशिका – न्यासः – प्रकृतसूत्रे

[2012] अष्टाध्यायी – (1-1-69)

[2013] अष्टाध्यायी – (1-1-68)

[2014] अष्टाध्यायी – (3-4-106)

[2015] अष्टाध्यायी – (1-4-104)

[2016] अष्टाध्यायी – (1-3-4)

[2017] अष्टाध्यायी – (5-3-24)

[2018] अष्टाध्यायी – (6-1-182)

[2019] अष्टाध्यायी – (7-3-118)

[2020] अष्टाध्यायी – (7-3-119)

[2021] अष्टाध्यायी – (7-1-84)

मुखसुखार्थक एव । ‘ द्यौः पितः पृथविमातर धुक् ’ इत्यादौ स्वरितस्वरस्य “ उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ”[2022] इत्यनेनैव सिद्धत्वाद् नास्ति कश्चिद्दोषः इति भट्टोजिदीक्षिताशयः ।

‘ तत्कालस्य ’ इत्यत्र स कालोऽस्य इति समानाधिकरणबहुव्रीहिः । तत्पदेन तपरो वर्णः प्रकृतः परामृश्यते, सर्वनाम्नां प्रकृतपरामर्शित्वात् । एवञ्च सः = तपरो वर्णः कालोऽस्य इत्यर्थः सम्पद्यते । परमयमर्थस्तु कथञ्चनापि नोपपद्यत एव, एकार्थाभिधायिनोरेव सामानाधिकरण्यात् । अत्र ययोर्वर्ण-कालयोः सामानाधिकरण्यं दृश्यते, न तौ एकार्थाभिधायिनौ, किन्तु भिन्नार्थाभिधायिनौ । वर्णस्य लिप्यात्मकत्वाद् ध्वन्यात्मकत्वाद्वा, कालस्य तु क्रियारूपत्वात्, तयोर्भिन्नार्थयोः सामानाधिकरण्यं सर्वथाऽसम्भवि । अतो नात्रोक्तः सामानाधिकरणबहुव्रीहिरुपपद्यते – इत्यस्ति आशङ्का ।

अस्या आशङ्कायाः समाधानायोच्यते – यद् उत्तरपदलोपी समासोऽत्र विधेयः । यथा – उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुखः, ऊकाल इव कालो यस्य स ऊकालः, तथैव तस्य कालस्तत्कालः, तत्काल इव कालो यस्य स तत्कालस्तस्य – इत्येवमुत्तरपदलोपी समासो विधीयते । तथा च वार्तिकम् – ‘ सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च ’ इति । यद्वा गम्यमानार्थत्वाद् विग्रहवाक्ये एव स लोपः कर्तव्यः । यतो हि – उष्ट्रो मुखमस्य – इत्युक्ते उष्ट्र इव मुखं यस्येति । परन्तथापि अर्थो नोपपद्यते, कस्यचिदपि प्राणिनो मुखस्य प्राण्यन्तरतुल्यत्वाभावात्, अपितु एकस्य प्राणिनो मुखं प्राण्यन्तरमुख-तुल्यमेव भवितुमर्हति । अतोऽत्र विग्रहे उष्ट्रपदं लक्षणया उष्ट्रमुखसदृशबोधकम् । तथा चेष्टोऽर्थः सम्पद्यते – उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुखः । विग्रहस्तु पुनः स एव उष्ट्रो मुखं यस्येति । तत्रोष्ट्रपदस्य लाक्षणिकतया इष्टार्थसिद्धिर्भवति[2023] । तथैव अत्रापि – सः कालो यस्येत्येव विग्रहः । तत्र सः इति लक्षणया तपरत्वेन उच्चार्य्यवर्णाधिकरणकालसदृशपरः । तथा च सः = तपरत्वेनोच्चार्य्यमाण-वर्णाधिकरणकालसदृशः कालो यस्य वर्णस्य तस्य तपरः = अत्, इत्, उत्, ऋत्, आदैच्, इत्यादिर्बोधकः इति फलितो भवत्यर्थः । यथा – “ अतो भिस ऐस् ”, “ ईदूदेद् द्विवचनम् प्रगृह्यम् ”[2024] इत्यादिषु ।

तथा चोक्तं महाभाष्ये भाष्यकृता – ‘ अयुक्तोऽयं निर्देशस्तत्कालस्येति । तदित्यनेन कालः प्रतिनिर्दिश्यते, तदित्ययं च वर्णः । तत्रायुक्तं वर्णस्य कालेन सह सामानाधिकरण्यम् । कथं तर्हि निर्देशः कर्तव्यः ? तत्कालकालस्येति । किमिदं तत्कालकालस्येति ? तस्य कालस्तत्कालः, तत्कालः कालो यस्येति सोऽयं तत्कालकालस्तत्कालकालस्येति । स तर्हि तथा निर्देशः कर्तव्यः ? न कर्तव्यः ।

[2022] अष्टाध्यायी – (8-2-4)

[2023] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[2024] अष्टाध्यायी – (1-1-11)

उत्तरपदलोपोऽत्र द्रष्टव्यः । तद्यथा – उष्ट्रमुखमिव मुखं यस्य सोऽयमुष्ट्रमुखः । खरमुखः । एवं तत्कालकालस्तत्कालस्तत्कालस्येति '[2025] ।

अस्य महाभाष्यस्य व्याख्यायां कैयटेन सुस्पष्टमुक्तम् – ' उष्ट्रमुख इति । गम्यमानार्थत्वाद् द्वितीयमुखशब्दाप्रयोगः । उष्ट्रो मुखमस्योष्ट्रमुखः । न च प्राणी प्राण्यन्तरस्य मुखमिति सामार्थ्यात्सादृश्यप्रतीतिः । समग्रेण चोष्ट्रेण मुखस्य सादृश्याभावादुष्ट्रशब्दोऽवयवे वर्तते । मुखेनैव मुखस्य सादृश्यं प्रसिद्धमिति सामर्थ्यादुष्ट्रमुखमिव मुखं यस्येत्यर्थो गम्यते । एवमिहापि वर्णः कालो न भवतीति सामर्थ्यात्तदीया क्रिया क्रियान्तरपरिच्छिन्ना सती क्रियान्तरस्य परिच्छेदिकेति वर्ण एव परिच्छेदक उच्यते[2026] ' । बालमनोरमाकारोऽपि पूर्वोक्तसारमादाय संक्षिप्यैवमाह – ' तस्य = तपरत्वेनोच्चार्यमाणवर्णस्य काल इव कालो यस्येति बहुव्रीहिः । ऊकालः, उष्ट्रमुखः इत्यादिवत्समासः '[2027] ।

- **सूत्रस्य विधायकत्वं वा नियामकत्वं वा**

' सर्वप्रथमन्तु इदमत्र विचारणीयं यत् कथमत्र विधिपक्षः फलितो भवति, कथं वा नियमपक्षः ? विधिस्तावत् अत्यन्ताप्राप्तिविषये प्रापकं वचनम् – ' विधिरत्यन्तमप्राप्तौ ' इत्युक्तेः । नियमस्तु ' तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ' इति लक्षणलक्षितः परिसंख्याविधिरेवात्र पदशास्त्रे व्यवह्रियते । ततश्च यदीदं सूत्रमप्राप्तसवर्णप्रापकं स्यात्तर्हि विधिः स्यात्, यदि तु तत्कालस्य अतत्कालस्य च सवर्णस्य ग्रहणे प्राप्ते वचनमिदं स्यात्तर्हि तत्कालस्यैव सवर्णस्य ग्रहणम्, नातत्कालस्य इति नियमः स्यात् । अतोऽत्रेदं विवेचनीयं यत्किमिदं सवर्णग्रहणे प्राप्ते वचनमुताप्राप्ते ? यद्यत्र सूत्रे पूर्वसूत्रात् ' अण् ' इति नानुवर्तते, तदा ' तपरो वर्णः समकालसवर्णग्राहकः ' इति सूत्रार्थे निष्पन्ने, वाक्यपरिसमाप्तिन्यायादत्र आकारादीनामनण्त्वात् व्यक्तिपक्षे ' गुणा भेदकाः ' इति पक्षे च तैराकारादिभिः समकालस्यापि गुणान्तरयुक्तस्य सवर्णस्याप्राप्ते ग्रहणे तत्प्राप्त्यर्थमयं विधिर्भविष्यति '[2028] । अत्र च भाष्यम् – ' किं पुनरिदं नियमार्थम्, आहोस्वित् प्रापकम् ? कथं च नियमार्थं स्यात् ? कथं वा प्रापकम् ? । यद्यत्राण्ग्रहणमनुवर्तते, ततो नियमार्थम् । अथ निवृत्तम्, ततः प्रापकम् । कश्चात्र विशेषः ? तपरस्तत्कालस्येति नियमार्थमिति चेद् दीर्घग्रहणे स्वरभिन्नाग्रहणम् – (वा) । " तपरस्तत्कालस्य " इति

[2025] भाष्यम् – प्रकृतसूत्रे

[2026] भाष्यम् – प्रदीपः – प्रकृतसूत्रे

[2027] सिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

[2028] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

नियमार्थमिति चेद् दीर्घग्रहणे स्वरभिन्नानां ग्रहणं न प्राप्नोति । केषाम् ? उदात्तानुदात्त-स्वरितानुनासिकानाम् । अस्तु तर्हि प्रापकम् । प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतप्रतिषेधः – (वा) । प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतयोः प्रतिषेधो वक्तव्यः । न वक्तव्यः । विप्रतिषेधात्सिद्धम् – (वा) । अण् सवर्णान् गृह्णातीत्येतदस्तु, तपरस्तत्कालस्येति वा । तपरस्तत्कालस्येतद् भवति विप्रतिषेधेन । अण् सवर्णान् गृह्णातीत्यस्यावकाशः – ह्रस्वा अतपरा अणः । तपरस्तत्कालस्येत्यस्यावकाशः – दीर्घास्तपराः । ह्रस्वेषु तपरेषूभयं प्राप्नोति । तपरस्तत्कालस्य इत्येतद् भवति विप्रतिषेधेन ' । इति ।

काशिकाकारादीनामभिप्रायः – " विड्वनोरनुनासिकस्यात् "[2029], " आतो धातोः " इत्यादिषु व्यक्तिपक्षे गुणानां भेदकत्वपक्षे च तपरैराकारादिभिः पूर्वसूत्रेण अनण्त्वात् सवर्णग्रहणासिद्धौ समकालसवर्णग्रहणार्थोऽयं विधिः । अनेन सूत्रेण तत्र तपरा आकारादयः समकालानां षण्णां षण्णां सञ्ज्ञा भवन्तीत्यभिप्रायः । अयं विधिपक्ष एतत्सूत्रे भाष्ये, तदनुसारमेव काशिकायां तद्व्याख्याने न्यासे पदमञ्जर्यां च विस्तरेण वर्णितः । अस्य सूत्रस्य विधित्वपक्षेऽनण्सु अप्राप्तसवर्णग्रहणप्रापणेन चरितार्थत्वात् तपरेषु अण्सु अप्रवृत्त्या तत्र भिन्नकालानामपि सवर्णानां पूर्वसूत्रेण ग्रहणमनिष्टमापद्येतेत्याशङ्काऽप्यत्र भाष्ये विप्रतिषेधात् परत्वात् तपरसूत्रस्यैव प्रवृत्तिदर्शनेन वारिता । इदमेव भाष्यं सिद्धान्तपक्षं मन्यमानाः काशिकाकारादयो विधिपक्षमेव एतद्भाष्योक्तं स्वस्वग्रन्थेषु सिद्धान्तपक्षत्वेन स्थापयाञ्चक्रिरे । तथा चोक्तं काशिकायाम् – ' विध्यर्थमिदम् । ' अण् ' इति नानुवर्तते । अणामन्येषां च तपराणामिदमेव ग्रहणकशास्त्रम् । " अतो भिस ऐस् " इत्येवमादिषु पूर्वग्रहणकशास्त्रं न प्रवर्तत एव । अतपरा अणस्तस्यावकाशः '[2030] । इति । एतद्व्याख्यायां हरदत्तेनाप्युक्तम् – ' किं पुनरिदं नियमार्थमाहोस्विद्विध्यर्थम् ? तत्राणित्यनुवृत्तौ नियमार्थम् – तपरोऽण् वर्णस्तत्कालस्यैवेति । निवृत्तौ विध्यर्थम् । तत्राद्ये पक्षे " आतो धातोः "[2031], " अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ "[2032], " यस्येति च "[2033], " विड्वनोरनुनासिकस्यात् " इत्यादौ ' भेदका गुणाः ' इत्यस्मिन् दर्शने यद्गुणक उपातस्ततो गुणान्तरयुक्तस्य ग्रहणं न स्यादिति द्वितीयं पक्षमाश्रित्याह विध्यर्थमिति '[2034] । इति ।

[2029] अष्टाध्यायी – (6-4-41)

[2030] काशिका – प्रकृतसूत्रे

[2031] अष्टाध्यायी – (6-4-140)

[2032] अष्टाध्यायी – (7-3-36)

[2033] अष्टाध्यायी – (6-4-148)

[2034] काशिका – पदमञ्जरी –प्रकृतसूत्रे

भट्टोजिदीक्षितानामभिप्रायः – ' अस्य सूत्रस्य भट्टोजिदीक्षितेन वृत्तिः कृता कौमुद्याम् – ' तः परो यस्मात्स तात्परश्चोच्चार्यमाणसमकालस्यैव सञ्ज्ञा स्यात् '[2035] इत्येवंरूपा ' एव ' पदघटिता। यतो हि समकालस्यैव सञ्ज्ञा इति कथनेन न भिन्नकालस्य इति फलति। तेन ज्ञायते यत् समकालभिन्नकाल-रूपसर्वसवर्णग्रहणे प्राप्तेऽनेन नियम्यते – समकालस्यैव ग्रहणं भवति तपरेण (अणा), न तु भिन्नकालस्येति। अत्रायमभिप्रायः – व्यक्तिपक्षेऽपि सूत्रमिदं नियामकमेव न तु कथमपि विधायकम्। पूर्वसूत्रात् ' अण् ' इति अत्रापि अनुवर्तते। ततश्च तपरोऽण् समकालसवर्णग्राहकः इति सूत्रार्थे जाते, तत्र भिन्नकालस्येव समकालस्यापि सवर्णस्य ग्रहणशास्त्रेणैव ग्रहणे प्राप्ते सूत्रमिदं व्यर्थं सन्नियामकं सम्पद्यते, ' सिद्धे सत्यारम्भो नियमार्थः ' इत्युक्तेः।

नियमाकारश्च तपरो योऽण् स समकालस्यैव सवर्णस्य ग्राहको न तु भिन्नकालस्येति। ये तु आकारादयोऽनणस्ते तु यथा अतपरा अपि गुणानामभेदकतया उदात्तानुदात्तस्वरितानुनासिकानां षण्णामपि समकालसवर्णानां ग्राहकाः स्वभावतः, तथैव तपरा अपि स्वभावत एव उदात्तादिगुण-विशिष्टानां समकालानां सर्वेषां ग्राहकाः सेत्स्यन्ति, गुणानामभेदकत्वस्यैव भाष्ये सिद्धान्तितत्वात्। अतो न तेषामनणामाकारादीनां समकालसवर्णग्रहणार्थम् " आतो धातोः " इत्यादौ सूत्रस्यास्य विधायकत्वमपेक्षितम्, किन्तु उक्तरीत्या नियामकत्वमेव। एवं जातिपक्षेऽपि जातिग्रहणप्राप्तसवर्णग्रहण-नियमनाय गुणानामभेदकतया च प्राप्तसवर्णग्रहणनियमनायापि अस्य सूत्रस्य नियामकत्वम्। एवञ्च जातिव्यक्त्योरुभयोरपि पक्षयोरस्य सूत्रस्य नियामकत्वमेवेति '[2036] भट्टोजिदीक्षितानामभिप्रायः।

तथैव चोक्तं बालमनोरमाकृता – ' ग्रहणकसूत्रेऽण् सवर्णानां ग्राहक इति स्थितम्। एवं सति अत् इत् उत् – इत्यादितपराणामप्यणां स्वस्वसर्वसवर्णग्राहकत्वे प्राप्ते इदमारभ्यते – " तपरस्तत्कालस्य "। .... तत्र ह्रस्वाकारादीनां तपराणां तत्तद्ध्रस्वप्रपञ्चवाचकत्वस्य एकारादीनाञ्च दीर्घाणां तपराणां स्वस्वदीर्घप्रपञ्चवाचकत्वस्य लोकसिद्धत्वात् (सवर्णग्राहकसूत्रसिद्धत्वाच्च) ' सिद्धे सत्यारम्भो नियमार्थः ' इतिन्यायेन सूत्रमिदं नियमार्थं सम्पद्यते। अण् तपरश्चेत्, समकालस्यैव सवर्णस्य ग्राहकः, न त्वतत्कालस्येति। एवं चातत्कालनिवृत्त्यात्मकपरिसंख्यार्थमिदं सूत्रम्। वैयाकरणास्तु परिसंख्या-विधिमेव नियमविधिरिति व्यवहरन्ति। तदिदं सर्वमभिप्रेत्य व्याचष्टे – ' तः परो यस्मात् ' इत्यादिना। .... अत् इत् उत् लृत् एत् ऐत् ओत् औत् इत्येते अष्टौ तपरा अणः स्वस्वसमानकालानां षण्णां

[2035] सिद्धान्तकौमुदी – प्रकृतसूत्रे

[2036] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

षण्णामेव सञ्ज्ञाः, न त्वतत्कालानामित्यर्थः '[2037] । एवञ्च सूत्रस्यैतस्य नियमार्थत्वमास्थाप्य काशिकाकृदाद्युक्तविधायकत्वपक्षे यान्युदाहरणानि तैः प्रत्तानि, तेषामन्यथोपपादनद्वारा विधायकत्वमेव निराकरोत्यस्येत्थम् – ' आत् ईत् ऊत् इत्यादि तु न तपरसूत्रस्योदाहरणम् । आकारादिषु हि तपरसूत्रमपूर्व-विधानार्थमुत नियमार्थम् ? नाद्यः, तपरसूत्रे ग्रहणकसूत्रादणित्यनुवृत्तेः । तत्र अणित्यस्योक्तरीत्या वर्णसमाम्नायपठितवर्णमात्रपरत्वात् । तपरसूत्रेऽण्ग्रहणानुवृत्त्यभावेऽपि जातिपक्षे आकारादिभिर्दीर्घैः स्वस्वसमानकालिकप्रपञ्चस्य वाच्यताया लोकत एव सिद्धत्वेन तेषु तपरसूत्रप्रवृत्तेर्व्यर्थत्वात् । न द्वितीयः, उक्तरीत्या ग्रहणकसूत्रस्य वर्णसमाम्नायिकवर्णमात्रविषयतया आकारादिषु तस्य प्रवृत्त्यसम्भवेन तपरसूत्रस्य तेष्वतत्कालव्यावृत्तिफलकतन्नियमनार्थत्वानुपपत्तेः, सिद्धे सत्यारम्भस्यैव नियमार्थत्वात् । एवञ्च आत्, ईत् इत्यादि तपरकरणमसन्देहार्थमेव '[2038] ।

नागेशभट्टनामभिप्रायः – जातिव्यक्तिपक्षभेदेन गुणानां भेदकत्वाभेदकत्वपक्षभेदेन चास्य सूत्रस्य विधायकत्वं नियामकत्वं चोभयमपि स्वीकुर्वन्ति नागेशभट्टादयः । तथाहि – ' यदि अत्र ' व्यक्तिः पदार्थः ' इति पक्षोऽङ्गीक्रियते, गुणानां भेदकत्वञ्च । तदा आत्-ईत् इत्यादिभिरनण्त्वात् सवर्णग्रहणे सर्वथाऽप्राप्ते समकालसवर्णग्रहणार्थमिदं सूत्रं विधायकम्, अप्राप्तस्य प्रापकत्वात् । अर्थात् व्यक्तिपक्षेऽणुदित्सूत्रादण्ग्रहणानुवृत्तेस्सत्त्वेन गुणभेदकत्वेन परत्वात्, गुणाभेदकत्वेऽनवकाशत्वात् । यत्र यत्र तपरसूत्रे षण्णां ग्रहणं प्राप्तं तत्र सर्वत्र गुणानामभेदकत्वेन अष्टादशानां ग्रहणं प्राप्तमिति तत्पक्षेणाष्टादशानां ग्रहणं स्याच्चेत् सूत्रमिदं व्यर्थं स्यादिति तस्य निरवकाशत्वम् । तत्सामर्थ्यादेवानेन षण्णामेव बोधो भवति । तपरसूत्रेण " अणुदित्सवर्णस्याप्रत्ययः " इति सूत्रस्य बाध इति तपरसूत्रस्य सार्थक्यसम्भवात् विधित्वमेवेति ज्ञेयम् ।

व्यक्तिपक्षे सिद्धान्तरूपेण गुणभेदकत्वपक्षो ग्राह्यः । ' जातिः पदार्थः ' इति पक्षे तु आकारादिभिरपि अकारादिभिरिव आत्वाद्यवच्छिन्नस्वसमकालसर्वसवर्णानां ग्रहणे प्राप्ते एव सति तपरसूत्रं व्यर्थं सत् नियमार्थं सम्पद्यते – तपराः समकालसवर्णस्यैव बोधकाः, नासमकालस्येति । अर्थात् जातिपक्षे अणुदित्सूत्रेऽण्ग्रहणं प्रत्याख्यातम् । जातिपक्षे तत्तत्जात्यवच्छिन्नानां सर्वासां व्यक्तीनां ग्रहणसम्भवेन भिन्नकालग्रहणस्य दुर्वारतया तपरसूत्रस्य ' गुणा अभेदकाः ' इति, ' गुणा भेदकाः ' इति पक्षद्वयेऽपि नियमार्थत्वमेव स्यात् । जातिपक्षे ' गुणा अभेदकाः ' इति पक्षः सिद्धान्तपक्षः । तत्र विधायकत्वपक्षो वार्तिककृत्सम्मतः प्रकृतसूत्रे एव भाष्ये उक्तः । नियामकत्वपक्षस्तु जातिपक्षाश्रयेण

[2037] सिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

[2038] सिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

अणुदित्सूत्रेऽण्ग्रहणप्रत्याख्यायकभाष्यकृत्सम्मतः ‘ अइउण् ’ इति सूत्रे भाष्ये स्पष्टीकृतः ’। तथा चोक्तं लघुशब्देन्दुशेखरे नागोजिभट्टेन – ‘ अत्र पक्षे ‘ अइउण् ’ सूत्रशेषोक्तभाष्यरीत्या तपरसूत्रस्य जातिग्रहण-प्राप्तसवर्णग्रहणनियामकत्ववत् .... ’[2039] इति । किञ्च प्रकृतसूत्रे तत्रैव – ‘ इदं च विध्यर्थमेव, अण्ग्रहणाननुवृत्तेः । गुणानां भेदकतयाऽनणि विधित्वेऽपि वृद्धिरादैजित्यादौ आकारांशे सावकाशेनानेन “ अतो भिस ऐस ” इत्यादौ परत्वेन अणुदित्सूत्रबाधः, संख्याकृतव्यवहारस्य परस्परपरिहारेणैव दृष्टतयेह विरोधस्य सत्त्वात् । गुणानामभेदकत्वे त्वनवकाशत्वाद् बाधः – इति बोध्यम् । .... जातिपक्षे तु नियमार्थमेव, सवर्णग्रहणानुवृत्तेः । एवं गुणानामभेदकत्वमिति “ वृद्धिरादैच् ” इति सूत्रभाष्यसम्मत-सिद्धान्तपक्षेऽपि नियमार्थम् ’[2040] । इति । एवञ्च नागेशेन व्यक्तिपक्षे विधायकत्वस्य जातिपक्षे च नियामकत्वस्य व्यवस्थापनेन सहैव ‘ एवं गुणानामभेदकत्वम् ’ इत्यादिरूपेणान्तिमवाक्येन वस्तुतो व्यक्तिपक्षेऽपि नियामकत्वमेव सिद्धान्तितम् ’[2041] ।

‘ वस्तुत इदं विध्यर्थं नियमार्थं वेति विचारो निरर्थक एव । “ अस्य च्वौ ”[2042] इत्यादौ अपदस्याष्टानां बोधकत्वे तात्पर्यग्राहकम् “ अणुदित्सवर्णस्याप्रत्ययः ” इति सूत्रम् । “ अतो भिस ऐस् ” इत्यादौ अत्पदस्य षण्णां बोधकत्वे च तात्पर्यग्राहकं तपरसूत्रमित्यनयोः तात्पर्यग्राहकत्वेन सञ्ज्ञासूत्रत्वाभावात् तादृशविरोधो व्यर्थ एव ’[2043] इति शेखरटिप्पणीकाराणां वेङ्कटराम-शास्त्रिणामभिप्रायः ।

- **आदिरन्त्येन सहेता – (1-1-70)**

सूत्रार्थः – “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ” इति सूत्रात् ‘ स्वम् ’, ‘ रूपम् ’ इति पदद्वयमनुवर्तते । आदिः अन्त्येन इता = इत्सञ्ज्ञकेन वर्णेन सह तयोर्मध्यस्थानां स्वस्य च रूपस्य ग्राहको भवति । उदाहरणानि च – अण् = अ इ उ । अक् = अ इ उ ऋ लृ ।

आदिः, अन्त्येन, सह, इता इति पदविभागः । अन्तेऽवसाने भवोऽन्त्यः । भवार्थे दिगादित्वात् “ दिगादिभ्यो यत् ”[2044] इति सूत्रेण यत्प्रत्ययः । ‘ नन्ववसानं वर्णानामभावस्तत्र कथं वर्णसञ्ज्ञा इति चेन्न,

---

[2039] लघुशब्देन्दुशेखरे सञ्ज्ञाप्रकरणे – अणुदित्सूत्रे

[2040] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

[2041] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[2042] अष्टाध्यायी – (7-4-32)

[2043] लघुशब्देन्दुशेखरः – शेखरटीप्पणी – प्रकृतसूत्रे

[2044] अष्टाध्यायी – (4-3-54)

‘ अन्ते ’ इत्यस्य अन्तसमीपपरकत्वेनावसानसामीप्यस्य चरमवर्णऽक्षतत्वात् । यद्यपि अन्तशब्दस्य चरमवर्णवाचकत्वेन ‘ आदिरन्तेन ’ इत्येव वक्तुमुचितं तथापि अन्तान्त्यशब्दयोः पर्यायत्वध्वननाय ‘ अन्त्येन ’ इत्युक्तम् । अत एव “ अचोऽन्त्यादि टि ”[2045], “ अन्तादिवच्च ”[2046] इत्यादौ तुल्यार्थाभिप्रायेणोभयनिर्देशसङ्गतिः ।

“ आदिरन्त्येन सहेता ” इति सूत्रे आदिपदम्, अन्त्यपदम्, इत्पदञ्च स्वसदृशबोधकम् । अन्यथा कस्यापि प्रत्याहारस्य सिद्धिर्न स्यात् । तथाहि – ‘ अच् ’ प्रत्याहारसिद्धये ‘ ऐऔच् ’ सूत्रस्थ-चकारस्येत्सञ्ज्ञा कर्तव्या । तत्रेत्सञ्ज्ञकचकारेण सह अकारस्याव्यवहितत्वरूपसाहित्यमेव नास्ति इति ‘ आदिरन्त्येन ’ इत्यस्य तत्र प्रवृत्तिर्न स्यात् । यत्र च “ उपदेशेऽजनुनासिक इत् ”[2047] इत्यादौ चकारेण सहाकारोऽस्ति तत्र चकारस्य नेत्सञ्ज्ञा उपदेशाभावात् । नापि तत्र मध्यमो वर्णः । उपदेशो नाम आद्योच्चारणम् । तच्च अज्ञातस्वस्वरूपज्ञापकोच्चारणम् । यदुच्चार्यते पाणिन्यादिभिस्तदेव यदि बुध्यते उपदेशत्वं तस्य । यथा ‘ सु-सुप्, गर्गादिभ्यो यञ्, टाप्, ङीप्, ङीष्, सुट्, नुट्, शीङ् ’ इत्यादिषु उच्चारित एव शब्दो बुध्यते । इत्युपदेशत्वसत्त्वेन इत्सञ्ज्ञा तत्र भवति । ‘ अच्, हल्, झल् ’ इत्यादिषु प्रत्यय-धातु-प्रातिपदिकसञ्ज्ञाशब्देषु उच्चरितेषु तत्स्था वर्णा न बुध्यन्ते इति न तत्रोपदेशत्वम् ।

तथा च ‘ आदिरन्त्येन ’ इति सूत्रसामर्थ्यात् सदृशे लक्षणया अन्त्येत् ‘ ऐऔच् ’ इत्यादिसूत्रस्थ-चकारादिस्तत्सदृशेन ‘ अच् ’ इत्यादिप्रत्याहारावयवचकारादिना सहितो य आदिः – ‘ अइउण् ’ इत्यादिसूत्रस्थः, अकारादिस्तत्सदृशः, ‘ अच् ’ इत्यादिप्रत्याहारघटकोऽकारादिः, सः = ‘ अच् ’ इत्यादिशब्दः, स्वान्त्यचकाराद्यनुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितेत्सञ्ज्ञकचकारान्तस्य, स्वाद्यकाराद्यनुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितवर्णसमाम्नायादिस्थाकाराद्याद्यवयवकस्य सञ्ज्ञा इत्यर्थकेन ‘ आदिरन्त्येन ’ इति सूत्रेण ‘ अच्, हल् ’ इत्यादिसकलप्रत्याहारः सिध्यति । तत्र इत्सञ्ज्ञको वर्णः सादृश्यप्रतियोगी । ‘ अच् ’ प्रत्याहारान्त्यो वर्णः चकारादिः सादृश्यानुयोगित्वेन विवक्षितः । स अन्त्यो यस्य सः । एवम् ‘ अइउण् ’ इत्यादि घटक आदिवर्णः, अकारादिः सादृश्यप्रतियोगित्वेन विवक्षितः ‘ अच् ’ इत्यादिप्रत्याहारस्य आदिः अकारादिः सादृश्यानुयोगी । तथा च ‘ अच् ’ इत्यादि-प्रत्याहारस्य आद्यन्तौ उभावपि सादृश्यानुयोगिनौ । प्रत्याहारेण यस्य समुदायस्य बोधस्तत्रत्यौ आद्यन्तौ वर्णौ सादृश्यानुयोगिनौ । एवञ्च सादृश्यानुयोगिनाऽन्त्यवर्णेन सहितः सादृश्यानुयोगी आदिः ‘ अच् ’

[2045] अष्टाध्यायी – (1-1-64)
[2046] अष्टाध्यायी – (6-1-84)
[2047] अष्टाध्यायी – (1-3-2)

इति, सादृश्यप्रतियोगि ‘ ऐऔच् ’ इति सूत्रचकारो यस्य समुदायस्य अन्त्यः, ‘ अइउण् ’ सूत्राकारो यस्य समुदायस्यादिः स समुदायः ‘ अइउण् ऋऌक् एओङ् ऐऔच् ’ इति, तस्य समुदायस्य बोधकः। एवमन्य-प्रत्याहारेषु स्वयमूह्यम् ’ [2048]।

सर्वत्र सञ्ज्ञासूत्रे सञ्ज्ञाबोधकं पदं सञ्ज्ञिबोधकञ्च पदं वर्तते। यथा – “ वृद्धिरादैच् ” इत्यत्र ‘ वृद्धिः ’ इति सञ्ज्ञाबोधकम्, ‘ आदैच् ’ इति सञ्ज्ञिबोधकम्। एवम् “ आदिरन्त्येन सहेता ” इत्यत्र न ज्ञायते किं सञ्ज्ञाबोधकम्, किञ्च सञ्ज्ञिबोधकमिति। अन्त्येनेता सहादिरिति ‘ अच्, हल् ’ इत्यर्थकं वाक्यं सञ्ज्ञाबोधकमिति चेत्तर्हि सम्पूर्णस्य सञ्ज्ञावाचकतया सञ्ज्ञिवाचकाभावेन सञ्ज्ञिनं विना सञ्ज्ञा नोपपद्यते। अतः सञ्ज्ञादलप्रविष्टाद्यवयवान्त्यावयवरूपार्थेन अवयविनं विना अवयवस्यानुपपत्त्या ‘ येन विना यदनुपपन्नं तेन तदाक्षिप्यते ’ यथा भोजनं विना पीनत्वं नोपपद्यते इति पीनत्वानुपपत्त्या ‘ पीनोऽयं देवदत्तः दिवा न भुङ्क्ते ’ इत्यत्र रात्रिभोजनाक्षेपस्तथा ‘ आदिरन्त्येन ’ इत्यत्राप्यवयवस्यावयविनं प्रति नित्यासाङ्काक्षत्वादाक्षेपः सम्भवः। यद्यप्यादिशब्दः परमात्रमपेक्षते, अन्त्यश्च पूर्वमात्रम्, तथापि सह प्रयुज्यमानौ मध्यापेक्षाविति भावः। अत एव ‘ आद्यन्त्याभ्यामवयवाभ्याम् आद्यन्तघटितसमुदाय-रूपमवयविनं आक्षिप्यते। तस्य च युगपल्लक्ष्ये प्रयोगाभावात्तदवयवेष्वतरन्ती सञ्ज्ञा मध्यगेषु विश्राम्यति, न त्वाद्यन्तयोः, सञ्ज्ञास्वरूपान्तर्भावेण तयोः पारार्थ्यनिर्णयात् ’[2049] (सञ्ज्ञिबोधकत्व-निर्णयात्)। सञ्ज्ञा हि सञ्ज्ञिनं बोधयति न तु सञ्ज्ञास्वरूपमपीति भावः। तदुक्तं भाष्ये – ‘ आदिरन्त्य इति सम्बन्धिशब्दावेतौ, तत्र सम्बन्धादेतदवगन्तव्यम्। यं विना य आदिरन्त्य इति च भवति तस्य ग्रहणम्, इति आद्यन्ताभ्यामवयवाभ्यामवयवी समुदाय आक्षिप्यते स एव सञ्ज्ञी ’[2050] इति भाष्याशयः।

“ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ” इति सूत्रात् ‘ स्वं रूपम् ’ इत्यनुवर्तते। तच्च षष्ठ्यन्ततया विपरिणम्यते। ‘ अत्र यद्यपि स्वपदेन बोधकस्य ‘ अच् ’ इति समुदायस्य सञ्ज्ञा प्राप्नोति तथापि समुदायस्य सञ्ज्ञायां फलाभावेन तदवयवस्यादेरेव सञ्ज्ञा नान्त्यस्य, सूत्रे ‘ अन्त्येन ’ इति “ सहयुक्तेऽप्रधाने ”[2051] इत्यनेन जाततृतीयया अन्त्यस्याप्रधानत्वेनादेश्च तदपेक्षया प्रधानत्वेन स्वशब्दस्य सर्वनाम्नः स्वभावतः प्रधानबोधकत्वेन ‘ स्वस्य च रूपस्य ’ इत्यनेनादेरेव बोध्यत्वकल्पनाच्च ’।

[2048] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[2049] प्रौढमनोरमा – प्रकृतसूत्रे

[2050] भाष्यम् – प्रकृतसूत्रे

[2051] अष्टाध्यायी – (2-3-19)

‘ वस्तुतो ज्ञापकादिनाऽस्यापि (सञ्ज्ञास्वरूपघटकान्त्यस्यापि) न सञ्ज्ञाकार्यम्, आद्यन्त-शब्दाभ्यामाद्यन्तघटितसमुदायस्याक्षेपेणान्येषामिव तयोः प्राप्तायाः सञ्ज्ञायाः प्रकारान्तरेण (ज्ञापकादि-भिन्नप्रकारेण) अशक्यवारणत्वात् । स्वशब्दानुवृत्तेश्च न फलम् । भाष्येऽपि एतत्फलितार्थकथनमेव स्वस्य च रूपस्येति । सञ्ज्ञास्वरूपत्वं विशिष्टस्यास्तु प्रत्येकं स्वबोध्यत्वं चास्तु को विरोधः । यथा “ अच्च घेः ”[2052] इत्यादौ गुणदर्शनेन घिशब्दस्यापि घिसञ्ज्ञाबोद्ध्यत्वं तद्वत् । एवमजादिसञ्ज्ञा स्वसञ्ज्ञिघटकेकारादिष्विवाकारचकारयोरपि प्राप्नोत्येव । किञ्च, स्वशब्देन केवलान्त्य-परामर्शासम्भवेऽपि विशिष्टपरामर्शे न बाधकम्, तत्र समुदाये फलाभावादवयवयोर्विश्रान्तिं प्राप्स्यति । तस्माज्ज्ञापकादिनैवान्त्यस्य तत्कार्यं वारणीयम् ’[2053] इति शब्दरत्नकाराणामाशयः ।

अर्थात् – ‘ स्वं रूपम् इत्यनुवृत्तिं विनापि आदेः समुदायावयवत्वेन स्वत एव बोध्यत्वसिद्धौ अन्त्यस्य च “ तस्य लोपः ”[2054] इति लोपेन ज्ञापकादिना वा प्रत्याहारबोध्यत्वाभावसिद्धौ तदर्थमनेकविधक्लिष्टकल्पनमयुक्तमेव ’[2055] ।

भट्टोजिदीक्षितानामभिप्रायः – “ आदिरन्त्येन सहेता ” इति सूत्रेण अन्त्येन इता सह आदिः सञ्ज्ञा इत्यर्थः लभ्यते । किन्तु केषां सञ्ज्ञा ? इति तु सूत्राक्षरैः नायाति । अतः भट्टोजिदीक्षितैः आक्षेपद्वारा स्वशब्दानुवृत्तिद्वारा च मध्यगानां स्वस्य च सञ्ज्ञा इति सूत्रार्थः स्वीक्रियते । तथा च –

‘ आद्यन्ताभ्यामवयवाभ्यामवयवी समुदाय आक्षिप्यते, तस्य युगपल्लक्ष्ये प्रयोगाभावात् तदवयवेष्ववतरन्ती सञ्ज्ञा मध्यगेषु विश्राम्यति न त्वाद्यन्तयोः ’[2056] । इति मनोरमायां मध्यगानां इत्यर्थो लाभस्य स्पष्टीकरणं क्रियते ।

तद्रीत्या स्वस्य च इत्यर्थो लाभस्तु स्वं रूपमित्यनुवृत्तेः । तच्च आदेरेव गृह्यते न तु ‘ अन्त्यस्य ’ इत्यपि तैः स्वसिद्धान्ताधारेण व्याख्यायते [2057] ।

एवञ्च भट्टोजिदीक्षितरीत्या आक्षेपेण आदेः लाभाभावात् तत्संग्रहाय स्वमित्यस्यानुवृत्तिः आवश्यकीति बोध्यम् । एवमेव सूत्रे ‘ इता ’ इत्यस्य प्रयोजनमपि भट्टोजिदीक्षितैः शब्दकौस्तुभे स्पष्टीक्रियते ।

[2052] अष्टाध्यायी – (7-3-119)

[2053] प्रौढमनोरमा – शब्दरत्नः – प्रकृतसूत्रे

[2054] अष्टाध्यायी – (1-3-9)

[2055] सिद्धान्तकौमुदी – लक्ष्मीटीका – प्रकृतसूत्रे

[2056] प्रौढमनोरमा – प्रकृतसूत्रे

[2057] स्वस्य चेति । स्वरूपमित्यनुवृत्तेः । स्वं रूपं चादेरेव गृह्यते नान्त्यस्य । (प्रौढमनोरमा – प्रकृतसूत्रे)

‘ इतेति किम् ? ‘ र ’ प्रत्याहारो यथा स्यात् ’[2058] । तथा च तद्रीत्या अनुनासिकप्रतिज्ञाबलाद् अनन्त्येनापीता ‘ र ’ प्रत्याहारो भवति । ‘ इता ’ इत्यस्याभावे तु अकारस्य अनन्त्यत्वेन स न स्यात् । तस्मात् ‘ र ’ प्रत्याहारसिद्धिः इता इत्यस्य प्रयोजनमिति भट्टोजिदीक्षितानां सिद्धान्तः ।

नागेशभट्टानामभिप्रायः – नागेशभट्टैः अत्र सूत्रे स्वमित्यस्यानुवृत्तिः नाङ्गीक्रियते । तद्रीत्या ‘ आद्यन्ताभ्यामवयवत्वेन बोधकाभ्यां स्वघटितः समुदायः आक्षिप्तः सञ्ज्ञी ’[2059] ।

तत्र समुदायस्य एकत्र प्रयोगाभावात् प्रत्येकं सञ्ज्ञित्वं स्वीक्रियते । अन्त्यस्य इत्सञ्ज्ञा लोपाभ्यामपहाराद् न तत्कार्यम् । तथा च आक्षेपेणैव मध्यगानां आदेश्च सञ्ज्ञित्वसिद्धिः । तस्मादनुवृत्ति-परं भट्टोजिदीक्षितानां व्याख्यानं नागेशभट्टरीत्या हेयम्[2060] । उक्तरीत्या आक्षेपेणैव सञ्ज्ञिलाभे अनुवृत्तेः फलाभावात् । एवमेव ‘ इता ’ इति पदस्यापि भट्टोजिदीक्षितोक्तं फलं नागेशभट्टैः नाङ्गीक्रियते । तद्रीत्या रप्रत्याहारस्यैवाभावात् ।

तथा च नागेशभट्टरीत्या अणादिप्रत्याहाराः ‘ ञमङणनम् ’ इति सूत्रस्थैः णकारादिभिः मा भूवन् इति ‘ इता ’ इत्यस्य प्रयोजनं नागेशभट्टैः स्वीक्रियते[2061] । तस्मात् स्वमित्यनुवृत्तिविषये ‘ इता ’ इति प्रयोजनविषये च भट्टोजिदीक्षितनागेशभट्टयोः अत्र मतभेदः स्पष्टः इति बोध्यम्[2062] ।

‘ न च ‘ इक् उक् इच् यय् मय् ’ इत्यादिप्रत्याहाराः कथं स्युः, इकारादीनामादित्वाभावादिति वाच्यम्, न हि सूत्रापेक्षमिहादित्वम् । किन्तु आद्यन्तशब्दाक्षिप्तसमुदायापेक्षम् । ततश्च ‘ अइउण् ’ इति इकारमारभ्य ‘ ऋलृक् ’ इति ककारपर्यन्तं वर्णसमुदायं बुद्ध्या परिकल्प्य तदादित्वम् इकारस्य सम्भावनीयम् । तथा अन्त्यत्वमपि बुद्धिकल्पितसमुदायापेक्षमेव । न तु सूत्रापेक्षम् ’[2063] ।

- **येन विधिस्तदन्तस्य – (1-1-71)**

सूत्रार्थः – सोऽन्ते यस्य स तदन्तः, तस्य तदन्तस्य, बहुव्रीहिः । “ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ” इति सूत्रात् ‘ स्वम्, रूपम् ’ इति पदद्वयमनुवर्तते । येन (विशेषणेन) विधिर्विधीयते, स तदन्तस्य

2058 शब्दकौस्तुभः भागः – 1 – (पृ. – 285)

2059 लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

2060 स्वमित्यनुवृत्तिपरत्वेन व्याख्यानं तु हेयमेव, अनुवृत्तौ फलाभावात् । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

2061 इतेति किम् ? ञमङणनेति णकारादिभिः प्रत्याहारो मा भूदिति । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

2062 पाणिनिसञ्ज्ञासूत्रविमर्शः – (पृ. – 90)

2063 सिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

समुदायस्य स्वस्य च रूपस्य ग्राहको भवति। उदाहरणञ्च – " अचो यत् "[2064] – चेयम्, जेयम्। " एरच् "[2065] – चयः, जयः, अयः।

तदन्तविधिविधायकसूत्रमिदं त्रिपदम्। येन, विधिः, तदन्तस्य इतिच्छेदः। ' येन ' इति यच्छब्दात् तृतीयैकवचने रूपमिदम्। तृतीया चात्र करणेऽर्थे वर्तते। सा तृतीया किं " कर्तृकरणयोस्तृतीया "[2066] इति सूत्रेण कर्तरि करणे च स्यात् ?, किं वा " हेतौ "[2067] इति सूत्रेण हेत्वर्थे तृतीया भवेत् ? इति जिज्ञासोदेति। परन्त्वत्र कर्तरि तृतीया न सम्भवति, ' विधिः ' इति कृदन्तेन योगे " कर्तृकर्मणोः कृति "[2068] इति सूत्रेण षष्ठीप्रसङ्गात्। एवमेव करणतृतीया हि कारकतृतीया भवति यतोहि ' उपपदविभक्तेः कारकविभक्तिर्बलयसी ' इति न्यायेन कारकविभक्त्या उपपदविभक्तेर्बाधितत्वात् न हेतौ अपि तृतीयाप्रसङ्गः। अत एव ' येनेति करणे तृतीया '[2069] इति लघुशब्देन्दुशेखरवाक्यमुपपादयता श्रीभैरवमिश्रेणेत्थमुक्तं तद्व्याख्यायां चन्द्रकलायाम् – ' येनेति करणे तृतीयेति। कर्तरि तु न सम्भवति, षष्ठ्या बाधात्। नापि हेतौ, करणतृतीयायाः कारकविभक्तित्वेन प्राबल्यात्।'[2070] इति। ' येनेति करणे तृतीया ' इत्यस्मिन्नर्थे नास्ति सर्वेषां विदुषां विमतिः। सर्वेऽपि तथैव ह्याहुः। तथा च न्यासकारः – ' येनेति करणे तृतीया।'[2071] इति। हरदत्तोऽपि तत्र तथैवाह – ' इदमपि सञ्ज्ञा सूत्रम्। येनेति करणे तृतीया।'[2072] इति।

शब्दकौस्तुभे दीक्षितेनाप्युक्तम् – ' इह येनेति करणे तृतीया, न तु कर्तरि, कृद्योगलक्षणषष्ठ्या बोधितत्वात्।'[2073] इति। बालमनोरमाकारेणापि तथैवोक्तम् – ' येनेति करणे तृतीया। शास्त्रकृद् विधाने कर्ता। धातोरित्यधिकृत्य " एरच् "[2074] इतीकारेण करणेन धातोरच्प्रत्ययं विधत्ते पाणिनिः।'[2075] इति। एवमेव तत्त्वबोधिनीकारोऽप्याह – ' येनेति करणे तृतीया, न तु कर्तरि, तस्याः कृद्योगषष्ठ्या बोधात्। न

[2064] अष्टाध्यायी – (3-1-97)
[2065] अष्टाध्यायी – (3-3-56)
[2066] अष्टाध्यायी – (2-3-18)
[2067] अष्टाध्यायी – (2-3-23)
[2068] अष्टाध्यायी – (2-3-65)
[2069] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे
[2070] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे
[2071] काशिका – न्यासः – प्रकृतसूत्रे
[2072] काशिका – पदमञ्जरी – प्रकृतसूत्रे
[2073] शब्दकौस्तुभः – प्रकृतसूत्रे
[2074] अष्टाध्यायी – (3-3-56)
[2075] वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

च " उभयप्राप्तौ कर्मणि "[2076] इति नियमेन निर्वाहः, कर्मण उक्तत्वेनोभयप्राप्त्यभावात्। तथा चात्र करणे तृतीयैव।'[2077] इति।

' विधिः ' इत्यत्र विपूर्वकात् धाधातोः " उपसर्गे घोः किः "[2078] इति सूत्रेण किप्रत्ययो भवति। स च किप्रत्ययो कैयटदीक्षितानां मतेन कर्मणि किप्रत्ययो भवति, किन्तु नागेशभट्टादीनां मतेन तत्र भावे एव किप्रत्ययः। तथाहि प्रदीपे कैयटः प्राह – ' विधिशब्दः कर्मसाधनः। येन करणेन कार्यं विधीयते स शब्दस्तदन्तस्य सञ्ज्ञेत्यर्थः। तेन विशेषणेन विशेष्यस्य तदन्तविधिर्भवति नान्यथा।'[2079] इति। तत्रैव नागेशभट्टेनोक्तम् – ' कर्मसाधन इति। भावसाधनत्वेऽपि न बाधकम्, प्रसिद्धत्वाल्लभ्यत एव।'[2080] इति। एवमेवोक्तं तेन लघुशब्देन्दुशेखरेऽपि – ' विधिरिति भावे किः। कर्मात्र विधेयम्, कर्ता चाचार्यः प्रसिद्धत्वाल्लभ्यत एव।'[2081] पदमञ्जर्यां हरदत्तः कैयटमतमनुसरन् कर्मणि किप्रत्ययः प्राह – ' विधीयत इति विधिः, कर्मसाधनः किप्रत्ययः।'[2082] इति। एवमेवाह न्यासकारो न्यासेऽपि – ' विधीयते = अपूर्व एव क्रियते इति विधिः कर्मसाधनः, " उपसर्गे घोः किः " इति किप्रत्ययान्तः।'[2083] इति। शब्दकौस्तुभे तथैवोक्तं दीक्षितेनापि – ' विधिरिति हि कर्मणि किप्रत्ययः तेन कर्मणोऽभिहितत्वाद् " उभयप्राप्तौ कर्मणि " इति नियमस्य नायं विषयः।'[2084] इति। तत्रैव कैयटवचोऽनुसरन् तत्त्वबोधिनीकारोऽप्याह – ' विधिरित्यत्र " उपसर्गे घोः किः " इति कर्मणि किः प्रत्ययः।'[2085] इति। परन्तु वैयाकरणसिद्धान्तकौमुद्या बोलमनोरमाव्याख्याकारेण श्रीवासुदेवदीक्षितेन नागेशमतं प्रमाणीकृत्य भावे एव किप्रत्ययः स्वीक्रियते। यथोक्तं तत्र तेन – ' विधीयत इति विधिः, उपसर्गे घोः किः इति दधातेर्भावे किप्रत्ययः।'[2086] इति।

' एवञ्च यद्यपि विधिशब्दस्य भावसाधनत्वे कर्मसाधनत्वे वा अस्ति आचार्याणां भिन्नं मतम्, तथापि तयोरन्यतरस्मिन् पक्षे नास्ति तात्पर्यार्थेऽन्तरं किञ्चित्। एतावदेव तु स्यात् – वाक्ये कर्तुराचार्यस्य कर्मणो विधेयस्य च प्रयोगे सति भावसाधनपक्षे कर्मणोऽनुक्तत्वात् कृदन्तयोगे कर्तरि

2076 अष्टाध्यायी – (2-3-66)
2077 वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे
2078 अष्टाध्यायी – (3-3-92)
2079 भाष्यम् – प्रदीपः – प्रकृतसूत्रे
2080 भाष्यम् – उद्द्योतः – प्रकृतसूत्रे
2081 लघुशब्देन्दुशेरखः – प्रकृतसूत्रे
2082 काशिका – पदमञ्जरी – प्रकृतसूत्रे
2083 काशिका – न्यासः – प्रकृतसूत्रे
2084 शब्दकौस्तुभः – प्रकृतसूत्रे
2085 वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे
2086 वैयाकरणसिद्धान्तकौमुदी – बोलमनोरमा – प्रकृतसूत्रे

कर्मणि चोभयत्र षष्ठ्यां प्राप्तायाम् “ उभयप्राप्तौ कर्मणि ” इति नियमात् कर्मणि षष्ठी कर्तरि च तृतीया स्यात्। कर्मसाधनपक्षे तु कर्मण उक्तत्वात् तत्र षष्ठ्या अप्राप्तौ कर्तरि षष्ठ्येव स्यात्। अत एव भावसाधन-वादिभिः कर्मसाधनवादिभिश्चोक्तोऽर्थः सूत्रस्याभिन्न एवास्ति ’[2087]।

सूत्रे ‘ येन ’ इति पदेन विशेषणरूपस्यार्थग्रहणे आचार्याणां मतभेदः दरीदृश्यते। तत्र करणस्य कर्त्रधिष्ठितत्वात् पारतन्त्र्यात् विशेषणतालाभः इति हरदत्तदीक्षितानामशयः। तथाहि हरदत्तः पदमञ्जर्यामाह – ‘ येनेति करणे तृतीयेत्युक्तम्, करणं च परतन्त्रम्, कर्त्रधिष्ठितस्यैव करणत्वात्। धात्वादीनां च स्वातन्त्र्यं स्वरूपोऽवभासते, ... अतो विवक्षानिबन्धनं तदुभयमिति। विशेषणत्वेन विवक्षितं परतन्त्रमप्रधानम्, विशेष्यत्वेन विवक्षितं स्वतन्त्रं प्रधानम्। तेन विशेषणं विशेष्यस्य तदन्तस्य सञ्ज्ञेत्युक्तं सम्भवति। विशेष्यसन्निधौ च विशेषणं भवति।’[2088] इति। एवमेवोक्तं शब्दकौस्तुभे दीक्षितेन – ‘ करणं च परतन्त्रम्, कर्त्रधिष्ठितस्यैव करणत्वात्। एवञ्चेह तृतीयया पारतन्त्र्यं लक्ष्यते सुब्विभक्तौ न लक्षणा इति नैयायिको दोषस्तु निर्मूलः।’[2089] इति।

तथैवोक्तं वैयाकरणसिद्धान्तकौमुद्यां तत्त्वबोधिन्यां श्रीमज्ज्ञानेन्द्रसरस्वतीमहोदयेन – ‘ तथा चात्र करणे तृतीयैव। करणं परतन्त्रम्, कर्त्रधिष्ठितस्यैव करणत्वात्। एवं चेह तृतीयया पारतन्त्र्यं लक्ष्यते। न च “ एरच् ” इत्यादौ इकारादीनां पारतन्त्र्यं धात्वादीनां च स्वातन्त्र्यं वास्यादीनामिव तक्षादीनामिव सम्भवति, किन्तु वैवक्षिकम्। तेन विशेषणमप्रधानम्। तच्चात्मान्तस्य सञ्ज्ञेति फलितम्, तदेतदाह – विशेषणं तदन्तस्येति।’[2090] इति।

करणस्य व्यापारवत्त्वनियमात् शब्दे च इतरव्यावृत्तिरूप एव व्यापारः। तादृशव्यापारवांश्च विशेषणीभूत एवेति येन विधिरित्यनेन करणे विशेषणत्वलाभमिति नागेशभट्टानामभिप्रायः। तथाहि सुस्पष्टमुक्तं नागेशेन लघुशब्देन्दुशेखरे – ‘ यत्तु करणं कर्तृपरतन्त्रमिति तृतीयया पारतन्त्र्यं लक्ष्यते, तच्च शब्दानां विशेषणत्वेनेति विशेषणमिति लब्धमिति, तन्न। ‘ सुब्विभक्तौ न लक्षणा ’ इत्यस्य सर्वसम्मतत्वात्। किं बहुना, येषां प्रत्ययानामन्येषां वा शब्दानामर्थे विधानं कृतं शास्त्रेण, तेषामन्यत्रार्थे तदर्थे चान्येषां लक्षणयाऽपि साधुत्वाऽभावस्य “ प्रत्ययः ”[2091], “ पुंयोगादाख्यायाम् ”[2092] इत्यादि-

---

[2087] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[2088] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[2089] शब्दकौस्तुभः – प्रकृतसूत्रे

[2090] वैयाकरणसिद्धान्तकौमुदी – तत्त्वबोधिनी – प्रकृतसूत्रे

[2091] अष्टाध्यायी – (3-1-1)

[2092] अष्टाध्यायी – (4-1-48)

भाष्यतो लाभात् ।'[2093] अनया रीत्या परमतं खण्डयित्वा तेऽत्र विषये स्वाभिमतमेवं प्रकटयाञ्चक्रुः पुनरग्रे – ' करणस्य व्यापारवत्त्वनियमादन्येषां च व्यापाराभावाद् विशेषणमेवात्र करणतृतीयान्तेनोच्यते । तस्य चेतरव्यावृत्तिकरणमेव व्यापारः ।'[2094] इत्युक्त्वा एतत्स्वपक्षसमर्थनाय तेऽत्रत्यं भाष्यमपि प्रमाणत्वेनोपस्थापयन्ति – ' तदुक्तं भाष्ये – येनेति करणे एषा तृतीया । अन्येन चान्यस्य विधिर्भवति । यथा चैत्रस्य सङ्ग्रामं हस्त्यश्वादिभिर्विधत्ते । एवम् " अचो यत् " इति अचा धातोर्यतं विधत्ते ।' इति । .... तत्र शब्दोपस्थितविशेष्यस्य तादृशं विशेषणमेव तदन्तग्राहकम् । क्वचित् सति गमके अतादृशं शब्दरूपं विशेष्यमादायापि तदन्तविधिः । तच्चान्तरङ्गत्वात् समानाधिकरणमेव ।'[2095] इति । ' यतो हि तृतीयाविभक्तेः पारतन्त्र्ये लक्षणा नैव सम्भवति, सुपां लक्षणाया अभावस्य सर्वसम्मतत्वात् । किञ्च पारतन्त्र्ये लक्षणायां विधिपदार्थेऽनन्वयापत्तिः, विधानस्य पारतन्त्र्ये निराकाङ्क्षत्वात्, कारकमात्र-साकाङ्क्षत्वाच्च । अतो नायमभ्युपायो विशेषणत्वलाभस्य, किन्तु करणस्य व्यापारवत्त्वनियमाद् विशेषणात्मकस्यैव शब्दस्य इतरव्यावृत्तिरूपव्यापाराद् विशेषणमेव तादृशव्यापारवत्करणं भवति । अतः करणार्थया तृतीयया विशेषणं लभ्यते ' इति नागेशभट्टानामाशयः ।

मतमिदमेव स्वीकृतं बालमनोरमाकारेणापि स्वव्याख्याने – ' केचित्तु करणं कर्तृपरतन्त्रमिति तृतीयया पारतन्त्र्यं लक्ष्यते, तच्च शब्दानां विशेषणत्वेनेति विशेषणपरत्वं यच्छब्दस्य लभ्यत इत्याहुः । तत्तु शब्देन्दुशेखरे दूषितम् ।'[2096] इति । शेखरव्याख्यानमेवानुसरद्भिरन्यैः प्रायेण सर्वैरपि अर्वाचीनैर्व्याख्यातृभिः स एव पन्था अनुसृतः, सर्वेषां मतश्चायं मार्गः – इति एतस्य पक्षस्य केनापि अर्वाग्भवेन आचार्येण खण्डनस्यादर्शनात् गम्यते '[2097] इति मदीयानां गुरुवर्याणां भोलेझामहोदयानाम् अभिप्रायः ।

अत्र सूत्रे नागेशाशयस्तु एवं – येनेति करणे तृतीया, विधिरिति भावे किः । कर्मात्र विधेयम्, कर्ता चाचार्यः प्रसिद्धत्वाल्लभ्यत एव इत्येवं कैयटदीक्षिताभ्यां भिन्नं मतमत्रोपस्थापितं यद् विधिरिति भावे किः न तु कर्मणि । किञ्च ' सुब्विधौ न लक्षणा ' इति नैयायिकोक्तं नाद्रियतेऽत्र सूत्रे इति दीक्षितादयः, तदपि न । न्यायस्यास्य सर्वसम्मतत्वादिति नागेशभट्टः । इत्येवं नागेशभट्टः दीक्षितादीनां मतं न

2093 लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

2094 लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

2095 लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

2096 वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा – प्रकृतसूत्रे

2097 भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

स्वीकरोति स्पष्टं चेदं लघुशब्देन्दुशेखरे । आचार्यकर्तृकं विधेयकर्मकं यत्करणकं विधानं तत् तदन्तस्य सञ्ज्ञा इति सूत्रार्थः फलितः ।

विशेषणविशेष्यभावं स्पष्टयितुं कानिचिद्वार्तिकानि प्रवृत्तानि सन्ति । सूत्रानुसारेण विशेषणस्य तदन्तग्राहकत्वे " द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः "[2098] इति सूत्रे श्रितादयो विशेष्याः तद्विशेषणं सुब्विभक्तिः । अत एव " समर्थः पदविधिः "[2099] इति परिभाषासूत्रलब्धसमर्थस्य विशेषणतया तदन्तविधौ द्वितीयान्तं श्रिताद्यन्तैः समर्थैः सह समस्यते इत्यर्थाद् यथा ' कृष्णाश्रितः ' इत्यत्र समासो भवति तथैव ' कृष्णं परमश्रितः ' इत्यत्रापि तदन्ते समासापत्तिः । एवम् " नडादिभ्यः फक् "[2100] इत्यत्र नडादिविशेष्यः, प्रातिपदिकविशेषणतया नडाद्यन्तात्प्रातिपदिकाद् यञित्यर्थेन यथा ' नाडायनः ' इत्यत्र फक्प्रत्ययः स्यात् तथैव ' सूत्रनडस्य अपत्यं सौत्रनाडिः ' इत्यत्रापि तदन्ते फक्प्रत्ययस्य प्राप्तिः स्यात् । ' समासप्रत्ययविधौ प्रतिषेधः ' इति वार्तिकेन अस्य सूत्रस्य प्रतिषेधो भवति । समासविधायके प्रत्ययविधायके च विशेषणं तदन्तस्य सञ्ज्ञा न भवति । तथा च सूत्रादौ पठितशब्द-वृत्त्यानुपूर्वीसमानानुपूर्वीकेभ्य एव प्रत्ययः । सूत्रादौ पठितैरेव श्रितादिभिः समास इति नोक्तदोषः ।

नन्वेवं प्रत्ययविधायके " उगितश्च "[2101] इत्यत्र ' उगितः ' इत्यस्य " अत इञ् "[2102] इत्यत्र ' अतः ' इत्यस्य च प्रातिपदिके विशेषणत्वात् ' समासप्रत्ययविधौ प्रतिषेधः ' इति तदन्तविधिनिषेधे उगितो भवतो ङीषि ' भवती ' इत्यस्य, अकाररूपात् प्रातिपदिकादिञि ' अस्य अपत्यम् इः ' इत्यस्य सिद्धावपि ' अतिभवती ' इत्यादिषु ङीष्, ' दाक्षिः ' इत्यत्र इञ् च न स्यात् । एवं स्थिते पूर्वोक्त-वार्तिकस्यापवादभूतमस्ति ' उगिद्वर्णग्रहणवर्जम् ' इति वार्तिकम् । उगिता वर्णेन च प्रातिपदिकं विशेष्यते इति तदर्थः । अस्यायं भावः समासप्रत्ययविधौ उगिद्विषयकज्ञानजनकभिन्नम्, वर्णविषयकज्ञानजनक-भिन्नं च यद्विशेषणवाचकं पदं तत्तदन्तस्य ग्राहकं नेति तदर्थात् । तेन भवन्तमतिक्रान्ता = अतिभवती इत्यत्रापि ङीष् प्रवर्तते एव । एवम् " अत इञ् " इति इञ्प्रत्ययः ' अस्यापत्यम् इः ', इत्यत्रेव ' दाक्षिः ' इत्यत्रापि प्रवर्तते । न च " अत इञ् " इति इञ्प्रत्ययः ' औपगविः ' इत्यादावेव स्यान्न तु ' दाक्षिः ' इत्यादौ, अकारस्यानर्थकत्वादिति वाच्यम् । ' अर्थवद्ग्रहणे नानर्थकस्य ' इति परिभाषाया वर्णग्रहणेऽप्रवृत्तेः । तदुक्तं वार्तिककारैः ' अलैवानर्थकेन तदन्तविधिः ' इति ।

[2098] अष्टाध्यायी – (2-1-24)

[2099] अष्टाध्यायी – (2-1-1)

[2100] अष्टाध्यायी – (4-1-99)

[2101] अष्टाध्यायी – (4-1-6)

[2102] अष्टाध्यायी – (4-1-95)

- **वृद्धिर्यस्याचामादिस्तद् वृद्धम् – (1-1-72)**

सूत्रार्थः – यस्य समुदायस्य अचां मध्ये आदिः अच् वृद्धिसञ्ज्ञको भवति, तत् समुदायरूपं वृद्धसञ्ज्ञकं भवति। उदाहरणानि च – शालीयः, मालीयः, औपगवीयः।

सञ्ज्ञाविधायकसूत्रमिदं षट्पदम्। वृद्धिः, यस्य, अचाम्, आदिः, तद्, वृद्धम् इतिच्छेदः। यस्य इति वचनम् सञ्ज्ञिनिर्देशार्थम्। अचाम् इति निर्धारणार्थे षष्ठी। ' अत्र यस्य इत्यस्य अचाम् इत्यनेन सम्बन्धः, आदिश्च निर्धार्यते, वृद्धिर्निधेयो धर्मः। आदिशब्दस्त्विहोपक्रमे वर्तते, उपक्रम्यते इत्युपक्रमः प्रथमत उच्चारित इत्यर्थः। यस्य समुदायस्य सम्बन्धिनामचां मध्ये प्रथमत उच्चार्यमाणो वृद्धिसञ्ज्ञक इत्यर्थः '[2103]। अत एव शब्दकौस्तुभे दीक्षितेनोक्तम् – ' यस्य समुदायस्यावयवानामचां मध्ये प्राथमिकोऽज् वृद्धिसञ्ज्ञकः स वृद्धसञ्ज्ञकः स्यात् '[2104]।

अचामिति बहुवचननिर्देशाद् यस्य बहूनामचां मध्ये वृद्धिसञ्ज्ञक आदिभूतः, तस्यैव वृद्धसञ्ज्ञया भवितव्यम्, न तु यस्य अच्द्वयोर्मध्ये वृद्धिसञ्ज्ञकस्य आदिभूतस्य वृद्धसञ्ज्ञा स्यादिति चेन्न, ' अचाम् ' इति जातौ बहुवचनम् '[2105]। ' अचामिति बहुत्वमविवक्षितम्, तेन मालीयादिसिद्धिः '[2106] इति नागेश-भट्टाशयः। अतो बालमनोरमाकारेणोक्तम् – ' अचामिति बहुत्वमनेकत्वोपलक्षणम् '[2107]। तेन द्वयोरपि अचोर्मध्ये आदिभूतवृद्धिसञ्ज्ञकस्य वृद्धसञ्ज्ञा स्यादेव। अत एव ' शाला ' इति शब्दस्यापि वृद्धसञ्ज्ञा सिध्यति। ' शाला ' इत्यत्र समुदायस्य हलादित्वेऽप्यजपेक्षया प्रथमोऽच् वृद्धिरिति सञ्ज्ञा भवति। ' एकस्यापि च भवति व्यपदेशिवद्भावात् – ज्ञा ब्राह्मणी, तस्या अयं ज्ञेयः '[2108]।

रूपसिद्धिः यथा – ' शालायां भवः ' इति विग्रहे " वृद्धिर्यस्याचामादिस्तद्वृद्धम् " इति सूत्रेण शालाशब्दस्य वृद्धसञ्ज्ञायाम् " वृद्धाच्छः "[2109] इति सूत्रेण छप्रत्यये, तस्य " आयनेयीनीयियः

[2103] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[2104] शब्दकौस्तुभः – प्रकृतसूत्रे

[2105] काशिका – प्रकृतसूत्रे

[2106] भाष्यम् – उद्द्योतः – प्रकृतसूत्रे

[2107] वैयाकरणसिद्धान्तकौमुदी – बोलमनोरमा – प्रकृतसूत्रे

[2108] शब्दकौस्तुभः – प्रकृतसूत्रे

[2109] अष्टाध्यायी – (4-2-114)

फढखछघां प्रत्ययादीनाम् "[2110] इति सूत्रेण छस्य ईयादेशे ' शाला + ईय ' इति जाते " यचि भम् "[2111] इति सूत्रेण भसञ्ज्ञायाम् " यस्येति च "[2112] इत्यनेन आकारलोपे संयोगे ' शालीय ' इति जाते " कृत्तद्धितसमासाश्च "[2113] इत्यनेन प्रातिपदिकसञ्ज्ञायाम्पुँल्लिङ्गे प्रथमैकवचने सौ अनुबन्धलोपे ' शालीय + स् ' इति जाते सस्य रुत्वे विसर्गे च ' शालीयः ' इति सिद्धम् ।

वा नामधेयस्य (वा) पौरुषेयं नाम तस्य वृद्धसञ्ज्ञा वा स्यादित्यर्थः । ' ये पुरुषैर्व्यवहाराय संकीर्त्यमानाः शह्दा देवदत्त इत्येवमादयः, तेषामेषा सञ्ज्ञा वेदितव्या । पौरुषेयं नाम गृह्यते इति प्रदीपः । पौरुषेयमिति आधुनिकमित्यर्थः '[2114] इति न्यासः । उदाहरणञ्च – ' देवदत्तीयाः, दैवदत्ताः ' इत्यादौ ।

- **वृद्धसञ्ज्ञाप्रदेशाः**

1. वृद्धात् ठक् सौवीरेषु बहुलम् – (4-1-148)
2. उदीचां वृद्धात् अगोत्रात् – (4-1-157)
3. वाकिनादीनां कुक् च – (4-1-158)
4. पुत्रान्तात् अन्यतरस्याम् – (4-1-159)
5. प्राचाम् अवृद्धात् फिन् बहुलम् – (4-1-160)
6. वृद्धेत्कोसलाजादाञ् ञ्यङ् – (4-1-171)
7. वृद्धात् छः – (4-2-114)
8. भवतः ठक्छसौ – (4-2-115)
9. काश्यादिभ्यः ठञ्ञिठौ – (4-2-116)
10. वाहीकग्रामेभ्यः च – (4-2-117)
11. विभाषा उशीनरेषु – (4-2-118)
12. वृद्धात् प्राचाम् – (4-2-120)
13. अवृद्धात् अपि बहुवचनविषयात् – (4-2-125)
14. कच्छाग्निवक्त्रगर्तोत्तरपदात् – (4-2-126)

[2110] अष्टाध्यायी – (7-1-2)

[2111] अष्टाध्यायी – (1-4-18)

[2112] अष्टाध्यायी – (6-4-148)

[2113] अष्टाध्यायी – (1-2-46)

[2114] काशिका – न्यासः – प्रकृतसूत्रे

15. वृद्धात् अकेकान्तखोपधात् – (4-2-141)

16. कन्थापलदनगरग्रामह्रदोत्तरपदात् – (4-2-142)

17. नित्यं वृद्धशरादिभ्यः – (4-3-144)

18. वृद्धस्य च – (5-3-62)

- **त्यदादीनि च – (1-1-73)**

सूत्रार्थः – त्यद् आदिर्येषां तानि इमानि त्यदादीनि, बहुव्रीहिः । वृद्धिर्यस्याचामादिस्तद् वृद्धम् इति सूत्रात् ‘ वृद्धम् ’ इति पदमनुवर्तते । त्यदादीनि शब्दरूपाणि वृद्धसञ्ज्ञकानि भवन्ति । उदाहरणञ्च – त्यदीयम्, तदीयम्, एतदीयम् ।

यस्याचामादिग्रहणमुत्तरार्थमनुवर्तते । ‘ इह त्वयोग्यत्वात् सम्बन्धानुपपत्तिः, तुल्यजातीयस्य निर्धारणात् । त्यदादीनां चाज्रूपत्वाभावाद्यस्याचामादयस्त्यदादय इति तत्सम्बन्धाभावात् ’[2115] इति कैयटः । ‘ इह ‘ आदि ’ ग्रहणसम्बन्ध एव भाष्यतात्पर्यमिति भावः । ‘ तुल्यजातीयस्य निर्धारणात् ’ इति कैयटोक्तमुपलक्षणम् । ‘ त्यदादीनि ’ इत्यनेन ‘ आदिः ’ इत्यस्य भिन्नविभक्तिकत्वाच्चेत्यपि बोध्यम् ’[2116] इति नागेशभट्टाशयः । ‘ उत्तरसूत्रेऽस्य प्रयोजनवत्त्वाद् यस्याचामादिरेङिति सम्बन्धसम्भवाच्चानुवर्तते । इह तु न सम्बध्यते । अयोग्यत्वाद् निर्धारणस्य सजातीयविषयत्वात् त्यदादीनां चाजात्मकत्वाभावाद् न ह्यस्ति सम्भवः ’[2117] इति पदमञ्जरीकाराणामभिप्रायः ।

‘ तस्मिन् भवः ’ इति विग्रहे “ त्यदादीनि च ” इति सूत्रेण वृद्धसञ्ज्ञायाम् “ वृद्धाच्छः ” इत्यनेन तत् शब्दात् छप्रत्यये सुपो लुकि ‘ तद् + छ ’ इति जाते “ आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ” इति सूत्रेण छस्य ईयादेशे ‘ तद् + ईय ’ इति जाते संयोगे ‘ तदीय ’ इति जाते “ कृत्तद्धितसमासाश्च ” इत्यनेन प्रातिपदिकसञ्ज्ञायां नपुंसकलिङ्गे प्रथमैकवचने सौ “ अतोऽम् ”[2118] इति सूत्रेण सोरमि ‘ तदीय + अम् ’ इति जाते “ अमि पूर्वः ”[2119] इति सूत्रेण पूर्वरूपैकादेशे कृते ‘ तदीयम् ’ इति सिद्धम् ।

[2115] भाष्यम् – प्रदीपः – प्रकृतसूत्रे

[2116] भाष्यम् – उद्द्योतः – प्रकृतसूत्रे

[2117] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[2118] अष्टाध्यायी – (7-1-24)

[2119] अष्टाध्यायी – (6-1-105)

- **एङ् प्राचां देशे – (1-1-74)**

सूत्रार्थः – वृद्धिर्यस्याचामादिस्तद् वृद्धम् इति सूत्रात् ' वृद्धम् ', ' यस्याचामादिः ' इति पदद्वयमनुवर्तते । यस्य समुदायस्य अचां आदिः एङ्, तस्य प्राचां देशाभिधाने वृद्धसञ्ज्ञा भवति । उदाहरणानि च – एणीपचने भवः इति एणीपचनीयः, गोनर्दे भवः इति गोनर्दीयः, भोजकटे भवः इति भोजकटीयः ।

' प्राचि देशे ये वसन्ति ते प्राचः पुरुषास्तेषां सम्बन्धो यो देशस्तदभिधान इत्यर्थः '[2120] इति हरदत्ताशयः । ' एतेन प्राचामिति देशविशेषणं न विकल्पार्थमिति दर्शयति । प्राचां मतेन इत्यस्याविवक्षितत्वादित्याख्यातं भवति '[2121] इति न्यासकाराणामभिप्रायः ।

रूपसिद्धिः यथा – ' एणीपचने भवः ' इति विग्रहे " एङ् प्राचां देशे " इति सूत्रेण एणीपचन-शब्दस्य वृद्धसञ्ज्ञायाम् " वृद्धाच्छः " इति सूत्रेण छप्रत्यये, तस्य " आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् " इति सूत्रेण छस्य ईयादेशे ' एणीपचन + ईय ' इति जाते " यचि भम् " इति सूत्रेण भसञ्ज्ञायाम् " यस्येति च " इत्यनेन अकारलोपे संयोगे ' एणीपचनीय ' इति जाते " कृत्तद्धितसमासाश्च " इत्यनेन प्रातिपदिकसञ्ज्ञायाम्पुँल्लिङ्गे प्रथमैकवचने सौ अनुबन्धलोपे ' एणीपचनीय + स् ' इति जाते सस्य रुत्वे विसर्गे च ' एणीपचनीयः ' इति सिद्धम् ।

(ग) उपसंहारः

सर्वेषां सुविदितमस्ति यत् सुसमृद्धसंस्कृतभाषायां विरचितेषु अनेकेषु शास्त्रेषु व्याकरणमन्यतममस्ति । तच्च व्याकरणं शिक्षाकल्पव्याकरणज्योतिषनिरुक्तछन्दाख्येषु षड्वेदाङ्गेषु एकतमं वर्तते । वेदाङ्गानामुल्लेखो व्याससंहितायां यथा –

छन्दः पादौ शब्दशास्त्रञ्च वक्त्रं कल्पः प्राणो ज्योतिषं चक्षुषो च ।
शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं वेदस्याङ्गान्याहुरेतानि षट् च ॥

वेदाङ्गत्वे व्याकरणस्य प्राचीनता सिद्धैवेति नास्ति संशयलेशः । मनुष्यशरीरस्य मुखादि-षडङ्गरूपाणि वेदाङ्गानि । मुखादिषडङ्गैस्सह वेदाङ्गानां तुलना अत्र परिलक्ष्यते । यथा मनुष्य-

---

[2120] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[2121] काशिका – न्यासः – प्रकृतसूत्रे

शरीरस्य अङ्गेषु मुखं श्रेष्ठं प्रधानं वा भवति तथा वेदाङ्गेष्वपि व्याकरणं मुखं भवति, प्रधानं वर्तते। तदेव मनसि निधाय केनचित् पण्डितवर्येणाभिहितम् –

शास्त्रेष्वाद्यं व्याकरणं मुख्यं तत्र पाणिनेः।
रम्यं तत्र महाभाष्यं रम्या तत्रापि पस्पशा॥

व्याकरणशास्त्रस्य प्रधानत्वे अपरापि सुप्रसिद्धरस्ति –

' प्रथमे हि विद्वांसो वैयाकरणाः ' इति। अयमत्र निष्कर्षो व्याकरणमधीत्यैव शास्त्रान्तरेषु विषयान्तरेषु प्रवेशं कुर्यात्। अत एव सत्यभिहितम् – **' शास्त्रेष्वाद्यं व्याकरणम् '** इति। भगवाञ्च्छ्रीपतञ्जलिरपि प्राह महाभाष्ये – **प्रधानं च षडङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।** इति।

शरीरे वातपित्तकफमलानां वैषम्ये ज्वरादिरोगसामर्थ्यम्, औषधादिषु च दोषनिवृत्तिसामर्थ्यं विज्ञाय परेषामुपदेशाय यथा चिकित्साशास्त्रं निबद्धम्, यथा चान्तःकरणे रागेर्ष्याद्वेषादिदोषाणां कालुष्य-क्लेशसामर्थ्यम्, शमदमोपरतितितीक्षावैराग्यादीनाञ्च दोषोपशमसामर्थ्यं विज्ञाय तदुपदेशाय वेदान्ताद्यध्यात्मशास्त्रं निबद्धम्, तथैव वाङ्मलानां भ्रष्टसंस्कारसाधूनां शब्दानामशुद्धिदोषाणां पापसामर्थ्यम्, साधूनाञ्च पुण्यसामर्थ्यं विज्ञाय साध्वसाधुविवेकज्ञानार्थमुत्सर्गापवादलक्षणं व्याकरण-शास्त्रं भगवता कारुणिकेन पाणिनिना निबद्धम्। एवञ्च यथा चिकित्साशास्त्रस्य रोगनिवृत्त्या कायशुद्धिः प्रयोजनम्, तथा चाध्यात्मशास्त्रस्य रागद्वेषादिदोषकालुष्यनिवृत्त्या अन्तःकरणशुद्धिः प्रयोजनम्, तथा व्याकरणशास्त्रस्यापभ्रंशदोषनिवृत्त्या शब्दसाधुत्वज्ञानं साक्षात् प्रयोजनं पर्यवस्यते।

पाणिनीयव्याकरणे महाभाष्यस्य स्थानं सर्वोच्चमस्ति। संस्कृतस्य व्याकरणं त्रिमुनिव्याकरण-नाम्ना ज्ञायते। यद्यपि पाणिनेः सूत्राणां कात्यायनस्य वार्तिकानाञ्च व्याख्यानं महाभाष्ये विद्यते तथापि प्रमाणदृष्ट्या भगवाञ्च्छ्रीपतञ्जलिरेव प्रशस्यः। नव्यवैयाकरणा अस्मिन् विषये कथयन्ति च – **' यथोत्तरं मुनीनां प्रामाण्यम् '** इति।

महाभाष्ये पतञ्जलिना सर्वत्र सूक्तयः प्रदत्ताः सन्ति येन तस्य विवेचनमधिकं रोचकं हृदयङ्गमञ्च जायते। उदाहरणरूपेण – **' द्विबद्धं सुबद्धं भवति ', ' बुभुक्षितं न प्रतिभाति किञ्चित् '** इत्यादि।

महर्षेः पतञ्जलेः एका प्रमुखा विशिष्टतास्ति सा तस्य दृष्टौ व्यापकता। यदि कस्यापि आचार्यस्यायं खण्डनं करोति तत्रापि तमाचार्यं प्रति तस्य मनसि महान् श्रद्धाभावः तिष्ठति।

महाभाष्यमित्यभिधो ग्रन्थो व्याकरणविषयकप्रौढपाण्डित्येनगम्भीरार्थविवेचनेन पूर्णानुशीलनेन व्यापकदृष्ट्या च अनुपमो वर्तते। अन्यदार्शनिकसम्प्रदायस्य मूलविवेचका ग्रन्था भाष्यपदेनाभिधीयन्ते, किन्तूक्तवैशिष्ट्येनैव पतञ्जलेः ग्रन्थो महाभाष्यपदाभिधेयतया मण्डितो भाति। महाभाष्यनामको ग्रन्थो भाषादृष्ट्या सरलः सुबोधस्तथा उदाहरणप्रचुरतया नितान्तं रोचको वर्तते । इदं महाभाष्यमाह्निकैः विभक्तम्, एकदिनेन अधीतोंऽश आह्निकपदेनोच्यते। महाभाष्यकारस्य शैली कथोपकथनाभ्यां युक्ता संवादप्रचुरा आस्ते। अनया च शैल्या गुरुः शिष्येण विद्याभ्यासं पाठान् हृदयङ्गमाञ्च कारयति। एवं प्रतीयते यद् महाभाष्यकारः स्वपाठान् प्रत्यक्षोपस्थितान् कृत्वा पाठयति । महाभाष्यं केवलो ग्रन्थो नास्त्यपितु, स्वयमेको ग्रन्थालयो वर्तते । महाभाष्येण तस्य युगस्य आचारविचारस्य, धर्माधर्मस्य भोजनभाजनस्य, कृषेर्वाणिज्यस्य साहित्यस्य दर्शनस्य च प्रभावपाठकानां हृत्पटलेऽङ्कितो भवति । यद्यपि प्रसादगुणभूयिष्ठा महाभाष्यकाराणां शैली, सर्वं मनोदर्पणे प्रतिबिम्बित इवाभाति तथापि किमेकदेशिभाष्यम् ? किं सिद्धान्तिभाष्यमिति विना प्रदीपोद्द्योतौ ज्ञातुं न प्रभवाम इत्यत्र नास्ति संशीतिलेशः।

परमापाततः सुगमस्य महाभाष्यस्य गूढाशयपरिज्ञाने यथा पाठकः परिभ्रान्तो भवति न तथाष्टाध्यायीभाष्यप्रथमावृत्त्या अर्थपरिज्ञाने । महाभाष्ये व्याकरणशास्त्रस्थक्लिष्टानां सिद्धान्तानां शिष्याणां परिचयो भवत्वित्येतदर्थं प्रश्नोपप्रश्नशङ्कासमाधानादिरूपाः दीर्घाः संवादाः प्रस्तुताः । नेयं पद्धतिः अष्टाध्यायीभाष्यप्रथमावृत्तौ, तत्र केवलानि सिद्धान्तवचनान्येव प्राय उपलभ्यन्ते । महाभाष्ये सर्वाणि पाणिनिसूत्राणि न व्याख्यातानि । परं अष्टाध्यायीभाष्यप्रथमावृत्तौ यथाक्रमं सर्वेषां सूत्राणां व्याख्यानम्। अस्यामष्टाध्यायीभाष्यप्रथमावृत्तौ महाभाष्यवद् न कस्यापि सूत्रस्य परित्यागः प्रत्याख्यानं वा कृतम्। अस्यां वृत्तौ प्रतिसूत्रमनुवृत्तिः, वृत्तिः, उदाहरणानि, प्रत्युदाहरणानि च शङ्कासमाधानपुरस्सरं सरलया भाषया निरूपितानि। अत्र सूत्राणां प्रतिपदं व्याख्यानं काशिकाया आधारेण महाभाष्यसहकारेण वा कृतं दृश्यते। ग्रन्थकारः सर्वत्र सूत्रार्थं संक्षेपरूपेण प्रस्तौति। वर्तन्ते च महाभाष्ये लघूनि लघुतमानि च वाक्यानि येषां सहाय्येन ग्रन्थकारः क्लिष्टमपि विषयं सुगमं करोति।

सर्वप्रथममष्टाध्यायीभाष्यप्रथमावृत्तेः सूत्राणां सुक्ष्मरूपेण परिशीलनेन शैलिविषये इदं वक्तुं शक्यते तदयं ग्रन्थकारः प्रथमं सूत्रस्य सामान्यमर्थं प्रस्तौति । तदनुसारेण सम्भावितानि सर्वाणि उदाहरणानि निरूपयति। एतदनन्तरं सूत्रे विद्यमानानां प्रत्येकं पदानां किं प्रयोजनम् ? इति साधानार्थं प्रत्युदाहरण-प्रदर्शनेन प्रतिपादयति । सूत्रस्थानां विशेषपदानामग्रे कुत्रानुवृत्तिर्भवतीत्यपि स्पष्टरूपेण

निरूपयति । सूत्रविशेषे ज्ञायमानायाः सञ्ज्ञायाः पारिभाषिकशब्दस्य वा कुत्रान्यत्र प्रयोगः ? इत्यपि व्याख्यानप्रसङ्गे निरूपयति ।

अस्मिन् प्रबन्धे न केवलं ब्रह्मदत्तजिज्ञासुना रचितस्य अष्टाध्यायीभाष्यप्रथमावृत्तिप्रथमपादस्य महाभाष्यदृष्ट्या समीक्षात्मकमध्ययनम् ,अपि तु पाणिनिशब्दशास्त्रपरम्परामधिकृत्य विविधविषयाः चिकित्सिताः । किं बहुना – मुनित्रयम्, काशिकावृत्तिकारौ वामनजयादित्यौ, वैयाकरणसिद्धान्तकौमुदी, व्याकरणसिद्धान्तसुधानिधिः, शब्दरत्नकारः, प्रदीपकारः, काशिकासिद्धान्तकौमुद्योष्टीकाकारान् जिनेन्द्रबुद्धि-हरदत्तमिश्र-नागेशभट्ट-ज्ञानेन्द्रसरस्वती-वासुदेवदीक्षितप्रभृतीन्, तथैव अष्टाध्यायीभाष्य-प्रथमावृत्तिस्थं महाभाष्यस्थञ्च यद् विषयजातं तदधिकृत्य यद् वक्तव्यं समालोच्यं वारितं तत्समीक्षाऽस्मिन् प्रबन्धे आधुनिकीं चिकित्सापद्धतिमाश्रित्य कृता । सर्वैरपि पूर्वाचार्यैः स्वस्व-मतानुकूलतया सूत्रवार्तिकभाष्याणि व्याख्यायन्ते इति तेषामाधारग्रन्थत्वेन तदभिप्रायः प्रायशः मतभेदत्वेन न प्रदर्शितः । भाष्यादनन्तरं काशिकावृत्तेः प्रभृति लक्ष्मीनामकसिद्धान्तकौमुदीव्याख्यान-ग्रन्थपर्यन्तं ये ग्रन्था आविर्भूताः तत्र प्रधानतया ये मतभेदा दृष्टाः ते एव अत्र प्रदर्शिताः । तत्तन्मत-निरूपणानन्तरं कदाचित् समीक्षणे मदीयाभिप्रायः प्रकटितः । कदाचित् तेषामभिप्रायभेदनिरूपणमात्रं कृतम् । तत्र सर्वेषां ग्रन्थानामभिप्रायाः नामतो निर्देष्टुं न शक्यन्ते इति, यत्र प्रधानतया अभिप्रायभेदः जातः तत्रैव तत्तन्नामनिर्देशपुरस्सरमभिप्रायभेदः निर्दिष्टः ।

साधुशब्दज्ञानं तु सूत्रवार्तिकभाष्यैः ततः परैः वृत्त्यादिभिः ज्ञायते एव, तत्किमर्थं वादोपवादबहुले, शिरोवेदनाजनके, एतद्विचारे प्रवृत्तिः इति न मन्तव्यम् । पुरुषबुद्धेः सदा निष्कर्षाकाङ्क्षितया, निष्कर्षस्य च वादोपवादमूलत्वेन शास्त्रीयविचारस्य अत्यावश्यकत्वात् । सिद्धान्तभागः सूत्रवार्तिक-भाष्येष्वेवास्तीति तु सत्यम् । परन्तु तस्य मथनं विना बहिः प्रकाशो न भवतीत्यपि सनातनं सत्यमबाधितम् । अत एव भर्तृहरिकालात् प्रभृति अद्यावधि विद्वद्भिः शास्त्रविचारः प्रावर्ति । पाणिनीयसूत्रविषये कथं तेषां विदुषां भावना आसीदिति ज्ञातुं मयापि लेशतः प्रावर्ति ।

मुनित्रयसिद्धान्तप्रकटनाय भर्तृहरि-वामन-जयादित्य-कैयट-जिनेन्द्रबुद्धि-हरदत्त-भट्टोजिदीक्षित-हरिदीक्षित-नागेशाद्या बहव अष्टाध्यायीक्रममनुसृत्य, तदुल्लङ्घ्य प्रक्रियोपयोगिक्रममनुसृत्य च बहुधा बहून् व्याख्यानग्रन्थान् प्राणैषुः । नागेशादनन्तरमपि शताधिका व्याख्यानग्रन्थाः समायाताः । तेषु अचर्चितं नूतनं किमप्यत्र न भवतीति बुद्धि न विधेया इति विज्ञापयन् भोजराजोक्तिं स्मारयामि ।

वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशैः ।

तृप्तिं करोमि कथमप्यधुना बुधानाम् ॥

गङ्गाजलैः भुवि भगीरथयत्नलब्धैः ।
किं तर्पणं न विदधाति जनः पितॄणाम् ।।

एवं भावयता मया प्राचीनैः तत्र तत्र विचारितेऽपि संक्षिप्ते विक्षिप्तेऽस्मिन् प्रबन्धविषये मनः समुदयोजि ।

यद्यपि हस्तावनद्धकङ्कणदर्शनाय नैव क्वचिद् दर्पणस्य प्रयोजनं जायते इति लोकोक्तिरस्ति । प्राज्ञाः स्वयमेव सर्वं द्रक्ष्यन्ति ज्ञास्यन्ति च, तथापि सङ्क्षेपेणाधस्ताद् ग्रन्थास्थाः केचन विशेषाः स्थालीपुलाकन्यायेन प्रदर्श्यन्ते ।

- **प्रथमोऽध्यायः**

प्रथमेऽध्याये पाणिनिव्याकरणस्य प्रधानवेदाङ्गत्वं निरूपितम् । ततश्च व्याकरणशास्त्राध्ययनस्य पञ्चमुखप्रयोजनानि तथा त्रयोदश गौणप्रयोजनानि प्रतिपादितानि । तत्र दुष्टः शब्दो स्वरतो वर्णतो वा इत्येतद् व्याख्यावसरे इन्द्रशत्रुशब्दे बहुव्रीहितत्पुरुषयोः विचारे बहुव्रीहिकरणेन विपरीतफलावाप्तिः सुष्ठु दर्शिता, शत्रुशब्दे योगशक्तिश्च समादृता न तु शत्रुत्वावच्छिन्ने रूढिः। तदन्ततरं अष्टाध्यायीग्रन्थस्य परिचयो वर्णितः । ततश्च मुनित्रयस्य परिचयो विस्तरेण प्रतिपादितः ।

यथोत्तरं मुनीनां प्रामाण्यं वार्तिककारभाष्यकारयोः उक्तदुरुक्तानुक्तचिन्ताश्च सविवरणोदाहरणतो विवेचिताः । पाणिन्यपेक्षया कात्यायनस्य प्रामाण्यम्, कात्यायनापेक्षया पतञ्जलेः प्रामाण्यम्, पाणिनि-कात्यायनापेक्षया पतञ्जलेः प्रामाण्यञ्च साधकबाधकयुक्तिपुरस्सरं विलिखितम् । केषाञ्चिन्मते पाणिनेः सर्वोत्कृष्टं प्रामाण्यमपि निदर्शितम् ।

शब्दव्युत्पत्तिलभ्यः सूत्रपदार्थविचारो लाक्षणिकः सूत्रपदार्थविचारश्च सुस्पष्टं विवेचितः । सूत्रभेदा विवरणेन उदाहरणेन सह विस्तारेण विवेचिताः । अष्टाध्यायीभाष्यकृतो ब्रह्मदत्तजिज्ञासोः संक्षेपपरिचयो दत्तः । पाणिनीयातिरिक्तानां प्रमुखव्याकरणानां परिचयसङ्केतो विवेचितः ।

एतावता “ **(क) पाणिनीयव्याकरणस्य प्रधानवेदाङ्गत्वम् । (ख) व्याकरणाध्ययनस्य प्रयोजनम् । (ग) अष्टाध्यायीग्रन्थस्य परिचयः । (घ) पाणिनेः परिचयः । (ङ) वार्त्तिककारस्य संक्षेपपरिचयः । (च) महर्षिपतञ्जलेः परिचयः । (छ) यथोत्तरं मुनीनां प्रामाण्यम् । (ज) सूत्रभेदाः । (झ) अष्टाध्यायीभाष्यकृतो ब्रह्मदत्तजिज्ञासोः परिचयः । (ञ) पाणिनीयातिरिक्तानां प्रमुखव्याकरणानां परिचयसङ्केतश्च** ” इत्याख्यः प्रथमोऽध्यायः समाप्तः ।

- **द्वितीयोऽध्यायः**

‘ **अथ शब्दानुशासनम्** ’ इति वाक्यं पाणिनिकृतं वा महाभाष्यकारकृतं वेति शङ्कासमाधानपुरस्सरं विवेचितम् । एवं शब्दानुशासनमित्यत्र कर्मणि षष्ठ्या समासः । “ कर्मणि च ”[2122] इति सूत्रेण षष्ठीसमासनिषेधस्त्वत्र न शङ्कनीयः, “ उभयप्राप्तौ कर्मणि ”[2123] इति सूत्रविहितषष्ठ्या एव समासे करणीये तन्निषेधस्य प्रवृत्तिर्भवति, “ उभयप्राप्तौकर्मणि ” इति सूत्रेण त्वत्र षष्ठी न विहिता, कर्तृकर्मोभयवाचकपदप्रयोग एवास्य शास्त्रस्य प्रवृत्त्यङ्गीकारात् ।

प्रत्याहारसूत्राणि भाष्यदिशा सुस्पष्टं विवेचितानि । तत्र ‘ अ इ उ ’ इत्यत्र सन्धिकार्यस्य शङ्का कृता, तद्विषयेऽन्येषां मतं प्रदर्श्य समीक्षा कृता । तद्यथा – ‘ अइउण् ’ इत्यत्र अकारस्य इकारे परे “ आद्गुणः ”[2124] इति सूत्रेण गुण एकारः स्यात्, तदेवैकारस्य उकारेऽचि परे “ एचोऽयवायावः ”[2125] इति सूत्रेण अयादेशः स्यात्, ननु तत्सन्धिः कथं न क्रियते ? इति सन्धिविषयिणी जिज्ञासोदेति ।

स्यादेतत्, इह स्वरसन्धिना भाव्यम् । तत्र अ इत्यत्र विभक्तेः रोः स्थाने “ भोभगोअघोअपूर्वस्य योऽशि ”[2126] इति सूत्रेण यादेशः स्यात्, तस्य यकारस्य “ लोपः शाकल्यस्य ”[2127] इति सूत्रेण लोपः स्यात् । अतोऽत्र ‘ वृक्ष इह ’ इत्यादाविव लोपासिद्ध्या सन्धिर्नेति समाधानेऽपि, इकारस्य “ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ”[2128] इति सूत्रेण इकारस्य ह्रस्वः स्यात्, ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः, ऋकारस्य ऌकारे परे “ ऋत्यकः ”[2129] इति सूत्रेण प्रकृतिभावाच्च समाधानसम्भवेऽपि ‘ एओङ् ’,‘ ऐऔच् ’ इत्यत्र एकारस्य ओकारे परे, ऐकारस्य औकारे परे च “ एचोऽयवायावः ” इति सूत्रेण एकारैकारयोः स्थाने ‘ अय् ’‘ आय् ’ एतावादेशौ दुर्वारौ ।

अस्य समाधानं त्वेवं वर्तते यत् स्पष्टप्रतिपत्त्यर्थं गुणादीनामभावः ।

यद्वा अत्र सौत्रत्वात् सन्धिर्न भवति । यथा – “ भोभगोअघोअपूर्वस्य योऽशि ” इति सूत्रे असन्धि सौत्रः । ‘ अइउण् ’ इत्यादीनां चतुर्दशसूत्रत्वव्यवहारस्तु चतुर्दशानुबन्धघटितत्वात् ।

[2122] अष्टाध्यायी – (2-2-14)
[2123] अष्टाध्यायी – (2-3-66)
[2124] अष्टाध्यायी – (6-1-86)
[2125] अष्टाध्यायी – (6-1-77)
[2126] अष्टाध्यायी – (8-3-17)
[2127] अष्टाध्यायी – (8-3-19)
[2128] अष्टाध्यायी – (6-1-125)
[2129] अष्टाध्यायी – (6-1-126)

यद्वा वर्णानामसन्दिग्धत्वेन बोधनाय संहिताविरहान्न स्वरसन्धिः भवति। अत एव असंहितायां यणादिनिवृत्त्यर्थो हि " परः सन्निकर्षः संहिता "[2130] इति सूत्रेण संहिताधिकारः ज्ञेयः। उक्तञ्च –

संहितैकपदे नित्या   नित्या धातूपसर्गयोः।

नित्या समासे वाक्ये तु सा विवक्षामपेक्षते॥ इति।

एकमेव पदमित्येकपदम्, तत्र संहिता नित्या। यथा – ' राजयति अस्य राजानमिच्छति ' इति विग्रहे क्यच्प्रत्ययेन निष्पन्नस्य समुदायस्य तिङन्तत्वेन पदत्वात् उत्तरखण्डस्य ' यति ' इत्यस्य च अपदत्वाद् एकपदत्वम्। धातूपसर्गयोः संहिता नित्या। यथा – ' प्रेक्ष्यते, पर्यभूषयत् ' इत्यादौ नियमेन धातूपसर्गयोः संहिता विवक्षा अत एव यण्घटित प्रयोग एव साधुः। समासे संहिता नित्या अवान्तरपद-विभागाभावात् समासे ह्येकपदत्वात्। यथा – ' देवेन्द्रः '। सा संहिता वाक्ये विवक्षां वक्तुमिच्छापेक्षते। यथा– ' हे रोहिणि त्वमसि शीलवतीषु धन्या एनं निवारय पतिं सखि दुर्विनीतम् ' इत्यत्र धन्या एनमित्यस्य संहिताविरहात् सन्धिः न भवति। अत्र विवक्षाधीना संहिता ज्ञेया। तेन वाक्ये विवक्षितः सन्धिर्भवति न त्वविवक्षित इति।

ननूक्तरीत्या ' अइउण् ' इत्यादीनां सुबन्तत्वतिङन्तत्वयोरभावेन पदत्वाभावात् पदसमूहरूप-वाक्यत्वस्यैवाभावसत्त्वाद् अवाक्यत्वाद्वाक्यीयाऽविवक्षा कथमत्रेति चेत्।

तत्र परिनिष्ठितत्वेन सुबन्तपदतुल्यपरिनिष्ठितसमूहस्यापि वाक्यत्वेन ग्रहणेनादोषात्। अत एव ' गो इत्ययमाह ' इत्यत्र गोशब्दस्य अपदत्वेन वाक्यघटकत्वाभावेपि संहिताया अविवक्षा सिद्धा।

ननु वाक्ये संहिताया अनित्यत्वादिति तच्चिन्त्यं परस्परार्थान्वयप्रतियोग्यर्थानुपस्थापकत्वेन वाक्यत्वाभावात्।

' अइउण् ' इत्यादिषु वृद्धोक्त्या वाक्ये संहिताया अविवक्षा सुगमा। न च ' सुप्तिङन्तचयो वाक्यम् ' इति लक्षितवाक्यत्वस्याप्यभावादविवक्षाया अप्यभावः, कारिकायां वाक्यपदेन एकपद-समास-धातूपसर्गभिन्नस्य शिष्टोच्चरितशब्दसमुदायस्य विवक्षितत्वात्, तादृशसमुदायत्वस्य ' अइउण् ' इत्यादावक्षतत्वात्।

[2130] अष्टाध्यायी – (1-4-109)

यद्वा ‘ अ इ उ ’ इत्यादीनां स्वरत्वाद् ‘ उपसर्गविभक्तिस्वरप्रतिरूपकाश्च ’ इति चादिगणान्तर्गत-सूत्रेण चादित्वबोधनेन निपातत्वाद् “ निपात एकाजनाङ् ”[2131] इति सूत्रेण प्रगृह्यसञ्ज्ञायाम् “ प्लुतप्रगृह्या अचि नित्यम् ”[2132] इति सूत्रेण प्रकृतिभावेन सन्धिः न भवति ।

अइउण् इत्यादौ वर्णसमाम्नायो स्वरसन्धिस्तु न प्रवर्तते, वर्णोपदेशकालेऽजादि-सञ्ज्ञानामनिष्पादादिति कैयटः । तन्मतं कौस्तुभे दीक्षितेन निरस्तम् । उद्द्योते नागेशभट्टेन कैयटमतनिरासे दीक्षितोक्तवाक्यानि तत्र तत्र यथायथं स्वीकृतानि ।

सन्ध्यक्षरेषु वर्णैकदेशा वर्णग्रहणेन गृह्यते इति पक्षश्च साधकबाधकयुक्तिपुरस्सरं भाष्यप्रदर्शितेन पथा वर्णितः । तत्र लृकारोपदेशस्य प्रयोजनम्, प्रत्याहारेषु हकारस्य वारद्वयमुपदेशस्य प्रयोजनम्, अनुबन्धणकारस्य वारद्वयमुदेशस्य प्रयोजनम्, प्रत्याहारेऽनुबन्धानां ग्रहणं भवति न वेति, अण्, इण् प्रत्याहारौ परेण णकारेण पूर्वेण णकारेण वेति शङ्कासमाधानं भाष्यकृन्मतेन विशदं व्याख्यातम् ।

“ वृद्धिरादैच् ” इति सूत्रमिदं द्विपदं वा त्रिपदमिति प्रश्ने भट्टोजिदीक्षितनागेशभट्टयोः मतभेदस्य भूयसी समीक्षा युक्तायुक्तत्वविवेकगर्भा साधिता । तद्यथा –

“ वृद्धिरादैच् ” इति सूत्रे ‘ कृतमनयोः साधुत्वम् ’ इति महाभाष्यवाक्येऽनयोरिति पदादत्र द्वे एव पदे इति विज्ञायते । ‘ वृद्धिः ’‘ आत् ’‘ ऐच् ’ इति पस्पशायां पृथक्पदत्वमप्युक्तत्वात् ‘ वृद्धिः ’‘ आत् ’‘ ऐच् ’ इति पदत्रयं न तु ‘ आदैच् ’ इति समाहारद्वन्द्वेन पदद्वयं भवति । यदा पदद्वयं स्यात् तदा “ द्वन्द्वाच्चुदषहान्तात्समाहारे ”[2133] इति सूत्रेण टजापत्तेः । न चेतरेतरद्वन्द्वः स्यात्, द्विवचनापत्तेः । यदि तु “ प्रतेरंश्वादयस्तत्पुरुषे ”[2134] इति सूत्रे अंश्वादिगणे राजन् शब्दपाठः । प्रतेः परे अंश्वादयोऽन्तोदात्ता इति तदर्थः । “ राजाहःसखिभ्यष्टच् ”[2135] इति सूत्रेण टचो नित्यत्वे तु चित्वादेवान्तोदात्तत्वं स्यात् । अंश्वादिगणे राजन् शब्दपाठात् समासान्तविधिरनित्य इति ज्ञाप्यत इत्यनित्यत्वान्न टजित्युच्यते तदा पदद्वयमेव । परन्तु अनित्यत्वस्यागतिकगतित्वान्नेदं युक्तम् । न चात्र पदत्रयत्वेऽत्रैव ‘ कृतमनयोः साधुत्वम् ’ इति महाभाष्यवाक्येऽनयोरिति द्विवचनासङ्गतिः, ‘ अनयोः ’ इत्यस्य उद्देश्यदलविधेय-दलयोरित्यर्थेनादोषात् । यद्यपि वृद्धिः आत् ऐजिति पस्पशायां पृथक्पदत्वमप्युक्तम्, तथाऽपि तदभ्युच्चयमात्रम् । अनयोः सूत्रखण्डयोरिति व्याख्यानापत्तेः । तस्य च ‘ वृद्धिरस्मै अविशेषेणोपदिष्टः

[2131] अष्टाध्यायी – (1-1-14)

[2132] अष्टाध्यायी – (6-1-123)

[2133] अष्टाध्यायी – (5-4-106)

[2134] अष्टाध्यायी – (6-2-193)

[2135] अष्टाध्यायी – (5-4-91)

प्रकृतिपाठे तस्मात्स्त्रियां क्तिन्प्रत्ययः, आदैचोऽप्यक्षरसमाम्नाये उपदिष्टाः ' इति भाष्यविरुद्धत्वात् । चकाराध्याहारप्रसङ्गाच्च इति व्याकरणसिद्धान्तसुधानिधिकाराणामाशयः । अत एव " सुपां सुलुक्पूर्व-सवर्णाच्छेयाडाड्यायाजालः "[2136] इति सूत्रेण औङो लोपं मत्वा आच्च ऐच्च इति इतरेतरयोगद्वन्द्व-पक्षमपि तत्त्वबोधिनीकारः प्राह[2137] । अनेन नात्र भाष्यकाराणां नैर्भयं यद् द्विपदमुत त्रिपदमिदं सूत्रमिति ।

नन्वत्र पस्पशायाम् ' कृतमनयोः साधुत्वम् ' इति प्रोक्तं भगवता भाष्यकारेण तेन द्विपदमेव सूत्रमिति निश्चीयते । पक्षेऽस्मिन् ' कृतमनयोः साधुत्वम् ' इति भाष्यग्रन्थोऽनुकूलः । एवञ्च ' न केवलानि चर्चापदानि .... वृद्धिः, आत्, ऐच् ' इति पस्पशायां पृथक्पदत्वमप्युक्तम्, तथाऽपि तदभ्युच्चयमात्रम् । एवं पस्पशायां ' शब्दाप्रतिपत्तिः ' इति वार्तिके ' न केवलानि चर्चापदानि .... वृद्धिः, आत् ऐच् ' इति पदविभागपूर्वकं भाष्यकारेणैवोक्तं तेन त्रिपदमिदं सूत्रमिति निश्चीयते । अस्मिंश्च पक्षे ' कृतमनयोः साधुत्वम् ' इति भाष्यम् ' अनयोः सूत्रखण्डयोः (उद्देश्यविधेयरूपभागयोः) ' इत्यर्थकं ज्ञेयम् । अन्यथा ' वृद्धिः, आत् ऐच् ' इति पदविभागपूर्वकं भाष्यकारेणैवोक्तं तेन सह भाष्यकाराणां सिद्धान्तेऽसङ्गत्यापत्तिः स्यात् । अत एवोक्तं शब्दकौस्तुभे उद्द्योते च प्रकृतसूत्रव्याख्याने ' अनयोः सूत्रखण्डयोः ' इति । अस्मिन् पक्षे उद्देश्यानेकत्वाद् वृद्धिपदमावर्त्यं स्यात् । आवृत्तिपक्षस्तु दीक्षितेन कौस्तुभे एव दर्शितः । स एव नागेशेनापि स्वीकृतः । तथा चोक्तं नागेशेन लघुशब्देन्दुशेखरे – ' वृद्धिः आत् ऐजिति पदत्रयमिति न समासान्तादिप्रवृत्तिशङ्का '[2138] ।

तत्रायं निष्कर्षः – भट्टोजिदीक्षितमते वृद्धिसञ्ज्ञासूत्रं द्विपदं त्रिपदं वा भवतु उभयस्मिन्नपि पक्षे प्रमाणानां सत्त्वाद् न काचित् क्षतिः । नागेशभट्टैस्तु वृद्धिः आत् ऐजिति पदत्रयात्मकं सूत्रमित्येव पक्षः प्रधानरूपेण प्रस्तूयते[2139] । ' न केवलानि चर्चापदानि .... वृद्धिः, आत्, ऐच् ' इति पस्पशास्थभाष्ये साक्षादुक्तत्वेन त्रिपदं सूत्रमिति । ' आदैच् ' इत्यस्य समस्तपदत्वे, समाहारद्वन्द्वे " द्वन्द्वाच्चुदुषहान्तात् समाहारे " इति सूत्रेण टच् प्रसज्येत । इतरेतरयोगद्वन्द्वे द्विवचनप्रसङ्गः । अद्यपि ' कृतमनयोः साधुत्वम् ' इति प्रकृतसूत्रभाष्याद् द्विपदं सूत्रमिति लभ्यते । " प्रतेरंश्वादयस्तत्पुरुषे " इति सूत्रे अश्वादिगणे राजन्शब्दपाठाल्लिङ्गात् । अन्यथा " राजाहःसखिभ्यष्टच् " इति टचा सिद्धे किं तेन । तेन समासान्त-विधेरनित्यत्वज्ञापनेन समाहारद्वन्द्वे टचः प्रसक्तिर्नास्ति । एवमितरेतरद्वन्द्वेऽपि " सुपां सुलुक् .... " इति

[2136] अष्टाध्यायी – (7-1-39)

[2137] सिद्धान्तकौमुदी – तत्त्वबोधिनी – (पृ. – 29)

[2138] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

[2139] यद्वा पदत्रयं पस्पशायां भाष्ये वृद्धिः आत् ऐच् इति पदविभागदर्शनात् । (महाभाष्यम् – उद्द्योतः – पृ. – 128)

लुका द्विवचनश्रवणं नास्तीति ‘ आदैच् ’ इत्यस्य समस्तपदत्वेऽपि न दोषः, तथापि शङ्कासमाधानयोः करणस्य भाष्यकारशैलीसिद्धतया प्रकृते तदकरणात् पदत्रये एव तेषां तात्पर्यमिति सम्भाव्यते। अन्यथा कुत्वं कस्मान्न भवति इति कुत्वादिशङ्कापरिहाराविव समासान्तादिशङ्कापरिहारौ कर्तव्यौ स्याताम्। कृतमनयोस्साधुत्वमिति भाष्यं तु उद्देश्यविधेयभावेन खण्डयोरित्यर्थपरतया योजनीयम् । एवं वृद्धि-शब्दस्तु तन्त्रेणावृत्या वा योजनीयः । “ द्विर्वचनेऽचि ”[2140], “ इग्यणः सम्प्रसारणम् ”[2141] इत्यादाविव अत एव चकाराध्याहारप्रसङ्गोऽपि न स्यादिति नागेशभट्टानामभिप्रायः।

अत्र सूत्रे तपरकरणं परार्थ नाम ऐजर्थमेव, इति भट्टोजिदीक्षितानां सिद्धान्तः । तेन त्रिमात्र-चतुर्मात्राणां न वृद्धिसञ्ज्ञा इति फलं बोध्यम्[2142]। आकारस्य कृते तु तत्स्पष्टार्थमिति तेषामभिप्रायः[2143]।

किं च ऐजर्थं यत्तपरकरणं तदपि यथोद्देशपक्षे एव आवश्यकं न तु कार्यकालपक्षे इत्यपि भट्टोजिदीक्षितानां मतं बोध्यम्[2144] । तद्रीत्या कार्यकालपक्षे यत्र वृद्धिपदं तत्र आदैजित्युपतिष्ठते इति सूत्रार्थाद् आदैच् पदस्य वृद्धिविशेषणतया विधेयत्वम्।

एवं च ‘ अप्रत्ययः ’ इति निषेधादेव सवर्णग्रहणस्य अप्रसक्त्या तत्पक्षे तद्ग्रहणवारणाय कार्यकालपक्षे तपरकरणस्य प्रयोजनाभावात्[2145]। तस्माद् यथोद्देशपक्षे एव तदावश्यकं न तु कार्यकाल-पक्षे इति भट्टोजिदीक्षितानां मतं बोध्यम्।

‘ वृद्धिः आत् ऐच् ’ इति पदत्रयात्मकं सूत्रमित्यपि भाष्योक्तः पक्षः भट्टोजिदीक्षितैः प्रदर्श्यते। किन्तु तत्पक्षे तेषां सहमति न दृश्यते[2146] । यतोहि ‘ कृतमनयोः साधुत्वम् ’ इति भाष्यस्य तत्र पक्षे ‘ अनयोः, सूत्रखण्डयोः ’ इत्यर्थकतया नेयत्वेन तैः वर्णनात्। अथवा भट्टोजिदीक्षितरीत्या ‘ कृतमनयोः

[2140] अष्टाध्यायी – (1-1-59)

[2141] अष्टाध्यायी – (1-1-45)

[2142] आदिति तपरकरणमैजर्थम्, तेन त्रिमात्रचतुर्मात्रणामैचां सञ्ज्ञा न भवतीति। (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 68)

[2143] इह तु तपरकरणं स्पष्टार्थमेवेति। (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 68)

[2144] भाष्ये तु पक्षान्तराभिप्रायेण ऐजर्थत्वमुक्तम्। तदपि यथोद्देशपक्षे बोध्यम्। (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 76)

[2145] कार्यकालपक्षे तु विधिवाक्येनैव वृद्धिसञ्ज्ञाविशिष्टानामादैचां भाव्यमानतया सवर्णग्रहणं न प्राप्नोत्येव। (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 76-77)

[2146] ‘ कृतमनयोः साधुत्वम् ’ इत्यादिभाष्यग्रन्थाश्चास्मिन् पक्षे अनुकूलाः। अनयोः पदयोरिति स्वरसात्। अथवा ‘ आत् ’ इत्यसमस्तमेव ‘ पस्पशायां शब्दाप्रतिपत्तिः ’ इति वार्तिके भाष्यकारैरेव वृद्धिः आदैजिति पदविभागप्रदर्शनात्। अस्मिंश्च पक्षे अनयोः सूत्रखण्डयोरिति नेयम्। (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 67-68)

साधुत्वम् ' इति भाष्यं द्विपदात्मकं सूत्रमिति पक्षाभिप्रायकमेव। तथा च तद्रीत्या द्विपदं सूत्रमित्येव पक्षः प्रधानः इति बोध्यम्।

नागेशभट्टैस्तु वृद्धिः आत् ऐजिति पदत्रयात्मकं सूत्रमित्येव पक्षः प्रधानरूपेण प्रस्तूयते[2147]। अतः तद्रीत्या समासान्तादिप्रवृत्तिशङ्कैव न[2148]।

नागेशभट्टरीत्या तपरकरणस्य असन्देहार्थं पूर्वार्थत्वमपि प्रयोजनम्[2149] । भाष्यरीत्या गुणानामभेदकत्वेन प्राप्तस्य सवर्णग्रहणस्य अभावार्थं तत्रापि तस्य प्रयोजनसम्भवात् । कृष्णैकत्वमित्यादौ त्रिमात्रव्यावृत्तये परार्थमपि तपरकरणं सप्रयोजनमिति नागेशभट्टानां सिद्धान्तः[2150]। किञ्च तपरकरणस्य परार्थत्वं तद्रीत्या कार्यकालपक्षे यथोद्देशपक्षे चावश्यकम्। तद्रीत्या कार्यकालपक्षे मृजेर्वृद्धिरित्यादौ वृद्धिपदार्थजिज्ञासायाम् " वृद्धिरादैच् " इत्युपस्थित्या तदर्थबोधरूपशक्तिग्रहे वृत्ते विधिवाक्यार्थबोधः[2151]।

एवञ्च सञ्ज्ञासूत्रस्य पक्षद्वयेऽपि पृथग् वाक्यार्थबोधात् तपरकरणं द्वयोरपि पक्षयोः आवश्यकमिति नागेशभट्टानामभिप्रायः।

एवञ्च वृद्धिसञ्ज्ञासूत्रं द्विपदं त्रिपदमिति उभयपक्षो भट्टोजिदीक्षितैः समर्थ्यते। त्रिपदसूत्रमिति पक्षश्च नागेशभट्टैः समर्थ्यते।

तपरकरणमाकारविषये स्पष्टार्थम्, ' ऐच् ' विषये यथोद्देशपक्षे आवश्यकम्, कार्यकालपक्षे स्पष्टार्थमिति भट्टोजिदीक्षितानामभिप्रायः। किन्तु आकारविषये असन्देहार्थम्, ' ऐच् ' विषये यथोद्देश-पक्षे कार्यकालपक्षे च तपरकरणमावश्यकमिति नागेशभट्टानामभिप्रायः।

' विधिनियमसम्भवे विधिरेव ज्यायान् ' इति परिभाषाप्रामाण्यात् सञ्ज्ञासूत्राणां विधित्वमेव उचितं न तु नियमत्वमिति नागेशभट्टानां सिद्धान्तः। एवञ्च भट्टोजिदीक्षितैः सञ्ज्ञासूत्राणाम् एकस्मिन् पक्षे नियमत्वम्, अपरस्मिन् पक्षे विधित्वं स्वीक्रियते। किन्तु नागेशभट्टैः सञ्ज्ञासूत्राणां विधित्वमेव स्वीक्रियते, न तु नियमार्थत्वमिति।

[2147] यद्वा पदत्रयं पस्पशायां भाष्ये वृद्धिः आत् ऐच् इति पदविभागदर्शनात्। (महाभाष्यम् – उद्द्योतः पृ. 128)

[2148] वृद्धिः आत् ऐजिति पदत्रयमिति न समासान्तादिप्रवृत्तिशङ्का। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

[2149] तपरकरणमसन्देहार्थतया पूर्वार्थम्, प्रकृतसूत्रे भाष्येऽत्र शास्त्रे गुणानामभेदकत्वं ज्ञापकादाश्रित्य सवर्णग्रहणार्थत्वाभावस्योक्तत्वात्। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

[2150] ' कृष्णौत्कण्ठम्, गङ्गौघः ' इत्यादौ त्रिमात्रव्यावृत्तये परार्थमपि। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

[2151] अत्र पक्षे एकत्र शक्तिग्रहे वृत्तेऽपि तत्प्रदेशस्थस्यैव तत्रार्थे शक्तिरिति सम्भावनया प्रदेशान्तरस्थे बोधो न स्यादिति सर्वप्रदेशेषु तत्तत्पदशक्तिग्रहपूर्वकं विधिवाक्यार्थबोधः। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

सञ्ज्ञासूत्राणां नियमार्थत्वमिति भट्टोजिदीक्षितानां सिद्धान्तः, विध्यर्थत्वमिति नागेशभट्टानां सिद्धान्तः।

तत्र कुत्वं कथं न भवतीति प्रश्नस्य समाधानम्, तद्भावितातद्भावितग्रहणविषये सिद्धान्तपक्षः साधकबाधकयुक्तिपुरस्सरं भाष्यप्रदर्शितेन च विवेचितः । वृद्धिरादैजिति सूत्रे ' सञ्ज्ञाधिकारः सञ्ज्ञासम्प्रत्ययार्थः । इतरथा ह्यसंप्रत्ययः यथा लोके ' इति भाष्यग्रन्थेऽस्मद्भिः महती समीक्षा दर्शिता, तस्या अयमाशयः – वृद्धिरादैजित्यादिसूत्रे शास्त्रीयसङ्केतानुरोधेनैव सामानाधिकरण्यं ज्ञातुं शक्यं नान्येनोपायेन । यद्यपि पूर्वोच्चारितः सञ्ज्ञी परोच्चारितः सञ्ज्ञा भवति कार्यिणः सत्त्वे एव तस्य किञ्चित्कार्यं विधातुं शक्यते । लोकेऽपि स्वत एव मांसपिण्डस्य देवदत्तादिसञ्ज्ञा विधीयत इति कृत्वा ' आदैज्वृद्धिः ' इति भाष्यं न तु " वृद्धिरादैच् " इति । अस्मिन् संशये भाष्यकृतोक्तं मङ्गलार्थं वृद्धिशब्दस्यादौ प्रयोग इति । मङ्गलप्रयोजन आचार्यः शास्त्राध्ययने मङ्गलं भवेद् विघ्नो माभूदिति विचार्य वृद्धिशब्दस्य सञ्ज्ञाशब्दत्वेऽपि तं पूर्वं प्रयुक्तवान्, " अपृक्त एकाल् प्रत्ययः " इत्यादिकं तु परिभाषासूत्रमतो न व्यभिचारः ।

" इको गुणवृद्धी " इति सूत्रम् " अलोऽन्त्यस्य " इति सूत्रस्य शेष आहोस्वित्तदपवाद इति विवेचितः ।

" न धातुलोप आर्धधातुके " इति मूलभूतं सूत्रमुद्दिश्य भाष्याभिप्रायः समीक्षितः । तत्रार्धधातुकग्रहणं लोपविशेषणम्, आहोस्विद् गुणवृद्धिविशेषणमित्यंशे समीक्षा विहिता । इदं सूत्रं भाष्यकारेण कथं प्रत्याख्यातमिति भाष्यदिशा लिखितम् ।

" दीधीवेवीटाम् " इति सूत्रं भाष्यवार्त्तिकयोस्त्वेतत्सूत्रं प्रत्याख्यातम् । तस्य विशदं समीक्षा कृता ।

" हलोऽनन्तरा संयोगः " इति सूत्रे महासञ्ज्ञाकरणमन्वर्थसञ्ज्ञाविज्ञानार्थम् । संयुज्यन्तेऽस्मिन् समुदाये वर्णा इति । तेनात्र समुदाये वाक्यपरिसमाप्तिर्न तु गुणवृद्ध्यादिसञ्ज्ञावत् प्रत्येकमिति दीक्षिताः । समुदायस्यैव संयोगसञ्ज्ञा न तु प्रत्येकस्य इति नागेशभट्टानामभिप्रायः । तद्यथा –

पाणिनेः संयोगसञ्ज्ञाविधायकस्य " हलोऽनन्तरा संयोगः " इति सूत्रस्य भट्टोजिदीक्षितैः सिद्धान्तकौमुद्याम् – अज्भिरव्यवहिता हलः संयोगसञ्ज्ञा स्युरिति सूत्रार्थः क्रियते ।

गुणवृद्ध्यादिसञ्ज्ञावत् प्रत्येकं संयोगसञ्ज्ञायाः प्रसक्तिः तैः महासञ्ज्ञाकरणस्य अन्वर्थसञ्ज्ञा-विज्ञानार्थत्वं स्वीकृत्य निरस्यते । तथा च तद्रीत्या संयुज्यन्तेऽस्मिन् समुदाये वर्णाः इति संयोगशब्दस्य व्युत्पत्या समुदाये एव वाक्यपरिसमाप्तिः[2152] ।

यद्यपि सूत्रे ' हलः ' इति बहुवचनम्, तथापि जातौ बहुवचनस्वीकारात् द्वयोरपि संयोगसञ्ज्ञा तैः स्वीक्रियते । तेन ' शिक्षा ' इत्यादौ " गुरोश्च हलः "[2153] इति ' अ ' प्रत्ययः सिध्यति । ' यत्र तु बहवो हलः संश्लिष्टाः तत्र द्वयोर्बहूनां वा अविशेषेण सञ्ज्ञा '[2154] इति भट्टोजिदीक्षितानां सिद्धान्तः । वृक्षप्रचलनन्यायस्य तु अत्र न विषय इति कौस्तुभे तैः स्पष्टीक्रियते ।

नागेशभट्टैरपि समुदायस्यैव संयोगसञ्ज्ञा स्वीक्रियते, न तु प्रत्येकस्य । परं भट्टोजिदीक्षितैः स्वीकृतः अन्वर्थसञ्ज्ञात्वरूपो हेतुः तैः न स्वीक्रियते । तद्रीत्या ' गर्गाः शतं दण्डयन्तामर्थिनश्च राजानः, हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति ' इति न्यायादेव अत्र समुदाये वाक्यपरिसमाप्तिः स्वीक्रियते । अनन्तरा इत्युक्तिश्च तद्रीत्या समुदायसञ्ज्ञात्वे प्रमाणमानन्तर्यं च तद्रीत्या विशेषणं न तु उपलक्षणम् ।

किञ्च संयुज्यन्ते वर्णा यत्र इति अन्वर्थसञ्ज्ञाबलाद् न प्रत्येकं सञ्ज्ञा इति भट्टोजिदीक्षितमतस्य तैः युक्त्या खण्डनं विधीयते । तथा च नागेशभट्टरीत्या घटपटौ संयुज्येते यत्र इत्यादौ संयुज्यमा-नपदार्थातिरिक्तस्यैव अन्यपदार्थतया प्रतीतेः व्युत्पन्नत्वेन तदतिरिक्ततद्घटितपदवाक्यरूपसमुदायस्यैव संयोगसञ्ज्ञापत्तौ अनिष्टापत्तिः । अतोऽन्वर्थसञ्ज्ञाबलात् समुदायस्य सञ्ज्ञा इति भट्टोजिदीक्षितानां व्याख्यानं नोचितमिति नागेशभट्टानां सिद्धान्तः । तद्रीत्या संयोग इति महासञ्ज्ञाकरणं तु प्राचामनुरोधेन । किञ्च ' हलः ' इति जातौ बहुवचनमिति भट्टोजिदीक्षितानां व्याख्यानमपि नागेशभट्टैः नाङ्गीक्रियते । तद्रीत्या बहुवचनं सौत्रम् ।

एवमेव यत्र बहवो हलः श्लिष्टाः तत्र द्वयोर्बहूनां वा विशेषेण संयोगसञ्ज्ञा इति भट्टोजिदीक्षितानां मतं नागेशभट्टैः नाङ्गीक्रियते । तद्रीत्या यत्रापि बहवः श्लिष्टाः तत्रापि द्वयोर्द्वयोरेव संयोगसञ्ज्ञा न बहूनाम् ।

एवञ्च तद्रीत्या बहूनामपि संयोगसञ्ज्ञा इति भट्टोजिदीक्षितानां व्याख्यानमपि चिन्त्यमेव, तादृशव्याख्याने फलाभावात् । तस्मात् संयोगसञ्ज्ञाविधायकसूत्रव्याख्यानविषये अन्वर्थत्वविषये

2152 महासञ्ज्ञाकरणमन्वर्थसञ्ज्ञाविज्ञानार्थम् । संयुज्यन्तेऽस्मिन् समुदाये वर्णा इति । तेन अत्र समुदाये वाक्यपरिसमाप्तिर्न तु गुणवृद्ध्यादिसञ्ज्ञावत् प्रत्येकम् । (शब्दकौस्तुभः – प्रकृतसूत्रे)

2153 अष्टाध्यायी – (3-3-103)

2154 शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे

बहुवचनविषये अविशेषणसञ्ज्ञाविषये च भट्टोजिदीक्षितनागेशभट्टयोः मतभेदः स्पष्ट इति बोध्यम्[2155]। एवञ्च अनन्तरपदार्थविवेचनं कृतम्। द्वयोर्बहूनां वा संयोगसञ्ज्ञेति पक्षे गुणदोषौ विविच्य भाष्यसिद्धान्त उद्घाटितः।

" मुखनासिकावचनोऽनुनासिकः " इत्यस्मिन् सूत्रे चतुर्विधेषु समासेषु कस्य ज्यायस्त्वमिति सयुक्तिकमालोचितम्, प्रसङ्गतो नासिकाभिहतवायुना अभिव्यञ्जित इत्यनुनासिकपदस्य व्युत्पत्तिरपि दर्शिता, प्रासादवासिन्यायेन मुखग्रहणस्य प्रत्याख्यानमपि दर्शितम्। अत्रानुनासिकविषये त्रीणि दर्शनानि सन्ति। पूर्णोऽप्यनुनासिकवर्णो मुखेन नासिकया चोच्चार्यते – इत्येकः पक्षः। तस्य पूर्वभागो मुखेन परभागो नासिकया – इति द्वितीयः पक्षः। पूर्वभागो नासिकया परभागो मुखेनेति च तृतीयः पक्षः। एषु पक्षेषु प्रथमपक्षे एव प्रासादवासिन्यायावतारसम्भवात् तस्मिन्नेव पक्षे मुखग्रहणप्रत्याख्यानसम्भवो न तु अन्ययोः पक्षयोः। तयोः पक्षयोः भागस्यैव मुखेन भागस्यैव च नासिकयोच्चारणात्, न ते मुखवचनपदेन न वा नासिकावचनपदेन ग्रहीतुं शक्यन्ते। अतस्तत्र पक्षयोः प्रासादवासिन्यायावतारो न सम्भवति, येन मुखग्रहणं प्रत्याख्यायेत। मुखग्रहणं पूर्वतः सूत्रकारस्य चायमेव पक्षः (भागो नासिकया, भागो मुखेन च) अभिमत आसीदिति निर्धारयितुं शक्यते।

" तुल्यास्यप्रयत्नं सवर्णम् " इति सूत्रे किमिदं तुल्यास्यप्रयत्नमित्यादिकभाष्यमाधृत्य बहुविधसमासप्रदर्शनं कृतम्। पुनश्च आस्यं च प्रयत्नश्चास्यप्रयत्नौ, तुल्यौ चास्यप्रयत्नौ यस्य तत्तुल्यास्य-प्रयत्नमिति सिद्धान्तो दर्शितः। द्वन्द्वादौ श्रूयमाणन्यायेन तुल्यशब्दस्य प्रत्येकमन्वयो दर्शितः, एवम् ' आस्य ' इति पदमावश्यकं न वेति शङ्कायाः समाधानं भाष्यदृष्ट्या कृतम्। शलामीषद्विवृततया स्वराणां च विवृततया प्रयत्नभेदादेव अकारहकारादीनां सावर्ण्याप्रसक्तेः। एवञ्च भट्टोजिदीक्षितनागेशभट्टयोः मतभेदस्य गुणदोषविवेचनपुरस्सरं विशदं समीक्षा कृता। तद्यथा –

भट्टोजिदीक्षितैः ताल्वादिस्थानमाभ्यान्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसञ्ज्ञं स्यादित्यर्थः। तत्र आस्यशब्दे " शरीरावयवाच्च "[2156] इति सूत्रेण यत्प्रत्ययमाश्रित्य ' आस्ये भवम् आस्यमिति ' आस्यशब्दार्थो भट्टोजिदीक्षितैः मनोरमायां स्पष्टीक्रियते। प्रयत्नशब्देन च प्रशब्दबलाद् आभ्यान्तरप्रयत्नरूपोऽर्थः तैः स्वीक्रियते। तेन उपर्युक्तसूत्रार्थलाभः।

किन्तु ईदृशरीत्या आस्यशब्दस्य तद्धितान्तत्वस्वीकारे प्रयत्नस्यापि तेनैव लाभात् सूत्रे प्रयत्नग्रहणं व्यर्थमिति शङ्कां समाधातुं भट्टोजिदीक्षितैः शब्दकौस्तुभे स्वमतमित्थं स्पष्टीक्रियते।

2155 पाणिनिसञ्ज्ञासूत्रविमर्शः – (पृ. – 76)

2156 अष्टाध्यायी – (4-3-55)

प्रयत्नग्रहणाभावे प्रत्येकसाम्ये स्थानसाम्ये प्रयत्नसाम्ये च सवर्णसञ्ज्ञा स्यात्। अतः तद्वारणार्थं सूत्रे उभयोः उपादानमावश्यम्। तेन स्थानप्रयत्नोभयसाम्ये सत्येव सञ्ज्ञा, न तु अन्यतरसाम्येऽपि इति भट्टोजिदीक्षितानां सिद्धान्तः। तस्माद् भट्टोजिदीक्षितरीत्या प्रयत्नग्रहणं न व्यर्थं किन्तु उक्तरीत्या प्रत्येकं व्यापारनिरासार्थं बोध्यम्[2157]।

अत्र स्थानसाम्यविषयेऽपि भट्टोजिदीक्षितैः स्वमतं शब्दकौस्तुभे स्पष्टीक्रियते। तद्रीत्या सवर्णसञ्ज्ञायां यावत् स्थानसाम्यं न विवक्षितम्। तथा सति ञमङणनानां स्ववर्ग्यैः सह असावर्ण्यापत्तेः यवलानां सानुनासिकनिरनुनासिकानां च असावर्ण्यापत्तेश्च[2158]।

अत्र नासिकायाः स्थानत्वम् आस्यान्तर्गतत्वञ्च भट्टोजिदीक्षितैः स्वीक्रियते। तद्रीत्या ' अन्तरास्ये विततं चर्मास्ति प्रणवचर्मवत् तत्सम्बद्धो रेखाविशेषो नासिका '[2159]। तथा च तस्या अपि ओष्ठादिभ्य अविशेषाद् आस्यभवत्वेन यावत् स्थानसाम्यस्वीकारे उपर्युक्तदोषापत्तिः। तस्माद् यावत् स्थानसाम्यं न विवक्षितमिति तैः व्याख्यायते।

नागेशभट्टैः तुल्यास्यप्रयत्नमित्यस्य तुल्यौ आस्यप्रयत्नौ यस्य इत्यर्थः स्वीक्रियते तत्र आस्ये भवमास्यमिति तद्धितान्तम् आस्यपदं तद्रीत्या स्थानमेव बोधयति, प्रयत्नस्य पृथगुपदानात्। तथा च तद्रीत्या ताल्वादिस्थानमाभ्यान्तरप्रयत्नश्च यस्य एतद्द्वयं येन यदीयेन एतद्द्वयेन तुल्यं तत्सवर्णमिति सूत्रार्थः[2160]।

नागेशभट्टरीत्या सवर्णसञ्ज्ञायां यावद् आस्यभवतुल्यत्वं ग्राह्यम्। तत्र च पाणिनेः " यजुष्येकेषाम् "[2161] इति निर्देशः प्रमाणम्[2162]। किञ्च " झरो झरि सवर्णे "[2163] इति सवर्णग्रहणेन ज्ञापकेन यत्किञ्चित् प्रयत्नैक्यमादाय सवर्णसञ्ज्ञा इत्यर्थस्य भाष्ये प्रयत्नशब्देन यत्नमात्रग्रहणमिति पक्षे साधितत्वात्

[2157] नन्विह सूत्रे प्रयत्नग्रहणं व्यर्थम्, तद्धितान्तास्यशब्दबलादेव ताल्वादिस्थानस्य प्रयत्नस्य च लाभादिति चेत्? न, प्रत्येकं व्यापारनिरासार्थमुभयोरुपादानात्। तेन स्थानप्रयत्नोभयसाम्ये सत्येव सञ्ज्ञा न त्वन्यतरसाम्येऽपि। (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 118)

[2158] न हि स्थानसाम्यं विवक्षितम्। ञमङणनानां स्ववर्ग्यैः सह असावर्ण्यापत्तेः यवलानां सानुनासिकनिरनुनासिकानामसावर्ण्यापत्तेश्च। (शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 118)

[2159] शब्दकौस्तुभः भागः – 1 – प्रकृतसूत्रे – पृ. 118

[2160] यस्यैतद्द्वयं येन यदीयेनैतद्द्वयेन तुल्यमित्यर्थः। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

[2161] अष्टाध्यायी – (8-3-104)

[2162] यजुष्येकेषाम् इति निर्देशाद्यावदास्य भव तुल्यत्वं ग्राह्यम्। (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

[2163] अष्टाध्यायी – (8-4-65)

स्थानांशे यावत् स्थानसाम्ये सवर्णसञ्ज्ञा इत्यर्थस्य भाष्यतोऽपि स्वरसतो लाभादिति नागेशभट्टानां सिद्धान्तः ।

यद्यपि भट्टोजिदीक्षितरीत्या अस्मिन्नपि व्याख्याने प्रयत्नग्रहणस्य वैयर्थ्यं प्रतीयते । तथापि नागेशभट्टरीत्या न तद्व्यर्थम् । प्रयत्नग्रहणाभावे वर्णजनकानां आस्यभवानां वायुसंयोगानामपि तुल्यत्वस्य सवर्णसञ्ज्ञायां स्वीकारापत्तौ ह्रस्वदीर्घयोः सावर्ण्यानापत्तिः स्यात्, तयोर्जनकानां वायुसंयोगानां तुल्यत्वाभावात् । अत आस्यभवशब्देन कण्ठादीनामेव ग्रहणं न तु वायुसंयोगानामित्यर्थ-बोधनाय प्रयत्नग्रहणं सार्थकमिति नागेशभट्टानामभिप्रायः[2164] ।

यत्तु भट्टोजिदीक्षितैः प्रयत्नग्रहणस्य प्रयोजनं प्रत्येकव्यापारद्वयनिरासार्थमुभयोरुपादानम्, इत्यादिरूपेण प्रदर्शितं तत्तु नागेशभट्टानां नाभिमतमिति टीकाग्रन्थदर्शनात् स्पष्टीभवति ।

यद्यपि स्थानांशे यावत् स्थानसाम्ये सवर्णसञ्ज्ञा इत्यर्थे नासिकाया अपि स्थानत्वात् कङयोः यावत् स्थानसाम्याभावात् सावर्ण्यं न लभ्यते इत्याक्षेपो नागेशभट्टमते कर्तुं शक्यः । तथापि नागेशभट्टैः अत्र सूत्रे आस्यशब्देन नासिकाया न ग्रहणमिति सिद्धान्तस्य स्वीकारेण न दोषः । तथा च तद्रीत्या प्रयत्नविशेषणं आस्योपादानमिति भाष्येण बाह्यप्रयत्नानां व्यावर्तत्वं प्रदर्शनेन भाष्यरीत्या नासिकाया आस्यान्तर्गत्वस्य स्वीकाराभावः किञ्च नासिका आस्यबाह्या इत्येव पक्षः सम्मतः तेन न दोषः ।

एवञ्च नासिकास्यान्तर्गता इति कैयटादिसम्मतं पक्षमाश्रित्य उक्तदोषवारणाय यावत् स्थान-साम्यं न विवक्षितमिति भट्टोजिदीक्षितानां व्याख्यानं नागेशभट्टानां नाभिमतमिति बोध्यम् ।

“ नाज्झलौ ” इति सूत्रं न प्रक्रियानिर्वाहायात्यावश्यकमिति भाष्यदिशा सूचितम् ।

एतावता **(क) अथ शब्दानुशासनम् । (ख) प्रत्याहारसूत्राणि । (ग) वृद्ध्यादिसञ्ज्ञाप्रकरणञ्च इत्यभिधो** द्वितीयोऽध्यायोऽवसितः ।

• तृतीयोऽध्यायः

इत आरभ्य नव सूत्राणि प्रगृह्यसञ्ज्ञाविषयकाणि तेषामिदमादिमम् “ ईदूदेद्द्विवचनं प्रगृह्यम् ” इति सूत्रम् । तत्र तपराणामीदूदेतां प्रगृह्यसञ्ज्ञाविधानस्य प्रयोजनं विवेचितम् । ईदूदेद्द्विवचनं इत्यस्य चत्वारः पक्षाः सम्भवन्तीति साधकबाधकयुक्तिपुरस्सरं भाष्यप्रदर्शितेन पथा वर्णिताः । यथा –

[2164] अत एव प्रयत्नशब्देन यत्नमात्रग्रहणमिति पक्षे यत्किञ्चित्प्रयत्नभेदे यत्किञ्चित्प्रयत्नैक्यमादाय सवर्णसञ्ज्ञेत्यर्थो “ झरो झरि सवर्णे ” इतिसवर्णग्रहणेन ज्ञापकेन साधितो भाष्ये । तेन स्थानांशे यावत्स्थानसाम्ये इत्येव स्वारसिकोऽर्थ इति प्रतीयते । (लघुशब्देन्दुशेखरः – प्रकृतसूत्रे)

" अदसो मात् " इति सूत्रे पूर्वसूत्रात् ' ईदूदेद् ' इति समस्तं पदमनुवृत्यं वा ' एत् ' इत्येकदेशं विमुच्य इति प्रश्नस्य समाधानं भाष्यानुसारेण कृतम् । अत्रानुवृत्तिविषये विचारभेदाद् मतद्वयं विद्यते – एकं काशिकाकारस्य मतम्[2165], द्वितीयन्तु भट्टोजिदीक्षितस्य मतम्[2166] । तयोः मतद्वयं दर्शयित्वा महती समीक्षा कृता । तद्यथा –

काशिकाकारस्य मतम् – एतन्मते ' एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ' इति परिभाषया ' ईदूदेत् ' इति समस्तं पदमनुवर्त्यम्, ' एत् ' इत्येकदेशं विहाय ' ईदूद् ' इति पदैकदेशानुवृत्तेरनौचित्यात् । सत्यामपि च एकारानुवृत्तौ न स प्रगृह्यसञ्ज्ञो भवति, मकारात्परस्य तस्य असौ लभ्यात् । अतश्च ' माद् ' ग्रहणसाफल्यम् । अन्यथा यदि एकारोऽनुवर्त्येत एव न, तर्हि ' अमुकेऽत्र ' इत्यादौ अतिप्रसङ्गाभावात् तत्रातिप्रसङ्गवारणाय कृतं ' माद् ' ग्रहणं विफलं स्यात्, ईकारोकारयोस्तु मादेव परत्वाद् न तयोर्विषये क्वापि अतिप्रसङ्गः, यद्वारणाय ' मात् ' इति पदं गृह्येत । एवञ्च ' अमुकेऽत्र ' इत्यादौ प्रसक्तातिव्यापत्तिवारणाय कृतं माद्ग्रहणं समस्तपदानुवृत्तौ प्रमाणम् । अत एव अर्थाधिकारमाश्रित्य पूर्वसूत्रे द्विवचनविशेषणतया तेन तदन्तविधौ ' ईदूदेन्ताः ' इत्यर्थो नानुवर्त्येत, तथा सति ' अमुकेऽत्र ' इत्यत्रापि अतिप्रसङ्गाद् ' मात् ' पदवैयर्थ्यापत्तेः । किन्तु शब्दाधिकाराद् ' ईदूदेद् ' इति तत्रत्यार्थनिरपेक्ष एव इहानुवर्त्यते, अत्र तस्य विशेष्याभावान्न तदन्तविधिः[2167] । अतश्चैव काशिकाकारो वृत्तिमाह – ' अदसः सम्बन्धी यो मकारः, तस्मात् परे ईदूदेतः प्रगृह्यसञ्ज्ञा भवन्ति '[2168] ।

भट्टोजिदीक्षितस्य मतम् – अत्र ' ईदूत् ' इति, ' प्रगृह्यम् ' इति चानुवर्तते । एदिति तु नानुवर्तते, अत एव एकारस्य प्रगृह्यत्ववारणाय माद्ग्रहणम्, कृते च तस्मिन् एकारस्य अदश्शब्दावयवमकाराव्यवहितोत्तरस्य एकारस्यानुपलब्धेः । नन्वेवमपि माद्ग्रहणं व्यर्थम्, एद्ग्रहणमननुवृत्त्य ईदूतोरेवात्र प्रगृह्यत्वविधानाभ्युपगमेन ' अमुके ' इत्यत्र प्रगृह्यत्वाप्रसक्तिः स्यादिति चेन्न, माद्ग्रहणाभावे ' एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ' इति परिभाषया " अदसो मात् " इत्यत्र ईदूदेताम् एकसमासपदोपात्तानां मध्ये ईदूतोर्द्वयोरनुवृत्तौ एतोऽप्यनुवृत्तिस्स्यात् ततश्च ' अमुके अत्र ' इत्यत्राप्येकारस्य प्रगृह्यत्वं स्यात् । माद्ग्रहणे सति तु " तस्मादित्युत्तरस्य "[2169] इति

[2165] काशिका – पदमञ्जरी – प्रकृतसूत्रे

[2166] सिद्धान्तकौमुदी – बालमनोरमा –प्रकृतसूत्रे

[2167] भाषावृत्तेः समीक्षात्मकमध्ययनम् – पृ. 129

[2168] काशिका – प्रकृतसूत्रवृत्तिः

[2169] अष्टाध्यायी – (1-1-67)

परिभाषाबलेन मकारादव्यवहितपरत्वस्य एकारेऽसम्भवान्नानुवृत्तिः । तस्माद् माद्ग्रहणं एकाराननुवृत्ति-तात्पर्यग्राहकफलकमिति फलितम् ।

“ **निपात एकाजनाङ्** ” इत्यत्र ‘ एकाच् ’ पदे कर्मधारयसमास एव ,न तु एकोऽच् यस्मिन् इति बहुव्रीहिसमासः इति भाष्यसिद्धान्तः ।

“ **उञ ऊँ** ” इत्येकं सूत्रं भाष्यकृता विभज्य सूत्रद्वयं कृतम् । अस्य योगविभागस्य फलविषये मतभेदो दृश्यते । तद्यथा – योगविभागस्य फलं ‘ विति ’ इति प्रदीप-न्यास-पदमञ्जरी-बालमनोरमाकारादयः प्रतिपादयन्ति । परन्तु नागेशः फलमिदं न स्वीकरोति । तस्य मते ‘ उ इति ’ भवति योगविभागस्य फलम्[2170] । तथा हि “ उञ ऊँ ” इत्येकयोगे शाकल्यस्येति नानुवर्तेत तदा उञः प्रगृह्यसञ्ज्ञा स्यात् । प्रगृह्यसञ्ज्ञकस्य तस्य ‘ ऊँ ’ इत्यादेशः स्यात् । अर्थात् प्रगृह्यत्वादेशस्य च सहविधानात् । ‘ ऊँ इति ’ इत्येकमेव रूपं स्यात् । परन्तु ‘ उ इति ’,‘ विति ’ इति रूपं न सिध्येत् । शाकल्यग्रहणानुवृत्तावपि प्रगृह्यसञ्ज्ञाया आदेशस्य च वैकल्पितकत्वेन ‘ ऊँ इति ’,‘ विति ’ इत्यनयोः सिद्धावपि ‘ उ इति ’ न सिद्ध्यति ।

यद्यपि लक्ष्मीटीकाकारः श्रीसभापतिशर्मोपाध्यायः ‘ केचित् ’[2171] पदोपन्यस्य कैयटमतमुपस्थापयति तथापि स्वमतत्वेन नागेशमतमेव स्वीकरोति ।

मन्तव्यम् – वस्तुतस्तु नागेशमतं समीचीनं प्रतिभाति । कारणम् ‘ उञः इति योगविभागः ’ इति कथनानन्तरं ‘ किमर्थो योगविभागः ’ इति पृच्छति भाष्यकारः । तस्य प्रश्नस्यायमेवाशयो यत् प्रगृह्यत्वादेशयोः शाकल्यमते एव प्राप्त्या एकप्रयोगे एव प्रवृत्तिः स्यात् । एवञ्च ‘ ऊँ इति ’,‘ विति ’ इति रूपे स्याताम् । ते च एकयोगेऽपि सिध्यतः । तर्हि ‘ किमर्थो योगविभागः ’ इति जिज्ञासायामुच्यते ‘ ऊँ वा शाकल्यस्य ’ इति । अर्थात् ‘ उ इति ’ रूपसिद्ध्यर्थं योगविभागः कर्तव्य इति स्पष्टं प्रतीयते ।

“ **ईदूतौ च सप्तम्यर्थे** ” इत्यस्मिन् सूत्रे अर्थग्रहणस्य प्रयोजनं विवेचितम् ।

“ **दाधाघ्वदाप्** ” इति सूत्रेण ‘ प्रनिदारयति ,प्रनिधारयति ’ इत्यादौ कथं घुसञ्ज्ञा प्राप्ता ? कथञ्च भाष्यकारेण वारितेति विवेचितम् । तत्र प्रकृतिग्रहणस्य प्रयोजनं सुस्पष्टं वेविचितम् ।

“ **आद्यन्तवदेकस्मिन्** ” इति सूत्रं सति परस्मिन् यस्मात्पूर्वो नास्ति स आदिः ,सति पूर्वस्मिन् यस्मात्परो नास्ति सोऽन्त्य इति भाष्योक्तेरादित्वान्तत्वयोः समुदायसापेक्षत्वेन एकस्मिन् तत्प्रयुक्त-कार्याप्रसक्त्या तत्प्राप्त्यर्थमिदमारभ्यते ।

[2170] लघुशब्देन्दुशेखरः – प्रकृतसूत्रे

[2171] वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीटीकायाम् – (पृ. – 175)

“ **बहुगणवतुडतिसंख्या** ” इति द्वितीयसंख्याग्रहणं कर्तव्यं न वेति सयुक्तिकं प्रतिपाद्य तद् भाष्यकारेण प्रत्याख्यातमिति सुस्पष्टं विवेचितम् । तत्र बहुगणग्रहणं नियमार्थमिति दीक्षिताः । अप्राप्तसङ्ख्याविधानार्थमिति नागेशाः ।

“ **क्तक्तवतू निष्ठा** ” इति सूत्रे ‘ निष्ठासञ्ज्ञायां समानशब्दप्रतिषेधः ’ इति वार्तिकस्य भाष्यदिशा सोपपत्तिकं खण्डनं विवेचितम् ।

“ **सर्वादीनि सर्वनामानि** ” इति सूत्रे समासविवेकम् ‘ सर्वनाम ’ इति शब्दे च णत्वाभावविषयिका समीक्षा, सञ्ज्ञोपसर्जनप्रतिषेधविषयिका च समीक्षा प्रदर्शिता, सर्वादिगणे उभशब्दस्य भवत्शब्दस्य च पाठप्रयोजनम्, उभयशब्दविषये मतद्वयम्, सञ्ज्ञोपसर्जनं प्रतिषेध इति वार्तिकं साधकबाधकयुक्तिपुरस्सरं विवेचितम् ।

“ **विभाषा दिक्समासे बहुव्रीहौ** ” इत्यस्मिन् सूत्रे ‘ समासे ’ इति वर्तमाने पुनः समासग्रहणप्रयोजनस्य समीक्षा वैशद्येन सम्पादिता, एवञ्च दिग्ग्रहणस्य बहुव्रीहिग्रहणस्य च प्रयोजनं सुस्पष्टं लिखितम् ।

“ **न बहुव्रीहौ** ” इत्यत्र बहुव्रीहिपदस्यालौकिकविग्रहपरत्वमिति न भाष्यसम्मतः । अत एव ‘ अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ ’ इत्युक्तम् । एतेन बहुव्रीहिः सर्वनामसञ्ज्ञको न भवतीत्यर्थ एव सूचितः ।

“ **तृतीया समासे** ” इति सूत्रे पूर्वसूत्रात् ‘ समासे ’ इत्यनुवर्तमाने पुनः समासग्रहणप्रयोजनस्य भूयसी समीक्षा युक्तायुक्तत्वविवेकगर्भा साधिता ।

एतावता **(क) प्रगृह्यसञ्ज्ञाप्रकरणम् । (ख) घ्वादिसञ्ज्ञाप्रकरणम् । (ग) सर्वनामसञ्ज्ञाप्रकरणञ्च** इत्यभिधः तृतीयोऽध्यायः समाप्तः ।

• चतुर्थोऽध्यायः

“ **स्वरादिनिपातमव्ययम्** ” इति सूत्रे स्वरादीनां पृथक्पाठप्रयोजनस्य समीक्षा कृता । तद्यथा – ननु स्वरादिषु किञ्चित् क्रियाप्रधानम्, किञ्चित्साधनप्रधानमिति, असत्त्ववाचित्वाच्चादिष्वेव स्वरादीन्पठित्वा निपातसञ्ज्ञायां निपातमव्ययमित्यनेनाऽव्ययसञ्ज्ञासिद्धौ सूत्रे स्वरादिग्रहणं व्यर्थमिति चेन्न, सत्त्ववाचिनां स्वरादीनां निपातत्वापत्तिर्दोषः । “ चादयोऽसत्त्वे ”[2172] इति यथा असत्त्ववाचिनामेव चादीनां भवति निपातसञ्ज्ञा, तथैव तत्रैव स्वरादीनां पाठे एषामपि असत्त्ववाचिनामेव स्याद्, न तु

[2172] अष्टाध्यायी – (1-4-57)

सत्त्ववाचिनाम्, सन्ति च सत्त्ववाचिन अपि स्वरादयः, स्वः पश्यति, स्वर्गच्छति, स्वस्ति वाचयति इत्यादौ क्रियासम्बन्धे अनेककारकशक्तियोगदर्शनाद् । ' अनेककारकशक्तियोग एव च सत्त्वम् ' इति उद्योतकारः[2173] । तथा च भाष्यम् – ' चादीनां वै असत्त्ववचनानां निपातसञ्ज्ञा । स्वरादीनां पुनः सत्त्ववचनानामसत्त्ववचनानाञ्च '[2174] ।

" **तद्धितश्चासर्वविभक्तिः** " इति सूत्रे सर्वशब्दः सर्वः पटो दग्ध इतिवद् अवयवकार्त्स्न्ये वर्तते, तेन सर्वा वचनत्रयात्मिका विभक्तिः यस्मान्नोत्पद्यते, किन्त्वेकवचनान्येवोत्पद्यन्ते, स तद्धितान्तोऽव्ययसञ्ज्ञः स्यादिति निर्गलितोऽर्थः कथं स्यादिति विवेचितः ।

" **कृन्मेजन्तः** " इति सूत्रे अन्तग्रहणस्य प्रयोजनं भवति न वेति प्रश्नस्य समाधानं कृतम् ।

" **अव्ययीभावश्च** " इत्यत्र अव्ययीभावसमासस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचाराः इत्युक्तं भाष्यकारेण ।

" **नवेति विभाषा** " इत्यत्र ' काकाक्षिन्यायेन ' इतिशब्द उभाभ्यां सम्बध्यते । अर्थविपर्यासकृद् इतिशब्दस्य परप्रयोगाद् न-वा इति निपातयोरर्थौ निषेधविकल्पौ गृह्येते । शास्त्रे ' प्राप्तविभाषा-अप्राप्तविभाषा-प्राप्ताप्राप्तविभाषा ' इति त्रिविधाया विभाषायाः सोदाहरणं विवेचितम् ।

" **मिदचोऽन्त्यात्परः** " इति सूत्रे ' अचः ' इति निर्धारणषष्ठी वा समानाधिकरणपञ्चमी वा इति प्रश्नस्य समाधानं गुणदोषविवेचनपुरस्सरं प्रतिपादितम् । अत्र सूत्रविषये श्रीपूज्यानां गुरुवर्याणां साक्षात्कृतव्याकरणप्रतिपाद्यविषयाणां श्रीभोलाझामहोदयानां विचारः प्रदर्श्यते । ' अचः ' इति समानाधिकरणपञ्चम्यामपि नास्ति स दोषः । तथाहि – निर्धारणषष्ठीपक्षेऽपि अन्त्यस्य अविशेषितत्वाद् यतः कुतश्चिद् अन्त्यात् परत्वं प्राप्तम् । नहि सूत्रे द्वितीयमज्ग्रहणमस्ति, येनान्त्यो विशेष्येत – इत्येतद्दोष-परिहाराय यथोच्येत – समानजातीयस्यैव हि लोके निर्धारणप्रतीतिर्भवति । तथाहि – कृष्णा गवां सम्पन्नक्षीरतमा – इत्युक्ते गौरेव प्रतीयते, नाजा, नाप्यश्वा । तस्मादिहापि ' अचां मध्येऽन्त्याद् ' इति अन्त्यत्वेन निर्धार्यमाणः समानजातीयोऽजेव प्रतीयते । तेनाच एवान्त्यात् परो भविष्यति । अत एवोक्तं काशिकाकृता ' अन्त्यादचः ' इति । तथा पञ्चमीपक्षेऽपि ' अन्त्यादचः परो मित् ' इत्यस्य ' अज्झल्समुदायस्य सूत्रे आगमितत्वेन वा गृह्यमाणस्य योऽन्त्यावयवः, स यदि अजेव तर्हि तस्मात् परो मित् ' इत्यर्थकत्वे पूर्वोक्तदिशा मुचादौ अन्त्यस्याचोऽभावाद् एतदप्रवृत्तौ अन्त्यस्यालः स्थाने वा प्रकृतेः परतया वा विधाने प्राप्ते मित्करणस्य अपार्थकत्वे तत्सामर्थ्याद्, " तृणह इम् " इति निर्देशाच्च

[2173] महाभाष्यम् – उद्योतः – प्रकृतसूत्रे
[2174] महाभाष्यम् – प्रकृतसूत्रे

विशेषणीभूतेन (परिच्छेदकेन) अन्त्यशब्देन विशेष्यभूताच्समानजातीयेषु अक्षु एव अचः परिच्छेदात् सामर्थ्यादेव ‘ अक्षु योऽन्त्योऽच् तस्मात् परो मित् स्यात् ’ इत्येवार्थः प्रतीयेत। यथा लोकेऽपि ‘ कृष्णगौः बहुक्षीरा ’ इत्युक्ते, कासु ? इति जिज्ञासायां गोषु – इत्येव लभ्यते, न तु गोषु महिषीषु अजासु च। यतो हि विशेषणेन कृष्णेतिपदेन विशेष्य – गोसजातीयगोषु एव कृष्णाया गोः परिच्छेदो विधीयते। एवञ्च पञ्चमीपक्षेऽपि सामर्थ्याद् (अज्झल्समुदायरूपगृह्यमाण – शब्दघटकेषु) अक्षु योऽन्त्योऽच् तस्मात् परो मित् – इत्यर्थस्य निर्धारणषष्ठीपक्षे षष्ठ्यन्तपदघटितवाक्यार्थसमानार्थकत्वमेवेति न कुत्रापि दोषः[2175] ।

“ **षष्ठी स्थानेयोगा** ” इत्यत्र स्थानपदाध्याहारेण तन्निरूपितसम्बन्धार्थिका , आनन्तर्यादिपदाध्याहारेण तन्निरूपितसम्बन्धार्थिका वा षष्ठी इत्यभिप्रायकं भाष्यवचनम्। स्थानशब्दौ भावसाधनः – स्थितिः स्थानम्। तत् पुनस्त्रिधा – अवकर्षः ,निवृत्तिः ,प्रसङ्गश्च। अत उक्तं दीक्षितेनापि स्थानं च प्रसङ्ग इति। सूत्रप्रयोजनस्य विशदं समीक्षा कृता।

“ स्थानेऽन्तरतमः ” इति सूत्रे किमयं स्वतन्त्रो विधिः ? किं वा लक्षणान्तरेणऽभिनिवृत्तानामनेन नियमः क्रियते ? किं वा लक्षणान्तरशेषभूतमिति पक्षत्रयमवतिष्ठते तत्र निवृत्तानामनेन नियमः क्रियते इत्येव सिद्धान्तपक्षः। “ षष्ठी स्थानेयोगा ” इति सूत्राद् ‘ स्थाने ’ इत्यस्यानुवृत्तिसम्भवात् पुनरत्र स्थाने ग्रहणस्य तमब्ग्रहणस्य च प्रयोजनं विवेचितम्। ‘ स्थानेऽन्तरतम उरण रपरः ’ इत्येवं संहितापाठे अत्र ‘ अन्तरतम ’ इति शब्दे सप्तम्यन्तपाठः प्रथमान्तपाठो वेति शङ्कायामत्र ‘ अन्तरतमः ’ इति प्रथमान्तपाठ एव सिद्धान्त इति युक्तिपुरस्सरं निरूपितः।

“ उरण् रपरः ” इत्यत्र “ स्थानेऽन्तरतमः ” इति सूत्रात् स्थाने ग्रहणमनुवर्तते “ षष्ठी स्थानेयोगा ” इति सूत्राच्च स्थाने ग्रहणमनुवर्तते स्थाने स्थाने इत्येकस्यानुवादेऽपि स्थानसम्बन्धलाभः फलम्, अपरस्य लक्षणया प्रसङ्गावस्थाकालबोधः फलं तथा च ऋकारस्य लृकारस्य च स्थाने विधीयमानोऽण् प्रसङ्गकाले रपरो भवतीति सूत्रार्थो निष्पन्नः। ‘ रपरः ’ इत्यत्र ‘ र ’ इति प्रत्याहारविषये खण्डनमण्डनं विस्तारेण विवेचितम्।

“ अलोऽन्त्यस्य ” इति सूत्रं स्थानषष्ठीनिर्देशविषयं षष्ठीमात्रविषयं वा इति प्रश्नस्य समाधानं कृतम्।

“ अनेकाल्शित्सर्वस्य ” इति सूत्रे शित्करणं किमर्थम् ? इति भाष्यदृष्ट्या दर्शितम्।

[2175] भाषावृत्तेः समीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

" स्थानिवदादेशोऽनल्विधौ " इत्यत्र ' अल्विधौ ' इति पदस्यार्थानुरोधात् चतुर्विधः समासः । अतिदेशस्य सप्तभेदा विस्तृततया लिखिताः । विधिग्रहणस्य वतिग्रहणस्य आदेशग्रहणस्य च प्रयोजनं विवेचितम् । तद्यथा – विधिग्रहणप्रयोजनम् – ' अल्निमित्तकविधौ न स्थानिवद् ' इत्येतदर्थस्य ' अनलि ' इति पदेनैव लाभसम्भवाद् विधिशब्देन समस्तस्य ' अनल्विधौ ' इति पदग्रहणस्य को लाभः ? इति प्रश्नस्य यथासम्भवं सर्वविभक्त्यन्तेन अनल्शब्देन सह समासलाभाय विधिग्रहणविशिष्टम् ' अनल्विधौ ' इति पदमुच्चारितम् । तेन अला विधौ, अलः परस्य विधौ, अलः स्थाने विधौ, अलि परे विधौ चेति अल्विधिः इति चतुर्विधसमासार्थलाभः ।

क्रमेणोदाहरणम् – अला विधौ यथा – व्यूढं विशालम् उरो यस्य स तेनेति विग्रहे बहुव्रीहौ कपि ' व्यूढोरस्केन ' अत्र " सोऽपदादौ "[2176] इति सूत्रेण विसर्गस्य सत्त्वेऽत्र सकारस्य स्थानिवद्भावेन विसर्गत्वमादाय विसर्गस्याकारोपरि पाठेन (अयोगवाहानामट्प्रत्याहारे पाठेन) विसर्गे अट्त्वस्य सत्त्वात्, स्थानिवद्भावेन सकारेऽपि वृत्तित्वाद् अट्व्यवधाने " अट्कुप्वाङ्नुम्व्यवायेऽपि "[2177] इति सूत्रेण णत्वं स्यात् । अतस्तृतीयान्तेन अला इत्यनेन सह समासेन णत्वविधावडादेरलो व्यवधानात्क्रियायाः कर्तृतया करणतया वा निमित्ततया अल्कर्तृक-विधौ अल्करणविधौ वा आदेशो न स्थानिवदित्यर्थकेन स्थानिवत्त्वनिषेधाद् अडादिमात्रव्यवधानाभावेन णत्वं न ।

अलः परस्य विधौ यथा – ' द्यौः ' इत्यत्र वकारस्थानिकस्य औकारस्य स्थानिवत्त्वेन हल्त्वात् ततः परस्य सोः " हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् "[2178] इति सूत्रेण लोपः प्राप्तः, अलः परस्य विधौ न स्थानिवदिति निषेधान्न भवति ।

अलः स्थाने विधौ यथा – ' द्युकामः ', ' दिवं कामयते ' इत्यर्थे " कर्मण्यण् "[2179] इति सूत्रेण अण्प्रत्ययः । " दिव उत् "[2180] इति सूत्रेण वकारस्य उकारादेशे स्थानिवद्भावेन वत्वमादाय " लोपो व्योर्वलि "[2181] इति सूत्रेण वलोपः प्राप्तोऽलो वकारस्य स्थाने लोपस्य विधित्वेन स्थानिवत्त्वनिषेधान्न भवति ।

[2176] अष्टाध्यायी – (8-3-38)

[2177] अष्टाध्यायी – (8-4-2)

[2178] अष्टाध्यायी – (6-1-67)

[2179] अष्टाध्यायी – (3-2-1)

[2180] अष्टाध्यायी – (6-1-129)

[2181] अष्टाध्यायी – (6-1-66)

अलि परे विधौ यथा – ‘ क इष्टः ’ इत्यत्र यजेः क्ते “ वचिस्वपियजादीनां किति ”[2182] इति सूत्रेण यकारस्य इकारे सम्प्रसारणे तत्र स्थानिवत्त्वेन हश्त्वबुद्ध्या कशब्दोत्तररोः “ हशि च ”[2183] इति सूत्रेण उत्वे प्राप्ते हश् रूपे अलि परे विधित्वात् स्थानिवत्त्वनिषेधान्नोक्तम् ।

वतिग्रहणप्रयोजनम् – अत्र वतिकरणं किमर्थम् ? विनाऽपि वतिना तदर्थलाभात् । यथा ङित् – किद् इत्यादौ, इति प्रश्नमुत्थाप्य समाहितं भाष्यकृता – वतिं विना “ स्थान्यादेशोऽनल्विधौ ” इतीयत्युच्यमाने सञ्ज्ञाप्रस्तावात् स्थानी आदेशस्य सञ्ज्ञा स्यात् । तथा च “ आङो यमहनः ” इत्यात्मनेपदं सञ्ज्ञाभूतेन स्थानिना हन्तिना प्रतिबोधितस्य सञ्ज्ञिन आदेशस्य वधेरेव स्यात्, हन्तेस्तु न स्यात् । अतो वत्करणमावश्यकम्[2184] ।

आदेशग्रहणप्रयोजनम् – ननु ‘ पितृवदधीते ’ इत्यादौ यथा पितृशब्दस्य सम्बन्धिशब्दत्वात् तस्यापरः सम्बन्धी ‘ पुत्रः ’ इति लभ्यते, एवमत्रापि ‘ स्थानिवत् ’ इत्युक्ते स्थानिशब्दस्यापि सम्बन्धिशब्दत्वात् तन्महिम्नैव आदेश इति तस्यापरः सम्बन्धी लप्स्यत एव, पुनर् आदेशग्रहणं व्यर्थमिति चेन्न, आदेशो द्विविधः – श्रौतः आनुमानिकश्च । तत्र श्रौतः सूत्रेषु पठितः “ जराया जरसन्यतरस्याम् ”[2185] इत्यादिः । आनुमानिकश्च यथा – “ एरुः ”[2186] इत्यादिना इकारादिवर्णमात्रस्य उकारादिवर्णविधाने ‘ शब्दाः नित्याः ’ इति वैयाकरणसिद्धान्तभङ्गभिया नित्येषु शब्देषु स्थानिनिवृत्तेः, आदेशस्य चानुपपत्त्या लोट्स्थानिकस्य इकारान्तस्य उच्चारणप्रसङ्गे उकारान्त उच्चारणीयः । इकारान्तबुद्धिप्रसङ्गे उकारान्तबुद्धिः कर्तव्या इत्यर्थे वानुमिते तेरित्यस्य प्रसङ्गे तुरित्यादेश इति फलति । तथा च श्रौतस्य स्थान्यादेशभावस्य श्रावणप्रत्यक्षविषयतया प्रत्यासत्त्या तत्रैव स्थानिवत्सूत्रं प्रवर्तेत, नानुमानिके । एवञ्च भवतु इत्यादेस्तिङ्त्वाभावेन पदत्वं न स्यात् । आनुमानिकेऽपि स्थानिवद्भावे तु तेस्तिङ्त्वं तु शब्दे स्थानिवत्त्वेनादाय पदत्वं सिद्ध्यति । आदेशग्रहणसामार्थ्यात्प्रत्यासत्तिन्यायबाधेन आनुमानिकस्यापि ग्रहणं सिद्ध्यति । अर्थप्रत्यायनार्थमेव शब्दप्रयोगाद् अर्थवत एव उच्चारणस्य बुद्धेश्च प्रसक्तौ अर्थवत्सु एव स्थान्यादेशकल्पना । तद्वक्ष्यते – “ युष्मदस्मद्भ्यां ङसोऽश् ”[2187] इति सूत्रे

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।

[2182] अष्टाध्यायी – (6-1-15)

[2183] अष्टाध्यायी – (6-1-112)

[2184] भाषावृत्तेःसमीक्षात्मकमध्ययनम् – प्रकृतसूत्रे

[2185] अष्टाध्यायी – (7-2-101)

[2186] अष्टाध्यायी – (3-4-86)

[2187] अष्टाध्यायी – (7-1-27)

एकदेशविकारे हि नित्यत्वं नोपपद्यते ।।

" अचः परस्मिन् पूर्वविधौ " इति सूत्रे अचः ,परस्मिन् ,पूर्वविधौ इति पदत्रयाणां प्रयोजनानि विवेचितानि ।

" न पदान्...... " इति सूत्रस्य क्रमेणोदाहरणानि विवेचितानि । चतुर्विधस्य स्थानिवद्भावस्य वैशद्येन समीक्षा कृता । तद्यथा – 1. साक्षात् पदचरमावयवसाधकः, 2. साक्षात्पदचरमावयव-प्रतिबन्धकः, 3. परम्परया पदचरमावयवसाधकः 4. परम्परया पदचरमावयवप्रतिबन्धकश्च । तत्र परम्परया पदचरमावयवसाधकः स्थानिवद्भावो नानेन प्रतिषिध्यते, किन्तु अन्यस्य त्रिविधस्य प्रतिषेधः ।

" द्विर्वचनेऽचि " इति सूत्रस्यैतस्यार्थप्रसङ्गे षट् पक्षाः सम्भवन्ति । तेषु पञ्चसु पक्षेषु दोषदर्शनात् षष्ठ एव पक्ष उक्तार्थरूपः समाश्रीयते । तद्यथा - एतस्य सूत्रस्यार्थप्रसङ्गे षट् पक्षाः सम्भवन्ति । तेषु पञ्चसु पक्षेषु दोषदर्शनात् षष्ठ एव पक्ष उक्तार्थरूपः समाश्रीयते – इति पदमञ्जर्यां हरदत्तो व्याचख्यौ । तथा हि – द्विर्वचने इति पदस्यानावृत्तौ द्विर्वचने इत्यत्र विषयसप्तम्याश्रयणाद् अचि इत्यस्य आदेशोपलक्षणत्वे स्थानिवत्त्वं प्रति निमित्तत्वे वा स्वीकृते पक्षद्वयम् । द्विर्वचने इत्यस्य अचो विशेषणत्वे उक्तरीत्या पक्षद्वयम् । द्विर्वचने इत्यस्यावृत्तौ एकत्र विषयसप्तमी, अपरत्र अचि इत्यस्य विशेषणतायां समानाधिकरणसप्तमीति विवक्षायां पुनः अचि इत्यस्य स्थानिवत्त्वं प्रति निमित्तत्वे, आदेशोपलक्षणत्वे वा पक्षद्वयम् । एवं षट् पक्षाः सम्भवन्ति । ते चैवं सन्ति –

1. अचि योऽजादेशः स द्विर्वचने कर्तव्ये स्थानिवद्भवति ।

2. द्विर्वचने कर्तव्येऽजादेशः स्थानिवद्भवति अचि परे ।

3. द्वित्वनिमित्तेऽचि योऽजादेशः स स्थानिवद्भवति ।

4. अजादेशः स्थानिवद्भवति द्वित्वनिमित्तेऽचि परतः ।

5. द्विवचने कर्तव्येऽजादेशः स्थानिवद्भवति द्विर्वचननिमित्तेऽचि परतः ।

6. द्विर्वचननिमित्तेऽचि योऽजादेशः स स्थानिवद्भवति द्वित्वे कर्तव्ये ।

तथा च वार्तिकाकारमते सूत्रप्रत्याख्यानप्रकारो भाष्यकारमते सूत्रस्वीकारप्रकारश्च वर्णितः । तद्यथा – वार्तिककारमते सूत्रप्रत्याख्यानप्रकारः – एवं स्थिते ' द्विर्वचनं यणयवायावादेशाल्लोपोपधा-लोपणिलोपकिकिनोरुत्वेभ्यः ' इति वचनं पठद्भिर्वार्तिककारैः सूत्रमिदं प्रत्याख्यातम् । ' चक्रतुः ' इत्यादौ यणाद्यादेशापेक्षया पूर्वविप्रतिषेधाश्रयणेन द्वित्वमेव प्रवर्तते । अतः " द्विर्वचनेऽचि " इति सूत्रं विनाप्यभीष्टार्थसिद्ध्या सूत्रमिदमनावश्यकमिति तदाशयः ।

अत्र भाष्यकारमते सूत्रस्वीकारप्रकारः – भाष्यकारमतरीत्या तु सूत्रमिदमावश्यकमेव । वार्तिककारोक्तरीत्यात्र विप्रतिषेधो न घटते एव । वार्तिककारवचनेऽल्लोपादीनां नित्यत्वेन द्वित्वस्यानित्यत्वेन च तुल्यबलत्वाभावात् । तुल्यबलविरोधे खलु विप्रतिषेधो घटते । किञ्च पूर्वविप्रतिषेधे सर्वत्र वचनस्यारम्भणीयतया वार्तिककारमते लाघवं नास्त्येव । किञ्च यदि तद्वचनम् अन्तरङ्गाणामपि बाधकं स्यात्तर्हि ' निनवनीयिषति ' इत्यादावभ्यासे उकारश्रवणापत्तिः । एतद्दोष-वारणाय वचनमिदमन्तरङ्गाणां कार्याणां न बाधकं किन्तु नित्यानामेवेति यद्युच्यते तर्हि ' नुनावयिषति ' इत्यादौ वृद्ध्यवादेशयोः प्रवर्तनाद् अभ्यासे इकारश्रवणापत्तिः । तद्बाधनाय उकारादेशो विधेय इत्यनवस्थाप्रसङ्गादत्यन्तं गौरवग्रस्तं वार्तिककारमतम् । अतो लाघवात् प्रकृतसूत्राभ्युपगम एव ज्यायान् । स्पष्टमिदं भाष्ये ।

" अदर्शनं लोपः " इत्यत्र दर्शनस्याभावोऽदर्शनम् ,अर्थाभावेऽव्ययीभावः इति दीक्षिताशयः । नागेशमते तु नञा नाव्ययीभावः किन्तु तत्पुरुष एव । अनयोः द्वयोः आशयं दर्शयित्वा विशदं समीक्षा कृता । शास्त्राद् अर्थाद्वा प्रसक्तस्य यददर्शनस्य समीक्षा कृता ।

" प्रत्ययस्य लुक्श्लुलुपः " इति सूत्रेऽस्मिन् प्रत्ययग्रहणं किमर्थम् ? " प्रत्ययलोपे प्रत्ययलक्षणम् " इति सूत्रे प्रत्ययस्य इत्यनुवृत्त्यैव सिद्धे आद्यप्रत्ययग्रहणमवयवलोपे मा भूदिति ज्ञापनार्थम्, द्वितीयग्रहणमुत्तरार्थम् ।

" प्रत्ययलोपे प्रत्ययलक्षणम् " इत्याचार्यो यद् द्वितीयप्रत्ययलक्षणं करोति, तेन ' वर्णाश्रये नास्ति प्रत्ययलक्षणम् ' इति ज्ञापितैषा परिभाषा इति ज्ञेया । प्रत्ययलक्षणसूत्रं विध्यर्थमिति वार्तिककारमतम्, नियमार्थमिति भाष्यकारमतम् । प्रत्ययलोपे प्रत्ययवद् इत्येव सिद्धे लक्षणग्रहणं प्रत्ययनिमित्तकमेव कार्यं भवति, न तु प्रत्ययस्थानिकमपि इत्यर्थलाभार्थम् । अर्थात् प्रत्ययं गृहीत्वा यदुच्यते तदेव प्रत्ययलक्षणम्, शब्दं गृहीत्वा यदुच्यते तन्न प्रत्ययलक्षणम् । तत्फलं च गवे हितं गोहितम्, ङिविभक्तौ परतोऽवादेशो न जात इत्यादिकमुक्त्वा प्रत्ययत्वाद् व्याप्यान्यतरधर्मावच्छिन्न-निमित्तताकमेव कार्यं प्रत्ययलक्षणेन भवति, न तु वर्णत्वव्याप्यधर्मावच्छिन्ननिमित्तताकमिति ।

" न लुमताङ्गस्य " इति सूत्रे ' लुमता ' इति पदग्रहणस्य ' अङ्गस्य ' इति पदग्रहणस्य च प्रयोजनं विवेचितम् । अस्मिन् सूत्रे अङ्गस्य इत्यत्र " स्वरितेनाधिकारः " इति वचनाद् अङ्गाधिकारस्थे कार्ये कर्तव्ये एवास्य सूत्रस्य प्रवृत्तिरिति वार्तिककाराशयः । भाष्यकारमते ते अत्र स्वरितत्वाभावेन वार्तिककारोक्तार्थो न स्वीक्रियते । किन्तु लुमता लुप्ते प्रत्यये यदङ्गं तस्याङ्गाधिकारीय तद्भिन्ने वा कार्ये कर्तव्ये प्रत्ययलक्षणं नास्तीत्येव सूत्रार्थः ।

“ अलोऽन्त्यात् पूर्व उपधा ” इति सूत्रे अल्ग्रहणस्यान्त्यविशेषणत्वे एव ‘ अलोऽन्त्यात्पूर्व ’ इति निर्देशो युज्येत, पूर्वविशेषणत्वे त्वसन्देहाय ‘ अन्त्यात्पूर्वोऽलः ’ इत्येव निर्देशेदिति नागेशाशयः ।

“ तस्मिन्निति निर्दिष्टे पूर्वस्य ” इति सूत्रे तदिति स्वतन्त्रः सर्वनामशब्दो न तु तस्यानुकरणत्वम् । अनुकरणं प्रायेण इति – पदप्रयोगापेक्षणेन परतन्त्रम् । तस्मिन्नितीति सूत्रे तच्छब्देन ‘ अचि ’ इत्यादीनि सप्तम्यन्तपदानि परामृश्यन्ते । ततश्च शब्दपदार्थकत्वेनानुकरणसाम्याद् मनोरमायां दीक्षितेन सप्तम्यन्तानामनुकरणमित्युक्तं तदापाततः रमणीयम् । अत्र सूत्रे प्रतिपादितांशे सत्सप्तमी इत्यत्र दीक्षितादयो भाष्यविरुद्धमेव व्याचक्षन्ते इत्यायातम् । तथापि एवमुपश्लेषोऽपि इति पक्षान्तरं स्वीकुर्वन् न दोषभाज इति वक्तुं शक्यते । पूर्वोक्तदोषान् मनसि निधाय पक्षान्तरश्रवणं औचित्यादिति मे मतिः ।

“ स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ” इत्यत्र शब्दः सञ्ज्ञा, शब्दस्य स्वं रूपं च सञ्ज्ञि । नव्यास्तु स्वं रूपं शब्दस्य सञ्ज्ञा स्यादित्याहुः । भाष्ये तु ‘ स्वं रूपम् ’ इति सूत्रं प्रत्याख्यातम् ।

“ अणुदित्सवर्णस्य चाप्रत्ययः ” इति सूत्रेऽप्रत्यय इत्यत्र प्रत्ययपदं यौगिकम् । अप्रत्ययः = अविधीयमान इत्यर्थ इति दीक्षितः । प्रत्ययपदं प्रत्ययपरं रूढमिति नागेशः । अस्य सूत्रस्य सञ्ज्ञासूत्रत्वं स्वीकृतं दीक्षितेन । नागेशेन तु नेदं सञ्ज्ञासूत्रं किन्तु विधिसूत्रमिदं स्वीकृतम् । ततश्च णित् प्रत्याहारविचार उदित्पदविषयविचारोऽप्रत्ययपदविचारश्च विस्तारेण वर्णितः । व्यक्तिपदार्थपक्षेऽप्राप्तसवर्णग्रहणाय सूत्रमिदम् । जातिपदार्थपक्षे अणुदित्सूत्रेऽण्ग्रहणं प्रत्याख्यातम् ।

“ तपरस्तत्कालस्य ” इत्यस्य तपरपदे पाणिनिना तन्त्रेण वैकशेषेण वोच्चारणमर्थद्वयमिह विवक्षितम् । अस्य सूत्रस्य नियमार्थत्वं विध्यर्थत्वं वेति महान् विचारः काशिकाकारादीनामभिप्रायो भट्टोजिदीक्षितानामभिप्रायो नागेशभट्टानामभिप्रायश्च विस्तारेण वर्णितः ।

“ आदिरन्त्येन सहेता ” इति सूत्रे आदिपदम्, अन्त्यपदम्, इत्पदञ्च स्वसदृशबोधकम् भवति । तस्य समीक्षा कृता ।

“ येन विधिस्तदन्तस्य ” इति सूत्रे येनेति करणे तृतीया इति सर्वे विद्वांस एकमत्या स्वीकुर्वन्ति । परञ्च कर्त्रधिष्ठितस्यैव करणत्वात् करणं कर्तृपरतन्त्रं भवतीति तृतीयया पारतन्त्र्यं लक्ष्यते । अत्र चाप्राधान्यं विशेषणत्वरूपं ग्राह्यम् । नहि शब्दस्य तदतिरिक्तमप्राधान्यं दृश्यते । एवञ्च विशेषणं तदन्तस्य सञ्ज्ञेति फलतीति दीक्षितादीनां मतम् । भाष्यादिविरोधात् सुब्विभक्तौ लक्षणाया अङ्गीकर्तुमशक्यत्वेन न तत्प्रणाल्या विशेषणत्वलाभ इति प्रकारान्यतरेण तल्लाभ इति नागेशभट्टादीनां मतम् । तत्र विधिशब्द कर्मसाधन इति कैयटादयः, भावसाधन इति नागेशादयः ।

एतावता **(क) अव्ययादिसञ्ज्ञाप्रकरणम् । (ख) लोपादिसञ्ज्ञाप्रकरणम् । (ग) उपसंहारश्च** इत्याख्यः चतुर्थोऽध्यायः सम्पूर्णः ।

अनया रीत्या तुरीयेऽस्मिन्नध्याये स्वरादिनिपातमव्ययम् ,तद्धितश्चासर्वविभक्तिः ,कृन्मेजन्तः , क्त्वातोसुन्कसुनः, अव्ययीभावश्च, शि सर्वनामस्थानम्, सुडनपुंसकस्य, न वेति विभाषा, इग्यणः सम्प्रसारणम्, आद्यन्तौ टकितौ, मिदचोऽन्त्यात् परः, एच इग्घ्रस्वादेशे, षष्ठी स्थानेयोगा, स्थानेऽन्तरतमः, उरण् रपरः, अलोऽन्त्यस्य, ङिच्च, आदेः परस्य, अनेकाल्शित्सर्वस्य, स्थानिवदादेशोऽनल्विधौ, अचः परस्मिन् पूर्वविधौ, न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु, द्विर्वचनेऽचि, अदर्शनं लोपः, प्रत्ययस्य लुक्श्लुलुपः, प्रत्ययलोपे प्रत्ययलक्षणम्, न लुमताङ्गस्य, अचोऽन्त्यादि टि, अलोऽन्त्यात् पूर्व उपधा, तस्मिन्निति निर्दिष्टे पूर्वस्य, तस्मादित्युत्तरस्य, स्वं रूपं शब्दस्याशब्दसञ्ज्ञा, अणुदित् सवर्णस्य चाप्रत्ययः, तपरस्तत्कालस्य, आदिरन्त्येन सहेता, येन विधिस्तदन्तस्य, वृद्धिर्यस्याचामादिस्तद्वृद्धम्, त्यदादीनि च, एङ् प्राचां देशे इत्येतानि सूत्राणि उपसंहारश्च समैक्षिषि ।

अन्ते उपयुक्तग्रन्थसूची दत्ता । सैषा स्थूलतया मदीया शोधप्रबन्धप्रणाली ।

- **प्रबन्धोपसंहारः**

एवं ब्रह्मदत्तजिज्ञासुना रचितस्य अष्टाध्यायीभाष्यप्रथमावृत्तिप्रथमपादस्य महाभाष्यदृष्ट्या समीक्षात्मकमध्ययनात्मकोऽयं शोधप्रबन्धः चतुर्ष्वध्यायेषु उपनिबद्धः । भाविनि काले इतोऽप्यधिकं सूक्ष्मतया अस्मिन् विषये परिशोधयितुकामानां मदीयोऽयं प्रबन्धो येन केनापि प्रकारेण साहाय्यं करिष्यतीति समाशास्महे । संस्कृतसमुपासकाः सुधियोऽनुसन्धित्सवश्च अस्मदीयप्रयासेन यदि समुपकृताः स्युश्चेद् निश्चितमेव धन्या वयम् । कालिदासस्येयं पङ्क्तिरत्र सुतरां गतार्थाऽत्र यत् –

आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥

अस्माभिः सर्वे संस्कृतसेविनो विद्वांसो मनीषिणः शोधार्थिनश्च प्रार्थ्यन्ते यत् ते स्वीयशोधलेख-प्रदानेन ननु अस्माकं कृतप्रयासं सफलं विधास्यन्ति । कथमपि संस्कृतस्य प्रचारः प्रसारश्च स्यादिति भवति अस्मदीयः प्रयासः । अयमपि प्रयत्नस्तथाविध एव । अस्मदीयप्रयासेनानेन संस्कृतज्ञा उपकृता भवेयुरिति एव ध्येयम् ।

साम्प्रतं मनीषिणो मनस्विनो विद्वांसः शोधकर्तारश्चास्माभिर्निवेद्यन्ते यत्ते विषयेऽस्मिन् स्वीय-विचारपुष्पैरस्मासु कृपान्विता भविष्यन्तीति समाशास्महे। तेषां विचाराणामुपरि निश्चितमेव वयं विचारं करिष्यामः।

करिष्यन्ति कृपां दोषान् प्रदर्श्य मामकान् बुधाः।
अल्पज्ञतां निराकुर्युरिति च मम प्रार्थना॥

इति प्राथनां कृत्वा विषयममुमुपसंहरन्तः सर्वावतारिणः श्रीहरेः पूज्यानां गुरुचरणानां साधूनाञ्च चरणकमलेषु उपाहरामः। अनेकशास्त्रनिष्णातैः व्याकरणाम्बुधेः पारमधस्तलं च स्पृष्टवद्भिः पण्डित-प्रकाण्डैः कर्तुं शक्येऽस्मिन् कर्मणि चापलाय संप्रेरितो मन्दमतिरहं यथाबुद्धि, यथाशक्ति परिश्रममकार्षमिति सप्रश्रयं निवेदयामि। तथापि तत्तद्ग्रन्थाशयाग्रहणे मम दोषाः स्युरेव। एवं तत्तद्विषय-परिशीलने संजाता पुनरुक्तिः तत्र तत्र स्पष्टप्रतिपत्तयेऽनुसृता विसन्धिता च इत्येवमादयो मदीया बुद्धिकृता अबुद्धिकृताश्च दोषाः क्षन्तव्या इति विदुषः प्रार्थये। एवमत्र साहाय्यप्रदातॄन् निखिलान् ग्रन्थकृत आचार्यान् प्रति शतशः कार्त्तज्ञं बिभर्मि। एवञ्चास्य शोधप्रबन्धस्य सम्यग् रचनायां मम अनुसन्धान-कार्यस्य आरम्भत एव यथावन्मार्गनिर्देशं संप्रदाय काले काले मम संशयमपाकृत्य लिखितप्रबन्धं सुसूक्ष्मं संशाध्य च महान्तमुपकारं कृतवन्तं श्रीगुरुवर्यं समादरणीयं डॉ. श्रीवाचस्पतिमिश्रमहोदयं प्रत्यपि शतशः कृतज्ञतां संबेभ्रीये। अज्ञानाद् भ्रमात् प्रमादाद् वा जातानां त्रुटीनां कृते भूयो भूयो क्षमां याचे, यथा तथा वाऽस्तु, अस्ति परं सारस्वत इति धिया क्षन्तव्योऽयं जनः। मनसा कर्मणा वाचा च येन केन प्रकारेणास्मिन् प्रबन्धे साहाय्यदातृभ्यः साधुवादान् प्रदाय निवेदनीयं समापयति तत्र भवताम्भवतां धीमतामाशिष्कामोऽहम्।

अन्ते तु सर्वावतारिणं सर्वेश्वरं परब्रह्मपूर्णपुरुषोत्तमं भगवन्तं श्रीस्वामिनारायणं वन्दामहे, यं ध्यायं ध्यायं कार्यमिदं पूर्तिमगात्। पुनरपि प्रार्थयामहे यत् सदैवासौ अस्मान् सर्वानपि संस्कृतकार्येषु नियोजयेदिति सम्प्रार्थ्य विरमामि।

श्रीमत्केतुयवाष्टकोणकमलस्वस्त्यूर्ध्वरेखासृणि-
भ्राजज्जम्बुफलाशनिश्रितलसद्दक्षाङ्घ्रिमब्जप्रभम्।
मत्स्यार्धेन्दुधनुस्त्रिकोणकलशव्योमोल्लसद्गोपद-
जुष्टादक्षपदं स्मरामि सहजानन्दं सदा तं मुदा॥

॥ इति चतुर्थोऽध्यायः॥

॥ सन्दर्भग्रन्थसूची ॥

एतच्छोधप्रबन्धनिर्माणाय न केवलं व्याकरणशास्त्रग्रन्था एव किन्तु वेदान्तग्रन्थानां पुराणेतिहासग्रन्थानां काव्यग्रन्थानां चाध्ययनस्यावश्यकता समुत्पन्ना। एतेषामध्ययनेनैव शोधप्रबन्धस्य विषयसम्पादनं विषयविश्लेषणं विषयप्रतिपादनञ्च सुसम्पन्नम् । एतेषु अधिकतया प्राचीनग्रन्था एव सन्ति। आधुनिका अपि केचन ग्रन्थाः परामृष्टाः । अधिकतया संस्कृत-व्याकरणग्रन्था एव स्वीकृताः । तत्र उपलब्धाः संस्कृतभाषायां स्थिताः, हिन्दीभाषायां स्थिताः ग्रन्थाश्च परिशीलिताः । एवं प्रबन्ध-निर्माणाय उपयुक्तानां ग्रन्थानाम्, ग्रन्थकर्तॄणाम्, तत्तद्ग्रन्थप्रकाशनसंस्थानाञ्च परिचयदानाय सन्दर्भोपयुक्तग्रन्थसूची अकारादिक्रमेण अत्र संदीयते।

1. **अमरकोशः,** ग्रन्थकर्ता – अमरसिंहः, रामाश्रमीव्याख्यासुधाधराव्याख्याद्वयोपेतः, चौखम्बा विद्याभवनम्, वाराणसी, 2011.
2. **अमरकोशः,** ग्रन्थकर्ता – अमरसिंहः, कृष्णमित्रविरचितया संस्कृतटीकया वैकुण्ठीहिन्दी-व्याख्या आङ्गलभाषानुवादेन च समलङ्कृतः, सम्पादकः – प्रो. सत्यदेवमिश्रः, जगदीश संस्कृत पुस्तकालय, जयपुरम्, 2005.
3. **अष्टाध्यायी-भाष्य-प्रथमावृत्तिः –** भागः1,2,3, ग्रन्थकर्ता – ब्रह्मदत्तजिज्ञासुः, रामलाल कपूर ट्रस्ट, रेवली, सोनीपत – (हरियाणा), 2010.
4. **अष्टाध्यायी,** ग्रन्थकर्ता – पाणिनिः, श्रीललितावृत्तिसंवलिता, वृत्तिरचयिता संपादकश्च – श्रीसिद्धार्थकृष्णः, श्रीकैलास विद्याप्रकाशनम्, कैलास आश्रम, ऋषिकेश, उत्तरांचल, 2005.
5. **अष्टाध्यायी (सूत्रपाठः),** ग्रन्थकर्ता – पाणिनिः, सम्पादकः – ब्रह्मदत्तजिज्ञासुः, रामलाल कपूर ट्रस्ट, रेवली, सोनीपत – (हरियाणा), 2010.
6. **अथर्ववेदः,** चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, 2014.
7. **अर्थविज्ञान और व्याकरण दर्शन,** ग्रन्थकर्ता – डॉ. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशनम्, वाराणसी, 2008.
8. **ऋग्वेदः,**चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, 2014.

9. **काठक संहिता.**

10. **काशिका,** ग्रन्थकर्तारौ – वामनजयादित्यौ, न्यासपदमञ्जरीभावबोधिनीव्याख्यात्रयोपेता, सम्पादकौ – डॉ. जयशङ्करलालत्रिपाठी, डॉ. सुधाकरमालवीयश्च, ताराबुक एजेन्सी, वाराणसी, 1985.

11. **काशिका,** ग्रन्थकर्तारौ – वामनजयादित्यौ, सट्टिपण-प्रकाश-हिन्दीव्याख्योपेता, व्याख्याकारः – श्रीनारायण मिश्रः, चौखम्बा प्रकाशनम्, वाराणसी, 2008.

12. **कौमुदीकल्पलतिका,** लेखकः – शुक्लश्रीवेणिमाधवशास्त्री, चौखम्बा संस्कृत सीरीज ओफिस, वाराणसी, 1934.

13. **छान्दोग्योपनिषद्,** प्रतिपदार्थदीपिका, प्रकाशिका, आनन्दभाष्यम्, सुबोधिनी इति व्याख्या-चतुष्टयोपेता, संस्कृत-संशोधन-संसत्, मेलकोटम्, 2009.

14. **छान्दोग्योपनिषद्,** मिताक्षरा हिन्दीव्याख्यासंवलितशाङ्करभाष्ययुता, सम्पादकः – स्वर्ण लाल तुली, कैलास विद्याप्रकाशनम्, ऋषिकेशः, उत्तराखण्डः, 2002.

15. **तैत्तिरीयप्रातिशाख्यः.**

16. **तैत्तिरीय संहिता.**

17. **दशपाद्युणादिवृत्तिः,** सम्पादकः – पण्डितश्रीयुधिष्ठिरमीमांसकः, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, 1997.

18. **निरुक्तम्,** ग्रन्थकारः – यास्कमुनिः, ऋज्वर्थाख्यव्याख्या-निरुक्तविवृत्तिव्याख्याद्वयोपेतम्, सम्पादकः – मुकुन्दझा शर्मा, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, 2012.

19. **निरुक्तम्,** ग्रन्थकारः – यास्कमुनिः, शशिप्रभाहिन्दीव्याख्योपेतम्, सम्पादकः – डॉ. जमुनापाठकः, चौखम्बा संस्कृत सीरीज ओफिस, वाराणसी, 2010.

20. **निरुक्तालोचनम्,** लेखकः – श्रीसत्यव्रतसामश्रमी

21. **न्यायकोशः**, ग्रन्थकर्ता – भीमाचार्यः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2011.

22. **न्यायसूत्रम्,** ग्रन्थकर्ता – श्रीमन्महर्षिगोतमः, सम्पादकः – श्रीनारायणमिश्रः, चौखम्बा संस्कृत भवनम्, वाराणसी, 2007.

23. **परिभाषेन्दुशेखरः,** ग्रन्थकर्ता – नागेशभट्टः, तत्त्वप्रकाशिकोपेतः, सम्पादकः – श्रीगोविन्द-शर्मा, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2012.

24. **परिभाषेन्दुशेखरः,** ग्रन्थकर्ता – नागेशभट्टः, सुबोधिनीहिन्दीव्याख्योपेतः, व्याख्याकारः – श्रीविश्वनाथमिश्रः, चौखम्बा सुरभारती प्रकाशनम्, 2005.
25. **परमलघुमञ्जूषा,** ग्रन्थकर्ता – नागेशभट्टः, भावप्रकाशिका – बालबोधिनीसंस्कृत-हिन्दीव्याख्योपेता, व्याख्याकारः सम्पादकश्च – डॉ. जयशङ्करलाल त्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2005.
26. **परमलघुमञ्जूषा,** ग्रन्थकर्ता – नागेशभट्टः, तत्त्वप्रकाशिका-संस्कृतहिन्दीव्याख्योपेता, व्याख्याकारः – पण्डित अलखदेवशर्मा, चौखम्बा संस्कृत सीरीज ओफिस, वाराणसी, 1974.
27. **परमलघुमञ्जूषा,** ग्रन्थकर्ता – नागेशभट्टः, किरणावली संस्कृत-हिन्दीव्याख्योपेता, व्याख्याकारः – आचार्यलोकमणिदाहालः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 1990.
28. **पाणिनीये अतिदेशानुशीलनम्,** ग्रन्थकर्ता – डॉ. श्रिष्टि लक्ष्मीनरसिंहः, राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः (आंध्रप्रदेशः), 2008.
29. **पारिभाषिकः,** लेखकः – आचार्यः प्रद्युम्नः, रामलाल कपूर ट्रस्ट, रेवली (सोनीपत – हरियाणा), 2001.
30. **पाणिनीयव्याकरणोदाहरणकोशः,** भागः – 1,2,3, लेखकः – वेङ्कटराजशर्मा, श्रीवत्साङ्काचार्यः, लक्ष्मीनरसिंहः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः (आंध्रप्रदेशः), 2006.
31. **पाणिनिशिक्षा,** ग्रन्थकर्ता – पाणिनिः, श्रीरुद्रप्रसाद अवस्थीकृत-स्वरवैदिकपङ्क्तिविवरण-सटिप्पण-प्रदीपसंस्कृतटीकासमेत-प्रह्लादहिन्दीव्याख्यासहिता, हिन्दीव्याख्याकारः सम्पादकश्च – गोस्वामी प्रह्लादगिरिः, चौखम्बा संस्कृत सीरीज ओफिस, वाराणसी, 2004.
32. **पाणिनिकालीन भारतवर्ष,** ग्रन्थकर्ता - वासुदेव शरण अग्रवाल, चौखम्बा विद्याभवनम्, वाराणसी, 1996.
33. **पाणिनीयतद्धितभागस्य विशिष्टमध्ययनम्,** ग्रन्थकर्ता – डॉ. श्रिष्टि लक्ष्मीधरशर्मा, राष्ट्रिय-संस्कृतविद्यापीठम्, तिरुपतिः, 2011.
34. **पाणिनिसूत्रार्थतत्त्वालोकः,** ग्रन्थकर्ता – डॉ.शिवकान्त झा, हंसा प्रकाशनम्, जयपुरम्, 2007
35. **पाणिनीयमिताक्षरा,** ग्रन्थकर्ता – श्रीमदन्नंभट्टः, chowkhamba sanskrit book depot, Benares, 1903.
36. **पुरुषसूक्तम्,** सम्पादकः, खगेन्द्राचार्यः, 1960.

37.**प्रौढमनोरमा**, ग्रन्थकर्ता – भट्टोजिदीक्षितः, शब्दरत्नव्याख्यासहिता इन्दुकलाहिन्दीव्याख्या विभूषिता च, सम्पादको हिन्दीव्याख्याकारश्च – डॉ. वैद्यनाथ झा, रचना प्रकाशनम्, जयपुरम्, 2012.

38.**प्रौढमनोरमा,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, लघुशब्दरत्नव्याख्यासहिता भावप्रकाशिका भावबोधिनी च संस्कृतहिन्दीव्याख्याद्वयोपेता, व्याख्याकारः सम्पादकश्च – डॉ. जयशङ्कर-लाल त्रिपाठी, कृष्णदास अकादमी, वाराणसी, 2002.

39.**प्रौढमनोरमा,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, शब्दरत्नव्याख्यासहिता बालप्रकाशिका-संस्कृत-हिन्दीव्याख्याद्वयोपेता, व्याख्याकारः सम्पादकश्च – डॉ. द्वारिकाप्रसादद्विवेदी, भारतीय विद्या संस्थानम्, वाराणसी, 2004.

40.**प्रौढमनोरमा,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, शब्दरत्नव्याख्यासहिता अनन्याहिन्दी-व्याख्योपेता, व्याख्याकारः – रमाकान्तपाण्डेयः, चौखम्बा विद्याभवनम्, वाराणसी, 2007.

41.**प्रौढमनोरमा,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, लघुशब्दरत्नव्याख्या, रत्नप्रकाशिका, भाव-प्रकाशिका, सरला इति टीकाचतुर्विभूषिता, चौखम्बा संस्कृत विद्या संस्थानम्, वाराणसी, 2003.

42.**प्रौढमनोरमा,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, लघुशब्दरत्नव्याख्या, ज्योत्सना, कुचमर्दिनी, प्रभाविभोपेता, सम्पादकः – पण्डितसदाशिवशास्त्री, चौखम्बा अमरभारती प्रकाशनम्, वाराणसी, 2011.

43.**फक्किकाप्रकाशः,** लेखकः – पण्डित श्रीकनकलालशर्मा, श्रीहरिकृष्णनिबन्धभवनम्, वाराणसी, 1950.

44.**बालमनोरमागर्भिततत्त्वबोधिनीलघुशब्देन्दुशेखरयोस्तुलनात्मकमध्ययनम्,** लेखकः – डॉ. हरिहरकृपालु त्रिपाठी, सम्पूर्णानन्द- संस्कृत-विश्वविद्यालयः, वाराणसी, 2007.

45.**बृहदारण्यकोपनिषत्,** प्रतिपदार्थदीपिका, प्रकाशिका, आनन्दभाष्यम्, सुबोधिनी इति व्याख्याचतुष्टयोपेता, संस्कृत-संशोधन-संसत्, मेलकोटम्, 2009.

46.**बृहदारण्यकोपनिषत्,** गोविन्दप्रसादिनी, विद्यानन्दी, कुमुदतोषिणी इति व्याख्यात्रयोपेता, श्री कैलास विद्याप्रकाशनम्, ऋषिकेशः, उत्तराखण्डः, 2011.

47.**बृहद्देवता,** ग्रन्थकर्ता – शौनकाचार्यः.

48.**ब्रह्मसूत्रम्,** भामतीटीकासहितम्, चौखम्बा सीरीज साहित्य, वाराणसी.

49. भविष्यपुराणम्, ग्रन्थकर्ता – भगवान् वेदव्यासः, अनुवादकर्ता – पण्डित बाबुराम उपाध्याय, प्रकाशकः – प्रभात मिश्र शास्त्री (प्रधान मंत्री) अल्हाबाद, 1994.

50. भाषावृत्तेः समीक्षात्मकमध्ययनम्, लेखकः – डॉ. भोला झा, एम. बी. पब्लिशर्स एण्ड डिस्ट्रीब्यूटर्स, जयपुरम्, 2003.

51. महाभाष्यम्, ग्रन्थकर्ता – पतञ्जलिः, हिन्दीव्याख्यासहितम्, व्याख्याकारः – युधिष्ठिरो मीमांसकः, रामलाल कपूर ट्रस्ट, बहालगढ, (सोनीपत – हरियाणा), 1992.

52. महाभाष्यनवाह्निकालोचनम्, ग्रन्थकर्ता – आचार्यविजयमित्रशास्त्री, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2008.

53. महाभाष्यनिगूढाकूतयः, ग्रन्थकर्ता – प. देवस्वरूपमिश्रः, सम्पूर्णानन्द-संस्कृत-विद्यालयः, वाराणसी, 1978.

54. महाभाष्य-समीक्षणम्, लेखकः – डॉ. गिरीशचन्द्रत्रिपाठी, श्रीबटुकप्रकाशनम्, हरिद्वार, 1987.

55. मालविकाग्निमित्रम्, प्रकाशसंस्कृत-हिन्दीटीकोपेतम्, चौखम्बा संस्कृत सीरीज ओफिस, वाराणसी.

56. मीमांसासूत्रम्, ग्रन्थकर्ता – महर्षि जैमिनी.

57. मुण्डकोपनिषत्, प्रतिपदार्थदीपिका, प्रकाशिका, आनन्दभाष्यम्, सुबोधिनी इति व्याख्या-चतुष्टयोपेता, संस्कृत-संशोधन-संसत्, मेलकोटम्, 2005.

58. मुण्डकोपनिषत्, टिप्पणीद्वयशाङ्करभाष्योपेता, सम्पादकौ – डॉ. उमेशानन्द शास्त्री, स्वामी भास्करसंविद् गिरिजी च, कैलास विद्या प्रकाशनम्, ऋषिकेशः, उत्तराखण्डः, 2013.

59. मैत्रायणी संहिता.

60. यजुर्वेदः, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, 2014.

61. योगविभागविमर्शः, ग्रन्थकर्ता – डॉ. किशोरचन्द्रपाढी, भारतीय बुक कार्पोरेशन, दिल्ली, 2001.

62. योगसूत्रम्, रहस्यदीपिकाटीकासहितम्, टीकाकारः – श्रीमन्नथुरामशर्मा, श्री आनन्दाश्रम बिलखा, 1999.

63. वाल्मीकीय रामायण, ग्रन्थकर्ता – महर्षिवाल्मीकिः, गुजराती अनुवादसहित, गीताप्रेस, गोरखपुर, 2013.

64. **वाक्यपदीयम्,** ग्रन्थकर्ता – भर्तृहरिः, स्वोपज्ञवृत्तिः, अम्बाकर्त्रीव्याख्याद्वयोपेतम्, व्याख्याकारः सम्पादकश्च – पण्डितश्रीरघुनाथशर्मा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, 2006.

65. **वाक्यपदीयम्,** ग्रन्थकर्ता – भर्तृहरिः, द्रव्येशझाप्रणीता प्रत्येकार्थप्रकाशिका, पण्डित-वेदानन्दझाप्रणीता आनन्दा, सूर्यमाया चेति टीकात्रयसंवलितम्, मन्दाकिनी संस्कृत विद्वत्परिषद्, दिल्ली, 2002.

66. **वात्स्यायनभाष्यम्,** ग्रन्थकर्ता – वात्स्यायनमुनिः, सम्पादकः – श्रीनारायणमिश्रः, चौखम्बा संस्कृत भवनम्, वाराणसी, 2007.

67. **वैयाकरणसिद्धान्तचन्द्रिका,** ग्रन्थकर्ता – पण्डितश्रीरामाश्रमः, सुबोधिनीतत्त्वदीपिका-व्याख्याद्वयोपेता सा च चक्रधराटिप्पण्या अव्ययार्थमालया चालङ्कृता, चौखम्बा संस्कृत संस्थानम्, वाराणसी, 1985.

68. **व्याकरणमहाभाष्यम्,** ग्रन्थकर्ता – पतञ्जलिः, प्रदीपोद्द्योतव्याख्याद्वयसहितम्, पण्डित-श्रीरूद्रधरझाशर्मणाप्रणीतया तत्त्वालोकटीकया समुल्लसितञ्च, चौखम्बा प्रकाशनम्, वाराणसी, 2010.

69. **व्याकरणमहाभाष्यम्,** ग्रन्थकर्ता – पतञ्जलिः, प्रदीपोद्द्योतव्याख्याद्वयसहितम्, श्रीभार्गव-शास्त्रिणा टिप्पणीपाठभेदादिसंयोजनपुरःसरं संशोधितञ्च, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, 1992.

70. **व्याकरण – महाभाष्यम् (तत्र प्रथमं पस्पशाह्निकम्),** ग्रन्थकर्ता – पतञ्जलिः, सम्पादकः – डॉ. कमलेशकुमार छ. चोकसी, सरस्वती पुस्तक भंडार, अमदावाद, 2006.

71. **व्याकरणमहाभाष्यम्,** ग्रन्थकर्ता – पतञ्जलिः, ‘ सप्रदीप ’ भावबोधिनीहिन्दीव्याख्योपेतम्, हिन्दीव्याख्याकारः – प्रो. जयशङ्करलाल त्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, 1998.

72. **व्याकरणमहाभाष्यम् (मूलमात्रम्),** ग्रन्थकर्ता – पतञ्जलिः, सम्पादकः – आत्मदेव मिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2010.

73. **વ્યાકરણમહાભાષ્યનવાહ્નિક**, ગ્રન્થકર્તા – પતઞ્જલિ, સટીક ગુજરાતી અનુવાદ, ટીકા અને અનુવાદકર્તા – પ્રદ્યુમ્નસંગરાયવોરા, પ્રકાશક – જિતેન્દ્ર બી. શાહ, નિયામક – લાલભાઇ દલપતભાઇ ભારતીયસંસ્કૃતિવિદ્યામંદિર, અમદાવાદ, 2004.

74. **व्याकरणसिद्धान्तकौमुदी,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, बालमनोरमातत्त्वबोधिनी-व्याख्याद्वयोपेतः, सम्पादकः – गिरिधरशर्मा परमेश्वरानन्दशर्मा च, मोतीलाल बनारसीदास, वाराणसी, 2010.

75. **व्याकरणसिद्धान्तकौमुदी,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, श्रीधरमुखोल्लसिनी, हिन्दीव्याख्यासमन्विता, व्याख्याकारः – श्रीगोविन्दाचार्यः, सम्पादिका – लक्ष्मी शर्मा, चौखम्बा सुरभारती प्रकाशनम्, वारणसी, 2013.

76. **व्याकरणसिद्धान्तकौमुदी,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, बालमनोरमाव्याख्या अर्थप्रकाशिकानामिका विस्तृतहिन्दीव्याख्या तथा संस्कृतरूपसिद्धिः सहिता, व्याख्याकारः – डॉ. अर्कनाथ चौधरी, जगदीश संस्कृत पुस्तकालय, जयपुरम्, 2013

77. **व्याकरणसिद्धान्तकौमुदी,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, सविमर्शरत्नप्रभाहिन्दीव्याख्या-सहिता, व्याख्याकारः सम्पादकश्च – श्रीबालकृष्णपञ्चोली, चौखम्बा संस्कृत संस्थानम्, वाराणसी, 2003.

78. **व्याकरणसिद्धान्तकौमुदी,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, लक्ष्मीव्याख्ययोपेता, व्याख्याकारः – पण्डितश्रीसभापतिशर्मोपाध्यायः, सम्पादकः – श्रीबालकृष्णपञ्चोली, मोतीलाल बनारसीदासः, 1966.

79. **व्याकरणसिद्धान्तसुधानिधिः,** भागः – 1, ग्रन्थकर्ता – आचार्यश्रीविश्वेश्वरसूरी, सम्पादकः – सत्यप्रकाशः दुबे, राजस्थान – पत्रिका, 1995.

80. **व्याकरणसिद्धान्तसुधानिधिः,** भागः – 2, ग्रन्थकर्ता – आचार्यश्रीविश्वेश्वरसूरी, सम्पादकः – डॉ. सत्यप्रकाशः दुबे, राजस्थान-संस्कृत-अकादमी, जयपुरम्, 2006.

81. **व्याकरणसिद्धान्तकौमुदी पङ्क्तिपदार्थविवरणरूपा टीका भावबोधिनी,** विवरणकारः – आचार्यकरपुटुगलश्रीधर्मश्री, डी. डी. जयसिंह वैद्यशास्त्रिणा, एल्वर्ट विक्टर्वेन्ड्रिन् इन्सपेक्टर महोदयेन च वाराणस्यां विद्याविलाशमुद्राणासये मुद्रापिता प्रकाशिका च, 1925.

82. **व्याकरणसिद्धान्तपङ्क्तिप्रकाशिका,** लेखकः – डॉ. रमाकान्तपाण्डेयः, चौखम्बा संस्कृत पुस्तकालय, वाराणसी, 2011.
83. **व्याकरणशास्त्र का इतिहास,** ग्रन्थकर्ता - श्रीयुधिष्ठिरमीमांसकः, रामलालकपूरट्रस्ट, बहालगाढ (सोनीपत – हरियाणा).
84. **व्याकरणशास्त्र का इतिहास,** ग्रन्थकर्ता - श्रीयुधिष्ठिरमीमांसकः, चौखम्बा पब्लिशर्स, वाराणसी, 2003.
85. **व्याकरणदर्शनभूमिका,** लेखकः – रामाज्ञापाण्डेयः, सम्पादकः – श्रीगौरीनाथशास्त्री, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, 1982.
86. **राजतरङ्गिणी,** लेखकः – कल्हणः, हिन्दीटीकासहिता, टीकाकारः – रामतेजपाण्डेयः, चौखम्बा संस्कृत सीरीज ओफिस, वाराणसी.
87. **लघुशब्देन्दुशेखरः,** ग्रन्थकर्ता – नागेशभट्टः, भैरवीचन्द्रकलाटीकाद्वयसहित वैकुण्ठी हिन्दीव्याख्यासमलङ्कृतः, सम्पादकौ – डॉ. शिवप्रसादशर्मा आचार्यश्रीनिवासशर्मा च, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2006.
88. **लघुशब्देन्दुशेखरः,** ग्रन्थकर्ता – नागेशभट्टः, राधिका-संस्कृत-हिन्दीव्याख्याद्वयोपेतः, व्याख्याकर्ता – श्रीब्रह्मदत्तद्विवेदी, चौखम्बा संस्कृत सीरीज ओफिस, वाराणसी, 2008.
89. **लघुशब्देन्दुशेखरः,** ग्रन्थकर्ता – नागेशभट्टः, सुबोधिनीहिन्दीव्याख्योपेतः, व्याख्याकर्ता – आचार्यविश्वनाथ मिश्रः, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, 2012.
90. **लघुशब्देन्दुशेखरः,** ग्रन्थकर्ता – नागेशभट्टः, अभिनवचन्द्रिका, चिदस्थिमाला, ज्योत्स्ना, विषमपदविवृत्ति, विजया, वरवर्णिनी इति षट्टीकासंवलितः, सम्पादकः – प्रो. बालशास्त्री, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2013.
91. **लघुशब्देन्दुशेखरः,** ग्रन्थकर्ता – नागेशभट्टः, चन्द्रिका, मञ्जरी, शेखरटिप्पणी इति व्याख्यात्रयोपेतः, सम्पादकः – आचार्यः श्रीपाद सत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 2008.
92. **लघुशब्देन्दुशेखरः,** ग्रन्थकर्ता – नागेशभट्टः, भावबोधिनी-बालबोधिनीव्याख्याद्वयोपेतः, सम्पादकः – आचार्यः श्रीपाद सत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 2005.
93. **लघुशब्देन्दुशेखरः,** ग्रन्थकर्ता – नागेशभट्टः, शेखरदीपिकाव्याख्यासहितः, व्याख्याकारः – श्रीनित्यानन्दपन्तपर्वतीयः, चौखम्बा संस्कृत संस्थानम्, 1984.

94. **लघुसिद्धान्तकौमुदी,** ग्रन्थकर्ता – वरदराजाचार्यः, दाधिमथीटिप्पण्यालङ्कृता, सम्पादकः – आचार्यः विजयकुमारः, चौखम्बा विद्या भवनम्, वाराणसी, 2009.

95. **लघुसिद्धान्तकौमुदी,** ग्रन्थकर्ता – वरदराजाचार्यः, टिप्पणीसहिता, सम्पादकौ – श्रीनारायणदत्तत्रिपाठी श्रीरामनारायणदत्तशास्त्री च, गीताप्रेस गोरखपुर, 2010.

96. **लघुसिद्धान्तकौमुदी,** ग्रन्थकर्ता – वरदराजाचार्यः, भैमीव्याख्योपेता, व्याख्याकारः – भीमसेन शास्त्री, भैमीप्रकाशनम्, दिल्ली, 2000.

97. **सर्वदर्शनसङ्ग्रहः,** लेखकः – वासुदेवशास्त्री, दर्शनाङ्कुराव्याख्योपेतः, चौखम्बा संस्कृत सीरीज ओफिस, वाराणसी.

98. **संस्कृतशास्त्रमञ्जूषा,** ग्रन्थकर्ता – डॉ. उदयशङ्कर झा, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2012.

99. **संस्कृतवाङ्मयम्,** ग्रन्थकर्ता – हरिकृष्णशास्त्रिदातारः, कीर्तिसौरभप्रकाशनम्, वाराणसी, 1989.

100. **सामवेदः,** चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, 2014.

101. **सिद्धान्तकौमुदी,** ग्रन्थकर्ता – भट्टोजिदीक्षितः, तत्त्वबोधिनीव्याख्यासहिता, शिवदत्त-विरचितटिप्पणीभिश्च समन्विता, चौखम्बा विद्या भवनम्, वाराणसी, 2011.

102. **सिद्धान्तकौमुदी**, ग्रन्थकर्ता – भट्टोजिदीक्षितः, बालमनोरमाव्याख्यया समलङ्कृता सैव दीपिकाख्य – हिन्दीव्याख्ययोपेता च, व्याख्याकारः – गोपालदत्तपाण्डेयः, चौखाम्बा सुरभारती प्रकाशनम्, वाराणसी, 1999.

103. **स्वरसिद्धान्तचन्द्रिका.**

104. **श्रीमद्भागवतम्,** ग्रन्थकर्ता – भगवान् वेदव्यासः, गुजराती व्याख्यासहितम्, सम्पादकौ – द्वारकादास बी. भट्टः जयेश रावल च, गीताप्रेस गोरखपुर, 2005.

105. **शब्दकौस्तुभः,** ग्रन्थकारः – भट्टोजिदीक्षितः, सम्पादकौ – गोपालशास्त्री मुकुन्दशास्त्री च, चौखम्बा संस्कृत सीरीज ओफिस, 1991.

106. **शब्दकौस्तुभः,** ग्रन्थकारः – भट्टोजिदीक्षितः, प्रभा-भावप्रदीपव्याख्याद्वयोपेतः, सम्पादकः – श्रीपाद सत्यनारायणमूर्तिः, राष्ट्रिय संस्कृत विद्यापीठम्, तिरुपतिः, 2011.

107. **शतपथब्राह्मणम्.**